कर्णपर्व पत्रे १९३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१

ॐ श्रीगणेशाय नमः नरनारायणौ नत्वा प्राचीनाचार्यवर्त्मना कर्णपर्वार्थविद्योती भावदीपो वितन्यते १ नन्व
विराटादिपर्वचतुष्टयतात्पर्यक्रमेणार्थलब्धानामर्थः सेवयानीसाकपटपूर्वकेण कुलहृद्ववधेन स्वप्रा
माल्तपूर्वकेण महागुरुवधेन च सिध्यतीत्युक्तं तावतैवार्थनिरूपणसमाप्तेः अतः परं काममोक्षावेव
निरूपणीयाविति कर्णपर्वादित्रयं नारंभणीयमिति चेत् सत्यं यथा धर्मार्थौ निरूपितौ एवं धर्माभासो
र्थाभासश्च निरूपणीयः परिहाराय एवमधर्मानर्थौ अधर्माभासानर्थाभासौ च निरूपणीयौ हानाय उपा
दानाय च तदर्थमुत्तरग्रंथः काममोक्षयोः शागावप्रपकः तत्र चोरेभ्यः कार्पटिकमार्गमुपदिशन्नः स

ॐ श्रीगणेशाय नमः नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरये
त् १ वैशंपायन उवाच ततो द्रोणे हते राजन् दुर्योधनमुखा नृपाः भृशमुद्विग्नमनसो द्रोणपुत्रमुपा
गमन् १

स्ववादिनः सत्यवदनं धर्माभासः एवं अविचार्य ब्राह्मणवत्त्वधंगात्संग्रामोद्यायस्माद्धिंस्रत्वमधर्माभा
सः तथा शोकहेतुनाकुलक्षयेण प्राप्तोऽर्थोऽर्थाभासः स्वप्नान्नाहननमधर्मः तत्कृतोपत्यापत्तोभि
भवोऽनर्थः शरणागतस्य सैनिकजनार्थमन्यायेनापि कृतो ब्रह्मवधो न इतरब्रह्मवधवदनर्थः
अपि त्वनर्थाभास एव न च तेन ब्रह्महा भवेदित्याततायिवधे दोषाभावस्मरणात् एषामर्थानां निरूप
णार्थ उत्तरः संदर्भः आख्यायिकानुसत्वप्रतिपत्त्यर्था तस्मादिदमपि पर्वत्रयं आवश्यकमेव ततो द्रोणे हते राज १

निमग्नानपि प्लवमानान्जीवितेस्मयाचेष्टांकुर्वाणान् १९ २२ दिष्टंदैवोपाहृतेअभावितःस्वरवस्याशांशोभावितोद्यु
स्मस्याशंशोवाबुधोनव्यथतेततहिपर्ययेवाहृष्यतीत्यर्थः २४ २६ दिष्टंअवश्यंभावि २७ द्वितीयः हतेअस्वस्थ्य।

दुर्योधनस्यकर्णस्यभोजस्यकृतवर्मणः मद्रराजस्यशल्यस्यद्रौणेश्चैवकृपस्यच २० ममपुत्रस्यचशेष
स्यतथान्येषांचसंजय विप्रकुर्वत्स्वनीकेषुमुख्यवर्णोभवत्कथं २१ एतत्सर्वंयथावृत्तंतथागावल्गणेम
म आचक्ष्वपांडवेयानांमामकानांचविक्रमं २२ संजयउवाच नवापराधायद्धत्वंकौरवेयेषुमारिष
नदुःखितोमाव्यथाकर्षीर्दिष्टेनव्यथतेबुधः २३ यस्माद्भावीभावीवाभवेदर्थोनरंप्रति अप्राप्तौत
स्यवाप्राप्तौनकश्चिद्व्यथतेबुधः २४ धृतराष्ट्रउवाच नव्यथाभ्यधिकाकाचिद्विद्यतेममसंजयदि
ष्टमेतत्पुरामन्येकथयस्वयथेप्सितं २५ इतिश्रीमहाभारतेकर्णपर्वणि १ संजयउवाच हतेद्रो
णेमहेष्वासेतवपुत्रामहारथाः बभूवुरस्वस्थमुखाविषण्णागतचेतसः १ अवाङ्मुखाःशस्त्र
भृतःसर्वएवविशांपतेअवेक्षमाणाःशोकार्त्तानाभ्यभाषन्परस्परं २ तान्दृष्ट्वाव्यथिताकारान्
सैन्यानितवभारत ऊर्ध्वमेवनिरैक्षन्तदुःखत्रस्तान्यनेकशः ३ शस्त्राण्येषांतुराजेंद्रशोणिताक्ता
निसर्वशः प्राभ्रश्यंतकराग्रेभ्योदृष्ट्वाद्रोणंहतंयुधि ४ ॥

मुखाःदीनवदनाः १ २ ऊर्ध्वंऊर्ध्वगमनमेवनत्वधोवस्थान् ३ ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.टी.
४

हतस्यानां धूम्रोरिष्टस्तु चक्रउक्तं एवं बहूनां बंधश्रेष्ठिलमयीस्याहतानीति दिविस्थितानि पतमानानि
नक्षत्राणीव श्रेयोमुखोन्याहस्यंते त्वर्थः ५ स्तिमितं सल्यं पतोगतसत्त्वं उद्दिश्य चिंते ६ ७ वध्यंति वध्ये
तानि हंतान्यरिष्टानि लंबमानानि भारत स्रहस्यंत महाराजन नक्षत्राणि यथा दिवि ५ तथा तु स्ति
मितं दृष्ट्वा गतसत्त्वमवस्थितं बलं तव महाराज राजा दुर्योधनोब्रवीत् ६ भवतां बाहुवीर्यं हि
समाश्रित्य मया युधि पांडवेयाः समाहूता युद्धं चेदं प्रवर्तितं ७ तदिदं निहते द्रोणे विषण्णमिव
लक्ष्यते युध्यमानाश्च समरे योधा वध्यंति सर्वशः ८ जयो वापि वधो वापि युध्यमानस्य संयुगे भ
वेत्किमत्र चित्रं वै युध्यध्वं सर्वतोमुखाः ९ पश्यध्वं च महात्मानं कर्णं वैकर्तनं युधि प्रचरंतं म
हेष्वासं दिव्यैरस्त्रैर्महाबलं १० यस्य वै युधि संत्रासात् कुंतीपुत्रो धनंजयः निवर्तते सदा मंदः
सिंहात्क्षुद्रमृगो यथा ११ येन नागायुतप्राणो भीमसेनो महाबलः मानुषेणैव युद्धेन तामवस्थां
प्रवेशितः १२ येन दिव्यास्त्रविच्छूरो मायावी स घटोत्कचः अमोघया रणे शक्त्या निहतो भैरवं नदन् १३
तस्य दुर्वारवीर्यस्य सत्यसंधस्य धीमतः बाह्वोर्द्रविणमत्यंतमक्षय्यं द्रक्ष्यथ संयुगे १४ द्रोणपुत्रस्य वि
क्रांतं राधेयस्यैव चोभयोः पश्यंतु पांडुपुत्रास्ते विलवास्सवयोरिव १५ सर्व एव भवंतश्च शक्ताः
प्रत्येकशोपि वा पांडुपुत्रान् रणे हंतुं ससैन्यान् किमु संहताः १६ ॥ ते पौरैरितिशेषः ९ किमत्र चित्रं तत्र
पांडवैर्जितं चेत्तैस्तदाश्चर्यं ९ अस्माकमसकृज्जयो जातः इत्याह पश्यध्वमित्यादि १०।११ तो द्रोणपर्व सिंहा ॥ १२ ॥

४

इस्यथदर्शयिष्यत १९ १९ अग्रेपुंखेषु संसक्ता प्रेर्यमाणस्य शरस्याग्रेण पुंखेषु प्रेरितेषु पुंखेन संसक्ताः इषुधाराः
सहवीनिरेषु संधानादविछिन्नप्रवाहाः इत्यर्थः २० पीडयित्वाहत्वेत्यनेककर्तृकेपिक्काप्रत्ययश्छांदसः अमे
वीर्यवंतः कृतास्त्राश्च इत्यायापरस्परं १९ संजयउवाच एवमुक्त्वाततः कर्णश्चक्रे सेनापतिं तदा त
वपुत्रो महावीर्यो भ्रातृभिः सहितोनघ १७ सेनापत्यमवाप्याथ कर्णो राजन्महारथः सिंहनादं विन
द्योच्चैः प्रायुध्यत रणोत्कटः १८ संसृंजयानां सर्वेषां पांचालानां च मारिष केकयानां विदेहानां च का
रकदनं महत् १९ तस्येषुधाराः शतशः प्रादुरासंछरासनात् अग्रेपुंखेषु संसक्ता यथा भ्रमरपंक्तयः
२० सपीडयित्वा पांचालान्पांडवांश्च तरस्विनः हत्वा सहस्रशो योधानर्जुनेन निपातितः २१ इतिश्री
महाभारते कर्णपर्वणि संजयवाक्ये नामाध्यायः २२ वैशंपायनउवाच एतच्छ्रुत्वा महाराज धृतरा
ष्ट्रोंबिकासुतः शोकस्यांतमपश्यन्वै हतं मेने सुयोधनं १ विह्वलः पतितो भूमौ नष्टचेता इव द्विपः
तस्मिन्निपतिते भूमौ विह्वले राजसत्तमे २ आर्तनादो महानासीत्स्त्रीणां भरतसत्तम स शब्दः पृ
थिवीं कृत्स्नां पूरयामास सर्वशः ३ शोकार्णवे महाघोरे निमग्ना भरतस्त्रियः रुरुदुः स्वशोकार्ता भृ
शमुद्विग्नचेतसः ४ राजानं च समासाद्य गांधारी भरतर्षभ निःसंज्ञा पतिता भूमौ सर्वाण्यंतःपुरस्त्रियः
५ ततस्ताः संजयो राजन्समाश्वासयदातुराः मुह्यमानाः सुबहुशो मुंचंत्यो वारि नेत्रजं ६ ॥ भ्योपिदृष्टं
नेइतिवनिर्वर्ततेवाणावद्धये पीडयन्निद्रन्नितिवार्थः २१ इति कर्णपर्वणि द्वितीयः एतत् १ विह्वलः चलनासम

कदल्यइववेपमानाग्रामंनितिशेषः १८ दृष्ट्वामनसैवात्मप्रत्ययेन दुःखवतीर्त्तीत्वा ४ ५ जीवन्तो
भद्रशातानिपश्येदितिमनसिनिधायाहयत्त्वयेति १३ जयेइतिइष्टवियोगमात्रेणादशरथ्यादिर्मृतः

समाश्वस्तास्त्रियस्तास्तुवेपमानामुहुर्मुहुः कदल्यइववातेनवेपमानाःसमंततः ७ राजानं
विदुरश्चापिप्रज्ञाचक्षुषमीश्वरं आश्वासयामासतदासिंचंस्तोयेनकौरवं ८ सलब्ध्वाशन
कैःसंज्ञांताश्चदृष्ट्वास्त्रियोनृपः उन्मत्तइवराजेंद्रस्थितस्तूष्णींविशांपते ९ ततोध्यात्वाचिरं
कालंनिश्वसंश्चपुनःपुनः स्वान्पुत्रान्गर्हयामासबहुमेनेचपांडवान् १० गर्हयंश्चात्मनो
बुद्धिंशकुनेःसौबलस्यच ध्यात्वातुसुचिरंकालंवेपमानोमुहुर्मुहुः ११ संस्तभ्यचमनोभू
योराजाधैर्यसमन्वितः पुनर्गावल्गणिंसूतंपर्यपृच्छतसंजय १२ यत्त्वयाकथितंवाक्यंश्रुतंसं
जयतन्मया कच्चिद्दुर्योधनःसूतनगतोवैयमक्षयं १३ जयेनिराशःपुत्रोमेसततंजयकामु
कः ब्रूहिसंजयतत्त्वेनपुनरुक्तांकथामिमां १४ एवमुक्तोब्रवीत्सूतोराजानंजनमेजय हतोवै
कर्तनोराजन्सहपुत्रैर्महारथः १५ भ्रातृभिश्चमहेष्वासैःसूतपुत्रस्तनुत्यजैः दुःशासनश्चनि
हतःपांडवेनयशस्विना १६ पीतंचरुधिरंकोपाद्भीमसेनेनसंयुगे १७ इतिश्रीकर्णपर्वणिधृत
राष्ट्रशोकोनाम १ वैशंपायनउवाच इतिश्रुत्वामहाराजधृतराष्ट्रोंऽबिकासुतः अब्रवीत्संजयंसू

श्रुत्वातनयेनैतावन्मधिकंमरणकारणमस्तीतिभावः उक्तोसंक्षेपेणपुनर्ब्रूहिविस्तरेण १४ १५ चतुर्थः इति १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दुःप्रणीतेनदुर्नयेनेनअदीर्घजीविनोल्पायुषः मयैवदुर्नीतात्पुत्रोमरणोन्मुखः कृतइतिभावं हत्वानिघ्नन् १

दुष्प्रणीतेनमेतातपुत्रस्यादीर्घदर्शिनः हतंवैकर्तनंश्रुत्वाशोकोमर्माणिकृंतति २ तस्यमेसंश
यंछिंधिदुःखपारंतितीर्षतः कुरूणांसृंजयानांचकेचजीवंतिकेमृताः ३ संजयउवाच हतः
शांतनवोराजन्दुराधर्षःप्रतापवान् हत्वापांडवयोधानामर्बुदंदशभिर्दिनैः ४ तथाद्रोणोमहे
ष्वासःपंचालानांरथव्रजान् निहत्ययुधिदुर्धर्षःपश्चाद्रुक्मरथोहतः ५ हतशेषस्यभीष्मेणद्रो
णेनचमहात्मनाअर्धंनिहत्यसैन्यस्यकर्णोवैकर्तनोहतः ६ विविंशतिर्महाराजराजपुत्रोमहा
बलः आनर्तयोधान्शतशोनिहत्यनिहतोरणे ७ तथापुत्रोविकर्णस्तेक्षत्रव्रतमनुस्मरन्
क्षीणवाहायुधःशूरःस्थितोभिमुखतःपरान् ८ घोररूपान्परिक्लेशान्दुर्योधनकृतान्बहून् प्र
तिज्ञांस्मरताचैवभीमसेनेनपातितः ९ विंदानुविंदावावंत्यौराजपुत्रौमहारथौ कृत्वात्वसु
करंकर्मगतौवैवस्वतक्षयं १० सिंधुराष्ट्रमुखानीहदशराष्ट्राणियानिह वशेतिष्ठंतिवीरस्य
यस्यस्थितस्तवशासने ११ अक्षौहिणीर्दशैकांचविनिर्जित्यशितैःशरैः अर्जुनेनहतोराजन्
महावीर्योजयद्रथः १२ तथादुर्योधनसुतस्तरस्वीयुद्धदुर्मदः वर्तमानःपितुःशास्त्रेसौभद्रेण
निपातितः १३ ॥

४ निहत्यैवदुर्धर्षइत्यन्वयः जातइतिशेषः ५ हतोगतःपरलोकमितिशेषःएवमग्रेपियोज्यं १८ १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तथादौःशासनिःशूरोबाहुशालीरणोत्कटः द्रौपदेयेनसंगम्यगमितोयमसादनं १४ किराता
नामधिपतिःसागरानूपवासिनां देवराजस्यधर्मात्माप्रियोबहुमतःसखा १५ भगदत्तोमहीपा
लःक्षत्रधर्मरतःसदा धनंजयेनविक्रम्यगमितोयमसादनं १६ तथाकौरवदायादोन्यस्त
शस्त्रोमहायशाः हतोभूरिश्रवाराजन्शूरःसात्यकिनायुधि १७ श्रुतायुरपिचांबष्ठःक्षत्रिया
णांधुरंधरः चरन्नभीतवत्संख्येनिहतःसव्यसाचिना १८ तवपुत्रःसदामर्षीकृतास्त्रोयुद्ध
दुर्मदः दुःशासनोमहाराजभीमसेनेनपातितः १९ यस्यराजन्गजानीकंबहुसाहस्रमद्भुतं
सुदक्षिणःससंग्रामेनिहतःसव्यसाचिना २० कोशलानामधिपतिर्हत्वाबहुमतान्परान्
सौभद्रेणेहविक्रम्यगमितोयमसादनं २१ बहुशोयोधयित्वातुभीमसेनंमहारथं चित्रसे
नस्तवसुतोभीमसेनेनपातितः २२ मद्रराजात्मजःशूरःपरेषांभयवर्धनः असिचर्मधरःश्री
मान्सौभद्रेणनिपातितः २३ समःकर्णस्यसमरेयःसकर्णस्यपश्यतः वृषसेनोमहातेजाःशी
घ्रास्त्रोदृढविक्रमः २४ अभिमन्योर्वधंश्रुत्वाप्रतिज्ञामपिचात्मनः धनंजयेनविक्रम्यगमितोयम
सादनं २५ नित्यंप्रसक्तवैरोयःपांडवैःपृथिवीपतिः विश्राव्यवैरंपार्थेनश्रुतायुःसनिपातितः २६ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ॥

शल्यपुत्रस्तुविक्रांतःसहदेवेनमारिष हतोरुक्मरथोराजन्भ्रातामातुलजोयुधि २७ राजाभ
गीरथोवृहत्क्षत्रस्तुकैकयः पराक्रमंतौविक्रांतौनिहतौवीर्यवत्तरौ २८ भगदत्तसुतोरा
जन्कृतप्रज्ञोमहाबलः श्येनवच्चरतासंख्येनकुलेननिपातितः २९ पितामहस्तवतथावा
ल्हिकःसहवाल्हिकैः निहतोभीमसेनेनमहाबलपराक्रमः ३० जयत्सेनस्तथाराजन्जारासं
धिर्महाबलः मागधोनिहतःसंख्येसौभद्रेणमहात्मना ३१ पुत्रस्तेदुर्मुखोराजन्दुःसहश्चमहा
रथः गदयाभीमसेनेननिहतौशूरमानिनौ ३२ दुर्मर्षणोदुर्विषहोदुर्जयश्चमहारथः कृ
त्वात्वसुकरंकर्मगतावैवस्वतक्षयं ३३ उभौकलिंगवृषकौभ्रातरौयुद्धदुर्मदौ कृत्वाचासु
करंकर्मगतौवैवस्वतक्षयं ३४ सचिवोवृषवर्मातेसूतःपरमवीर्यवान् भीमसेनेनवि
क्रम्यगमितोयमसादनं ३५ तथैवपौरवोराजानागायुतबलोमहान् समरेपांडुपुत्रेणनि
हतःसव्यसाचिना ३६ वसातयोमहाराजद्विसाहस्राःप्रहारिणः शूरसेनाश्चविक्रांताःसर्वेयु
धिनिपातिताः ३७ अभीषाहाःकवचिनःप्रहरंतोरणोत्कटाः शिवयश्चरथोदाराःकलिंगसहि
ताहताः ३८ गोकुलेनित्यसंवृद्धायुद्धेपरमकोपनाः तेपावृतकवीराश्चनिहताःसव्यसाचि
नाश्रेणयोबहुसाहस्राःस ।

क॰टि॰ ३९ ४० अपावृतकवीराः अपगतेऽग्रावृतं कंकुन्तिनं संग्रामात्पराववर्तने येषां ते संसप्तकसहचरा गोपाल
७
समकगणाश्च ये ते सर्वे पार्थमासाद्य गता वैवस्वतक्षयं साल्वो नव महाराज राजानो वृषकाच
लो त्वदर्थमतिविक्रान्तो निहतो सव्यसाचिना उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा शाल्व
राजो महाबाहुर्भीमसेनेन पातितः ३९ अभीषाहश्च महाराज शूरः सहितो रणे पराक्रमन्तो
मित्रार्थे गता वैवस्वतक्षयं तथैव रथिनां श्रेष्ठः क्षेमधूर्तिर्विशाम्पते निहतो गदया राजन्भीम
सेनेन संयुगे ४० तथा राजन्महेष्वासो जलसन्धो महाबलः सुमहत्कदनं कृत्वा हतः सात्यकि
ना रणे ४१ अलंबुषो राक्षसेंद्रः खरबंधुरयानवान् घटोत्कचेन विक्रम्य गमितो यमसादनं ४२
राधेयाः सूतपुत्राश्च भ्रातरश्च महारथाः केकयाः सर्वशश्चापि निहताः सव्यसाचिना ४३ मा
लवा मद्रकाश्चैव द्रविडाश्चोग्रकर्मिणः यौधेयाश्च ललित्थाश्च क्षुद्रकाश्चाप्युशीनराः ४४
मावेल्लकास्तुंडिकेराः सावित्रीपुत्रकाश्च ये प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च मारिष
४५ पत्तीनां निहताः संघा हयानां प्रयुतानि च रथव्रजाश्च निहता हताश्च वरवारणाः ४६ स
ध्वजाः सायुधाः शूराः सवर्माम्बरभूषणाः कालेन महता यत्ताः कुशलैर्ये च वर्द्धिताः ४७ ॥

काः ४१ ४२ ४३ ४४ ४५ ४६ ४७ ॥ ५ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ष्वरंबंधुरथानवान् ष्वरंतीरणं बंधुरंरमेयानं विद्यते यस्य ष्वैरे गर्दभैर्बंधुरंयानं अथ्यास्ते गर्दभसंयुक्तरथवान्
तेहतः समरे राजन्पार्थेनाक्लिष्टकर्मणा अन्येतथामितबलाः परस्परवधैषिणः ४८ एतेचान्येच
बहवो राजानः सगणा रणे हताः सहस्रशो राजन्यन्मां त्वं परिपृच्छसि ४९ एवमेष क्षयो वृत्तः क
र्णार्जुनसमागमे महेंद्रेण यथा वृत्रो यथा रामेण रावणः ५० यथा कृष्णेन नरको मुरश्च निहतो
रणे कार्तवीर्यश्च रामेण भार्गवेण यथा हतः ५१ सज्ञातिबांधवः शूरः समरे युद्धदुर्मदः रणंकृ
त्वा महायुद्धं घोरं त्रैलोक्यमोहने ५२ यथा स्कंदेन महिषो यथा रुद्रेण चांधकः तथार्जुनेन सह
तो द्वैरथे युद्धदुर्मदः ५३ सामात्यबांधवो राजन्कर्णः प्रहरतांवरः जयाशा धार्तराष्ट्राणां वैरस्य च
मुखं यतः ५४ तीर्णं तत्संप्रति वो राजन्यत्पुरा नावबुध्यसे उच्यमानो महाराज बंधुभिर्हितकांक्षि
भिः ५५ तदिदं समनुप्राप्तं व्यसनं सुमहात्ययं पुत्राणां राज्यकामानां त्वया राजन्हितैषिणा ५६
अहितान्येव चीर्णानि तेषां तत्फलमागतं इति श्रीमहाभारते कर्णपर्वणि संजयवाक्ये धृतराष्ट्र
उवाच आख्याता मामकास्तात निहता युधि पांडवैः हतांश्च पांडवेयानां मामकैर्ब्रूहि संजय १ संज
य उवाच कुंतयो युधि विक्रांता महासत्वा महाबलाः सानुबंधाः सहामात्या गांगेयेन निपातिताः २
वा ४८ क्रमेण नरकारिणा नरको मुरुश्च यथा येत्यन्वयः ४९ ५० ५१ कर्णस्तया हतस्तत्र कृष्यते ५८
पंचमः अध्यायः १ ॥ २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. ७ षड्भिर्द्रोणद्रौणिशल्यकर्णकृपकृतवर्मभिः परमैरथैः अतिरथैः महामात्रैः समस्तैः अशक्नुवद्भिरेकैक
८ नारायणावालभद्रः शूराश्च शतशोपरे अनुरक्ताश्च वीरेण भीष्मेण युधि पातिताः ३ समः किरीटि
नासंख्ये वीर्येण च बलेन च सत्यजित्सत्यसंधेन द्रोणेन निहतो युधि ४ पांचालानां महेष्वासाः
सर्वे युद्धविशारदाः द्रोणेन सह संग्राममागता वैवस्वतक्षयं ५ तथा विराटद्रुपदौ वृद्धौ सहसुतौ
तौ नृपौ पराक्रमंतौ मित्रार्थे द्रोणेन निहतौ रणे ६ यो बाल एव समरे संमितः सव्यसाचिना
केशवेन च दुर्धर्षो बलदेवेन वा विभो ७ परेषां कदनं कृत्वा महारथविशारदः परिवार्य म
हावीरैः षड्भिः परमकै रथैः ८ अशक्नुवद्भिर्वीभत्सुमभिमन्युर्निपातितः कृतं तं विरथं वीरं क्ष
त्रधर्मे व्यवस्थितं ९ दौःशासनिर्महाराज सौभद्रं हतवान् रणे सपत्नानां निहंता च महत्यासे
नया वृतः १० अंबष्ठस्य सुतः श्रीमान्मित्रहेतोः पराक्रमन् आसाद्य लक्ष्मणं वीरं दुर्योधनसुतं र
णे ११ सुमहत्कदनं कृत्वा गतो वैवस्वतक्षयं बृहंतः सुमहेष्वासः कृतास्त्रो युद्धदुर्मदः १२ दुःशा
सनेन विक्रम्य गमितो यमसादनं मणिमान्दंडधारौ च राजानौ युद्धदुर्मदौ १३ पराक्रमंतौ मित्रार्थे
द्रोणेन युधि पातितौ अंशुमान्भोजराजस्तु सहसैन्यो महारथः १४ भारद्वाजेन विक्रम्य गमितो यमसाद
नं सामुद्रश्चित्रसेनश्च सह पुत्रेण भारत १५॥
प्रयेन हंतमिति शेषः ८ ९ १० ११ १२ १३ १४ १५॥ ८

१८ रोचमानौ पकनामानौ भ्रातरौ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ॥
समुद्रसेनेनबलाद्गमितौयमसादनं अनूपवासीनीलश्चव्याघ्रदत्तश्चवीर्यवान् १९ अस्त्रस्याग्रा
विकर्णेनगमितौयमसादनं चित्रायुधश्चित्रयोधीकृत्वाचकदनंमहत् चित्रमार्गेणविक्रम्यवि
कर्णेनहतौमृधे वृकोदरसमोयुद्धेवृतःकेकययोधिभिः १७ केकेयेनचविक्रम्यभ्रात्राभ्राता नि
पातितः जनमेजयोगदायोधीपार्वतीयःप्रतापवान् १८ दुर्मुखेनमहाराजतवपुत्रेणपातितः
रोचमानौनरव्याघ्रौरोचमानौग्रहाविव १९ द्रोणेनयुगपद्राजन्दिवंसंप्रापितौशरैः नृपाश्चप्रति
युध्यंतःपराक्रांताविशांपते २० कृत्वानसुकरंकर्मगतावैवस्वतक्षयं पुरुजित्कुंतिभोजश्चमातु
लौसव्यसाचिनः २१ संग्रामनिर्जितांल्लोकान्गमितौद्रोणसायकैः अभिभूःकाशिराजश्चकाशिकै
र्वसुभिर्वृतः २२ वसुदानस्यपुत्रेणन्यासितोदेहमाहवे अमितौजायुधामन्युरुत्तमौजाश्चवीर्य
वान् २३ निहत्यशतशःशूरानस्मदीयैर्निपातिताः मित्रवर्माचपांचाल्यःक्षत्रधर्माचभारत २४
द्रोणेनपरमेष्वासौगमितौयमसादनं शिखंडितनयोयुद्धेक्षत्रदेवोयुधांपतिः २५ लक्ष्मणेनहतो
राजंस्तवपौत्रेणभारत सुचित्रश्चित्रवर्माचपितापुत्रौमहारथौ २६ प्रचरंतौमहावीरौद्रोणेननिह
तौरणे वार्द्धक्षेमिर्महाराजसमुद्रेपर्वणि २७ आयुधक्षयमासाद्यप्रशांतिंपरमांगतः सेनाबिंदु
सुतःश्रेष्ठःशस्त्रवान्प्रवरोयुधि २८ वाल्हीकेनमहाराजकौरवेंद्रेणपातितः धृष्टकेतुर्महाराज
चेदीनांप्रवरोरथः २९ कृत्वानसुकरंकर्मगतोवैवस्वतक्षयं तथासत्यधृतिर्वीरःकृत्वाकदनमाहवे

क॰टी॰
८

१८ षष्ठे ९ मामकस्यकृतोत्सेकस्यकेदाराद्व्रतिमापितोदकस्यत्वइस्मरमस्रावावशेषंनपश्यामि ककुदेमृथा
नवृषस्कंधेभीष्मद्रोणाकर्णाख्येमृदितेनाशितेसतिप्रमतिसृष्ठे २ शांतप्रांतमहस्रदृशाकेंग्रार्षेविभ

पांडवार्थेपराक्रांतोगमितोयममसादनं सेनाबिंदुःकुरुश्रेष्ठहत्वाकदनमाहवे ११ पुत्रस्तुशिशुपाल
स्यसुकेतुःपृथिवीपतिः निहतःशात्रवान्संख्येद्रोणेननिहतोयुधि १२ तथासत्यधृतिर्वीरोमदिराश्व
श्ववीर्यवान् सूर्यदत्तश्चविक्रांतोनिहतोद्रोणसायकैः १३ श्रेणिमांश्चमहाराजयुध्यमानःपराक्रमी
कृत्वानसुकरंकर्मगतोवैवस्वतक्षयं १४ तथैवयुधिविक्रांतोमागधःपरमास्त्रवित् भीष्मेणनि
हतोराजन्शेतेद्यपरवीरहा विराटपुत्रःशंखस्तूत्तरश्चमहारथः १५ कुर्वंतोसुमहत्कर्मगतो
वैवस्वतक्षयं वसुदानश्चकदनंकुर्वाणोतीवसंयुगे १६ भारद्वाजेनविक्रम्यगमितोयमसाद
नं एतेचान्येचबहवःपांडवानांमहारथाः १७ हताद्रोणेनविक्रम्ययन्मांत्वंपरिपृच्छसि इतिश्रीम
हाभारतेकर्णपर्वणिसंजयवाक्यं ६ धृतराष्ट्रः मामकस्यास्यसैन्यस्यहतशेषस्यसंजय अवशेषंन
पश्यामिककुदेमृदितेसति १ तौहिवीरौमहेष्वासौमदर्थेकुरुसत्तमौ भीष्मद्रोणौहतौश्रुत्वाना
र्थोवैजीवितेनमे २ नचशोचामिराधेयंहतमाहवशोभिनं यस्यबाह्वोर्बलंतुल्यंकुंजराणांशतं
शतं ३ ॥ ॐ

क्रियतस्यः कुंजराणामयुतेनतुल्यंबाह्वोर्बलंयस्यतस्यापिवधंनमृष्यामीतिनअपितुमृष्याम्येवमृ।
तत्रपितोभीष्मस्यताद्रशाद्योभयबलवतोद्रोणस्यचवधंकुर्वतांपरेषांकर्णवधस्यघटकरत्वादितिभावः २

मत्ताः मत्तप्रायाः चित्राणि अनेकनानायुधप्रसवत्तमाणि शुभ्राणि दीप्तिमंति चतुर्विधानि हस्तहस्तस्तशस्त्र
वेधीनि विहितानि धनुर्वेदोदितानि चित्रशुभ्रदिव्यविहितान्येववा चतुर्विधानि अत्रविहितानि कृत्रिमाणि
दिव्यानि च: अस्त्रांतरनिवर्त्यमाग्नेयादिनतिमात्रनिवर्त्यं नारायणास्त्रादि प्रयोक्तृकनिवर्त्यं ब्रह्मशिर आदि स

हतं प्रवरसैन्यं मे यथा शंससि संजय अहतानपि मे शंस केत्र जीवंति केचन ४ एतेषु हि मृतेष्वद्य
ये त्वया परिकीर्तिताः येपि जीवंति ते सर्वे मृताः इति मतिर्मम ५ संजय उवाच यस्मिन्महास्त्राणि सम
र्पितानि चित्राणि शुभ्राणि चतुर्विधानि दिव्यानि राजन्विहितानि चैव द्रोणेन वीरे द्विजसत्तमेन ६
महारथः कृतिमान्क्षिप्रहस्तो दृढायुधो दृढमुष्टिर्दृढेषुः सवीर्यवान्द्रोणपुत्रस्तरस्वी व्यवस्थितो यो
द्धुकामस्त्वदर्थे ७ आनर्तवासी हृदिकात्मजोसौ महारथः सात्वतानां वरिष्ठः स्वयं भोजः कृतवर्मा
कृतास्त्रो व्यवस्थितो योद्धुकामस्त्वदर्थे ८ आर्तायनिः समरे दुःप्रकंप्यः सेनाग्रणीः प्रथमस्तावका
नां यः स्वस्रीयान्पांडवेयान्विसृज्य सत्यां वाचं तां चिकीर्षुस्तरस्वी ९ तेजोवधं सूतपुत्रस्य संख्ये प्रति
श्रुत्वाजातशत्रोः पुरस्तात् दुराधर्षः शक्रसमानवीर्यः शल्यः स्थितो योद्धुकामस्त्वदर्थे १० आजाने
यैः सैंधवैः पार्वतीयैर्नदीजकांबोजवनायुजैश्च गांधारराजः स्वबलेन युक्तो व्यवस्थितो योद्धुकामस्त्वद र्थे

र्वैयाप्यनिवर्त्यं पाशुपतादि एवं चतुर्विधानि वीरे निहितानि समर्पितानि ६ कृतिमान् अवंध्ययत्नः ७ ८ आर्ता
यनिः शल्यः स्वस्रीयान्भागिनेयान् उभयोरेव भागिनेयत्वेपि लिंगसमवायात्सर्वेषां भागिनेयत्वं ९ १० ११॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.वी. तणभोजीपीत्त्रभोजी १८ नागपतिप्रयायीनागैः पत्तिभिश्चप्रयातंशीलमस्य नागरथप्रयायीतिपाठांतरं १९
१०
प्रारहतोगौतमश्चापिराजन्महाबाहूर्वङ्कविचित्रास्त्रयोधी यनश्चित्रेसुमहज्ञारसाहंव्यवस्थितोयोद्धु
कामःप्रगृह्य १२ महारथःकेकयराजपुत्रःसदश्वयुक्तंचपताकिनंच रथंसमारुह्यकुरुप्रवीर।
व्यवस्थितोयोद्धुकामस्त्वदर्थे १३ तथासुतस्तेज्वलनार्कवर्णंरथंसमास्थायकुरुप्रवीरःव्यवस्थि
तःपुरुमित्रोनरेंद्रव्यभ्रेसूर्योभ्राजमानोयथाच १४ दुर्योधनोनागकुलस्यमध्येव्यवस्थितः
सिंहइवाबभासेरथेनजांबूनदभूषणेनव्यवस्थितःसमरेयोत्स्यमानः १५ सराजमध्येपुरुषप्र
वीरोरराजजांबूनदचित्रवर्मा पद्मप्रभोवह्निरिवाल्पधूमोमेघांतरेसूर्यइवप्रकाशः १६ तथासुषे
णोप्यसिचर्मपाणिस्तवात्मजःसत्यसेनश्चवीरःव्यवस्थितौचित्रसेनेनसार्धंहृष्टात्मानौसम
रेयोद्धुकामौ १७ ह्रीनिषेवोभारतराजपुत्रउग्रायुधःतणभोजीसुदर्शः जारासंधिःप्रथमश्चा
दृढश्चचित्रायुधःश्रुतवर्माजयश्च १८ शलश्चसत्यव्रतदुःशलौचव्यवस्थिताःसहसैन्यानराग्र्याः
कैतव्यानामधिपःशूरमानीरणेरणेशत्रुहाराजपुत्रः रथीहयीनागपत्तिप्रयायीव्यवस्थितोयोद्धु
कामस्त्वदर्थे १९ वीरःश्रुतायुश्चधृतायुधश्चचित्रांगदश्चित्रसेनश्चवीरःव्यवस्थितायोद्धुकामा
नराग्र्याःप्रहारिणोमानिनःसत्यसंधाः २० ॥
१०

॥ सैन्याः सेनामर्हन्तीति ते राजानः यथा यथं यत्न ह्येपि जीवमाना आख्याताः इदं भाविजयपराजयादिकं
इति अनेन पतद्वयबलतोलनेन व्यक्तं स्पष्टमभिगच्छामि जानामि अर्थाभिपन्निनः फलोपपन्निनः नेनज

कर्णात्मजः सत्यसंधो महात्मा व्यवस्थितः समरे योद्धुकामः अथापरो कर्णसुतो वरास्त्रो व्यवस्थितो
लघुहस्तो नरेंद्र २२ महत्तबलं दुर्भिदमल्पवीर्यैः समन्वितो योद्धुकामस्त्वदर्थे २३ एते च मुख्ये
श्पैरे च राजन्योधप्रवीरैरमितप्रभावैः व्यवस्थितो नागकुलस्य मध्ये यथा महेन्द्रः कुरुराजो जया
य २४ धृतराष्ट्र उवाच आख्याता जीवमाना ये परेभ्यो मे यथा तथं २५ इतीदमवगच्छामि व्यक्तं सर्वेति
पातिताः वैशं॰ एवं ब्रुवन्नेव तदा धृतराष्ट्रोम्बिकासुतः २६ हतप्रवीरं विध्वस्तं किंचिच्छेषं स्वकं
बलं श्रुत्वा व्यामोहमागच्छच्छोकव्याकुलितेन्द्रियः मुह्यमानोब्रवीच्चापि मुहूर्तं तिष्ठ संजय व्या
कुलं मे मनस्तात श्रुत्वा सुमहदप्रियं २७ मनो मुह्यति चांगानि न च शक्नोमि धारितुं इत्येवमुक्त्वा
वचनं धृतराष्ट्रोम्बिकासुतः भ्रांतचित्तस्ततः सोथ बभूव जगतीपतिः इति श्रीमहाभारते कर्णप
र्वणि संजयवाक्यं नाम १८ जनमेजय उवाच श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैवापलायिनः नरेंद्रः
किंचिदाश्वस्थो द्विजश्रेष्ठ किमब्रवीत् १ प्राप्तवान्परमं दुःखं पुत्रव्यसनजं महत् तस्मिन्यदुक्तवा
न्कालेतन्ममाचक्ष्व पृच्छतः २ ॥

योमदीयानां नास्तीति निश्चितो मीतिभावः २४ अंगानि चक्षुरादीनि मनश्च मुह्यति २८ सत्तमः १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ श्रुत्वाभार्गवरामस्यशस्त्रज्ञस्यवा ४९ कर्णस्यवधंसंचिंत्यमनसालोच्यदुःखितःत्वंजगाम्नैवस्नेहंवानास्तीतिसं
११ चिंत्यनिश्चित्यविललापेतितृतीयेनसंबंधः प्राणिनांप्रवध्यात्कर्णादन्येषांतरणतुल्यानांमेदत्वादस्यवी

वैशं॰ श्रुत्वाकर्णस्यनिधनमश्रद्धेयमिवाद्भुतं भूतसंमोहनंभीमंमेरोःसंसर्पणंयथा ३ चित्तमोह
मिवायुक्तंभार्गवस्यमहात्मनः पराजयमिवेंद्रस्यद्विषद्भ्योभीमकर्मणः ४ दिवःप्रपतनंभानोरुर्व्यामि
वमहाद्युतेः संशोषणमिवाचिंत्यंसमुद्रस्याक्षयांभसः ५ महीवियद्दिगंबूनांसर्वनाशमिवाद्भुतं
कर्मणोरिववैफल्यमुभयोःपुण्यपापयोः ६ संचिंत्यनिपुणंबुद्ध्याधृतराष्ट्रोजनेश्वरः नेदमस्ती
तिनिश्चित्यकर्णस्यसमरेवधं ७ प्राणिनामेवमन्येषांस्यादपीतिविनाशनं शोकाग्निनादह्यमानो
धम्यमानइवाशये ८ विस्रस्तांगःश्वसन्दीनोहाहेत्युक्त्वासुदुःखितः विललापमहाराजधृतराष्ट्रोंबि
कासुतः ९ धृतराष्ट्रउवाच संजयाधिरथिर्वीरःसिंहद्विरदविक्रमः वृषभप्रतिमस्कंधोवृषभाक्षग
तिस्वरन् १० वृषभोवृषभस्येवयोयुद्धेननिवर्तते शत्रोरपिमहेंद्रस्यवज्रसंहननोयुवा ११ यस्यज्या
तलशब्देनशरवृष्टिरवेणच रथाश्वनरमातंगानावतिष्ठंतिसंयुगे १२ यमाश्रित्यमहाबाहुंविद्विषो
जयकांक्षया दुर्योधनोकरोद्वैरंपांडुपुत्रैर्महारथैः १३ सकथंरथिनांश्रेष्ठःकर्णःपार्थेनसंयुगे नि
हतःपुरुषव्याघ्रःप्रसह्यासह्यविक्रमः १४ ॥ धृतात्तइतिग्रंथेनैवकारेणविनाशनंस्यादपीतिहेतो
राशयेचेतसिधम्यमानइवविस्रस्तांगः यथाभ्राष्ट्रेधम्यमानपाषाणादिःशीर्यतेतद्वद्धिशीर्णाङ्गइत्यर्थः ९ ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१० न निवर्तत इति छेदः ॥ १२ १३ १४ १५ अवाचीनेन चिंतया धोमुखं ८ २२ जलवर्षित्वाद्देवेषु महेंद्रो वृषः धन
योनी मन्यत वै नित्यमच्युतं च धनंजयं न वृक्षीन्सहितानन्यान्स्वबाहुबलदर्पितः १५ शार्ङ्गगांडीव
धन्वानौ सहितावपराजितौ अहं दिव्याद्रथादेकः पातयिष्यामि संयुगे १६ इति यः सततं मंदमवोच
लोभमोहितं दुर्योधनमवाचीनं राज्यकामकमानरं ७ यो जये सर्वकांबोजानावंत्यान्केकयैः
सह गांधारान्मद्रकान्मत्स्यांस्त्रिगर्तांस्तंगणान्शकान् १८ पांचालांश्च विदेहांश्च कुलिंदान्काशि
कोशलान् सुह्मानंगांश्च वंगांश्च निषादान्पुंड्रचीनकान् १९ वत्सान्कलिंगांस्तरलानश्मकान्
षिकानपि जित्वैतान्समरे वीरः चक्रे बलिभृतः पुरा २० शरव्रातैः सुनिशितैः स्वर्णपुंखैः कंकपत्रि
भिः दुर्योधनस्य वृध्यर्थं राधेयो रथिनांवरः २१ दिव्यास्त्रवित्महातेजाः कर्णो वैकर्तनो वृषः
सेनागोपश्च सकथं शत्रुभिः परमास्त्रवित् २२ घातितः पांडवैः शूरैः समरे वीर्यशालिभिः वृ
षो महेंद्रो देवेषु वृषः कर्णो नरेष्वपि २३ तृतीयमन्यं लोकेषु वृषं नैवानुशुश्रुमः उच्चैःश्रवाव
रोश्वानां राज्ञां वैश्रवणो वरः २४ वरो महेंद्रो देवानां कर्णः प्रहरतांवरः योजितः पार्थिवैः शूरैः स
मर्थैर्वीर्यशालिभिः २५ दुर्योधनस्य वृध्यर्थं कृत्स्नामुर्वीमथाजयत् यं लब्ध्वा मागधो राजा सांत्वमानो
थसौहृदैः २६ ॥
वर्षितान्मन्यते युक्कर्णो वृषः तृतीयं च वमभितः वृष्टिकर्तारं वृषं २२ अजित इति छेदः योजितो नियोजितोम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ यमितिमारायोप्यस्यैवबलेनबलवानितिभावः ३७ ३० १२ विप्लवः नौकाहीनः ९ ७ ८ ४ ११ ॥

१५ अश्रौषीत्पार्थिवंदृष्ट्वाभ्रमरंतेयादृशं कौरवान् तेश्रुत्वानिहतंकर्णंद्वैरथेसव्यसाचिना २६ शोकार्णवे
निमग्नोहंभिन्नानौरिवसागरेतेत्वषंनिहतंश्रुत्वाद्वैरथेरथिनांवरं २७ शोकार्णवेनिमग्नोहमप्लवः
सागरेयथा ईदृशैर्यद्यहंदुःखैर्नविनश्यामिसंजय २८ वज्रादृढतरंमन्येहृदयंममदुर्भिदं ज्ञाति
संबंधिमित्राणामिमंश्रुत्वापराभवं २९ कोमदन्यःपुमांल्लोकेनजह्यात्सततजीवितं विषमग्निंप्र
पातंचपर्वताग्रादहंवृणे ३० नहिशक्ष्यामिदुःखानिसोढुंकष्टानिसंजय ३१ इतिश्रीमहाभारते
कर्णपर्वणिधृतराष्ट्रवाक्ये २५९ संजयउवाच श्रियाकुलेनयशसातपसाचश्रुतेनच त्वाम
द्यसंतोमन्यंतेययातिमिवनाहुषं १ श्रुतेमहर्षिप्रतिमःकृतकृत्योसिपार्थिव पर्यवस्थापया
त्मानंमाविषादेमनःकृथाः २ धृतराष्ट्रउवाच दैवमेवपरंमन्येधिक्पौरुषमनर्थकं यत्रशा
लप्रतीकाशःकर्णोहन्यतसंयुगे ३ हत्वायुधिष्ठिरानीकंपांचालानांरथव्रजान् प्रताप्यशरव
र्षेणदिशःसर्वामहारथः ४ मोहयित्वारणेपार्थान्वज्रहस्तइवासुरान् सकथंनिहतःशेते
वायुरुग्णइवद्रुमः ५ शोकस्यांतंनपश्यामिपारंजलनिधेरिव चिंतामेवर्धतेतीव्रामुमूर्षाचा
पिजायते ६ कर्णस्यनिधनंश्रुत्वाविजयंफाल्गुनस्यच अश्रद्धेयमहंमन्येवधंकर्णस्यसंजय ७ १२
वज्रसारमयंनूनंहृदयंदुर्भिदंमम यच्छ्रुत्वापुरुषव्याघ्रंहतंकर्णंनदीर्यते ८ ॥ ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥ दुःखात भीष्मद्रोणवधजात दुःखं च व्यसनं च तदुभयं दुःखं कर्णवधजं व्यसनं शोषनाशनं १२ ततो वाह्यभी
क्षेत्यादिना १३ पार्थपारशब्दे नौकास्थानीयं १४ प्रतिमाने ध्वजभूते १५ यथापंगोरध्वगमनं दुश्चरमेवं दुर्यो
आयुर्न नेम दीर्घमेव विहितं दैवतैः पुरा यत्र कर्णे हते श्रुत्वा जीवामि हन्त दुःखितः १६ धिग्जीवितमि
दं चैव सुहृद्धीनस्य संजय अद्य चाहं दशामेतां गतः संजय गर्हितां १७ कृपणं वर्तयिष्यामि शोच्यः स
र्वस्य मंदधीः अहमेव पुरा भूत्वा सर्वलोकस्य सत्कृतः १८ परिभूतः कथं सूत परैः शक्ष्यामि जीवितुं
दुःखात्सुदुःखं व्यसनं प्राप्तवानस्मि संजय १९ भीष्मद्रोणवधेनैव कर्णस्य च महात्मनः नावशेषं
प्रपश्यामि सूतपुत्रे हते युधि २० मम हि पार्थमहानासीत्त्राणां मम संजय युद्धे हि निहतः शूरो वि
सृजन्सायकान्बहून् २१ को हि मे जीवितेनार्थस्तमृते पुरुषर्षभं रथाद्राधेयश्चर्नूनं नन्वापतत।
त्सायकार्दितः २२ पर्वतस्येव शिखरं वज्रपाताद्विदारितं स शेते पृथिवीं नूनं शोभयन् रुधिरोक्षि
तः २३ मातङ्ग इव मत्तेन हि पंडेणा निपातितः यो बलं धार्तराष्ट्राणां पांडवानां यतो भयं २४ सोऽर्जु
नेन हतः कर्णः प्रतिमानं धनुष्मतां मम हि वीरो महेष्वासो मित्राणामभयंकरः २५ शेते विनिह
तो वीरो देवेन्द्रेणेव चाचलः पंगोरिवाध्वगमनं दरिद्रस्येव कामितं २६ दुर्योधनस्य चाहन्तत्तृषि
तस्येव विप्रुषः अन्यथा चिंतितं कार्यमन्यथा तत्तु जायते २७ ॥ धनस्याकृतमभिप्रायो दुश्चरः तृषि
तस्य विप्रुषो जलबिंदवो यथा तत्लोपप्रामायनमभवंति एवं दुर्योधनचेष्टितमपीष्टसिद्ध्यर्थेन पर्याप्तमिति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अग्रेमल

क॰ टी॰ दीनपोहृषः नष्टपराक्रमः २१ अग्नेमल्लदाः २५ २८ ताड्यमानाः ताडयंतः २१ अप्रतिपद्यंते शिखंडिनाप्रतिप

१३ अहो न बलवद्दैवं कालश्च दुरतिक्रमः पलायमानः कृपणो दीनात्मा दीनपोहृषः २१ कच्चिद्धि नि

हतः सूतपुत्रो दुःशासनो मम कच्चिन्न दीनाचरितं कृतवांस्तात संयुगे २२ कच्चिन्न निहतः शूरो

ष्ठि २ यथान्ये तत्र पार्थिवाः युधिष्ठिरस्य वचनं मा युध्यस्वेति सर्वदा २३ दुर्योधनो नाभ्यगृह्णान्मूढः पथ्य

मिवौषधं शरतल्पे शयानेन भीष्मेण सुमहात्मना २४ पानीयं याचितः पार्थः सो विध्यन्मेदिनी

तलं जलस्य धारां जनितां दृष्ट्वा पांडुसुतेन च २५ अब्रवीत्स महाबाहुस्तात संशाम्य पांडवैः प्र

शमाद्धि भवेच्छांतिर्मदंतं युद्धमस्तु वः २६ भ्रातृभावेन पृथिवीं भुंक्ष्व पांडुसुतैः सह अकुर्वंस्त

द्वचनं तस्य नूनं शोचति पुत्रकः २७ तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः अहं तु निहतामात्यो ह

तपुत्रश्च संजय २८ धूतः कृच्छ्रमापन्नो लूनपक्ष इव द्विजः यथा हि शकुनिं गृह्य छित्वा पक्षौ

च संजय २९ विसर्जयंति संहृष्टाः क्रीडमानाः कुमारकाः लूनपक्षतया तस्य गमनं नोपपद्य

ते ३० तथाहमपि संप्राप्तो लूनपक्ष इव द्विजः क्षीणः सर्वार्थहीनश्च निर्ज्ञातिर्बंधुवर्जितः ३१ कां

दिशं प्रतिपत्स्यामि दीनः शत्रुवशं गतः ३२ इति श्रीमहाभारते कर्णपर्वणि ॥ वैशं॰ इत्येवं धृतराष्ट्रो

थ विलप्य बहुदुःखितः प्रोवाच संजयं भूयः शोकव्याकुलमानसः ३३ धृतराष्ट्र॰ योजयस्सर्वकांबो

जानेकबाह्लीककैकयैः सह गांधारराजश्च विदेहांश्च जिताकार्यार्थमाहवे ३४ ॥ शमनं ते शोकुर्वाणं ३२ ३३ ३४ १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रोणप्रदिनाद्रुपदपुत्रेण धृष्टद्युम्नेन ४३ कुंडलाभ्यां सकवचाभ्याम् अर्थे तादर्थ्ये चतुर्थी ४४ अवमन्ये अवमे
दुर्योधनस्य हृष्यर्थं योजयन् पृथिवी प्रभुः स जितः पांडवैः शूरैः समरे बाहुशालिभिः ४५ तस्मिन्
ते महेष्वासे कर्णे युधि किरीटिना के वीराः पर्यतिष्ठंत तन्ममाचक्ष्व संजय ४६ कच्चिन्नैकः परित्य
क्तः पांडवैर्निहतो रणे उक्तं त्वया पुरस्तात्तु यथा वीरो निपातितः ४७ भीष्ममप्रतियुध्यंतं शिखंडी
सायकोत्तमैः पातयामास समरे सर्वशस्त्रभृतां वरं ४८ तथा द्रोणप्रदिना द्रोणं न्यस्तसर्वायुधं यु
धि युक्तयोगं महेष्वासं शरैर्बहुभिराचितः ४९ निहतः खड्गमुद्यम्य धृष्टद्युम्नेन संजय अंत
रेण हतावेतौ छलेन च विशेषतः ५० अश्रौषमहमेतद्धि भीष्मद्रोणौ निपातितौ भीष्मद्रोणौ हि स
मरे न हन्यात् साक्षाद्वज्रभृत्स्वयं ५१ न्यायेन युध्यमानौ हि तद्वै सत्यं ब्रवीमि ते कर्णं त्वस्य तं महास्त्राणि दि
व्यानि च बहूनि च ५२ कथमिंद्रोपमं वीरं मृत्युर्युद्धे समस्पृशत् यस्य विद्युत्प्रभां शक्तिं दिव्यां क
नकभूषणां ५३ प्रायच्छद्द्विषतां हंत्रीं कुंडलाभ्यां पुरंदरः यस्य सर्पमुखो दिव्यः शरः कांचनभूष
णः अशेत निहितः पत्रीचंदनेष्वरिसूदनः भीष्मद्रोणमुखान्वीरान्योऽवमन्य महारथान् ५४ जाम
दग्न्यान्महाघोरं ब्राह्ममस्त्रमशिक्षत यश्च द्रोणमुखान्दृष्ट्वा विमुखान्नर्दितान्शरैः ५५ सोमदत्त
महाबाहुर्वधमत्कार्मकं शितैः यश्चनागायुतप्राणो वज्रं रेहसमच्युतं ५६ ॥

ने ५४ ५५ ५६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
२४

४९ रथेतिरथभंगाद्यभावेतस्यमरणंनभवेदितिभावः ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९
विरथंसहसाकृत्वाभीमसेनमथाहसत् सहदेवंचनिर्जित्यशरैःसंनतपर्वभिः ४७ कृपयाविर
थंकृत्वानाहनद्धर्मवित्तया यश्चमायासहस्राणिविकुर्वाणांजयैषिणां ४८ घटोत्कचेराक्षसेंद्र
शक्रशक्त्यानिजघ्निवान् एतांश्चदिवसान्यस्ययुद्धेभीतोधनंजयः ४९ नागमद्द्वैरथेवीरःस
कथंनिहतोरणे रथभंगोनचेत्तस्यधनुर्वानव्यशीर्यत ५० नचेदस्त्राणिनिर्णेशुःसकथंनिह
तःपरैः कोहिशक्रोरणेकर्णंविधुन्वानंमहद्धनुः ५१ विमुंचंतंशरान्घोरान्दिव्यान्यस्त्राणि
चाहवे जेतुंपुरुषशार्दूलंशार्दूलमिववेगिनं ५२ ध्रुवंतस्यधनुश्छिन्नंरथोवापिमहींगतः
अस्त्राणिवाप्रणष्टानियथाशंससिमेहतं ५३ नह्यन्यदपिपश्यामिकारणंतस्यनाशने नहन्मि
फाल्गुनंयावत्तावत्पादौनधावये ५४ इतियस्यमहाघोरंव्रतमासीन्महात्मनः यस्यभीतोर
णेनिद्रांधर्मराजोयुधिष्ठिरः ५५ त्रयोदशसमानित्यंनाभजत्पुरुषर्षभः यस्यवीर्यवतोवीर्य
मुपाश्रित्यमहात्मनः ५६ ममपुत्रःसभांभार्यांपांडूनांनीतवान्बलात् तत्रापिचसभामध्ये
पांडवानांचपश्यतां ५७ दासभार्येतिपांचालीमब्रवीत्कुरुसंनिधौ नसंतिपतयःकृष्णेसर्वे
षंढतिलैःसमाः ५८ उपतिष्ठस्वभर्तारमन्यंवावरवर्णिनि इत्येवंयःपुरावाचोरूक्षाःसं
श्रावयद्रुषा। ५९ ॥ २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८५ प्रतीयंप्रातिभयेन अभियावद्भिः सर्वदिग्भ्यः समागतैः ८६ आधिरथेः अधिरथपुत्रस्य सोमसूर्यसाहच
सभायां सूतजः कृत्स्नां स कथं निहतः परैः यदि भीष्मो रणश्लाघी द्रोणो वा युधि दुर्मदः ८७ न हनि
ष्यति कौन्तेयान्स तपातान्स योधन् सर्वानेव हनिष्यामि येनेतेमानसोज्वरः ८८ किं करिष्यति गां
डीवमक्षय्यौ च महेषुधी त्वियं चंदनदिग्धस्य मत्कुरस्याभियावतः ८९ स नूनमृषभस्कंधो
र्जुनेन कथं हतः यस्याङ्गानि ऽवमुक्तानां स्पर्शमुग्रमचिंतयन् ९३ अपतिर्ह्यासि कृष्णेति ब्रुवन्पार्थान्
न वैक्षत यस्य नासीद्भयं पार्थैः सपुत्रैः सजनार्दनैः ९४ स्वबाहुबलमाश्रित्य मुहूर्तमपि संजय
तस्य नाहं वधं मन्ये देवैरपि सवासवैः ९५ प्रतीयमपि धावद्भिः किं पुनस्तात पांडवैः न हि ज्या
सं स्पृशानस्य तलत्रे वापि गृह्णतः ९६ पुमानाधिरथेः स्थातुं कश्चित्प्रमुखतोऽर्हति अपि स्यान्मे
दिनी हीना सोमसूर्यप्रभांशुभिः ९७ न वधः पुरुषेंद्रस्य संयुगेष्वपलायिनः येन मंदः सहाये
न भ्रात्रा दुःशासनेन च ९८ वासुदेवस्य दुर्बुद्धिः प्रत्याख्यानमरोचयत् स नूनं वृषभस्कंधं कर्णं दृ
ष्ट्वा निपातितं ९९ दुःशासनं च निहतं मन्ये शोचति पुत्रकः हतं वैकर्तनं श्रुत्वा द्वैरथे सव्यसा
विना ७० ॥

यान्त्यकर्षेण भातीतियोगाच्च प्रभो वद्भिः तेषां त्रयाणामंशुभिः मयूखैः ९ मंदो दुर्योधनः ९९ ७०॥

क॰टी॰ आश्रुतानितिपाठेनिवर्तितमुखान्यत्सभ्रुवाः कौरवाः यदिपलायेतेतदाआश्रुवाएवभवंतीत्यर्थः ७१
१५
जयतः पांडवान्दृष्ट्वा किंस्विद्दुर्योधनोऽब्रवीत् दुर्मर्षणंहतंदृष्ट्वावृषसेनंचसंयुगे ७१ प्रभग्नंचब
लंदृष्ट्वावध्यमानंमहारथैः पराङ्मुखांश्चराज्ञस्तुपलायनपरायणान् ७२ विद्रुतान्रथिनोदृ
ष्ट्वामन्येशोचतिपुत्रकः अनेयश्चाभिमानीचदुर्बुद्धिरजितेंद्रियः ७३ हतोत्साहंबलंदृष्ट्वाकिंस्वि
द्दुर्योधनोऽब्रवीत् स्वयंवैरंमहत्कृत्वावार्यमाणः सुहृद्गणैः ७४ प्रधानेहतभूयिष्ठेःकिंस्विद्दु
र्योधनोऽब्रवीत् भ्रातरंनिहतंदृष्ट्वाभीमसेनेनसंयुगे ७५ रुधिरेपीयमानेचकिंस्विद्दुर्योधनोऽब्र
वीत् सहगांधारराजेनसभायांयदभाषत ७६ कर्णार्जुनैरणेहंताहतेतस्मिन्किमब्रवीत् द्यूतं
कृत्वापुराहृष्टोवंचयित्वाचपांडवान् ७७ शकुनिः सौबलस्तातहतेकर्णेकिमब्रवीत् कृतव
र्मामहेष्वासः सात्वतानांमहारथः ७८ हतेवैकर्तनेदृष्ट्वाहार्दिक्यः किमभाषत ब्राह्मणाः
क्षत्रियावैश्यायस्यशिक्षामुपासते ७९ धनुर्वेदंविकीर्षंतोद्रोणपुत्रस्यधीमतः युवारूपेण
संपन्नोदर्शनीयोमहायशाः ८० अश्वत्थामाहतेकर्णेकिमभाषतसंजय आचार्योयोधनुर्वे
देगौतमोरथसत्तमः ८१ ॥

७२ अनेयः अशिक्षणीयः यत्तोभिमानीविहत्वाभिमानीअतएवदुर्बुद्धिः हितमजानन् ७४ प्रधनेरणे ७५ ८१ १५

कानिवाक्यानीतिशंसघः ८४ ८७ प्रत्युदीयुः कथमितिशंसघः ८८ ८९ हतोत्सेधस्यविनष्टोत्कर्षस्य ९० ९४ १
कृपःशारद्वतस्तातहतेकर्णेकिमब्रवीत् मद्रराजोमहेष्वासःशल्यःसमितिशोभनः ८८ दृष्ट्वा
विनिहतंकर्णंसारथ्येरथिनांवरः किमभाषतसौवीरोमद्राणामधिपोबली ८९ दृष्ट्वाविनिह
तंसमरेयोधावारणादुर्जयाः येचकेचनराजानःपृथिव्यांयोद्धुमागताः ९४ मद्रराजःकथंशल्यो
नियुक्तोरथिनांवरः वैकर्तनस्यसारथ्येतन्ममाचक्ष्वसंजय ९५ केरक्षन्दक्षिणंचक्रंसूतपुत्रस्य
युध्यतः वामंचक्रंररक्षुर्वाकेवावीरस्यपृष्ठतः ९६ केकर्णंनजहुःशूराःकेक्षुद्राःप्राद्रवंस्ततः
कथंचवःसमेतानांहतःकर्णोमहारथः ९७ पांडवाश्चकथंशूराःप्रत्युदीयुर्महारथाः सृजंतःशर
वर्षाणिवारिधाराइवांबुदाः ९८ सचसर्पमुखोदिव्योमहेषुप्रवरस्तदा व्यर्थःकथंसमभवत्तन्म
माचक्ष्वसंजय ९९ मामकस्यास्यसैन्यस्यहतोत्सेधस्यसंजय अवशेषंनपश्यामिककुदेमृदि
तेमम १०० तौहिवीरौमहेष्वासौमदर्थेत्यक्तजीवितौ भीष्मद्रोणौहतौश्रुत्वाकोन्वर्थोजीविते
नमे १०१ पुनःपुनर्नमृष्यामिहतंकर्णंचपांडवैः यस्यबाह्वोर्बलंतुल्यंकुंजराणांशतंशतैः १०२
द्रोणेहतेचयद्वृत्तंकौरवाणांपरैःसह संग्रामेनरवीराणांतन्ममाचक्ष्वसंजय १०३ यथाकर्णश्चकौं
तेयैःसहयुद्धमयोजयत् तथाचद्विषतांहंतारणेशांतस्तदुच्यतां १०४ इतिकर्णपर्वणि संजयउवा
च हतेद्रोणेमहेष्वासेतस्मिन्नहनिभारत कृतेचमोघसंकल्पेद्रोणपुत्रेमहारथे १ ॥ ३६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ स्वबलं प्रतिद्रवंतं दृष्ट्वा ३ प्राप्तजयैः व्यायच्छद्भिः यतमानैः अवहारं प्रत्यवहारं प्रत्याहारमिति वा पाठः ५ ६ पर्यं-
१५ केष्वेव वरासनेषु ७ साम्ना प्रियवचसा परमवल्गुना अतिमधुरेण ८ कार्यतरं आवश्यकतरं यत्कार्यं कर्त्तव्यं

द्रवमाणे महाराज कौरवाणां बलार्णवे महापार्थः स्वकं सैन्यमतिष्ठद्भ्रातृभिर्वृतः २ तमवस्थि-
तमाज्ञाय पुत्रस्ते भरतर्षभ विद्रुतं स्वबलं दृष्ट्वा पौरुषेणान्यवारयत् ३ स्वमनीकमवस्थाप्य बाहु-
वीर्यमुपाश्रितः युध्वा च सुचिरं कालं पांडवैः सह भारत ४ लब्धलक्षैः परैर्हृष्टैर्व्यायच्छद्भिश्चिरं
तदा संध्याकालं समासाद्य प्रत्याहारमकारयत् ५ कृत्वावहारं सैन्यानां प्रविश्य शिबिरं स्वकं
कुरवः सहिता मंत्रं मंत्रयांचक्रिरे मिथः ६ पर्यंकेषु परार्ध्येषु स्पर्ध्यास्तरणवत्सु च वरासनेषू-
पविष्टाः सुखशय्यास्विवामराः ७ ततो दुर्योधनो राजा साम्ना परमवल्गुना तानाभाष्य महेष्वा-
सान्प्राप्तकालमभाषत ८ मतं मतिमतां श्रेष्ठाः सर्वे प्रब्रूत माचिरं एवंगते तु किं कार्यं किंच का-
र्यतरं नृपाः ९ संजय उवाच एवमुक्ते नरेंद्रेण नरसिंहा युयुत्सवः चक्रुर्नानाविधाश्चेष्टाः सिंहा-
सनगतास्तदा १० तेषां निशम्येंगितानि युद्धे प्राणान्जुहूषतां समुद्वीक्ष्य मुखं राज्ञो बालार्कसम-
तेजसं ११ आचार्यपुत्रो मेधावी वाक्यज्ञो वाक्यमाददे रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः १२

रं मतं मतं तत प्रब्रूत ९ चेष्टाः शौर्याभिनयरूपाः भुजास्फालनाद्याः १० निशाम्य आलोच्य वर्चसं छांदस-
त्वं ११ रागः स्वामिभक्तिः योगो देशकालादिसंपत्तिः दाक्ष्यं बलं नयो नीतिः १२ ॥ १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१३ १४ सर्वार्थैः रागादिभिः स्वनीतैः दैवमनुलोमयते नकूलं क्रियते न केवलं रागाद्युपेतयापि स्वप्रणीता रा
ादयः प्रबला इत्यर्थः १५ १६ १७ बहुमतीं बहुल्पवतीं प्रतिशायितामिति यावत् १८ १९ शुभं वचः श्रुत्वा

उपायाः पंडितैः प्रोक्तास्ते तु दैवमुपाश्रिताः लोकप्रवीरा ये स्माकं देवकल्पा महारथाः १२ नीतिमं
तस्तथा युक्ता दक्षा रक्ताश्चते हताः नत्वेव कार्यं नैराश्यमस्माभिर्विजयं प्रति १४ स्वनीतेर्हि सम्य
वीर्यैर्दैवमप्यनुलोमयेत् तेवयं प्रवरं नृणां सर्वैर्गुणगणैर्युतं १५ कर्णमेवाभिषेक्ष्यामः सेनाप
त्येन भारत कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून् १६ एष ह्यतिबलः शूरः कृतास्त्रो युद्ध
र्मदः वैवस्वत इवासह्यः शक्तो जेतुं रणे रिपून् १७ एतदाचार्यतनयात् श्रुत्वा राजंस्तवात्मजः आ
शां च महतीं चक्रे कर्णं प्रति स वै तदा १८ हते भीष्मे च द्रोणे च कर्णो जेष्यति पाण्डवान् तामाशां
हृदये कृत्वा समाश्वस्य च भारत १९ ततो दुर्योधनः प्रीतः प्रियं श्रुत्वा स तद्वचः प्रीतिसत्कारसं
युक्तं तथ्यमात्महितं शुभं २० स्वं मनः समवस्थाप्य बाहुवीर्यमुपाश्रितः दुर्योधनो महाराज रा
धेयमिदमब्रवीत् २१ कर्ण जानामि ते वीर्यं सौहृदं परमं मयि तथापि त्वां महाबाहो प्रवक्ष्या
मि हितं वचः २२ श्रुत्वा यथेष्टं च कुरु वीर यत्तव रोचते भवान्प्राज्ञतमो नित्यं मम चैव परा गतिः २३

मनः समाधायाब्रवीदिति द्वयोः संबंधः २० २१ २२ २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श.पे. ताभ्यांसकाशाद्द्विगुणबलवत्तरः २४ २५ ताभ्यामपिनमितःसम्यक्कृतास्त्रोविक्रमोयशः २१ विदि
१८

भीष्मद्रोणावतिरथौहतौसेनापतीमम सेनापतिर्भवानस्तुताभ्यांद्रविणवत्तरः २४ वृद्धौचतौ
महेष्वासौसोमापेतौचधनंजयेमानि तौचमयावीरौराधेयवचनात्तव २५ पितामहस्त्वंमेश्रेस्यं
दुपुत्रामहारणे रक्षिताःस्तातभीष्मेणदिवसानिदशैवतु २६ न्यस्तशस्त्रेचभवतिहतोभीष्मः
पितामहः शिखंडिनंपुरस्कृत्यफाल्गुनेनमहाहवे २७ हतेतस्मिन्महेष्वासेशरतल्पगतेतत
था त्वयोक्तेपुरुषव्याघ्रद्रोणोह्यासीत्पुरःसरः २८ तेनापिरक्षिताःपार्थाःशिष्यत्वादितिमेम
तिः सचापिनिहतोवृद्धोधृष्टद्युम्नेनसत्वरं २९ निहताभ्यांप्रधानाभ्यांताभ्याममितविक्रम त्व
त्समंसमरेयोधंनान्यंपश्यामिचिंतयन् ३० भवानेवतुनःशक्तोविजयायनसंशयः पूर्वंमध्ये
चपश्चाच्चतथैवविहितंहितं ३१ सभवान्धुर्यवत्संख्येधुरमुद्वोढुमर्हति अभिषेचयसेनान्ये
स्वयमात्मानमात्मना ३२ देवतानांयथास्कंदःसेनानीःप्रभुरव्ययः तथाभवानिमांसेनांधार्त
राष्ट्रींविभर्तुवै ३३ जहिशत्रुगणान्सर्वान्महेंद्रोदानवानिव प्रवस्थितंरणेदृष्ट्वापांडवास्त्वांमहा
रथाः ३४ द्रविष्यंतिचपंचालाविस्नुंदृष्ट्वेवदानवाः तस्मात्त्वंपुरुषव्याघ्रप्रकर्षैतांमहाचमूं ३५

तंत्वयेनिशेषः ३१ ३२ ३३ ३४ ३५ ॥ १८

३९ ३८ कर्णमेवं तदाब्रवीत् दुर्योधनः इति शेषः नयुयुत्सति युद्धेच्छामपि न करिष्यति किं पुनर्युद्धमिति भा
वः ३९ ४२ प्रातकुंभमयैः सौवर्णैः माहेयैर्महीमयैश्च कुंभैः ४४ विषाणैः द्विपखड्गजस्पंदनमयैः पा
भवत्यवस्थिते यत्ते पांडवा मंदचेतसः द्रविष्यंति सहामात्याः पांचालाः सृंजयास्तथा ३६ यथाह्यु
भ्युदितः सूर्यः प्रतपन्स्वेन तेजसा व्यपोहति तमस्तीव्रं तथा शत्रून्प्रतापय ३७ संजय उ० आशाब
लवती राजन्पुत्रस्य तव साभवत् हते भीष्मे च द्रोणे च कर्णो जेष्यति पांडवान् ३८ तामाशां हृदये
कृत्वा कर्णमेवं तदाब्रवीत् सूतपुत्र न ते पार्थः स्थित्वाग्रे संयुयुत्सति ३९ कर्ण उवाच उक्तमेतन्म
या पूर्वं गांधारे तव संनिधौ जेष्यामि पांडवान्सर्वान्सपुत्रान्सजनार्दनान् ४० सेनापतिर्भविष्यामि
तवाहं नात्र संशयः स्थिरो भव महाराज विजितान्विद्धि पांडवान् ४१ संजय उ० एवमुक्तो महा
राज ततो दुर्योधनो नृपः उत्तस्थौ राजभिः सार्द्धं देवैरिव शतक्रतुः ४२ सेनापत्येन सत्कर्तुं कर्णं
स्कंदमिवामराः ततोभिषिषिचुः कर्णं विधिदृष्टेन कर्मणा ४३ दुर्योधनमुखा राजन् राजा
नो विजयैषिणः प्रातकुंभमयैः कुंभैर्मंत्रैश्चैवाभिमंत्रितैः ४४ तोयपूर्णैर्विषाणैश्च द्विपख
ड्गमहर्षभैः मणिमुक्तायुतैश्चान्यैः पुण्यगंधैस्तथौषधैः ४५ औदुंबरे समासीनमासने क्षौमसंवृते शा
स्त्रदृष्टेन विधिना संभारैश्च सुसंभृतैः ४६ ॥ द्वैः खड्गस्य गंडकस्य महर्षभस्य गवयस्य च शृंगैः वि
षाणं दंतश्शृंगयोर्विनिविष्टः द्विपखड्गमहर्षभीयैः तद्धितलोपश्चार्षः ४६ ॥ ❀

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

 ५॰ नहीतिशराणांदर्शनेपिनालंकिमुतस्पर्शइत्यर्थः ५१ ५२ ५७ इतिदशमः सेना १ २ ॥

ब्राह्मणाःक्षत्रियावैश्यास्तथाशूद्राश्चसंमताः तेष्टुवुस्तंमहात्मानमभिषिक्तंवरासने ४७ त
तोभिषिक्तोराजेंद्रनिष्कैर्गोभिर्धनेनच वाचयामासविप्राग्र्यान्राधेयःपरवीरहा ४८ जयपार्था
न्सगोविंदान्सानुगांस्तान्महामृधे इतितंबंदिनःप्राहुर्द्विजाश्चपुरुषर्षभ ४९ जहिपार्थान्सपां
चालान्राधेयविजयायनः अघन्निवसदाभानुस्तमांस्युग्रैर्गभस्तिभिः ५० नह्यलंत्वद्विसृष्टानां
शराणांवैसकेशवाः उलूकाःसूर्यरश्मीनांज्वलतामिवदर्शने ५१ नहिपार्थाःसपांचालाः
स्थातुंशक्तास्तवाग्रतः आत्तशस्त्रस्यसमरेमहेंद्रस्येवदानवाः ५२ अभिषिक्तस्तुराधेयःप्रभ
यासोमितप्रभः अत्यरिच्यतरूपेणदिवाकरइवापरः ५३ सेनापत्येतुराधेयमभिषिच्यसु
तस्तव अमन्यततदात्मानंकृतार्थंकालचोदितः ५४ कर्णोपिराजन्संप्राप्यसेनापत्यमरिं
दमः योगमाज्ञापयामाससूर्यस्योदयनंप्रति ५५ तवपुत्रैर्वृतःकर्णःशुशुभेतत्रभारत
देवैरिवयथास्कंदःसंग्रामेतारकामये ५६ इतिकर्णपर्वणिकर्णाभिषेकः ११९ धृतराष्ट्र
उवाच सेनापत्यंतुसंप्राप्यकर्णोवैकर्तनस्तदा तथोक्तश्चस्वयंराज्ञास्निग्धंभ्रातृसमंवचः १
योगमाज्ञाप्यसेनानामादित्येभ्युदितेतदा अकरोत्किंमहाप्राज्ञस्तन्ममाचक्ष्वसंजय २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नेदीतूर्यशानंदवा ५ १४ कल्पतांसंनह्यमानानां वरूथिनांसंनह्यतांनराणांसंनह्यमानानांगजादीनांचशब्दोव
भूवेतिद्वयोःसंबंधः १९ श्वेतेत्यादिविशेषणद्वयंस्यंदनेनेत्यस्य ७ ८ अभिपताकेनवायोःप्राति क्लृप्ताद्भि

संजयउवाच कर्णस्यमतमाज्ञायपुत्रास्तेभरतर्षभ योगमाज्ञापयामासनंदितूर्यपुरःसरं ३ महत्य
पररात्रेचतवसैन्यस्यमारिष योगोयोगेतिसहसाप्रादुरासीन्महास्वनः ४ कल्प्यतांनागमुख्यानांर
थानांचवरूथिनां संनह्यतांपदातीनांवाजिनांचविशांपते ५ क्रोशतांचैवयोधानांत्वरितानांपर
स्परं बभूवतुमुलःशब्दोदिवस्पृक्सुमहांस्ततः ६ ततःश्वेतपताकेनबलाकावर्णवाजिना हे
मपृष्ठेन धनुषानागकक्ष्येणकेतुना ७ तूणीरशतपूर्णेनसांगदेनवरूथिना शतघ्नीकिंकि
णीशक्तिशूलतोमरधारिणा ८ कार्मुकेणोपपन्नेनविमलादित्यवर्चसा रथेनाभिपताकेनसूत
पुत्रोभ्यदृश्यत ९ धमापयन्वारिजंराजन्हेमजालविभूषितं विधुन्वानोमहच्चापंकार्तस्वरविभूषितं
१० दृष्ट्वाकर्णंमहेष्वासंरथस्थंरथिनांवरं भानुमंतमिवोद्यंतंतमोनिघ्नंदुरासदं ११ नभीष्मव्य
सनंकेचिन्नापिद्रोणस्यमारिष नान्येषांपुरुषव्याघ्रमेनिरेतत्रकौरवाः १२ ततस्तुत्वरयन्योधान्
शंखशब्देनमारिष कर्णोनिष्कर्षयामासकौरवाणांमहद्बलम् १३ ॥

मृगत्वपताकेनपतत्यराजयस्तवकं ९ १० निघ्नन् निघ्नंतंघ्नंतमितिवापाठः ११ १२ १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अनुपादे पादस्थाने स्थापितः आज्ञागे १९ दक्षिणेऽनुपादे २० २१ २२ २३ २४ २५ ॥

सहं व्यूह्य महेष्वासो मकरं शत्रुतापनः प्रत्युद्ययौ तथा कर्णः पांडवान्विजिगीषया १४ मकरस्य
तुंडे वै कर्णो राजन्व्यवस्थितः नेत्राभ्यां शकुनिः शूर उलूकश्च महारथः १५ द्रोणपुत्रस्तु शिरसि
ग्रीवायां सर्वसोदराः मध्ये दुर्योधनो राजा बलेन महता वृतः १६ वामपादे तु राजेंद्र कृतवर्मा व्यव
स्थितः नारायणबलैर्युक्तो गोपालैर्युद्धदुर्मदैः १७ पादे तु दक्षिणे राजन्गौतमः सत्यविक्रमः त्रि
गर्तैः समहेष्वासैर्दाक्षिणात्यैश्च संवृतः १८ अनुपादस्तु यो वामस्तत्र शल्यो व्यवस्थितः महत्या
सेनया सार्धं मद्रदेशसमुत्थया १९ दक्षिणे तु महाराज सुषेणः सत्यसंगरः वृतो रथसहस्रेण
दंतिनां च त्रिभिः शतैः २० पुच्छे ह्यास्तां महावीर्यौ भ्रातरौ पार्थिवौ तदा चित्रश्च चित्रसेनश्च मह
त्या सेनया वृतौ २१ तथा प्रयाते राजेंद्र कर्णे नरवरोत्तमे धनंजयमभिप्रेक्ष्य धर्मराजोऽब्रवीदिदं
२२ पश्य पार्थ यथा सेना धार्तराष्ट्रीह संयुगे कर्णेन विहिता वीर गुप्ता वीरैर्महारथैः २३ हतवी
रतमा ह्येषा धार्तराष्ट्री महाचमूः फल्गुशेषा महाबाहो तृणैस्तुल्या मता मम २४ एको ह्यत्र मह
ष्वासः सूतपुत्रो विराजते सदेवासुरगंधर्वैः सकिंनरमहोरगैः २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२९ महत्पात्ववृहंरचयत १७ १८ १९ ॥

चराचरैस्त्रिभिर्लोकैर्योजेयोरथिनांवरः तंहत्वायमहाबाहोविजयस्त्वफाल्गुन १६ तस्यभवेद्ध
ल्लोममहाद्वादशवार्षिकः एवंज्ञात्वामहाबाहो[illegible]यथेऽसि १७ भ्रातरेतद्वचःश्रुत्वापांडवः
श्वेतवाहनः अर्द्धचंद्रेणव्यूहेनप्रत्यव्यूहततांचमूम् १८ वामपार्श्वेततस्याथभीमसेनोव्यवस्थितः
दक्षिणेचमहेष्वासोधृष्टद्युम्नोव्यवस्थितः १९ मध्येव्यूहस्यराजातुपांडवश्चधनंजयः नकुलः
सहदेवश्चधर्मराजस्यपृष्ठतः २० चक्ररक्षौतुपांचाल्यौयुधामन्यूत्तमौजसौ नार्जुनेजहतुर्युद्धेपा
ल्यमानौकिरीटिना २१ शेषान्नृपतयोवीराःस्थिताव्यूहस्यदंशिताः यथाभागंयथोत्साहंयथाय
त्नंचभारत २२ एवमेतन्महाव्यूहंव्यूह्यभारतपांडवाः तावकाश्चमहेष्वासायुद्धायैवमनोदधुः २३
दृष्ट्वाव्यूढांतवचमूंसतपुत्रेणसंयुगे निहतान्पांडवान्मेनेधार्तराष्ट्रःसबांधवः २४ तथैवपांडवीं
सेनांव्यूढांदृष्ट्वायुधिष्ठिरः धार्तराष्ट्रान्हतान्मेनेसकर्णान्वैजनाधिपः २५ ततःशंखाश्चभेर्यश्चप
णवानकदुंदुभिः डिंडिमाश्चाप्यहन्यंतप्रहर्षात्समंततः २६ सेनयोरुभयोराजन्प्रावाद्यंतमहास्व
नाः सिंहनादश्चसंजज्ञेशूराणांजयगृद्धिनां २७ हयहेषितशब्दाश्चवारणानांचबृंहतां रथनेमिस्व
नाश्चोग्राःसंबभूवुर्जनाधिप २८ नद्रोणंचसमंकश्चिज्ज्ञानीतेतत्रभारतदृष्ट्वाकर्णंमहेष्वासंमुखे
व्यूहस्यदंशितम् २९ ॥

क॰टी॰
२९

५०-५१ एकादशाः तस्मिन्सैन्ये प्रगच्छत्वाभावस्तुं दमः १ देहानां पाप्मनाम सत्त्वानां च नाशनात् २ पूर्णचंद्रार्काणां कांति
भिः समैः पद्मानां गंधतः समैः तस्तरुः आस्तीर्णवंतः ३ ४ आयताः पृथुः आयताः दीर्घाः ५ प्रहि

उभे सेने महाराज प्रहृष्टनरसंकुले योद्धुकामे स्थिते राजन्हंतुमन्योन्यमोजसा ५० तत्र यत्तौ सुसंरब्धौ
दृष्ट्वान्योन्यं व्यवस्थितौ अनीकमध्ये राजेंद्र चेरतुः कर्णपांडवौ ५१ नृत्यमाने च ते सेने समेयातां पर
स्परं तेषां पक्षैः प्रपक्षेभ्यो निर्जग्मुस्ते युयुत्सवः ५२ ततः प्रववृते युद्धं नरवारणवाजिनां रथानां च
महाराज अन्योन्यमभिनिघ्नतो ५३ इति श्रीमहाभारते कर्णपर्वणि ५४ संजय उवाच ते सेने स्म
न्यमासाद्य प्रहृष्टाश्वनरद्विपे बृहत्यौ संप्रजह्राते देवासुरसमप्रभे १ ततो नररथाश्वेभैः पत्तयश्चो
ग्रविक्रमाः संप्रहारान्परांश्चक्रुर्देहपाप्मासुनाशनान् २ पूर्णचंद्रार्कपद्मानां कांतिभिर्गंधतः स
मैः उत्तमांगैर्नरसिंहानां नरसिंहास्तस्तरुर्महीं ३ अर्धचंद्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टिशैः परश्वधै
श्चाप्यकृंतन्नुत्तमांगानि युध्यतां ४ आयतायतबाहूनामायतायतबाहुभिः बाहवः पातिता रे
जुर्धरण्यां सायुधांगदैः ५ तैः स्फुरद्भिर्मही भाति रक्तांगुलितलैस्तथा गरुडप्रहितैरुग्रैः पंचास्यैर
रगैरिव ६ हिरदस्यंदनाश्वेभ्यः पेतुर्वीरा द्विषद्धताः विमानेभ्यो यथा क्षीणपुण्याः स्वर्गसदस्तथा ७

तैः निरस्तैः ओहाकत्यागे ८ ७ ॥ २२ ॥ २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८९ आपीडिनः भूषावंतः नानारश्मिविविधरागाणि वसनानि येषां ते विरागवसनाः १६ १० १८ १९

गदाभिरन्ये गुर्वीभिः परिघैर्मुसलैरपि योधिताः शतशः पेतुर्वीरा वीरतरै रणे ८ रथा रथैर्विम
र्दिता मत्ता मत्तैर्द्विपा द्विपैः सादिनः सादिभिश्चैव तस्मिन्परमसंकुले ९ रथैर्नरा रथा नागै रश्वारो
हाश्च पत्तिभिः अश्वारोहैः पदाताश्च निहता युधि शेरते १० रथाश्च पतयो नागै रथाश्वैभाश्च पत्ति
भिः रथपत्तिद्विपाश्वाश्च रथैश्चापि नरद्विपाः ११ रथाश्वेभनराणां तु नराश्वेभरथैः कृतं पाणिपा
दैश्च शस्त्रैश्च रथैश्च कदनं महत् १२ तथा तस्मिन्बले शूरैर्वध्यमाने हतेपि च अस्मानभ्याय
युः पार्था वृकोदरपुरोगमाः १३ धृष्टद्युम्नः शिखंडी च द्रौपदेयाः प्रभद्रकाः सात्यकिश्चेकिता
नश्च द्राविडैः सैनिकैः सह १४ वृता व्यूहेन महता पांड्याश्चोलाः सकेरलाः व्यूढोरस्का दीर्घ
भुजाः प्रांशवः पृथुलोचनाः १५ आपीडिनो रक्तदंता मत्तमातंगविक्रमाः नानाविरागवसना ग
धचूर्णावचूर्णिताः १६ बद्धासयः पाशहस्ता वारणप्रतिवारणाः समानमृत्यवो राजन्नाम्यज
न परस्परं १७ कलापिनश्चापहस्ता दीर्घकेशाः प्रियंवदाः पत्तयः सादिनश्चान्ये घोररूपपराक्र
माः १८ अथापरे पुनः शूराश्चेदिपांचालकेकयाः कारूषाः कोशलाः
कांच्या मागधाश्चापि दुद्रुवुः १९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. २२

१९ महामात्ररथैरिति पाठे श्रेष्ठरथैः गजपूरितः गजस्कंधगतः २१ उदयाग्राद्रिभवने उदयाद्रेरग्रभवने अग्राद्रीत्यग्रशब्दस्य पूर्वनिपात आर्षः उदयनाम्नोऽग्राद्रिः पूर्वपर्वतः सराव भवनमिति वा उदयाग्राद्रिभवनमिति पाठे उदयाचलस्याग्रे शृंगे प्रत्रेरर्कभूतस्य भवने २२ शारदस्य शारदाउपलक्षितस्य २३

तेषां रथाश्च नागाश्च प्रवराश्चाग्रपत्तयः नानावाद्यधरैर्हृष्टा नृत्यंति च हसंति च २० तस्यैसमस्य महतो महामात्रवरैर्वृतः मध्ये त्वंकोदरो भ्राता यात्वदीयान्नागपूरितः २१ सनागप्रवरोत्सग्रो विधिवत्कल्पितो बभौ उदयाग्राद्रिभवने यथाभ्युदितभास्करे २२ तस्यायसं वर्मवरं वररत्नविभूषितं तारव्याप्तस्य नभसः शारदस्य समत्विषं २३ सतोमरव्यग्रकरश्चारुमौलिः स्वलंकृतः शारन्मध्ये दिनार्काभस्तेजसा व्यदहद्रिपून् २४ तं दृष्ट्वा द्विरदं दूरात्क्षेमधूर्तिर्द्विपस्थितः आह्वयन्नभिद्रावश्च मनाः प्रमनसं तरे २५ तयोः समभवद्युद्धं द्विपयोरुग्ररूपयोः यदृच्छया द्रुमवतोर्महापर्वतयोरिव २६ संसक्तनागौ तौ वीरौ तोमरैरितरेतरं बलवत्सूर्यरश्म्याभिर्भित्वान्योन्यं विनेदतुः २७ अपसृत्य तु नागाभ्यां मंडलानि विचेरतुः प्रगृह्य चोभौ धनुषा जघ्नतुर्वै परस्परं २८ क्ष्वेडितास्फोटितरवैर्बाणशब्दैस्तु सर्वतः तौ जनं हर्षयंतौ च सिंहनादं प्रचक्रतुः २९ ॥

चारुमौलिः रम्यकिरीटः द्विपस्थितो द्विपारूढः प्रमनाः प्रकृष्टमनाः प्रमनसं तरे प्रसन्नतरमनसं विनेदतुः संनिहितौ बभूवतुः वरुष्यविनिर्घः २७ २८ २९ ॥ ११

अपरैस्तोमरैरेव १५ १६ स भीमसेनः मेघैः सन्नसग्निरिवांशुमान् यथा मेघान्तर्हितस्य सूर्यस्य मरीचयः र
श्मिरूपेण सर्वतः प्रचरंति एवं रश्मिस्थानीयास्तोमराः १७ अंजोभातिक्रजगति १८ १९ गृह्यमाणः निगृ
समनुयतकराभ्यां तो द्विपाभ्यां कृतिनावुभौ वातोद्धुतपताकाभ्यां युयुधाते महाबलौ २० ताव
सोमस्य धनुषी छित्वान्योन्यं विनेदतुः शक्तितोमरवर्षेण प्रावृण्मेघाविवांबुभिः २१ हेमधन्वि
नराभीमं तोमरेणास्तनांतरे निर्बिभेदातिवेगेन षड्भिश्चाप्यपरैर्नदन् २२ स भीमसेनः शुशुभे तो
मरैरंगमाश्रितैः क्रोधदीप्तवपुर्मेघैः सन्नसमिरिवांशुमान् २३ ततो भास्करवर्णाभमंजोगतिम
यस्मयं ससर्जतोमरं भीमः प्रत्यमित्राय यत्नवान् २४ ततः कुलूताधिपतिश्चापमानम्य सायकैः
दशभिस्तोमरं भित्वा षष्ट्या विव्याध पांडवं २५ अथ कार्मुकमादाय भीमो जलदनिस्वनं रियोरभ्य
र्दयन्नागमुन्नदन्पांडवः शरैः २६ स शरौघार्दितो नागो भीमसेनेन संयुगे गृह्यमाणोपि नातिष्ठ
द्वातोद्धुत इवांबुदः २७ तमभ्यधावद्द्विरदं भीमो भीमस्य नागराट् महावातेरितं मेघं वातोद्धुत
इवांबुदः २८ संनिवार्यात्मनो नागं हेमधन्विः प्रतापवान् विव्याधाभिद्रुतं बाणैर्भीमसेनस्य कुं
जरं २९ ततः साधुविसृष्टेन क्षुरेणानतपर्वणा छित्वा शरासनं शत्रोर्नागं सामित्रमार्दयत् ३० ॥

हामाणः हेमधन्विना २७ २८ २९ आमित्रं शत्रुसंबंधिनं सामित्रमिति पाठांतरम् ३० ॥ ७

क॰ टी॰ अहन्नहतवान् ५३ हतः सादयाशाकलीकृतः अतएवअभितोद्विपंद्विपस्याभितः पपात ५४ ५५ क्षेमधू

२ ततः क्रुद्धोरणेभीमंतेमधूर्त्तिः पराभिनत् जघानचास्यद्विरदंनाराचैःसर्वमर्मसु ५६ सपपात
महानागोभीमसेनस्यभारतपुरानागस्यपतनादवप्लुत्यस्थितोमहीं ५७ तमभीमोपिद्विरदंगर
यासमपोथयत् तस्मात्प्रमथितान्नागात्क्षेमधूर्त्तिमवप्लुतं ५८ उद्यतायुधमायान्तंगदयाहन्
वृकोदरः सपपातहतःसासिर्व्यसुस्तमभितोद्विपं ५९ वज्रप्रभग्नमचलंसिंहोवज्रहतोयथा
तंहतंनरपतिंदृष्ट्वाकुलतानांयशस्करं ६० पाडवघ्नाथितासेनात्वदीयाभरतर्षभ ॥ इतिकर्ण
पर्वणिक्षेमधूर्त्तिवधः ५८८ संजयउवाच ततःकर्णोमहेष्वासःपांडवानामनीकिनीं जघा
नसमरेशूरःशरैःसंनतपर्वभिः १ तथैवपांडवाराजंस्तवपुत्रस्यवाहिनीं कर्णस्यप्रमुखे
क्रुद्धानिजघ्नुस्तेमहारथाः २ कर्णोपिराजन्समरेव्यहनत्पांडवींचमूं नाराचैरर्करश्म्याभैः
कर्मारपरिमार्जितैः ३ तत्रभारतकर्णेननाराचैस्ताडितागजाः नेदुःसेदुश्चमम्लुश्चबभ्रमु
श्चदिशोदश ४ वध्यमानेबलेतस्मिन्सूतपुत्रेणमारिष नकुलोभ्यद्रवत्तूर्णंसूतपुत्रंमहाहवे
५ भीमसेनस्तथाद्रौणिंकुर्वाणंकर्मदुष्करं विंदानुविंदौकेकेयौसात्यकिःसमवारयत् ६
तिंवधोद्वादशः ततःद्रौणिमभ्य ९ ॥ ११ ॥ २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ कृपेणायुयुधे ऽतिशोघः ४ माद्रीपुत्रः सुतं तत्र वेत्स्वव्याख्याडुःशासनमिति ५ लघुशीघ्रं सुशुश्रोभनं ॥

श्रुतकर्माणमायांतं चित्रसेनो महीपतिः प्रतिविंध्यस्तथा चित्रं चित्रकेतनकार्मुकं ७ दुर्योधनस्तु
राजानं धर्मपुत्रं युधिष्ठिरं संसप्तकगणान् क्रुद्धो ह्यभ्यधावद्धनंजयः ८ धृष्टद्युम्नः कृपेणाथ ता।
स्मिन्वीरवरक्षये शिखंडी कृतवर्माणं समासादयदच्युतं ९ श्रुतकीर्तिस्तथा शल्यं माद्रीपुत्रः सु
तेन च दुःशासनं महाराज सहदेवः प्रतापवान् १० केकयौ सात्यकिं युद्धे शरवर्षेण भास्वता सात्य
किः केकयौ चापि छादयामास भारत ११ तावेनं भ्रातरौ वीरौ जघ्नतुर्हृदये भृशं विषाणाभ्यां यथा
नागौ प्रतिनागं महावने १२ शरसंभिन्नवर्माणौ तावुभौ भ्रातरौ रणे सात्यकिं सत्यकर्माणं राजन्वि
व्यधतः शरैः १३ तैः सात्यकिर्महाराज प्रहसन्सर्वतो दिशः छादयंछरवर्षेण वारयामास भारत १४
वार्यमाणौ ततस्तौ हि शैनेयशरवृष्टिभिः शैनेयस्य रथं तूर्णं छादयामासतुः शरैः १५ तयोस्तु
धनुषी चित्रे छित्वा शौरिर्महायशाः अथ तौ सायकैस्तीक्ष्णैर्वारयामास संयुगे १६ अथान्ये धनुषी
चित्रे प्रगृह्य च महाशरान् सात्यकिं छादयंतौ तौ चेरतुर्लघु सुष्टु च १७ ताभ्यां मुक्ता महाबाणाः कं
कबर्हिणवाससः द्योतयंतो दिशः सर्वाः संपेतुः स्वर्णभूषणाः १८

॥ १३ १४ १५ १६ १७ १८ ॥

क॰री॰ अपवितमलंकृतं १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ॥

२२

वाणांधकारमभवत्तयोराजन्महामृधे अन्योन्यस्यधनुश्चैवचिच्छिदुस्तेमहारथाः १९ ततःक्रुद्धो
महाराजसात्यकिर्युद्धदुर्मदः धनुरन्यत्समादायसज्यंकृत्वाचसंयुगे २० क्षुरप्रेणसुतीक्ष्णेन
अनुविंदशिरोहरत् अपतत्तच्छिरोराजन्कुंडलोपचितंमहत् २१ शंबरस्यशिरोयद्वन्निहतं
समहारणे शोचयन्केकयान्सर्वान्जगामाशुवसुंधरां २२ तंदृष्ट्वानिहतंशूरंभ्रातातस्यमहा
रथः सज्यमन्यद्धनुःकृत्वाशैनेयंपर्यवारयत् २३ सषष्ट्यासात्यकिंविध्वास्वर्णपुंखैःशिला
शितैः ननादबलवान्नादंतिष्ठतिष्ठेतिचाब्रवीत् २४ सात्यकिंचततस्तूर्णंकेकयानांमहार
थः शरैरनेकसाहस्रैर्बाह्वोरुरसिचार्पयत् २५ सशरैःक्षतसर्वांगःसात्यकिःसत्यविक्रमः
रराजसमरेराजन्सपुष्पइवकिंशुकः २६ सात्यकिःसमरेविद्धःकेकयेनमहात्मना केके
यंपंचविंशत्याविव्याधप्रहसन्निव २७ तावन्योन्यस्यसमरेसंछिद्यधनुषीशुभे हत्वाचसार
थीतूर्णंहयांश्चरथिनौवरौ २८ विरथावसियुद्धायसमाजग्मतुराहवे शतचंद्रचितेगृह्य
चर्मणीसुभुजौतथा २९ व्यरोचेतांमहारंगेनिस्त्रिंशवरधारिणौ यथादेवासुरेयुद्धेजंभ
शक्रौमहाबलौ ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ अपहस्तेनतिर्यक्कूरस्तेन २५ २६ त्रयोदशः श्रुतकर्मा १ अभिसारः अभिसाराधिपतिश्चित्रसेनः आह ॥
मंडलानिततस्तौतुविचरंतौमहारणे अन्योन्यमभितस्तूर्णंसमाजग्मतुराहवे २१ अन्योन्यस्य
वधेचैवचक्रतुर्यत्नमुत्तमं कैकेयस्यद्विधाचर्मततश्चिच्छेदसात्वतः २२ सात्यकेस्तुतथैवासौ
चर्मचिच्छेदपार्थिवः चर्मछित्वातुकैकेयस्तारागणशतैर्वृतं २३ चचारमंडलान्येवगतप्रत्याग
तानिच तंचरंतंमहारंगेनिस्त्रिंशवरधारिणं २४ अपहस्तेनचिच्छेदशैनेयस्त्वरयान्वितः सव
र्मकैकेयोराजन्द्विधाछिन्नोमहारणे २५ निपपातमहेष्वासोवज्राहतइवाचलः तंनिहत्यरणेशू
रःशैनेयोरथसत्तमः २६ युधामन्युरथंतूर्णमारुरोहपरंतपः ततोन्यंरथमास्थायविधिवत्क
ल्पितंपुनः २७ केकेयानांमहत्सैन्यंव्यधमत्सात्यकिःशरैः साबध्यमानासमरेकैकेयानांमहाच
मूः २८ तमुत्सृज्यरणेशत्रुंप्रदुद्रावदिशोदश २९ इतिश्रीकर्णपर्वणिविंदानुविंदवधः ५२
संजयउवाच श्रुतकर्माततोराजंश्चित्रसेनंमहीपतिं आजघ्नेसमरेक्रुद्धःपंचाशद्भिःशिलीमु
खैः १ अभिसारस्तुतंराजन्नवभिर्नतपर्वभिः श्रुतकर्माणमाहत्यसूतंविव्याधपंचभिः २
श्रुतकर्माततःक्रुद्धश्चित्रसेनंचमूमुखे नाराचेनसुतीक्ष्णेनमर्मदेशेसमार्पयत् ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
४४

मूर्छां गृध्रनिद्रां कर्णमलेश्रविज्ञतं ४ एतं श्रुतकर्माणं ५ तं श्रुतकर्माणं ६ ७ सशरैरिति तिगोष्ठीगोपृथ्यः सो
ऽमहोतः सपद्यास्थूगारो ग्रलेकृतपर्वसशरैरलंकृतः स्पर्धः ८ ९ १० कृतच्छविः आहितशोभः ११ १२ स

मोतिविद्धोमहाराजनाराचेनमहात्मना मूर्छामभिययौवीरः कर्णमलेचाविवेशह ४ एतस्मिन्
न्तरेचैनश्रुतकीर्तिर्महायशाः नवत्याजगतीपालछादयामासपत्रिभिः ५ प्रतिलभ्यततः संज्ञां
चित्रसेनोमहारथः धनुश्चिच्छेदभल्लेनतंचविव्याधसप्तभिः ६ सोन्यत्कार्मुकमादायवेगघ्नं रुक्म
भूषितं चित्ररूपधरंचक्रेचित्रसेनंशरोर्मिभिः ७ सशरैश्चित्रितोराजाचित्रमाल्यधरोयुवा युवे
वसमरेशोभद्गोष्ठीमध्येस्वलंकृतः ८ श्रुतकर्माणमथवैनाराचेनस्तनान्तरे विभेदतरसाशूरस्ति
ष्ठतिष्ठेतिचाब्रवीत् ९ श्रुतकर्मापिसमरेनाराचेनसमर्पितः सुस्रावरुधिरंतत्रगैरिकार्द्रइवा
चलः १० ततः सरुधिराक्तांगोरुधिरेणकृतच्छविः रराजसमरेवीरः सपुष्पइवकिंशुकः श्रुत
कर्माततोराजन्शत्रुणासमभिद्रुतः शत्रुसंवारणंक्रुद्धोद्विधाचिच्छेदकार्मुकं ११ अथैनंछि
न्नधन्वानंनाराचानांशतैस्त्रिभिः छादयन्समरेराजन्विव्याधचसुपत्रिभिः १२ ततोपरेणभल्लेन
तीक्ष्णेननिशितेनच जहारसशिरस्त्राणंशिरस्तस्यमहात्मनः १४ तच्छिरोन्यपतद्भूमौचित्रसेनस्य
दीप्तिमत् यदृच्छयायथाचंद्रश्च्युतः स्वर्गान्महीतले १५ ॥ पत्रिभिः शोभनपुंखवद्भिर्नाराचानांशतैः १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१६ प्रेतराट्यमः १७ हावोहावाग्निस्तेन दग्धाः १८ १९ २० २१ २२ स्वर्णचित्रं रुक्मवर्णमयं चित्रं दावान्वितं २३ २४ २५

राजानं निहतं दृष्ट्वा तेऽभिसारं तमारिष अवद्रवन्त वेगेन विद्रमेन ससैनिकाः १९ ततः क्रुद्धो महे
ष्वासस्तस्मिन्प्राद्रवच्छरैः अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट् २० ते वध्यमानाः समरे तेन वै पौ
रेणाधन्विना व्यद्रवन्त दिशस्तोदावदग्धा इव द्विपाः २१ तांस्तु विद्रवतो दृष्ट्वा निहतस्ताहाद्विषञ्जये
द्रावयन्निषुभिस्तीक्ष्णैः कृतकर्माभ्यरोचत २२ प्रतिविंध्यस्ततश्चित्रं भित्त्वा पंचभिराशुगैः सारथिं च
त्रिभिर्विध्वा ध्वजमेकेषुणापि च २३ तं चित्रो नवभिर्भल्लैर्बाह्वोरसि चार्पयत् स्वर्णपुंखैः शतेना
ग्रैः कंकबर्हिणवाजितैः २४ प्रतिविंध्यो धनुश्छित्वा तस्य भारत सायकैः पंचभिर्निशितैर्बाणैरथे
नं महि जघ्निवान् २५ ततः शक्तिं महाराज स्वर्णचित्रां दुरासदां प्राहिणोत्तव पौत्राय घोरामग्निशिखा
मिव २६ तामापतन्तीं सहसा महोल्काप्रतिमां तदा द्विधा चिच्छेद समरे प्रतिविंध्यो हसन्निव २७
सापतत् द्विधा छिन्ना प्रतिविंध्यशरैः शितैः युगान्ते सर्वभूतानि त्रासयन्ती यथाशनिः २८ शक्तिं
तां प्रहतां दृष्ट्वा चित्रो गृह्य महागदां प्रतिविंध्याय चिक्षेप रुक्मजालविभूषितां २९ सा जघान ह
यांस्तस्य सारथिं च महारणे रथं प्रमृद्य वेगेन धरणीमन्वपद्यत ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ताडावरणं ११ १२ १३ १४ १५ १६ १७ १८ चतुर्दशः भीमः १ ॥

२५ एतस्मिन्नेवकालेतुरथादादायभारतशक्तिंचिक्षेपचित्रायस्वर्णदंडामलंकृतां तामापतंतींजग्रा
हचित्रोराजन्महामनाः ततस्तामेवचिक्षेपप्रतिविंध्यायपार्थिव समासाद्यरणेशूरंप्रतिविंध्यं
महाप्रभा ८ निर्भिद्यदक्षिणंबाहुंनिपपातमहीतले पतिताभासयच्चैवतंदेशमशनिर्यथा ९
प्रतिविंध्यस्ततोराजंस्तोमरंहेमभूषितं प्रेषयामाससंक्रुद्धश्चित्रस्यवधकांक्षया १० सतस्यव
र्मचवर्मांभित्वाहृदयमेवच जगामधरणींतूर्णंमहोरगइवाशुपे ११ सपपाततदाराजन्नाह
तेरणेसमाहतः प्रसार्यविपुलौबाहूपीनौपरिघसंनिभौ १२ चित्रंसंप्रेक्ष्यनिहतंतावकारण
शोभिनः अभ्यद्रवंतवेगेनप्रतिविंध्यंसमंततः १३ सृजंतोविविधान्बाणान्शतघ्नीश्चसकिं
किणीः तमवच्छादयामासुःसूर्यमभ्रगणाइव १४ तान्विधम्यमहाबाहुःशरजालेनसंयुगे
व्यद्रावयत्तवचमूंवज्रहस्तइवासुरीं १५ तेवध्यमानाःसमरेतावकाःपांडवैर्नृप विप्रकीर्यंत
सहसावातनुन्नाघनाइव १६ विप्रद्रुतेबलेतस्मिन्वध्यमानेसमंततः द्रोणिरेकोभ्ययात्तूर्णं
भीमसेनंमहाबलं १७ ततःसमागमोघोरोबभूवसहसातयोः यथादेवासुरेयुद्धेवृत्रवासव
योरिव १८ इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच भीमसेनंततोद्रोणीराजन्विव्याधपत्रि
णा परयात्वरयायुक्तोदर्शयन्नस्त्रलाघवं १ ॥ २५

२२ ४ ५ खड्गः गंडकः ९ ७ ८ ९ १० ११ १२ कृतप्रतिकृते ग्रन्योन्यास्त्रप्रतिघाते १२ ॥

अथैनं पुनराजघ्ने नवत्या निशितैः शरैः सर्वमर्माणि संप्रेक्ष्य मर्मज्ञो लघुहस्तवत् २ भीमसे
नः समाकीर्णो द्रोणिना निशितैः शरैः रराज समरे राजन् रश्मिवानिव भास्करः ३ ततः शरसह
स्रेण सम्प्रयुक्तेन पांडवः द्रोणपुत्रमवच्छाद्य सिंहनादममुंचत ४ शरैः शरांस्ततो द्रोणिः संवार्य
युधि पांडवं ललाटेभ्याहनद्राजन् नाराचेन स्मयन्निव ५ ललाटस्थं ततो बाणं धारयामास पा
ण्डवः यथा शृंगं वने दृप्तः खड्गो धारयते नृप ६ ततो द्रौणिं रणे भीमो यतमानं पराक्रमी त्रिभिर्वि
व्याध नाराचैर्ललाटे विस्मयन्निव ७ ललाटस्थैस्ततो बाणैर्ब्राह्मणः सो व्यशोभत प्रावृषीव यथा
सिक्तः त्रिशृंगः पर्वतोत्तमः ८ ततः शरशतैर्द्रौणिरर्दयामास पांडवं न चैनं कंपयामास मात
रिश्वेव पर्वतं ९ तथैव पांडवो युद्धे द्रौणिं शरशतैः शितैः नाकंपयत संहृष्टो वार्योघ इव पर्वतं
१० तावन्योन्यं शरैर्घोरैश्छादयानौ महारथौ रथवर्यगतौ वीरौ शुशुभाते बलोत्कटौ ११ आदित्या
विव संदीप्तौ लोकक्षयकरावुभौ स्वरश्मिभिरिवान्योन्यं तापयन्तौ शरोत्तमैः १२ ततः प्रतिकृते य
त्नं कुर्वाणौ तौ महारणे कृतप्रतिकृते यत्तौ शरसंघैरभीतवत् १३ ॥

क.टी.
२५

१४ १५ १६ २ १८ १९ २० २१ ईषतः द्रोणिचक्रतुः २२ २३ २४ २५ ॥

व्याघ्राविवचसंग्रामेचेरतुस्तौनरोत्तमौ शरदंष्ट्रौदुराधर्षौचापवक्त्रौभयंकरौ १४ अभूतांतावुभ
अपोवशरजालैःसमंततः मेघजालैरिवछन्नौगगनेचंद्रभास्करौ १५ प्रकाशेतेमुहूर्त्तेनततः।
स्तावप्यरिंदमौ विमुक्तौवज्रजालेनअंगारकबुधाविव १६ अथतत्रैवसंग्रामेवर्त्तमानेसुदारु
णे अपसव्यंततश्चक्रेद्रौणिस्तंवृकोदरं १७ किरंछरशतैरुग्रैर्द्धाराभिरिवपर्वतं नतन्ममर्
षभीमःशत्रोर्विजयलक्षणं १८ प्रतिचक्रेततोराजन्पांडवोप्यपसव्यतः मंडलानांविभागेषुगत
प्रत्यागतेषुच १९ बभूवतुमुलंयुद्धंतयोःपुरुषसिंहयोः चरित्वाविविधान्मार्गान्मंडलस्थानमे।
वच २० शरैःपूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः अन्योन्यस्यवधेचैवचक्रतुर्यत्नमुत्तमं २१ ईषत
विरथ्येचैवकुर्त्तमन्योन्यमाहवे ततोद्रौणिर्महास्त्राणिप्रादुश्चक्रेमहारथः २२ तान्यस्त्रैरेवसमरे
प्रतिजघ्नेस्यपांडवः ततोघोरंमहाराजअस्त्रयुद्धमवर्त्तत २३ ग्रहयुद्धंयथाघोरंप्रजासंहरणे
ह्यभूत् तेबाणाःसमसज्जंतमुक्तास्ताभ्यांतुभारत २४ द्योतयंतोदिशःसर्वास्तच्चसैन्यंसमंततः
बाणसंवेष्टितंघोरमाकाशंसमपद्यत २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उल्कानांच प्रस्योन्याभिमृष्टं विपातास्ते राहतमिवेतिल्मोपमा २५ तथैव दशनच्छदौ क्रोधात्संदशेशौ २ ३

उल्कापाताद्भुतं युद्धं प्रजानां संक्षयेन्नृप बाणाभिघातात्संजज्ञे तत्र भारत पावकः २६ सविस्फुलि
गो दीप्तार्चिर्यो ददाह वाहिनीद्वयं तत्र सिद्धा महाराज संपतंतो ब्रुवन्वचः २७ युद्धानामतिसर्वेषां यु
द्धमेतदितिप्रभो सर्वयुद्धानि चैतस्य कलां नार्हंति षोडशीं २८ नेदृशं च पुनर्युद्धं भविष्यति कदाच
न ब्रह्मज्ञानेन संपन्नावुभौ ब्राह्मणक्षत्रियौ २९ ब्रह्मशौर्येण संपन्नावुभौ चोग्रपराक्रमौ ब्रह्मभी
मबलो भीमः पुनश्च कृतास्त्रता ३० ब्रह्मवीर्यस्य सारत्वमहो सौष्ठवमेतयोः स्थितावेतौ हि समरे
कालांतकयमोपमौ ३१ रुद्राद्वाविव संभूतौ यथा द्वाविव भास्करौ यमो वा पुरुषव्याघ्रौ घोररू
पावुभौ रणे ३२ इति वाचः स्म श्रूयंते सिद्धानां वै मुहुर्मुहुः सिंहनादश्च संजज्ञे समेतानां दिवौकसां
३३ अद्भुतं चाप्यचिंत्यं च दृष्ट्वा कर्म तयो रणे सिद्धचारणसंघानां विस्मयः समपद्यत ३४ अशंस
तितदा देवाः सिद्धाश्च परमर्षयः साधु द्रोण महाबाहो साधु भीमेति चाब्रुवन् ३५ तौ स्पृशौ समरे
राजन्परस्परकृतागसौ परस्परमुदीक्षेतां क्रोधादुद्वृत्तचक्षुषौ ३६ क्रोधरक्तेक्षणौ तौ तु क्रोधा
त्प्रस्फुरिताधरौ क्रोधात्संदष्टदशनौ तथैव दशनच्छदौ ३७ ॥ ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ४८ ४९ ५० ५१ तौबाणौभृशमाहतावितिहेतोः शराभ्यांशुभगाभ्यांतयोः तदीययोरथयोरुपस्थेसमुत्थ

४७

अन्योन्यंछादयंतौस्मशरवृष्ट्यामहारथौ शरांबुधारौसमरेशस्त्रविद्युत्प्रकाशिनौ ४८ तावन्यो
न्यध्वजंविध्वासारथिंचमहारणे अन्योन्यस्यहयान्विध्वाविभिदातेपरस्परं ४९ ततः क्रुद्धौमहा
राजशोणितमानौचमूमुखे शरजालैः समासाद्यवज्रवेगोऽतरामदौ ५० तौपरस्परवेगाच्चशराभ्यां
चभृशमाहतौ निपेततुर्महावीर्यौरथोपस्थेतयोस्तदा ५१ ततस्तुसारथिर्ज्ञात्वाद्रोणपुत्रमचेत
नं अपोवाहरणाद्राजन्सर्वसैन्यस्यपश्यतः ५२ तथैवपांडवंराजन्विह्वलंतंमुहुर्मुहुः अपोवाह
रथेनाजौसारथिः शत्रुतापनं ५३ इतिकर्णपर्वणिअश्वत्थामभीमसेनयुद्धं धृतराष्ट्रउवाच य
थासंसप्तकैः सार्द्धमर्जुनस्याभवद्रणः अन्येषांचमहीपानांपांडवैस्तद्ब्रवीहिमे अश्वत्थाम्नस्तथा
युद्धमर्जुनस्यचसंजय १ संजयउवाच शृणुराजन्यथावृत्तंसंग्रामंब्रुवतोमम वीराणांशत्रुभिः
सार्द्धंदेहपाप्मप्रणाशनं २ पार्थः संसप्तकबलंप्रविश्यार्णवसंनिभं व्यक्षोभयदमित्रघ्नोमहा
वातइवार्णवं ३ ॥

५८ राजबाणैरतस्यमहाहवे उभौविविशिपतस्तूर्णमन्योन्यस्यवधैषिणौ ५ तौसायकैर्महा ५८ बुद्धिःसप्तपंक्ति ३
देशेरथिनीतियावत् पंचदशोध्यायः १ २ ३ ४ ॥ ३३ ५७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सरत्नान्रत्नांगुलीयकादियुक्तान् सरत्नीनिति पाठे रत्निः कूर्परात्प्राक्कनिष्ठान्तः करः तत्सहितान्पाणीन् १० ९
त्रु संख्यात्त्वत्र संसमर्दः इति पाठे शोभन स्वर्गदः संमर्दो येषां तथाभूताः वासितापुष्पवतीगौः तद्दृश्ये १० १२
छिन्नेति त्रिवेणुः उभयतः काष्ठद्वयसहितो धुर्ये दंडः अत्र चक्राधारदंडः ११ योक्त्राणि बंधनरज्जवः रश्मयः

शिरांसि तुन्नस्य वीराणां शशिनैर्मल्ले धनंजयः शशांकचंद्राभवक्त्राणि स्वदिभूदशनानि च ५ संतत्सार
त्रिनिंत्रिशं विना लेनेनलिनेनिव सन्नद्धानायतान्पुष्टान् चंदनागुरुभूषितान् ६ सायुधान्सतल
त्रांश्च पंचास्योरगसंनिभान् बाहून्खङ्गैरमित्राणां चिच्छेद समरेऽर्जुनः ७ धुर्यान्धुर्येतरान्सूतान्ध्व
जांश्चापानि सायकान् पाणीन्सरत्नान्सकृद्भल्लैश्चिच्छेद पांडवः ८ रथान्द्विपान्हयांश्चैव सारो
हानर्जुनो युधि शरैरनेकसाहस्रैर्निन्ये राजन्यमक्षयं ९ तं प्रवीराः समं संख्यानर्दमानाइव वृष
भाः वासितार्थमिव क्रुद्धमभिद्रुत्य मदोत्कटाः १० निघ्नंतमभिजघ्नुस्ते शरैः शृंगैरिव वृषभाः त
स्य तेषां च तद्युद्धमभवल्लोमहर्षणं ११ त्रैलोक्यविजये यद्वद्दैत्यानां सह वज्रिणा अस्त्रैरस्त्राणि
संवार्य द्विषतां सर्वतोऽर्जुनः १२ इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणान्न हारसः छिन्नत्रिवेणुचक्राक्षान्हत
योधान्ससारथीन् १३ विध्वस्तायुधतूणीरान्समुन्मथितकेतनान् संछिन्नयोक्त्ररश्मीकान्विवरू
थान्विकूबरान् १४ विप्रस्तबंधुरयुगान्विस्रस्ताक्षप्रमंडलान् रथान्विशकलीकुर्वन्महाभ्राणीव

यदृच्छाः विवरूथान् रथगुप्तिरहितान् कूबरं त्रिवेणोरग्रभागः बंधुरं रथतल्पः युगं पुरोग्रकाष्ठं १४ अक्ष
प्रमंडलं रथनीडत्वयोः संधानकाष्ठजातं विशकलीकुर्वन् विशीर्णशकलीकुर्वन् १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰दी॰
२८

१७ वंशादीनां कांस्यादीन्यथासंख्यं विभ्रतः १८ २० अभिचक्राः करकाकारमग्रफलकं येषां तान् अमित्रग्रक

विस्मापयन्न्वेतणीयं हि षतां भयवर्धनं महारथसहस्रस्य समं कर्माकरोज्जयः १९ सिद्धा देवर्षि
संघाश्च चारणाश्चापि तुष्टुवुः देवदुंदुभयो नेदुः पुष्पवर्षाणि चापतन् २० केशवार्जुनयोर्मूर्द्धि
प्राह वाक् आकाशगामिनी चंद्राग्न्यनिलसूर्याणां कांतिदीप्तिबलद्युतीः १८ यौ सदा बिभ्रतु वीरौ विमौ
तौ केशवार्जुनौ ब्रह्मेशानाविवाजय्यौ वीरावेकरथे स्थितौ १९ सर्वभूतवरौ वीरौ नरनारायणा
विमौ इत्येतन्महदाश्चर्यं दृष्ट्वा श्रुत्वा च भारत २० अश्वत्थामा सुसंयत्तः कृष्णावभ्यद्रवद्रणे अ
धपांडवमस्यंतममित्रघ्नं करोद्धृतान् २१ सेषुणा पाणिनाहूय प्रहसन्द्रौणिरब्रवीत् यदि मां म
न्यसे वीर प्राप्तमर्हमिहातिथिं २२ ततः सर्वात्मना त्वद्य युद्धातिथ्यं प्रयच्छ मे एवमाचार्यपुत्रे
ण समाहूतो युयुत्सया २३ बहुमेनेऽर्जुनोत्मानमिति चाह जनार्दनं संसप्तकाश्च मे वध्या द्रो
णिराह्वयते च मां २४ यदत्रानंतरं प्राप्तं प्रशास मे तद्धि माधव आतिथ्यकर्माभ्युत्थाय दीयतां य
दि मन्यसे २५ एवमुक्तोऽवहत्पार्थं कृष्णो द्रोणात्मजांतिके जैत्रेण विधिनाहूतं वायुरिंद्रमिवा
ध्वरे २६ तमामंत्र्यैकमनसं केशवो द्रौणिमब्रवीत् अश्वत्थामन् स्थिरो भूत्वा प्रहराशु सहस्व च २७

तान् २१ अर्हेश्च जयितैर्योगं २२ २३ २४ अनंतरं प्रथमे २७ ॥ ३३ ॥
२८

१६ गायस्तः यत्नवान् १७ इषुधिप्रभृतिभ्यः शराः पेतुः लोमभ्योपिवर्मभ्योपिचयेत्तत्रहेतुब्रह्मवादिनः
निर्वेष्टुंभर्तृपिंडंहिकालोयमुपजीविनां सलोविवादोविप्राणांस्याल्लोलाद्रोणपार्थयो १८ यामभ्या
र्थयसेमोहाद्दिव्यांपार्थस्यसन्क्रियां तामाम्रमिछन्नुद्यस्वस्थिरोभूत्वाद्यपांडव १९ इत्युक्तोवासुदे
वेनतथेत्युक्त्वाद्विजोत्तमः विव्याधकेशवंपार्थमनाराचैरर्जुनंत्रिभिः २० तस्यार्जुनःसुसंक्रुद्धस्त्रिभि
र्बाणैःशरासनं चिच्छेदचान्यदादत्तद्रोणिस्त्वरितंधनुः २१ सज्जंकृत्वानिमेषाच्चविव्याधार्जुन
केशवौ त्रिभिःशतैर्वासुदेवंसहस्रेणचपांडवं २२ ततःशरसहस्राणिप्रयुतान्यर्बुदानिच स
सृजद्रोणिरायस्तःसंस्तभ्यचरणोर्जुनं २३ इषुधेर्धनुषश्चैवज्यायाश्चैवाथमारिष बाहुभ्यःकराभ्या
मुरसोवदनाद्घ्राणनेत्रतः २४ कर्णाभ्यांशिरसोंगेभ्योलोमवर्मभ्यएवच रथध्वजेभ्यश्चशरानि
ष्पेतुर्ब्रह्मवादिनः २५ शरजालेनमहताविद्ध्वामाधवपांडवौ ननादमुदितोद्रोणिर्महामेघौ
घनिस्वनं २६ तस्यतंनिनदंश्रुत्वापांडवोच्युतमब्रवीत् पश्यमाधवदौरात्म्यंगुरुपुत्रस्यमांप्रति २७
वधप्राप्तौमन्यतेनौप्रवेश्यशरवेश्मनि एषोस्मिहन्मिसंकल्पंशिक्षयाचबलेनच २८ अश्व
त्थाम्नःशरानस्तान्छित्वैकैकंत्रिधात्रिधा व्यधमद्भरतश्रेष्ठोनीहारमिवमारुतः २९ ॥

योगाबलवतइत्यर्थः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ४७ महता शैलेन शिलासमूहो यस्मिन् तं महाशैलं पर्वतमिवेति शेषः पांडवेन्द्राणीत्यत्र कांडकोषानिति पाठः

२९

ततः संसप्तकान् भूयः साश्वसूतरथद्विपान् ध्वजपत्तिगणान् रौद्रैर्बाणैर्विव्याध पांडवः ४० येयेददृ
शिरे तत्र यद्यद्रूपास्तदा जनाः तेते तत्र शरैर्व्याप्तं मेनिरे त्वात्मनात्मना ४१ ते गांडीवप्रमुक्तास्तु नाना
रूपाः पतत्रिणः क्रोशमात्रे स्थितान् घ्नंति द्विपांश्च पुरुषान् रणे ४२ भल्लैः छिन्नाः कराः पेतुः करि
णां मदवर्षिणां यथा वने परशुभिर्निकृत्ताः सुमहाद्रुमाः ४३ पश्चात्तु शैलवत्पेतुस्ते गजाः सहस्रा
रिभिः वज्रिवज्रप्रमथिता यथैवाद्रिचयास्तथा गंधर्वनगराकारान् रथांश्चैव सुकल्पितान् वि
नीतैर्जवनैर्युक्तानास्थितान् युद्धदुर्मदैः ४५ शरैर्विशकलीकुर्वन्नमित्रानभ्यवीवृषत् स्वलंकृ
तानश्वसारीन् पत्तींश्चाहन्धनंजयः ४६ धनंजययुगांतार्कः संसप्तकमहार्णवं व्यशोषयत दुःशोषं
तीक्ष्णैः शरगभस्तिभिः ४७ पुनर्द्रौणिं महाशैलं नाराचैर्वज्रसंनिभैः निर्बिभेद महावेगैस्त्वरन्व
ज्रीव पर्वतं ४८ तमाचार्यसुतः क्रुद्धः साश्वयंतारमाशुगैः युयुत्सुरागमद्योद्धुं पार्थस्तानच्छिनच्छ
रान् ४९ ततः परमसंक्रुद्धः पांडवेन्द्राण्यवासृजत् अश्वत्थामाभिरूपाय गृहानतिथये यथा ५०

बाणानां कोशभृतान्विषंगांश्चावेदयत् ५० ॥ ॥

ततः स तत्रमभितः नत्वं चलत्लीकृत्य १ विमार्गस्थो वक्रातिचारणौ २२ क्रूरौ क्रूरमार्जनौ ग्रामतः दीपयां चक्रतः
अथ तं समरे कोस्य त्वकापांडवो द्रोणमभ्ययात् अपांक्रेयानिवत्यक्त्वा श्रातापांक्रेयमर्थिनं ५५ इति श्रीक
र्णपर्वणि ८८ संजय उवाच ततः समभवद्युद्धं शुक्रांगिरसवर्चसोः नक्षत्रमभितो व्योम्नि शुक्रांगिरसयो
रिव १ संतापयंतावन्योन्यं दीप्तैः शरगभस्तिभिः लोकत्रासकरावास्तां विमार्गस्थौ ग्रहाविव २ ततो
विध्यद्भुवोर्मध्ये नाराचेनार्जुनोभृशं स तेन विवभौ द्रोण ऊर्ध्वरश्मिर्यथा रविः ३ अथ कृष्णौ शरशा
तैः स्वत्यार्दितौ भृशं सरश्मिजाल विकचौ युगांताकाविवासतुः ४ ततोर्जुनः सर्वतो धारमस्त्र
मवासृजद्धा सुरदेवभिभूते द्रोणायनिंचाभ्यहनत्स्वबल्के वज्राग्निवैवस्वतदंडकल्पैः ५ स केपांवचा
र्जुनवातितेजा विव्याधमर्मस्वतिरौद्रकर्मा बाणैः स पुंखैरति तीव्रवेगैर्यं गाहतामस्त्रविधेरथेन ६ द्रो
णोरिपून्नर्जुनः संनिवार्य व्यायच्छतस्तत् द्विगुणैः सुपुंखैः तं सात्वमृत्यज्जनमेकवीरमाहूयसंसमक
सैन्यमार्छत् ७ धनूंषि बाणानिषुधीर्धनूंष्यैः पाणीन्भुजान्पाणिगतं च शस्त्रं छत्राणि केतूंस्तुर
गानथेषां वस्त्राणि माल्यान्यथ भूषणानि ८ मर्माणि वर्माणि मनोरमाणि प्रियाणि सर्वाणि शि
रांसि चैव चिच्छेद पार्थो द्विषतां प्रयुक्तैर्बाणैः स्थिरानामपराङ्मुखानां ९ सुकल्पिताः स्यंदनवाजि
नागाः समास्थितायत्नकृतैर्नृवीरैः पार्थेरितैर्बाणशतैर्निरस्तास्तैरेव सार्धं नरवरानिपेतुः १० ॥
४ सर्वतो धारं सर्वतोस्त्रधारावर्षकं वज्रकल्पैः अमोघैः अग्निकल्पैः दाहकैः वैवस्वतदंडकल्पैः प्राणहरैः ५
६ व्यायच्छतोयतमानस्य प्राछैत् गतवान् ७८९ सुकल्पिताः सुसंनद्धाः यत्नकृतैः कृतयत्नैः तैरेव बाणैरेव १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११ देवरिपुस्वामी द्विपश्चेति गजास्तरवस्तस्यैरिमर्थः १२ कृतान्तस्येव शत्रुः १३ १४ तेभ्यः स्यामानं तान् तदस्मान्

पद्मार्कपूर्णेन्दुनिभाननानि किरीटमाल्याभरणोज्ज्वलानि भल्लैश्चिच्छेद स चक्रवर्तितानि प्रपेतुरु
र्व्यां नरशिरांसि जन्ये ॥ ११ अथ द्विपैर्देवरिपुद्विपाभैर्दैवारिदर्पापहमस्तदर्पं कलिङ्गवङ्गाङ्गनिषा
दवीरा जिघांसवः पाण्डवमभ्यधावन् ॥ १२ तेषां द्विपानां निचकर्त पार्थो वर्माणि चर्माणि करान्नियं
न्द्रै तॄन् ध्वजान्पताकांश्च ततः प्रपेतुर्वज्राहतानीव गिरेः शिरांसि ॥ १३ तेषु प्रभग्नेषु गुरोस्तनूजं बा
णैः किरीटी नवसूर्यवर्णैः प्रच्छादयामास महाभ्रजालैर्वायुः समुद्यन्तमिवांशुमन्तं ॥ १४ ततोऽर्जु
नेषून् इषुभिर्निरस्य द्रौणिः शितैरर्जुनवासुदेवौ प्रच्छादयित्वा दिवि चेन्दुसूर्यौ ननाद सोऽम्भोद इवा
तपान्ते ॥ १५ तमर्जुनस्तांश्च पुनस्त्वदीयानभ्यर्दितस्तैरभिसृत्य शस्त्रैः बाणान्धकारं सहसैव कृत्वा
विव्याध सर्वानिषुभिः सुपुंखैः ॥ १६ नाप्याददत्संदधन्नैव मुंचन् बाणान् रणेऽदृश्यत सव्यसाची ।
रथांश्च नागांस्तुरगान्पदातीन्संस्यूतदेहान्ददृशुर्हतांश्च
१७ ॥

१५ तैः कृतं बाणान्धकारं कृत्वा छित्त्वा कृत्तीच्छेदने १६ संस्यूता ग्रथिताः संमेच्य हूर्वेतः १७ ॥ ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समासविद्धेनेनसमग्रधनुर्वेदविदा अक्रियावान्प्रतिकाररहितः २१ अविकर्णैःअविकर्णेनतल्पाग्रैः २२

संधायार्जुनाराचवरान्द्रोणद्रौणिस्त्वरन्नेकमिवोत्ससर्ज तेषांचपंचार्जुनमभ्यविध्यत्पंचाच्युतंनि
र्बिभिदुःसुपुंखाः २८ तेनाहतौसर्वमनुष्यमुख्यावसृक्स्रवंतौधनदेंद्रकल्पौ समासविद्येनतथाविम
नोहतौरणेत्ताविति मेनिरेन्ये २९ अथार्जुनंप्राहदशार्हनाथः प्रमाद्यसेकिंजहियोधमेतं कुर्याद्धिदो
षंसमुपेक्षितोयंकष्टोभवेद्व्याधिरिवाक्रियावान् ३० तथेतिचोक्त्वाच्युतमप्रमादीद्रौणिंप्रयत्नादिषु
भिस्ततक्ष भुजौवरौचंदनसारदिग्धौवक्षःशिरोथाप्रतिमौतथोरू ३१ गांडीवमुक्तैःकुपितोविकर्णै
र्द्रौणिंशरैःसंयतिनिर्बिभेद छित्वातुरश्मींस्तुरगानविध्यत्तेतंरणाद्दूरमतीवजह्रुः ३२ सतैर्हृतोवात
जवैस्तुरंगैर्द्रौणिर्दृढंपार्थशराभिभूतः इयेषनावृत्यपुनस्तुयोद्धुंपार्थेनसार्द्धंमतिमान्विमृश्य जा
नन्जयंनियतंवृष्णिवीरेधनंजयेचांगिरसांवरिष्ठः विवेशकर्णस्यबलंतरस्वीक्षीणोत्साहःक्षीणबा
णास्त्रयोगः ३३ नियम्यसहयान्द्रौणिःसमाश्वास्यचमारिष रथाश्वनरसंबाधंकर्णस्यप्राविशद्बलं
३४ प्रतीपकारिणिरणाद्दश्वत्थाम्निहृतेहयैः मंत्रौषधिक्रियायोगैर्व्याधौदेहादिवाहृते ३५ संसक्ता
नभिमुखौप्रयातौकेशवार्जुनौ वातोद्धूतपताकेनस्यंदनेनौघनादिना ३६ इतिश्रीकर्णपर्वणि संज
यउवाच अथोत्तरेणपांडूनांसेनायांध्वनिरुत्थितः रथनागाश्वपत्तीनांदंडधारेणवध्यतां १॥

श्रोणिरसांश्रेणिरोगाः
णांमध्ये २३ २४ २५ २६ अथमान अथोचनादिनाक्लोचवन्नादवतासमदृशः अथो उत्तरेण उत्तरतः वध्यतांवध्यमा

क.टी.
२१

२ अनवरः अहीनः ४ अंकुशाग्रहे अंकुशधारणे हस्तिपृष्ठे इत्यर्थः ग्रहे आदित्यादिग्रहसमूहे पुष्टप्रतिग्रहे च
अप्रसह्यः विकचः कचोपलक्षितशिरोरहितः केतुरूपी ग्रहः विकचो विस्तीर्णो ग्रहः धूमकेतुरूपी उ-
त्पातग्रहः ५ दानवनागसंनिभं गजासुरोपमं गजमित्यर्थात् समास्थितः सन्नित्यन्वयः ६ रथान्मादे

निवर्तयित्वा तं रथं केशवोऽर्जुनमब्रवीत् वाहयन्नेव तुरगान् नारुढानिलरंहसः मा गा धीप्रति विक्रां
तो हि रदेन प्रमाथिना भगदत्तात् दनवरः शिक्षया च बलेन च ३ एनं हत्वा निहंतासि पुनः संसप्तका
निति वाक्यांते प्रापयत्सार्थं दंडधारांतिकं प्रति ४ ससम्भगधानां प्रवरो अंकुशाग्रहो ग्रहे प्रसह्यो विक
चो यथा ग्रहः सपत्नसैन्यं प्रममाथ दारुणो महीं समग्रां विकचो यथा ग्रहः ५ सुकल्पितं दानव
नागसंनिभं महाभ्रनिर्ह्रादममित्रमर्दनं रथाश्वमातंगगणान् सहस्रशः समास्थितो हंति शरैर्नरा
नपि ६ रथानधिष्ठाय सवाजिसारथीन् रथांश्च पादैर्द्विरदो व्यपोथयत् द्विपांश्च पद्भ्यां ममर्द केरेण
द्विपो ननामो हंति च कालचक्रवत् ७ नरांस्तु कार्ष्णायसवर्मभूषणान् निपात्य साश्वान् पिपत्तिभिः
सह व्यपोथयद्दंतिवरेण शुष्मिणा सशब्दवत् स्थूलनलं यथा तथा ८ ॥

स्थ
रधिष्ठाय अश्वाक्रम्य ममर्द मर्दयामास नन्वत्र रार्थ सामानकर्षः एवं करेणशुंडया ननाम हीन पोथयदि-
ति एवं द्विपो हंति रथादीनित्यर्थात् ७ शुष्मिणा बलवता स्थूलं सुषिरं नलं विशेषं ८ ॥

२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संकुलेरणादेशेइतिसामर्थ्यात्तेषं १० सगुणेषुकार्मुकंमौर्वीबाणसहितंधनुः नियं[illegible]रनियंतारं ११ घना
घनोघातकमत्तदंतिनोरितिविग्रहः १२ सहैवयुगपत् १३ १४ चरन्गच्छन्भ्रमन्भ्रांतिप्राप्नुवन् अतएवअ।

अथार्जुनोस्यातलनेमिनिस्वनेमृदंगभेरीबहुशंखनादिते रथाश्वमातंगसहस्रसंकुलेरथोत्तमेना
भ्यपतद्द्विपोत्तमं १ ततोर्जुनंद्वादशभिःशरोत्तमैर्जनार्दनंषोडशभिःसमार्पयत् सदंडधारस्तुरगां
स्त्रिभिस्त्रिभिस्ततोननादप्रजहाससचासकृत् २ ततोस्यपार्थःसगुणेषुकार्मुकंचकर्तभल्लैर्ध्वजम
प्यलंकृतं पुनर्नियंतॄन्सहपादगोप्तृभिस्ततःसचुक्रोधगिरिव्रजेश्वरः ३ ततोर्जुनंभिन्नकटेनदंति
नाघनाघनेनानिलतुल्यवर्चसा अतीवचुक्षोभयिषुर्जनार्दनंधनंजयंचाभिजघानतोमरैः ४ अ
थास्यबाहूद्विपहस्तसन्निभौशिरश्चपूर्णेंदुनिभाननंत्रिभिः क्षुरैःप्रचिच्छेदसहैवपांडवस्ततोद्विपं
बाणशतैःसमार्पयत् ५ सपार्थबाणैस्तपनीयभूषणैःसमाचितःकांचनवर्मभृद्द्विपः तथाच
काशेनिशिपर्वतोयथादवाग्निनाप्रज्वलितौषधिद्रुमः ६ सवेदनार्तोंबुदनिस्वनोनदंश्चरन्भ्रमन्
स्खलितांतरोद्रवन् पपातरुग्णःसनियंतृकस्तथायथागिरिर्वज्रविदारितस्तथा ७ हिमावदाते
नसुवर्णमालिनाहिमाद्रिकूटप्रतिमेनदंति नाहतेरणेभ्रातरिदंडआव्रजन्जिघांसुरिंद्रावरजंधनंजयं ८

स्खलितांतरः मध्येस्खलन्नित्यर्थः सनियंतृकः महामात्रसहितःपपात तयाघातयोगंयथास्यात्तथारुग्णः
पीडितोयथैवंभूतःपपातेतिपृथगन्वयः १५ इंद्रावरजंविष्णुंकृष्णमित्यर्थः धनंजयंचजिघांसुर्दंडआव्रज
न्नूनंदंतिनासहेतिशेषः १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ नर्दयन्शङ्खंकारयन् १७ १८ अस्त्रानस्त्रैरवलात् १९ २० गजोत्तमाःमहागजारूढाःतोदंडधारनस्तु।

१२

सतोमरैरर्ककरप्रभैस्त्रिभिर्जनार्दनंपंचभिरर्जुनंशितैः समर्पयित्वाविननादनर्दयंस्ततोस्यबाहू
निचकर्तपांडवः १७ क्षुरप्रकृत्तौसुभृशंससतोमरौशुभांगदौचंदनरूषितौभुजौ गजात्पतंतौयुग
पद्विरेजतुर्यथाद्रिशृंगात्पतितौमहोरगौ १८ तथार्द्धचंद्रेणहृतंकिरीटिनापपातदंडस्यशिरःक्षि
तिंद्विपात् सशोणितार्द्रोनिपतन्विरेजेदिवाकरोस्तादिवपश्चिमांदिशं १९ अथद्विपंश्वेतवराभ्रसं
निभंदिवाकरांशुप्रतिमैःशरोत्तमैः बिभेदपार्थःसपपातनादयन्हिमाद्रिकूटंकुलिशाहतंय
था २० ततोपरेतत्प्रतिमागजोत्तमाजिगीषवःसंप्रतिसव्यसाचिना तथाकृतास्तेचतथैवतोद्वि
पौततःप्रभग्नंसुमहद्विपोर्बलं २१ गजारथाश्वाःपुरुषाश्चसंघशःपरस्परघ्नाःपरिपेतुराहवे प
रस्परप्रस्खलिताःसमाहताभृशंनिपेतुर्बहुभाषिणोहताः २२ अथार्जुनंस्वेपरिवार्यसैनिकाः
पुरंदरंदेवगणाइवाब्रुवन् अभैष्मयस्मान्मरणादिवप्रजाःसवीरदिष्ट्यानिहतस्त्वयारिपुः
२३ ॥

द्वौद्विपौसाध्वसोत्कृतौछिन्नौनस्थानेपिकृताःछिन्नाः २१ २२ २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ २९ अष्टादशाःश्रमा १ धुर्यान्अश्वान्धुर्यगतान्वाहादीन्अमित्रवीराणांचिच्छेदेतिद्वयोःसंबंधः ४ वासिता
र्थेवा सिताकरिणीनार्योर्वासितेस्त्रभोक्तुतेइतिविश्वः यथास्वयंवरस्थांस्त्रियं प्राप्तुंवृषभाश्चअन्येवृषभाश्चतेषा

नचेदरातिष्ठस्मंजनेनभयात्द्विषद्भिरेवंबलिभिःप्रपीडिते तथाभविष्यद्द्विषतांप्रमोदनेयथाद्यहते
ष्वित्यहनोरिसूदन २४ इतीवभूयश्चमरुद्भिरीरितानिशम्यवाचःसुमनास्ततोऽर्जुनः यथान्वरूपंप्र
तिपूज्यतंजनंजगामसंसप्तकसंघहापुनः २५ इतिकर्णपर्वणि ११ संजयउवाच प्रत्यागत्यपुनर्जि
ष्णुर्जघ्नेसंसप्तकान्बहून् वक्रातिवक्रगमनादंगारकइवग्रहः १ पार्थबाणहताराजन्नराश्वरथकुं
जराः विचेलुर्बभ्रमुर्नेशुःपेतुर्मम्लुश्चभारत २ धुर्यान्धुर्यगतान्सूतान्ध्वजांश्चापानिसायकान् १
पाणीन्पाणिगतंशस्त्रंबाहूनपिशिरांसिच ३ भल्लैःक्षुरैरर्धचंद्रैर्वत्सदंतैश्चपांडवः चिच्छेदामि
त्रवीराणांसमरेप्रतियुध्यतां ४ वासितार्थेयुयुत्संतोवृषभावृषभंयथा निपतंत्यर्जुनंशूराःशत
शोऽथसहस्रशः ५ तेषांतस्यचतद्युद्धमभवल्लोमहर्षणं त्रैलोक्यविजयेयादृग्दैत्यानांसहवज्रि
णा ६ तमविध्यत्त्रिभिर्बाणैर्दंदशूकैरिवाहिभिः उग्रायुधस्ततस्तस्यशिरःकायादपाहरत् ७ ते
ऽर्जुनंसर्वतःक्रुद्धानानाशस्त्रैरवीवृषन् मरुद्भिःप्रेरितामेघाहिमवंतमिवोष्णगे ८ ॥

एयंवृषभावृषभमेवास्त्रेष्टंयोधकुलंअहंपूर्विकयानिपततीत्येवंयुद्धेऽर्जुनंप्राप्तुंराजानइत्यर्थः वासितंप्रतिरुष्टे
राज्यादिकंवावस्तु ५ ६ तस्यउग्रायुधस्ततस्यपाहरदर्जुनः ७ उष्णगोग्रीष्मेगातेसतिप्रावृषीत्यर्थः उष्णोग्री
ष्मआगतोनीतोयत्रसउष्णगः कालविशेषइतिविग्रहः ८ ॥ ३१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
११

अश्वैस्त्रिभिः ९ १० अनुकर्षः स्यादधःस्थदारु ११ १२ १३ निर्जिह्वांत्राः निर्गताः जिह्वा अंत्राणि च येषां ते

अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः सम्यगस्तैः शरैः सर्वान् सहितानहनद्बहून् ९ छिन्नत्रिवे
णुसंघातान्तांस्तु पार्ष्णिसारथीन् विहस्तहस्ततूणीरान्विचक्ररथकेतनान् १० संछिन्नरश्मि
योक्त्रांतांस्त्वनुकर्षयुगान्रथान् विध्वस्तसर्वसंनाहान्बाणैस्त्वर्जुनस्तदा ११ ते रथास्तत्र विध्व
स्ताः परार्ध्या भांत्यनेकशः धनिनामिव वेश्मानि हतान्यग्न्यनिलांबुभिः १२ द्विपाः संभिन्नमर्मा
णो वज्राशनिसमैः शरैः पेतुर्गिर्यग्रवेश्मानि वज्रपाताग्निभिर्यथा १३ सारोहास्तुरगाः पेतुर्ब
हवोऽर्जुनताडिताः निर्जिह्वांत्राः क्षितौ क्षीणा रुधिरार्द्राः सुदुर्दृशः १४ नराश्वनागा नाराचैः सं
स्यूताः सव्यसाचिना बभ्रमुश्चस्खलुः पेतुर्नेदुर्मम्लुश्च मारिष १५ अनेकैश्च शिलाधौतैर्वज्रा
शनिविषोपमैः शरैर्निजघ्निवान्पार्थो महेंद्र इव दानवान् १६ महार्हवर्माभरणा नानारूपा
म्बरायुधाः सरथाः सध्वजा वीरा हताः पार्थेन शेरते १७ ॥

१४ १५ १६ १७ ॥ ~ ११

१८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१

विजिताः पुण्यकर्माणो विशिष्टाभिजनश्रुताः गताः शरीरैर्वसुधामर्जितैः कर्मभिर्दिवं १८ अ
थार्जुनं रथवरं त्वदीयाः समभिद्रवन् नानाजनपदाध्यक्षाः सगणा जातमन्यवः १९ उह्यमाना
रथाश्वैभैः पत्तयश्च जिघांसवः समभ्यधावन्त्संक्रान्ता विविधं क्षिप्रमायुधं २० तदायुधमहावर्षं
मुक्तं योधमहाम्बुदैः व्यधमन्निशितैर्बाणैः क्षिप्रमर्जुनमारुतः २१ साश्वपत्तिद्विपरथं महाश
स्त्रौघसंप्लवं सहसा संतितीर्षन्तं पार्थं शस्त्रास्त्रसेतुना २२ अथाब्रवीद्वासुदेवः पार्थं किं क्रीड
से नघ संशप्तकान्प्रमथ्यैनांस्ततः कर्णवधे त्वर २३ तथेत्युक्त्वार्जुनः क्षिप्रं शिष्टान्संशप्तकान्र
णे आक्षिप्य शस्त्रेण बलाद्दैत्यानिन्द्र इवावधीत् २४ आददत्संदधन्नेषून्दृष्टः कैश्चिद्रणेर्जु
नः विमुंचन्वा शरान्शीघ्रं दृश्यते वहितैरपि २५ आश्चर्यमिति गोविन्दः सममन्यत भारत हं
सांशुगौरास्ते सेनां हंसाः सर इवाविशन् २६ ततः संग्रामभूमिं च वर्तमाने जनक्षये अवेक्षमा
णो गोविन्दः सव्यसाचिनमब्रवीत् २७ एष पार्थ महारौद्रो वर्तते भरतक्षयः पृथिव्यां पार्थिवानां वै
दुर्योधनकृते महान् २८ पश्य भारत चापानि रुक्मपृष्ठानि धन्विनां महतां चापविद्धानि कलापा
निषुधीस्तथा २९ जातरूपमयैः पुंखैः शरांश्च नतपर्वणः तैलधौतांश्च नाराचान्विमुक्तानिव पन्न

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ २६ कलापानलंकारान् १० आकीर्णान्सर्वतो वितिमान् ११ १२ १३ १४ १५ वाजिनां शरीरैरिति संबंधः देशमा
आकीर्णांस्तोमरैश्चापि विविधान्हेमभूषितान् चर्माणि चापविद्धानि रुक्मपृष्ठानि भारत ११ स्तव
णीविकृतान्प्रासान्शक्तीः कनकभूषिताः जांबूनदमयैः पट्टैर्बद्धाश्च विपुलागदाः १२ जातरूप
मयीश्चर्ष्टीः पट्टिशान्हेमभूषितान् दंडैः कनकचित्रैश्च विप्रविद्धान्परश्वधान् १३ परिघान्भिंडि
पालांश्च भुशुंडीः कणपानपि अयस्कुंतांश्च पतितान्मुसलानि गुरूणि च १४ नानाविधानि शस्त्रा
णि प्रगृह्य जयगृद्धिनः जीवंत इव दृश्यंते गतसत्वास्तरस्विनः १५ गदाविमथितैर्गात्रैर्मु
सलैर्भिन्नमस्तकान् गजवाजिरथैः क्षुण्णान्ददर्श योधान्सहस्रशः १६ मनुष्यगजवाजीनां श
रशक्त्यृष्टितोमरैः निस्त्रिंशैः पट्टिशैः प्रासैर्नखरैर्लगुडैरपि १७ शरीरैर्बहुधा छिन्नैः शोणितौ
घपरिप्लुतैः गतासुभिरमित्रघ्न संवृता रणभूमयः १८ बाहुभिश्चंदनादिग्धैः सांगदैः शुभभू
षणैः सतलत्रैः सकेयूरैर्भाति भारत मेदिनी १९ सांगुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनां २० बद्धचूडामणिवरैः शिरोभिश्च सकुंडलैः रथा
श्च बहुधा भग्नान्हेमकिंकिणिनः शुभान् २१ अक्षांश्च बहुधा पश्य शोणितेन परिप्लुतान् ।
अनुकर्षान्वपासंगान्पताका विविधान्ध्वजान् २२ ॥
वं १६ १७ १८ १९ २० २१ २२॥ २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४

योधानांचमहाशंखांश्चान्यांकुशांश्चप्रकीर्णकान् निरस्तजिह्वान्मातंगान्शयानान्पर्वतोपमान् ४३
वैजयंतीर्विचित्राश्चहतांश्चगजयोधिनः वारणानांपरिस्तोमान्सयुक्तानेककंबलान् ४४ विपा
टितविचित्राश्चरूपविचित्राःकुथास्तथा भिन्नाश्चबहुधाचैराःपतद्भिश्चूर्णितागजैः ४५ वैडूर्य
मणिदंडांश्चपतितांश्चांकुशान्भुवि अश्वानांचयुगापीडान्नलविचित्रान्नरस्फुरितान् ४६ विद्धाःसा
दिध्वजाग्रेषुसुवर्णविकृताःकुथाः विचित्रान्मणिचित्रांश्चजातरूपपरिष्कृतान् ४७ अश्वा
स्तरपरिस्तोमान्रांकवान्पतितान्भुवि चूडामणीन्नरेंद्राणांविचित्राःकांचनस्रजः ४८ छ
त्राणिचापविद्धानिचामरव्यजनानिच चंद्रनक्षत्रभासैश्चवदनैश्चारुकुंडलैः ४९ क्लृप्तश्म
श्रुभिराकीर्णांपूर्णचंद्रनिभैर्मही कुमुदोत्पलपद्मानांखंडैःफुल्लंयथासरः तथामहीभृतां
वक्त्रैःकुमुदोत्पलसंनिभैः ताराणांविचित्रस्यनिर्मलेंदुद्युतित्विषः ५१ पश्येमांनभसस्त्व
ल्यांशस्त्रतत्रमालिनीं एतत्तवैवानुरूपंकर्मार्जुनमहाहवे ५२ दिविवादेवराजस्यत्वयायत्कृ
तमाहवे एवंतांदर्शयन्कृष्णोयुद्धभूमिंकिरीटिने ५३ गच्छन्नेवाशृणोच्छब्दंदुर्योधनबलेमह
त् शंखदुंदुभिनिर्घोषंभेरीपणवनिस्वनं ५४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्ण. ५५ ५६ ५७ ५८ ५९ एकोनविंशः श्लोकाः १ २ ३ ४ ५ पराभूतः प्रकोपितः ६ ७ ८ ॥

१५

रथाश्वगजनादांश्च शस्त्रशस्त्रांश्च दारुणान् प्रविश्य तद्बलं क्रूरं सत्वरं रोर्जितवेगिनैः ५५ पांडे
नाभ्यर्दितं सैन्यं त्वदीयं वीरविस्मितः सहितैर्नानाविधैर्बाणैर्विपक्षप्रवरो युधि ५६ न्यहनत्
द्विषतां पृतनानामसेनैनकोयथा गजवाजिमनुष्याणां शरीराणि शितैः शरैः ५७ जित्वाप्रहर
तांश्रेष्ठो विदेहात्मनपातयत् शत्रुप्रवीरैरस्ताणि नानाशस्त्राणि सायकैः ५८ छित्वा तानवधीत्
तूर्णमाहवः शाक्रइवासुरान् ५९ इति श्रीकर्णपर्वणि १७ धृतराष्ट्र उवाच शाक्रस्त्वया पूर्वमेव
प्रवीरो लोकविश्रुतः न त्वस्य कर्म संग्रामे त्वया संजय कीर्तितं १ तस्य विस्तरशो ब्रूहि प्रवीरस्या
द्य विक्रमं शिक्षां प्रभावं वीर्यं च प्रमाणं दर्पमेव च २ संजय उवाच भीष्मद्रोणकृपद्रौणिकर्णा
र्जुनजनार्दनान् समाप्तविद्यान् धनुषि श्रेष्ठान्यान्मन्यसे रथान् ३ योध्यातिपतिवीर्येण सर्वा
नेतान्महारथान् न मेने चात्मना तुल्यं कंचिद्देवजनेश्वर ४ तुल्यतां द्रोणभीष्माभ्यामात्मनो
योनमृष्यते वासुदेवार्जुनाभ्यां च न्यूनतां नैच्छनात्मनि ५ स पांड्यो नृपतिश्रेष्ठः सर्वशस्त्रभृ
तांवरः कर्णस्यानीकमहनत्परिभूतः इवांतकः ६ तदुदीर्णरथाश्वं च पत्तिप्रवरसंकुलं कुलाल
चक्रवद्भ्रांतं पांड्येनाभ्याहतं बलात् ७ व्यश्वसूतध्वजरथान् विप्रविद्धायुधद्विपान् सम्यगस्तैः शरैः
पांड्यो वायुर्मेघानिवाक्षिपत् ८ ॥

२ सः पांड्यः युस्तन्नकरोदितिद्वयोः संबंधः ९ ११ ५४ मुष्टिश्लिष्टायतज्यं मुष्टिदेशे श्लिष्टाव्यायताचज्याय
स्यतत्तथाएतस्मिंनेवबाणोप्यहं नर्मदेत्वाकारं विपरीताकारंचहृष्यत इतिभावः वर्षतः मत्तमत्तः ९६ ब
हिरदान्द्विरदारोहान्विपताकायुधध्वजान् सपादरक्षान्हत्वाहंत्रेणाद्रीनिवाद्रिहा ९ सप्तकिंश
सतूणीरान्स्वारोहान्हयानपि पुलिंदखसवाह्लीकनिषादांध्रककुंतलान् ९८ दाक्षिणात्यांश्च
भोजांश्च शूरान्संग्रामकर्कशान् विशस्त्रकवचान्बाणैः कृत्वाचैवाकरोद्व्यसून् ९९ चतुरंगबलं
बाणैर्निघ्नंतं पांड्यमाहवे दृष्ट्वाद्रौणिरसंभ्रांतमसंभ्रांततरोभ्ययात् १२ आभाष्यचैनं मधुरम
भीतस्तमभीतवत् प्राहप्रहर्तांश्रेष्ठः स्मितपूर्वंसमाहूयत् १३ राजन्कमलपत्राक्ष विशिष्टाभिज
नश्रुत वज्रसंहननप्रख्यप्रख्यातबलपौरुष १४ मुष्टिश्लिष्टायतज्यं च व्यायताभ्यां महद्धनुः दो
र्भ्यां विस्फारयन्भासि महाजलदवद्भृशं १५ शरवर्षैर्महावेगैरमित्रानभिवर्षतः मदन्यन्नानुप
श्यामि प्रतिवीरंतवाहवे १६ रथद्विरदपत्त्यश्वानेकः प्रमथसे बहून् मृगसंघानिवारण्ये विभीर्भी
मबलो हरिः १७ महता रथघोषेण दिवं भूमिं च नादयन् वर्षांतसस्यहा मेघो भासि ह्रादीव पा
र्थिव १८ संस्पृशानः शरांस्तीक्ष्णांस्तूणाद्राशीविषोपमान् मयैवैकेन युध्यस्व त्र्यंबकेणांधको यथा
१९ एवमुक्तस्तथेत्युक्त्वा प्रहरेति च ताडितः कर्णिना द्रोणतनयं विव्याध मलयध्वजः २० ॥
मयसेप्रमथ्यासि १७ सस्महाश्रुतिरप्याधास्महाह्रादीगर्जन् १८ १९ ताडिताद्रोणिना मलयवत्कृत्रिमो।
ध्वजोपस्य मलयध्वज इति प्रवीरस्यवनामांतरंवा २० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गत्यादशम्याऽन्याख्यभिमृत्वीतिर्यङ्‌ मंदोगोमूत्रिकाध्रुवाः स्खलितायमकाक्रांताक्रुष्टेतीषुगतीर्विडंऽशि
द्रो.टी. रोहृदयपार्श्वदेशास्पृशन्तिस्तः मंदार्धछिन्नवक्र गोमूत्रिकाकवचनिकृंतनीसव्यापसव्यगामिनी
९९ ध्रुवानियमेनलक्ष्यभेदिनीस्खलितालक्ष्यच्युता यमकाक्रांतालक्ष्यंभित्वाभित्वासकृत्प्रगताक्रुष्टालक्ष्यैक

मर्मभेदिभिरत्युग्रैर्बाणैराग्निशिखोपमैः स्मयन्नभ्यहनद्द्रौणिस्तं पाण्ड्यमाचार्यसत्तमः २१ ततोऽपरा
न्नतीक्ष्णाग्रान्नाराचान्मर्मभेदिनः गत्यादशम्यासंयुक्तानश्वत्थामाभ्यवासृजत् २२ तान्शरान्
छिन्नसंयोऽपि नवभिर्निशितैः शरैः चतुर्भिरर्दयच्चाश्वांस्तानाशु तेऽव्यसवोऽभवन् २३ अथ द्रोणसुतस्ये
षूंश्छित्वा निशितैः शरैः धनुर्ज्याविततां पाण्ड्यश्चिच्छेदादित्यतेजसः २४ दिव्यं धनुरथाधिज्यं
कृत्वा द्रौणिरमित्रहा प्रेक्षचाशु रथे युक्तान्वैरं त्यान्ययोजमान् २५ ततः शरसहस्राणि प्रेषया
मास वै द्विजः इषुसंबाधमाकाशमकरोद्दिश एव च २६ ततस्तानस्यतः सर्वान्द्रौणेर्बाणान्म
हात्मनः जानानोऽप्यक्षयान्पाण्ड्योऽशातयत्पुरुषर्षभः २७ प्रयुक्तांस्तान्प्रयत्नेन छित्वा द्रौणेरिषू
नरिः चक्ररक्षौ रणे तस्य प्राणुदन्निशितैः शरैः २८ अथारेर्लाघवं दृष्ट्वा मंडलीकृतकार्मुकः प्रा
स्यद्द्रोणसुतो बाणान्वृष्टिं पूषानुजो यथा २९ ॥

इषूनस्य बाहुल्यं दर्शयति नवगतयः दशमीगतिः
स्वशिरसा सह हननरूपा तिनी प्रतिक्रुष्टानाम तया गत्या प्रक्षिप्तानपि शरान्नवसंख्याकान्नवभिः शरैः प्रच्छि ९९
नदितिसंबंधः २२ २८ पूषानुजः पर्जन्यः पूषात्मज इति पाठेऽपि स एवार्थः वृषेः सूर्यप्रभवत्वदर्शनात् २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अष्टत्वृषभवाह्यानिअष्टौशाकटानियदायुधसंभारंऋक्षःवहंतितत्सर्वंअष्टोष्टमभागेनयामार्धेनद्रौणिमित्र

अष्टावष्टगवान्यङ्कःशाकटानियदायुधं अक्षिपत्दशभागेनद्रौणिस्त्रिदेपमारिष १० तमंतकमि
वक्रुद्धमंतकसंग्रांतकोयमं येयेदहशिरेतत्रविसंज्ञाःप्रायशोभवन् ११ पर्जन्यइववद्वर्मांतेदृष्टा
साद्रिद्रुमांमहीं आचार्यपुत्रस्तांसेनांबाणवृष्ट्याभ्यवीवृषत् १२ द्रौणिपर्जन्यमुक्तांतांबाणवृ
ष्टिंसुदुःसहां वायव्यास्त्रेणसंक्षिप्यमृदांपांचालानिलोनदत् १३ तस्यनानदतःकेतुंचंद्रनागु
रुरूषितं मलयप्रतिमंद्रौणिश्छित्वासांश्चतुरोहनत् १४ सूतमेकेषुणाहत्वामहाजलदा
निस्वनं धनुश्छित्वार्द्धचंद्रेणतिलशोव्यधमद्ध्वजं १५ असेरश्चाणिसंवार्यछित्वासर्वायुधानिच
आश्रममध्यहितंद्रौणिर्नजघानरणोत्सया १६ एतस्मिंनंतरेकर्णोराजानीकमुपाद्रवत् द्रावया
मासससतदापांडवानांमहद्बलं १७ विरथान्रथिनश्चक्रेराजानसंख्यभारत राजान्वह्रुभिरान
ष्ठैःरुरैःसंनतपर्वभिः १८ अथद्रौणिर्महेष्वासःपांडपुत्रनिवर्हणः विरथंरथिनांश्रेष्ठंनाद
नयुष्ठकांतया १९ हतेस्वरोदंतिवरःसुकल्पितस्त्वराभिसृष्टःप्रतिशाहुगोवली तमाद्रवत्
द्रौणिश्शराहतस्त्वरन्नवेनसत्वप्रतिहस्तिगर्जितं ५० ॥

श्लोः १० ११ १२ १३ १४ १५ १६ १७ १८ १९ हतेस्वरोयःकश्चित्तेपांसे ५० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मलयध्वजः पांड्यस्तं यद्वत्तुयागतं वारणं समभ्यतिष्ठत् ४१ बलेन ग्रस्तसर्गौघ उज्जमोपतत्स्लेन मन्युनाचैतैः प

क॰ टी॰ विपीड्यन् अंकुशेन कोपयन् ग्रद्विपतिर्मलयस्तस्येश्वरः पांड्यः ४२ द्रौणिः स्वांगभूषणं किरीटं तोमरेण प

५०

तं वारणं वारणपृष्ठकोविदो द्विपोत्तमं पर्वतसानुसंनिभं समभ्यतिष्ठन्मलयध्वजस्त्वरन्यथाद्रि

शृंगं हरिरुन्नदंस्तथा ४१ सतोमरं भास्कररश्मिवर्चसं बलास्त्रसर्गोत्तमयत्नमन्युभिः ससर्ज

शीघ्रं प्रतिपीड्यनाजं गुरोः सुतायाद्विपतीश्वरो नदन् ४२ मणिप्रवेकोत्तमवज्रहाटकैरलंकृ

तं चांशुकमाल्यमौक्तिकैः हतो हतोसीत्यसकृन्मुदान्वितः पराहनद्द्रौणिरवांगभूषणं ४२

ततः किं चेंद्रग्रहपावकविषं भरणातिपाततात्यतितं विचूर्णितं महेंद्रवज्राभिहतं महास्वनं यथा

द्रिशृंगं धरणीतले तथा ४४ ततः प्रजज्वाल परेण मन्युना पदाहतो नागपतिर्यथा तथा समा

ददे चांतकदंडसंनिभान् द्विषन्निमित्रार्तिकरांश्चतुर्दश ४५ द्विपस्य पादाग्रकरान्स पंचभिर्न्

पस्य बाहू च शिरोथ पत्रिभिः जघान षड्भिः षडृतूत्तमत्विषः सपांड्यराजानुचरान्महारथान्

४६ सुदीर्घवृत्तौ वरचंदनोक्षितौ सुवर्णमुक्तामणिवज्रभूषणौ भुजौ धरायां पतितौ नृपस्य

तौ विचेष्टतुस्तार्क्ष्यहतौ यथोरगौ ४७ शिरस्तु तत्पूर्णशशिप्रभाननं सरोषताम्रायतनेत्रम

न्नसं क्षितावपि भ्राजति तत्सकुंडलं विशाखयोर्मध्यगतः शशी यथा ४८ स तु द्विपः पंचभिरु

त्तमेषुभिः कृतः षडंशश्चतुरोन्यपत्रिभिः कृतो दशांशः कुशलेन युध्यता यथा हविर्दश

राहृतं तु इत्यत्र माददे द्रोणितिशेषः ४७ ततः सतत्त्रेशः पर्वसंग्राजोदशाथाभक्तोयथादशाहवि

क्षायामिष्टो पिष्टपिंडोदशथाक्रियते तथेत्यर्थः ४८ ४९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पांडोस्त्वारीनूपारपूः प्रदायरवेंदुपितवाप्रशांतः द्रोणिबाणैरितिपोषः यथास्वधांशेनशरीरकृपंहविः आ
व्यपितस्त्रियांज्वलनःशमशानाग्निःजलेनशाम्यतितदिदित्यर्थः ५ समानविद्यंसम्यगानविद्यंसमा
नपादशोराताःसभोजनान्वहूत्रदापपांडोश्वमनुष्यकुंजरान् तथामिवाप्यज्वलनःपितृप्रिय
स्ततःप्रशांतःसलिलप्रवाहतः ५ समानविद्यंतगुरोःसुतंनृपःसमानकर्माणमुपेत्यतेस्व
तः सहहतोत्यर्थमसृजयन्मुदाजितेबलोविस्मितमिवामरेश्वरः ५१ इतिकर्णपर्वणिप्रवीरव
धः ८११ धृतराष्ट्रउवाच पांडोहतेकिमकरोदर्जुनोयुधिसंजयएकवीरेणकर्णेनद्राविततेषु
परेषुच १ समानविद्यावलवान्शक्तोवीरःसपांडवः सर्वभूतेष्वनुज्ञातःशंकरेणमहात्म
ना २ तस्मान्महद्भयंतीव्रममित्रघ्नाद्धनंजयात् सयत्तत्राकरोत्पार्थस्तन्ममाचक्ष्वसंजय ३
संजयउवाच हतेपांडौर्जुनंक्रुद्धस्त्वरन्नाहवचोहिते पश्यामिनाहंराजानमपयातोश्वपांड
वान् ४ निहतेश्वपुनःपार्थैर्भग्नेशात्रवबलेमहत् श्रुत्वास्यामुस्यसंकल्पाद्धताःकर्णेनसंज
याः ५ तथास्वरथनागानांकृतंचकदनंमहत् सर्वमाख्यातवान्वीरोवासुदेवःकिरीटिने
६ एतच्छुत्वाचदृष्ट्वाचभ्रातुर्घोरंमहद्भयं वाहयाश्वान्हृषीकेशक्षिप्रमित्याहपांडवः ७ ततः
प्रायाद्धृषीकेशोरथेनाप्रतियोधिना दारुणश्चपुनस्तत्रप्रादुरासीत्समागमः ८ ततःपुनःसमाजग्मुरभी
ताःकुरुपांडवाः भीमसेनमुखाःपार्थाःसूतपुत्रमुखावयं ९ ततःप्रववृतेभूयःसंग्रामोराजसत्तमंकर्ण
सकर्माणंकृतकृत्यंविशः पांडो १ ग्रनुज्ञातःत्वग्रजप्याभविष्यसीत्यनगरहीतःराज्ञांनेयुधिष्ठिरे ४ भ्रातः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
५८

११ १२ योसर्गविरयत ग्रेतविते १३ १४ १५ १६ १७ १८ १९ ग्रंडजैर्जलपत्रिभिः सारसादिभिः आकीर्णे

धनं षिवाणान्यचिन्हानसिपट्टिशान्तोमरान् मुसलानि भुशुंडीश्च सशाङ्गष्टिपरश्वधान् ११ गा
दाः प्रासान् शितान्कुंतान्भिंडिपालान्महांकुशान् प्रस्यद्यति प्रमायेतः परस्परजिघांसया १२
बाणज्यातलशब्देन द्योदिशः प्रदिशो वियत् पृथिवीं नेमिघोषेण नादयंतोभ्यगुः परान् १३
तेन शब्देन महता संहृष्टाश्चक्रुराहवं वीरा वीरैर्महाघोरं कलहांतं तितीर्षवः १४ ज्यातलत्र
धनुः शब्दः कुंजराणां च बृंहितं पादातानां च पततां नराणां नादो महानभूत् १५ तालशब्दांश्च
विविधान्शूराणां चाभिगर्जितं श्रुत्वा तत्र प्रसंत्रेसुः पेतुर्मम्लुश्च सैनिकाः १६ तेषां निनर्द
तां चैव शस्त्रवर्षं च मुंचतां बहूनाधिरथिर्वीरः प्रममाथेषुभिः परान् १७ पंचपांचालवीरा
णां रथान्दश च पंच च साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयं १८ योधमुख्या महावीर्याः
पांडूनां कर्णमाहवे शीघ्रास्त्रा दिवमावृत्य परिवव्रुः समंततः १९ ततः कर्णो द्विषत्सेनां शा
रवर्षैर्विलोडयन् विजगाहेंडजाकीर्णां पद्मिनीमिव यूथपः २० द्विषन्मध्यमवस्कंद्य राधेयो ध
नुरुत्तमं विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयत् २१ चर्म वर्माणि संछिद्य तन्म्यपतन्नृ विदे
हिनां विषेहुर्नास्य संस्पर्शं द्वितीयस्य पतत्रिणः २२ ॥

प्रवस्कंद्य निपत्योन्मथ्य मार्गान्स्व चत्र हूरे इत्यर्थः

३६

ग्रस्तमथनैः प्राणाउन्मथ्यंतेभिस्तैः मौर्वी मौर्वीच्युतैः बाणैः तलत्रेषुज्याघातवारणस्थानेषुन्यहननत्य
यातेशरैस्तथातेशब्दं कुर्वंतितथाचकारोन्वर्थः २३ व्यायच्छमानेषु यतमानेषु २४ विमस्तिष्केक्षणायुधाःम

वर्मदेहासुमथनैर्धनुषः प्रच्युतैः शरैः मौर्व्यातलत्रेष्वहनत्कशयावाजिनोयथा २३ पांडुसृंजय
पांचालान्शरगोचरमागतान् ममर्दतरसाकर्णः सिंहोमृगगणानिव २४ ततः पांचालराजश्च
द्रौपदेयाश्चमारिष यमौचयुयुधानश्चसहिताः कर्णमभ्ययुः २५ तेषुव्यायच्छमानेषुकुरुपांचा
लपांडुषु प्रियानसून्रणेत्यक्त्वायोधाजग्मुःपरस्परं २६ सुसंनद्धाःकवचिनःसशिरस्त्राणभूषणाः
गदाभिर्मुशलैश्चान्येपरिघैश्चमहाबलाः २७ समभ्यधावंतभृशंकालदंडैरिवोद्यतैः नर्दंतश्चा
ह्वयंतश्चवल्गंतश्चमारिष २८ ततोनिजघ्नुरन्योन्यंपेतुश्चान्योन्यताडिताः वमंतोरुधिरंगात्रैर्वि
मस्तिष्केक्षणायुधाः २९ दंतपूर्णैःसरुधिरैर्वक्त्रैर्दाडिमसंनिभैः जीवंतइवचाप्येतेतस्थुःश
स्त्रोपबृंहिताः ३० परस्परंचाप्यपरेपट्टिशैरसिभिस्तथा शक्तिभिर्भिंडिपालैश्चनखरप्रासतोम
रैः ३१ ततक्षुश्चिच्छिदुश्चान्येबिभिदुश्चिक्षिपुस्तथा संचस्खलुश्चजघ्नुश्चक्रुद्धावारणमहार्णवे ३२
पेतुरन्योन्यनिहताव्यसवोरुधिरोक्षिताः क्षरंतःस्वरसंरक्तंप्रकृत्ताश्चंदनाइव ३३ ॥

विमस्तिष्कंशिरोभागस्थमांसपिंडः २९ परस्परंचेः ततक्षुः पट्टिशैरसिभिश्च चिच्छिदुः शक्तिभिर्बिभिदुः भिंडि
पालैश्चिक्षिपुः नखरैः संचकर्तुः प्राससतोमरैर्जघ्नुः ३१ स्वरसंस्निग्धंप्रकृत्ताश्छिन्नाः चंदनाः रक्तचंदनाः ३२ ३३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ ५९

२ समाहृत्यसंभृत्यभत्स्युम ३८ पद्मानीववदनानिचस्रजइवगात्राणि ३९ समन्तान्निदारश्छिन्नानिम

रथैरथाविनिहताहस्तिभिश्चापिहस्तिनः नरैर्नराहताःपेतुरश्वाश्वाश्वैःसहस्रशः ३४ ध्वजाः।

शिरांसिछत्राणिद्विपहस्तान्नराणांभुजाः क्षुरैर्भल्लार्द्धचंद्रैश्चछिन्नाःपेतुर्महीतले ३५ नराश्चनागाः

सहयान्रथान्समर्द्दयाहवे अश्वारोहैर्हताःभूरश्छिन्नहस्ताश्चदंतिनः ३६ सपताकाध्वजाःपे

तुर्विशीर्णाइवपर्वताः पत्तिभिश्चसमाप्लुत्यद्विरदाःस्यंदनास्तथा ३७ हताश्चहन्यमानाश्चपति

ताश्चैवसर्वशः अश्वारोहाःसमासाद्यत्वरिताःपत्तिभिर्हताः ३८ सादिभिःपत्तिसंघाश्चनिहताय

धिशेरते मृदितानीवपद्मानिप्रम्लानाइवचस्रजः ३९ हतानांवदनान्यासन्गात्राणिचमहाह

वे रूपाण्यत्यर्थकांतानिद्विरदाश्चनराणांन्दप ४० समन्नानीववस्त्राणियपुर्दुर्दर्शनोपरो ४१

इतिकर्णपर्वणि ८५२ संजयउवाच हस्तिभिस्तुमहामात्रास्तवपुत्रेणचोदिताः धृष्टद्युम्नंजि

घांसंतःक्रुद्धाःपार्षतमभ्ययुः १ प्राच्याश्चदाक्षिणात्याश्चप्रवरागजयोधिनः अंगावंगाश्च

पुंड्राश्चमागधास्ताम्रलिप्तकाः २ मेकलाःकोशलामद्रादशार्णानिषधास्तथा गजयुद्धेषुकुश

लाःकलिंगैःसहभारत ३ शरतोमरनाराचैर्वृष्टिमंतइवांबुदाः सिषिचुस्तेततःसर्वेपांचालबल

माहवे ४ तान्संमिमर्दिषुर्नागान्पार्ष्ण्यंगुष्ठांकुशैर्भृशं चोदितान्पार्षतोबाणैर्नाराचैरभ्यवीवृषत् ५

लिनानिएकविंशःहस्तिभिः ५ ४ पार्ष्णिःपादस्यपश्चाद्भागःअंगुष्ठःप्रसिद्धःअंकुशःप्रतोदःपार्ष्ण्यंकुशाश्चं ५९

ष्टांकुशाश्चनिघ्नेकेवलांकुशाश्चैः ५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६ प्रच्छाद्यमानं धृष्टद्युम्नः १८ ९ १२ आवर्जितः प्रहारवेगेन नरदितः कायो येन तस्य १३ १४ १५ १६ १८

एकैकं दशभिः षड्भिरष्टाभिरपि भारत द्विरदानभिविव्याध छित्वा गिरिनिभान् शरैः ६ प्रच्छाद्यमा
नं द्विरदैर्मेघैरिव दिवाकरं प्रययुः पांडुपांचाला नदंतो निशितायुधाः ७ तान्नागानभिवर्षंतो
ज्यातंत्रीतलनादितैः नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः ८ सात्यकिश्च शिखंडी च चेकि
तानश्च वीर्यवान् समंतात्सिषिचुर्वीरा मेघास्तोयैरिवाचलान् ९ ते म्लेच्छैः प्रेषिता नागा नरान्
श्वान्रथानपि हस्तैरातिष्य ममृदुः पद्भिश्चाप्यतिमन्यवः १० बिभिदुश्च विषाणाग्रैः समाक्षि
प्य च चिक्षिपुः विषाणलग्नाश्चाप्यन्ये परिपेतुर्विभीषणाः ११ प्रमुखे वर्तमानं तु द्विपमंगस्य
सात्यकिः नाराचेनोग्रवेगेन भित्वा मर्मण्यपातयत् १२ तस्यावर्जितकायस्य द्विरदादुत्पतिष्य
तः नाराचेनाहनद्वक्षः सात्यकिः सोपतद्भुवि १३ पुंड्रस्यापततो नागं चलंतमिव पर्वतं सह
देवः प्रयत्नात्तैर्नाराचैरहनत्त्रिभिः १४ विपताकं वियंतारं विवर्मध्वजजीविते तं कृत्वा द्वि
रदं भूयः सहदेवोंगमभ्ययात् १५ सहदेवं तु नकुलो वारयित्वांगमार्दयत् नाराचैर्यमदंडाभै
स्त्रिभिर्नागं शतेन च १६ दिवाकरकरप्रख्यानंगश्चिक्षेप तोमरान् नकुलाय शतान्यष्टौ त्रिधै
कैकं तमाच्छिनत् १७ तथार्धचंद्रेण शिरस्तस्य चिच्छेद पांडवः स पपात हतो म्लेच्छस्तेनैव सहदं
तिना १८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ११ २० १९ द्वाविंशः सह १ आउधवुः आमितवंतः २ ॥

७॰

पथ्यांगपुत्रे निहते हस्तिशिक्षाविशारदे अंगाः क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः १९ चलत्प
ताकैः सुमुखैर्हेमकक्षातनुच्छदैः मिमर्दिषंतस्त्वरिताः प्रदीप्तैरिव पर्वतैः २० मेकलोत्कल
कालिंगा निषधास्ताम्रलिप्तकाः शरतोमरवर्षाणि विमुंचंतो जिघांसवः २१ तैश्छाद्यमानं
नकुलं दिवाकरमिवांबुदैः परिपेतुः सुसंरब्धाः पांडुपांचालसोमकाः २२ ततस्तदभवद्युद्ध
रथिनां हस्तिभिः सह सृजतां शरवर्षाणि तोमरांश्च सहस्रशः २३ नागानां प्रस्फुटन्कुंभा मर्मा
णि विविधानि च दंताश्चैवातिविद्धानां नाराचैर्भूषणानि च २४ तेषामष्टौ महानागांश्चतुः
षष्ट्या सुतेजनैः सहदेवो जघानाशु ते पेतुः सहसादिभिः २५ अंजोगतिभिरायम्य प्रयत्नाद्
नुरुत्तमं नाराचैरहनन्नागान्नकुलः कुलनंदनः २६ ततः पांचाल्यशैनेयौ द्रौपदेयाः प्रभ
द्रकाः शिखंडी च महानागान्सिषिचुः शरवृष्टिभिः २७ ते पांडुयोधांबुधरैः शत्रुद्विरदपर्वताः
बाणवर्षैर्हताः पेतुर्वज्रवर्षैरिवाचलाः २८ एवं हत्वा तव गजांस्ते पांडुरथकुंजराः द्रुतां सेनामवै
क्षंत भिन्नकूलामिवापगां २९ तां ते सेनां समालोड्य पांडुपुत्रस्य सैनिकाः विक्षोभयित्वा च पुनः कर्ण
समभिदुद्रुवुः ३० इति कर्णपर्वणि २२ संजय उवाच सहदेवं तथा क्रुद्धं दहंतं तव वाहिनीं दुःशा
सनो महाराज भ्राता भ्रातरमभ्ययात् १ तौ समेतौ महायुद्धे दृष्ट्वा तत्र महारथाः सिंहनादरवांश्चक्रुः

४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ ॥

ततोभारतक्रुद्धेनतवपुत्रेणधन्विना पांडुपुत्रस्त्रिभिर्बाणैर्वक्षस्यभिहतोबली ३ सहदेवस्त
तोराजन्नाराचेनततवात्मजं विध्वाविध्वाधुसप्तत्यासारथिंचत्रिभिःशरैः ४ दुःशासनस्ततश्चा
पंछित्वाराजन्महाहवे सहदेवंत्रिसप्तत्याबाह्वोरुरसिचार्पयत् ५ सहदेवस्ततःक्रुद्धःखड्गंगृह्यम
हाहवे आविध्यप्रासृजत्तूर्णंतवपुत्ररथंप्रति ६ समार्गणगुणंचापंछित्वातस्यमहानसिः निप
पाततततोभूमौच्युतःसर्पइवांबरात् ७ अथान्यद्धनुरादायसहदेवःप्रतापवान्दुःशासनायचि
क्षेपबाणमंतकरंततः ८ तमापतंतंविशिखंयमदंडोपमत्विषं खड्गेनशितधारेणद्विधाचि
च्छेदकौरवः ९ ततस्तंनिशितंखड्गमाविध्ययुधिसत्वरः धनुश्चान्यत्समादायशरंजग्राहवीर्य
वान् १० तमापतंतंसहसानिस्त्रिंशंनिशितैःशरैः पातयामाससमरेसहदेवोहसन्निव ११ ततो
बाणांश्चतःषष्टिंतवपुत्रोमहारणे सहदेवरथंतूर्णंप्रेषयामासभारत १२ तांश्छरान्समरेराज
न्वेगेनापततोबहून् एकैकंपंचभिर्बाणैःसहदेवोन्यकृंतत १३ संनिवार्यमहाबाणांस्तवपु
त्रेणप्रेषितान् अथास्मैसबहून्बाणान्प्रेषयामाससंयुगे १४ तान्बाणांस्तवपुत्रोपिछित्वैकै
कंत्रिभिःशरैः ननादसुमहानादंदारयानोवसुंधरां १५ ततोदुःशासनोराजन्विध्वापांडुसुतं
रणे सारथिंनवभिर्बाणैर्माद्रेयस्यसमार्पयत् १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्णी. २० २१ पिपीलिकपुटेपिपीलिकावासपटले २२ त्र्योविंशः नकुलेरभसेरणोत्सवके १ २ ३ ४ ५ ६ ७

७२

ततःक्रुद्धोमहाराजसहदेवःप्रतापवान् समाधत्तशरंघोरंमृत्युकालांतकोपमं १७ विकृ
ष्यबलवच्चापंतवपुत्रायसोसृजत् सतंनिर्भिद्यवेगेनभित्वाचकवचंमहत् १८ प्राविशद्ध
रणींराजन्वल्मीकमिवपन्नगः ततःसंमुमुहेराजंस्तवपुत्रोमहारथः १९ मूढंचैनंसमालो
क्यसारथिस्त्वरितोरथं अपोवाहभृशंत्रस्तोवध्यमानःशितैःशरैः २० पराजित्यरणेतंतुको
रव्यंपांडुनंदनः दुर्योधनबलेहृष्टःप्रममाथसमंततः २१ पिपीलिकपुटेराजन्यथामृद्नन्नरो
रुषा तथासाकौरवीसेनामृदितातेनभारत २२ इतिश्रीकर्णपर्वणि ४४ संजयउवाच नकु
लंरभसंयुद्धेद्रावयंतंवरूथिनीं कर्णोवैकर्तनोराजन्वारयामाससैरुषा १ नकुलस्तुततःक
र्णंप्रहसन्निदमब्रवीत् चिरस्यवतहृष्टोहंदैवतैःसौम्यचक्षुषा २ यस्यमांत्वंरणेपापचक्षु
र्विषयमागतः त्वंहिमूलमनर्थानांवैरस्यकलहस्यच ३ त्वद्दोषात्कुरवःक्षीणाःसमासाद्य
परस्परं त्वामद्यसमरेहत्वाकृतकृत्योस्मिविज्वरः ४ एवमुक्तःप्रत्युवाचनकुलंसूतनंदनः
सदृशंराजपुत्रस्यधन्विनश्चविशेषतः ५ प्रहरस्वचमेवीरपश्यामस्तवपौरुषं कर्मकृत्वारणे
शूरततःकत्थितुमर्हसि ६ अनुक्त्वासमरेतातशूरायुध्यंतिशक्तितः प्रयुध्यस्वमयाशक्त्या
स्या हनिष्येदर्पमेवते ७ ॥

श्री

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३

इत्युक्त्वाप्राहसत्कर्णःपांडुपुत्रायसतनजः विव्याधचैनंसमरेत्रिसप्तत्याशिलीमुखैः ८ नकुलस्तु
ततोविद्धःसूतपुत्रेणभारत अशीत्याशीविषप्रख्यैःसूतपुत्रमविध्यत ९ तस्यकर्णोधनुश्छि
त्वास्वर्णपुंखैःशिलाशितैः त्रिंशतापरमेष्वासःशरैःपांडवमर्दयत् १० तेनतस्यकवचंभित्वापपुः
शोणितमाहवे आशीविषायथानागाभित्वागांसलिलंपपुः ११ अथान्यद्धनुरादायहेमपृष्टं
दुरासदं कर्णविव्याधसप्तत्यासारथिंचत्रिभिःशरैः १२ ततःक्रुद्धोमहाराजनकुलःपरवीरहा
क्षुरप्रेणसुतीक्ष्णेनकर्णस्यधनुरच्छिनत् १३ अथैनंछिन्नधन्वानंसायकानांशतैस्त्रिभिः ।
आजघ्नेप्रहसन्वीरःसर्वलोकमहारथं १४ कर्णमभ्यर्दितंदृष्ट्वापांडुपुत्रेणमारिष विस्मयंपरमं
जग्मूरथिनःसहदैवतैः १५ अथान्यद्धनुरादायकर्णोवैकर्तनस्तदा नकुलंपंचभिर्बाणैर्जत्रुदे
शेसमार्पयत् १६ तत्रस्थैरथतैर्बाणैर्माद्रीपुत्रोव्यरोचयत स्वरश्मिभिरिवादित्योभुवनेविसृज
न्प्रभा १७ नकुलस्तुततःकर्णंविव्याधसप्तभिःशरैः अथास्यधनुषःकोटिंपुनश्छिछेदमारिष १८
सोन्यत्कार्मुकमादायसमरेवेगवत्तरं नकुलस्यततोबाणैःसमंतात्छादयद्दिशः १९ संछाद्य
मानःसहसाकर्णचापच्युतैःशरैः चिछेदचशरांस्तांस्तान्शरैरेवमहारथः २० ततोबाणमयंजा
लंविततंव्योम्निदृश्यते खद्योतानामिवव्रातैःसंपतद्भिर्यथानभः २१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५

तैर्विमुक्तैः शरव्रातै श्छादितेगगनेतदा शलभानांयथाव्रातैस्तद्वदासीद्विशांपते २२ तेशरा
हेमविकृताः संपतंतोमुहुर्मुहुः श्रेणीकृताव्यकाशंतक्रौंचाः श्रेणीकृताइव २३ बाणजाला
वृतेव्योम्निछादितेचदिवाकरे नस्मसंपततेभूम्यांकिंचिदप्यंतरिक्षगं २४ निरुद्धेतत्रमार्गेच
शरसंघैः समंततः व्यरोचेतांमहात्मानौकालसूर्याविवोदितौ २५ कर्णचापच्युतैर्बाणैर्वध्य
मानास्तुसोमकाः अवालीयंतराजेंद्रवेदनार्ताःशरार्दिताः २६ नकुलस्यतथाबाणैर्हन्यमा
नाचमूस्तव व्यशीर्यतदिशोराजन्वातनुन्नाइवांबुदाः २७ तेसेनेहन्यमानेतुताभ्यांदिव्यैर्महा
शरैः शरपातमपाक्रम्यतस्थतुःप्रेक्षिकेतदा २८ प्रोत्सारितेजनेतस्मिन्कर्णपांडवयोःशरैः
अविध्येतांमहात्मानावन्योन्यंशरवृष्टिभिः २९ विदर्शयंतौदिव्यानिशस्त्राणिबलमूर्धनि
छादयंतौचसहसापरस्परवधैषिणौ ३० नकुलेनशरामुक्ताःकंकबर्हिणवाससः सूतपुत्र
मवच्छाद्यव्यतिष्ठंतयथावरे ३१ तथैवसूतपुत्रेणप्रेषिताःपरमाहवे पांडुपुत्रमवच्छाद्यव्य
तिष्ठंतांवरेशराः ३२ शरवेश्मप्रविष्टौतौददृशातेनकेश्चन सूर्याचंद्रमसौराजन्छाद्यमानौ
घनैरिव ३३ ततःक्रुद्धोरणेकर्णःकृत्वाघोरतरंवपुः पांडवंछादयामाससमंतात्छरवृष्टिभिः ३४
सोतिछन्नोमहाराजसूतपुत्रेणपांडवः नचकारव्यथांराजन्भास्करोजलदैर्यथा ३५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४६ ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ॥

ततः प्रहस्याधिरथिः शरजालानि मारिष प्रेषयामास समरे शतशोथ सहस्रशः ४६ एकच्छायम
भूत्सर्वं तस्य बाणैर्महात्मनः अभ्रच्छायेव संजज्ञे संपतद्भिः शरोत्तमैः ४७ ततः कर्णो महाराज धनु
श्छित्वा महात्मनः सारथिं पातयामास रथनीडाद्धसन्निव ४८ ततोश्वांश्चतुरस्तस्य चतुर्भिर्निशितैः
तैः शरैः यमस्य भवनं तूर्णं प्रेषयामास भारत ४९ अथास्य तं रथं दिव्यं तिलशो व्यधमच्छरैः पता
कां चक्ररक्षांश्च गदां खड्गं च मारिष ५० शतचंद्रं च तच्चर्म सर्वोपकरणानि च हताश्वो विरथश्चैव।
विवर्मा च विशांपते ५१ अवतीर्य रथात्तूर्णं परिघं गृह्य धिष्ठितः तमुद्यंतं महाघोरं परिघं तस्य स
तजः ५२ व्यहनत्सायकै राजन्सुतीक्ष्णैर्भारसाधनैः व्यायुधं चैनमालक्ष्य शरैः संनतपर्वभिः ५३
अर्दयद्बहुभिः कर्णो न चैनं समपीडयत् सहन्यमानः समरे कृतास्त्रेण बलीयसा ५४ प्राद्रवत्स
हसा राजन्व्याकुलो व्याकुलेंद्रियः तमभिद्रुत्य राधेयः प्रहसन्वै पुनः पुनः ५५ सज्जमस्य धनुः कं
ठे व्यवासृजत भारत ततः समभ्रमे राजन्कंठासक्तमहाधनुः ५६ परिवेषमनुप्राप्तो यथास्या।
द्व्योम्नि चंद्रमाः यथैव चासितो मेघः शक्रचापेन शोभितः ५७ तमब्रवीत्ततः कर्णो व्यर्थं व्याहृ
तवानसि वदेदानीं पुनर्हृष्टो वध्यमानः पुनः पुनः ५८ मा योत्सीः कुरुभिः सार्द्धं बलवद्भिश्च पां
डवाः सदृशोसि तात युध्यस्व व्रीडं मा कुरु पांडव ५९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.री. ५० ५१ ५२ ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ६१ ६२ ॥

४३

गरुडवाग्नजमाद्रेयपत्रवाक्रसफाल्गुनौ एवमुक्त्वा महाराज व्यसर्जयत तं तदा ५० वधं प्राज्ञं नतं
शूरो नाहनदुर्मविनिदा सत्वाकुंत्या वचो राजंस्ततएनं व्यसर्जयत् ५१ विसृष्टः पांडवो राजंस्तत
पुत्रेण धनिना क्रीडन्निव जगामाशु युधिष्ठिररथं प्रति ५२ आरुरोह रथं चापि सूतपुत्रप्रतापितः
निश्वसन् दुःखसंतप्तः कुंभस्थ इव पन्नगः ५३ तं विजित्याथ कर्णोपि पांचालांस्त्वरितो ययौ रथे
नातिपताकेन चंद्रवर्णहयेन च ५४ तत्राक्रंदो महानासीत्पांडवानां विशांपते दृष्ट्वा सेनापतिं
गो यांतं पांचालान् रथव्रजान् ५५ तत्राकरोन्महाराज कदनं सूतनंदनः मध्यं प्राप्ते दिनकरे चक्रव
द्विचरन्प्रभुः ५६ भग्नचक्रै रथैः केचिच्छिन्नध्वजपताकिभिः हताश्वैर्हतसूतैश्च प्रभग्नाक्षै
श्च मारिष ५७ ह्रियमाणानपश्याम पांचालानां रथव्रजान् तत्र तत्र च संभ्रांता विचेरुः रथकुंज
राः ५८ दावाग्निपरिदग्धांगा यथैव स्युर्महावने भिन्नकुंभा इरुधिराः छिन्नहस्ताश्च वारणाः
५९ छिन्नगात्रावराश्चैव छिन्नवालधयोपरे छिन्नाभ्राणीव संपेतुर्हन्यमाना महात्मना ६०
अपरे त्रासिता नागा नाराचशरतोमरैः तमेवाभिमुखं जग्मुः शलभा इव पावकं ६१ अपरे नि
ष्टनंतश्च व्यदृश्यंत महाद्विपाः क्षरंतः शोणितं गात्रैर्नगा इव जलास्रवाः ६२ ॥

४३

६३ ६४ ६५ ६६ ६७ ६९ ७० ७१ ७२ ७३ ७४ ७५ ७६ ७७ ॥

अश्वरैर्विमुक्तांश्चवालवंधैश्चवाजिनः राजतैश्चतथाकांस्यैःसौवर्णैश्चैवभूषणैः ६३ हीनांश्चा
भरणैश्चैवखलीनैश्चविवर्जितान् चामरैश्चकुथाभिश्चतूणीरैःपतितैरपि ६४ निहतैःसादिभि
श्चैवशूरैराहवशोभितैः अपश्यामरणेतत्रभ्राम्यमाणान्हयोत्तमान् ६५ प्रासैःखङ्गैश्चरहिता
नृष्टिभिश्चापिभारत हयसादीनपश्यामकंचुकोष्णीषधारिणः ६६ निहतान्वध्यमानांश्चवे
पमानांश्चभारत नानांगावयवैर्हीनांस्तत्रतत्रैवभारत ६७ रथान्हेमपरिष्कारान्संयुक्तान्जव
नैर्हयैः भ्राम्यमाणानपश्यामहतेषुरथिषुद्रुतं ६८ भग्नाक्षकूबरान्कांश्चित्भग्नचक्रांश्चभार
त विपताकध्वजांश्चान्यान्छिन्नेषादंडबंधुरान् ६९ विहतान्रथिनस्तत्रधावमानांस्ततस्ततः
सूतपुत्रशरैस्तीक्ष्णैर्हन्यमानान्विशांपते ७० विशस्त्रांश्चतथैवान्यान्सशस्त्रांश्चहतान्बहून् ता
रकाजालसंछन्नान्वरघंटाविशोभितान् ७१ नानावर्णविचित्राभिःपताकाभिरलंकृतान्
वारणाननपश्यामधावमानान्समंततः ७२ शिरांसिबाहूनूरूंश्चछिन्नानन्यांस्तथैवच कर्णा =
चापच्युतैर्बाणैरपश्यामसमंततः ७३ महान्व्यतिकरोरौद्रोयोधानामन्वपद्यत कर्णसायकन ५
न्नानांयुध्यतांचशितैःशरैः ७४ तेवध्यमानाःसमरेसूतपुत्रेणसंजयाः तमेवाभिमुखंयांति ६
पतंगाइवपावकं ७५ तंदहंतमनीकानितत्रतत्रमहारथं क्षत्रियावर्जयामासुर्युगांताग्निमिवो ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
४४

१७ १८ १९ चतुर्विंशः युयुत्सुः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

हतशेषास्तयेवीराःपंचालानांमहारथाः तान्नभग्नाद्रुतान्वीरः दृष्ट्वाविकिरन्शरैः १७ अभ्यधा
वततेजस्वीविशीर्णकवचध्वजान् तापयामासतान्बाणैः सूतपुत्रोमहाबलः १८ मध्यंदिनमनु
प्राप्तोभूतानीवतमोनुदः १९ इतिकर्णपर्वणि संजयउवाच युयुत्सुंतवपुत्रस्यद्रावयंतंबलंमह
हत् उलूकोभ्यपतत्तूर्णंतिष्ठतिष्ठेतिचाब्रवीत् १ युयुत्सुश्चततोराजन्शितधारेणपत्रिणा
उलूकंताडयामासवज्रेणेवमहाबलं २ उलूकस्तुततःक्रुद्धस्तवपुत्रस्यसंयुगे क्षुरप्रेणाथ
नस्थित्वाताडयामासकर्णिना ३ तदपास्यधनुश्छित्त्वायुयुत्सुर्वेगवत्तरं अन्यदादत्तसुमह
च्चापंसंरक्तलोचनः ४ शाकुनिंचततःषष्ट्याविद्ध्वाथभरतर्षभ सारथिंत्रिभिराजघ्नेतंच
भूयोभ्यविध्यत ५ उलूकस्तंतुविंशत्याविद्ध्वास्वर्णविभूषितैः अथास्यसमरेक्रुद्धोध्वजंवि
च्छेदकांचनं ६ सच्छिन्नःयष्टिःसुमहाञ्छीर्यमाणोमहाध्वजः पपातप्रमुखेराजन्युयुत्सोः
कांचनध्वजः ७ ध्वजमुन्मथितंदृष्ट्वायुयुत्सुःक्रोधमूर्छितः उलूकंपंचभिर्बाणैराजघ्ना
नस्तनांतरे ८ उलूकस्तस्यसमरेतैलधौतेनमारिष शिरश्चिच्छेदभल्लेनयंतुर्भरतसत्तम
९ तच्छिन्नमपतद्भूमौयुयुत्सोःसारथेस्तदा तारारूपंयथाचित्रंनिपपातमहीतले १० जघा
नचतुरोश्वांश्चतंचविद्ध्वाथपंचभिः सोतिविद्धोबलवताप्रत्यपायाद्रथांतरं ११ ॥

४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ ॥

तन्निर्जित्यरणेराजन्नकुलस्त्वरिनाशनो पांचालान्सृंजयांश्चैवविनिघ्नन्निशितैःशरैः १२ शता
नीकंमहाराजश्रुतकर्मासुतस्तव अश्वस्तंतरथंचक्रेनिमेषार्द्धादसंभ्रमः १३ हताश्वेतुरथेतिष्ठ
न्शतानीकोमहारथः गदांचिक्षेपसंक्रुद्धस्तवपुत्रस्यमारिष १४ साकृत्वास्यंदनंभस्महयांश्चै
वससारथीन् पपातधरणींतूर्णंदारयंतीवभारत १५ तावुभौविरथौवीरौकुरूणांकीर्त्तिवर्द्ध
नौ अपाक्रमेतांयुद्धात्तुप्रेक्षमाणौपरस्परं १६ पुत्रस्तुतवसंभ्रांतोविविंशोरथमारुहत् शतानी
कोपित्वरितःप्रतिविंध्यरथंगतः १७ सुतसोमंतुशकुनिर्विद्ध्वातुनिशितैःशरैः नाकंपयतसं
क्रुद्धोवार्यौघइवपर्वतं १८ सुतसोमस्तुतंदृष्ट्वापितुरत्यंतवैरिणं शरैरनेकसाहस्रैश्छादया
मासभारत १९ तान्शरान्शकुनिस्तूर्णंचिच्छेदान्यैःपतत्रिभिः लघ्वस्त्रश्चित्रयोधीचजितका
शीचसंयुगे २० निवार्यसमरेचापिशरांस्तान्निशितैःशरैः आजघानसुसंक्रुद्धःसुतसोमंत्रिभिः
शरैः २१ तस्याश्वान्केतनंसूतंतिलशोव्यधमच्छरैः स्यालस्तवमहाराजततउच्चुक्रुशुर्जनाः २२
हताश्वोविरथश्चैवछिन्नकेतुश्चमारिष धन्वीधनुर्वरंगृह्यरथाद्भूमावतिष्ठत २३ व्यसृजत्सा
यकांश्चैवस्वर्णपुंखान्शिलाशितान् छादयामाससमरेतवस्यालस्यतंरथं २४ शलभानामि
वव्रातान्शरव्रातान्महारथः रथोपगान्समीक्ष्यैवंविव्यथेनैवसौबलः २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो॰ पी॰
४४

मंडलानि भ्रांतमुद्भ्रांतमित्यादीन्मार्गान् अनुलोमविलोमभेदेन द्विगुणानया चतुर्दश २४ २५ मंडलानां

भ्रममाणशरांसनस्य पार्श्वात्तैर्महायशाः तत्रात्तु ध्यंतयोधाश्च सिद्धाश्चापि दिविस्थिताः २६ ददृशुः सो

मस्य तत्कर्म दृष्ट्वा श्रेष्ठमद्भुतं रथस्थः शाकुनिं यत्तपदातिः समयोधयत् २७ तमसतीतोर्महा

वैरैर्भल्लैः सन्नतपर्वभिः अहनत्कार्मुकं राजन् तूणीरांश्चैव सर्वशः २८ सच्छिन्नधन्वा विरथःख

ड्गमुद्यम्य चानदत् वैदूर्योत्पलवर्णाभं दंतिदंतमयत्सरुं २९ भ्राम्यमाणं ततस्तत्तु विमलांबर

वर्चसं कालदंडोपमं मेने सूतसोमस्य धीमतः ३० सोचरत्सहसा खड्गी मंडलानि सहस्रशः

चतुर्दश महाराज शिक्षाबलसमन्वितः ३१ भ्रांतमुद्भ्रांतमाविद्धमाप्लुतं विप्लुतं सृतं संपातं

समुदीर्णं च दर्शयामास संयुगे ३२ सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान् तानापततः

एवाशु चिच्छेद परमासिना ३३ ततः क्रुद्धो महाराज सौबलः पुनरेव च प्राहिणोत्सूतसोमाय

शरानाशीविषोपमान् ३४ चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च दर्शयँल्लाघवं युद्धे तार्क्ष्य

तुल्यपराक्रमः ३५ तस्य संचरतो राजन्मंडलावर्तने तदा क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद

सुप्रभं ३६ सच्छिन्नः सहसा भूमौ निपपात महानसिः अर्धमस्य स्थितं हस्ते सत्सरौ तत्र भार

त ३७ छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट् प्राविध्यत ततः शेषं सूतसोमो महारथः ३८

आवर्तनमनुलोमविलोमाभ्यासे ३९ अस्यग्रसेः सत्सरोः शोभनमुष्टेः ४० ॥ ४४ ॥

४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

युमं

धृष्ट शरभोष्टपादः सिंहघ्नातो पशुपतिशरीरोन्नसिंहवध्यात्मा १ २ ३ ४ ५ ६ ७ ८ ॥

सछित्वासगुणं चापं रणे तस्य महात्मनः पपात धरणीं तूर्णं स्वर्णवज्रविभूषितं ४९ ततसोम
स्तेनागछत्कृतकीर्तेर्महारथं सौबलोपिधनुर्गृह्य घोरमन्यत्सुदुर्जयं ५० अभ्ययात्पांडवीकं
निघ्नन्शत्रुगणान्बहून् तत्रनादो महानासीत्पांडवानां विशांपते ५१ सौबलं समरे दृष्ट्वा विचरं
तमभीतवत् तान्यनीकानि दृप्तानि शस्त्रवंति महांति च ५२ द्राव्यमाणान्यदृश्यंत सौबलेन म
हात्मना यथा दैत्यचमूं राजन्देवराज्ञो ममर्द ह ५३ तथैव पांडवीं सेनां सौबलेयो व्यनाशयत्
५४ इति श्रीकर्णपर्वणि पंचविंशोध्यायः २५ संजय उवाच धृष्टद्युम्नं कृपो राजन्वारयामा
स संयुगे यथा दृष्ट्वा वने सिंहं शरभो वारयेद्युधि १ निरुद्धः पार्षतस्तेन गौतमेन बलीयसा
पदात्पदं विचलितुं नाशकत्तत्र भारत २ गौतमस्य रथं दृष्ट्वा धृष्टद्युम्नरथं प्रति वित्रेसुः सर्व
भूतानि क्षयं प्राप्तं च मेनिरे ३ तत्रावोचन्विमनसो रथिनः सादिनस्तथा द्रोणस्य निधनान्नूनं
संक्रुद्धो द्विपदांवरः ४ शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः अपि स्वस्ति भवेदद्य धृष्टद्यु
म्नस्य गौतमात् ५ अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात् अप्ययं ब्राह्मणः सर्वान्नैनो
हन्यात्समागतान् ६ यादृशं दृश्यते रूपमंतकप्रतिमं भृशं गमिष्यत्यद्य पदवीं भारद्वाजस्य
गौतमः ७ आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि अस्त्रवान्वीर्यसंपन्नः क्रोधेन च समन्वितः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पार्षतश्च महाबाहुर्हे विमुक्तो यामिलक्षते इत्येवं विविधा वाचस्तावकानां परैः सह ९ अश्रूयंत महा
राज तयोस्तत्र समागमे विनिश्वसन्ततः क्रोधात्कृपः शारद्वतो नृप १० पार्षतं चार्दयामास निश्चे
ष्टं सर्वमर्मसु स हन्यमानः समरे गौतमेन महात्मना ११ कर्तव्यं न स्म जानाति मोहेन महतावृतः
तमब्रवीत्ततो यंता कच्चित्क्षेमं तु पार्षत १२ ईदृशं व्यसनं युद्धे न ते दृष्टं मया क्वचित् दैवयोगात्तु
ते बाणा नापतन्मर्मभेदिनः १३ प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वतः व्यावर्तये रथं तूर्णं न
दीवेगमिवार्णवात् १४ अवध्यं ब्राह्मणं मन्ये येन ते विक्रमो हतः धृष्टद्युम्नस्ततो राजन्शनकै
रब्रवीद्वचः १५ मुह्यते मे मनस्तात गात्रस्वेदश्च जायते वेपथुश्च शरीरे मे रोमहर्षश्च सारथे १६ व
र्जयन्ब्राह्मणं युद्धे शनैर्याहि यतोऽर्जुनः अर्जुनं भीमसेनं वा समरे प्राप्य सारथे १७ क्षेममद्य भ
वेदेवमेषा मे नैष्ठिकी मतिः ततः प्रायान्महाराज सारथिस्त्वरयन्हयान् १८ यतो भीमो महेष्वा
सो युयुधे न वसैनिकैः प्रद्रुतं च रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष १९ किरन्शरशतान्येव गौत
मोऽनुययौ तदा शंखं च पूरयामास मुहुर्मुहुररिंदमः २० पार्षतं त्रासयामास महेंद्रो नमुचिं यथा
शिखंडिनं तु समरे भीष्ममृत्युं दुरासदं २१ हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः शि
खंडी तु समासाद्य हार्दिकानां महारथं २२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२० वर्मणः वर्म शाप्यग्रभुष्ठ्यंतप्रष्ठाः वर्म न चिच्छिदुरित्यर्थः २१ २१ ववामवंतवान् २२ २२ पार्षतं शिखंडिनं २३
पंचभिर्निशितैर्भल्लैर्जत्रुदेशे समाहनत् कृतवर्मा तु संक्रुद्धो भित्वा घ्रूपात त्रिभिः २३ धनुरेकेन चि
च्छेद हसन् राजन्महारथः अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली २४ तिष्ठ तिष्ठेति संक्रुद्धो हार्दि
क्यं प्रत्यभाषत ततोऽस्य नवतिं बाणान् रुक्मपुंखान् सुतेजनात् २५ प्रेषयामास राजेंद्र तेऽस्याभ्र
श्यंत वर्मणः वितथांस्तान्समालक्ष्य पतितांश्च महीतले २६ क्षुरप्रेण सुतीक्ष्णेन कार्मुकं वि
च्छेद भारत अथैनं छिन्नधन्वानं भग्नशृंगमिवर्षभं अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्प
यत् कृतवर्मा तु संक्रुद्धो मार्गणैः क्षतविक्षतः २८ ववाम रुधिरं गात्रैः कुंभवक्त्रादिवोदकं रु
धिरेण परिक्लिन्नः कृतवर्मा व्यराजत २९ वर्षेणाक्लेदितो राजन्यथा गैरिकपर्वतः अथान्य
द्धनुरादाय समार्गणगुणं प्रभुः ३० शिखंडिनं बाणगणैः स्कंधदेशे व्यताडयत् स्कंधदेशस्थि
तैर्बाणैः शिखंडी तु व्यराजत ३१ अन्योन्यं शृंगाभिहतौ रेजतुर्वृषभाविव अन्योन्यस्य वधे
यत्नं कुर्वाणौ तौ महारथौ ३२ रथाभ्यां चेरतुस्तत्र मंडलानि सहस्रशः कृतवर्मा महाराज पा
र्षतं निशितैः शरैः ३४ रणे विव्याध समरे सप्तत्या स्वर्णपुंखकैः शिलाशितैः ततोऽस्य समरे बाणं भो
जः प्रहरतां वरः ३५ जीवितांतकरं घोरं व्यसृजत्त्वरयान्वितः स तेनाभिहतो राजन्मूर्छामाशु
समाविशत् ३६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ध्वजयष्टिंचसहस्राणित्रियेकष्मलाहतः अपोवाहरणात्तूर्णंसारथीरथिनांवरं २७ हार्दिक्य
शरसंतप्तंनिःश्वसंतंपुनःपुनः पराजितेततःश्रेष्ठेद्रुपदस्यात्मजेप्रभो २८ व्यद्रवत्पांडवीसेनाव
ध्यमानासमंततः २९ इतिकर्णपर्वणि संजयउवाच श्वेताश्वोथमहाराजव्यधमत्तावकंबलं
यथावायुःसमासाद्यतूलराशिंसमंततः १ अभ्युद्ययुस्त्रिगर्तास्तंशिबयःकौरवैःसहशाल्वाः
संसप्तकाश्चैवनारायणबलंचयत् २ सत्यसेनश्चंद्रदेवोमित्रदेवःश्रुतंजयः सौश्रुतिश्चित्रसे
नश्चमित्रवर्माचभारत ३ त्रिगर्तराजःसमरेभ्रातृभिःपरिवारितः पुत्रैश्चैवमहेष्वासैर्नाना
शस्त्रविशारदैः ४ व्यसृजंतशरव्रातान्किरंतोर्जुनमाहवे अभ्यवर्तंतसहसावार्योघाइवा
सागरं ५ तेत्वर्जुनंसमासाद्ययोधाःशतसहस्रशः अगच्छन्विलयंसर्वेतार्क्ष्यंदृष्ट्वेवपन्नगाः ६
तेहन्यमानाःसमरेनाजहुःपांडवंरणे हन्यमानामहाराजशलभाइवपावकं ७ सत्यसेनस्त्रि
भिर्बाणैर्विव्याधयुधिपांडवं मित्रदेवस्त्रिषष्ट्याचचंद्रसेनस्तुसप्तभिः ८ मित्रवर्मात्रिसप्तत्या
सौश्रुतिश्चापिसप्तभिः शत्रुंजयस्तुविंशत्यासुशर्मानवभिःशरैः ९ सविद्धोबहुभिःसंख्येप्रति
विव्याधतान्नृपान् सौश्रुतिंसप्तभिर्विध्वासत्यसेनंत्रिभिःशरैः १० शत्रुंजयंचविंशत्याचंद्रदे
वंतथाष्टभिः मित्रदेवंशतेनैवश्रुतसेनंत्रिभिःशरैः ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ ॥

नवभिर्मित्रवर्माणं सुशर्माणं तथाष्टभिः शत्रुंजयंच राजानं हत्वा तत्र शिलाशितैः १२ सौश्रुतेः
सशिरस्त्राणं शिरः कायादपाहरत् त्वरितश्चंद्रदेवं च शरैर्निन्ये यमक्षयं १३ तथेतरान्महा
राज यतमानान्महारथान् पंचभिः पंचभिर्बाणैरेकैकं प्रत्यवारयत् १४ सत्यसेनस्तु संक्रुद्धः
तोमरं व्यसृजन्महत् समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च १५ स निर्भिद्य भुजं सव्यं माधव
स्य महात्मनः अयस्मयो हेमदंडो जगाम धरणीं तदा १६ माधवस्य तु विद्धस्य तोमरेण महारणे प्रतो
दः प्रापतद्धस्तादश्मयश्च विशांपते १७ वासुदेवं विभिन्नांगं दृष्ट्वा पार्थो धनंजयः क्रोधमाहारय
त्तीव्रं कृष्णं चेदमुवाच ह १८ प्रापयाश्वान्महाबाहो सत्यसेनं प्रति प्रभो यावदेनं शरैस्तीक्ष्णैर्नयामि
यमसादनं १९ प्रतोदं गृह्य सोऽन्यत्तु रश्मीनपि यथा पुरा बाहयामास तानश्वान्सत्यसेनरथं प्रति
२० विष्वक्सेनं तु निर्भिन्नं दृष्ट्वा पार्थो धनंजयः सत्यसेनं शरैस्तीक्ष्णैर्वारयित्वा महारथः २१
ततः सुनिशितैर्भल्लै राज्ञस्तस्य महच्छिरः कुंडलोपचितं कायाच्चकर्त पृतनांतरे २२ तं निकृ
त्य शितैर्बाणैर्मित्रवर्माणमाक्षिपत् वत्सदंतेन तीक्ष्णेन सारथिं चास्य मारिष २३ ततः शरशतै
र्भूयः संशप्तकगणान्बली पातयामास संक्रुद्धः शतशोऽथ सहस्रशः २४ ततो रजतपुंखेन राज
न्शीर्षं महात्मनः मित्रसेनस्य चिच्छेद क्षुरप्रेण महारथः २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
५८

२८ ध्वजादीनां शब्दोऽश्रूयतेति षष्ठेनान्वयः २९ ३० ३१ ३२ ३३ हस्तस्थं चास्यतः छिंदतः ३७ स्वानुगाः स्वयया।

सुशर्माणं स संक्रुद्धो जत्रुदेशे समाहनत् ततः संशप्तकाः सर्वे परिवार्य धनंजयं २६ शस्त्रौघैर्ममृदुः
क्रुद्धा नादयंतो दिशो दश अभ्यर्दितस्तु तैर्जिष्णुः शक्रतुल्यपराक्रमः २७ ऐंद्रमस्त्रममेयात्मा प्रादु
श्चक्रे महारथः ततः शरसहस्राणि प्रादुरासन्विशांपते २८ ध्वजानां छिद्यमानानां कार्मुकाणां
च मारिष रथानां सपताकानां तूणीराणां युगैः सह २९ अक्षाणामथ चक्राणां योक्त्राणां रश्मि
भिः सह कूबराणां वरूथानां पृषत्कानां च संयुगे ३० अश्वानां पततां चापि प्रासानामृष्टिभिः
सह गदानां परिघाणां च शक्तितोमरपट्टिशैः ३१ शतघ्नीनां सचक्राणां भुजानां चोरुभिः सह
कंठसूत्रांगदानां च केयूराणां च मारिष ३२ हाराणामथ निष्काणां तनुत्राणां च भारत छत्राणां
व्यजनानां च शिरसां मुकुटैः सह ३३ अश्रूयत महाञ्छब्दस्तत्र तत्र विशांपते सकुंडलानि स्वक्षी
णि पूर्णचंद्रनिभानि च ३४ शिरांस्युर्व्यामदृश्यंत ताराजालमिवांबरे सुस्रग्वीणि सुवासांसि चं
दनेनोक्षितानि च ३५ शरीराणि व्यदृश्यंत निहतानां महीतले गंधर्वनगराकारं घोरमायोधनं
तदा ३६ निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः हस्तिभिः पतितैश्चैव तुरगैश्चाभवन्मही ३७ अगम्य
रूपा समरे विशीर्णैरिव पर्वतैः नासीच्चक्रपथस्तत्र पांडवस्य महात्मनः ३८ ॥

तस्मिन्नष्टे न चरासीदेवं रथानां भंगं दृष्ट्वा चक्राणि न स्पृशंति ग्रस्तभंगादिति ग्रातेकादिवेति पाठे चिंतयेव ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सीदमानानिपंकमज्जनात् ४९ ५२ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

निघ्नतः शात्रवान् भल्लैर्हस्त्यश्वं चाप्यतो महत् आर्त्तकादिवसीदंतिरथ्यचक्राणिमारिष ४९ चा
नत्तस्यसंग्रामेतस्मिन्लोहितकर्दमेसीदमानानिचक्राणिसमुहुस्तुरगाभृशं ५० श्रमेणमहता
युक्तामनोमारुतरंहसः वध्यमानेतुतत्सैन्यंपांडुपुत्रेणधन्विना ५१ प्रायशोविमुखंसर्वंनाव
तिष्ठतभारत तान्जित्वासमरेजिष्णुःसंसप्तकगणान्बहून् ५२ विराजतदापार्थोविधूमोग्निरि
वज्वलन् ५३ इतिकर्णपर्वणि ॥४९ संजयउवाच युधिष्ठिरंमहाराजविसृजंतंशरान्बहून्
स्वयंदुर्योधनोराजाप्रत्यगृह्णादभीतवत् १ तमापतंतंसहसातवपुत्रंमहारथं धर्मराजोद्रुतं
विध्वातिष्ठतिष्ठेतिचाब्रवीत् २ सतुतंप्रतिविव्याधनवभिर्निशितैःशरैः सारथिंचास्यभल्ले
नभृशंक्रुद्धोभ्यताडयत् ३ ततोयुधिष्ठिरोराजन्स्वर्णपुंखान्शिलीमुखान् दुर्योधनायचिक्षे
पत्रयोदशशिलाशितान् ४ चतुर्भिश्चतुरोवाहांस्तस्यहत्वामहारथः पंचमेनशिरःकायात्सार
थेश्चसमाक्षिपत् ५ षष्ठेनतुध्वजंराज्ञःसप्तमेनतुकार्मुकं अष्टमेनतथाखड्गंपातयामासभूतले
६ पंचभिर्नृपतिंचापिधर्मराजोर्दयद्भृशं हताश्वात्तुरथात्तस्मादवप्लुत्यसुतस्तव ७ उत्तमंव्यसनेशा
श्रीभूमावेवावतिष्ठत तंतकृच्छ्रगतंदृष्ट्वाकर्णद्रौणिकृपादयः ८ अभ्यवर्तंतसहसापरीप्संतोनराधि
पं अथपांडुसुताःसर्वेपरिवार्ययुधिष्ठिरं ९ अन्वयुःसमरेराजंस्ततोयुद्धमवर्तत ततस्तूर्यसहस्राणि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ११ १२ १३ १४ १५।१६ १७ १८ १९ २० २१ २२।२३ आभरणान्यवबध्नुः स्वगात्रक्षतजैस्ततः २४ ॥
५९
ततः किलकिलाशब्दाः प्रादुरासन्महीपते यत्राभ्यगच्छन्समरे पांचालाः कौरवैः सह ११ नरा नरैः समा
जग्मुर्वारणा वरवारणैः रथाश्च रथिभिः सार्धं हयाश्च हयसादिभिः १२ द्वंद्वान्यासन्महाराज प्रेक्षणीया
नि संयुगे विविधान्यप्यचिंत्यानि शस्त्रवंत्युत्तमानि च १३ तेऽद्भुताः समरे सर्वे चित्रं लघु च सुष्ठु च अयुध्यं
त महावेगाः परस्परवधैषिणः १४ अन्योन्यं समरे जघ्नुर्योधव्रतमनुष्ठिताः नहि ते समरं चक्रुः पृष्ठतो
वै कथंचन १५ मुहूर्तमेव तद्युद्धमासीन्मधुरदर्शनं तत उन्मत्तवद्राजन्निर्मर्यादमवर्तत १६ रथी
नागं समासाद्य दारयन्निशितैः शरैः प्रेषयामास कालाय शरैः संनतपर्वभिः १७ नागा हयान्समा
साद्य विक्षिपंतो बहून्रणे दारयामासुरत्युग्रं तत्र तत्र तदा तदा १८ हयारोहाश्च बहवः परिवार्य ह
योत्तमान् तलशब्दरवांश्चक्रुः संपतंतस्ततस्ततः १९ धावमानांस्ततस्तांस्तु द्रवमाणान्महागजा
न् पार्श्वतः पृष्ठतश्चैव निजघ्नुर्हयसादिनः २० विद्राव्य च बहूनश्वान्नागा राजन्मदोत्कटाः विषा
णैश्चापरे जघ्नुर्ममृदुश्चापरे भृशं २१ साश्वारोहांश्च तुरगान्विषाणैर्विभिदू रुषा अपरे चिक्षिपुर्वे
गात्सरस्याति बलास्तदा २२ पादातैराहता नागा विवरेषु समंततः चक्रुरार्तस्वरं घोरं दुद्रुवुश्च दि
शो दश २३ पदातीनां तु सहसा प्रद्रुतानां महाहवे उत्सृज्याभरणं तूर्णमवबध्नू रणाजिरे २४ ॥

५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निमित्तं जयहेतुं महान्तो गजा येषां ते महागजाः गजारोहाः जगृहुः हस्तिभिर्ग्राहयामासतुः परिणाम्य विनाम्य
हस्तिनमिति शेषः विभिंडश्च प्राकृनाजैरेव २५।२६ २९ ३० प्रतिमानेषु गजदंतांतरालेषु प्रासैः निगृहीताः कुं

निमित्तं मन्यमानास्तु परिणाम्य महागजाः जगृहुर्विभिंडश्चैव चित्राण्याभरणानि च २५ तांस्तु तत्र
असक्तान्वै परिवार्य पदातयः हस्त्यारोहान्निजघ्नुस्ते महावेगा बलोत्कटाः २६ अपरे हस्तिभिर्दंतैः
विविदिभसम्महाहवे निपतंतो विषाणाग्रैर्भग्नांगा विह्वलाः स्थिताः स्थिते २७ अपरे सहसारूढ्य विषाणै
रेव सूदिताः सेनांतरं समासाद्य केचित्तत्र महागजैः २८ तन्मात्रामहाराज विक्षिप्य च पुनः पुनः
अपरे व्यजनानीव विभ्राम्य निहता मृधे २९ पुनस्तस्य नागानामपरेषां विशीर्यपते शरीराणि
विह्वानि तत्र तत्र रणाजिरे ३० पुरः सरास्तु नागानामपरेषां विशांपते शरीराणि पति विह्वानि तत्र तत्र
रणाजिरे ३१ प्रतिमानेषु कुंभेषु दंतवेष्टेषु चापरे निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ३२
निगृह्य च गजाः केचित्पार्श्वस्थैर्भृशदारुणैः रथाश्वसादिभिस्तत्र संभिन्ना न्यपतन्भुवि ३३ स
हयाः सादिनस्तत्र तोमरेण महामृधे भूमावमृद्नन्वेगेन सवर्माणं पदातिनं ३४ तथा सावरणान्
कांश्चित्तत्र तत्र विशांपते रथान्नागाः समासाद्य परिगृह्य च मारिष ३५ व्याक्षिपन्सहसा तत्र घोररू
पे भयानके नाराचैर्निहतास्त्वापि गजाः पेतुर्महाबलाः ३६ ॥

भेषु तोमरैः दंतवेष्टेषु शक्तिभिश्च निगृहीताः प्रतिमान प्रतिज्ञाया गजदंतांतरालयोरित्तिमेदिनी ३।३५

क. टी. ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५०

५०

पर्वतस्येवशिखरंवज्रहतानांमहीतले योधायोधान्समासाद्यमुष्टिभिर्व्यहनन्युधि ३६ केशेष्वन्यो
न्यमाक्षिप्यचिक्षिपुर्विभिदुश्चह उद्यम्यचभुजानन्येनिहत्यचमहीतले ३७ पदाचोरःसमाक्रम्य
स्फुरतोपाहरंच्छिरः पततश्चापरोराजन्विजहारासिनाशिरः जीवतश्चतथैवान्यःशस्त्रंकायेन्यम
जयत् मुष्टियुद्धंमहच्चासीद्योधानांतत्रभारत ३९ तथाकेशग्रहश्चोग्रोबाहुयुद्धंचभैरवं समास
क्तस्यचान्येनअविज्ञातस्तथापरः ४० जहारसमरेप्राणान्नानाशस्त्रैरनेकधासंसक्तेषुचयोधेषु
वर्तमानेचसंकुले ४१ कबंधान्युत्थितानिस्युःशतशोथसहस्रशः शोणितैःसिच्यमानानिश
स्त्राणिकवचानिच ४२ महारागानुरक्तानिवस्त्राणीवचकाशिरे एवमेतन्महद्युद्धंदारुणंश
स्त्रसंकुलं ४३ उन्मत्तगंगाप्रतिमंशब्देनापूरयज्जगत् नैवस्वेनपरेराजन्विज्ञायंतेशरातुराः ४४
योद्धव्यमितियुध्यंतेराजानोजयगृद्धिनः स्वान्स्वेजघ्नुर्महाराजपरांश्चैवसमागतान् ४५ उभयोः
सेनयोर्वीरैर्व्याकुलंसमपद्यत रथैर्भग्नैर्महाराजवारणैश्चनिपातितैः ४६ हयैश्चपतितैस्तत्र
नरैश्चविनिपातितैः अगम्यरूपापृथिवीक्षणेनसमपद्यत ४७ क्षणेनासीन्महीपालक्षतजौघ
प्रवर्तिनी पंचालानहनत्कर्णस्त्रिगर्तांश्चधनंजयः ४८ भीमसेनःकुरून्राजन्हस्त्यनीकंचसर्वशः
एवमेषक्षयोवृत्तःकुरुपांडवसेनयोः ४९ अपराह्णेगतेसूर्येकांक्षतांविपुलंयशः ५० ॥ ४४

५०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अष्टाविंशः श्रुति १२ विरथः कृतस्तत्र युद्धे धर्मपुत्रः कथं तं विरथं चक्रे तस्य ते च नृपतिर्दुर्योधनः कथं श्र
इति श्रीमहाभारते कर्णपर्वणि ॥५९॥ धृतराष्ट्र उवाच अतितीव्राणि दुःखानि दुःसहानि बहूनि च
तवाहं संजयाश्रौषं पुत्राणां चैव संक्षयं १ यथा त्वं मे कथयसे यथा युद्धमवर्तत न संति सूत कौर
व्या इति मे निश्चिता मतिः २ दुर्योधनस्तु विरथः कृतस्तत्र महारथः धर्मपुत्रः कथं चक्रे तस्य वा नृपतिः
कथं ३ अपराह्णे कथं युद्धमभवल्लोमहर्षणं तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि संजय ४ संजय उवाच
संसक्तेषु च सैन्येषु युध्यमानेषु भागशः रथमन्यं समास्थाय पुत्रस्तव विशांपते ५ क्रोधेन महताविष्ट
ः सविषो भुजगो यथा दुर्योधनः समालक्ष्य धर्मराजं युधिष्ठिरं ६ प्रोवाच सूतं त्वरितो याहि याहि या
हीति भारत तत्र मां प्रापय क्षिप्रं सारथे यत्र पांडवः ७ ध्रियमाणातपत्रेण राजा राजति दंशितः स
सूतस्त्वादितो राज्ञा राज्ञः स्यंदनमुत्तमं ८ युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे ततो युधिष्ठिरः
क्रुद्धः प्रभिन्न इव कुंजरः ९ सारथिं चोदयामास याहि यत्र सुयोधनः तौ समाजग्मतुर्वीरौ भ्रातरौ र
थसत्तमौ १० समेत्य च महावीरौ संरब्धौ युद्धदुर्मदौ ववर्षतुर्महेष्वासौ शरैरन्योन्यमाहवे ११ त
तो दुर्योधनो राजा धर्मशीलस्य मारिष शिलाशितेन भल्लेन धनुश्छिच्छेद संयुगे १२ तन्नामृष्यत
संक्रुद्धो ह्यवमानं युधिष्ठिरः अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः १३ ॥

युध्यतश्चेति शोधः ३ ४ ५ ६ ७ ८ ९ १० अपविध्यान्यत्का ११ १२ १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ १४ १५ २२ २३ सर्वपारसवीं तिरस्कारविनाशे च पुंसि पारसवः पुमानिति २४ २५ २६ २७ २८ २९
५१

अन्यत्कार्मुकमादाय धर्मपुत्रस्य संयुगे दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च १४ अथान्यद्धनुरा
दाय प्रविध्य च युधिष्ठिरं तावन्योन्यं सुसंक्रुद्धौ शरवर्षाणि मुंचतां १५ सिंहाविव सुसंरब्धौ परस्पर
जिगीषया जघ्नतुस्तौ रणेन्योन्यं नर्दमानौ वृषाविव १६ अंतरं मार्गमाणौ च चेरतुस्तौ महारथौ ततः
पूर्णायतोत्सृष्टैः शरैस्तौ तु कृतव्रणौ १७ विरेजतुर्महाराज किंशुकाविव पुष्पितौ ततो राजन्विमु
चंतौ सिंहनादान्मुहुर्मुहुः १८ तलयोश्च तथा शब्दान्धनुषश्च महाहवे शंखशब्दरवांश्चैव चक्र
तुस्तौ नरेश्वरौ १९ अन्योन्यं तौ महाराज पीडयां चक्रतुर्भृशं ततो युधिष्ठिरो राजा पुत्रं ते वज्रवेगैस्त्रि
भिः २० आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिः २१ पं
चभिर्निशितैर्बाणैः स्वर्णपुंखैः शिलाशितैः ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत २२ सर्वा
पारसवीं तीक्ष्णां महोल्काप्रतिमां तदा तामापतंतीं सहसा धर्मराजः शितैः शरैः २३ त्रिभिश्चिच्छे
द सहसा तं च विव्याध पंचभिः निपपात ततः सा तु स्वर्णदंडा महास्वना २४ निपतंती महोल्केव
व्यराजच्छिखिसंनिभा शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशांपते २५ नवभिर्निशितैस्तीक्ष्णैर्नि
जघान युधिष्ठिरं सोतिविद्धो बलवता भ्रातृणां शत्रुतापनः २६ ॥

ग्र२ ५१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२० २८ २४ २६ एकोनविंशः ततः १ २ ३

दुर्योधनेसमुद्दिश्यबाणंजग्राहसत्वरः समाधत्तचतेबाणंधनुर्मध्येमहाबलः १७ चिक्षेपचमहा
राजततःक्रुद्धःपराक्रमी सत्वबाणःसमासाद्यतवपुत्रंमहारथं १८ मुमोहपततराजानेधरणीचर
राबह ततोदुर्योधनःक्रुद्धोगदामुद्यम्यवेगितः १९ विधित्सुःकलहस्यांतंधर्मराजमुपाद्रवत् त
मुद्यतगदंदृष्ट्वादंडहस्तमिवांतकं २० धर्मराजोमहाशक्तिंप्राहिणोत्तवसूनवे दीप्यमानांमहावे
गांमहोल्कांज्वलितामिव २१ रथस्थःसततयाविद्धोवर्मभित्वास्तनांतरे भृशंसंविग्नहृदयःपपात
वमुमोहच २२ भीमस्तमाहचततःप्रतिज्ञामनुचिंतयन् नायंवध्यस्तवनृपइत्युक्त्वासन्यवर्तत
२३ ततस्त्ववितमागाम्यकृतवर्मातवात्मजे प्रत्यपद्यतराजानंनिमग्नंव्यसनार्णवे २४ गदामादाय
भीमोपिहेमपट्टपरिष्कृतां अभिदुद्राववेगेनकृतवर्माणमाहवे २५ एवंतदभवद्युद्धंत्वदीयानां
परैःसह अपराह्णेमहाराजकांक्षतांविजयंयुधि २६ इतिश्रीमहाभारतेकर्णपर्वणि २०५ संज
यउवाच ततःकर्णंपुरस्कृत्यत्वदीयायुद्धदुर्मदाः पुनरावृत्यसंग्रामंचक्रुर्देवासुरोपमं १ द्विरद
नररथाश्वशंखशब्दैःपरिहर्षितानिविविधैश्चशस्त्रपातैः द्विरदरथपदातिसादिसंघाःपरिकुपि
ताभिमुखाःप्रजघ्निरेते २ शितपरशुवरासिपट्टिशैरिषुभिरनेकविधैश्चसूदिताः द्विरदरथह
यामहाहवेवरपुरुषैःपुरुषाश्चवाहनैः ३ ॥

क॰टी॰ ४ ७ लवणजलः सारसमुद्रः ८ त्रिदशावरावरजोपमं कृष्णबलं ९ १० ११ १२ सृतोऽग्रवगतो १३ ॥
४२

कमलदिनकरेंदुसंनिभैः सितदशनैः सुमुखोन्नतनासिकैः रुचिरमकुटकुंडलैर्महीपुरुषशि
रोभिरवास्तृताऽवभौ ४ परिघमुशलशक्तितोमरैर्नखरभुशुंडिगदाशतैर्हताः द्विरदनरहयाः
सहस्रशो रुधिरनदीप्रवहास्तदाभवन् ५ प्रहतरथनराश्वकुंजरं प्रतिभयदर्शनमुल्बणव्र
णं तदहितहतमाऽवभौ बलं पितृपतिराष्ट्रमिव प्रजालये ६ अथ तव नरदेव सैनिकास्तव
वसुताः सुरसूनुसंनिभाः अमितबलपुरःसरा रणे कुरुवृषभाः शिनिपुत्रमभ्ययुः ७ तद
तिरुधिरभीममाऽवभौ पुरुषवराश्वरथद्विपाकुलं लवणजलसमुद्धतस्वनं बलमसुरामरसै
न्यसप्रभं ८ सुरपतिसमविक्रमस्ततस्त्रिदशवरावरजोपमं युधि दिनकरकिरणप्रभैः पृषत्कै
रवितनयोऽभ्यहनच्छिनिप्रवीरं ९ तमपि सरथवाजिसारथिं शिनिवृषभो विविधैः शरैस्त्वरन्
भुजगविषसमप्रभैः रणे पुरुषवरं समवास्तृणोद्वरा १० शिनिवृषभशरप्रपीडितं तव सुहृदो
वसुषेणमभ्ययुः त्वरितमतिरथा रथर्षभं द्विरदरथाश्वपदातिभिः सह ११ तमुदधिनिभमा
द्रवद्बलं त्वरिततरैः समभिद्रुतं परैः द्रुपदसुतमुखैस्तदाभवत्पुरुषरथाश्वगजक्षयो महान्
१२ अथ पुरुषवरौ कृताह्निकौ भवमभिपूज्य यथाविधि प्रभुं अरिवधकृतनिश्चयौ द्रुतं तव बल
मर्जुनकेशवौ सृतौ १३ ॥

४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ ॥

जलदनिनदनिस्वनेरथेपवनविधूतपताककेतने सितहयमुपयांतमंतिकंकृतमनसोददृशु
स्तदारयः १४ अथविस्फार्यगांडीवंरथेनत्वन्निवार्जुनः शरसंबाधमकरोत्तदिशःप्रदिशस्तथा
१५ रथानिमानप्रतिमान्भंजयन्सायुधध्वजान् ससारथींस्तदावाणैरश्वाग्राणीवानिलोवधीत् १६
गजानाजप्रणोहंश्चवैजयंत्यायुधध्वजान् सादिनोश्वांश्चपत्तींश्चशरैर्निन्येयमक्षयं १७ तमंतक
मिवक्रुद्धमनिवार्यमहारथं दुर्योधनोभ्ययादेकोनिघ्नन्वाणैरजिह्मगैः १८ तस्यार्जुनोधनुःसू
तमस्त्रान्केतुंचसायकैः हत्वासप्तभिरेकेनछत्रंचिच्छेदपत्रिणा १९ नवमंचसमाधायव्य
सृजत्प्राणघातिनं दुर्योधनायेषुवरंतंद्रौणिःसप्तधाच्छिनत् २० ततोद्रौणेर्धनुश्छित्वाहत्वाचाश्व
वरांश्शरैः कृपस्यापितदत्युग्रंधनुश्चिच्छेदपांडवः २१ हार्दिक्यस्यधनुश्छित्वाध्वजंचाश्वांस्तदा
वधीत् दुःशासनस्येष्वसनंछित्वाराधेयमभ्ययात् २२ अथसात्यकिमुत्सृज्यत्वरन्कर्णोर्जु
नंत्रिभिः विध्वाविव्याधविंशत्याकृष्णंपार्थंपुनःपुनः २३ नग्लानिरासीत्कर्णस्यनिघ्नतःसाय
कान्बहून् रणेविनिघ्नतःशत्रून्क्रुद्धस्येवशतक्रतोः २४ अथसात्यकिरागत्यकर्णंविध्वाशि
तैःशरैः नवत्यानवभिश्चोग्रैःशतेनपुनरार्पयत् २५ ततःप्रवीराःपार्थानांसर्वेकर्णमपीडयन्
युधामन्युःशिखंडीचद्रौपदेयाःप्रभद्रकाः २६ उत्तमौजायुयुत्सुश्चयमौपार्षतएवच चेदिकारू
षमत्स्यानांकेकयानांचयद्बलं २७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३५ निष्कैवल्यंनिश्चितंकैवल्यंमरणंयस्मिन्तत्तथा ३६ अत्यपयातप्रविष्टः ३७ ३८ ३९ ५० ॥

चेकितानश्चबलवान्धर्मराजश्चसुव्रतः एतेरथास्त्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः ३८ परिवार्य
रणेकर्णंनानाशस्त्रैरवाकिरन् भाषंतोवाग्भिरुग्राभिः सर्वेकर्णवधेप्सवः ३९ तांस्तत्रवृष्टिंब
हुधाकर्णश्छित्वाशितैःशरैः अपोवाहास्त्रवीर्येणद्रुमंभंक्त्वेवमारुतः ४० रथिनः समहामात्रान्गा
जानश्वान्ससादिनः पत्तिव्रातांश्चसंक्रुद्धोनिघ्नन्कर्णोव्यदृश्यत ४१ तद्वध्यमानंपांडूनांबलंकर्ण
स्यतेजसा विशस्त्रपत्रदेहासुंप्रायशआसीत्पराङ्मुखं ४२ अथकर्णास्त्रमस्त्रेणप्रतिहत्यार्जुनः
स्मयन् दिशंखंचैवभूमिंचप्रावृणोच्छरवृष्टिभिः ४३ मुसलानीवसंपेतुःपरिघाइवचेषवः श
तघ्न्यइवचाप्यन्येवज्राण्युग्राणिचापरे ४४ तैर्वध्यमानंतत्सैन्यंसपत्त्यश्वरथद्विपं निमीलिताक्ष
मत्यर्थंबभ्रामचननादच ४५ निष्कैवल्यंतदायुद्धंप्रापुरश्वनरद्विपाः हन्यमानाःशरैरार्तास्तदा
भीताःप्रदुद्रुवुः ४६ त्वदीयानांतदायुद्धेसंसक्तानांजयैषिणां गिरिमस्तंसमासाद्यप्रत्यपद्यतभा
नुमान् ४७ तमसाचमहाराजरजसाचविशेषतः नकिंचित्प्रत्यपश्यामशुभंवायदिवाशुभं ४८
तेत्रस्यंतोमहेष्वासारात्रियुद्धस्यभारत अपयानंततश्चक्रुःसहिताःसर्वयोधिभिः ४९ कौरवेषु
प्रयातेषुतदाराजन्दिनक्षये जयंसुमनसःप्राप्यपार्थाःस्वशिबिरंययुः ५० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४२ ४४ विभः स्वेनकंठेन रुद्धया आततायिनः शस्त्रपाणेः १ भङ्गं सभङ्गो बलिभिन्नतः कृतरान् २ अरक्षत्त्वोघया
शयोभरतानदुर्योधनादीन् ४ ते ग्रस्तरोगाः ननिघ्नाः ते शस्त्रस्याभ्यासाद्धा कान्नयमिदं तत्या दुर्योधनोपिन निं
वादित्रशङ्खैर्विविधैः सिंहनादैः सगर्जितैः परान्पद्मसंतन्नसन्नवेतन्आच्युतार्जुनौ ४१ कृतेवहारे तै।
वीरैः सैनिकाः सर्वपर्वते आशीर्वचः पाण्डवेषु प्रापुर्जेतन नरेश्वराः ४२ ततः कृतेवहारेच प्रहृष्टाः स
र्पाण्डवाः निशायां शिबिरं गत्वा न्यवसंते नरेश्वराः ४३ ततो रक्षः पिशाचाश्च श्वापदाश्चैव संघशः
जग्मुरायोधनं घोरं रुद्रस्याक्रीडसंनिभं ४४ इति कर्णपर्वणि प्रथमो युद्धदिवसः २२४९ धृतराष्ट्र उ
वाच स्वेनछंदेन नः सर्वानवधीद्व्यक्तमर्जुनः नह्यस्य समरे मुच्येदंतकोप्याततायिनः १ पार्थश्चैको
हरद्भद्रामेकश्चाग्निमतर्पयत् एकश्चेमां महीं जित्वा चक्रे बलिभृतो नृपान् २ एकोनिवातकवचा
नहनद्दिव्यकार्मुकः एकः किरातरूपेण स्थितं शर्वमयोधयत् ३ एकोऽरक्षद्भरतानेकोभवमतो
षयत् तेनैकेन जिताः सर्वे महीपास्तुग्रतेजसा ४ नतेनिंद्याः प्रशस्यास्ते यत्ते चक्रुर्ब्रवीहि तत् त
तो दुर्योधनः सूत पश्चात्किमकरोत्तदा ५ संजय उवाच हतप्रहतविध्वस्तविवर्मायुधवाहनाः
दीनस्वरा दूयमाना मानिनः शत्रुनिर्जिताः ६ ॥
घः अपिततः विसन्नः ताडशोशात्रं प्राप्य ख्यातिं गतस्पर्धाः ७ हताः ताडिताः प्रहताः छिन्नावयवाः।
विध्वस्ताः वाहनेभ्योधः पातिताः ९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
५५

९ सहसाग्रकस्मात ९ ११ मतेष्यितेनेतिशेषः १२ प्रतीपकर्त्तारं शत्रूणां छेत्तारं प्रवीरं प्रकृष्टं वीरं १४

शिबिरस्थाः पुनर्मंत्रं मंत्रयंति स्म कौरवाः भग्नदंष्ट्रा हतविषाः पादाक्रांता इवोरगाः ८ तानब्रवी
त्ततः कर्णः क्रुद्धः सर्प इव श्वसन् करं करेण निष्पीड्य प्रेक्षमाणस्तवात्मजं ९ यत्तो दृढश्च दक्षश्च
धृतिमानर्जुनः सदा संबोधयति चाप्येनं यथाकालमधोक्षजः १० सहसास्त्रविसर्गेण वयं तेना
द्य वंचिताः श्वस्त्वहं तस्य संकल्पं सर्वं हंता महीपते ११ एवमुक्तस्तथेत्युक्त्वा सोनुज्ञातो नृपोत्तमा
न् तेनुज्ञातास्तान्नृपाः सर्वे स्वानि वेश्मानि भेजिरे १२ सुखोषितास्तां रजनीं हृष्टा युद्धाय निर्ययुः तेप
श्यन्विहितं व्यूहं धर्मराजेन दुर्जयं १३ प्रयत्नात्कुरुमुख्येन बृहस्पत्युशनोमतं अथ प्रतीपकर्त्ता
रं प्रवीरं परवीरहा १४ सस्मार वृषभस्कंधं कर्णं दुर्योधनस्तदा पुरंदरसमं युद्धे मरुद्गणसमं बले १५
कार्तवीर्यसमं वीर्ये कर्णं राज्ञोगमन्मनः सर्वेषां चैव सैन्यानां कर्णमेवागमन्मनः १६ सूतपुत्रं
महेष्वासं बंधुमात्ययिकेष्विव धृतराष्ट्र उवाच ततो दुर्योधनः सूत पश्चात्किमकरोत्तदा यद्वो
गमन्मनो मंदाः कर्णं वैकर्तनं प्रति १७ ॥

आत्ययिकेषु प्राणसंकटेषु अप्सु पतत अपिः प्लवे ८ ९ १४ ११७ ५५

मनः कर्णाश्रयेणामर्षः भाविनाशानवधानात् २० २१ २२ निष्ठाविपाकः २४ २५ कर्णाश्रनीतिमानितिमन्यतद्

श्रुपपश्यतनाथेयेश्रीतान्दृष्ट्वभास्करे कृतेवद्याविसेन्यानांप्रवृत्तेचरणेपुनः १७ कथंवैकर्तनःक
र्णस्तत्रायुध्यतसंजय कथंचपांडवाःसर्वेयुयुधुस्तत्रसत्तमं १८ कर्णोह्येकोमहाबाहुर्हन्यात्पार्था
न्ससंजयान् कर्णस्यभुजयोर्वीर्यंशक्रविष्णुसमंयुधि १९ तस्यशस्त्राणिघोराणिविक्रमश्चमहा।
त्मनः कर्णमाश्रित्यसंग्राममेमेदोदुर्योधनोनृपः २० दुर्योधनंततोदृष्ट्वापांडवेनभृशार्दितं पराक्रां
तान्पांडुसुतान्दृष्ट्वाचापिमहारथः २१ कर्णमाश्रित्यसंग्राममेमेदोदुर्योधनःपुनः जेतुमुत्सहते
पार्थान्सपुत्रान्सहकेशवान् २२ अहोवतमहद्दुःखंयत्रपांडुसुतान्रणे नातरद्भसःकर्णोदै
वंनूनंपरायणं २३ अहोद्यूतस्यनिष्ठेयंघोरासंप्रतिवर्त्तते अहोतीव्राणिदुःखानिदुर्योधनकृता
न्यहं २४ सोढाघोराणिवद्रूपाःशल्यभूतानिसंजय सौवलंचतदातातनीतिमानितिमन्यते २५
कर्णश्चरभसोनित्यंराजानंचाप्यनुव्रतः यदेवंवर्त्तमानेषुमहायुद्धेषुसंजय २६ अश्रौषंनिह
तान्पुत्रान्नित्यमेवचनिर्जितान् नपांडवानांसमरेकश्चिदस्तिनिवारकः २७ स्त्रीमध्यमिवगा
हंतेदैवंतुबलवत्तरं संजयउवाच राजन्सर्वंनिमित्तानिधर्मिष्ठानिविचिंतय २८ अतिक्रांतंहि
यत्कार्यंपश्चाच्चिंतयतेनरः तच्चास्यनभवेत्कार्यंचिंतयाचविनश्यति २९ ॥

तिष्ठर्वैणान्वयः २६ स्त्री
मध्यमिवगाहंते सैनामर्दंतीत्यर्थः २८ निमित्तानियत्नादीनिधर्मिष्ठानीतिसोपालंभंविरुद्धानीत्यर्थः ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
८८

कार्यंनामलाभात्वंदुराधर्षंश्रमंतदुर्लभंयतःपतः विजानतापित्वयाग्राम्याग्राम्यविचारेणागुरूणांगुरुकर्मपरीक्षणेन
कृतमित्वयः १० ५० शक्रशक्तीतिस्वस्यअर्जुनवधेसामर्थ्याभावंद्योतयति १८ श्रेयस्करंआत्मत्राणकरं
तदिदंतवकार्यंतद्दुराधर्षंविजानतः नकृतंयत्त्वयापूर्वंग्राम्याग्राम्यविचारणं १९ उक्तोसिवहुधारा
जन्मायुध्यस्वेतिपांडवैः मद्हीषेनचतन्मोहाद्न्हवनंचविशांपते २१ त्वयापापानिघोराणिसमा
चीर्णानिपांडुषु त्वत्कृतेवर्त्ततेघोरःपार्थिवानांजनक्षयः २२ तत्त्विदानीमतिक्रांतेमाशुचोभ
रतर्षभ शृणुसर्वंयथावृत्तंघोरंवैशाममच्युत २३ प्रभातायांरजन्यांतुकर्णोराजानमभ्यया
त् समेत्यचमहाबाहुर्दुर्योधनमथाब्रवीत् २४ कर्णउवाच अद्यराजन्समेष्यामिपांडवेनयश
स्विना निहनिष्यामितंवीरंसवामांनिहनिष्यति २५ बहुत्वान्ममकार्याणांतथापार्थस्यभार
त नाभूत्समागमोराजन्ममचैवार्जुनस्यच २६ इदंतुमेयथाप्रज्ञंशृणुवाक्यंविशांपते अनिह
त्यरणेपार्थंनाहमेष्यामिभारत २७ हतप्रवीरेसैन्येस्मिन्मयिचावस्थितेयुधि अभियास्यतिमां
पार्थःशक्रशक्तिविनाकृतं २८ ततःश्रेयस्करंयच्चतन्निबोधजनेश्वर आयुधानांचमेवीर्यंद्रव्या
णामर्जुनस्यच २९ कार्यस्यमहतोभेदेलाघवेदूरपातने सौष्ठवेचास्त्रपातेचसव्यसाचीनमत्स
मः ३०
३० वीर्यसमानमितिशेषः कार्यस्यकर्तव्यस्यपरकीयस्यभेदे विनाशेलाघवेशीघ्रत्वेसौष्ठ
वेकौशलेप्राणेशारीरबले शौर्यंमानसबलंविज्ञानेअस्त्रशिक्षायांविक्रमेफलोपधानेस्त्राणांनि
मित्तज्ञानेयोगेलक्ष्यसंबंधावधारणे ३० ॥

८८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४१ महामात्रं श्रेष्ठं विजयाख्यं नाम प्रसिद्धं ४२ ४३ ४४ ४९ सिद्धिर्मोक्षः आत्मवतो जितचित्तस्य ५० ५१ ५४ ॥
प्राणैश्वर्यैर्यवित्तेन विक्रमे चापि भारत निमित्तज्ञानयोगे च सव्यसाची न मत्समः ४१ सर्वायुध
महामात्रं विजयं नाम तद्धनुः इंद्रार्थे प्रियकामेन निर्मितं विश्वकर्मणा ४२ येन दैत्यगणान् राजन्
जितवान् वै शतक्रतुः यस्य घोषेण दैत्यानां व्यामुह्यंत दिशो दश ४३ तद्भार्गवाय प्रायच्छच्छक्रः पर
मसंमतं तद्दिव्यं भार्गवो मह्यमददद्धनुरुत्तमं ४४ तेन योत्स्ये महाबाहुमर्जुनं जयतां वरं यथेंद्रः
समरे सर्वान् दैतेयान् वै समागतान् ४५ धनुर्घोरं रामदत्तं गांडीवात्तद्विशिष्यते त्रिःसप्तकृत्वः पृथिवी
धनुषा येन निर्जिता ४६ धनुषो यस्य कर्माणि दिव्यानि प्राह भार्गवः तद्रामो ह्यददन्मह्यं येन योत्
स्यामि पांडवं ४७ अद्य दुर्योधनाहं त्वां नंदयिष्ये सबांधवं निहत्य समरे वीरमर्जुनं जयतां वरं ४८
सपर्वतवनद्वीपा हतवीरा ससागरा पुत्रपौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ४९ नाशक्यं विद्य
ते मे ह्यद्य त्वत्प्रियार्थे विशेषतः सम्यक् धर्मानुरक्तस्य सिद्धिरात्मवतो यथा ५० न हि मां समरे सो
ढुं स शक्तोऽग्निं तरुर्यथा अवश्यं तु मया वाच्यं येन हीनोऽस्मि फाल्गुनात् ५१ ज्या तस्य धनुषो दिव्या
तथाक्षय्ये महेषुधी सारथिस्तस्य गोविंदो मम तादृङ् न विद्यते ५२ तस्य दिव्यं धनुः श्रेष्ठं गांडीव
मजितं युधि विजयं च महद्दिव्यं ममापि धनुरुत्तमं ५३ तत्राहमधिकः पार्थाद्धनुषा तेन पार्थि
व येन चाप्यधिको वीरः पांडवस्तं निबोध मे ५४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ शल्यःकृत्स्नतल्पःबाणाग्राकरबहुलतयाबाणानामत्तयतंजयं एवंबहूस्वत्वेनदिव्यास्त्रजयःस्यादा
५८
रथिमिश्राहस्त्रराशार्ङ्गःसर्वलोकनमस्कृतः अग्निदत्तश्चवैदिव्योरथःकांचनभूषणः ५५ अ
क्षेयःसर्वतोवीरवाजिनश्चमनोजवाः ध्वजश्चदिव्योद्युतिमान्वानरोविस्मयंकरः ५६ कृत्स्ना
श्चस्रष्टाजगतोरथंतमभिरक्षति एतैर्द्रव्यैरहंहीनोयोद्धुमिच्छामिपाण्डवं ५७ अयंतुसदृशः
शौरेःशल्यःसमितिशोभनः सारथ्यंयदिमेकुर्याद्ध्रुवस्तेविजयोभवेत् ५८ तस्यमेसारथिः
शल्योभवत्वसुकरःपरैः नाराचान्गार्ध्रपत्रांश्चशकटानिवहंतुमे ५९ रथाश्चमुख्याराजें
द्रयुक्ताबाजिभिरुत्तमैः आयांतुपश्चात्सततंमामेवभरतर्षभ ६० एवमभ्यधिकःपार्थाद्भ
विष्यामिगुणैरहं शल्योप्यभ्यधिकःकृष्णादर्जुनादपिचाप्यहं ६१ यथाश्वहृदयंवेददाशा
र्हःपरवीरहा तथाशल्योविजानीतेहयज्ञानंमहारथः ६२ बाहुवीर्येसमोनास्तिमद्रराज
स्यकश्चन तथास्त्रैर्मत्समोनास्तिकश्चिदेवधनुर्धरः ६३ तथाशल्यसमोनास्तिहयज्ञानेहि
कश्चन सोयमभ्यधिकःकृष्णाद्भविष्यतिरथोमम ६४ एवंकृतेरथस्थोहंगुणैरभ्यधिको
र्जुनात् भवेयुधिजयेयंचफाल्गुनंकुरुसत्तम ६५ समुद्यांतंनशक्ताःसंतिदेवाअपिसवासवाः
एतत्कृतंमहाराजत्वयेच्छामिपरंतप ६६ ॥
ह अयमित्यादिना ५८ ५९ ६२ भवेभवेयंभवेदितिपाठःप्रमादिकः ६४ ६५ ६६ ॥ ५६

२२ एक[illegible]त्रिंशः पुत्रविनयेनततः प्रणयात्शल्यस्यानयायात्युक्तियुक्तादित्यर्थः १ २ ३ ४ ५ ६
क्रियतामेषकामोमेमावःकालोत्यगादयंएवंकृतेकृतंसर्वंसर्वकामैर्भविष्यति ६७ ततोहंसमि
संग्रामेयत्करिष्यामिभारत सर्वथापांडवान्संख्येविजेष्येवैसमागतान् ६८ नहिमेसमरेशक्ताःस
मग्रास्तेसुरासुराः किमुपांडुसुताराजन्रणेमानुषयोनयः ६९ संजयउवाच एवमुक्तस्तवसुतः
कर्णेनाहवशोभिना संपूज्यसंप्रहृष्टात्माततोराधेयमब्रवीत् ७० दुर्योधनउवाच एवमेतत्करि
ष्यामियथात्वंकर्णमन्यसे सोपासंगारथाःसाश्वाःस्वनुयास्यंतिसंयुगे ७१ नाराचानार्धचंद्रां
श्चशाकटानिवहंतुते अनुयास्यामकर्णत्वांवयंसर्वेचपार्थिवाः ७२ संजयउवाच एवमुक्त्वाम
हाराजतवपुत्रःप्रतापवान् अभिगम्याब्रवीद्राजामद्रराजमिदंवचः ७३ इतिकर्णपर्वणि ११
२२ अ० ११ संजयउवाच पुत्रस्तवमहाराजमद्रराजंमहारथं विनयेनोपसंगम्यप्रणयाद्वाक्य
मब्रवीत् १ सत्यव्रतमहाभागद्विषतांतापवर्धन मद्रेश्वररणेशूरपरसैन्यभयंकर २ श्रुतवा
नसिकर्णस्यब्रुवतोवदतांवर यथानृपतिसिंहानांमध्येत्वांवरयेस्वयं ३ तत्त्वामप्रतिवीर्या
द्यशत्रुपक्षक्षयावह मद्रेश्वरप्रयाचेहंशिरसाविनयेनच ४ तस्मात्पार्थविनाशार्थंहितार्थं
ममचैवहि सारथ्यंरथिनांश्रेष्ठप्रणयात्कर्तुमर्हसि ५ त्वयियंतरिराधेयोविद्विषोमेविजेष्य
ते अभीषूणांहिकर्णस्यग्रहीतान्योनविद्यते ६ ॥
CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतेहित्वांमहाभागवासुदेवसमंयुधि सपाहिसर्वथाकर्णंयथाब्रह्मामहेश्वरं ७ यथाचस
र्वथापत्सुवार्ष्णेयःपातिपांडवं तथामद्रेश्वराद्यत्वंराधेयंप्रतिपालय ८ भीष्मोद्रोणःकृपःकर्णो
भवान्भोजश्चवीर्यवान्शकुनिःसौबलोद्रौणिरहमेवचनोबलं ९ एवमेषकृतोभागोनवधा
पृथिवीपते नचभागोत्रभीष्मस्यद्रोणस्यचमहात्मनः १० ताभ्यामतीत्यतौभागौनिहतौममशात्र
वः अष्टौहितेमहेष्वासौछलेननिहतौयुधि ११ कृत्वानसुकरंकर्मगतौस्वर्गमितोनघ तथान्ये
पुरुषव्याघ्राःपरैर्विनिहतायुधि १२ अस्मदीयाश्चबहवःस्वर्गायोपगताश्शतो त्यक्त्वाप्राणान्यथा
शक्तिचेष्टांकृत्वाचपुष्कलं १३ तदिदंहतभूयिष्ठंबलममनराधिप पूर्वमप्यल्पकैःपार्थैर्हतं
किमुतसांप्रतं १४ बलवंतोमहात्मानःकौंतेयाःसत्यविक्रमाः बलेशेषंनहन्युर्मेयथातत्कुरु
पार्थिव १५ हतवीरमिदंसैन्यंपांडवैःसमरेविभो कर्णोह्येकोमहाबाहुरस्मत्प्रियहितेरतः १६
भवांश्चपुरुषव्याघ्रसर्वलोकमहारथः शल्यकर्णोर्जुनेनाद्ययोद्धुमिच्छतिसंयुगे १७ तस्मिन्ज
याशाविपुलामद्रराजनराधिपतस्याभीशुग्रहवरोनान्योस्तिभुविकश्चन पार्थस्यसमरेकृष्णोय
थाभीशुग्रहोवरः तथात्वमपिकर्णस्यरथेभीशुग्रहोभव १९ तेनयुक्तोरणेपार्थोरक्ष्यमाणश्चपा
र्थिव यानिकर्माणिकुरुतेप्रत्यक्षाणितथैवतत २० ॥

२१ २६ २७ ज्ञातत्रायतां २८ २९ ३१ विश्रब्धंनिःशंकंयथास्यात्तथा ३२ ॥

पूर्वंनःसमरेह्येवमवधीदर्जुनोरिपून् इदानींविक्रमोह्यस्यकृष्णेनसहितस्यच २१ कृष्णेनसहि
तःपार्थोधार्त्तराष्ट्रींमहाचमूं अहन्यहनिमद्रेशद्रावयन्दृश्यतेयुधि २२ भागोवशिष्टःकर्णस्यत
वचैवमहाद्युते तंभागंसहकर्णेनयुगपन्नाशयाद्यहि २३ अरुणेनयथासार्द्धंतमःसूर्योव्यपोह
ति तथाकर्णेनसहितोजहिपार्थंमहाहवे २४ उद्यंतौचयथासूर्यौबालसूर्यसमप्रभौ कर्णशल्यौ
रणेदृष्ट्वाविद्रवंतुमहारथाः २५ सूर्यारुणौयथादृष्ट्वातमोनश्यतिमारिष तथानश्यंतुकौं
तेयाःसपंचालाःससृंजयाः २६ रथिनांप्रवरःकर्णोयंतॄणांप्रवरोभवान् संयोगोयुवयोर्लोके
नाभून्नचभविष्यति २७ यथासर्वास्ववस्थासुवार्ष्णेयःपातिपांडवं तथाभवान्परित्रातुकर्णंवै
कर्त्तनंरणे २८ त्वयासारथिनाह्येषअप्रधृष्योभविष्यति देवतानामपिरणेसशक्राणांमहीपते
किंपुनःपांडवेयानांमाविशंकीर्वचोमम २९ संजयउवाच दुर्योधनवचःश्रुत्वाशल्यःक्रोधसमा
न्वितः त्रिशिखांभ्रुकुटींकृत्वाधुन्वन्हस्तौपुनःपुनः ३० क्रोधरक्तेमहानेत्रेपरिवृत्यमहाभुजः
कुलैश्वर्यश्रुतबलैर्दृप्तःशल्योब्रवीदिदं ३१ शल्यउवाच अवमन्यसिगांधारेध्रुवंचपरिशंकसे य
न्मांब्रवीषिविस्रब्धंसारथ्यंक्रियतामिति ३२ अस्मत्तोभ्यधिकंकर्णंमन्यमानःप्रशंससि नचाहं
युधिराधेयंगणयेतुल्यमात्मनः ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ४८

३७ निधायत्वक्रतमप्रमाणमिति शेषः प्रवर्तेतत्पक्रमिति शेषः ३४ ३८ अधुरिनीचे कर्मणि ४१ पापीयसः

प्रादिश्यतामभ्यधिकोमर्मेशः पृथिवीपते नमहंसमरेजित्वमामिष्याभियथागतं ३४ अथवाप्य
करण्वाहंयोत्स्यामिकुरुनंदन पश्यवीर्यममाद्यत्वसंग्रामेदहतोरिपून् ३५ यथाभिमानंकौरव
निधायहृदयेप्रमानं अस्मद्विधः प्रवर्त्तेतमामांत्वमभिशंकिथाः ३६ पृथिवाप्यवमानोमेनकर्त
व्यःकथंचन पश्यपीनोममभुजौवज्रसंहननोपमौ ३७ धनुःपश्यचमेचित्रंपारोस्त्राशीविषो
पमान् रथंपश्यचमेक्लृप्तंसदश्वैर्वातवेगितैः ३८ गदांचपश्यगांधारेहेमपट्टविभूषितां दार्ये
यंमहींकृत्स्नांविकिरेयंचपर्वतान् ३९ शात्रवाणांसमृद्धानांतेजसास्मिनपार्थिव तेनमामेवंविधंरा
जन्नसमर्थमरिनिग्रहे ४० कस्माद्युनक्तिमार्थ्येनीचस्याधिरथेरणे नमामधुरिराजेंद्रनियोक्तु
त्वमिहार्हसि ४१ नहिपापीयसःश्रेयान्भूत्वाप्रेष्यत्वमुत्सहे योह्यभ्युपगतंप्रीत्यागरीयांसंवशे।
स्थितं ४२ वशेपापीयसोधत्तेतत्पापमधरोत्तरं ब्राह्मणाब्राह्मणाः सृष्टामुखात्क्षत्त्रंचवाहुतः
४३ ऊरुभ्यामसृजद्वैश्यान् शूद्रान्पद्भ्यामितिश्रुतिः तेभ्योवर्णविशेषाश्चप्रतिलोमानुलोमजाः
४४ अथान्योन्यस्यसंयोगाज्जातवर्णस्यभारत गोप्तारःसंग्रहीतारोदातारःक्षत्रियाःस्मृताः ४५
याजनाध्यापनैर्विप्राविशुद्धैश्चप्रतिग्रहैः लोकस्यानुग्रहार्थायस्थापिताब्राह्मणाभुवि ४६ ॥

नीचयोनेःश्रेष्ठत्वेदासत्वंकर्तव्यमितिशेषः ४२ वशेआज्ञायां अधरोत्तरंनीचोच्चयोर्वैपरीत्यकरणजमहत्ता [illegible] ४८

४० ४८ ४९ ५० ५५ ऋतमिति ऋतमेव परायणं आश्रयो येषां ते ऋतायनाः तेषां गोत्रापत्यमार्त्तायनिस्त्वं ४६
कृषिश्च पाशुपाल्यं च विशां दानं च धर्मतः ब्रह्मक्षत्रविशां शूद्रा विहिताः परिचारकाः ४७ ब्रह्मक्षत्र
स्य विहिताः सूता वै परिचारकाः न क्षत्रियो वै सूतानां शृणुयाच्च कथंचन ४८ अहं मूर्धाभिषिक्तो
हि राजर्षिकुलजो नृप महारथः समाख्यातः सेव्यः स्तुत्यश्च वंदिनां ४९ सोहमेतादृशो भूत्वा नेहा
रिबलसूदनः सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे ५० अवमानमहं प्राप्य न योत्स्यामि कथंचन
आपृच्छे त्वाद्य गांधारे गमिष्यामि गृहाय वै ५१ संजय उवाच एवमुक्त्वा महाराज शल्यः समितिशो
भनः उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ५२ प्रणयाद्बहुमानाच्च तं निगृह्य सुतस्तव अब्रवी
न्मधुरं वाक्यं साम्ना सर्वार्थसाधकं ५३ यथा शल्य विजानीषे एवमेतदसंशयं अभिप्रायस्तु मे क
श्चित्तन्निबोध जनेश्वर ५४ न कर्णोभ्यधिकस्त्वत्तो न शंके त्वां च पार्थिव न हि मद्रेश्वरो राजा कुर्या
द्यदनृतं भवेत् ५५ ऋतमेव हि पूर्वास्ते वदंति पुरुषोत्तमाः तस्मादार्तायनिः प्रोक्तो भवानिति
मतिर्मम ५६ शल्यभूतश्च शत्रूणां यस्मात्त्वं युधि मानद तस्माच्छल्यो हि ते नाम कथ्यते पृथिवीत
ले ५७ यदेतद्व्याहृतं पूर्वं भवता भूरिदक्षिण तदेव कुरु धर्मज्ञ मदर्थं यद्यदुच्यसे ५८ न च त्वत्तो हि रा
धेयो न चाहमपि वीर्यवान् वृणोहं त्वां हयाग्र्याणां यंतारमिह संयुगे ५९ ॥
मद्रेश्वरे त्वय्यत्यर्जितं शाजनता हि शौरेणात कृष्णाभिजनं च सत्यते ६२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टि॰ ५८ वाचउत्सृजेयंताः ग्रनेनतेनयाथतिभावः ९३ ९४ द्वाविंशः भूयः १ पितुःपुरतःमह्यंमम २२ तारकामयःता

मन्येचाभ्यधिकंशल्यगुणैःकर्णोधनंजयात् भवंतंवासुदेवाच्चलोकोयमितिमन्यते ९८ कर्णोह्य
भ्यधिकःपार्थादस्त्रैरेवनरर्षभ भवानभ्यधिकःकृष्णादश्वज्ञानेबलेतथा ९९ यथाश्वहृदयंवेद
वासुदेवोमहामनाः द्विगुणंत्वंतथावेत्सिमद्रराजेश्वरात्मज ९२ शल्यउवाच यन्मांब्रवीषिगां
धारेमध्येसैन्यस्यकौरव विशिष्टंदेवकीपुत्रात्प्रीतिमानस्म्यहंत्वयि ९३ एषसारथ्यमातिष्ठे
येयस्ययशस्विनः युध्यतःपांडवाग्र्येणयथात्वंवीरमन्यसे ९४ समयश्चहिमेवीरकश्चिद्वैक
र्तनंप्रति उत्सृजेयंयथाश्रद्धमहंवाचोस्यसंनिधौ ९५ संजयउवाच तथेतिराजन्पुत्रस्तेसह
कर्णेनभारत अब्रवीन्मद्रराजस्यमतंभरतसत्तम ९६ इतिश्रीकर्णपर्वणि २२८ दुर्योधनउ
वाच भूयएवतुमेद्यशृणुत्वंवसामितच्छृणु यथापुरावृत्तमिदंयुद्धेदेवासुरेविभो १ यदुक्तवान्
पितुर्मह्यंमार्कंडेयोमहानृषिः तदशेषेणब्रुवतोममराजर्षिसत्तम २ निबोधमनसाचाव्यन
न्यकार्यविचारणा देवानामसुराणांचपरस्परजिगीषया ३ बभूवप्रथमोराजन्संग्रामस्तार
कामयः निर्जिताश्चतदादैत्यादैवतैरितिनःश्रुतं ४ निर्जितेषुचदैत्येषुतारकस्यसुतास्त्रयः
ताराक्षःकमलाक्षश्चविद्युन्मालीचपार्थिव ५ ॥ एकासुरएववग्राममयोरोगवस्यराभवहेतुर्यत्रस
तया ४ दमेनवाह्येंद्रियजयेनतपसाचित्तस्यैकाग्र्येण नियमेनशौचादिनासमाधिना अनुस्यानेन ५ ५८

९ वक्रस्थंश्रान्तावशांयथेष्टसंचारीत्यर्थः चक्रस्थमिवअत्रतत्रीयमितिपाठःप्रामादिकः १८ १९ ॥
तपउग्रेसमास्थायनियमेपरमेस्थिताः तपसाकर्षयामासुर्देहान्स्वान्शत्रुतापन ६ दमेनतपसा
चैवनियमेनसमाधिना तेषांपितामहःप्रीतोवरदःप्रददौवरं ७ अवध्यत्वंचतेराजन्सर्वभूतस्यस
र्वदा सहितावरयामासुःसर्वलोकपितामहं ८ तानब्रवीत्तदादेवोलोकानांप्रभुरीश्वरः नास्तिस
र्वामरत्वंवैनिवर्त्तध्वमितोसुराः ९ अन्यंवरंवृणीध्वंवैयादृशंसंप्ररोचते ततस्तेसहिताराजन्संप्र
धार्यसकृद्बहु १० सर्वलोकेश्वरंवाक्यंप्रणम्येदमथाब्रुवन् अस्मभ्यंत्ववरंदेवसंप्रयच्छपिताम
ह ११ वयंपुराणित्रीण्येवसमास्थायमहीमिमां विचरिष्यामलोकेस्मिन्त्वत्प्रसादपुरस्कृताः १२
ततोवर्षसहस्रेतुसमेष्यामःपरस्परं एकीभावंगमिष्यंतिपुराण्येतानिचानघ १३ समागता
निचैतानियोहन्याद्भगवंस्तदा एकेषुणादेववरःसनोमृत्युर्भविष्यति १४ एवमस्त्वितितान्दे
वःप्रत्युक्त्वाप्राविशद्दिवं तेतुलब्धवराःप्रीताःसंप्रधार्यपरस्परं १५ पुरत्रयविसृष्ट्यर्थंमयंवव्रु
र्महासुरं विश्वकर्माणमजरंदैत्यदानवपूजितं १६ ततोमयःस्वतपसाचक्रेधीमान्पुराणि
च त्रीणिकांचनमेकंवैरौप्यंकार्ष्णायसंतथा १७ कांचनंदिवितत्रासीदंतरिक्षेचराजतं आ
यसंचाभवद्भौमंतत्रीयंपृथिवीपते १८ एकैकंयोजनशतंविस्तारायामतःसमं गृहाट्टाल
कसंयुक्तंबृहत्प्राकारतोरणं १९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कं.टी. २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४

९०

रथ्यप्रवरसंबाधमसंबाधमहापथं प्रासादैर्विविधैश्चापिहर्म्यैश्चैवोपशोभितं २० पुरेषुचाभवन्रा
जन्राजानोवैरथ्यक्रथ्यक् कांचनंतारकाख्यस्यचित्रमासीन्महात्मनः २१ राजतंकमलाक्षस्य
विद्युन्मालिनआयसं त्रयस्तेदैत्यराजानस्त्रींल्लोकानस्वतेजसा २२ आक्रम्यतस्थुर्हत्वाश्चकश्चना
सप्रजापतिः तेषांदानवमुख्यानांप्रयुतान्यर्बुदानिच २३ कोट्यश्चाप्रतिवीराणांसमाजग्मुस्त
तस्ततः मांसाशिनःसुदृप्ताश्चसुरैर्विनिकृताःपुरा २४ महदैश्वर्यमिच्छंतस्त्रिपुरंदुर्गमाश्रि
ताः सर्वेषांचपुनस्तेषांसर्वयोगावहोमयः २५ तमाश्रित्यहितेसर्वेवर्तयंतेकुतोभयाः यो
हियन्मनसाकामंदध्यौत्रिपुरसंश्रयः २६ तस्मैकामंमयस्तंतंविदधेमाययातदा तारकात्
सुतोवीरोहरिर्नाममहाबलः २७ तपस्तेपेपरमकंयेनातुष्यत्पितामहः संतुष्टमवृणोद्दे
वंवापीभवतुनःपुरे २८ शस्त्रैर्विनिहतायत्रक्षिप्ताःस्युर्बलवत्तराः सतुलब्ध्वावरंवीरस्ता
रकाख्यसुतोहरिः २९ ससृजेतत्रवापींतांमृतानांजीवनींप्रभो येनरूपेणदैत्यस्तुयेनवेषे
णचैवह ३० मृतस्तस्यांपरिक्षिप्तस्तादृशेनैवजज्ञिवान् तांप्राप्यतेपुनस्तांस्तुलोकान्सर्वा
न्बबाधिरे ३१ ॥ ॥

९०

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४४ अदित्यादेवाः ४५ ॥

महतातपसासिद्धाःसुराणांभयवर्धनाः नतेषामभवद्राजन्तयोयुद्धेकदाचन ३२ ततस्तेलोभ
मोहाभ्यामभिभूताविचेतसः निर्ह्रीकाःसंस्थिताःसर्वेस्थापिताःसमलूलुपन् ३३ विद्राव्यसग
णान्देवांस्तत्रतत्रतदातयः विचेरुःस्वेनकामेनवरदानेनदर्पिताः ३४ देवोद्यानानिसर्वाणिप्रि
याणिचदिवौकसां ऋषीणामाश्रमान्पुण्यान्रम्याञ्जनपदांस्तथा ३५ अनाशयंतमर्यादादान
वाडुष्टचारिणः पीड्यमानेषुलोकेषुततःशक्रोमरुद्वृतः ३६ पुराण्यायोधयांचक्रेवज्रपाणिःस
मंततः नाशकज्ज्ञान्यभेद्यानियदाभेत्तुंपुरंदरः ३७ पुराणिवरदत्तानिधात्रातेननराधिप तदा
भीतःसुरपतिर्मुक्त्वातानिपुराण्यथ ३८ तैरेवविबुधैःसार्द्धंपितामहमरिंदम जगामाथतदा
ख्यातंविप्रकारंसुरेतरैः ३९ तेतत्वंसर्वमाख्यायशिरोभिःसंप्रणम्यच वधोपायमपृच्छंतभग
वंतंपितामहं ४० श्रुत्वातद्भगवान्देवोदेवानिदमुवाचह ममापिसोपराध्नोतियोयुष्माकम
सौम्यकृत् ४१ असुराहिदुरात्मानःसर्वएवसुरद्विषः अपराध्यंतिसततंयेयुष्मान्पीडयंत्युत
४२ अहंहितुल्यःसर्वेषांभूतानांनात्रसंशयः अधार्मिकास्तुहंतव्याइतिमेव्रतमाहितं ४३ ए
केषुणाविभेद्यानितानिदुर्गाणिनान्यथा नचस्थाणुमृतेशक्तोभेत्तुमेकेषुणापुरः ४४ ते
यूयंस्थाणुमीशानंजिष्णुमक्लिष्टकारिणं योद्धारंवृणुतादित्याःसतान्हंतासुरेतरान् ४५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कु॰टी॰ ४७ उपासिभिःस्तोत्रीभिःआत्तंयात्तंआत्मनाअनौपाधिकेन ४८ आत्मनःमनसःयोगंसर्ववृत्तिनिरोधंसांख्यंसम्यक्
ख्यापनंआत्मनोजडवर्गात्पृथक्करणंआत्मामनःवश्येआत्तायाः ४९ ५० भगवंतंषाड्गुण्यैश्वर्यवंतंएकम्
४९ चिंतेतंयथायथोपासतइतिश्रुतेर्यथाभावनंशिवविष्णुरुद्रादिवेषेणनानारूपंप्रकल्पयन् आत्मनः।

इतितस्यवचःश्रुत्वादेवाःशक्रपुरोगमाः ब्रह्माणमग्रतःकृत्वाहृषीकेशपरायणाः ४६ तपोनि
यममास्थायपरंतेब्रह्मशाश्वतं ऋषिभिःसहधर्मज्ञाभवसर्वात्मनागताः ४७ तष्टुवुर्वाग्भिर
ग्र्याभिर्भयेष्वभयदंनृप सर्वात्मानंमहात्मानंयेनाप्तंसर्वमात्मना ४८ तपोविशेषैर्विविधैर्यो
गंयोवेदचात्मनः यःसांख्यमात्मनोवेत्तियस्यचात्मावशेसदा ४९ तेतेददृशुरीशानंतेजोराशि
मुमापतिं अनन्यसदृशंलोकेभगवंतमकल्मषं ५० एकंचभगवंतंतेनानारूपमकल्पयन्
आत्मनःप्रतिरूपाणिरूपाण्यथमहात्मनि ५१ परस्परस्यचापश्यन्सर्वेपरमविस्मिताः सर्व
भूतमयंदृष्ट्वातमजंजगतःपतिं ५२ देवाब्रह्मर्षयश्चैवशिरोभिर्धरणींगताः तानब्रवीत्तदा
देवानभ्यर्च्यसमस्त्यांप्यचशंकरः ५३ ॥

चितस्यप्रतिरूपाणिसंकल्पानुसारीणिप्रतिबिंबानिवापरस्
परस्यचेतिईश्वरस्यस्वरूपेसर्वेआत्मानंपरोक्ष्यापश्यन्नितिसार्धश्लोकः ५१ ५२ ५३ ॥ ४९

५५ ईड्यते ईड्यमानाय ५६ कृशनाय हिंस्राय भजस्व इष्टैः कामैः शरणं त्वामेतत्प्रयागं कृत ५८ ५९ ६०·६१

ब्रूत ब्रूतेति भगवान्स्मयमानोऽभ्यभाषत त्र्यंबकेणाभ्यनुज्ञातास्ततस्ते स्वस्थचेतसः ५४ नमोनमो
नमस्तेऽस्तु प्रभो इत्यब्रुवन्वचः नमो देवाधिदेवाय धन्विने वनमालिने ५५ प्रजापतिमखघ्नाय प्र
जापतिभिरीड्यसे नमस्तुताय स्तुत्याय स्तूयमानाय शंभवे ५६ विलोहिताय रुद्राय नीलग्रीवा
य शूलिने अमोघाय मृगाक्षाय प्रमाय कृशनाय च ५७ अर्हाय चैव शुद्धाय क्षयाय क्रथनाय च
दुर्वारणाय काथाय ब्रह्मणे ब्रह्मचारिणे ५८ ईशानायाप्रमेयाय नियंत्रे चर्मवाससे तपोरता
य पिंगाय व्रतिने कृत्तिवाससे ५९ कुमारपित्रे त्र्यक्षाय प्रवरायुधधारिणे प्रपन्नार्तिविनाशाय ब्र
ह्मद्विट्संघघातिने ६० वनस्पतीनां पतये नराणां पतये नमः गवां च पतये नित्यं यज्ञानां प
तये नमः ६१ नमोस्तु ते ससैन्याय त्र्यंबकायामितौजसे मनोवाक्कर्मभिर्देव त्वां प्रपन्नान्भ
जस्व नः ६२ ततः प्रसन्नो भगवान्स्वागतेनाभिनंद्य च प्रोवाच ब्रूत वस्त्रासो मा ब्रूत किं करवाणि
वः ६३ इति कर्णपर्वणि ४५ दुर्योधन उवाच पितृदेवर्षिसंघेभ्यो भये दत्ते महात्मना स
त्कृत्य शंकरं प्राह ब्रह्मा लोकहितं वचः १ तवातिसर्गाद्देवेश प्राजापत्यमिदं पदं मयाधितिष्ठ
ता दत्तो दानवेभ्यो महान्वरः २॥

६२ ६३ त्रयस्त्रिंशः पितामहभयेऽस्मिन्नछेदः १ कस्ये निमित्रि प्रत्यरिः प्रतिकूलः शत्रुः २ ॥ ३३

कै.टी. २४ येधतग्रवर्धततेप्रसिद्धावयंशरणंगताः त्वामितिशेषः ४९ संहतास्तकीभूताः पूर्वं ७ तेषांते

८२

ताननतिक्रांतमर्यादान्न्नाम्नः संहर्तुमर्हति त्वामृते भूतभव्येश त्वं ह्येषां प्रत्यरिर्विधे ३ सर्वदेवप्रप
न्नानां पापचेतां च दिवौकसां कुरु प्रसादं देवेश दानवान् जहि शंकरः ४ त्वत्प्रसादाज्जगत्सर्वं सु
खमैधत मानद शरणागवत्त्वं हि लोके शतेवयं शरणं गताः ५ स्थाणुरुवाच हंतव्याः शत्रवः स
र्वेयुष्माकमिति मे मतिः न त्वेक उत्सहे हंतुं बलस्था हि सुरद्विषः ६ ते यूयं सहिताः सर्वे मदी
येनार्द्धतेजसा जयध्वं युधि तान् शत्रून् संघातो हि महाबलः ७ देवा ऊचुः अस्मत्तेजो बलं या
वत्तावद्विगुणमाहवे तेषामिति हि मन्यामो दृष्टतेजो बला हि ते ८ श्रीभगवानुवाच वध्या
स्ते सर्वतः पापा ये युष्मास्वपराधिनः मम तेजो बलार्द्धेन सर्वान्निघ्नत शात्रवान् ९ देवा ऊचुः
विभर्तुं भवतोर्द्धं तन् शक्ष्यामो महेश्वर सर्वेषां नो बलार्द्धेन त्वमेव जहि शात्रवान् १० श्रीभगवा
नुवाच यदि शक्तिर्न वः काचिद्बिभर्तुं मामकं बलं अहमेतान् निहन्मि युष्मत्तेजोर्द्धबृंहितः ११
ततस्तथेति देवेशास्तेनरुक्ता राजसत्तम अर्द्धमादाय सर्वेषां तेजसाभ्यधिकोभवत् १२ ॥

जोस्मत्तेजसो हि द्विगुणं दृष्टमेवेत्यर्थः ८ ११ अर्द्धतेजसः १२ ॥ ११ ॥ ८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ महतासर्व्वाभिशयिनाबलेनदीप्यतिप्रकाशनेइतिमहादेवः १४ मूर्त्तीस्तेजोमात्राः समाधायप्रकीर्त्तिताः १६ वि
हितेश्च पूर्व्वं स्थापितेयथानथैवविश्वकर्मणाकृते १७ शृंगंशृंगाकारवेदिकापुष्करकारं भल्लः पाल्यः कुश
लस्तस्याग्रभागस्त्वेवतीक्ष्णभागः सोमः शाल्योविस्तरेजननमितिश्रुतेः १८ १९ अतस्तस्याधारदंडः स्तेजो

सतदेवोबलेनासीत्सर्व्वेभ्योबलवत्तरः महादेवइतिख्यातस्ततः प्रभृतिशंकरः १३ ततोब्रवीन्म
हादेवोधनुर्बाणधरोह्यहं हनिष्यामिरथेनाजौतान्निशून्वादिवौकसः १४ तेयूयंमेरथंचैवधनु
र्बाणांस्तथैवच पश्यध्वंयावदद्यैतान्पातयामिमहीतले १५ देवाऊचुः मूर्त्तीः सर्व्वाः समाधा
यत्रैलोक्यस्यततस्ततः रथंतेकल्पयिष्यामोदेवेश्वरसुवर्चसं १६ तथैवबुध्याविहितंविश्व
कर्मकृतंशुभं ततोविबुधश्रेष्ठाईलासंरथंसमकल्पयन् १७ विष्णुंसोमंहुताशंचतस्येषुंसम
कल्पयन् शृंगमग्निर्बभूवास्यभल्लः सोमोविशांपते १८ कुड्मलश्चाभवद्विष्णुस्तस्मिन्निषु
वरेतदा रथंचवसुंधरांदेवींविशालपुरमालिनीं १९ सपर्वतवनद्वीपांचक्रुर्भूतधरांतदा मेरु
ः पर्वतस्त्वासीत्तेजंगास्तस्यमहानदी २० दिशश्चप्रदिशश्चैवपरिवारोरथस्यतु ईषानक्षत्रवंशाश्चयु
गः कृतयुगोभवत् २१ कूवरश्चरथस्यासीद्वासुकिर्भुजगोत्तमः अपस्करमधिष्ठानेहिमवान्विंध्य
पर्वतः २२ ॥

एतदाधारकाष्ठंमहानदीगंगा ईषायुगाल्पसंधानेत्रिवेणमयंकाष्ठं युगः धुर्ययोजनदंडः २० कूबरः युगं
धरः २१ अपस्करपश्चात्काष्ठंभुजगोत्तमः शेषः अधिष्ठानेचक्रेचक्राधारौ अधिष्ठानेपुरेवकेप्रभावेधास्तते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
२२

यंत्रेबंधनपाशसमुदायः समुद्रः जलमयत्वेनचिक्कणत्वात् पीसकरंचकरत्वादि सिंधुर्यमुनाख्यानदीतिर
भिस्त्रिवेणस्थानीयाभिः सहितमाकाशपुरं धूर्नगः उपस्करः बंधादिसामग्रीग्रनुकर्षः रथाधःस्थितदारु वरू
थंरथगुप्तिः २५ धर्मादयस्त्रिवेणसहस्राणिवधुरंरथतलं २६ सर्वैहिमवद्विंध्यपर्वतौचक्रत्वेनोक्तौग्रत्रसर्यचंद्र

उदयास्तावधिष्ठानेगिरीचक्रः सरोत्तमाः २२ समुद्रमत्तमसर्जन्दानवालयमत्तमे सप्तर्षिमंडले
वैवरथस्यासीत्परिष्कुरः २३ गंगासरस्वतीसिंधुर्धुरमाकाशमेवच उपस्करोरथस्यासन्नापः स
र्वाश्चनिम्नगाः २४ ग्रहोरात्राः कलाश्चैवकाष्ठाश्चऋतवस्तथा ग्रनुकर्षंग्रहादीप्तावरूथंचापि
तारकाः २५ धर्मार्थकामसंयुक्तंत्रिवेणंदारुबंधनं ग्रोषधीर्वीरुधश्चैववंधुराः पुष्पफलोपगाः
२६ सूर्याचंद्रमसौकृत्वाचक्रेरथवरोत्तमे पक्षौपूर्वापरौतत्रकृतेरात्र्यहनीशुभे २७ दशनागप
तीनीषांधृतराष्ट्रमुखांस्तदा योक्त्राणिचक्रुर्नागांश्चनिःश्वसंतोमहोरगान् २८ द्यांयुगंयुगचर्मा
णि संवर्तकबलाहकान् कालपृष्ठोथनहुषः कर्कोटकधनंजयौ २९ इतरेचाभवन्नागाह
यानांबालबंधनाः दिशश्चप्रदिशश्चैवरश्मयोरथवाजिनां ३० संध्यांधृतिंचमेधांचस्थिति
संनतिमेवच ग्रहनक्षत्रताराभिश्चर्मचित्रंनभस्तलं ३१ ॥ चक्रत्वेनदृष्टावतश्चतस्मैकोर
थइतिगम्यते ग्रतः समुद्रोप्यस्तोत्रमितिकृज्जरेवार्थः पूर्वः पक्षः पूर्वांगंरात्रिः ग्रपरः पक्षोपरां
गेग्रहः २७ २८ द्यांहितीयंयुगेचवत्तश्चकृत्वाद्धस्य संवर्तकवलाहकान् युगचर्माणि
धुर्यस्कंधयुगमध्योत्तंतस्थानिकृषिपृष्ठानि २९ वालबंधनाश्चकेसरबंधनाः ३० नभस्तलंचर्म

२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रथस्य वाह्यमावर्त्मानं तच्च संध्यादिभिर्ग्रहादिभिश्च चित्रं ११ सिनीवालीं पूर्वाममावास्यां अनुमतिं पूर्वां पौर्ण
मासीं कुहूं उत्तराममावास्यां राकां उत्तरां पौर्णमासीं १२ रोहकान् सिनीवाल्याद्यधिष्ठान् मित्रादीन् कंटकान् अ
णकीलकान् धर्मादयस्तत्र कंटकेषु रश्मयः १३ मनः अधिष्ठानं रथ्या धारभं मनोमयो रथस्तस्यार्थः १

सुरां बुध्येत विज्ञानोपतीन्लोके ख्यातान् सिनीवालीमनुमतिं कुहूं राकां च सुव्रतो ४३ योक्त्रा
णि चक्रुर्वाहानां रोहकांस्तत्र कंटकान् धर्मः सत्यं तपोर्थश्च विहितास्तत्र रश्मयः अधिष्ठानं मन
आसीत्परिरथ्या सरस्वती नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः ४४ विद्युदिंद्रधनुर्नद्धं र
थं दीप्तं दीपयन् वषट्कारः प्रतोदोभूद्गायत्री शीर्षबंधना ४५ यो यज्ञे विहितः पूर्वमीशा
नस्य महात्मनः संवत्सरो धनुस्तद्वै सावित्री ज्या महास्वना ४६ दिव्यं च वर्म विहितं महार्हं रत्नभू
षितं अभेद्यं विरजस्कं वै कालचक्रबहिष्कृतं ४७ ध्वजयष्टिरभून्मेरुः श्रीमान्कनकपर्वतः पता
काश्चाभवन्मेघास्तडिद्भिः समलंकृताः ४८ रेजुरध्वर्युमध्यस्था ज्वलंत इव पावकाः कॢप्तं तं तु
रथं दृष्ट्वा विस्मिता देवताभवन् ४९ सर्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष युक्तं निवेदया
मासुर्देवास्तस्मै महात्मने ५० ॥

परिरथ्या प्रचारमार्गः सरस्वती वाग्देवी मनः कल्पितः प्राकृमात्रशरीरस्तस्यार्थः ४४ ४५ ४६ ४७ ४८
अध्वर्यूणां मृत्विजां मध्ये स्थिताः पावकाः धिष्ण्यगाः ४९ ५० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. ९४

४१ गोवृषं ध्वजत्वेन स्थापयामास ४२ परिस्कंदाः पार्श्वगोपाः ४३ ४४ ४६ छायां सर्वो ऽक्रामाविद्धीं शाव
ब्रह्मरूपतात्मनस्तत्त्वा ४७ ४८ ४९ धनुर्ज्या कालरात्रिरूपा तस्याः संस्पर्शं न विषेहुः न सेहिरे सुराः

एवं तस्मिन्महाराज कल्पिते रथसत्तमे दैवैर्मनुजशार्दूल द्विषतामभिमर्दने ४१ स्वान्यायुधा
नि मुख्यानि न्यदधाच्छंकरो रथे ध्वजयष्टिं वियत्कृत्वा स्थापयामास गोवृषं ४२ ब्रह्मदंडः का
लदंडो रुद्रदंडस्तथा ज्वरः परिस्कंदा रथस्यास्य सर्वतो दिशमुद्यताः ४३ अथर्वांगिरसावास्तां
चक्ररक्षौ महात्मनः ऋग्वेदः सामवेदश्च पुराणं च पुरःसराः ४४ इतिहासयजुर्वेदौ पृष्ठरक्षौ
बभूवतुः दिव्या वाचश्च विद्याश्च परिपार्श्वचराः स्थिताः ४५ स्तोत्रादयश्च राजेंद्र वषट्कार
स्तथैव च ओंकारश्च मुखे राजन्नतिशोभाकरो ऽभवत् ४६ विचित्रमृतुभिः षड्भिः कृत्वा संव
त्सरं धनुः छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयां रणे ४७ कालो हि भगवान्रुद्रस्तस्य संवत्सरो ध
नुः तस्माद्रौद्री कालरात्रिर्ज्या कृता धनुषो ऽजरा ४८ इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोम एव
च अग्नीषोमौ जगत्कृत्स्नं वैष्णवं चोच्यते जगत् ४९ विष्णुश्चात्मा भगवतो भवस्यामिततेज
सः तस्माद्धनुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते ५० तस्मिन्शरे तिग्ममन्युर्मुमोचासह्यमीश्वरः
भृग्वंगिरोमन्युभवं क्रोधाग्निमतिदुःसहं ५१॥

५० तिग्ममन्युं तीक्ष्णसंकल्पं ५१ ॥ ९

९४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अभयमिति छेदः संधिरार्षः ५२ ५३ तैः स्वादिभूतैः आत्मगुणैः आत्मनो भोक्तृगुणाभूतैर्भोगैः ५४ बाणमारा
सनीललोहितो धूम्रः कृत्तिवासा भयंकरः आदित्यायुतसंकाशस्तेजोज्वालावृतो ज्वलन् ५२ दुश्चाव
चावनो जेता हन्ता ब्रह्मद्विषां हरः नित्यं त्राता च हन्ता च धर्माधर्माश्रितान्नरान् ५३ प्रमाथिभिर्भीमब
लैर्भीमरूपैर्मनोजवैः विभाति भगवान् स्थाणुस्तैरेवात्मगुणैर्वृतः ५४ तस्यांगानि समाश्रित्य स्थि
तं विश्वमिदं जगत् जंगमाजंगमं राजन् शुशुभेद्भुतदर्शनं ५५ दृष्ट्वा तु तं रथं युक्तं कवची सशर
रुद्र ५ बाणासनी बाणमादाय तद्दिव्यं सोमवि[illegible]ग्निसंभवं ५६ तस्य राजंस्तदा देवाः कल्पयांचक्रिरे प्रभो पु
ण्यगंधवहं राजन् श्वसनं देवसत्तम ५७ तमास्थाय महादेवस्त्रासयन् देवतान्यपि आरुरोह तदा य
त्तः कंपयन्निव मेदिनीं ५८ तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः गंधर्वा देवसंघाश्च तथैवाप्स
रसां गणाः ब्रह्मर्षिभिः स्तूयमानो वंद्यमानश्च वंदिभिः तथैवाप्सरसां संघैर्नृत्यद्भिर्नृत्यकोविदैः
५९ सशोभमानो वरदः खड्गी बाणी शरासनी हसन्निवाब्रवीद्देवान् सारथिः को भविष्यति ६० तम
ब्रुवन् देवगणा यं भवान् संनियोक्ष्यते स भविष्यति देवेश सारथिस्तेन संशयः ६१ तानब्रवीत् पुन
र्देवो मत्तः श्रेष्ठतरो हि यः तं सारथिं कुरुध्वं मे स्वयं संचिंत्य माचिरं ६२ ॥

यस्थितं तं रथं दृष्ट्वा देवास्तस्यानुकूलं नयावहं श्वसनं कल्पयांचक्रिरे इत्यन्वयः ५५ ५६ ५७ ५८ ५९ ६० ६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

का॰ही॰ ९३ ९४ ९५ ९६ ९७ ९८ ९९ १०० १०१ १०२ १०३ १०४ ॥

८८

मवाक्ताबपरीतचेताः सूतोपधावाप्तमिदंतवास्त्रंनकर्मकालेप्रतिभास्यतित्वा ८
चनिमित्तं कर्मकालेस्वप्रतिज्ञातरणकाले ८ ॥ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पर्याप्तंसमाप्तंविस्तृतमित्यर्थः ९ अस्त्रंततोरामदत्तादन्यत्प्रतिपन्नंप्राप्तंअहिबाणाख्यमित्यर्थः १० ११
अन्यच्चतस्मात्तववमस्तुकालाद्ब्राह्मणोब्रह्मनहिध्रुवंस्यात् नरस्यपर्याप्तमतीवचास्त्रमस्मिन्सं
ग्रामेतमुलेतीवभीमे ९ योयंशल्यभरतेश्रुपपन्नःप्रकर्षणःसर्वहरोतिभीमः सोभिमन्येतत्रिया
णांप्रवीरान्त्रतापितान्बलवान्सेविमर्दः १० शल्योग्रधन्वानमहंवरिष्ठंतरस्विनंभीममसह्यवीर्यं
सत्यप्रतिज्ञंयुधिपांडवेयंधनंजयंमस्समुत्वेनयिष्ये ११ अस्त्रंहिमेतत्प्रतिपन्नमद्ययेनस्मेषस
मेत्यशत्रुशृगान् प्रतापिनंबलवंतंकृतास्त्रंतमुग्रधन्वानममितौजसंच १२ क्रूरंमहारौद्रममित्र
साहंधनंजयंसंयुगेहंहनिष्ये अपांपतिर्वेगवानप्रमेयोनिमज्जयिष्यन्बहुलाःप्रजाश्च १३ म
हावेगंसंकुरुतेसमुद्रोवेलाचैनंधारयत्यप्रमेयं प्रमुंचंतंबाणसंघानमेयान्मर्मच्छिदोवीर
हणःसुपत्रान् १४ कुंतीपुत्रंयत्रयोत्स्यामियुद्धेज्याकर्षतामुत्तममद्यलोके एवंबलेनाति
बलंमहास्त्रंसमुद्रकल्पंसुदुरापमुग्रं १५ शरौघिणींपार्थिवान्मज्जयंतंवेलेवपार्थमिषुभिः
संसहिष्ये अद्याहवेयस्यनतुल्यमन्यंमन्येमनुष्यंधनुरादधानं १६ सुरासुरान्वैयुधियोजये
ततेनाद्यमेपश्यपुद्धंसुघोरं अतीवमानीपांडवोयुद्धकामोह्यमानुषैरेष्यतिमेमहास्त्रैः १७
तस्यास्त्रमस्त्रैःप्रतिहत्यसंख्येबाणोत्तमैःपातयिष्यामिपार्थं सहस्ररश्मिप्रतिमंज्वलंतंदिश
श्चसर्वाःप्रतपंतमुग्रं १८ ॥ १४ १५ १६ मेमोप्रतिपश्यति १७ १८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्वेतरथसर्तसैः १९ २० २१ २२ प्रश्नेयांडवदाहे २३ २४ २५ २६ २७ २८ ॥

तमोनुदं मेघइवातिमात्रं धनंजयं छादयिष्यामि बाणैः वैश्वानरं धूमशिखं ज्वलंतं तेजस्विनं लोक
मिमं दहंतं १९ पर्जन्यभूतः शरवर्षैर्यथाग्निं तथा पार्थं शमयिष्यामि युद्धे प्रमाथिनं बलवंतं प्रहा
रिणं प्रभंजनं मातरिश्वानमुग्रं २० युद्धे सहिष्ये हिमवानिवाचलो धनंजयं क्रुद्धममृष्यमाणं वि
शारदं रथमार्गेषु शक्तं धुर्यं नित्यं समरेषु प्रवीरं २१ लोके वरं सर्वधनुर्धराणां धनंजयं संयुगे सं
सहिष्ये अद्याहवे यस्य न तुल्यमन्यं मन्ये मनुष्यं धनुराददानं २२ सर्वामिमां यः पृथिवीं विजिग्ये
तेन प्रयोद्धास्मि समेत्य संख्ये यः सर्वभूतानि सदैवकानि प्रस्थेजयत्पांडवः सव्यसाची २३ को
जीवितं रक्षमाणो हि तेन युध्येत मानुषो मामृते न्यः मानीकृतास्त्रः कृतहस्तयोगो दिव्या
स्त्रविच्छ्वेतहयः प्रमाथी २४ तस्याहमद्यातिरथस्य कायाच्छिरो हरिष्यामि शितैः पृषत्कैः
योत्स्याम्येनं शल्य धनंजयं वै मृत्युं पुरस्कृत्य रणे जयं वा २५ अन्यो हि न ह्येकरथेन मर्त्यो युध्ये
त यः पांडवमिंद्रकल्पं तमाहवे पौरुषं पांडवस्य ब्रूयां हृष्टः समितौ त्रियाणां २६ किं त्वं मू
र्खः प्रसभं मम त्वं वक्ता ममावोचः पौरुषं फाल्गुनस्य अप्रियो यः पुरुषो निष्ठुरो हि क्षुद्रः क्षेप्तात्क्षमि
णश्चातमावान् २७ हन्यामहं तादृशानां शतानि क्षमाम्यहं त्वं मया कालयोगात् अवोच स्त्वं पा
ण्डवार्थे प्रियाणि प्रधर्षयन्मां मूढवत्पापकर्मन् २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
८५

मार्जवेकर्त्तयेमति ४९ अहंसिद्धिंकांक्षमाणोस्मि नेत्तु तन्मम्यसेयत्रवे कांक्षंमत्स्वंनास्ति अस्मत्प्रतीयोप्य
न्यत्रस्तेहवान सीत्यर्थः तदेवाह मित्रमिति मिंदयति मेदयति वा स्नेहार्थान्मिंदे र्मिदेर्वा मित्रमिति रू
पं नेदतेरित्यत्रमदतेरिति पाठः मरीहर्षेऽस्मस्यवारूपं मादयति तर्पयतीति वा मारयते र्मित्रं मिदते
स्त्राणार्थस्य वा मिदेरिदंरूपं नंदयतेः प्रीतयतेः संत्रायते र्वा धर्यो वर्त्तमानस्य मिदे र्मित्रमिति वार्थः मित्र
तेमान्नेकरोतिसर्वहितमस्य संगरक्षातीतिवामोदतेस्य सुखेनेतिवा मित्रमिस्यतेर्थाः मयिसतीत्यर्थः

मयार्जवे जिह्नमतिर्हितस्त्वं मित्रद्रोही मान्नपदं हिमेत्वं कालस्त्वयं त्वमपयाति दारुणो दुर्योध
नो गुरुमुपागमत् ४९ अस्यार्थसिद्धिं त्वभिकांक्षमाणास्त्वन्मन्यसे यत्र नैकांत्यमस्ति मित्रे
मिदेर्नंदतेः प्रीयतेर्वा संत्रायते र्मिनुतेर्मोदतेर्वा ५० ब्रवीमि ते सर्वमिदं ममास्ति तच्चापि सर्व
ममवेत्ति राजा प्रातुः शादेः शासते र्वा शपते र्वा स्रणाते र्वा स्वसतेः सीदते र्वा ५१ उपसर्गाद्दृष्ट्वा
सदतेश्च प्रायेण सर्वं त्वयि तच्च मह्यं दुर्योधनार्थेन वच प्रियार्थं यशोर्थं मात्मार्थं मपीश्वरार्थं ५२

५० प्रातुरिति शादेः शातनार्थात् शास्तेः शासनार्थात् शपतेः तन्करणार्थात् स्रणाते र्हिंसार्थात् स्वस
ते रुच्छ्वासार्थात् दंतर्भावितण्यर्थात् सीदतेः सदते र्वा दंत्यस्थाने तालव्यसोपसर्जनात् शत्रुरिति शाद्रु
त्वन्मस्त दर्थेश्च सर्वं त्वय्यस्तीत्यर्थः ५१ दुर्योधनस्य तव मम च प्रीति र्जयलाभेन यशस्य प्राप्ति
र्गाणामविस्मरणीति स्वधर्माचरणेनेत्यर्थः ५२ ॥ ८५

अस्त्राणीति कालेसूं न प्रतिभास्यतीति पूर्वमुक्तापि ग्रावेशात्तस्य विद्यमानमस्त्रसंपदमभिप्रेत्याह ब्राह्मा
णि ब्रह्मशिरआदीनि दिव्यानि ऐंद्रवारुणगांधर्वादीनि भौमानि दिव्यधनुरादीनि ३२ अस्त्रमिति यत
तस्मादहं पांडववासुदेवौ योत्स्ये यत्नात्कर्मतत्प्रथमेषु अस्त्राणि पप्पाद्यममोत्तमानि ब्राह्माणि
दिव्यान्यथ मानुषाणि ३३ आसादयिष्याम्यहमुग्रवीर्यं द्विपो द्विपं मत्तमिवातिमत्तः अस्त्रं ब्राह्मं
द्य३ मनसा तत् [illegible] जयं तेभ्यो पार्थाय प्रमेयं जयाय ३४ तेनापि मे नैव मुच्येत युद्धे न चेत्पतेद्विषमे मे
ऽद्य चक्रं वैवस्वताद्दंडहस्ताद्वरुणाद्वापि पाशिनः ३५ सगदाद्वा धनपतेः सवज्राद्वापि वासवा
त् अन्यस्मादपि कस्माच्चिदमित्रादाततायिनः ३६ इति शल्य विजानीहि यथा नाहं बिभेम्यतः
तस्मान्न मे भयं पार्थान्नापि चैव जनार्दनात् ३७ सहयुद्धं हि मे ताभ्यां सांपरायेभविष्यति क
दाचिद्विजयस्याहमस्त्रहेतोरटं नृप ३८ अज्ञानाद्धि लिपन्बाणान्घोररूपान्भयानकान् होम
धेन्वा वत्समस्य प्रमत्तः पुरुणाहतं ३९ चरंतं विजने शल्य ततोनुव्याजहार मां यस्मात्त्वया प्र
मत्तेन होमधेन्वा हतः सुतः ४० स्वभ्रे ते पततां चक्रमिति मां ब्राह्मणोब्रवीत् युध्यमानस्य
संग्रामे प्राप्तस्यैकायनं भयं ४१ तस्माद्बिभेमि बलवद्ब्राह्मणव्याहृतादहं एते हि सोमराजा
न ईश्वराः सुखदुःखयोः ४२ ॥ यदि हि प्रसिद्धं देवस्य न हि नैव मुच्येत शत्रुः पर्यंतयदि वक्रं वि
षमे न पतेदित्यन्वयमिति हि तीयो रोषो रदर्शितः ३४ ३८ अस्त्रं नहतवानस्मि ३९ ४० ४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ ४२ ५९ समान्नुद्दिशाप्यमनुभवस्वेत्यर्थः ४९ ५० द्विचत्वारिंशः ततः अनंतरं शल्येनवक्तव्यंवचः संनिवार्यस
८८ मुदंतस्मैगोसहस्रंबलीवर्दांश्चषट्शतान् प्रसादंनलभेशल्यब्राह्मणान्मद्रकेश्वर ५३ ईषा
दंतान्सप्तशतान्दासीदासशतानिच ददतोद्विजमुख्योमे प्रसादंनचकारसः ५४ कृष्णानांश्वे
तवत्सानांसहस्राणिचतुर्दश आहरन्नलभेतस्मात्प्रसादंद्विजसत्तमात् ५५ ऋद्धंगृहंसर्व
र्वकामैर्यत्तुमेवसुकिंचन तत्सर्वमस्मैसत्कृत्यप्रयच्छामिनचेच्छति ५६ ततोब्रवीन्मांयाचं
तमपराधेप्रयत्नतः आहूतंयन्मयासूततत्तथाननतदन्यथा ५७ अनृतोक्तंप्रजाहन्यात्
तःपापमवाप्नुयो तस्माद्धर्माभिरक्षार्थंनानृतंवक्तुमुत्सहे ५८ मात्वंब्रह्मगतिंहिंस्याःप्राय
श्चित्तंकृतंत्वया मद्वाक्यंनानृतंलोकेकश्चित्कुर्यात्समामृदि ५९ इत्येनतेमयाप्रोक्तंक्षिप्तेना
पिसुहृत्तया जानामित्वांविक्षिपंतंजोषमास्वोत्तरंशृणु ६० इतिश्रीमहाभारतेकर्णपर्वणि
कर्णशल्यसंवादे ४१ ४५ संजयउवाच ततःपुनर्महाराजमद्रराजमरिंदमः अभ्यभाषतराधे
यःसंनिवार्योत्तरंवचः १ यत्वंनिदर्शनार्थंमांशल्यजल्पितवानसि नाहंशक्यस्त्वयावाचाविभी
षयितुमाहवे २ यदिमांदेवताःसर्वायोधयेयुःसवासवाः तथापिमेभयंनस्यात्किमुपार्थात्स
केशवात् ३ नाहंभीषयितुंशक्योवाङ्मात्रेणकथंचन अन्यंजानीहियःशक्यस्त्वयाभीषयितुंरणे
४ नीचस्यबलमेतावत्पारुष्यंयत्वमात्थमां अशक्तोमद्गुणान्वक्तुंवल्गसेबहुदुर्मते ५॥ ३ ४ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६ सविभावः सारथ्येनोपकारकत्वं सौहार्दं मदीयात्मा मित्रस्य दुर्योधनस्य भावः इष्टसिद्धिः हेतुरित्यर्थः
७ एतदेव त्रयं व्याचष्टे राज्ञ इत्यादिना ८ शल्यसहस्रेणाप्यहमेवास्मीत्यर्थः ९ ॥ त्रिचत्वारिंशः नन्वक

न हि कर्णः समुद्भूतो भयार्थमिह मारिष विक्रमार्थमहं जातो यशोर्थं च तथात्मनः ६ सविभावे न सौहार्दान्मित्रभावेन चैव हि कारणैस्त्रिभिरेतैस्त्वं शल्य जीवसि सांप्रतं ७ राज्ञश्च धृतराष्ट्रस्य कार्यं सुमहदुद्यतं मयि तच्चाहितं शल्य तेन जीवसि मेऽनघ ८ कृतश्च समयः पूर्वं क्षंतव्यं विप्रियं तव ऋते शल्यसहस्रेण विजयेयमहं परान् ९ मित्रद्रोहस्तु पापीयानिति जीवसि सांप्रतं १० इ तिश्रीमहाभारते कर्णपर्वणि कर्णशल्यसंवादे ४० शल्य उवाच नन्वप्रलापाः कर्णैते यान्ब्रवी षि परान्प्रति ऋते कर्णसहस्रेण शक्या जेतुं परा युधि १ संजय उवाच तथा ब्रुवंतं परुषं कर्णो मद्रा धिपं तदा परुषं द्विगुणं भूयः प्रोवाच प्रियदर्शनं २ कर्ण उवाच इदं तु मे त्वमेकाग्रः शृणु मद्रज नाधिप संनिधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतं ३ देशांश्च विविधांश्चित्रान्पूर्ववृत्तांश्च पार्थिवान् ब्राह्मणाः कथयंति स्म धृतराष्ट्रनिवेशने ४ तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः वाही कदेशं मद्रांश्च कुत्सयन्वाक्यमब्रवीत् ५ बहिष्कृता हिमवता गंगया च बहिष्कृताः सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ६ ॥

र्णसहस्रेण विनापि परे जेतुं शक्या मयेति शेषः कर्णसहस्रवत्
स्तोहमेकएवास्मीति भावः १ भूयः द्विगुणं अधिकगुणं २ ३ ४ ५ ६ ॥

पंचानांवस्समाणानांसिंधुःषष्ठीयासां अंतरमवकाशमाश्रिताः ७ गोवर्धनःगवांछेदनस्थानेसुभद्रंचत्वरं
सुराभांडस्थयमतं एतद्भयंराजकुलस्यराजगृहद्वारस्योपलक्षणं ९ वृत्तेचरित्रे १० धानाःभ्रष्टयवाः
गौड्यासवं सुराविशेषं वाट्यायवान्नवाटीहृतौचमार्गेचेतिविश्वःवाट्यंजीनान्नमाशिनःभक्षणशीलाः

पंचानांसिंधुषष्ठीनांनदीनांयेंतराश्रिताः तान्धर्मबाह्यानशुचीन्बाहीकान्परिवर्जयेत् ७ गोवर्ध
नोनामवटःसुभद्रंनामचत्वरं एतद्राजकुलद्वारमाकुमारात्स्मराम्यहं ८ कार्येणात्यर्थगूढेनबाही
केषूषितंमया ततएषांसमाचारःसंवासाद्विदितोमम ९ शाकलंनामनगरमापगानामनिम्नगा
जर्तिकानामबाहीकास्तेषांवृत्तंसुनिंदितं १० धानागौड्यासवंपीत्वागोमांसंलशुनैःसह अपूप
मांसमयानामाशिनःशीलवर्जिताः ११ गायंत्यथचनृत्यंतिस्त्रियोमत्ताविवाससः नगरागारव
प्रेषुबहिर्माल्यानुलेपनाः १२ मत्तावगीतैर्विविधैःखरोष्ट्रनिनदोपमैः अनावृतामैथुनेताःका
मचाराश्चसर्वशः १३ आहुरन्योन्यमुक्तानिप्रब्रुवाणामदोत्कटाः हेहतेहेहतेत्येवंस्वामिभर्तृ
हतेतिच १४ आक्रोशंत्यःप्रनृत्यंतिव्रात्याःपर्वस्वसंयताः तासांकिलावलिप्तानांनिवसन्कुरु
जंगले १५ कश्चिद्बाहीकदुष्टानांनातिहृष्टमनाजगौ सानूनंबृहतीगौरीसूक्ष्मकंबलवासिनी १६

११ वप्रेषुप्राकारभित्तिषु १२ अवगीतैःभगलिंगादिविगीतशब्दैः अनावृताःस्वपरपुरुषविवेकही
नाःकामचाराःयथेष्टचारिण्यः १३ उक्तानिविनोदवचनानिपर्वसुउत्सवदिनेषु आक्रोशंत्यःगालयं
त्यः हेहतेभोलिंगताडितेइत्याक्रोशोहितेमथितेच्छा दृशाःस्वामिहतेभर्तृहतेइतिचतद्वत् १४ ॥ ॥ ८७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नासांप्रतिरिति निशेषः २४ २६ २९ खरादियाने: २८ मथितेतक्रं ३१ भूयसःवकी ३२ ३५ वाहीकाद्वृषभःतस्येदंवच

मामनुस्मरतीशेतेवाहीकंकुरुजंगले शातद्रुकामहंतीर्त्वातांचरम्यामिरावतीं २७ गत्वास्वदेशंद्र
क्ष्यामिस्थूलशंखाःशुभास्त्रियः मनःशिलोज्वलापांगागौर्यस्त्रिककुदांजनाः २८ कंबलाजिनसं
वीताः क्रंदंत्यःप्रियदर्शनाः मृदंगानकशंखानांमर्दलानांचनिःस्वनैः २९ खरोष्ट्राश्वतरैश्चैव
मत्ताःयास्यामहेसुखं शमीपीलुकरीराणांवनेषुसुखवर्त्मसु ३० अपूपान्सक्तुपिंडींश्चप्राशंतोम
थितान्वितान् पथिसुप्रबलाभूत्वाकदासंपततोध्वगान् ३१ चेलापहारंकुर्वाणास्ताडयिष्याम
भूयसः एवंशीलेषुव्रात्येषुवाहीकेषुदुरात्मसु ३२ कश्चेतयानोनिवसेन्मुहूर्तमपिमानवः ई
दृशाब्राह्मणेनोक्तावाहीकामोघचारिणः ३३ येषांषड्भागहर्तात्वमुभयोःशुभपापयोः इत्युक्त्वा
ब्राह्मणःसाधुरुत्तरंपुनरुक्तवान् ३४ वाहीकेष्वविनीतेषुप्रोच्यमानंनिबोधतत् तत्रस्मराक्षसी
गातिसदाकृष्णचतुर्दशीं ३५ नगरेशाकलेस्फीतेह्याहत्यनिशिदुंदुभिं कदावाहेयिकागाथाः
पुनर्गास्यामिशाकले ३६ गव्यस्यतृप्तामांसस्यपीत्वागौडंसुरासवं गौरीभिःसहनारीभिर्बृहतीभिः
स्वलंकृता ३७ पलांडुगंडूषयुतान्खादंतीचैडकान्बहून् वाराहंकौक्कुटंमांसंगव्यंगार्दभमौष्ट्रि
\\कं ३८ ॥

पर्ववाहं ततोचिताःवाहेयिकाःगाथाःगीतिः ३६ ३७ खादंतिबलिरूपान्षडकां
मेषान्वाराहंविस्तृणाहजे ३८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
८८

शाकलाः शाकलपुरवासिनः ९ १० ११ गिरेः हिमाद्रेः १२ ब्राह्मानो उपनयनादिसंस्कारहीनानां दासमीया
नां दासमीदेशोद्भवानां दासं गृह्णंति इति मते मानयंति मैथुनार्थिमस्ताः दासम्यः तज्जानां दासमीयानां १३
ऐद्रं चयेन त्वाइंतिते तेषां जन्म निरर्थकं इति गायंति ये मत्ताः सीधुना शाकलाश्रये १४ स बालवृद्धाः
कंदंत स्तेषु धर्मः कथं भवेत् इति शल्य विजानीहि हंत भूयो ब्रवीमि ते १० यदन्यो पुरुवानस्मा
ब्राह्मणः कुरुसंसदि पंचनद्यो वहंत्येता यत्र पील्लुवनान्युत ११ शतद्रुश्च विपाशा च तृतीयैराव
ती तथा चंद्रभागा वितस्ता च सिंधुषष्ठी बहिर्गिरेः १२ आरट्टा नाम ते देशा नष्टधर्मा न तान्व्रजे
त् ब्रात्यानां दासमीयानां वाहीकानामयज्वनां १३ न देवाः प्रतिगृह्णंति पितरो ब्राह्मणास्तथा
तेषां प्रनष्टधर्माणां वाहीकानामिति श्रुतिः १४ ब्राह्मणेन तथा प्रोक्तं विदुषा साधु संसदि का
ष्ठकुंडेषु वाहीका मृन्मयेषु च भुंजते १५ सक्तुमंथावलिप्तेषु श्वावलीढेषु निर्घृणाः आवि
कं चौष्ट्रिकं चैव क्षीरं गार्दभमेव च १६ न हि कारोश्च वाहीकाः त्वादंति च पिबंति च पुत्रसंकी
र्णा जाल्माः सर्वान्नक्षीरभोजनाः १७ आरट्टा नाम वाहीका वर्जनीया विपश्चिता हंत शल्य वि
जानीहि हंत भूयो ब्रवीमि ते १८ यदन्यो पुरुवान्मह्यं ब्राह्मणः कुरुसंसदि युगंधरे पयः पीत्वा
गोष्ठवाप्यच्युतस्थले १९ ॥
कुंडेषु महोदरपात्रेषु १५ १६ सर्वमन्नमनीयं क्षीरं च भोजने येषां ते १७ १८ युगंधरे नगरे श्रोष्ठारि
कमपि क्षीरं पीयते भस्माभस्मविवेकाभावात्तत्रावश्यमभस्मभक्षणं प्राप्तमेव एवम ॥ ८८

श्रुतस्य येलेनगरे उषितस्यागमस्यागमनमवश्यंभावि नादृशीनामेव तत्रसत्वात् भूतिलये हि चैशलब्राह्म
णमाथारणपकेजलाशयः तत्रचस्नातः कथंस्वर्गंगछेत्कथं विदितमर्थः ३९ ४० ह्यहमित्येकरात्रवा
तहद्भूतिलयेस्नात्वाकथंस्वर्गंगमिष्यति पंचनद्योवहंत्येतायत्रनिःसृत्यपर्वतात् ४० आरट्टानाम
वाहीकाननतेष्वार्योद्व्यहंवसेत् वहिश्चनामहीकश्चविपाशायांपिशाचकौ ४१ तयोरपत्यंवाही
कानैषासृष्टिःप्रजापतेः तेकथंविविधान्धर्मान्ज्ञास्यंतेहीनयोनयः ४२ कारस्करान्माहिषका
कालिंगान्केरलांस्तथा कर्कोटकान्वीरकांश्चदुर्धर्मांश्चविवर्जयेत् ४३ इतितीर्थानुसर्तारंराक्षसी
काचिदब्रवीत् एकरात्रशयीगेहेमहोलूखलमेखला ४४ आरट्टानामतेदेशावाहीकंनामतज्ज
लं ब्राह्मणापसदायत्रतुल्यकालाःप्रजापतेः ४५ वेदानतेषांवेद्यंचयज्ञायजनमेवच व्रात्यानांदा
समीयानामन्नंदेवानभुंजते ४६ प्रस्थलामद्रगांधाराआरट्टानामतःखशाः वसातिसिंधुसौवी
रा इतिप्रायोतिकुत्सिताः ४७ इतिमहाभारतेकर्णपर्वणिकर्णशल्यसंवादे २५४ कर्णउवाच
हंतशल्यविजानीहिहंतभूयोब्रवीमिते उच्यमानेमयासम्यक्त्वमेकाग्रमनाःशृणु १ ब्राह्मणः
किलनोगेहमध्यगाछत्पुरातिथिः आचारंतत्रसंप्रेक्ष्यप्रीतोवचनमब्रवीत् २ मयाहिमवतःशृंग
मेकेनाध्युषितंचिरं दृष्टाश्चबहवोदेशानानाधर्मसमावृताः ३॥

सेनदोषइत्यर्थः ४१ ४२ कारस्करा
योदेशाः एकरात्रशायीएकरात्रशायिनंब्राह्मणमितिद्वितीयार्थेप्रथमा ४३ ४७ चतुश्चत्वारिंशः हतं १२१

क.टी. इमाः अनुमताः सर्वाः प्रजाः केनचित्केनापि अर्थकामादिना निमित्तेन धर्मेण सह न विरुध्यन्ते न केनचिद्धर्मेणे-
८९ ति पाठे केनाप्यधर्मेणैतान् न विरुध्यन्ते तेन किंचिदप्यधर्मं कृत्वा शास्त्रेण विरुध्यन्ते इत्यर्थः ४ निशामितं श्रुतं ५
ब्राह्मणो भूत्वेत्यादि तज्जातीयकर्माचरणनिबंधनं ६ ७ कुल एक एव विप्रो भवत्यन्ये भ्रातरः प्रसृष्टाः सं

न केनचिद्धर्मेण विरुध्यन्ते प्रजा इमाः सर्वं हितं ब्रुवन् धर्मं यद्यकं वेदपारगः ४ अदत्तानन्ततो देशा
न्नानाधर्मसमाकुलान् आगच्छन् महाराज वाहीकेषु निशामितं ५ तत्रैव ब्राह्मणो भूत्वा ततो
भवति क्षत्रियः वैश्यः शूद्रश्च वाहीकस्ततो भवति नापितः ६ नापितश्च ततो भूत्वा पुनर्भवति
ब्राह्मणः द्विजो भूत्वा च तत्रैव पुनर्दासोऽभिजायते ७ भवत्येककुले विप्रः प्रसृष्टाः कामचारि
णः गांधारा मद्रकाश्चैव वाहीकाश्चाल्पचेतसः ८ एतन्मया श्रुतं तत्र धर्मसंकरकारकं कृत्स्ना
मटित्वा पृथिवीं वाहीकेषु विपर्ययः ९ हंत शल्य विजानीहि हंत भूयो ब्रवीमि ते यदप्यन्यो ब्र
वीद्वाक्यं वाहीकानां च कुत्सितं १० सती पुरा हृता काचिदारट्टा किल दस्युभिः अधर्मतश्चोपया
ता सा तानभ्यशापयत्ततः ११ बालां बंधुमतीं यन्मामधर्मेणोपगच्छत तस्मान्नार्यो भविष्यंति बं
धक्यो वै कुलेषु च १२ न चैवास्मात्प्रमोक्ष्यध्वं घोरात्पापान्नराधमाः तस्मात्तेषां भागहरा भा
गिनेया न सूनवः १३ ॥

कीर्णक्रियाः इत्यर्थः ८ तत्र वाहीकेषु धर्मसंकरकारको विपर्ययः श्रुत इति लिंगविपरिणामेन विप
र्ययो विहितवैपरीत्यं ९ १० ११ बंधक्यो वेश्याः पंचमे व्यभिचारे बंधकाः १२ ॥ ~ २७

नैवेति इत्यन्ते दं बंधकीत्वं सर्वज्ञानुवर्तिष्यते यस्मात्तस्मान्मातुर्धनं दुहिता हरति पितुः पुत्र इति नियमा
त्यद्यपि पुत्री पुत्रश्च द्वावपि जारजातौ तथापि पितृत्वस्य मातृत्वे विसंवादाभावात् दौहित्र एव रिक्थहारी
भवति न पुत्र इति भावः पतंते भगिनीष्वेवापत्यानि जनयंति न स्वदारेषु तस्मात्तेषां भागिनेया भागहरा

कुरवः सहपंचालाः शाल्वा मत्स्याः सनैमिषाः कोशलाः काशपौंड्राश्च कालिं
गा मागधास्तथा १४ चेदयश्च महाभागा धर्मं जानंति शाश्वतं नानादेशेषु सं
तश्च प्रायो वाह्यनयाहृते १५ ग्रामत्स्येभ्यः कुरुपांचालदेशाश्च नैमिषाच्चेदयो
ये विशिष्टाः धर्मं पुराणमुपजीवंति सत्तोमद्राहते पांचनद्यश्च जिह्मान् १६ एवं
विद्वन् धर्मकथास्तु राजंस्तूष्णींभूतो जडवच्छल्य भूपाः त्वं तस्य गोप्ता च जनस्य रा
जा षड्भागहर्ता शुभदुष्कृतस्य १७ अथवा दुष्कृतस्य त्वं हर्ता तेषामरक्षिता रक्षिता
पुण्यभाग्राजा प्रजानां त्वं ह्यपुण्यभाक् १८ ॥

इति व्याख्यातं प्राग्वा १३ १४ असंतश्चात्र संतश्च वर्तंते परं तु वाह्यनयाहृते वाहीकनीतिं विनात्र
केवलमसंत एव मर्त्यंत इत्यर्थः १५ १६ १७ १८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क·टी· श्रूयमाने प्रश्राव्यमाने १९ क्रते कृतयुगेपि धर्मे वाहीकानामिति शेषः सः वाहीकस्त्वं २० नाभ्यपूजय
९० तू नसंशंसितवान् २१ २२ २३ २४ म्लेच्छाः पामराः धर्माधर्मविचारहीनाः म्लेच्छः पापरते जातिभे

श्रूयमाने पुरा धर्मे सर्वदेशेष्वशाश्वते धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः १९
व्रात्यानां दाससमीयानां कृतेप्यशुभकर्मणां ब्रह्मणा निर्दिते धर्मे स त्वं लोके किमब्र
वीः २० इति पाञ्चनदं धर्ममवमेने पितामहः स्वधर्मस्थेषु वर्णेषु सोप्येतान्नाभ्य
पूजयत् २१ हे तत्शल्य विजानीहि हंत भूयो ब्रवीमि ते कल्माषपादः सरसि निम
ज्जन्राक्षसोब्रवीत् २२ क्षत्रियस्य मलं भैक्षं ब्राह्मणस्याव्रतं मलं मलं पृथिव्या वा
हीकाः स्त्रीणां मद्रस्त्रियो मलं २३ निमज्जमानमुद्धृत्य कश्चिद्राजा निशाचरं अपृ
च्छत्तेन चाख्यातं प्रोक्तवांस्तं निबोध मे २४ मानुषाणां मलं म्लेच्छा म्लेच्छानां मौष्टिका म
लं मौष्टिकाणां मलं षंढाः षंढानां राजयाजकाः २५ ॥

देशादपभाषणो इति विशेषः उष्ट्रिकामृत्तिकाभांडभेदि पिकरस्त्रियामिति विश्वः मौष्टिकस्तेहभांड
नी वीनेलिकः इत्यर्थः षंढाः वर्षधराः राजयाजकाः क्षत्रियस्य याज्याः तेषामपि याज्याः राजपुरोहितयाजा ९०
वा २५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२६ गतोपसृष्टेषु गतमाऽऽपद्गतेषु गतसंरक्षणो नाशकमिदं गतसं २७ ब्राह्मं वेदसमुद्दिष्टं धर्मं धर्मोऽत्र वे
तेषु कर्मेमानयंतीति शेषः आरट्टा नाम ते शूद्रधर्माणः दासा इति पाठे मत्स्यजीविनः वृषधर्मं लांति आ
रट्टेते ते वृषलाः धर्मसंग्रहपराः धर्मज्ञा हि गणाः इति वा २८ बहिर्गेहं रात्रिचर्या प्रवृत्तं चौर्यपरा हा

गजयाजकयाज्यानां मद्रकाणां च यन्मलं तद्भवेत्तव मलेयं यस्मात्त्वं विमुंचसि २६ इति
गतोपसृष्टेषु विषवीर्यहतेषु च गतसंभेषु जेशोकं संसिद्धवचनोत्तं २७ ब्राह्मं पांचालाः
कौरव्यास्तु धर्मं सत्यं मत्स्याः शूरसेनाश्च यज्ञं प्राच्या दासा वृषला दाक्षिणात्याः स्तेना वाह्लीकाः
संकरा वै सुराष्ट्राः २८ कृतघ्नता परवित्तापहारो मद्यपानं गुरुदारावमर्दः वाक्पारुष्यं गो
वधो रात्रिचर्या बहिर्गेहं परवस्त्रोपभोगः २९ येषां धर्मस्तान्प्रति नास्त्यधर्मो ह्यारट्टानां पंच
नदानां धिगस्तु आपांचालेभ्यः कुरवो नैमिषाश्च मत्स्याश्चैते ह्यथ जानंति धर्मं ३० ॥

यौति २९ आपांचालेभ्यः धर्मज्ञाः उदीच्या यास्तु स्वयं धर्मस्वरूपमजानंतोऽपि शिष्टानुगामिन।
इत्यर्थः आरट्टास्तु भयभ्रष्टा इति भावः ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कू.टी. प्राचीमित्यत्र जातवेदः इत्यनेनाग्नेयी संहिता प्राची देवानामाश्रयः दक्षिणा पितॄणां तत्रैव श्राद्धादिधर्मो
४१ दृश्यते ११ एवं प्रतीच्यां वरुणः उदीचीं सोम इति कुबेरेशानयोर्ग्रहणं परिशेषान्नैर्ऋत्यां वायव्यां च
वाहीकाश्रयायां नैर्ऋतान्स्वादृशावान् लाश्च संतीत्यर्थः १२ तथा वक्ष्यति हिमवतोऽप्यग्रा सज्जना

अथोदीच्यां गांगकामा गाथाश्च विशिष्टान्यमीनुपजीवंति निरूढाः प्राचीं दिशं श्रिता देवा
जातवेदःपुरोगमाः ११ दक्षिणां पितरो गुप्तां यमेन शुभकर्मणा प्रतीचीं वरुणः पा
तिपालयानः सुरान्बली उदीचीं भगवान्सोमो ब्राह्मणैः सहरक्षति १२ तथा रक्षः
पिशाचाश्च हिमवंतं नगोत्तमं गुह्यकाश्च महाराजपर्वतं गंधमादनं १३ ध्रुवः
सर्वाणि भूतानि विष्णुः पाति जनार्दनः इंगितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोश
लाः १४ अर्धोक्ताः कुरुपांचालाः शाल्वाः कृत्स्नानुशासनाः पार्वतीयाश्च विषमा यथै
व गिरयस्तथा १५

अथ तत्स्वरूपं गंधमादनस्त भोगलोलुपानां गुह्यकादीनामाश्रयः ११ एवमपि सवाहीकान्स नैर्ऋतान्
देशान्विष्णुः पाति पर्जन्यवत् न देशांतरेष्विव वाहीकेषु विशेषतो देवतानुग्रहो दृश्यत इत्यभिप्रायः अत
एव तेषामौद्धत्यं वर्णयति इंगितज्ञाश्चेति १४ विषमाः दुःखसाध्याः १५ ॥ ११ ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्वं ज्ञानं ततो पि यवना म्लेच्छाश्च सर्वसंज्ञया स्वीयैः कृतो यो धर्मसंकेतस्तत्रैव नियताः वैदिकं धर्मं न
मानयंतीत्यर्थः इत्येतत्वनुक्तं हितं नावबुध्यते ३६ प्रतिरथ्याः हितवादिनि प्रतिकूलाः गुरुद्वेषि

सर्वज्ञा यवना राजन् शूराश्चैव विशेषतः म्लेच्छाः स्वसंज्ञानियता नानुक्तमितरे जनाः ३६
प्रतिरथ्यास्तु वाह्लीका न च केचन मद्रकाः सत्वमेतादृशः शल्य नोत्तरं वक्तुमर्हसि ३७
पृथिव्यां सर्वदेशानां मद्रको मलमुच्यते [illegible] तथा स्त्रीणां च
सर्वासां मद्रिका मलमुच्यते ३८ सीधोःपानं गुरुतल्पावमर्दी [illegible]णहत्या परवित्तापहाराः
येषां धर्मस्तान् प्रति नास्त्यधर्म आरट्टजान् पंचनदान् धिगस्तु ३९ एतज्ज्ञात्वा जोषमास्व प्रती
पं मास्म वै कृथाः मा त्वां पूर्वमहं हत्वा हनिष्ये केशवार्जुनौ ४० शल्य उवाच आतुराणां
परित्यागः स्वदारसुतविक्रियः अंगेषु वर्त्तते कर्ण येषामधिपतिर्भवान् ४१ ॥

णमित्यर्थः नाहं भाष्यत्वं हितोपदेशारंभो निंदसीत्यर्थः ३७ ३८ प्रतीपं प्रतिकूलं तेनेनो वध्या
म्यहं ३९ ४० ४१ ॥ ~

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
९२

देवाअपीतिहृतेनेदेवानपिअतिक्रामंतीत्यर्थः ४७ सांजल्पकेनसमयअंजलिकर्मणा ४८ ४९ ५०

रथ्यातिरथसंख्यायांयज्ञोभीष्मस्तदाब्रवीत् तान्विदित्वात्मनोदोषान्निर्मन्युर्भवमाकृथः ५२
सर्वत्रब्राह्मणाःसंतिसंतिसर्वत्रक्षत्रियाः वैश्याःशूद्रास्तथाकर्णस्त्रियःसाध्व्यःसुव्रताः
५३ रमंतेचोपहासेनपुरुषाःपुरुषैःसह अन्योन्यमवहसंतोदेशेदेशेसमैथुनाः ५४ पर
वाच्येषुनिपुणःसर्वोभवतिसर्वदा आत्मवाच्यंनजानीतेजानन्नपिचमुह्यति ५५ सर्वत्र
संतिराजानःस्वंस्वंधर्ममनुव्रताः दुर्मनुष्यान्निगृह्णंतिसर्वत्रधार्मिकाः ५६ नकर्णदेशा सन्ति ५
सामान्यात्सर्वःपापंनिषेवते यादृशाःस्वस्वभावेनदेवाअपिनतादृशाः ५७ संजयउवाच
ततोदुर्योधनोराजाकर्णशल्याववारयत् सखिभावेनराधेयंशल्यंसांजल्पकेनच ५८
ततोनिवारितःकर्णोधार्तराष्ट्रेणमारिष कर्णोपिनोत्तरंप्राहशल्योप्यभिमुखःपरान् ५९
ततःप्रहस्यराधेयःपुनर्याहीत्यचोदयत् ६० इतिश्रीमहाभारतेकर्णपर्वणिकर्णशल्यसं
वादः ४५

पंचचत्वारिंशः ॥ ४५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥ १९ १७ अग्निरिति योयंवैश्वानरोविश्वस्यनेताअग्निः सब्रह्माब्राह्मणः प्रजापतिमुखोद्भवत्वसामान्यात् एवंवं
उः उननीतिश्रुत्यतेर्जलाधीशः सोमरसस्य सएवसंशितामस्त्वंगतः वारुणोवाअग्रस्तदतिश्रुतेः सोमोप्य
तस्यपत्रप्रपदेभ्योनिष्पतंतिपुपुत्सवः पत्यस्वरथमातंगाः आनूषीवबलाहकाः १९ ततःसेनाप
तिकर्णेहृष्टाराजायुधिष्ठिरः धनंजयममित्रघ्नमेकवीरमुवाचह २० यथार्जुनमहाबाहुकर्णे
नविहितेरणेयुक्तंपृदैः प्रपदैःश्चपरानीकंप्रकाशते तदेतद्धेममालोक्यशत्रुमित्रेमहद्बले
यथानाभिभवत्यस्मांस्तथानीतिर्विधीयतां २१ एवमुक्तोर्जुनेनोराज्ञाप्रांजलिर्नृपमब्रवीत् यथा
भवानाहतत्थात्तत्सर्वंनतदन्यथा २२ यत्त्वस्यविहितोद्यातस्तंकरिष्यामिभारत प्रधानवध
एवास्यविनाशस्तंकरोम्यहं २३ युधिष्ठिरउवाच तस्मात्त्वमेवराधेयंभीमसेनःसुयोधनं वृष
सेनंचनकुलःसहदेवोपिसौबलं २४ दुःशासनंशतानीकोहार्दिक्यंशिनिपुंगवः पांड्योद्रौण
स्ततंयातुस्वयंयोत्स्याम्यहंकृपं २५ द्रौपदेयाधार्तराष्ट्रान्शिष्टान्सहशिखंडिना तेतेचतांस्ता
नहितानस्माकंघ्नंतुमामकाः २६ संजयउवाच इत्युक्तोधर्मराजेनतथेत्युक्त्वाधनंजयः व्यादि
देशात्सैन्यानिस्वयंचाग्राग्रजमग्रवे २७ अग्निर्वैश्वानरःपूर्वोब्रह्मेंडःसंशितोगतः तस्माद्यः
प्रथमंजातस्तंदेवाब्राह्मणाविदुः २८ ॥ स्वत्वेनलभ्यतेअग्रंसंमस्जेतिकलशोदग्धाल्पिपद्मादौ॥
स्संग्रस्यकलशोद्रोणःकलशोलियोअंगुलयः तमस्यदेवाः ब्राह्मणाश्चविदुःसएकएवदेवश्चतथात्मा
नेत्स्यार्जुनरथंवाहयतीत्यर्थः ब्राह्मणवेदनेहेतुःस्तन्यप्रदीमः सएवाश्वत्वंगतइत्यर्थः २८ ॥ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ एवमस्मान्कृत्वारथंस्तौतिब्रवीति ४९ ५० अयंसरथःकौंतेयआयातःइतिद्वयोःसंबंधःशत्रोरथस्येतिशेषः
९४ ब्रह्मेशानेंद्रवरुणानक्रमशोयोवहत्पुरा तमायंरथमास्थायप्रयातौकेशवार्जुनौ ४९ अथतेरथमा
यांतेद्रष्टास्यद्भुतदर्शनं उवाचाधिरथिंशल्यःपुनस्तंयुद्धदुर्मदं ५० अयंसरथआयातःश्वेताश्वःकृष्ण
सारथिः दुर्वारःसर्वसैन्यानांविपाकःकर्मणामिव ५१ निघ्नन्नमित्रान्कौंतेयोयंकर्णपरिपृच्छसि
श्रूयतेतुमुलःशब्दोयथामेघस्वनोमहान् ५२ ध्रुवमेतौमहात्मानौवासुदेवधनंजयौ एषरे
णुःसमुद्भूतोदिवमावृत्यतिष्ठति ५३ चक्रनेमिप्रणुन्नेवकंपतेकर्णमेदिनी प्रवात्येषमहा
वायुरभितस्तववाहिनीं ५४ वमममथेमांविपुलासमरङ्घामसंख्येयाःकर्णरथाग्रभागेः ध्रुवं
प्रथस्वेचरणेधनंजयःकृत्वादेहद्वामरवामितावशी ग्रमीहयाश्चेडमरीचिवर्णाःकृष्णप्रणोदे
नप्रतुद्यमानाः वहंतितंवीरमुदारसत्वाः ग्रितप्रभाःस्वमिवाभ्रसंघाः द्रष्टास्यद्यमहेष्वासं
श्वेताश्वंकृष्णसारथिं निघ्नंतंसमरेशत्रून्यंकर्णमनुपृच्छसि अद्यतौपुरुषव्याघ्रौलोहिता
क्षौपरंतपौ वासुदेवार्जुनौकर्णद्रष्टास्यमिततेजसौ यत्रकृष्णोजगन्नाथोयत्रराजायुधिष्ठिरः
यत्रगांडीवधन्वाचकथंतेहन्यसेबले सारथिर्यस्यगोविंदोगांडीवंयस्यवैधनुः तंचेद्धंतासिक
र्णत्वंत्वंनोराजाभविष्यसि रथनेमिस्वनःसंख्येमेघस्येवाभिगर्जतः श्रूयतेसोयथाभ्यक्रमेतौ
कृष्णधनंजयौ क्रव्यादाव्याहरंत्येतेमृगाःक्रंदंतिभैरवं पश्यकर्णमहाघोरंभयदंलोमहर्षणं ५५
५२ ५३ प्रवातीत्यादिपराजयलक्षणमाहतेजोभंगार्थमेव ५४ कबंधकेतुमृगादिभिरादित्यावेदनाणिक्रिय ९४

॥ श्री [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ ॥ ॥

संजयउवाच ततःपरानीकसहंव्यूहमप्रतिमंकृतं समीक्ष्यकर्णःपार्थानांधृष्टद्युम्नाभि
रक्षितं १ प्रययौरथघोषेणसिंहनादरवेणच वादित्राणांचनिनदैःकंपयन्निवमेदिनीं २
वेपमानइवक्रोधाद्युद्धशौंडःपरंतपः प्रतिव्यूह्यमहातेजायथावद्भरतर्षभ ३ व्यधमत्पांडवीं
सेनामासुरीमघवानिव युधिष्ठिरंचाभ्यहनदपसव्यंचकारह ४ धृतराष्ट्रउवाच कथंसं
जयराधेयःप्रत्यव्यूहतपांडवान् धृष्टद्युम्नमुखान्सर्वान्भीमसेनाभिरक्षितान् ५ सर्वाने
वमहेष्वासानजय्यानमरैरपि केचप्रपक्षौपक्षौवाममसैन्यस्यसंजय ६ प्रविभज्ययथान्या
यंकथंवासमवस्थिताः कथंपांडुसुताश्चापिप्रत्यव्यूहतमामकान् ७ कथंचैवमहद्यु
द्धंप्रावर्त्ततसुदारुणं क्वचबीभत्सुरभवद्यत्कर्णोयाद्युधिष्ठिरं ८ कोह्यर्जुनस्यसांनिध्येशक्तो
ऽभ्येतुंयुधिष्ठिरं सर्वभूतानियोह्येकःखांडवेजितवान्पुरा ९ कस्तमन्यस्तुराधेयात्प्रतियु
ध्येज्जिजीविषुः संजयउवाच शृणुव्यूहस्यरचनामर्जुनश्चयथागतः परिवार्यनृपंतंस्वंसंग्रा
मश्चाभवद्यथा १० कृपःशारद्वतोराजन्मागधाश्चतरस्विनः सात्वतःकृतवर्माचदक्षिणंपक्षमाश्रि
ता ११ तेषांप्रपक्षेशकुनिःउलूकश्चमहारथः सादिभिर्विमलप्रासैस्तवानीकमरक्षतां १२ गांधारि
भिरसंभ्रांतैःपार्वतीयैश्चदुर्जयैः शलभानामिवव्रातैःपिशाचैरिवदुर्दृशैः १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७

चत्वारिंशत्सहस्राणिरथानामनिवर्त्तिनां संसप्तकायुद्धशौंडावामंपार्श्वमपालयन् १४ सम
विताम्नवस्तैःकृष्णार्जुनजिघांसवः तेषांप्रपन्नाःकांबोजाःशकाश्चयवनैःसह १५ निदेशा
त्तत्तपुत्रस्यसरथाःसाश्वपत्तयः आहूयंतोर्जुनंतस्थुःकेशवंचमहाबलं १६ मध्येसेनामुखे
कर्णोप्यवतिष्टतदंशितः चित्रवर्मांगदःस्रग्वीपालयन्वाहिनीमुखे १७ रक्षमाणैःसुसंर
ब्धैःपुत्रैःशस्त्रभृतांवरः वाहिनींप्रमुखेवीरःसंप्रकर्षन्नशोभत १८ अभ्यवर्त्तन्महाबाहुःस
र्ववैश्वानरप्रभः महाद्विपस्कंधगतःपिंगलःप्रियदर्शनः १९ दुःशासनोवृतःसैन्यैःस्थितो
व्यूहस्यपृष्टतः तमन्वयान्महाराजस्वयंदुर्योधनोनृपः २० चित्राश्वैश्चित्रसंनाहैःसोदर्यै
रभिरक्षितः रक्षमाणोमहावीर्यैःसहितैर्मद्रकेकयैः २१ अशोभतमहाराजदेवैरिवशत
क्रतुः अश्वत्थामाकुरूणांचयेप्रवीरामहारथाः २२ नित्यमत्ताश्चमातंगाःशूरैर्म्लेच्छैः
समन्विताः अन्वयुस्तद्रथानीकंक्षरंतइवतोयदाः २३ तेध्वजैर्वैजयंतीभिर्ज्वलद्भिःपरमा
युधैः सादिभिश्चास्थितारेजुर्द्रुमवंतइवाचलाः २४ तेषांपदातिनागानांपादरक्षाःसहस्रशः
पट्टिशासिधराःशूराबभूवुरनिवर्त्तिनः २५ सादिभिःस्यंदनैर्नागैरधिकंसमलंकृतैः सव्यू
हराजोविबभौदेवासुरचमूपमः २६ बार्हस्पत्यःसुविहितोनायकेनविपश्चिता नृत्यतीवम
हाव्यूहःपरेषांभयमादधत् २७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४० वामनः स्येवलेवेतो रथात चक्रयोः संघर्षजैः स्फुलिंगैर्ज्वलतीत्यर्थः ४८ ४९ ५० ५१ ५२ ५३
कवंधमेघसंकाशं भानुमानुन्नत्य संस्थितं पश्यपश्यैर्बहुविधैर्मृगाणां सर्वतो दिशं ४६ बलिभि
र्दमशार्दूलैराहिंस्रोभिनिरीक्षते पश्यकंकाश्च गृध्रांश्च समवेतान्सहस्रशः ४७ स्थितानभिमु
खान्घोरानन्योन्यमभिभाषतः रंजिताश्चामरायुक्तास्तव कर्णमहारथे ४८ प्रवराः प्रज्वलंत्य
ते ध्वजश्चैव प्रकंपते सवेपथून्पश्यान्पश्य महाकायान्महाजवान् ४९ प्लवमानान्सुपर्णीया
नाकाशे गरुडानिव ध्रुवमेषु निमित्तेषु भूमिमाश्रित्य पार्थिवाः स्वप्स्यंति निहताः कर्णशतशो
थसहस्रशः ५० शंखानां तुमुलः शब्दः श्रूयते लोमहर्षणः आनकानां च राधेय मृदंगानां
च सर्वशः ५१ बाणशब्दान्बहुविधान्नराश्वगजवाजिनां ज्यातलत्रेषु शब्दांश्च शृणु कर्ण महात्म
नां ५२ हेमरूप्यप्रमृष्टानां वाससां शिल्पिनिर्मिताः नानावर्णा रथे भांति श्वसनेन प्रकंपिताः ५३
सहेमचंद्रतारार्काः पताकाः किंकिणीयुताः पश्य कर्णार्जुनस्यैताः सौदामिन्य इवांबुदे ५४ ध्व
जाः कणकणायंते वातेनाभिसमीरिताः विभ्राजंति रथे कर्ण विमाने देवता यथा ५५ सपता
कारथाश्चैते पंचालानां महात्मनां पश्य कुंतीसुते वीरे बीभत्सुमपराजिते प्रधर्षयितुमायांते
कपिप्रवरकेतने एष ध्वजाग्रे पार्थस्य प्रेक्षणीयः समंततः दृश्यते वानरो भीमो द्विषतामघव
र्द्धनः एतच्चक्रं गदाशार्ङ्गं शंखं कृष्णस्य धीमतः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क·टी·
२१

६· स्यातल्लत्रेषु कर्णानि निपाठे कर्णो वाद्यविशेषः ६१ अवधर्धनः ङः त्वसवर्धयिता हस्तावनैषां ध्वनी

अस्योरसि भ्राजते ऽत्र कौस्तुभस्तमणिस्ततः एष शार्ङ्गधरः पाणिर्वासुदेवो ऽतिवीर्यवान् वाहय
न्नेति तु राज्यं पाण्डुराज्वानतरं हयः एतत्कूजति गाण्डीवं विकृष्टं सव्यसाचिना ६५ एते हस्तवताम्।
क्रोधं समित्रान्पूजिताः शराः विशालायतताम्रान्तैः पूर्णचन्द्रनिभाननैः एषा भूः कीर्यते राज्ञां
शिरोभिरपलायिनां एते सुपरिघाकाराः पुण्यगन्धानुलेपनाः उद्यतायुधशौण्डानां पात्यन्ते सा
युधा भुजाः निरस्तनेत्रजिह्वाश्च वाजिनः सहसादिभिः पतिताः पात्यमानाश्च क्षितौ क्षीणाश्च
एतेदृ शेरते पर्वतस्य शृङ्गाणां तुल्यरूपा हता द्विपाः संछिन्नभिन्नाः पार्थेन प्रचरन्त्यद्रयो यथा गंधर्व
नगराकारा रथा हतनरेश्वराः विमानानीव पुण्यानि स्वर्गिणां निपतन्त्यमी ६७ आकुलीकृ
तमत्यर्थं पश्य सैन्यं किरीटिना नानानरगसहस्राणां यूथं केसरिणा यथा ६८ घ्नन्त्येते पार्थि
वान्वीराः पाण्डवाः समभिद्रुताः नागाश्वरथपत्त्यौघांस्तावकान्समभिघ्नतः ६९ एष सूर्य इ
वाम्भोदैश्छन्नः पार्थो न दृश्यते ध्वजाग्रं दृश्यते त्वस्य ज्याशब्दश्चापि श्रूयते ७० अद्य द्रक्ष्यसि
तं वीरं श्वेताश्वं कृष्णसारथिं निघ्नन्तं शात्रवान्संख्ये यं कर्ण परिपृच्छसि ७१ ॥

नशिल्पिनोरंजका

७१ ७२ ७३ ७४ ७५ ७६ ७७ ७८ ८० ८१ ८२ ८३ ॥ ८५

अथ तौ पुरुषव्याघ्रौ लोहिताक्षौ परंतपौ वासुदेवार्जुनौ कर्ण दृष्टावेकरथे स्थितौ ७२ सारथिर्य
स्य वार्ष्णेयो गाण्डीवं यस्य कार्मुकं तं चेद्धंतासि राधेय त्वं नो राजा भविष्यसि ७३ एष संशप्तकाहूत
स्तानेवाभिमुखो गतः करोति कदनं चैषां संग्रामे द्विषतां बली ७४ इति ब्रुवाणं मद्रेशं कर्णः प्रा
हातिमन्युना पश्यैनं संशप्तकैः क्रुद्धैः सर्वतः समभिद्रुतः ७५ एष सूर्य इवांभोदैश्छन्नः पार्थो न दृ
श्यते एतदंतोऽर्जुनः शल्य निमग्नो योधसागरे ७६ शल्य उवाच वरुणं कोंऽभसा हन्यादिंधनेन च
पावकं को वानिलं निगृह्णीयात्पिबेद्वा को महार्णवं ७७ ईदृग्रूपमहं मन्ये पार्थस्य युधि निग्रहं
न हि शक्योऽर्जुनो जेतुं युधि सेंद्रैः सुरासुरैः ७८ अथवा परितोषस्ते वाचोक्त्वा सुमना भव न स श
क्यो युधा जेतुमन्यं कुरु मनोरथं ७९ बाहुभ्यामुद्धरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः पातयेत्त्रिदिवा
द्देवान्योऽर्जुनं समरे जयेत् ८० पश्य कुंतीसुतं वीरं भीममक्लिष्टकारिणं प्रभासंतं महाबाहुं।
स्थितं मेरुमिवापरं ८१ अमर्षी नित्यसंरब्धश्चिरं वैरमनुस्मरन् एष भीमो जयप्रेप्सुर्युधि तिष्ठ
ति वीर्यवान् ८२ एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः तिष्ठत्यसुकरः संख्ये परैः परपुरंज।
यः ८३ एतौ च पुरुषव्याघ्रावश्विनाविव सोदरौ नकुलः सहदेवश्च तिष्ठतो युधि दुर्जयौ ८४
अमी स्थिता द्रौपदेयाः पंच पंचाचला इव व्यवस्थिता योद्धुकामाः सर्वेऽर्जुनसमा युधि ८५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ षट्चत्वारिंशः तथा १ ॥

५९

एते द्रुपदपुत्राश्च धृष्टद्युम्नपुरोगमाः स्रीताः सत्यजितो वीरास्तिष्ठंति परमौजसः ८६ असाविंद्र इवासह्यः
सात्यकिः सात्वतांवरः युयुत्सुरुपयात्यस्मान् क्रुद्धोंतकसमः पुरः ८७ इति संवदतोरेव तयोः पुरुषसिं
हयोः तेमेनेसमसज्जेतांनागानागापवनवद्भृशं ८८ इति कर्णपर्वणि ४६ धृतराष्ट्र उवाच तथा।
सृष्टेष्वनीकेषु एतेषु वत्सं जय संशप्तकान् कथं पार्थो गतः कर्णश्च पाण्डवान् १ एतद्विस्तरशो
युद्धं प्रब्रूहि कुशलोह्यसि न हि तृप्यामि वीराणां शृण्वानो विक्रमान् रणे २ संजय उवाच तदा
स्थितं समवज्ञाय प्रत्यमित्रबलं महत् अव्यूहतार्जुनो व्यूहं पुत्रस्य तव दुर्नये ३ तत्सादिनागक
लिलं पदातिरथसंकुलं धृष्टद्युम्नमुखं व्यूहमशोभत महद्बलं ४ पारावतसवर्णाश्वश्चंद्रादित्य
समद्युतिः पार्षतः प्रबभौ धन्वी कालो विग्रहवानिव ५ पार्षतं त्वभिरक्षंतः सर्वे द्रौपदेया युयुत्सवः
दिव्यवर्मायुधधराः शार्दूलसमविक्रमाः ६ सानुगा दीप्तवपुषश्चंद्रं तारागणा इव अथ व्यूढे
ष्वनीकेषु प्रेक्ष्य संशप्तकान् रणे ७ क्रुद्धोऽर्जुनोऽभिदुद्राव व्याक्षिपन् गांडिवं धनुः अथ संशप्तकाः पा
र्थमभ्यधावन् वधैषिणः ८ विजये धृतसंकल्पा मृत्युं कृत्वा निवर्तनं तदश्वौघबहुलं मत्त
नागरथाकुलं ९ पत्तिमच्छूरवीरौघं द्रुतमर्जुनमार्दयत् स संप्रहारस्तुमुलस्तेषामासीत् कि
रीटिना १० ॥

५९

तैस्सैवनश्रुतोपायाद्दृढैर्वातककवचैःसह रथानश्वान्ध्वजान्नागान्पत्तीन्गणगतानपि ११ इषून्धनूंषिवर्माणि
श्चचक्राणिचपरश्वधान् सायुधान्प्रयतान्बाहून्विविधान्यायुधानिच १२ चिच्छेदद्विषतांपार्थःशिरांसिच
सहस्रशः तस्मिन्सैन्यमहावर्त्तेपातालतलसंनिभे १३ निमग्नंतंरथंमत्वानेदुःसंसप्तकास्तथा सपुन
स्तानरीन्हत्वापुनःकुरूनथातोवधीत् १४ दक्षिणेनचपश्चाच्चक्रुद्धोरुद्रःपशूनिव अथपांचालचेदीनां
संजयानांचमारिष १५ त्वदीयैःसहसंग्रामआसीत्परमदारुणः कृपश्चकृतवर्माचशकुनिश्चापिसौ
बलः १६ हृष्टसेनाःससंरब्धारथानीकप्रहारिणः कोशलैःकाश्यमत्स्यैश्चकारूषैःकैकयैरपि
१७ शूरसेनैःशूरवीरैर्युयुधुर्युद्धदुर्मदाः तेषामंतकरंयुद्धंदेहपाप्मासुनाशनं १८ शूद्रविट्क्षत्रवीरा
णांधर्म्यंस्वर्ग्यंयशस्करं दुर्योधनोप्यसहितोभ्रातृभिर्भरतर्षभ १९ गुप्तःकुरुप्रवीरैश्चमद्राणांचमा
हारथैः पांडवैःसहपांचालैश्चेदिभिःसात्यकेनच २० युध्यमानंरणेकर्णःकुरुवीरोभ्यपालयत्
कर्णोपिविशिखैर्बाणैर्विनिहत्यमहाचमूं २१ प्रमथ्यचरथश्रेष्ठान्युधिष्ठिरमपीडयत् विवस्त्रायु
धदेहासून्कृत्वाशत्रून्सहस्रशः २२ युक्तास्वर्गाययशसेचस्वेभ्योमुदमथावहत् एवंमारिषसंग्रामो
नरवाजिगजक्षयः २३ कुरूणांसंजयानांचदेवासुरसमोभवत् २४ इतिश्रीमहाभारतेकर्ण
पर्वणि २२४ ॥ ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ १९ तत्रविदुम्भद्रवीराणामित्यनेनब्राह्मणा दंतेपुद्धंसर्वेषांश्रेयस्करमित्यर्थः १९ २० २१ २२ युक्तायोजयित्वा
४० धृतराष्ट्रउवाच यत्तत्त्वविशयपार्थानांसेनांकुर्वन्नकदनं कर्णोराजानमभ्यर्छत्तन्ममाचक्ष्वसंजय १
केचप्रवीराःपार्थानांयुधिकर्णमवारयन् कांश्चप्रमथ्याधिरथिर्युधिष्ठिरमपीडयत् २ संजयउवा
च धृष्टद्युम्नमुखान्पार्थान्दृष्ट्वाकर्णोव्यवस्थितान् समभ्यधावत्त्वरितःपांचालाञ्छत्रुकर्षणः ३ तं
तूर्णमभिधावंतंपांचालाजितकाशिनः प्रत्युद्ययुर्महात्मानंहंसाइवमहार्णवं ४ ततःशंखसह
स्राणांनिःस्वनोहृदयंगमः प्रादुरासीदुभयतोभेरीशब्दश्चदारुणः ५ नानावाणनिपाताश्चद्विपा
श्वरथनिस्वनः सिंहनादश्चवीराणामभवद्दारुणस्तदा ६ साद्रिद्रुमार्णवाभूमिःसवातांबुदमंब
रं सार्केंदुग्रहनक्षत्राद्यौश्चव्यक्तंविघूर्णिता ७ इतिभूतानितंशब्दंमेनिरेतेचविव्यथुः यानिचा
ल्पसत्वानितत्रप्रायस्तानिमृतानिच ८ अथकर्णोभृशंक्रुद्धःशीघ्रमस्त्रमुदीरयन् जघानपांडवीं
सेनामासुरीमघवानिव ९ सपांडवबलंकर्णःप्रविश्यविसृजञ्छरान् प्रभद्रकाणांप्रवरानहन
त्सप्तसप्ततिं १० ततःसुपुंखैर्निशितैरथश्रेष्ठोरथेषुभिः अवधीत्पंचविंशत्यापांचालान्पंचविं
शतिं ११ सुवर्णपुंखैर्नाराचैःपरकायविदारणैः चेदिकानवधीद्वीरःशतशोथसहस्रशः
१२ ॥
२२ सप्तचत्वारिंशः ४७ यत्तत् अभेत्यपदकरोतन्ममाचक्ष्वेत्यन्वयः ॥ ॥ ४७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तं तथा समरे कर्म कुर्वाणमतिमानुषं परिवव्रुर्महाराज पंचालानां रथव्रजाः १३ ततः संधाय विशि-
खान्पंच भारत दुःसहान् पंचालानवधीत्पंच कर्णो वैकर्तनो वृषः १४ भानुदेवं चित्रसेनं सेनाविंदुं च
भारत तपनं शूरसेनं च पंचालानहनद्रणे १५ पंचालेषु च शूरेषु वध्यमानेषु सायकैः हाहाकारो महा-
नासीत्पंचालानां महाहवे १६ परिवव्रुर्महाराज पंचालानां रथा दश पुनरेव च तान्कर्णो जघानाशुप-
तत्रिभिः १७ चक्ररक्षौ तु कर्णस्य पुत्रौ मारिष दुर्जयौ सुषेणः सत्यसेनश्च त्यक्त्वा प्राणानयुध्यतां १८ पृष्ठ-
गोपास्तु कर्णस्य ज्येष्ठः पुत्रो महारथः वृषसेनः स्वयं कर्णं पृष्ठतः पर्यपालयत् १९ धृष्टद्युम्नः सात्य-
किश्च द्रौपदेया वृकोदरः जनमेजयः शिखंडी च प्रवीराश्च प्रभद्रकाः २० चेदिकेकयपंचाला यमौ
मत्स्याश्च दंशिताः समभ्यधावन्राधेयं जिघांसंतः प्रहारिणं २१ त एनं विविधैः शस्त्रैः शरधाराभिरेव
च अभ्यवर्षन्विमर्दंतः प्रावृषीवांबुदा गिरिं २२ पितरं तु परीप्संतः कर्णपुत्राः प्रहारिणः त्वदीयाश्चाप-
रे राजन्वीरा वीरानवारयन् २३ सुषेणो भीमसेनस्य छित्वा भल्लेन कार्मुकं नाराचैः सप्तभिर्विद्ध्वा हृदि
भीमं ननाद ह २४ अथान्यद्धनुरादाय सुदृढं भीमविक्रमः सज्यं वृकोदरः कृत्वा सुषेणस्याछिनद्धनुः २५
विव्याध चैनं दशभिः क्रुद्धो नृत्यन्निवेषुभिः कर्णं च तूर्णं विव्याध त्रिसप्तत्या शितैः शरैः २६ भानुसेनं च दश-
भिः साश्वसूतायुधध्वजं पश्यतां सुहृदां मध्ये कर्णपुत्रमपातयत् २७ क्षुरप्रणुन्नं तत्तस्य शिरश्चंद्रनिभाननं
शुभदर्शनमेवासीन्नालभ्रष्टमिवांबुजं २८ हत्वा कर्णसुतं भीमस्तावकान्पुनरार्दयत् कृपहार्दिक्ययोश्छित्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
९८

दुःशासनंत्रिभिर्विध्वाशकुनिंषड्भिरायसैः उलूकंचपतत्रिंचचकारविरथावुभौ ३० हासुषेणाहतोसीतिब्रुव
न्नादत्तसायकं तमस्यकर्णश्चिच्छेदत्रिभिश्चैनमताडयत् ३१ अथान्यंपरिजग्राहसुपर्वाणंसुतेजनं सुषे
णाभ्यासृजद्भीमस्तमप्यस्याच्छिनद्वृषः ३२ पुनःकर्णस्त्रिसप्तत्याभीमसेनमथेषुभिः पुत्रंपरीप्सन्विव्या
धक्रूरंक्रूरैर्जिघांसया ३३ सुषेणस्तुधनुर्गृह्यभारसाधनमुत्तमं नकुलंपंचभिर्बाणैर्बाह्वोरुरसिचा
र्पयत् ३४ नकुलस्तंतुविंशत्याविध्वाभारसहैर्दृढैः ननादबलवान्नादंकर्णस्यभयमादधत् ३५ तंसु
षेणोमहाराजविध्वादशभिराशुगैः चिच्छेदचधनुःशीघ्रंक्षुरप्रेणमहारथः ३६ अथान्यद्धनुरादा
यनकुलःक्रोधमूर्छितः सुषेणंनवभिर्बाणैर्वारयामाससंयुगे ३७ सतुबाणैर्दिशोराजन्नाछाद्य
परवीरहा आजघ्नेसारथिंचास्यसुषेणंचततस्त्रिभिः ३८ चिच्छेदचास्यसुदृढंधनुर्भल्लैस्त्रिभिस्त्रिधा
अथान्यद्धनुरादायसुषेणःक्रोधमूर्छितः ३९ आविध्यन्नकुलंषष्ट्यासहदेवंचसप्तभिः तद्युद्धंसुमह
द्घोरमासीद्देवासुरोपमं ४० निघ्नतांसायकैस्तूर्णमन्योन्यस्यवधंप्रति सात्यकिर्वृषसेनस्यसूतंह
त्वात्रिभिःशरैः ४१ धनुश्चिच्छेदभल्लेनजघानाश्वांश्चसप्तभिः ध्वजमेकेषुणोन्मथ्यत्रिभिस्तंहृद्य
ताडयत् ४२ अथावसन्नःस्वरथेमुहूर्तात्पुनरुत्थितः सगणोयुयुधानेनविसूताश्वरथध्वजः ४३
कृतोजिघांसुःशैनेयंखड्गचर्मधरोभ्ययात् तस्यचापततःशीघ्रंवृषसेनस्यसात्यकिः ४४ वाराहकर्णैर्द
शभिरविध्यदसिचर्मणी दुःशासनस्तुतंदृष्ट्वाविरथंव्यायुधंकृतं ४५ आरोप्यस्वरथेतूर्णमपोवाहरथात्ततः
अथान्यंरथमास्थायवृषसेनोमहारथः ४६ द्रौपदेयांस्त्रिसप्तत्यायुयुधानंचपंचभिः भीमसेनंचतत्रषष्ट्यासह ९८

५८ विवरं ग्रंतरं रद्धः प्रसृतास्त्वर्थाः ५२ ९९ अष्टाचत्वारिंशः ॥

नकुलं त्रिंशता बाणैः शतानीकं च सप्तभिः शिखंडिनं च दशभिर्धर्मराजं शतेन च एतांश्चान्यांश्च
राजेंद्र प्रवीरान्जयगृद्धिनः अभ्यर्दयन्महेष्वासः कर्णपुत्रो विशांपते कर्णस्य पृथि दुर्धर्षस्ततः पृ
ष्ठमपालयत् ४४ शासनं च शैनेयो नवैर्नवभिरायसैः ५० विसृतास्वरथं कृत्वा ललाटे त्रिभिरार्पय
त् सत्वन्यं रथमास्थाय विधिवत्कल्पितं पुनः ५८ युयुधे पांडुभिः सार्धं कर्णस्याप्यायन्बलं धृष्ट
द्युम्नस्ततः कर्णमविध्यद्दशभिः शरैः ५९ द्रौपदेयास्त्रिसप्तत्या युयुधानस्तु सप्तभिः भीमसेनश्चतुः
षष्ट्या सहदेवश्च सप्तभिः ५० नकुलस्त्रिंशता बाणैः शतानीकस्तु सप्तभिः शिखंडी दशभिर्वीरो ध
र्मराजः शतेन च ५१ एते चान्ये च राजेंद्र प्रवीरा जयगृद्धिनः अभ्यर्दयन्महेष्वासं सूतपुत्रं महामृधे
५२ तान्सूतपुत्रो विशिखैर्दशभिर्दशभिः शरैः रथेनानुचरन्वीरः प्रत्यविध्यदरिंदमः ५३ तत्रास्त्र
वीर्यं कर्णस्य लाघवं च महात्मनः अपश्याम महाभाग तदद्भुतमिवाभवत् ५४ न ह्याददानं ददृशुः सं
दधानं च सायकान् विमुंचंतं च संरंभाद्दपश्यंत हतान्नरीन् ५५ द्यौर्वियद्भूर्दिशश्चैव प्रपूर्णा नि
शितैः शरैः अरुणाभ्रावृताकारं तस्मिन्देशे बभौ वियत् ५६ नृत्यन्निव हि राधेयश्चापहस्तः प्रता
पवान् यैर्विद्धः प्रत्यविध्यत्तानेकैकं त्रिगुणैः शरैः ५७ शतैश्च दशभिश्चैतान्पुनर्विध्वा ननाद च
साश्वसूतध्वजच्छत्रास्ततस्ते विवरं ददुः ५८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
५५

तान्त्रमथ्यमहेष्वासान्राधेयः शरवृष्टिभिः गजानीकमसंबाधं प्राविशच्छत्रुकर्षणः ५९ सरथांस्त्रिशतान्ह
त्वा चेदीनामनिवर्त्तिनां राधेयो निशितैर्बाणैस्ततोभ्यर्छद्युधिष्ठिरं ६० ततस्तं पांडवा राजन्शिखंडी च ससा
त्यकिः राधेयात्परिरक्षंतो राजानं पर्यवारयन् ६१ तथैव तावकाः सर्वे कर्णं दुर्वारणं रणे यत्ताः शूराम
हेष्वासाः पर्यरक्षंत सर्वशः ६२ नानावादित्रघोषाश्च प्रादुरासन्विशांपते सिंहनादश्च संजज्ञे शूराणाम
भिगर्जतां ६३ ततः पुनः समाजग्मुरभीताः कुरुपांडवाः युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वय
६४ इति महाभारते कर्णपर्वणि संजय उवाच विदार्य कर्णस्तां सेनां युधिष्ठिरमथाद्रवत् रथस्म
स्थपतीनां सहस्रैः परिवारितः १ नानायुधसहस्राणि प्रेरितान्यरिभिर्वृषः छित्वा बाणशतैरुग्रैस्ता
नविध्यदसंभ्रमात् २ निचकर्त शिरांस्येषां बाहूनूरूंश्च सर्वतः ते हता वसुधां पेतुर्भग्नाश्चान्ये विदुद्र
वुः ३ द्रविडास्तु निषादास्तु पुनः सात्यकिचोदिताः अभ्यद्रवन्जिघांसंतः पत्तयः कर्णमाहवे ४ ते
विबाहुशिरस्त्राणाः प्रहताः कर्णसायकैः पेतुः पृथिव्यां युगपच्छिन्नं शालवनं यथा ५ एवं योध
शतान्याजौ सहस्राण्ययुतानि च हतानीयुर्महीं देहैर्यशसापूरयन्दिशः ६ अथ वैकर्तनं कर्णं र
णे क्रुद्धमिवांतकं रुरुधुः पांडुपांचाला व्याधिं मंत्रौषधैरिव ७ स तान्प्रमृद्याभ्यपतत्पुनरेव यु
धिष्ठिरं मंत्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा ८ स राजगृद्धिभी रुद्धः पांडुपांचालकेकयैः
नाशकत्तानतिक्रांतुं मृत्युर्ब्रह्मविदो यथा ९ ॥

५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततोयुधिष्ठिरःकर्णमहंसैन्येनिवारितं अब्रवीत्परवीरघ्नःक्रोधसंरक्तलोचनः १० कर्णकर्णवृथादृष्टेसूतपु
त्रवचःशृणु सदास्पर्धसिसंग्रामेफाल्गुनेनतरस्विना ११ तथास्मान्बाधसेनित्यंधार्तराष्ट्रमतेस्थितः यद्ब
लंयच्चतेवीर्यंप्रद्वेषोयस्तुपांडुषु १२ तत्सर्वंदर्शयस्वाद्यपौरुषंमहदास्थितः युद्धश्रद्धांचतेद्याहंविने
ष्यामिमहाहवे १३ एवमुक्त्वामहाराजकर्णंपांडुसुतस्तदा सुवर्णपुंखैर्दशभिर्विव्याधायस्मयैःशरैः
१४ तंसूतपुत्रोदशभिःप्रत्यविध्यदरिंदमः वत्सदंतैर्महेष्वासःप्रहसन्निवभारत १५ सोवज्ञायतुनिर्वि
द्धःसूतपुत्रेणमारिष प्रजज्वालततःक्रोधाद्धविषेद्धोयथानलः १६ ततोविस्फार्यसुमहच्चापंहेमप
रिष्कृतं समाधत्तशितंबाणंगिरीणामपिदारणं १७ ततःपूर्णायतोत्कृष्टंयमदंडनिभंशरं मुमोच
त्वरितोराजासूतपुत्रजिघांसया १८ सतुवेगवतामुक्तोबाणोवज्राशनिस्वनः विवेशसहसाकर्णं
सव्येपार्श्वेमहारथं १९ सतेनप्रहारेणपीडितःप्रमुमोहवै स्रस्तगात्रोमहाबाहुर्धनुरुत्सृज्यस्यंदने
२० ततोहाहाकृतंसैन्यंधार्तराष्ट्रबलंमहत् विवर्णमुखभूयिष्ठंकर्णंदृष्ट्वातथागतं २१ सिंहनादश्च
संजज्ञेक्ष्वेलाःकिलकिलास्तथा पांडवानांमहाराजदृष्ट्वाराज्ञःपराक्रमं २२ प्रतिलभ्यतुराधेयःसंज्ञां
नातिचिरादिव दध्रेराजविनाशायमनःक्रूरपराक्रमः २३ सहेमविकृतंचापंविस्फार्यविजयंमह
त् अवाकिरदमेयात्मापांडवंनिशितैःशरैः २४ ततःसराज्ञःपांचाल्यौचक्ररक्षौमहात्मनः जघान
चंद्रदेवंचदंडधारंचसंयुगे २५ तावुभौधर्मराजस्यप्रवीरौपरिपार्श्वतः रथाभ्याशेचकाशेतेचंद्र
स्येवपुनर्वसू २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्ण. युधिष्ठिरः पुनः कर्णमविध्यत्त्रिंशता शरैः सुषेणं सत्यसेनं च त्रिभिस्त्रिभिरताडयत् २७ शल्यं नवत्या वि-
१०० व्याध त्रिसप्तत्या च सूतजं तांश्चास्य गोप्तॄन्विव्याध त्रिभिस्त्रिभिरजिह्मगैः २८ ततः प्रहस्याधिरथिर्विधुन्वा-
नः स कार्मुकं भित्त्वा भल्लेन राजानं विद्ध्वा षष्ट्यानदन्मुदा २९ ततः प्रवीराः पाण्डूनामभ्यधावन्नमर्षि-
ताः युधिष्ठिरं परीप्सन्तः कर्णमभ्यर्दयञ्छरैः ३० सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च धृष्टद्यु-
म्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ३१ यमौ च भीमसेनश्च शिशुपालस्य चात्मजः कारूषा मत्स्यशे-
षाश्च केकयाः काशिकोशलाः ३२ एते च त्वरिता वीरा वसुषेणमताडयन् जनमेजयश्च पाञ्चालः
कर्णं विव्याध सायकैः ३३ वाराहकर्णनाराचैर्नालीकैर्निशितैः शरैः वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्च
टकामुखैः ३४ नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिभिः सर्वतोऽभ्यद्रवन्कर्णं परिवार्य जिघांस-
या ३५ स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः उदैरयद्ब्राह्ममस्त्रं शरैः सम्पूरयन्दिशः ३६ ततः शर-
महाज्वालो वीर्योष्मा कर्णपावकः निर्दहन्पाण्डववनं वीरः पर्यचरद्रणे ३७ स संधाय महास्त्राणि
महेष्वासो महामनाः प्रहस्य पुरुषेन्द्रस्य शरैश्चिच्छेद कार्मुकं ३८ ततः संधाय नवतिं निमेषान्न-
तपर्वणः बिभेद कवचं राज्ञो रणे कर्णः शितैः शरैः ३९ तद्वर्म हेमविकृतं रत्नचित्रं बभौ पतत्
सविद्युदभ्रं सवितुः श्लिष्टं वातहतं यथा ४० तदङ्गात्पुरुषेन्द्रस्य भ्रष्टं वर्म व्यरोचत रत्नैरलंकृतं दि-
व्यं व्यभ्रं निशि यथा नभः ४१ छिन्नवर्मा शरैः पार्थो रुधिरेण समुक्षितः ततः सर्वायसीं शक्तिं चिक्षेपा- १००
धिरथिं प्रति ४२ ॥

तोंजसंतेनीमिवाकाशेशरैश्छिछेदसप्तभिः सांछित्वाभूमिमगमन्महेष्वासस्यसायकैः ४३ ततोबाह्वोर्लला
टेवक्षसिचैवयुधिष्ठिरः चतुर्भिस्तोमरैःकर्णंताडयित्वानदन्मुदा ४४ उद्भिन्नरुधिरःकर्णःक्रुद्धःसर्पइव
श्वसन् ध्वजंचिच्छेदभल्लेनत्रिभिर्विव्याधपांडवं ४५ इषुधीचास्यचिच्छेदरथंचतिलशोछिनत् कालवा
लास्तुयेपार्थंरथंवहन्हयाः ४६ तैर्युक्तंरथमास्थायप्रायाद्राजापराङ्मुखः एवंपार्थोभ्युपाया
त्तोनिहतःपार्ष्णिसारथिः ४७ अशक्नुवन्प्रमुखतःस्थातुंकर्णस्यदुर्मनाः अभिद्रुत्यतुराधेयःपांडुपुत्रं
युधिष्ठिरं ४८ वज्रछत्रांकुशैर्मत्स्यैर्ध्वजकूर्मांबुजादिभिः लक्षणैरुपपन्नेनपांडुनापांडुनंदनं ४९
पवित्रीकर्तुमात्मानंस्कंधेसंस्पृश्यपाणिना ग्रहीतुमिछन्सबलात्कुंतीवाक्यंचसोस्मरत् ५० तंश
ल्यःप्राहमाकर्णगृहीथाःपार्थिवोत्तमं गृहीतमात्रोहत्वातंमांकरिष्यतिभस्मसात् ५१ अब्रवीत्प्र
हसन्राजन्कुत्सयन्निवपांडवं कथंनामकुलेजातःक्षत्रधर्मेव्यवस्थितः ५२ प्रजह्यात्समरेभीतःप्रा
णान्रक्षन्महाहवे नभवान्क्षत्रधर्मेषुकुशलोहीतिमेमतिः ५३ ब्राह्मेबलेभवान्युक्तःस्वाध्यायेयज्ञ
कर्मणि मास्मयुध्यस्वकौंतेयमास्मवीरान्समासदः ५४ माचैतानप्रियंब्रूहिमावैव्रजमहारणं ए
वमुक्त्वाततःपार्थंविसृज्यचमहाबलः ५५ न्यहनत्पांडवींसेनांवज्रहस्तइवासुरीं ततोपायाद्द्रुतं
राजन्व्रीडन्निवजनेश्वरः ५६ अथापयातंराजानंमत्वान्वीयुस्तमच्युतं चेदिपांडवपांचालाःसात्यकि
श्चमहारथः ५७ द्रौपदेयास्तथाशूरामाद्रीपुत्रौचपांडवौ ततोयुधिष्ठिरानीकंदृष्ट्वाकर्णःपराङ्मु
खं ५८ कुरुभिःसहितोवीरःप्रहृष्टःपृष्टतोन्वगात् भेरीशंखमृदंगानांकार्मुकाणांचनिस्वनः ५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. बभूव धार्तराष्ट्राणां सिंहनादरवस्तथा युधिष्ठिरस्तु कौरव्य रथमारुह्य सत्वरं ९० श्रुतकीर्तेर्महाराज
११ दृष्टवान्कर्णविक्रमं काल्यमानं बलं दृष्ट्वा धर्मराजो युधिष्ठिरः ९१ स्वान्योधानब्रवीत्क्रुद्धो निघ्नतैना
न्किमासत ते च राज्ञाभ्यनुज्ञाताः पाण्डवानां महारथाः ९२ भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रव
न् अभवत्तुमुलः शब्दो योधानां तत्र भारत ९३ रथहस्त्यश्वपत्तीनां शस्त्राणां च ततस्ततः उत्तिष्ठत
प्रहरत प्रैताभिपतते ति च ९४ इति ब्रुवाणा ह्यन्योन्यं जघ्नुर्योधा महारणे अभ्रच्छायेव तत्रासीच्छरवृ
ष्टिभिरंबरे ९५ समावृतैर्नरवरैर्निघ्नद्भिरितरेतरं विपताकध्वजच्छत्रा व्यश्वसूतायुधा रणे ९६
व्यंगांगावयवाः पेतुः क्षितौ क्षीणाः क्षितीश्वराः प्रवणादिव शैलानां शिखराणि द्विपोत्तमाः ९७
सारोहा निहताः पेतुर्वज्रभिन्ना इवाद्रयः छिन्नभिन्नविपर्यस्तैर्वर्मालंकारभूषणैः ९८ सारोहास्तु
रगाः पेतुर्हतवीराः सहस्रशः विप्रविद्धायुधाश्चैव विरथाश्च रथैर्हताः ९९ प्रतिवीरैश्च संमर्दे प
त्तिसंघाः सहस्रशः विशालायतताम्राक्षैः पद्मेंदुसदृशाननैः ०० शिरोभिर्युद्धशौण्डानां सर्वतः सं
वृता मही यथा भुवि तथा व्योम्नि निस्वनं शुश्रुवुर्जनाः ०१ विमानैरप्सरःसंघैर्गीतवादित्रनिःस्व
नैः हतानभिमुखान्वीरान्वीरैः शतसहस्रशः ०२ आरोप्यारोप्य गच्छंति विमानेष्वप्सरोगणाः त
द्दृष्ट्वा महदाश्चर्यं प्रत्यक्षं स्वर्गलिप्सया ०३ प्रहृष्टमनसः शूराः क्षिप्रं जघ्नुः परस्परं रथिनो रथिभिः
सार्धं चित्रं युयुधुराहवे ०४ पत्तयः पत्तिभिर्नागाः सह नागैर्हयैर्हयाः एवं प्रवृत्ते संग्रामे ग ११
जवाजिनरक्षये ०५ सैन्येन रजसा वृते स्वे स्वान्जघ्नुः परे परान् कचाकचि युद्धमासीद्दंतादं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिमस्वानपि ७६ मुष्टियुद्धं नियुद्धं च देहपाप्मास्तनाशनं तथावर्त्तत संग्रामे गजवाजिनरक्षये ७७
नराश्वनागदेहेभ्यः प्रसृता लोहितापगा गजाश्वनरदेहान्सा व्युवाह पतितान्बहून् ७८ नराश्वगजसं
बाधे नराश्वगजसादिनां लोहितोदा महाघोरा मांसशोणितकर्दमा ७९ नराश्वगजदेहान्सा वहंती भी
रुभीषणा तस्याः पारमपारं च व्रजंति विजयैषिणः ८० गाधेन चाप्लवंतश्च निमज्जोन्मज्य चापरे ते
तु लोहितदिग्धांगा रक्तवर्मायुधांबराः ८१ सस्नुस्तस्यां पपुश्चास्यां मम्लुश्च भरतर्षभ रथानश्वान्न
रान्नागान्नायुधाभरणानि च ८२ वसनान्यथ वर्माणि वध्यमानाहतानपि भूमिं खं द्यां दिशश्चैव प्रा
यः पश्याम लोहितं ३ लोहितस्य तु गंधेन स्पर्शेन च रसेन च रूपेण चातिरक्तेन शब्देन च विसर्पता ८४
विषादः सुमहानासीत्प्रायः सैन्यस्य भारत तत्तु विप्रहतं सैन्यं भीमसेनमुखास्तदा ८५ भूयः समा
द्रवन्वीराः सात्यकिप्रमुखास्तदा तेषामापततां वेगमविषह्यं महात्मनो ८६ पुत्राणां ते महासै
न्यमासीद्राजन्पराङ्मुखं तत्प्रकीर्णरथाश्वेभं नरवाजिसमाकुलं ८७ विध्वस्तवर्मकवचं प्रवि
द्धायुधकार्मुकं व्यद्रवत्तावकं सैन्यं लोड्यमानं समंततः ८८ सिंहार्दितमिवारण्ये यथा गजकुलं
तथा ८९ इति कर्णपर्वणि ५५२ संजय उवाच तानभिद्रवतो दृष्ट्वा पांडवांस्तावकं बलं दुर्योधनो
महाराज वारयामास सर्वशः १ योधांश्च स्वबलं चैव समंताद्भरतर्षभ क्रोशतस्तव पुत्रस्य न स्म राज
न्यवर्त्तत २ ततः पक्षः प्रपक्षश्च शकुनिश्चापि सौबलः तदा सशस्त्राः कुरवो भीममभ्यद्रवन्रणे ३ क

क.टी.
र्णोपिदृष्ट्वाद्रवतोधार्तराष्ट्रान्समान्तकात् मद्रराजमुवाचेदंयाहिभीमरथंप्रति ४ एवमुक्तस्तुकर्णेनश
१२ ल्योमद्राधिपस्तदा हंसवर्णान्हयानग्र्यान्प्रैषीद्यत्रवृकोदरः ५ तेप्रेरितामहाराजशल्येनाहवशो
भिना भीमसेनरथंप्राप्यसमसज्जंतवाजिनः ६ दृष्ट्वाकर्णंसमायांतंभीमःक्रोधसमन्वितः मतिं
चक्रेविनाशायकर्णस्यभरतर्षभ ७ सोब्रवीत्सात्यकिंवीरंधृष्टद्युम्नंचपार्षतं यूयंरक्षतराजानं
धर्मात्मानंयुधिष्ठिरं ८ संशयान्महतोमुक्तंकथंचिन्मत्ततोमम अग्रतोमेकृतोराजाछिन्नसर्व
परिच्छदः ९ दुर्योधनस्यप्रीत्यर्थंराधेयेनदुरात्मना अद्यतमंतगमिष्यामितस्यदुःखस्यपार्षत १०
हतास्म्यद्यरणेकर्णंसवामांनिहनिष्यति संग्रामेणसुघोरेणसत्यमेतद्ब्रवीमिते ११ राजानम
द्यभवंतोस्मासुभूतंरक्षनिवै नस्मसंरक्षणेसर्वेयतध्वंविगतज्वराः १२ एवमुक्त्वामहाबाहुःप्राया
दाधिरथिंप्रति सिंहनादेनमहतासर्वाःसंनादयन्दिशः १३ दृष्ट्वात्वरितमायांतंभीमंयुद्धाभिनं
दिनं सूतपुत्रमथोवाचमद्राणामीश्वरोविभुः १४ शल्यउवाच पश्यकर्णमहाबाहुंसंक्रुद्धंपांडुनं
दनं दीर्घकालार्जितंक्रोधंमोक्तुकामंत्वयिध्रुवं १५ ईदृशंनास्यरूपंमेदृष्टपूर्वंकदाचन अभिम
न्यौहतेकर्णराक्षसेचघटोत्कचे १६ त्रैलोक्यस्यसमस्तस्यशक्तःक्रुद्धोनिवारणे बिभर्तिसदृशंरूपं
युगांताग्निसमप्रभे १७ संजयउवाच इतिब्रुवतिराधेयंमद्राणामीश्वरेनृप अभ्यवर्ततवैकर्णंक्रो
धदीप्तोवृकोदरः १८ अथागतंतंसंप्रेक्ष्यभीमंयुद्धाभिनंदिनं अब्रवीद्वचनंशल्यंराधेयःप्रहसन्निव ॥ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ किंकरोद्यतदंडेन करेणोद्यतदंडेन मस्त्वत्तेनसमः किमितिकिंशल्यउपमार्षे २५ ॥
यदुक्तं वचनं मे ह्यत्वया मद्रजनेश्वर भीमसेनं प्रति विभो तत्त्वं संनात्र संशयः २० एषशूरश्चवीरश्चक्रोध
नश्चवृकोदरः निरपेक्षः शरीरे च प्राणतश्च बलाधिकः २१ अज्ञातवासं वसता विराटनगरे तदा द्रौ
पद्याः प्रियकामेन केवलं बाहुसंश्रयात् २२ गूढभावं समाश्रित्य कीचकः सगणो हतः सोद्य संग्राम
शिरसि संनद्धः क्रोधमूर्छितः २३ किंकरोद्यतदंडेन मृत्युनापि व्रजेद्रणे चिरकालाभिलषितो मम
यं तु मनोरथः २४ अर्जुनेन समरे हन्यां मां वा हन्याद्धनंजयः समेकदाचिद्द्यैव भवेद्भीमसमागमा
त् २५ निहते भीमसेने वा यदि वा विरथी कृते अभियास्यति मां पार्थस्तन्मे साधु भविष्यति २६ अत्र य
न्मन्यसे प्राप्तं तच्छीघ्रं संप्रधारय एतच्छ्रुत्वा तु वचनं राधेयस्यामितौजसः २७ उवाच वचनं शल्यः सू
तपुत्रं तथागतं अभियाहि महाबाहो भीमसेनं महाबलं २८ निरस्य भीमसेनं तु ततः प्राप्स्यसि फा
ल्गुनं यस्ते कामोभिलषितश्चिरात्संप्रभृति हृद्गतः २९ स वै संपत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते ए
वमुक्ते ततः कर्णः शल्यं पुनरभाषत ३० हंताहमर्जुनं संख्ये मां वा हन्याद्धनंजयः युद्धे मनः समा
धाय याहि यत्र वृकोदरः ३१ संजय उवाच ततः प्रायाद्रथेनाशु शल्यस्तत्र विशांपते यत्र भीमो महे
ष्वासो व्यद्रावयत वाहिनीं ३२ ततस्तूर्यनिनादश्च भेरीणां च महास्वनः उदतिष्ठत राजेंद्र कर्णभी
मसमागमे ३३ भीमसेनोथ संक्रुद्धस्त्वत्सैन्यं दुरासदं नाराचैर्विमलैस्तीक्ष्णैर्दिशः प्राद्रावयद्बली ३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्ण. रोदसीद्यावाभूमी ४२ ॥

९३ ससंनिपातस्तुमुलोघोररूपोविशांपते आसीद्रौद्रोमहाराजकर्णपांडवयोर्मृधे ३५ ततोमुहूर्ताद्राजें
द्रपांडवःकर्णमाद्रवत् समापतंतंसंप्रेक्ष्यकर्णोवैकर्तनोवृषः ३६ आजघानसुसंक्रुद्धोनाराचेनस्त
नांतरे पुनश्चैनममेयात्माशरवर्षैरवाकिरत् ३७ सविद्धःसूतपुत्रेणछादयामासपत्रिभिः विव्याध
निशितैःकर्णंनवभिर्नतपर्वभिः ३८ तस्यकर्णोधनुर्मध्येद्विधाचिच्छेदपत्रिभिः अथैनंछिन्नधन्वा
नंप्रत्यविध्यत्स्तनांतरे ३९ नाराचेनसुतीक्ष्णेनसर्वावरणभेदिना सोन्यत्कार्मुकमादायसूतपुत्रंवृ
कोदरः ४० राजन्मर्मसुमर्मज्ञोविव्याधनिशितैःशरैः ननादबलवन्नादंकंपयन्निवरोदसी ४१
तंकर्णःपंचविंशत्यानाराचेनसमार्पयत् मदोत्कटंवनेदृप्तमुल्काभिरिवकुंजरं ४२ ततःसायक
भिन्नांगःपांडवःक्रोधमूर्छितः संरंभामर्षताम्राक्षःसूतपुत्रवधेप्सया ४३ सकार्मुकेमहावेगंभार
साधनमुत्तमं गिरीणामपिभेत्तारंसायकंसमयोजयत् ४४ विकृष्यबलवच्चापमाकर्णादतिमा
रुतिः तंमुमोचमहेष्वासःक्रुद्धःकर्णजिघांसया ४५ सविसृष्टोबलवताबाणोवज्राशनिस्वनः
अदारयद्रणेकर्णंवज्रवेगोयथाचलं ४६ सभीमसेनाभिहतःसूतपुत्रःकुरूद्वह निषसादरथोप
स्थेविसंज्ञःपृतनापतिः ४७ ततोमद्राधिपोदृष्ट्वाविसंज्ञंसूतनंदनं अपोवाहरथेनाजौकर्णमाह
वशोभिनं ४८ ततःपराजितेकर्णेधार्तराष्ट्रींमहाचमूं व्यद्रावयद्भीमसेनोयथेंद्रोदानवान्पुरा ४९ ९३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिश्रीमहाभारतेकर्णपर्वणि २४२२ धृतराष्ट्रउवाच सुदुष्करमिदंकर्मकृतंभीमेनसंजय येनकर्णो
महाबाहूरथोपस्थेनिपातितः १ कर्णोह्येकोरणेहंतापांडवान्संजयैःसह इतिदुर्योधनःसूतप्राब्रवी
न्मांमुहुर्मुहुः २ पराजितंतुराधेयंदृष्ट्वाभीमेनसंयुगे ततःपरंकिमकरोत्पुत्रोदुर्योधनोमम ३ संजयउवा
च विभ्रांतंप्रेक्ष्यराधेयंसूतपुत्रंमहाहवे पुत्रस्तवमहाराजसोदर्यान्समभाषत ४ शीघ्रंगच्छतभद्रंवो
राधेयंपरिरक्षत भीमसेनभयागाधेमज्जंतंव्यसनार्णवे ५ तेतुराज्ञासमादिष्टाभीमसेनंजिघांसवः
अभ्यवर्तंतसंक्रुद्धाःपतंगाःपावकंयथा ६ श्रुतर्वादुर्धरःक्राथोविवित्सुर्विकटःसमः निषंगीकव
चीपाशीतथानंदोपनंदकौ ७ दुःप्रधर्षःसुबाहुश्चवातवेगसुवर्चसौ धनुर्ग्राहोदुर्मदश्चजलसं
धःशलःसह ८ एतेरथैःपरिवृतावीर्यवंतोमहाबलाः भीमसेनंसमासाद्यसमंतात्पर्यवारयन् ९
तेव्यमुंचन्शरव्रातान्नानालिंगान्समंततः सतैरभ्यर्द्यमानस्तुभीमसेनोमहाबलः १० तेषामापत
तांक्षिप्रंसुतानांतेजनाधिप रथैःपंचदशोसार्द्धंपंचाशादहनद्रथान् ११ विविसोस्तुततःक्रुद्धोभ
ल्लेनापाहरच्छिरः भीमसेनोमहाराजतत्पपातहतंभुवि १२ संकुंडलशिरस्त्राणंपूर्णचंद्रोपमंत
था तंदृष्ट्वानिहतंशूरंभ्रातरःसर्वतःप्रभो १३ अभ्यद्रवंतसमरेभीमंभीमपराक्रमं ततोपराभ्यांभल्ला
भ्यांपुत्रयोस्तेमहाहवे १४ जहारसमरेप्राणान्भीमोभीमपराक्रमः तौधरामन्वपद्येतांवातरुग्णा
विवद्रुमौ १५ विकटश्चसहश्चोभौदेवपुत्रोपमौनृप ततस्तुत्वरितोभीमःक्राथंनिन्येयमक्षयं १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ५७ नाराचेनसतीक्ष्णेनसहतोन्यपतद्भुवि हाहाकारस्ततस्तीव्रःसंबभूवजनेश्वर १७ वध्यमानेषुवीरेषुतव
पुत्रेषुपश्यतु तेषांसुललितैसैन्येपुनर्भीमोमहाबलः १८ नंदोपनंदौसमरेप्रेषयद्यमसादनं तत
स्तेप्राद्रवन्भीताः पुत्रास्तेविह्वलीकृताः १९ भीमसेनंरणेदृष्ट्वाकालांतकयमोपमं पुत्रांस्तेनिहता
न्दृष्ट्वासूतपुत्रःसुदुर्मनाः २० हंसवर्णान्हयान्भूयःप्रैषयद्यत्रपांडवः तेप्रेषितामहाराजमद्रराजेन
वाजिनः २१ भीमसेनरथंप्राप्यसमसज्जंतवेगिताः ससन्निपातस्तुमुलोघोररूपोविशांपते २२
आसीद्रौद्रोमहाराजकर्णपांडवयोर्मृधे दृष्ट्वाममहाराजतौसमेतौमहारथौ २३ आसीद्बुद्धिःक
थंयुद्धमेतदद्यभविष्यति ततोभीमोरणश्लाघीछादयामासपत्रिभिः २४ कर्णंरणेमहाराजपुत्रा
णांतवपश्यतां ततःकर्णोभृशंक्रुद्धोभीमंनवभिरायसैः २५ विव्याधपरमास्त्रज्ञोभल्लैःसन्नतपर्वभिः
आहतःसमहाबाहुर्भीमोभीमपराक्रमः २६ आकर्णपूर्णैर्विशिखैःकर्णंविव्याधसप्तभिः ततःक
र्णोमहाराजआशीविषइवश्वसन् २७ शरवर्षेणमहताछादयामासपांडवं भीमोपितंशरव्रातै
श्छादयित्वामहारथं २८ पश्यतांकौरवेयाणांविननर्दमहाबलः ततःकर्णोभृशंक्रुद्धोदृढमादा
यकार्मुकं २९ भीमंविव्याधदशभिःकंकपत्रैःशिलाशितैः कार्मुकंचास्यचिच्छेदभल्लेननिशि
तेनच ३० ततोभीमोमहाबाहुर्हेमपट्टविभूषितं परिघंघोरमादायमृत्युदंडमिवापरं ३१
कर्णस्यनिधनाकांक्षीचिक्षेपातिबलोनदन् तमापतंतंपरिघंवज्राशनिसमस्वनं ३२ ॥ ४४ ५७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११२२ २२ २४ हीरींद्रयोः वानरेंद्रयोर्वालिसुग्रीवयोरिवयथा ३५ २९ ४१ ॥
विद्धेद्वबहुधाकर्णः शरैराशीविषोपमैः ततःकार्मुकमादाय भीमोदृष्टैतैरनघ ३३ छादयामास
विशिखैःकर्णंपरबलार्दनः ततोभवन्महद्घोरं कर्णपांडवयोर्मृधे ३४ हरींद्रयोरिवमृद्धः परस्पर
वधैषिणोः ततःकर्णोमहाराजभीमसेनंत्रिभिःशरैः ३५ आकर्णमूलंविव्याधदृढमायम्यका
र्मुकं सोतिविद्धोमहेष्वासःकर्णेनबलिनांवरः ३६ घोरमादत्तविशिखंकर्णकायावदारणं त
स्यभित्वातनुत्राणंभित्वाकायंचसायकः ३७ प्राविशद्धरणींराजन्वल्मीकमिवपन्नगः सतेनाति
प्रहारेणव्यथितोविह्वलन्निव ३८ संचचालरथेकर्णःक्षितिकंपेयथाचलः ततःकर्णोमहा
राजरोषामर्षसमन्वितः ३९ पांडवेपंचविंशत्यानाराचानांसमार्पयत् आजघ्नेबहुभिर्बाणैर्ध्व
जमेकेषुणाहनत् ४० सारथिंचास्यभल्लेनप्रेषयामासमृत्यवे छित्वाचकार्मुकंतूर्णंपांडव
स्याशुपत्रिणा ४१ ततोमुहूर्ताद्राजेंद्रनातिकृच्छ्राद्धसन्निव विरथंभीमकर्माणंभीमंकर्णश्च
कारह ४२ विरथोभरतश्रेष्ठप्रहसन्ननिलोपमः गदांगृह्यमहाबाहुरपतत्स्यंदनोत्तमात् ४३
अवप्लुत्यचवेगेनतवसैन्यंविशांपते अथमद्गदयाभीमः शरन्मेघानिवानिलः ४४ नागान्स
मष्टानाराजञ्चेषादंतान्प्रहारिणः अथमत्सहसाभीमःक्रुद्धरूपः परंतपः ४५ दंतवेष्टेषुने
त्रेषुकुंभेषुचकरेषुच मर्मस्वपिचमर्मज्ञस्तान्नागानवधीद्बली ४६ ततस्तेप्राद्रवन्भीताः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्ण. १०५ प्रतीपं प्रहिताः पुनः महामात्रैस्तमावव्रुर्मेघा इव दिवाकरं ४७ तान्स सप्तशतान्नागान्सारोहायुधकेत
नान् भूमिष्ठो गदया जघ्ने वज्रेणेंद्र इवाचलान् ४८ ततः सुबलपुत्रस्य नागानतिबलान्पुनः पोथ
यामास कौंतेयो द्विपंचाशदरिंदमः ४९ तथा रथशतं साग्रं पत्तींश्च शतशोपरान् न्यहनत्पांडवो यु
द्धे तापयंस्तव वाहिनीं ५० प्रताप्यमाने सूर्येण भीमेन च महात्मना तव सैन्यं संचुकोच चर्माग्नावा
हितं यथा ५१ ते भीमभयसंत्रस्तास्तावका भरतर्षभ विहाय समरे भीमं दुद्रुवुर्वै दिशो दश ५२ र
थाः पंचशतास्त्वान्ये ह्रादिनश्चर्मवर्मिणः भीममभ्यद्रवंस्तूर्णं शरपूगैः समंततः ५३ तान्स सप्त
शतान्वीरान्सपताकध्वजायुधान् पोथयामास गदया भीमो विष्णुरिवासुरान् ५४ ततः शकुनि
निर्दिष्टाः सादिनः शूरसंमताः त्रिसाहस्रा अभ्ययुर्भीमं शक्त्यृष्टिप्रासपाणयः ५५ प्रत्युद्गम्य जवेनाशु
साश्वारोहांस्तदारिहा विविधान्विचरन्मार्गान्गदया समपोथयत् ५६ तेषामासीन्महाञ्छब्द
स्ताडितानां च सर्वशः अश्मभिर्वध्यमानानां नागानामिव भारत ५७ एवं सुबलपुत्रस्य त्रिसाह
स्रान्हयोत्तमान् हत्वान्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात् ५८ कर्णोपि समरे राजन्धर्मपुत्र
मरिंदमं शरैः संछादयामास सारथिं चाप्यपातयत् ५९ ततः स प्रद्रुतः संख्ये रथं दृष्ट्वा महारथः
अन्वधावत्किरन्बाणैः कंकपत्रैरजिह्मगैः ६० राजानमभिधावंतं शरैरावृत्य रोदसी क्रुद्धः प्रच्छा
दयामास शरजालेन मारुतिः ६१ संनिवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्शनः भीमं प्रच्छादयामास स १०५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मेनान्निशितैः शरैः ६२ भीमसेनरथव्यग्रं कर्णं भारत सात्यकिः अभ्यर्दयदमेयात्मा पार्ष्णिग्रहणकारणा
त् ६३ अभ्यवर्त्तत कर्णस्तमर्दितोपि शरैर्भृशं तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनां ६४ विसृजंतौ
शरान्दीप्तान्विभ्राजेतां मनस्विनौ ताभ्यां वियति राजेंद्र वितते भीमदर्शने ६५ क्रौंचपृष्ठारुणं रौद्रं बाण
जालं व्यदृश्यत नैव सूर्यप्रभा राजन्न दिशः प्रदिशस्तथा ६६ प्राज्ञासिष्म वयं ते वा शरैर्मुक्तैः सहस्रशः
मध्याह्ने तपतो राजन्भास्करस्य महाप्रभाः ६७ हताः सर्वाः शरौघैस्तैः कर्णपांडवयोस्तथा सौबले
कृतवर्माणं द्रोणिमाधिरथिं कृपं ६८ संसक्तान्पांडवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः तेषामापततां शब्द
स्तीव्र आसीद्विशांपते ६९ उद्धृतानां यथा वृष्ट्या सागराणां भयावहः ते सेने भृशसंसक्ते दृष्ट्वान्योन्यं म
हाहवे ७० हर्षेण महता युक्ते परिगृह्य परस्परं ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ७१ यादृशं न क
दाचिद्धि दृष्टपूर्वं न च श्रुतं बलौघस्तु समासाद्य बलौघं सहसा रणे ७२ उपासर्पत वेगेन वार्यौघ इव
सागरं आसीन्निनादः सुमहान्बाणौघानां परस्परं ७३ गर्जतां सागरौघाणां यथा स्यान्निःस्वनो महा
न् ते तु सेने समासाद्य वेगवत्यौ परस्परं ७४ एकीभावमनुप्राप्ते नद्याविव समागमे ततः प्रववृते यु
द्धं घोररूपं विशांपते ७५ कुरूणां पांडवानां च लिप्सतां सुमहद्यशः कुरूणां गर्जतां तत्र अविच्छेदकृता
गिरः ७६ श्रूयंते विविधा राजन्नामान्युद्दिश्य भारत यस्य यद्धि रणे व्यंगं पितृतो मातृतोपि वा ७७
कर्मतः शीलतो वापि स तच्छ्रावयते युधि तान्दृष्ट्वा समरे शूरांस्तर्जमानान्परस्परम् ७८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.पी. ५१ एकपंचाशतमः तत्रि १२ वृक्षाः स्वृष्टुपः ३ ४ ५ ६ ७ ८ ९ १०

१८९ अभवन्मे मती राजन्नेषामस्तीति जीवितं तेषां दृष्ट्वा तु कृष्णानां वपुंष्यमिततेजसां ७९ अभवन्मे
भयं तीव्रं कथमेतद्भविष्यति ततस्ते पांडवा राजन्कौरवाश्च महारथाः ८० ततक्षुः सायकैस्तीक्ष्णै
र्निघ्नंतो हि परस्परं ८१ इति महाभारते कर्णपर्वणि ५१ संजय उवाच ततियास्ते महाराज पर
स्परवधैषिणः अन्योन्यं समरे जघ्नुः कृतवैराः परस्परं १ रथौघाश्च हयौघाश्च नरौघाश्च समंततः
गजौघाश्च महाराज संसक्ताश्च परस्परं २ गदानां परिघाणां च कणपानां च दिप्यतां प्रासानां भिं
डिपालानां भुशुंडीनां च सर्वशः ३ संपातं चान्वपश्याम संग्रामे भृशदारुणे शलभा इव संपेतुः श
रवृष्टयः समंततः ४ नागा नागान्समासाद्य व्यधमंत परस्परं हया हयांश्च समरे रथिनो रथिनस्तथा
५ पत्तयः पत्तिसंघांश्च हयसंघांश्च पत्तयः पत्तयो रथमातंगान्रथा हस्त्यश्वमेव च ६ नागाश्च सम
रे व्यंगे ममृदुः शीघ्रगान्नृप वध्यतां तत्र शूराणां क्रोशतां च परस्परं ७ घोरमायोधनं जज्ञे पशूनां
वैशसं यथा रुधिरेण समास्तीर्णा भाति भारत मेदिनी ८ शक्रगोपगणाकीर्णा प्रावृषीव यथा ध
रा यथावा वाससी शुक्ले महाराज नरंजिते ९ बिभृयाद्युवती श्यामा तद्वदासीद्वसुंधरा मांसशोणित
चित्रेव शातकुंभमयीव च १० भिन्नानां चोत्तमांगानां बाहूनां चोरुभिः सह कुंडलानां प्रवृद्धानां भूषणा
नां च भारत ११ निष्काणामथ शूराणां शरीराणां च धन्विनां वर्मणां सपताकानां संघास्तत्रापतन्भुवि १२ १८९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२ नगानिभोपमाः नगेषुनितरांभांतितेनगनिभाः पर्वताग्रमास्तेउपमायेषामित्यर्थः १८ २२ ॥
गजागजान्समासाद्यविषाणाग्रैरर्दयन्नृप विषाणाभिहतास्तत्रभ्राजंतेद्विरदास्तथा १३ रुधि
रेणावसिक्तांगागैरिकप्रस्रवाइव यथाभ्राजंतिस्यंदंतः पर्वताधातुमंडिताः १४ तोमरान्भुज
निर्मुक्तान्प्रतीपान्नास्थितान्बहून् हस्तैर्विचेरुस्तेनागाबभंजुश्चापरेतथा १५ नाराचैश्छिन्न
वर्माणोभ्राजंतिस्मगजोत्तमाः हिमागमेयथाराजन्व्यभ्राइवमहीधराः १६ शरैःकनकपुंखै
श्चचित्रारेजुर्गजोत्तमाः उल्काभिःसंप्रदीप्ताग्राः पर्वताइवभारत १७ केचिदभ्याहतानागैर्ना
गानगनिभोपमाः विनेशुःसमरेतस्मिन्सपक्षाइवपर्वताः १८ अपरेप्राद्रवन्नागाःशल्यार्ताव्रण
पीडिताः प्रतिमानैश्चकुंभैश्चपेतुरुर्व्यांमहाहवे १९ विनेदुःसिंहवच्चान्येनदंतोभैरवान्रवान्
बभ्रमुर्बहवोराजंश्चुक्रुशुश्चापरेगजाः २० हयाश्चनिहताबाणैर्हेमभांडविभूषिताः निषेदु
श्चैवमम्लुश्चबभ्रमुश्चदिशोदश २१ अपरेकृष्यमाणाश्चविचेष्टंतोमहीतलेभावान्बहुविधां
श्चक्रुस्ताडिताःशरतोमरैः २२ नरास्तुनिहताभूमौकूजंतस्तत्रमारिष दृष्ट्वाचबांधवानन्ये पितृनन्ये
पितामहान् २३ धावमानान्परांश्चान्येदृष्ट्वान्येतत्रभारत गोत्रनामानिख्यातानिशशंसुरित
रेतरं २४ तेषांछिन्नामहाराजभुजाःकनकभूषणाः उद्वेष्टंतेविचेष्टंतेपतंतेचोत्पतंतिच
२५ निपतंतितथैवान्येस्फुरंतिचसहस्रशः वेगांश्चान्येरणेचक्रुःपंचास्याइवपन्नगाः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ १०८ २० २८ २९ ३० धनुःशरगदाप्रभास्वरत्वाउडुवन्नदत्तत्रसहस्रशीः पांतीस्तदुपाः धनुरादिवउडुपश्लोभाया
ते भुजाभोगिभोगाभश्चंदनाक्ताविशांपते लोहिताद्रंभस्त्ररेजस्तपनीयध्वजाइव २७ वर्तमाने
तथा घोरे संकुले सर्वतोदिशं अविज्ञाताः स्मयुध्यंते विनिघ्नंतः परस्परं २८ भौमेनरजसाकी
र्णेशस्त्रसंपातसंकुले नैवस्वेनपरेराजन्व्यज्ञायंततमोवृताः २९ तथा तदभवद्युद्धं घोररूपं
भयानकं लोहितोदामहानद्यः प्रसस्रुस्तत्रचासकृत ३० शीर्षपाषाणसंछन्नाः केशशैवा
लशाड्वलाः अस्थिमीनसमाकीर्णाधनुःशरगदोडुपाः ३१ मांसशोणितपंकिन्योघोररू
पाः सुदारुणाः नदीःप्रावर्त्तयामासुः शोणितौघविवर्धनी ३२ भीरुवित्रासकारिण्यः शू
राणांहर्षवर्द्धनाः तानद्योघोररूपास्तु नयंत्योयमसादनं ३३ अवगाढान्मज्जयंत्यः क्षत्रस्या
जनयन्भयं क्रव्यादानांनरव्याघ्रनर्दतांतत्रतत्रह ३४ घोरमायोधनेजज्ञे प्रेतराजपुरोप
मं उत्थितान्यगणेयानि कबंधानिसमंततः ३५ नृत्यंति वैभूतगणाः संतृप्तामांसशोणि
तैः पीत्वा चशोणितंतत्रवसांपीत्वाचभारत ३६ मेदोमज्जावसामत्तास्तृप्तामांसस्यचैवहया
वमानाः स्मदृश्यंते काकगृध्रबकास्तथा ३७ शूरास्तुसमरेराजन्भयंत्यक्त्वासुदुस्त्यजं योधव्र
तेसमाख्याताश्चक्रुः
र्मातारइति ३३पस्तत्वेवंदेश्वतापेस्वदतेजसाः ३३ ३४ अगणेयानिगणयितुमशक्यानि ३५ ३६ ॥ १०८

२९ ४० ४१ ४२ द्विपंचाशः १ २ ३ ४ ५ ६ ७ ॥

शरशक्तिसमाकीर्णेक्रव्यादगणसंकुले अचरंतरणेशूराः व्यापयंतःस्वपौरुषं २९ अन्योन्यंश्रा
वयंतिस्मनामगोत्राणिभारत पितृनामानिचरणेगोत्रनामानिवाविभो ४० श्रावयानाश्चबहू
वस्तत्रयोधाविशांपते श्रतस्ततश्चबहवस्तत्रयोधाविशांपते ४१ अन्योन्यमवमर्द्दंतःशक्तितो
मरपट्टिशैः वर्त्तमानेतथायुद्धेघोररूपेसुदारुणे आसीदत्कौरवीसेनाभिन्नानौरिवसागरे ४२
इतिश्रीमहाभारतेकर्णपर्वणि ५१ संजयउवाच वर्त्तमानेतथायुद्धेक्षत्रियाणांनिमज्जने गांडी
वस्यमहाघोषःश्रूयतेयुधिमारिष १ संसप्तकानांकदनमकरोद्यत्रपांडवः कोशलानांतथाराज
न्नारायणबलस्यच २ संसप्तकास्तुसमरेशरवृष्टीःसमंततः अपातयन्पार्थमूर्ध्निजयगृद्धाः
प्रमन्यवः ३ तावृष्टीःसहसाराजंस्तरसाधारयन्प्रभुः व्यगाहतरणेपार्थोविनिघ्नन्रथिनांव
रान् ४ विगाह्यतद्रथानीकंकंकपत्रैःशिलाशितैः आससादततःपार्थःसुशर्माणंवरायुधं
५ सतस्यशरवर्षाणिववर्षरथिनांवरः तथासंसप्तकाश्चैवपार्थबाणैःसमार्पयन् सुशर्माततः
ततःपार्थंविध्वादशभिराशुगैः जनार्दनंत्रिभिर्बाणैरहनद्दक्षिणेभुजे ६ ततोपरेणभल्ले
नकेतुंविव्याधमारिष सवानरवरोराजन्विश्वकर्मकृतोमहान् ७ ननादसुमहान्नादंभी
षयानोजगर्जच कपेस्तुनिनदंश्रुत्वासंत्रस्तातववाहिनी ८ भयंविपुलमाधायनिश्चेष्टासम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
१०८

पद्यत ततः साश्वसूतेभसेनानिश्चेष्टावस्थितान्नृप ९ नानापुष्पसमाकीर्णं यथा चैत्ररथं वनं प्रतिलभ्यत
नः संसप्तकयोधास्ते कुरूत्तम १० अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव परिवव्रुस्ततः सर्वे पांडवस्य म
हारथं ११ निगृह्णंतं प्रचुक्रुशुर्वध्यमानाः शितैः शरैः ते हयान्रथचक्रे च रथेषां चापि मारिष १२ नि
गृहीतुमुपाक्रामन् क्रोधाविष्टाः समंततः निगृह्य तं रथं तस्य योधास्ते तु सहस्रशः निगृह्य बलव
त्सर्वे सिंहनादमथानदन् अपरे जगृहुश्चैव केशवस्य महाभुजौ १३ पार्थमन्ये महाराज रथस्थं
जगृहुर्मुदा केशवस्तु ततो बाहू विधुन्वन्रणमूर्धनि १४ पातयामास तान्सर्वान्दुष्टहस्तीव हस्ति
पान् ततः क्रुद्धो रणे पार्थः संवृतस्तैर्महारथैः १५ निगृहीतं रथं दृष्ट्वा केशवं चाप्यभिद्रुतं रथारू
ढांस्तु सुबहून्पदातींश्चाप्यपातयत् १६ आसन्नांश्च ततो योधाञ्छरैरासन्नयोधिभिः छादयामास
समरे केशवं चेदमब्रवीत् १७ पश्य कृष्ण महाबाहो संसप्तकगणान्बहून् कुर्वाणान्दारुणं क
र्म वध्यमानान्सहस्रशः १८ रथबंधमिमं घोरं पृथिव्यां नास्ति कश्चन यः सहेत पुमांल्लोके मदन्यो
यदुपुंगव १९ इत्येवमुक्त्वा बीभत्सुर्देवदत्तमथाधमत् पांचजन्यं च कृष्णोपि पूरयन्निव रोदसी २०
तं तु शंखस्वनं श्रुत्वा संसप्तकवरूथिनी संचचाल महाराज वित्रस्ता चाद्रवद्भृशं २१ पादबंधं ततश्चक्रे
पांडवः परवीरहा नागमस्त्रं महाराज संप्रकीर्य मुहुर्मुहुः २२ ते बद्धाः पादबंधेन पांडवेन महात्मना
निश्चेष्टा ह्यभवन्राजन्नश्मसारमया इव २३ निश्चेष्टांस्तु ततो योधानवधीत्पांडुनंदनः यथेंद्रः सम

१०८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रैदेवांस्तारकस्यवधेपुरा १४ तेवध्यमानाःसमरेमुमुचुस्तेरथोत्तमे आयुधानिचसर्वाणिविसृष्टनृप

चक्रमुः १५ तेबद्धाःपादबंधेननशेकुश्चेष्टितुंनृप ततस्तानवधीत्पार्थःशरैःसंनतपर्वभिः १६ स

र्वेयोधाहिसमरेभुजगैर्वेष्टिताभवन् यानदिशद्रणेपार्थःपादबंधंचकारह १७ ततःसुशर्माराजेंद्र

गृहीतांवीक्ष्यवाहिनीं सौपर्णमस्त्रंत्वरितःप्रादुश्चक्रेमहारथः १८ ततःसुपर्णाःसंपेतुर्भक्षयंतोभुजं

गमान् तेवैविदुद्रुवुर्नागादृष्ट्वातान्खचरान्नृप १९ बभौबलंतद्विमुक्तंपादबंधाद्विशांपते मेघवृंदा

द्यथामुक्तोभास्करस्तापयन्प्रजाः २० विप्रमुक्तास्ततेयोधाःफाल्गुनस्यरथंप्रति ससृजुर्बाणसंघांश्च

शस्त्रसंघांश्चमारिष २१ विविधानिचशस्त्राणिप्रत्यविध्यंतसर्वशः तांमहास्त्रमयींवृष्टिंसंछिद्यशर

वृष्टिभिः २२ न्यवधीच्चततोयोधान्वासविःपरवीरहा सुशर्मातुततोराजन्बाणेनानतपर्वणा २३

अर्जुनंहृदयेविव्याधविव्याधान्यैस्त्रिभिःशरैः सगाढविद्धोव्यथितोरथोपस्थउपाविशत् २४ ततउ

च्चुक्रुशुःसर्वेहतःपार्थइतिस्मह ततःशंखनिनादाश्चभेरीणांचापिपुष्कलाः २५ नानावादित्रनिन

दाःसिंहनादाश्चजज्ञिरे प्रतिलभ्यततःसंज्ञांश्वेताश्वःकृष्णसारथिः २६ ऐंद्रमस्त्रममेयात्माप्रादुश्च

क्रेत्वरान्वितः ततोबाणसहस्राणिसमुत्पन्नानिमारिष २७ सर्वदिक्षुव्यदृश्यंतनिघ्नंतितववाहिनीं

हयान्रथांश्चसमरेशस्त्रैःशतसहस्रशः २८ वध्यमानेततःसैन्येभयंसुमहदाविशत् संसप्तकगणानां

चगोपालानांचभारत २९ नहितत्रपुमान्कश्चिद्योर्जुनंप्रत्यविध्यत पश्यतांतत्रवीराणामहन्यततबलंतव ३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ हन्यमानमपश्यंश्च निश्चेष्टं स्म पराक्रमे अयुतं तत्र योधानां हत्वा पांडुसुतो रणे ४१ व्यभ्राजत महाराज वि
११९ धूमोग्निरिव ज्वलन् चतुर्दश सहस्राणि यानि दृष्टानि भारत ४२ रथानामयुतं चैव त्रिसाहस्रांश्च दंति
नः ततः संसप्तका भूयः परिवव्रुर्धनंजयं ४३ मर्तव्यमिति निश्चित्य जयं वाप्यनिवर्तनं तत्र युद्धं म
हच्चासीत्तावकानां विशांपते ४४ शूरेण बलिना सार्द्धं पांडवेन किरीटिना ४५ इति श्रीमहाभारते
कर्णपर्वणि २५९ संजय उवाच कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष उलूकः सौबलश्चैव रा
जा च सह सोदरैः १ सीदमानां चमूं दृष्ट्वा पांडुपुत्रभयार्दितां समुज्जह्रुः स्म वेगेन भिन्नां नावमिवार्ण
वे २ ततो युद्धमतीवासीन्मुहूर्त्तमिव भारत भीरूणां त्रासजननं शूराणां हर्षवर्धनं ३ कृपेण शरव
र्षाणि प्रतिमुक्तानि संयुगे सृंजयांश्छादयामासुः शलभानां व्रजा इव ४ शिखंडी च ततः क्रुद्धो गौ
तमं त्वरितो ययौ ववर्ष शरवर्षाणि समंताद्द्विजपुंगवं ५ कृपस्तु शरवर्षं तद्विनिहत्य महास्त्रवित् शि
खंडिनं रणे क्रुद्धो विव्याध दशभिः शरैः ६ ततः शिखंडी कुपितः शरैः सप्तभिराहवे कृपं विव्याध कु
पितं कंकपत्रैरजिह्मगैः ७ ततः कृपः शरैस्तीक्ष्णैः सोतिविद्धो महारथः व्यश्वसूतरथं चक्रे शिखंडि
नमथो द्विजः ८ हताश्वात्तु ततो यानादवप्लुत्य महारथः खड्गं चर्म तथा गृह्य सत्वरं ब्राह्मणं ययौ ९
तमापतंतं सहसा शरैः सन्नतपर्वभिः छादयामास समरे तदद्भुतमिवाभवत् १० तत्राद्भुतमपश्याम
शिलानां प्लवनं यथा निश्चेष्टस्तु रणे राजंछिखंडी समतिष्ठत ११ कृपेणच्छादितं दृष्ट्वा नृपोत्तम शिखं ११९

रितं प्रमुखे यौकृपंतं ४९१ष्टद्युम्नो महारथः १२ धृष्टद्युम्नं ततो यांतं शारद्वतरथं प्रति प्रतिजग्राह वेगेन कृ
तवर्मा महारथः १३ युधिष्ठिरमथायांतं शारद्वतरथं प्रति सपुत्रं सह सैन्येन द्रोणपुत्रो न्यवारयत् १४ न
कुलं सहदेवं च त्वरमाणौ महारथौ प्रतिजग्राहते पुत्रः शरवर्षेण वारयन् १५ भीमसेनं करूषांश्च कै
कयान्सह सृंजयैः कर्णो वैकर्तनो युद्धे वारयामास भारत १६ शिखंडिनस्ततो बाणान्कृपः शारद्वतो
युधि प्राहिणोन्मर्मगा युद्धे दिधक्षरिव मारिष १७ तान्कृपान्प्रेषितांस्तेन समंतात्स्वर्णभूषितान् चिच्छेद
खड्गमाविध्य भ्रामयंश्च पुनः पुनः १८ शतचंद्रं च तच्चर्म गौतमस्तस्य भारत व्यधमत्सायकैस्तूर्णं तत
उच्चुक्रुशुर्जनाः १९ स विचर्मा महाराज खड्गपाणिरुपाद्रवत् कृपस्य वशमापन्नो मृत्योरास्यमिवातुरः
२० शारद्वतशरैर्ग्रस्तं क्लिश्यमानं महाबलः चित्रकेतुसुतो राजन्सुकेतुस्त्वरितो ययौ २१ विकिरन्ब्रा
ह्मणं युद्धे बहुभिर्निशितैः शरैः अभ्यापतदमेयात्मा गौतमस्य रथं प्रति २२ दृष्ट्वा च युक्तं तं युद्धे ब्राह्म
णं चरितव्रतं अपयातस्ततस्तूर्णं शिखंडी राजसत्तम २३ सुकेतुस्तु ततो राजन्गौतमं नवभिः शरैः वि
ध्वा विव्याध सप्तत्या पुनश्चैनं त्रिभिः शरैः २४ अथास्य सशरं चापं पुनश्चिच्छेद मारिष सारथिं च शरेण
स भृशं मर्मस्वताडयत् २५ गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढं सुकेतुं त्रिंशता बाणैः सर्वमर्मस्वता
डयत् २६ स विह्वलितसर्वांगः प्रचचाल रथोत्तमे भूमिकंपे यथा वृक्षश्चचाल कंपितो भृशं २७ चल
तस्तस्य कायात्तु शिरो ज्वलितकुंडलं सोष्णीषं सशिरस्त्राणं क्षुरप्रेणाप्यपातयत् २८ तच्छिरः प्रापतद्भूमौ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. रूपेनाहतमिवामिषं ततोस्यकायोवमथांप्यास्तापतद्भुत ९९ तस्मिन्हतेमहाराजत्रस्तास्तस्यपुत्रे
११ गमाः गौतमंसमरेत्यक्त्वाद्रुवुस्तेदिशोदश १ धृष्टद्युम्नंतुसमरेसंनिवार्यमहारथः कृतवर्माब्रवीद्
धृष्टतिष्ठतिष्ठेतिभारत ११ तदभूत्तुमुलंयुद्धंवृष्णिपार्षतयोरणे आमिषार्थेयथायुद्धंश्येनयोःक्रुद्धयो
र्नृप १२ धृष्टद्युम्नस्तुसमरेहार्दिक्यंनवभिःशरैः आजघानोरसिक्रुद्धःपीडयन्हृदिकात्मजं १३ कृत
वर्मातुसमरेपार्षतेनदृढाहतः पार्षतंसरथंसाश्वंछादयामाससायकैः १४ सरथश्छादितोराजन्धृ
ष्टद्युम्नोनदृश्यते मेघैरिवपरिछन्नोभास्करोजलधारिभिः १५ विधूयतंबाणगणंशरैःकनकभूष
णैः व्यरोचतरणेराजन्धृष्टद्युम्नःकृतव्रणः १६ ततस्तुपार्षतःक्रुद्धःशस्त्रवृष्टिंसुदारुणां कृतवर्मा
णमासाद्यव्यसृजत्पृतनापतिः १७ तामापतंतींसहसाशस्त्रवृष्टिंसुदारुणां शरैरनेकसाहस्रैर्हा
र्दिक्योव्यधमद्युधि १८ दृष्ट्वातुवारितांयुद्धेशस्त्रवृष्टिंदुरासदां कृतवर्माणमासाद्यवारयामासपार्ष
तः १९ सारथिंचास्यतरसाप्राहिणोद्यमसादनं भल्लेनशिततारेणसहतःप्रापतद्रथात् २० धृष्टद्युम्न
स्तुबलवान्जित्वाशत्रुंमहाबलं कौरवान्समरेतूर्णंवारयामाससायकैः २१ ततस्तेतावकायोधा
धृष्टद्युम्नमुपाद्रवन् सिंहनादरवंकृत्वाततोयुद्धमवर्तत २२ इतिश्रीमहाभारतेकर्णपर्वणि १९ ११
संजयउवाच द्रौणिर्युधिष्ठिरंदृष्ट्वाशैनेयेनाभिरक्षितं द्रौपदेयैस्तथाशूरैरभ्यवर्ततहृष्टवत् १ किरन्
इषुगणान्घोरान्स्वर्णपुंखान्शिलाशितान् दर्शयन्विविधान्मार्गान्शिक्षाश्चलघुहस्तवत् २ ततःखंपू ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रयामास शरैर्दिव्यास्त्रमंत्रितैः युधिष्ठिरं च समरे पर्यवार्यत महास्त्रवित् ३ द्रोणायनिः शरछन्नेन शस्त्रा
पतत्किंचन बाणभूतमभूत्सर्वमायोधनशिरो महत् ४ बाणजाले दिवि छन्नं स्वर्णजालविभूषि
तं शुशुभे भरतश्रेष्ठ वितानमिव विष्ठितं ५ तेन छन्नेन भो राजन्बाणजालेन भास्वता अभ्रच्छायेव सं
जज्ञे बाणरुद्धे नभस्तले ६ तत्राश्चर्यमपश्याम बाणभूते तथाविधे न स्म संपतते भूतं किंचिदेवांत
रिक्षगं ७ सात्यकिर्यतमानस्तु धर्मराजश्च पांडवः तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमं ८ लाघ
वं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः व्यस्मयंत महाराज न चैनं प्रत्युदीक्षितुं ९ शेकुस्ते सर्वराजानस्तपं
तमिव भास्करं वध्यमाने ततः सैन्ये द्रौपदेया महारथाः १० सात्यकिर्धर्मराजश्च पांचालाश्चापि संग
ताः संन्यासं तु भयं घोरं द्रोणायनिमुपाद्रवन् ११ सात्यकिः सप्तविंशत्या द्रौणिं विद्ध्वा शिलीमुखैः
पुनर्विव्याध नाराचैः सप्तभिः स्वर्णभूषितैः १२ युधिष्ठिरस्त्रिसप्तत्या प्रतिविंध्यश्च सप्तभिः श्रुतकर्मा
त्रिभिर्बाणैः श्रुतकीर्तिश्च सप्तभिः १३ सुतसोमस्तु नवभिः शतानीकश्च सप्तभिः अन्ये च बहवः शूरा
विव्यधुस्तं समंततः १४ स तु क्रुद्धस्ततो राजन्नाशीविष इव श्वसन् सात्यकिं पंचविंशत्या प्राविध्यत शि
लीमुखैः १५ श्रुतकीर्तिं च नवभिः सुतसोमं च पंचभिः अष्टाभिः श्रुतकर्माणं प्रतिविंध्यं त्रिभिः शरैः १६
शतानीकं च नवभिर्धर्मपुत्रं च पंचभिः तथेतरांस्ततः शूरान्द्वाभ्यां द्वाभ्यामताडयत् १७ श्रुतकीर्तेस्तथा
चापं चिच्छेद निशितैः शरैः अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः १८ द्रोणायनिं त्रिभिर्विद्ध्वा विव्या
धान्यैः शितैः शरैः ततो द्रौणिर्महाराज शरवर्षेण मारिष १९ छादयामास तत्सैन्यं समंताद्भरतर्षभ त

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.
१११

तः पुनरमेयात्मा धर्मराजस्य कार्मुकं २० द्रौणिश्चिच्छेद विहसन्विव्याध च शरैस्त्रिभिः ततो धर्मसुतो
राजन्नन्यद्गृह्य महद्धनुः २१ द्रौणिं विव्याध समरे बाह्वोरुरसि चार्पयत् सात्यकिस्तु ततः क्रुद्धो द्रो
णेः प्रहरतो रणे २२ अर्द्धचंद्रेण तीक्ष्णेन धनुश्छित्वानदद्भृशं छिन्नधन्वा ततो द्रौणिः शक्त्या शक्तिमतां
वरः २३ सारथिं पातयामास शैनेयस्य रथात्द्रुतं अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान् २४ शैने
यं शरवर्षेण छादयामास भारत तस्याश्वाः प्रद्रुताः संख्ये पतिते रथसारथौ २५ तत्र तत्रैव धावंतः समदृश्यंत
भारत युधिष्ठिरपुरोगास्तु द्रौणिं शस्त्रभृतां वरं २६ अभ्यवर्षंत वेगेन विसृजंतः शितान्शरान् आगच्छमानांस्ता
न्दृष्ट्वा क्रुद्धरूपान्परंतप २७ प्रहसन्प्रतिजग्राह द्रोणपुत्रो महारणे ततः शरशतज्वालः सेनाकक्षं महारथः २८
द्रौणिर्ददाह समरे कक्षमग्निर्यथा वने तद्बलं पांडुपुत्रस्य द्रोणपुत्रप्रतापितं २९ चुक्षुभे भरतश्रेष्ठ तिमिनेव न
दीमुखं दृष्ट्वा चैव महाराज द्रोणपुत्रपराक्रमं ३० निहतान्मेनिरे सर्वान्पांडून्द्रोणसुतेन वै युधिष्ठिरस्तु त्वरितो
द्रोणशिष्यो महारथः ३१ अब्रवीद्द्रोणपुत्राय रोषामर्षसमन्वितः नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता ३२
यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ब्राह्मणेन तपः कार्यं दानमध्ययनं तथा ३३ क्षत्रियेण धनुर्ना
म्यं स भवान्ब्राह्मणब्रुवः मिषतस्ते महाबाहो युधि जेष्यामि कौरवान् ३४ कुरुष्व समरे कर्म ब्रह्मबंधुरसि
ध्रुवं एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव ३५ युक्तं तत्वं च संचिंत्य नोत्तरं किंचिदब्रवीत् अनुक्त्वा च ततः
किंचिच्छरवर्षेण पांडवं ३६ छादयामास समरे क्रुद्धोंतक इव प्रजाः स छाद्यमानस्तु तदा द्रोणपुत्रेण मारिष
३७ पार्थोपयातः शीघ्रं वै विहाय महतीं चमूं अपयाते ततस्तस्मिन्धर्मपुत्रे युधिष्ठिरे ३८ द्रोणपुत्रस्ततो राजन् १११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यमयमास्तमहामनाः ततो युधिष्ठिरो राजंस्त्वत्क्राद्देर्णिमहाहवे प्रययौ तावकं सैन्यं युक्तः क्रूरायकर्मणि ४९ इ
ति श्रीमहाभारते कर्णपर्वणि ४९ ॥ संजय उवाच भीमसेनं च पांचाल्यं चेदिकेकयसंवृतं वैकर्त्तनः स्वयं
हृत्वा वारयामास सायकैः १ ततस्तु चेदिकारूषान्संजयांश्च महारथान् कर्णो जघान समरे भीमसेनस्य पश्य
तः २ भीमसेनस्ततः कर्णं विहाय रथसत्तमं प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ३ सूतपुत्रोपि सम
रे पांचालान्केकयांस्तथा संजयांश्च महेष्वासान्निजघान सहस्रशः ४ संसप्तकेषु पार्थश्च कौरवेषु वृको
दरः पांचालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ५ ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोपमैः जग्मु
र्विनाशं समरे राजन्दुर्मंत्रिते तव ६ ततो दुर्योधनः क्रुद्धो नकुलं नवभिः शरैः विव्याध भरतश्रेष्ठ चतु
रश्चास्य वाजिनः ७ ततः पुनरमेयात्मा तव पुत्रो जनाधिप क्षुरेण सहदेवस्य ध्वजं चिच्छेद कांचनं न
कुलस्तु ततः क्रुद्धस्तव पुत्रं च सप्तभिः जघान समरे राजन्सहदेवश्च पंचभिः ८ तावुभौ भरतश्रेष्ठौ
श्रेष्ठौ सर्वधनुष्मतां विव्याधोरसि संक्रुद्धः पंचभिः पंचभिः शरैः ९ ततोपराभ्यां भल्लाभ्यां धनुषी सम
कृंतत यमयोः सहसा राजन्विव्याध च त्रिसप्तभिः १० तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे प्रगृह्य
रेजतुः शूरौ देवपुत्रसमौ युधि ११ ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं युधि शरैर्ववृषतुर्घोरैर्महामेघौ
यथाचलं १२ ततः क्रुद्धो महाराज तव पुत्रो महारथः पांडुपुत्रौ महेष्वासौ वारयामास पत्रिभिः १३ धनु
र्मंडलमेवास्य दृश्यते युधि भारत सायकाश्चैव दृश्यंते निश्चरंतः समंततः १४ आच्छादयद्दिशः सर्वाः
सूर्यस्येवांशवो यथा बाणभूते ततस्तस्मिन्संछन्ने च नभस्तले १५ यमाभ्यां ददृशे रूपं कालांतकयमोप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.री. मे पराक्रमंतत्रदृष्ट्वातवसूनोर्महारथाः १७ सस्मोहयंतिकंयातोमाद्रीपुत्रोस्समेनिरे ततःसेनापतीराज
११२ मोऽवस्थमहारथः १८ पार्षतःप्रययौतत्रयत्रराजासुयोधनः माद्रीपुत्रोततःशूरोव्यतिक्रम्यमहारथो
१९ धृष्टद्युम्नस्तवसुतंवारयामाससायकैः तमविध्यद्दमेयात्मातवपुत्रोह्यमर्षणः २० पांचालंपंच
विंशत्यावहस्सपुरुषर्षभः ततःपुनरमेयात्मातवपुत्रोह्यमर्षणः २१ विध्वाननादपांचालंषष्ट्यापं
चभिरेवच तस्यास्यसशरंचापंहस्तावापंचमारिष २२ क्षुरप्रेणाशुतीक्ष्णेनराजाचिच्छेदसंयुगे तद
पास्यधनुस्त्यक्त्वापांचालःशत्रुकर्षणः २३ अन्यदादत्तवेगेनधनुर्भारसहंनवं प्रज्वलन्निववेगेन
संरंभाद्रुधिरेक्षणः २४ अशोभतमहेष्वासोधृष्टद्युम्नःकृतव्रणः सपंचदशनाराचान्श्वसतःपन्नगा
निव २५ जिघांसुर्भरतश्रेष्ठधृष्टद्युम्नोव्यपासृजत् तेवर्महेमविकृतंभित्वाराज्ञःशिलाशिताः २६
विविशुर्वसुधांवेगात्कंकबर्हिणवाससः सोतिविद्धोमहाराजपुत्रस्तेतिव्यराजत २७ वसंतका
लेसुमहान्प्रफुल्लइवकिंशुकः संच्छिन्नवर्मानाराचप्रहारैर्जर्जरीकृतः २८ धृष्टद्युम्नस्यभल्लेनक्रुद्ध
श्चिच्छेदकार्मुकं अथैनंछिन्नधन्वानंत्वरमाणोमहीपतिः २९ सायकैर्दशभीराजन्भ्रुवोर्मध्येसमार्प
यत् तस्यतेशोभयन्वक्रंकर्मारपरिमार्जिताः ३० प्रफुल्लंपंकजंयद्वद्भ्रमरामधुलिप्सवः तदपास्य
धनुश्छिन्नंधृष्टद्युम्नोमहामनाः ३१ अन्यदादत्तवेगेनधनुर्भल्लांश्चषोडश ततोदुर्योधनस्याश्वान्हत्वासू
तंचपंचभिः ३२ धनुश्चिच्छेदभल्लेनजातरूपपरिष्कृतं रथंसोपस्करंछत्रंशक्तिंखड्गंगदांध्वजं ३३ भल्लै
श्चिच्छेदद्वादशभिःपुत्रस्यतवपार्षतः तपनीयांगदंचित्रंनागंमणिमयंशुभं ३४ ध्वजंकुरुपतेःछिन्नंद ११२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हृष्टाः सर्वपार्थिवाः दुर्योधनेन विरथश्छिन्नवर्मायुधो रणे ३५ भ्रातरः पर्यरक्षंस्तं सोदर्या भरतर्षभ तमारोप्य रथे
राजन्दुःशासनो जनाधिपः ३६ अपाहरदसंभ्रान्तो धृष्टद्युम्नस्य पश्यतः कर्णस्तु सात्यकिं जित्वा राजगृद्धी म
हाबलः ३७ द्रोणहन्तारमुग्रेषुं ससाराभिमुखो रणे तं पृष्ठतोभ्ययात्तूर्णं शैनेयो वितुदन्शरैः ३८ वारणं
जघनोपान्ते विषाणाभ्यामिव द्विपः स भारत महानासीद्योधानां सुमहात्मनो ३९ कर्णपार्षतयोर्मध्ये त्व
दीयानां महारणः न पाण्डवानां नास्माकं योधः कश्चित्पराङ्मुखः ४० प्रत्यदृश्यन्ततः कर्णः पाञ्चालांस्त्वरि
तो ययौ तस्मिन्क्षणे नरश्रेष्ठ गजवाजिजनक्षयः ४१ प्रादुरासीदुभयतो राजन्मध्यगतेहनि पञ्चालास्तु
महाराज त्वरिता विजिगीषवः ४२ ते सर्वेभ्यद्रवन्कर्णं पतत्रिण इव द्रुमं तांस्तथाधिरथिः क्रुद्धो यतमा
नान्मनस्विनः ४३ विचिन्वन्निव बाणाग्रैः समासादयदग्रतः व्याघ्रकेतुं सुशर्माणं चित्रं चोग्रायुधं
जयं ४४ शुक्लं च रोचमानं च सिंहसेनं च दुर्जयं ते वीरा रथमार्गेण परिवव्रुर्नरोत्तमं ४५ सृजन्तं साय
कान्क्रुद्धं कर्णमाहवशोभिनं युध्यमानांस्तु तान्शूरान्मनुजेन्द्रः प्रतापवान् ४६ अष्टाभिरष्टौ राधेयो
भ्यर्दयन्निशितैः शरैः अथापरान्महाराज सूतपुत्रः प्रतापवान् ४७ जघान बहुसाहस्रान्योधान्युद्धवि
शारदान् जिष्णुं च जिष्णुकर्माणं देवापिं भद्रमेव च ४८ दण्डं च राजन्समरे चित्रं चित्रायुधं हरिं सिंहकेतुं
रोचमानं शलभं च महारथं ४९ निजघान सुसंक्रुद्धश्चेदीनां च महारथान् तेषामाददतः प्राणानासी
दाधिरथेर्वपुः ५० शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवोर्जितं महत् तत्र भारत कर्णेन मातङ्गास्ताडिताः शरैः
५१ सर्वतोभ्यद्रवन्भीताः कुर्वन्तो महदाकुलं निपेतुरुर्व्यां समरे कर्णसायकताडिताः ५२ कुर्वन्तो विवि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ शा॰
११२
धान्वाद्रावन्नरव्याघ्राश्वाचलाः गजवाजिमनुष्यैश्च निपतद्भिः समंततः ५२ रथैश्चाधिरथेर्मार्गे समास्ती
र्यत मेदिनी नैवं भीष्मो न च द्रोणो नान्ये युधि तावकाः ५४ चक्रुः स्म तादृशं कर्म यादृशं वै कृतं रणे
सूतपुत्रेण नागेषु हयेषु च रथेषु च ५५ नरेषु च महाराज कृतं स्म कदनं महत् मृगमध्ये यथा सिंहो
दृश्यते निर्भयश्चरन् ५६ पंचालानां तथा मध्ये कर्णोचरदभीतवत् यथा मृगगणान्त्रस्तान्सिंहो
द्रावयते दिशः ५७ पांचालानां रथव्रातान्कर्णो विद्रावयत्तथा सिंहास्यं च यथा प्राप्य न जीवंति मृगाः
क्वचित् ५८ तथा कर्णमनुप्राप्य न जिजीवुर्महारथाः वैश्वानरं यथा प्राप्य प्रतिदह्यंति वै जनाः कर्णा
ग्निना वने तद्वद्दग्धा भारत संजयाः कर्णेन चेदिकैकेयपांचालेषु च भारत ६० विश्राव्य नाम निहता
बहवः शूरसंमताः मम चासीन्मती राजन्दृष्ट्वा कर्णस्य विक्रमं ६१ नैकोप्याधिरथेर्जीवन्पांचाल्यो
मोक्ष्यते युधि पांचालान्व्यधमत्संख्ये सूतपुत्रः पुनः पुनः ६२ पांचालान्वध्यतो निघ्नंतं कर्णं दृष्ट्वा महार
णे अभ्यधावत्सुसंक्रुद्धो धर्मराजो युधिष्ठिरः ६३ धृष्टद्युम्नश्च राधेयं द्रौपदेयाश्च मारिष परिवव्रुर
मित्रघ्नं शतशश्चापरे जनाः ६४ शिखंडी सहदेवश्च नकुलो नाकुलिस्तथा जनमेजयः शिनेर्नप्ता
बहवश्च प्रभद्रकाः ६५ एते पुरोगमा भूत्वा धृष्टद्युम्नस्य संयुगे कर्णमस्यंत मिषुभिर्विजयं रमितौज
सः ६६ तांस्तत्राधिरथिः संख्ये चेदिपांचालपांडवान् एको बहूनभ्यपतद्गरुत्मान्पन्नगानिव ६७ तैः
कर्णस्याभवद्युद्धं घोररूपं विशांपते तादृग्यादृक्पुरा वृत्तं देवानां दानवैः सह ६८ तान्समेतान्महेष्वा
सान्शरवर्षौघवर्षिणः एको ह्यभवद्व्यग्रस्तमांसीव दिवाकरः भीमसेनस्तु संसक्तो राधेयेयपांडवैः ११२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मद्र सर्वतो भ्यहनत क्रुद्धो यमदंडनिभैः शरैः वाह्लीकान्केकयान्मत्स्यान्वासात्यान्मद्रसैंधवान् ६९ एकः सं
ख्ये महेष्वासो योधयन्वह्वशोभत तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः ७० अपतंस्ते हतारोहाः कंपयं
ति स्म मेदिनीं वाजिनश्च हतारोहाः पत्तयश्च गतासवः ७१ शेरते युधि निर्भिन्ना वमंतो रुधिरं बहु सहस्र
शश्च रथिनः पातिताः पतितायुधाः ७२ ते त्वत्ताः समदृश्यंत भीमभीता गतासवः रथिभिः सादिभिः स
तैः पादातैर्वाजिभिर्गजैः ७३ भीमसेनशरैश्छिन्नैराछन्ना वसुधाभवत् तत्स्तंभितमिवातिष्ठद्भीम
सेनभयार्दितं दुर्योधनबलं सर्वं निरुत्साहं कृतव्रणं निश्चेष्टं तुमुले दीनं बभौ तस्मिन्महारणे ७४
प्रसन्नसलिले काले यथा स्यात्सागरो नृप तद्वत्तद्बलं तद्धि निश्चलं समवस्थितं ७५ मन्युवीर्यब
लोपेतं दर्पात्प्रत्यवरोपितं अभवत्तव पुत्रस्य तत्सैन्यं निष्प्रभं तदा ७६ तद्बलं भरतश्रेष्ठ वध्यमानं परस्प
रं रुधिरौघपरिक्लिन्नं रुधिरार्द्रं बभूव ह ७७ जगाम भरतश्रेष्ठ वध्यमानं परस्परं सूतपुत्रो रणे क्रुद्धः
पांडवानामनीकिनीं ७८ भीमसेनः कुरूंश्चापि द्रावयंतौ विरेजतुः वर्तमाने तथा रौद्रे संग्रामे ऽद्भुतद
र्शने ७९ निहत्य पृतनामध्ये संशप्तकगणान्बहून् अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ८०
प्रभग्नं बलमेतद्धि योत्स्यमानं जनार्दन एते द्रवंति सगणाः संशप्तकमहारथाः ८१ अपारयंतो मद्बाणा
न्सिंहशब्दं मृगा इव दीर्यते च महत्सैन्यं सृंजयानां महारणे ८२ हस्तिकक्ष्यो ह्यसौ कृष्ण केतुः कर्णस्य
धीमतः दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः ८३ न च कर्णं रणे शक्ता जेतुमन्ये महारथाः जानी
ते हि भवान्कर्णं वीर्यवंतं पराक्रमे ८४ तत्र याहि यतः कर्णो द्रावयत्येष नो बलं वर्जयित्वा रणे याहि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कै.प. ११४

यतत्रुर्भमहारथे ८६ एवमेतेवचत्तेत्कृष्णयथावातवमेचतेत् एतच्छ्रुत्वावचस्तस्यगोविंदःप्रहसन्निव ८७ अ
ब्रवीदर्जुनंतूर्णंकौरव्यानुजहिपाण्डव ततस्तवमहासैन्यंगोविंदप्रेरिताहयाः ८८ हंसवर्णाःप्रविवि
शुर्वहंतःकृष्णपाण्डवौ केशवप्रेरितैरश्वैःश्वेतैःकांचनभूषणैः ८९ प्रविशद्भिस्तवबलंचतुर्दिशम
भिद्यत मेघस्तनितनिर्घोषःसरथोवानरध्वजः ९० चलत्पताकस्तांसेनांविमानंद्युमिवाविशत्।
तौविदार्यमहासेनांप्रविष्टौकेशवार्जुनौ ९१ क्रुद्धौसंरंभरक्ताक्षौव्यभ्राजेतांमहाद्युती युद्धशौंडौस
माहूतावागतौतौरणाध्वरे ९२ यज्वभिर्विधिनाहूतौमखेदेवाविवाश्विनौ क्रुद्धौतौतुनरव्याघ्रौवेगव
तौबभूवतुः ९३ तलशब्देनरुषितौयथानागौमहावने विगाह्यतुरथानीकमश्वसंघांश्चफाल्गुनः
९४ व्यचरत्तत्तनामध्येपाशहस्तइवांतकः तंदृष्ट्वायुधिविक्रांतंसेनायांतवभारत ९५ संसप्तकगणा
न्पुनः पुत्रस्तेसमचूचुदत् ततोरथसहस्रेणद्विरदानांत्रिभिःशतैः ९६ चतुर्दशसहस्रैस्तुतुरगाणां
महाहवे द्वाभ्यांशतसहस्राभ्यांपदातीनांचधन्विनां ९७ शूराणांलब्धलक्षाणांविदितात्मासमंत
तः अभ्यवर्तंतकौंतेयंछादयंतोमहारथाः ९८ शरवर्षैर्महाराजसर्वतःपांडुनंदनं सछाद्यमानः
समरेशरैःपरबलार्दनः ९९ दर्शयन्रौद्रमात्मानंपाशहस्तइवांतकः निघ्नन्संसप्तकान्पार्थःप्रेक्ष
णीयतरोभवत् १०० ततोविद्युत्प्रभैर्बाणैःकार्तस्वरविभूषितैः निरंतरमिवाकाशमासीच्छन्नंकिरीटि
ना १०१ किरीटिभुजनिर्मुक्तैःसंपतद्भिर्महाशरैः समाच्छन्नंबभौसर्वंकाद्रवेयैरिवप्रभो २ रुक्मपुंखान्प्र
सन्नाग्रान्शरान्सन्नतपर्वणः अवासृजदमेयात्मादिक्षुसर्वासुपाण्डवः ३ महीवियद्दिशःसर्वाःसमुद्रा ११४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गिरयोपिवा स्फुरंतीतिजनाजज्ञुःपार्थस्यतलनिस्वनात् ४ हत्वादशसहस्राणिपार्थिवानांमहारथः
संसप्तकानांकौंतेयःप्रययौत्वरितोभ्ययात् ५ प्रयांतंचसमासाद्यपार्थःकांबोजरक्षितं प्रममाथबला
द्बाणैर्दानवानिववासवः ६ प्रचिछेदाशुभल्लेनद्विषतामाततायिनां शस्त्रपाणींस्तथाबाहूंस्तथापिच
शिरांस्युत ७ अंगांगावयवैश्छिन्नैर्व्यायुधास्तेपतन्भुवि विष्वग्वाताभिसंभग्नाबहुशाखाइवद्रुमाः
८ हस्त्यश्वरथपत्तीनांव्रातान्निघ्नंतमर्जुनं सुदक्षिणादवरजःशरवृष्ट्याभ्यवीवृषत् ९ तस्यास्यतोर्द्ध
चंद्राभ्यांबाहूपरिघसन्निभौ पूर्णचंद्राभवक्त्रंचक्षुरेणाभ्यहरच्छिरः १० सपपाततनोवाहात्स्वलोहि
तपरिस्रवः मनःशिलागिरेःशृंगंवज्रेणेवावदारितं ११ सुदक्षिणादवरजंकांबोजंददृशुर्हतं प्रां
शुंकमलपत्राक्षमत्यर्थंप्रियदर्शनं १२ कांचनस्तंभसदृशंभिन्नंहेमगिरिंयथा ततोभवत्पुनर्युद्धं
घोरमत्यर्थमद्भुतं १३ नानावस्थाश्चयोधानांबभूवुस्तत्रयुध्यतां एकेषुनिहतैरश्वैःकांबोजैर्यवनैः
शकैः १४ शोणिताक्तैस्तदारक्तंसर्वमासीद्विशांपते रथैर्हताश्वसूतैश्चहतारोहैश्चवाजिभिः १५ द्वि
रदैश्चहतारोहैर्महामात्रैर्हतद्विपैः अन्योन्येनमहाराजकृतोघोरोजनक्षयः १६ तस्मिन्प्रपक्षेपक्षेच
निहतेसव्यसाचिना अर्जुनंजयतांश्रेष्ठस्त्वरितोद्रौणिरभ्ययात् १७ विधुन्वानोमहच्चापंकार्तस्वरवि
भूषितं आददानःशरान्घोरान्स्वरश्मीनिवभास्करः १८ क्रोधामर्षविवृत्तास्योलोहिताक्षोबभौबली
अंतकालेयथाक्रुद्धोयमःकिंकरदंडभृत् १९ ततःप्रासृजदुग्राणिशरवर्षाणिसञ्चयशः तैर्विसृष्टै
र्महाराजव्यद्रवत्साद्वीचमूः २० सदृष्ट्वैवतदापार्थसंदनस्थंविशांपते पुनःप्रासृजदुग्राणिशरवा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो॰
११५

र्षाणि मारिष २१ ते ऽपतद्भिर्महावाणैर्द्रोणमुक्तैः समंततः संछादितौ रथस्थौ तावुभौ कृष्णधनंजयौ २२ त
तः शरशतैस्तीक्ष्णैर्भारद्वाजः प्रतापवान् निश्चेष्टौ तावुभौ युद्धे कृत्वा माधवपांडवौ २३ हाहाकृतमभूत्
सर्वस्थावरं जंगमं तथा चराचरस्य गोप्तारौ दृष्ट्वा संछादितौ शरैः २४ सिद्धचारणसंघाश्च संपेतुस्ते समं
ततः चिंतयंतो भवेदद्य लोकानां स्वस्त्यपीति च २५ नमया तादृशो राजन् दृष्टपूर्वः पराक्रमः संग्रामे
यादृशो द्रोणः क्रुद्धो संछादयिष्यतः २६ द्रोणस्य धनुषः शब्दमहितत्रासनं रणे अश्रौषं बहुशो राज
न्सिंहस्य निनदो यथा २७ ज्या चास्य चरतो युद्धे सव्यदक्षिणमस्यतः वियदंबुदमध्यस्था भ्राजमानेव
साभवत् २८ स तथा क्षिप्रकारी च दृढहस्तश्च पांडवः प्रमोहं परमं गत्वा प्रैक्षत द्रोणमंततः २९ विक्र
मे विहितं मेने ह्यात्मनः समहायशाः तस्मात्संसमरे राजन्नवयुरासीत्तदुदंशा ३० द्रोणिपांडवयोर्वर्त्त
र्द्धमाने महारणे वर्द्धमाने च राजेंद्र द्रोणपुत्रे महाबले ३१ हीयमाने च कौंतेये कृष्णो रोषः समाविशत्
स रोषात् निःश्वसन् राजन्निर्दहन्निव चक्षुषा ३२ द्रौणिं ह्यपश्यत् संग्रामे फाल्गुनं च मुहुर्मुहुः ततः क्रुद्धो ब्र
वीत् कृष्णः पार्थं सप्रणयं तदा ३३ अत्यद्भुतमिदं पार्थ तव पश्यामि संयुगे अतिशेते हि यत्र त्वां द्रोणपुत्रो
ऽद्य भारत ३४ कच्चिद्वीर्यं यथा पूर्वं भुजयोर्वा बलं तव कच्चित्ते गांडिवं हस्ते रथे तिष्ठसि चार्जुन ३५ क
च्चित्कुशलिनौ बाहू मुष्टिर्वा न व्यशीर्यत उदीर्यमाणं हि रणे पश्यामि द्रौणिमाहवे ३६ गुरुपुत्र इति ह्ये
नं मानयन् भरतर्षभ उपेक्षां कुरु मा पार्थ नायं कालउपेक्षितुं ३७ एवमुक्तस्तु कृष्णेन गृह्य भल्लांश्चतुर्द
श त्वरमाणस्त्वरा काले द्रौणेर्धनुरथाच्छिनत् ३८ ध्वजं छत्रं पताकां च रथं शक्तिं गदां तथा जत्रुदेशे च

११५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सुषेणोवत्सदंतैरताडयत् ४९ समरेक्षोपरमांगत्वाध्वजयष्टिंसमाश्रितः तंविसंज्ञंमहाराजशत्रुणाभृशपी
डितं ५० अपोवाहरणात्तस्मात्तमायोधनंजयात् एतस्मिन्नेवकालेचविजयःशत्रुतापनः ५१ अहनत्ता
वकंसैन्यंशतशोथसहस्रशः पश्यतस्तस्यवीरस्यतवपुत्रस्यभारत ५२ एवमेषदयोवृत्तस्तावकानांप
रैःसह क्रूरोविशसनोघोरोराजन्दुर्मंत्रितेतव ५३ संसप्तकांश्चकौंतेयःकृतस्त्रोपिवृकोदरः वसुषेणं
सपांचालांस्तेनावधमहारणे ५४ वर्तमानेतथारौद्रेराजन्वीरवरक्षये उत्थितान्यगणेयानिकबंधानि
समंततः ५५ युधिष्ठिरोपिसंग्रामेप्रहारैर्गाढवेदनः क्रोशमात्रमपक्रम्यतस्थौभरतसत्तमः ५६ इति
श्रीमहाभारतेकर्णपर्वणि २७ संजयउवाच दुर्योधनस्ततःकर्णमुपेत्यभरतर्षभ अब्रवीन्मद्रा
जंचतथैवान्यांश्चपार्थिवान् १ यदृच्छयेतत्संप्राप्तंस्वर्गद्वारमपावृतं सुखिनःक्षत्रियाःकर्णलभंतेयु
द्धमीदृशं २ सदृशैःक्षत्रियैःशूरैःशूराणांयुध्यतांयुधि इष्टंभवतिराधेयतदिदंसमुपस्थितं ३ हत्वाच
पांडवान्युद्धेस्फीतामुर्वीमवाप्स्यथ निहतावापरैर्युद्धेवीरलोकमवाप्स्यथ ४ दुर्योधनस्यतच्छ्रुत्वाव
चनंक्षत्रियर्षभाः हृष्टानादानुदक्रोशन्वादित्राणिचसर्वशः ५ ततःप्रमुदितेतस्मिन्दुर्योधनबलेतदा
हर्षयंस्तावकान्योधान्द्रौणिर्वचनमब्रवीत् ६ प्रत्यक्षंसर्वसैन्यानांभवतांचापिपश्यतां न्यस्तशस्त्रोमम
पिताधृष्टद्युम्नेनपातितः ७ सतेनाहममर्षेणमित्रार्थंचापिपार्थिवाः सत्यंवःप्रतिजानामितद्वाक्यंमे
निबोधत ८ धृष्टद्युम्नमहत्वानविमोक्ष्यामिदंशनं अनृतायांप्रतिज्ञायांनाहंस्वर्गमवाप्नुयां ९ अर्जुनो
भीमसेनश्चयोयोधोरक्षिताराणेधृष्टद्युम्नस्यतंसंख्येनिहनिष्यामिसायकैः १० एवमुक्तेततःसर्वासहि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.पं.
११६

ताभारतीचमूः प्रभग्नइवतत्कौंतेयांस्तथातेचापिपांडवाः ११ समेतनिपातोरथयूथपानांवभूववाराजन्नतिभी
महद्भयः जनक्षयःकालयुगांतकल्पःप्रावर्ततात्रैकुरुसंजयानां १२ ततःप्रवृत्तेयुधिसंप्रहारेभूतानिस
र्वाणिसदैवतानि प्रासन्समेतानिसहाप्सरोभिर्दिदृक्षमाणानिनरप्रवीरान् १३ दिव्यैश्चमाल्यैर्विविधैश्च
गंधैर्दिव्यैश्चरत्नैर्विविधैर्नराग्र्यान् रणेस्वकर्माद्भुतःप्रवीरान्नवाकिरन्नप्सरसःप्रहृष्टाः १४ समीर
णस्तांश्चनिषेव्यगंधान्निषेवसर्वानपियोधमुख्यान् निषेव्यमाणास्त्वनिलेनयोधाःपरस्परंचाथरणे
निपेतुः १५ सादिव्यमाल्यैरवकीर्यमाणासुवर्णपुंखैश्चशरैर्विचित्रैः नक्षत्रसंघैरिवचित्रिताद्यौःक्षिति
र्बभौयोधवरैर्विचित्रा १६ ततोंतरिक्षादपिसाधुवादैर्वादित्रघोषैःसमुदीर्यमाणैः ज्याघोषनेमिस्वन
नादचित्रःसमाकुलःसोभवत्संप्रहारः १७ इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांक
र्णपर्वणि २०१४ संजयउवाच एवमेषमहानासीत्संग्रामःपृथिवीक्षितां क्रुद्धेर्जुनेतथाकर्णेभीमसे
नेचपांडवे १ द्रोणपुत्रंपराजित्यजित्वाचान्यान्महारथान् अब्रवीदर्जुनोराजन्वासुदेवमिदंवचः २ प
श्यकृष्णमहाबाहोद्रवंतींपांडवींचमूं कर्णोपश्यचसंग्रामेकालयंतंमहारथान् ३ नचपश्यामिदाशा
र्हधर्मराजंयुधिष्ठिरं नापिकेतुर्युधांश्रेष्ठधर्मराजस्यदृश्यते ४ त्रिभागश्चावशिष्टोयंदिवसस्यजनार्द
न नचमांधार्तराष्ट्रेषुकश्चिद्युध्यतिसंयुगे ५ तस्मात्त्वमत्प्रियंकुर्वन्याहियत्रयुधिष्ठिरः दृष्ट्वाकुशलि
नंयुद्धेधर्मपुत्रंसहानुजं ६ पुनर्योत्स्यामिवार्ष्णेयशत्रुभिःसहसंयुगे ततःप्रायाद्रथेनाशुबीभत्सोर्व
वनाद्धरिः ७ ततोयुधिष्ठिरोराजासंजयाश्चमहारथाः प्रयुध्यंतावकैःसार्द्धंमरणंकृत्वानिवर्तनं ८ ११६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततः संग्रामभूमिं तां वर्त्तमाने जनक्षये प्रवेक्षमाणो गोविंदः सव्यसाचिनमब्रवीत् ९ पश्य पार्थ महारौद्रो
वर्त्तते भरतक्षयः पृथिव्यां क्षत्रियाणां वै दुर्योधनकृते महान् १० पश्य भारत चापानि रुक्मपृष्ठानि धन्वि
नां मृतानामपविद्धानि कपालांश्च महाधनान् ११ जातरूपमयैः पुंखैः शरांश्चानतपर्वणः तैलधौतां
श्च नाराचान्निर्मुक्तानिव पन्नगान् १२ हस्तिदंतत्सरून्खड्गाञ्जातरूपपरिष्कृतान् चर्माणि चापविद्धानि
रुक्मगर्भाणि भारत १३ सुवर्णविकृतान्प्रासान्शक्तीः कनकभूषणाः जांबूनदमयैः पट्टैर्बद्धाश्च वि
पुला गदाः १४ जातरूपमयीश्चर्ष्टीः पट्टिशान्हेमभूषणान् दंडैः कनकचित्रैश्च विप्रविद्धान्परश्वधा
न् १५ अयः कुंतांश्च पतितान्मुसलानि गुरूणि च शतघ्नीः पश्य चित्राश्च विपुलान्परिघांस्तथा १६ चक्रा
णि चापविद्धानि तोमरांश्च महारणे नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः १७ जीवंत इव दृश्यंते ग
तसत्त्वास्तरस्विनः गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् १८ गजवाजिरथक्षुण्णान्पश्य योधान्सह
स्रशः मनुष्यहयनागानां शरशक्त्यृष्टिपट्टिशैः १९ परिघैरायसैर्घोरैरयस्कुंतैः परश्वधैः शरीरैर्बहुभि
न्नैः शोणितौघपरिप्लुतैः २० गतासुभिरमित्रघ्न संवृता रणभूमयः बाहुभिश्चंदनादिग्धैः सांगदैर्हे
मभूषितैः २१ सतलत्रैः सकेयूरैर्भाति भारत मेदिनी सांगुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः २२ ह
स्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनां बद्धचूडामणिवरैः शिरोभिश्च सकुंडलैः २३ पतितैर्वृषभा
क्षाणां विराजति वसुंधरा कबंधैः शोणितादिग्धैश्छिन्नगात्रशिरोधरैः २४ भूर्भाति भरतश्रेष्ठ शांता
र्चिभिरिवाग्निभिः रथांश्च बहुधा भग्नान्हेमकिंकिणिनः शुभान् २५ वाजिनश्च हतान्पश्य निष्कीर्णांत्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰पे॰ नशानाहतान् अनुकर्षानुपासंगान्पताका विविधध्वजान् २६ रथिनां चमहाशंखान्पांडुरांश्च प्रकीर्णका
११७ न् निरस्तजिह्वान्मातंगान्शयानान्पर्वतोपमान् २७ वैजयंतीर्विचित्रांश्च हतांश्च गजवाजिनः वारणा
नां परिस्तोमांस्तथैवाजिनकंबलान् २८ विपाटितविचित्रांश्च रूप्यचित्रान्कुथांकुशान् भिन्नाश्च बहु
धाचैवराम हस्तिभिः पतितैर्गजैः २९ वैडूर्यदंडांश्च शुभान्पतितानंकुशानभुवि बद्धाः सादिभुजाग्रेषु सुव
र्णविकृताः कशाः ३० विचित्रमणिचित्रांश्च जातरूपपरिष्कृतान् अश्वास्तरपरिस्तोमान्रांकवान्पति
तान्भुवि ३१ चूडामणीन्नरेंद्राणां विचित्राः कांचनस्रजः छत्राणि चापविद्धानि चामरव्यजनानि च ३२
चंद्रनक्षत्रभासैश्च वदनैश्चारुकुंडलैः कॢप्तश्मश्रुभिरत्यर्थं वीराणां समलंकृतैः ३३ वदनैः पश्य सं
छन्नां महीं शोणितकर्दमां सजीवांश्च परान्पश्य कूजमानान्समंततः ३४ उपास्यमानान्बहुशो न्यस्त
शस्त्रैर्विशांपते ज्ञातिभिः सहितांस्तत्र रोदमानैर्मुहुर्मुहुः ३५ उत्क्रांतानपरान्योधांश्छादयित्वा तर
स्विनः पुनर्युद्धाय गच्छंति जयगृद्धाः प्रमन्यवः ३६ अपरे तत्र तत्रैव परिधावंति मानवाः ज्ञातिभिः पति
तैः शूरैर्याच्यमानास्तथोदकं ३७ जलार्थं च गताः केचिन्निःप्राणा बहवोर्जुन सन्निवृत्ताश्च ते शूरास्ता
न्दृष्ट्वा विचेतसः ३८ जलं दृष्ट्वा प्रधावंति क्रोशमानाः परस्परं जलं पीत्वा मृतान्पश्य पिबंतोन्यांश्च मा
रिष ३९ परित्यज्य प्रियानन्ये बांधवान्बांधवप्रियाः व्युत्क्रांताः समदृश्यंत तत्र तत्र महारणे ४० तथापरा
न्नरश्रेष्ठ संदष्टौष्ठपुटान्पुनः भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान्समंततः ४१ एवं ब्रुवंस्तदा कृष्णो ययौ यु
द्धि युधिष्ठिरः अर्जुनश्चापि नृपतेर्दर्शनार्थं महारणे ४२ याहियाहीति गोविंदं मुहुर्मुहुरचोदयत् तां ११७

पुरुषर्षभं पार्थस्य दर्शयित्वा च माधवः ४३ त्वरमाणस्ततः कृष्णः पार्थमाह शनैरिदं पश्य पांडवराजानं
मुपयातांश्च पार्थिवान् ४४ कर्णं पश्य महारंगे ज्वलंतमिव पावकं असौ भीमो महेष्वासः संनिवृत्तो र
णं प्रति ४५ तमेते विनिवर्तंते धृष्टद्युम्नपुरोगमाः पांचालसृंजयानां च पांडवानां च यन्मुखं ४६ नि
वृत्तैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत् कौरवान् द्रवतो ह्येष कर्णो रोधयतेर्जुन ४७ अंतकप्रतिमो यो
गे शक्रतुल्यपराक्रमः असौ गच्छति कौरव्य द्रौणिः शस्त्रभृतां वरः ४८ तमेव प्रद्रुतं संख्ये धृष्टद्युम्नो म
हारथः अनुप्रयाति संग्रामे हतान्पश्य च सृंजयान् ४९ सर्वमाह स दुर्धर्षो वासुदेवः किरीटिने ततो रा
जन्महाघोरः प्रादुरासीन्महारणः ५० सिंहनादरवाश्चैव प्रादुरासन्समागमे उभयोः सेनयो राजन्मृत्युं
कृत्वा निवर्तनं ५१ एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते तावकानां परेषां च राजन्दुर्मंत्रिते तव ५२ इ
ति श्रीमहाभारते कर्णपर्वणि २८८९ संजय उवाच ततः पुनः समाजग्मुरभीताः कुरुसृंजयाः युधिष्ठि
रमुखाः पार्थाः सूतपुत्रमुखा वयं १ ततः प्रववृते भीमः संग्रामो लोमहर्षणः कर्णस्य पांडवानां च यम
राष्ट्रविवर्द्धनः २ तस्मिन्प्रवृत्ते संग्रामे तुमुले शोणितोदके संशप्तकेषु शूरेषु किंचिच्छिष्टेषु भारत ३
धृष्टद्युम्नो महाराज सहितः सर्वराजभिः कर्णमेवाभिदुद्राव पांडवाश्च महारथाः ४ आगच्छमानांस्तान्सं
ख्ये प्रहृष्टान्विजयैषिणः दधारैको रणे कर्णो जलौघानिव पर्वतः ५ समासाद्य तु ते कर्णं व्यशीर्यंत महा
रथाः यथाचलं समासाद्य वार्योघाः सर्वतो दिशं ६ तयोरासीन्महाराज संग्रामो लोमहर्षणः धृष्टद्युम्न
स्तु राधेयं शरेणानतपर्वणा ७ ताडयामास समरे तिष्ठ तिष्ठेति चाब्रवीत् विजयं च धनुःश्रेष्ठं विधुन्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰री॰ ११८

नोमहारथः ८ पार्षतस्य धनुश्छित्वा शरांश्चाशीविषोपमान् ताडयामास संक्रुद्धः पार्षतं नवभिः शरैः ९ तेवर्म
हेमविकृतं भित्वा तस्य महात्मनः शोणिताक्ता व्यराजंत शक्रगोपा इवानघ १० तदस्यास्य धनुश्छित्वे धृष्टद्यु
म्नो महारथः अथान्यद्धनुरादाय शरांश्चाशीविषोपमैः द्रोणशत्रुर्महेष्वासो विव्याध निशितैः शरैः ११
तस्य कर्णो महाराज शरं कनकभूषणं प्रेषयामास संक्रुद्धो मृत्युदंडमिवापरं १४ तमापतंतं सहसा घो
ररूपं विशांपते चिच्छेद शतधा राजन् शैनेयः कृतहस्तवत् १५ दृष्ट्वा विनिहतं बाणं शरैः कर्णो विशांप
ते सात्यकिं शरवर्षेण समंतात्पर्यवारयत् १६ विव्याध चैनं समरे नाराचैः सप्तभिः तं प्रत्यविध्यच्छैने
यः शरैर्हेमपरिष्कृतैः १७ ततो युद्धं महाराज चक्षुःश्रोत्रभयानकं आसीद्घोरं च चित्रं च प्रेक्षणीयं समं
ततः १८ सर्वेषां तत्र भूतानां लोमहर्षोभ्यजायत तद्दृष्ट्वा समरे कर्म कर्णशैनेययोर्नृप १९ एतस्मि
न्नंतरे द्रोणिरभ्ययात्सुमहाबले पार्षतं शत्रुदमनं शत्रुवीर्यास्त्रनाशने २० अभ्यभाषत संक्रुद्धो द्रोणिः
परपुरंजयः तिष्ठ तिष्ठाद्य ब्रह्मघ्न न मे जीवन्विमोक्ष्यसे २१ इत्युक्त्वा सुभृशं वीरः शीघ्रकृन्निशितैः शरैः
पार्षतं छादयामास घोररूपैः सुतेजनैः २२ यतमानं परं शक्त्या यतमानो महारथः यथा हि समरे द्रो
णः पार्षतं वीक्ष्य मारिष २३ तथा द्रोणिं रणे दृष्ट्वा पार्षतः परवीरहा नातिहृष्टमना भूत्वा मन्यते मृत्यु
मात्मनः २४ स ज्ञात्वा समरे त्मानं शस्त्रेणावध्यमेव तु जवेनाभ्याययौ द्रोणिं कालः कालमिव क्षये २५
द्रोणिस्तु दृष्ट्वा राजेंद्र धृष्टद्युम्नमवस्थितं क्रोधेन निःश्वसन्वीरः पार्षतं समुपाद्रवत् २६ तावन्योन्यं तु दृष्ट्वै
व संरंभं जग्मतुः परं अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान् २७ धृष्टद्युम्नं समीपस्थं त्वरमाणो विशां ११८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

णते पांचालापसदाद्य त्वां प्रेषयिष्यामि मृत्यवे २८ पापं हि पत्वया कर्म घ्नता द्रोणं पुराकृतं अद्य त्वां तस्य
तेन हंस्ये यथा न कुशलं तथा २९ अरक्ष्यमाणः पार्थेन यदि तिष्ठसि मे युधि नापक्रामसि वा मूढ सत्यमेतद्
ब्रवीमि ते ३० एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान् धृष्टद्युम्न उवाच प्रतिवाक्यं स एवासिर्मामको
दास्यते तव ३१ येनैव ते पितुर्दत्तं यतमानस्य संयुगे यदि तावन्मया द्रोणो निहतो ब्राह्मणब्रुवः ३२ त्वामि
दानीं कथं युद्धे न हनिष्यामि विक्रमात् एवमुक्त्वा महाराज सेनापतिरमर्षणः ३३ निशितेनाथ बाणेन
द्रौणिं विव्याध पार्षतः ततो द्रौणिः सुसंक्रुद्धः शरैः सन्नतपर्वभिः ३४ आच्छादयद्दिशो राजन्धृष्टद्यु
म्नस्य संयुगे नैवान्तरिक्षं न दिशो नापि योधाः समन्ततः ३५ दृश्यन्ते वै महाराज शरैश्छन्नाः सहस्र
शः तथैव पार्षतो राजन्द्रौणिमाहवशोभिनं ३६ शरैः संछादयामास सूतपुत्रस्य पश्यतः राधेयो
पि महाराज पांचालान्सह पाण्डवैः ३७ द्रौपदेयान्युधामन्युं सात्यकिं च महारथं एकः संवारयामास प्रेक्ष
णीयः समन्ततः ३८ धृष्टद्युम्नस्तु समरे द्रौणेश्चिच्छेद कार्मुकं तदपास्य धनुर्द्रौणिरन्यदादाय कार्मुकं
३९ वेगवान्समरे घोरे शरांश्चाशीविषोपमान् स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजं ४० हयान्सूतं र
थं चैव निमेषाद्व्यधमच्छरैः स छिन्नधन्वा विरथो हताश्वो हतसारथिः ४१ खड्गमादत्त विपुलं शतचन्द्रं
च भानुमत् द्रौणिस्तदपि राजेन्द्र भल्लैः क्षिप्रं महारथः ४२ चिच्छेद समरे वीरः क्षिप्रहस्तो दृढायुधः रथाद
नवरूढस्य तदद्भुतमिवाभवत् ४३ धृष्टद्युम्नं हि विरथं हताश्वं छिन्नकार्मुकं शरैश्च बहुधा विद्धमस्त्रैश्च
शकलीकृतं ४४ नाशकद्भरतश्रेष्ठ यतमानो महारथः तस्यान्तमिषुभी राजन्यदा द्रौणिर्न जग्मिवान् ४५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

के॰ द्रो॰ अथसक्रामयन्वीरः पार्षतंतरसितोऽभ्यगात् आसीद्रावस्ततोवेगात्तस्यराजन्महात्मनः ४६ गरुडस्येवपततोजि
११८ घृक्षोःपन्नगोत्तमं एतस्मिन्नेवकालेतुमाधवोर्जुनमब्रवीत् ४७ पश्यपार्थयथाद्रोणिःपार्षतस्यरथेप्र
ति यत्नंकरोतिविपुलंहन्याच्चैनंनसंशयः ४८ तंमोचयमहाबाहोपार्षतंशत्रुकर्शन द्रोणेरास्यमनुप्रा
प्तंमृत्योरास्यगतंयथा ४९ एवमुक्त्वामहाराजवासुदेवःप्रतापवान् प्रेषयत्तुरगांस्तत्रयत्रद्रोणिर्व्यवस्थि
तः ५० तेहयाश्चन्द्रसंकाशाःकेशवेनप्रचोदिताः आपिबन्तइवव्योमजग्मुर्द्रौणिरथंप्रति ५१ दृष्ट्वायातौ
महावीर्यावुभौकृष्णधनंजयौ धृष्टद्युम्नवधेयत्नंचक्रेराजन्महाबलः ५२ विकृष्यमाणंदृष्ट्वैवधृष्टद्युम्नं
नरेश्वर शरांश्चिक्षेपवैपार्थोद्रौणिंप्रतिमहाबलः ५३ तेशराहेमविकृतागांडीवप्रेषिताभृशं द्रौणिं
मासाद्यविविशुर्वल्मीकमिवपन्नगाः ५४ सविद्धस्तैःशरैर्घोरैर्द्रोणपुत्रःप्रतापवान् उत्सृज्यसमरेराज
न्पांचाल्यममितौजसं ५५ रथमारुरुहेवीरोधनंजयशरार्दितः प्रगृह्यचधनुःश्रेष्ठंपार्थंविव्याधसायकैः
५६ एतस्मिन्नंतरेवीरःसहदेवोजनाधिप अपोवाहरथेनाजौपार्षतंशत्रुतापनं ५७ अर्जुनोपिमहाराज
द्रौणिंविव्याधपत्रिभिः तंद्रोणपुत्रःसंक्रुद्धोबाह्वोरुरसिचार्पयत् ५८ क्रोधितस्तुरणेपार्थोनाराचंका
लसंमितं द्रोणपुत्रायचिक्षेपकालदंडमिवापरं ५९ ब्राह्मणस्यांसदेशेसनिपपातमहाद्युतिः सविह्व
लोमहाराजशरवेगेनसंयुगे ६० निषसादरथोपस्थेवैक्लव्यंचपरंययौ ततःकर्णोमहाराजव्याक्षिपद्विजयं
धनुः ६१ अर्जुनंसमरेक्रुद्धःप्रेक्षमाणोमुहुर्मुहुः द्वैरथंचापिपार्थेनकामयानोमहारणे ६२ विह्वलंतंतुवी
साद्यद्रोणपुत्रंचसारथिः अपोवाहरथेनाजौत्वरमाणोरणाजिरात् ६३ अथोत्कृष्टंमहाराजपांचालैर्जित ११८

वै ३

कार्त्तिभिः सोतितं पार्षतं दृष्ट्वा द्रोणपुत्रे च पीडिते ९४ वादित्राणि च दिव्यानि प्रावाद्यंत सहस्रशः सिंहनादो
श्च चक्रुस्ते दृष्ट्वा संख्ये तदद्भुतं ९५ एवं कृत्वाब्रवीत्पार्थो वासुदेवं धनंजयः याहि संसप्तकान्कृष्ण कार्य
मेतत्परं मम ९६ ततः प्रयातो दाशार्हः श्रुत्वा पांडवभाषितं रथेनातिपताकेन मनोमारुतरंहसा ९७
इति श्रीमहाभारते कर्णपर्वणि नवपंचाशत्तमोध्यायः ५९ ५२ संजय० एतस्मिन्नंतरे कृष्णः पार्थं वच
नमब्रवीत् दर्शयन्निव कौंतेयं धर्मराजं युधिष्ठिरं १ एष पांडव ते भ्राता धार्तराष्ट्रैर्महाबलैः जिघांऽ
सुभिर्महेष्वासैर्द्रुतं पार्थानुसार्यते २ तं चानुयांति संरब्धाः पांचाला युद्धदुर्मदाः युधिष्ठिरं महात्मानं
परीप्संतो महाबलाः ३ एष दुर्योधनः पार्थ रथानीकेन दंशितः राजा सर्वस्य लोकस्य राजानमनुधाव
ति ४ जिघांसुः पुरुषव्याघ्र भ्रातृभिः सहितो बली आशीविषसमस्पर्शैः सर्वयुद्धविशारदैः ५ एते जि
घृक्षवो यांति द्विपाश्वरथपत्तयः युधिष्ठिरं धार्तराष्ट्रा रत्नोत्तममिवार्थिनः ६ पश्य सात्वत भीमाभ्यां नि
रुद्धा यि(?)ष्ठिताः पुनः जिहीर्षवो मरुतं दैत्याः शक्राग्निभ्यामिवामृतं ७ एते बहुत्वात्त्वरिताः पुनर्गछं
ति पांडवं समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ८ नदंतः सिंहनादांश्च धमंतश्चापि वारिजान् ब
लवंतो महेष्वासा विधुन्वंतो धनूंषि च ९ मृत्योर्मुखगतं मन्ये कुंतीपुत्रं युधिष्ठिरं हुतमग्नौ च कौंतेय दुर्यो
धनवशंगतं १० यथाविधमनीकं तु धार्तराष्ट्रस्य पांडव नास्य शक्रोपि मुच्येत संप्राप्तो बाणगोचरं ११ दु
र्योधनस्य वीरस्य शरौघान् शीघ्रमस्यतः संक्रुद्धस्यांतकस्येव को वेगं सहेद्रणे १२ दुर्योधनस्य वीरस्य
द्रौणेः शारद्वतस्य च कर्णस्य चेषुवेगो वै पर्वतानपि शातयेत् १३ कर्णेन च कृतो राजा विमुखः शत्रुताप ९
टीका एतस्मिन् १ ५ नरोत्तमं वदान्यं रत्नोत्तममिति पाठे कांचनं तद्धि उत्कृष्टानां मध्ये उत्तमं ६ जिहीर्षवो युधिष्ठिरं हर्तुमिच्छंतः निरुद्धाः संतो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ १२।१३।१४ तस्ययुधिष्ठिरस्यकर्मकर्तव्यंपराजयाख्यंप्रभिर्दुर्योधनादिभिःकृतंनिष्पादितं १९ तत्रदेवः आत्मेवबले
१२० नः बलवान्नत्युद्धस्तत्रकृतोयुद्धविशारदः १४ राधेयःपांडवश्रेष्ठंशक्तःपीडयितुंरणे सहितोधार्त
राष्ट्रस्यपुत्रैःशूरैर्महाबलैः १५ तस्यैभिर्युध्यमानस्यसंग्रामेष्वशोभितात्मनः श्रमेणापिचपार्थस्यकृ
तेकर्ममहारथैः १६ उपवासकृतोराजाभ्रष्टोभरतसत्तमः आत्मेबलेस्थितोह्येषनत्वात्रेह्निबले
विभुः १७ कर्णेनचाभियुक्तोयंभूपतिःशत्रुतापनः संशयंसमनुप्राप्तःपांडवोवैयुधिष्ठिरः १८
नजीवतिमहाराजोमन्येपार्थयुधिष्ठिरः यद्भीमसेनःसहतेसिंहनादममर्षणः १९ नर्दतांधा
र्तराष्ट्राणांपुनःपुनररिंदमः धमतांचमहाशंखान्संग्रामेजितकाशिनां २० युधिष्ठिरंपांडवेयं
हतेतिभरतर्षभ संचोदयत्यसौकर्णोधार्तराष्ट्रान्महाबलान् २१ स्थूणाकर्णेंद्रजालेनपार्थपा
शुपतेनच प्रछादयंतिराजानंशस्त्रजालैर्महारथाः २२ आतुरोह्निकृतोराजासंनिषण्णश्चभार
त यथैनमनुवर्तंतेपांचालाःसहपांडवैः २३ त्वरमाणास्त्वराकालेसर्वशस्त्रभृतांवराः मज्जं
तमिवपातालेवलिनोप्युज्जिहीर्षवः २४ नकेतुर्दृश्यतेराज्ञःकर्णेननिहतःशरैः पश्यतोर्य
मयोःपार्थसात्यकेश्चशिखंडिनः २५ धृष्टद्युम्नस्यभीमस्यशतानीकस्यवाविभो पांचालानांच
सर्वेषांचेदीनांचैवभारत २६ ॥ तमायांत्वात्रेबलेनिष्ठुरत्वे १७ २० हतनाशयतेतिकर्णश्चो
दयतीतिसंबंधः २१ स्थूणाकर्णःगांधर्वःतस्मात्स्थूणाकर्णगांधर्वं इंद्रजालमयंतत् २२ २६ १२०

निषेध्यःचिकित्सकैरसाध्यःसंनिपातइतिपाठे वसेनः १० हस्तिकक्षांकेतुमितिसंबंधः ११ १२ १३ ॥

एषकर्णोरणेपार्थपांडवानामनीकिनीं शरैर्विध्वंसयतिवैनलिनीमिवकुंजरः १७ एतेद्रवंतिर
थिनस्त्वदीयाःपांडुनंदन पश्यपश्ययथापार्थगच्छंत्येतेमहारथाः १८ एतेभारतमातंगाःकर्णे
नाभिहताःशरैः आर्तनादान्विकुर्वाणाविद्रवंतिदिशोदश १९ रथानांद्रवतेवृंदमेतच्चैवसमंत
तः द्राव्यमाणंरणेपार्थकर्णेनामित्रकर्षिणा २० हस्तिकक्ष्यांरणेपश्यचरंतींतत्रतत्रह रथस्थंस
तपुत्रस्यकेतुंकेतुमतांवर २१ असौधावतिराधेयोभीमसेनरथंप्रति किरन्शरशतान्येवविनि
घ्नंस्तववाहिनीं २२ एतान्पश्यचपांचालान्द्राव्यमाणान्महारथान् शक्रेणेवयथादैत्यान्हन्यमाना
न्महाहवे २३ एषकर्णोरणेजित्वापांचालान्पांडुसृंजयान् दिशोविप्रेक्षतेसर्वास्त्वदर्थमितिमेम
तिः २४ यथापार्थधनुःश्रेष्ठंविकर्षन्साधुशोभते शत्रुंजित्वायथाशक्रोदेवसंघैःसमावृतः २५
एतेनर्दंतिकौरव्याहृष्टाकर्णस्यविक्रमं त्रासयंतोरणेपांडून्सृंजयांश्चसमंततः २६ एषसर्वा
त्मनापांडून्त्रासयित्वामहारणे अभिभाषतराधेयःसर्वसैन्यानिमानद २७ अभिद्रवतभद्रंवोद्रु
तंद्रवतकौरवाः यथाजीवन्नवःकश्चिन्मुच्येतयुधिसृंजयः २८ तथाकुरुतसंयत्तावयंयास्याम
पृष्ठतः एवमुक्त्वागतोह्येषपृष्ठतोविकिरंछरान् २९ पश्यकर्णंरणेपार्थश्वेतछत्रविराजितं
उदयंपर्वतंयद्वच्छशांकेनाभिशोभितं ३० पूर्णचंद्रनिकाशेनमूर्ध्निछत्रेणभारत ध्रियमाणेन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ पी॰
१२१

छत्रेणोपलक्षितः ४१ प्रार्थयन्युद्धमितिशेषः ४४ ४९ ॥

ममेष्वीमद्भुतप्रालाकिना ४१ पृषत्कांश्चेतनेकर्णः सकरात्तेविशांपते उग्रमंजवमास्थायधुवमे
क्षतिसंयुगे ४२ पश्यपश्येनंमहाबाहोविधुन्वानंमहद्धनुः शरांश्चाशीविषाकारान्विसृजंतंमहार
णे ४३ असौनिवृत्तोराधेयोदृश्यतेवानरध्वजे प्रार्थयन्समरेपार्थत्वयासहपरंतप ४४ वधाय
चात्मनोभ्येतिदीप्तास्यंशलभोयथा कर्णमेकाकिनंदृष्ट्वारथानीकेनभारत ४५ रिरक्षिषुःसु
संरब्धोधार्तराष्ट्रोनिवर्तते सर्वैःसहैभिर्दुष्टात्मावध्यतांचप्रयत्नतः ४६ त्वयायशश्चराज्यंचसु
खंचोत्तममिच्छता अन्योन्ययोर्विश्रुतयोर्युध्यतोर्यत्नमानयोः ४७ देवासुरेपार्थ मयेदेवदानवयो
रिव त्वांचदृष्ट्वातिसंरब्धं कर्णंचभरतर्षभ ४८ असौदुर्योधनःक्रुद्धोनोत्तरंप्रतिपद्यते आत्मानं
चकृतात्मानंसमीक्ष्यभरतर्षभ ४९ कृतागसंचराधेयंधर्मात्मनियुधिष्ठिरे प्रतिपद्यस्वकौंते
यप्राप्तकालमनंतरं ५० आर्यांयुद्धेमतिंकृत्वाप्रत्येहिरथयूथपं पंचह्येतानिमुख्यानिरथानांर
थसत्तम ५१ यान्यायांतिसमरेवलिनांतिग्मतेजसां पंचनागसहस्राणिद्विगुणावाजिनस्तथा
५२ अभिसंहत्यकौंतेयपदातिप्रयुतानिच अन्योन्यंरक्षितंवीरवलंत्वामभि वर्तते ५३ सूतपु
त्रंमहेष्वासंदर्शयात्मानमात्मना उग्रमंजवमास्थायप्रत्येहिभरतर्षभ ५४ ॥ १२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

असौ कर्णः सुसंरब्धः पंचालानभिधावति केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति ५५ समुपैष्यति पां
चालानिति मन्ये परंतप आख्याचक्षे प्रियं पार्थ नवेदं भरतर्षभ ५६ राजासौ कुशली श्रीमान् धर्मपुत्रो
युधिष्ठिरः असौ भीमो महाबाहुः संनिवृत्तश्चमूमुखे ५७ वृतः संजयसैन्येन शैनेयेन च भारत वध्य
न एते समरे कौरवा निशितैः शरैः ५८ भीमसेनेन कौंतेय पांचालैश्च महात्मभिः सेना हि धार्तराष्ट्र
स्य विमुखा विद्रवद्रणा ५९ विप्रधावति वेगेन भीमस्याभिहता शरैः विपन्नसस्येव मही रुधिरेण स
मुक्षिता ६० भारती भरतश्रेष्ठ सेना कृपणदर्शना निवृत्तेव प्रश्य कौंतेय भीमसेनं युधां पतिं ६१ आशी
विषमिव क्रुद्धं द्रावयंते वरूथिनीं पीतरक्तासितसितास्तारा चंद्रार्कमंडिताः ६२ पताका विप्रकी
र्यंते छत्राण्येतानि चार्जुन सौवर्णा राजताश्चैव तैजसाश्च पृथग्विधाः ६३ केतवो भिनिपात्यंते हस्त
स्वेच प्रकीर्यंते रथेभ्यः प्रपतंत्येते रथिनो विगतासवः ६४ नानावर्णैर्हता बाणैः पंचालैरपलायिभिः
निर्मनुष्यान् गजानश्वान् रथांश्चैव धनंजय ६५ समाद्रवंति पांचाला धार्तराष्ट्रांस्तरस्विनः विमृद्न
ति नरव्याघ्रा भीमसेनबलाश्रयात् ६६ बलं परेषां दुर्धर्षास्त्यक्त्वा प्राणानरिंदम एते नर्दंति पांचाला
ध्माययंति च वारिजान् ६७ अभिद्रवंति चरणोमृदंतः सायकैः परान् पश्य पश्यैषां च माहात्म्यं पांचाला
द्धि पराक्रमात् ६८ धार्तराष्ट्रान्विनिघ्नंति क्रुद्धाः सिंहा इव द्विपान् शस्त्रमाच्छिद्य पात्रूणां सायुधानाति
रायुधाः ६९ तैरेवैतानमोघास्त्रान्निघ्नंति च नदंति च शिरांस्येतानि पात्यंते शत्रूणां बाहवोपि च ७०
रथनागहया वीरा यशस्याः सर्व एव च सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः ७१ पंचालै

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ भीनसमादिष्टं हैमैर्गैर्गैरवेगितैः समभ्रंशं च पराक्रांताः पंचालानां निवारणे ७२ कृपकर्णादयो वीरा ऋ
१२२ षभाणामिवर्षभाः भीमास्त्रेणास्त्रनिर्भग्नान्धार्तराष्ट्रान्महारथान् ७३ धृष्टद्युम्नमुखा वीरा ज्ञात्वेति श
त्रून्सहस्रशः पंचालेष्वभिभनेषु हि षड्भिरपभीर्नदन् ७४ प्रात्तुपतमवस्कंधशरानस्यति मारुतिः
विषमस्थं पिष्टनरा धार्तराष्ट्री महाचमूः ७५ रथाश्वैते सविद्रुता भीमसेनभयार्दिताः पश्य भीमेन
नाराचैर्भिन्ना नागाः पतंत्यमी ७६ वज्रिवज्राहतानीव शिखराणि धराभृतां भीमसेनस्य निर्विद्धा
बाणैः सन्नतपर्वभिः ७७ स्वान्यनीकानि मृद्नंतो द्रवंत्येते महागजाः अभिजानीहि भीमस्य सिंहना
दं सुदुःसहं ७८ नदतोर्ज्जन संग्रामे वीरस्य जितकाशिनः एष नैषादिरभ्येति हि पमुख्येन पांडवं ७९
जिघांसुस्तोमरैः क्रुद्धो दंडपाणिरिवांतकः सतोमरावस्य भुजौ छित्त्वा भीमेन गर्जता ८० नीदोग्र
ग्निरविप्रख्यैर्नाराचैर्दशभिर्हतः हत्वेनं पुनरायाति नागानन्यान्प्रहारिणः ८१ पश्य नीलांबुदनि
भान्महामात्रैरधिष्ठितान् शक्तितोमरसंघातैर्विनिघ्नंतं वृकोदरं ८२ सप्तसप्त च नागांस्तान्वैजयं
तीश्च सध्वजाः निहत्य निशितैर्बाणैश्छिन्नाः पार्थाग्रजेन ते ८३ दशभिर्दशभिश्चैको नाराचैर्निह
तो गजः न चासौ धार्तराष्ट्राणां श्रूयते तिनदस्तथा ८४ पुरंदरसमे क्रुद्धे निघ्नंत्रे भरतर्षभ अक्षौहिण्य
स्तथा तिस्रो धार्तराष्ट्रस्य संहताः ८५ क्रुद्धेन भीमसेनेन नरसिंहेन वारिताः संजय उवाच भीमसेने
न तत्कर्म कृते दृष्ट्वा सुदुष्करे ८६ अर्जुनो व्यधमच्छिष्टानहितान्निशितैः शरैः ते वध्यमानाः समरे सं
शप्तकगणाः प्रभो ८७ प्रभग्नाः समरे भीता दिशो दश महाबलाः शक्रस्यातिथ्यतां गत्वा विशोका १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रथेभवेत्तदा २८ पार्थश्च पुरुषव्याघ्रः शरैः संनतपर्वभिः जघान धार्तराष्ट्रस्य चतुर्विधबलं चमूं २९ इति
श्रीमहाभारते कर्णपर्वणि ९ २५४२ ५८ धृतराष्ट्र उवाच निवृत्ते भीमसेने च पांडवे च युधिष्ठिरे वध्यमाने
बले चापि मामके पांडुसृंजयैः १ द्रवमाणे बलौघे च निराक्रंदे मुहुर्मुहुः किमकुर्वत कुरवस्तन्ममाच
क्ष्व संजय २ संजय उवाच दृष्ट्वा भीमं महाबाहुं सूतपुत्रः प्रतापवान् क्रोधरक्तेक्षणो राजन्भीमसेनम
भ्यद्रवत् ३ तावकं च बलं दृष्ट्वा भीमसेनात्पराङ्मुखं यत्नेन महता राजन्पर्यवस्थापयद्बली ४ व्यव
स्थाप्य महाबाहुस्तव पुत्रस्य वाहिनीं प्रत्युद्ययौ तदा कर्णः पांडवान्युद्धदुर्मदान् ५ प्रत्युद्ययुस्ततो राधे
यं पांडवानां महारथाः धुन्वानाः कार्मुकाण्याजौ विक्षिपंतश्च सायकान् ६ भीमसेनः शिनेर्नप्ता शिखं
डी जनमेजयः धृष्टद्युम्नश्च बलवान्सर्वे चापि प्रभद्रकाः ७ जिघांसंतो नरव्याघ्राः समंतात्तव वाहि
नीं अभ्यद्रवंत संक्रुद्धाः समरे जितकाशिनः ८ तथैव तावका राजन्पांडवानामनीकिनीं अभ्यद्रवंत
त्वरिता जिघांसंतो महारथाः ९ रथनागाश्वकलिलं पत्तिध्वजसमाकुलं बभूव पुरुषव्याघ्र सैन्यमद्भुतदर्शनं १०
शिखंडी च ययौ कर्णं धृष्टद्युम्नः सुतं तव दुःशासनं महाराज महत्या सेनया वृतं ११ नकुलो वृषसेनं तु चित्रसेनं
युधिष्ठिरः उलूकं समरे राजन्सहदेवः समभ्ययात् १२ सात्यकिः शकुनिं चापि द्रौपदेयाश्च कौरवान् अर्जुनं वा
रणे यत्तो द्रोणपुत्रो महारथः १३ युधामन्युं महेष्वासं गौतमोऽभ्यपतद्रणे कृतवर्मा च बलवानुत्तमौजसमाद्रव
त् १४ भीमसेनः कुरून्सर्वान्पुत्रांश्च तव मारिष सहानीकान्महाबाहुरेक एवन्यवारयत् १५ शिखंडी तु ततः
कर्णं विचरंतमभीतवत् भीष्महंता महाराज वारयामास पत्रिभिः १६ प्रतिरुद्धस्ततः कर्णो रोषात्प्रस्फुरिता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कं॰टी॰
१२३

धनुःशिखंडिनंत्रिभिर्बाणैर्भुवोर्मध्येभ्यताडयत् १७ धारयंस्तुसतान्बाणान्शिखंडीबहुशोभत राजतःपर्वतोयद्
त्रिभिःशृंगैर्विवोत्थितैः १८ सोतिविद्धोमहेष्वासःसूतपुत्रेणसंयुगे कर्णंविव्याधसमरेनवत्यानिशितैःशरैः
१९ तस्यकर्णोहयान्हत्वासारथिंचत्रिभिःशरैः उन्ममाथध्वजंचास्यक्षुरप्रेणमहारथः २० हताश्वात्ततोयाना
दवप्लुत्यमहारथः शक्तिंचिक्षेपकर्णायसंक्रुद्धःशत्रुतापनः २१ तांछित्वासमरेकर्णस्त्रिभिर्भरतसायकैः शि
खंडिनमथाविध्यन्नवभिर्निशितैःशरैः २२ कर्णचापच्युतान्बाणान्वर्जयंस्तुनरोत्तमः अपयातस्ततस्तूर्णं
शिखंडीभृशविक्षतः २३ ततःकर्णोमहाराजपांडुसैन्यान्यशातयत् तूलराशिंसमासाद्ययथावायुर्महा
बलः २४ धृष्टद्युम्नोमहाराजतवपुत्रेणपीडितः दुःशासनंत्रिभिर्बाणैःप्रत्यविध्यत्स्तनांतरे २५ तस्यदुः
शासनोबाहुंसव्यंविव्याधमारिष सतेनरुक्मपुंखेनभल्लेनानतपर्वणा २६ धृष्टद्युम्नस्तुनिर्विद्धःशरं
घोरममर्षणः दुःशासनायसंक्रुद्धःप्रेषयामासभारत २७ आपतंतंमहावेगंधृष्टद्युम्नसमीरितं शरं
चिच्छेदपुत्रस्तेत्रिभिरेवविशांपते २८ अथापरैःसप्तदशैर्भल्लैःकनकभूषणैः धृष्टद्युम्नंसमासाद्यबा
ह्वोरुरसिचार्पयत् २९ ततःसपार्षतःक्रुद्धोधनुश्चिच्छेदमारिष क्षुरप्रेणसुतीक्ष्णेनततउच्चुक्रुशुर्जनाः
३० अथान्यद्धनुरादायपुत्रस्तेप्रहसन्निव धृष्टद्युम्नंशरव्रातैःसमंतात्पर्यवारयत् ३१ तवपुत्रस्यतेदृ
ष्ट्वाविक्रमंसुमहात्मनः व्यस्मयंतरणेयोधाःसिद्धाश्चाप्सरसांगणाः ३२ धृष्टद्युम्नंनपश्यामघटमानं
महाबलं दुःशासनेनसंरुद्धंसिंहेनेवमहागजं ३३ ततःसरथनागाश्वाःपांचालाःपांडुपूर्वज सेना
पतिंपरीप्संतोरुरुधुस्तनयंतव ३४ ततःप्रववृतेयुद्धंतावकानांपरैःसह घोरंप्राणभृतांकालेभी १२३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

महद्रूपंपरंतप ३५ नकुलंवृषसेनस्तुभित्त्वापंचभिरायसैः पितुःसमीपेतिष्ठन्वैत्रिभिरन्यैरविध्यत ३६ न
कुलस्तुततःक्रुद्धोवृषसेनंहसन्निव नाराचेनसुतीक्ष्णेनविव्याधहृदयेभृशं ३७ सोतिविद्धोबलवता
शत्रुणाशत्रुकर्षण शत्रुंविव्याधविंशत्यासचतंपंचभिःशरैः ३८ ततःशरसहस्रेणतावुभौपुरुषर्षभौ
अन्योन्यमाच्छादयतामथाभज्यतवाहिनी ३९ सन्दृष्ट्वाप्रद्रुतांसेनांधार्तराष्ट्रस्यसूतजः निवारयामासब
लादनुसृत्यविशांपते ४० निवृत्तेतुततःकर्णेनकुलःकौरवान्ययौ कर्णपुत्रस्तुसमरेहित्वानकुलमेव
तु ४१ जुगोपचक्रंत्वरितोराधेयस्यैवमारिष उलूकस्तुरणेक्रुद्धःसहदेवेनवारितः ४२ तस्याश्वांश्चतु
रोहत्वासहदेवःप्रतापवान् सारथिंप्रेषयामासयमस्यसदनंप्रति ४३ उलूकस्तुततोयानादवप्लुत्यवि
शांपते त्रिगर्तानांबलंतूर्णंजगामपितृनंदनः ४४ सात्यकिःशकुनिंविध्वाविंशत्यानिशितैःशरैः ध्व
जंचिच्छेदभल्लेनसौबलस्यहसन्निव ४५ सौबलस्तस्यसमरेक्रुद्धोराजाप्रतापवान् विदार्यकवचंभूयो
ध्वजंचिच्छेदकांचनं तथैनंनिशितैर्बाणैःसात्यकिःप्रत्यविध्यत सारथिंचमहाराजत्रिभिरेवसमार्प
यत् ४६ अथास्यवाहांस्त्वरितःशरैर्निन्येयमक्षयं ततोवप्लुत्यसहसाशकुनिर्भरतर्षभ ४७ आरु
रोहरथंतूर्णंउलूकस्यमहात्मनः अपोवाहाथशीघ्रंसशैनेयाद्युद्धशालिनः ४८ सात्यकिस्तुरणेरा
जंस्तावकानामनीकिनीं अभिदुद्राववेगेनततोनीकमभज्यत ४९ शैनेयशरसंछन्नंतवसैन्यंवि
शांपते भेजेदशदिशस्तूर्णंन्यपतच्चगतासुवत् ५० भीमसेनंतवसुतोवारयामाससंयुगे तंतुभीमो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क·टी·
१२४

मुहूर्त्तेनव्यसृजत्तरथध्वजे ५१ चक्रेलोकेष्वसंतत्रतेनात्यंतवैजनाः ततोभ्यायान्नृपस्तत्रभीमसेनस्यगो
चरात् ५२ कुरुसैन्यंततःसर्वंभीमसेनमुपाद्रवत् तत्रनादोमहानासीद्भीमसेनेजिघांसतां ५३ युधाम
न्युःकृपंविध्वाधनुरस्याशुचिच्छिदे अथान्यद्धनुरादायकृपःशस्त्रभृतांवरः ५४ युधामन्योर्ध्वजंसूतं
छत्रंचापातयत्ततो ततोपायाद्रथेनैवयुधामन्युर्महारथः ५५ उत्तमौजाश्चहार्दिक्यंभीमंभीमपरा
क्रमं छादयामाससहसामेघोवृष्ट्येवपर्वतं ५६ तद्युद्धमासीत्सुमहद्घोररूपंपरंतप यादृशंनमयादृ
ष्टंदृष्टपूर्वंविशांपते ५७ कृतवर्माततोराजन्नुत्तमौजसमाहवे हृदिविव्याधसहसारथोपस्थउपाविश
त् ५८ सारथिस्तमपोवाहरथेनरथिनांवरं कुरुसैन्यंततःसर्वंभीमसेनमुपाद्रवत् ५९ दुःशासनःसौ
बलश्चगजानीकेनपांडवं महतापरिवार्यैवक्षुद्रकैरभ्यताडयत् ६० ततोभीमःशरशतैर्दुर्योधनमम
र्षणं विमुखीकृत्यतरसागजानीकमुपाद्रवत् ६१ तमापतंतंसहसागजानीकंवृकोदरः दृष्ट्वैवसुभृ
शंक्रुद्धोदिव्यमस्त्रमुदीरयत् ६२ गजैर्गजानभ्यहनद्वज्रेणेंद्रइवासुरान् ततोंतरिक्षंबाणौघैःशलभै
रिवपावकः ६३ छादयामाससमरेगजान्निघ्नन्वृकोदरः ततःकुंजरयूथानिसमेतानिसहस्रशः ६४
व्यधमत्तरसाभीमोमेघसंघानिवानिलः सुवर्णजालापिहितामणिजालैश्चकुंजराः ६५ रेजुरभ्यधिकं
संख्येविद्युत्वंतइवांबुदाः तेवध्यमानाभीमेनगजाराजन्विदुद्रुवुः ६६ केचिद्विभिन्नहृदयाःकुंजरान्यपत
न्भुवि पतितैर्निपतद्भिश्चगजैर्हेमविभूषितैः ६७ अशोभतमहीतत्रविशीर्णैरिवपर्वतैः दीप्ताभैर १२४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लवद्भिश्च पतितैर्गजयोधिभिः ९८ रराज भूमिः पतितैः क्षीणपुण्यैरिव ग्रहैः ततो भिन्नकटा नागा भि
न्नकुंभकरास्तथा ९९ दुद्रुवुः शतशः संख्ये भीमसेनशराहताः केचिद्वमंतो रुधिरं भयार्त्ताः पर्वतोप
माः १० विद्रवंत्यश्च विद्रांगा धातुचित्रा इवाचलाः महाभुजगसंकाशौ चंदनागरुरूषितौ ११ अपश्यं
भीमसेनस्य धनुर्विक्षिपतो भुजौ तस्य ज्यातलनिर्घोषं श्रुत्वाशनिसमस्वनं १२ विमुंचंतः शकृन्मूत्रं
गजाः प्राद्रवन्भृशं भीमसेनस्य तत्कर्म राजन्नेकस्य धीमतः १३ निवृत्तः सर्वभूतानि रुद्रस्येव चरतो
विभो १४ इति श्रीमहाभारते कर्णपर्वणि ४१ संजय उवाच ततः श्वेताश्वसंयुक्ते नारायणसमाहि
ते तिष्ठन्रथवरे श्रीमानर्जुनः समपद्यत १ तद्बलं नृपतिश्रेष्ठ तावकं विजयो रणे व्यक्षोभयदुदीर्णं
स्वं महोदधिमिवानिलः २ दुर्योधनस्तव सुतः श्वेताश्ववाहने अभ्येत्य सहसा क्रुद्धः सैन्यार्द्धेनाभि
संवृतः ३ पर्यवारयदायांतं युधिष्ठिरममर्षणः त्वरप्राणांत्रिसप्तत्या ततो विध्यत्पांडवं ४ अक्रुध्यत
संरब्धो तत्र कुंतीपुत्रो युधिष्ठिरः सभल्लांस्त्रिंशतं तूर्णं तव पुत्रे न्यवेशयत् ५ ततोधावंत कौरव्या जिघृ
क्षंतो युधिष्ठिरं दुष्टभावान्परान् ज्ञात्वा समवेता महारथाः ६ आजग्मुस्ते परीप्संतः कुंतीपुत्रं युधिष्ठिरं न
कुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ७ अक्षौहिण्या परिवृतास्तेभ्यधावन्युधिष्ठिरं भीमसेनश्च समरे
मृद्नंस्तव महारथान् ८ अपयावदभिप्रेप्सुः राजानं शत्रुभिर्वृतं तांस्तु सर्वान्महेष्वासान्कर्णो वैकर्तनो
नृप ९ शरवर्षेण महता प्रत्यवारयदागतान् शरौघान्विसृजंतस्ते प्रेरयंतश्च तोमरान् १० नशेकुर्यत्न

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ वंतोपिराधेयंप्रतिवीक्षितं तांश्चसर्वान्महेष्वासान्सर्वशस्त्रास्त्रपारगः ११ महताशरवर्षेणराधेयःप्रत्यवार
यत् दुर्योधनंचविंशत्याशीघ्रमस्त्रमुदीरयत् १२ प्रविध्यन्कर्णमभ्येत्यसहदेवःप्रतापवान् सविद्धःसह
१२५ देवेनराज्ञाचलसंनिभः १३ प्रभिन्न इवमातंगोरुधिरेणपरिप्लुतः दृष्ट्वातत्रसुतंतत्रगाढविद्धंसुतेजनैः
१४ अभ्यधावद्दृढंक्रुद्धोराधेयोरथिनांवरः दुर्योधनंतदादृष्ट्वाशीघ्रमस्त्रमुदीरयत् १५ तेनयोधिष्ठिरंसै
नमवधीत्पार्थिवेनतथा ततोयोधिष्ठिरंसैन्यंवध्यमानंमहात्मना १६ महसाप्राद्रवद्राजन्सूतपुत्रशरार्दि
तं विविधाविशिखास्तत्रसंपतंतःपरस्परं १७ फलैःपुंखास्समाजघ्नुःसूतपुत्रधनुश्च्युताः अंतरिक्षेश
रौघाणांपततांचपरस्परं १८ संघर्षेणमहाराजपावकःसमजायत ततोदशदिशःकर्णःशलभैरि
वपातिभिः १९ अभ्यघ्नत्तरसाराजन्शरैःपरशरीरगैः रक्तचंदनसंदिग्धौमणिहेमविभूषितौ २०
बाहूव्यस्यदितन्कर्णःपरमास्त्रविदर्शयन् ततःसर्वादिशोराजन्सायकैर्विप्रमोहयन् २१ अपीडय
द्दृशंकर्णोधर्मराजंयुधिष्ठिरं ततःक्रुद्धोमहाराजधर्मपुत्रोयुधिष्ठिरः २२ निशितैरिषुभिःकर्णंपं
चाशद्भिःसमार्पयत् बाणांधकारमभवत्तद्युद्धंघोरदर्शनं २३ हाहाकारोमहानासीत्तावकानांवि
शांपते वध्यमानेतदासैन्येधर्मपुत्रेणमारिष २४ सायकैर्विविधैस्तीक्ष्णैःकंकपत्रैःशिलाशितैः भ
ल्लैरनेकैर्विविधैःशक्त्यृष्टिमुशलैरपि २५ यत्रयत्रसधर्मात्मादुष्टांदृष्टिंव्यसर्जयत् तत्रतत्रव्यशीर्यं
तत्तावकाभरतर्षभ २६ कर्णोपिभृशसंक्रुद्धोधर्मराजंयुधिष्ठिरं नाराचैरर्द्धचंद्रैश्चवत्सदंतैश्चसंयुगे २७ १२५

अमर्षी क्रोधनश्चैव रोषप्रस्फुरिताननः सायकैरप्रमेयात्मा युधिष्ठिरमभिद्रवत् २८ युधिष्ठिरस्त्वपि शातै
स्वर्णपुंखैः शितैः शरैः प्रहसन्निव तं कर्णं कंकपत्रैः शिलाशितैः २९ उरस्य विध्यद्राजानं त्रिभिर्भल्लैश्च
पांडवं सपीडितो भृशं तेन धर्मराजो युधिष्ठिरः ३० उपविश्य रथोपस्थे सूतं याहीत्यचोदयत् आक्रोशंतत
तः सर्वे धार्तराष्ट्राः सराजकाः ३१ गृह्णीध्वमिति राजानमभ्यधावंत सर्वशः ततः शताः सप्तदश केके
यानां प्रहारिणां ३२ पांचालैः सहिता राजन्धार्तराष्ट्रान्न्यवारयन् तस्मिंस्तत्तुमुले युद्धे वर्तमाने जनक्ष
ये ३३ दुर्योधनश्च भीमश्च समेयातां महाबलौ ३४ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैया
सिक्यां कर्णपर्वणि ३५ संजय उवाच कर्णोपि शरजालेन केकयानां महारथान् अधमत्स्वरमे
ष्वासानग्रतः पर्यवस्थितान् १ तेषां प्रयतमानानां राधेयस्य निवारणे रथान्पंचशतान्कर्णः प्राहिणो
द्यमसादनं २ अविषह्यं ततो दृष्ट्वा राधेयं युधि योधिनः भीमसेनमुपागच्छन्कर्णबाणप्रपीडिताः ३
रथानीकं विदार्यैव शरजालैरनेकधा कर्ण एकरथेनैव युधिष्ठिरमुपाद्रवत् ४ सेनानिवेशमार्छंतं
मार्गणैः क्षतविक्षतं यमयोर्मध्यगं वीरं शनैर्यांतं विचेतसं ५ समासाद्य तु राजानं दुर्योधनहितेप्स
या सूतपुत्रस्त्रिभिस्तीक्ष्णैर्विव्याध परमेषुभिः ६ तथैव राजा राधेयं प्रत्यविध्यत्स्तनांतरे शरैस्त्रिभि
श्च यंतारं चतुर्भिश्चतुरो हयान् ७ चक्ररक्षौ तु पार्थस्य माद्रीपुत्रौ परंतपौ तावप्यधावतां कर्णं राजा
नं मावधीरिति ८ तौ पृथक्शरवर्षाभ्यां राधेयमभ्यवर्षतां नकुलः सहदेवश्च परमं यत्नमास्थि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. तौ ९ तथैवतौप्रत्यविध्यत्सूतपुत्रःप्रतापवान् भल्लाभ्यांपीतधाराभ्यांमहात्मानावरिंदमौ १० दंतवर्णा
१२६ स्तथाराधेयोनिजघानमनोजवान् युधिष्ठिरस्यसंग्रामेकालवालान्हयोत्तमान् ११ ततोपरेणभल्लेनशि
रस्त्राणमपातयत् कौंतेयस्यमहेष्वासःप्रहसन्निवसूतजः १२ तथैवनकुलस्यापिहयान्हत्वाश्वता
पवान् ईषांधनुश्चविच्छेदमाद्रीपुत्रस्यधीमतः १३ तौहताश्वौहतरथौपांडवौशरविक्षतौ भ्रातरावारु
रुहतुःसहदेवरथंतदा तौदृष्ट्वामातुलस्तत्रविरथौपरवीरहा १४ अभ्यभाषतराधेयंमद्रराजोनुकं
पया योद्धव्यमद्यपार्थेनफाल्गुनेनत्वयासह किमर्थंधर्मराजेनयुध्यसेभृशरोषितः क्षीणशस्त्रा
स्त्रकवचःक्षीणबाणोविबाणधिः १५ श्रांतसारथिवाहश्चछन्नोस्त्रैरिभिस्तथा पार्थमासाद्यराधे
यउपहास्योभविष्यसि १६ एवमुक्तोपिकर्णस्तुमद्रराजेनसंयुगे तथैवकर्णःसंरब्धोयुधिष्ठिरम
ताडयत् १७ शरैस्तीक्ष्णैःपराविध्यन्माद्रीपुत्रौचपांडवौ प्रहस्यसमरेकर्णश्चकारविमुखंशरैः १८
ततःशल्यःप्रहस्येदंकर्णंपुनरुवाचह रथस्थमतिसंरब्धंयुधिष्ठिरवधेरतं १९ यदर्थंधार्तराष्ट्रे
णसततंमानितोभवान् तंपार्थंजहिराधेयकिंतेहत्वायुधिष्ठिरं २० शंखयोर्ध्मायतोःशब्दःसुम
हानेषकृष्णयोः श्रूयतेचापघोषोयंप्रावृषीवांबुदस्यह २१ असौनिघ्नन्रथोदारानर्जुनःशरवृष्टि
भिः सर्वांग्रसतिनःसेनांकर्णपश्यैनमाहवे २२ पृष्ठरक्षौचशूरस्ययुधामन्यूत्तमौजसौ उत्तरंचा
स्यवैशूरश्चक्रंरक्षतिसात्यकिः २३ धृष्टद्युम्नस्तथाचास्यचक्रंरक्षतिदक्षिणं भीमसेनश्चवैराजा १२६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धार्त्तराष्ट्रेणयुध्यते २४ यथानहन्यात्तंभीमः सर्वेषांनोयथाप्रमतो तथाराधेयक्रियतांराजामुच्येतनो
यथा २५ यथैवंनेभीमसेनेनग्रस्तमाहवशोभिनं यदित्वासाधमुच्येतविस्मयः सुमहानभूत् २६
परित्राय्येनमभ्येत्यसंप्राप्तंपरमंगतं किंनमाद्रीसुतौहत्वाराजानंचयुधिष्ठिरं २७ इतिशल्यवचःश्रु
त्वाराधेयःपृथिवीपते दृष्ट्वादुर्योधनंचैवभीमग्रस्तंमहाहवे २८ राजगृद्धीभृशंचैवशल्यवा।
क्यप्रचोदितः अजातशत्रुमुत्सृज्यमाद्रीपुत्रौचपांडवौ २९ तवपुत्रंपरित्रातमभ्यधावतवीर्यवान्
२ मद्रराजप्रणुदितैरश्वैराकाशगैरिव ३० गतेकर्णेतुकौंतेयःपांडुपुत्रोयुधिष्ठिरः अपायाज्जवनैरश्वैः
सहदेवश्चमारिष ३१ ताभ्यांससहितस्तूर्णंव्रीडन्निवनरेश्वरः प्राप्यसेनानिवेशंचमार्गणैःक्षतवि
क्षतः ३२ अवतीर्णोरथात्तूर्णमाविशच्छयनंशुभं अपनीतशल्यःसुभृशंहृच्छल्याभिनिपीडितः ३३
सोब्रवीद्भ्रातरौराजामाद्रीपुत्रौमहारथौ अनीकंभीमसेनस्यपांडवावाशुगच्छतं ३४ जीमूतइवनर्द
न्युध्यतेसवृकोदरः ततोन्यंरथमास्थायनकुलोरथपुंगवः ३५ सहदेवश्चतेजस्वीभ्रातरौशत्रु
कर्षणौ तुरगैरग्र्यरंहोभिर्यात्वाभीमस्यशुष्मिणौ ३६ अनीकेसहितौतत्रभ्रातरौसमवस्थितौ ३७
इतिश्रीमहाभारतेकर्णपर्वणि ११८ संजयउवाच द्रोणिस्तुरथवंशेनमहतापरिवारितः अपतत्स
हसाराजन्यत्रपार्थोव्यवस्थितः १ तमापतंतंसहसाशूरैःशौरिसहायवान् दधारसहसापार्थोवे।
लेवमकरालयं २ ततःक्रुद्धोमहाराजद्रोणपुत्रःप्रतापवान् अर्जुनंवासुदेवंचछादयामासस।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
१२८

यकैः ३ अवच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथाः विस्मयं परमं गत्वा प्रैक्षन्त कुरवस्तदा ४ अर्जुनस्तु त
तो दिव्यमस्त्रं चक्रे हसन्निव तदस्त्रं वारयामास ब्राह्मणो युधि भारत ५ यद्यद्धि व्यादिशद्युद्धे पांडवोस्त्रं जि
घांसया तत्तदस्त्रं महेष्वासो द्रोणपुत्रो व्यशातयत् ६ अस्त्रयुद्धे ततो राजन्वर्त्तमाने महाभये अपश्याम
रणे द्रौणिं व्यात्ताननमिवांतकं ७ स दिशः प्रदिशश्चैव छादयित्वा ह्यजिह्मगैः वासुदेवं त्रिभिर्बाणैर
विध्यद्दक्षिणे भुजे ८ ततोर्जुनो हयान्हत्वा सर्वांस्तस्य महात्मनः चकार समरे भूमिं शोणितौघतरं
गिणीं ९ सर्वलोकवहां रौद्रां परलोकवहां नदीं सरथान्रथिनः सर्वान्पार्थचापच्युतैः शरैः १० द्रौ
णेरपहृतान्संख्ये ददृशुः स च तां तथा प्रावर्तयन्महाघोरां नदीं परवहां तथा ११ तयोस्तु व्याकुले यु
द्धे द्रौणेः पार्थस्य दारुणे अमर्यादं योधयंतः पर्यधावंत पृष्ठतः १२ रथैर्हताश्वसूतैश्च हतारोहै
श्च वाजिभिः द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः १३ पार्थेन समरे राजन्कृतो घोरो जनक्षयः नि
हता रथिनः पेतुः पार्थचापच्युतैः शरैः १४ हयाश्च पर्यधावंत मुक्तयोक्त्रास्ततस्ततः तद्दृष्ट्वा कर्म
पार्थस्य द्रौणिराहवशोभिनः १५ अर्जुनं जयतां श्रेष्ठं त्वरितोभ्येत्य वीर्यवान् विधुन्वानो महच्चा
पं कार्तस्वरविभूषितं १६ अवाकिरत्ततो द्रौणिः समंतान्निशितैः शरैः भूयोर्जुनं महाराज द्रौणि
रायम्य पत्रिणा १७ वक्षोदेशे भृशं पार्थं ताडयामास निर्दयं सोतिविद्धो रणे तेन द्रोणपुत्रेण भारत
१८ गांडीवधन्वा प्रसभं शरवर्षैरुदारधीः संछाद्य समरे द्रौणिं चिच्छेदास्य च कार्मुकं १९ ॥ १२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सछिन्नधन्वापरिघंवज्रस्पर्शसमंयुधि आदायविक्षेपतदाद्रोणपुत्रः किरीटिने २० तमापतंतंपरिघं
जांबूनदपरिष्कृतं चिच्छेदसहसाराजन्प्रहसन्निवपांडवः २१ सपपातततोभग्नोनिकृत्तः पार्थसा
यकैः विकीर्णः पर्वतोराजन्यथावज्रेणताडितः २२ ततः क्रुद्धोमहाराजद्रोणपुत्रोमहारथः ऐंद्रे
णचास्त्रवेगेनबीभत्सुंसमवाकिरत् २३ तस्येंद्रजालावततंसमीक्ष्यपार्थोराजन्गांडीवमाददेसः
ऐंद्रंजालंप्रत्यहनत्तमस्त्रीवरास्त्रमादायमहेंद्रसृष्टं २४ विदार्यतज्जालमहेंद्रमुक्तंपार्थस्ततोद्रौ
णिरथंक्षणेन प्रच्छादयामासततोभ्युपेत्यद्रौणिस्तदापार्थशराभिभूतः २५ विगाह्यतांपांडवबा
णवृष्टिंशरैःपरंनामततःप्रकाश्य शतेनकृष्णंसहसाभ्यविध्यत्त्रिभिःशतैरर्जुनेनक्षुद्रकाणां २६
ततोर्जुनःसायकानांशतेनगुरोःसुतंमर्मसुनिर्बिभेद अश्वांश्चसूतंचतथाधनुर्ज्यामवाकिरत्पश्यतांता
वकानां २७ सविध्वामर्मसुद्रौणिंपांडवःपरवीरहा सारथिंचास्यभल्लेनरथनीडादपातयत् २८ ससं
गृह्यस्वयंवाहान्कृष्णौप्राच्छादयच्छरैः तत्राद्भुतमपश्यामद्रौणेराशुपराक्रमं २९ प्रायच्छत्तुरगान्यच्च
फाल्गुनंचाप्ययोधयत् तदस्यसमरेराजन्सर्वेयोधाःअपूजयन् ३० ततःप्रहस्यबीभत्सुर्द्रौणपुत्रस्य
संयुगे क्षिप्रंरश्मीनथाश्वानांक्षुरप्रैश्चिच्छिदेजयः ३१ प्राद्रवंस्तुरगास्तेतुशरवेगप्रपीडिताः ततोभू
न्निनदोघोरस्तवसैन्यस्यभारत ३२ पांडवास्तुजयंलब्ध्वातवसैन्यंसमाद्रवन् समंतान्निशितान्बाणा
न्विमुंचंतोजयैषिणः ३३ पांडवैस्तुमहाराजधार्तराष्ट्रीमहाचमूः पुनःपुनरथोवीरैःसंयुगेजितका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्ण०
१२८

णिभिः ३४ पश्यतां ते महाराज पुत्राणां चित्रयोधिनां शकुनेः सौबलेयस्य कर्णस्य च विशांपते ३५ वार्यमा
णा महासेना पुत्रैस्तव जनेश्वर न चातिष्ठत संग्रामे पीड्यमाना समंततः ३६ तथा योधैर्महाराज पलाय
द्भिः समंततः अभवद्व्याकुलं भीतं पुत्राणां ते महद्बलं ३७ तिष्ठ तिष्ठेति च ततः सूतपुत्रस्य जल्पतः
नावतिष्ठति सा सेना वध्यमाना महात्मभिः ३८ अथोत्क्रुष्टं महाराज पांडवैर्जितकाशिभिः धार्तराष्ट्र
बलं दृष्ट्वा विद्रुतं वै समंततः ३९ ततो दुर्योधनः कर्णमब्रवीत्प्रणयादिव पश्य कर्ण महासेनां पांचा
लैरर्दितां भृशं ४० त्वयि तिष्ठति संत्रासात्पलायनपरायणा एतज्ज्ञात्वा महाबाहो कुरुष्वाममरिंदम
४१ सहस्राणि च योधानां त्वामेव पुरुषोत्तम क्रोशंति समरे वीर द्राव्यमाणानि पांडवैः ४२ एतच्छ्रुत्वा
विराधेयो दुर्योधनवचो महत् मद्रराजमिदं वाक्यमब्रवीत्प्रहसन्निव ४३ पश्य मे भुजयोर्वीर्यमस्त्रा
णां च जनेश्वर अद्य हन्मि रणे सर्वान्पांचालान्पांडुभिः सह ४४ वाहयाश्वान्नरव्याघ्र भद्रेणैव नसंश
यः एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान् ४५ प्रगृह्य विजयं वीरो धनुः श्रेष्ठं पुरातनं सज्यं कृत्वा
महाराज संमृज्य च पुनः पुनः ४६ संनिवार्य च योधान्स सत्येन शपथेन च प्रायोजयदमेयात्मा भा
र्गवास्त्रं महाबलः ४७ ततो राजन्सहस्राणि प्रयुतान्यर्बुदानि च कोटिशश्च शरास्तीक्ष्णा निरगच्छ
न्महामृधे ४८ ज्वलितैस्तैः शरैर्घोरैः कंकबर्हिणवाजितैः संछन्ना पांडवी सेना न प्राज्ञायत किंचन ४९
हाहाकारो महानासीत्पांचालानां विशांपते पीडितानां बलवता भार्गवास्त्रेण संयुगे ५० निपतद्भिः १२८

गिनेराजन्स्वैस्थापिसहस्रशः रथेस्थापिनरव्याघ्रेनरैस्थैवसमंततः ५१ प्राकंपतमहीराजन्निहतैस्तैःसमं
ततः आकुलंसर्वमभवत्पांडवानांमहद्बलं ५२ कर्णस्त्वेकोयुधांश्रेष्ठोविधूमइवपावकः दहन्शु
त्रून्नरव्याघ्रस्तस्थौसपरंतपः ५३ तेवध्यमानाःकर्णेनपांचालाश्चेदिभिःसह तत्रतत्रव्यमुह्यंतव
नदाहेयथाद्विपाः ५४ चुक्रुशुस्तेनरव्याघ्रायथाव्याघ्रानरोत्तमाः तेषांतुक्रोशतामासीद्द्रवतांरण
मूर्धनि ५५ धावतांचततोराजन्त्रस्तानांचसमंततः आर्तनादोमहांस्तत्रभूतानामिवसंप्लवे ५६ व
ध्यमानांस्ततान्दृष्ट्वासूतपुत्रेणमारिष वित्रेसुःसर्वभूतानितिर्यग्योनिगतान्यपि ५७ तेवध्यमानाः
समरेसूतपुत्रेणसृंजयाः अर्जुनंवासुदेवंचक्रोशंतिचमुहुर्मुहुः ५८ प्रेतराजपुरेयद्वत्प्रेतराजंविचे
तसः श्रुत्वातुनिनदंतेषांवध्यतांकर्णसायकैः ५९ अथाब्रवीद्वासुदेवंकुंतीपुत्रोधनंजयः भार्गवा
स्त्रंमहाघोरंदृष्ट्वात्रसमीरितं ६० पश्यकृष्णमहाबाहोभार्गवास्त्रस्यविक्रमं नैतदस्त्रंहिसमरेशक्यं
हंतुंकथंचन ६१ सूतपुत्रंचसंरब्धंपश्यकृष्णमहारणे अंतकप्रतिमंवीर्येकुर्वाणंकर्मदारुणं
६२ अभीक्ष्णंचोदयन्नश्वान्प्रेक्षतेमांमुहुर्मुहुः नचपश्यामिसमरेकर्णंप्रतिपलायितं ६३ जीवन्प्रा
प्नोतिपुरुषःसंख्येजयपराजयौ सूतस्यतुहृषीकेशभंगएवकुतोजयः ६४ एवमुक्तस्तुपार्थेनकृ
ष्णोमतिमतांवरः धनंजयमुवाचेदंप्राप्तकालमरिंदम ६५ कर्णेनहिदृढंराजाकुंतीपुत्रःपरिक्षतः ते
दृष्ट्वाश्वास्यचपुनःकर्णंपार्थवधिष्यसि ६६ एवमुक्त्वापुनःप्रायाद्द्रष्टुमिच्छन्युधिष्ठिरं श्रमेणग्राहयि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१२५

धयस्य युद्धेकर्णोविशांपते ३७ ततोधनंजयोदृष्ट्वाराजानंबाणपीडितं रथेनप्रययौतीव्रंसंग्रामात्केशवान्वया
३८ गत्वातुत्वरितकौंतेयोधर्मराजदिदृक्षया सैन्यमालोकयामासनापश्यत्तत्रचाग्रजं ३९ युद्धंकृत्वातुकौं
तेयोद्रोणपुत्रेणभारत दुःसहंवज्रिणासंख्येपराजित्यगुरोःसुतं ४० इतिकर्णपर्वणि संजयउवाच द्रौ
णिंपराजित्यततोग्रधन्वाकृत्वामहद्दुष्करंशूरकर्म आलोकयामासततःस्वसैन्यंधनंजयःशत्रुभिरप्रधृ
ष्यः १ प्रयुध्यमानान्स्तरतनामुखस्थान्शूरैः शूरान्हर्षयन्सव्यसाचीपूर्वप्रहारैःप्रथितःप्रशंसन्स्थिता
न्महारथान्सरथानप्यनेकान् २ अपश्यमानस्तुकिरीटमालीयुधिष्ठिरंभ्रातरमाजमीढं उवाचभीमंतर
साभ्युपेत्यराज्ञःप्रवृत्तिंत्विहकुत्रराजा ३ भीमसेनउवाच अपयातइतोराजाधर्मपुत्रोयुधिष्ठिरः क
र्णबाणाभितप्तांगोयदिजीवेत्कथंचन ४ अर्जुनउवाच तस्माद्भवान्शीघ्रमितःप्रयातराज्ञःप्रवृत्त्यै
कुरुसत्तमस्य नूनंसविद्धोतिभृशंपृषत्कैःकर्णेनराजाशिबिरंगतोसौ ५ यःसंप्रहारैर्निशितैःपृष
त्कैर्द्रोणेनविद्धोतिभृशंतरस्वी तस्थौसतत्रापिजयप्रतीक्षोद्रोणोयावन्नहतःकिलासीत् ६ ससं
शयंगमितःपांडवाग्र्यःसंख्येद्यकर्णेनमहानुभावः ज्ञातुंप्रयाह्याशुतमद्यभीमस्थास्याम्यहंशत्रुग
णान्निरुध्य ७ भीमसेनउवाच त्वमेवजानीहिमहानुभावराज्ञःप्रवृत्तिंभरतर्षभस्य अहंहियद्यर्ज
नयामिमित्रावदंतिमांभीतइतिप्रवीराः ८ ततोब्रवीदर्जुनोभीमसेनंसंसप्तकाःप्रत्यनीकास्थितामे
एतानहत्वाद्यमयानशक्यमितोपयातुंरिपुसंघगोष्ठात् ९ अथाब्रवीदर्जुनंभीमसेनःस्ववीर्यमा १२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

७० वत्तः षष्टिः द्रौणिं ततो ग्रथना विस्लारितो ग्रचापः १ नैकान्वहून् २ उवाचनपप्रच्छ ३८ गोष्टान्तस्या
साघकुरुप्रवीर संसप्तकास्त्वतिपास्यामि संख्ये सर्वानहं याहि धनंजयत्वं १० तद्भीमसेनस्यवचोनिश
म्यसुडुष्करं भ्रातरमित्रमध्ये संसप्तकानीकमसह्यमेकः सुडुष्करं धारयामीतिपार्थः ११ उवाचनारा
यणामप्रमेयं कपिध्वजः सत्यपराक्रमस्य श्रुत्वावचोभ्रातुरदीनसत्वस्तदाहवे सत्यवचोमहात्मा १२
इहैकुरुश्रेष्ठमभिप्रयास्यन्नेवाचनृसिंहप्रवरं तदानीं अर्जुनउवाच चोदयाश्वान् हृषीकेश विहायै
तद्बलार्णवं अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव १३ संजयउवाच ततो हयान्सर्वदाशार्हमु
ख्यः प्रचोदयन्भीममुवाचचेदं नैतच्चित्रं तवकर्मास्ति भीमयास्याम्यहं जहि पार्थारिसंघान् १४ त
तोययौ हृषीकेशोयत्र राजायुधिष्ठिरः शीघ्राच्छीघ्रतरं राजन्वाजिभिर्गरुडोपमैः १५ प्रत्यनीकेष्व
वस्थाप्यभीमसेनमरिंदमं संदिश्यचैनं राजेंद्रयुद्धं प्रतिवृकोदरं १६ ततस्तुगत्वापुरुषप्रवीरौरा
जानमासाद्यशयानमेकं रथादुभौ प्रत्यवरुह्य तस्माद्ववंदतुर्धर्मराजस्यपादौ १७ तौ दृष्ट्वापुरुषव्या
घ्रौ तेनेमिणां पुरुषर्षभं मुदाभ्युपगतौ कृष्णावश्विनाविववासवं १८ तावभ्यनंदद्राजापि विवस्वा
नश्विनावपि हतेमहासुरेजंभे शक्रविष्णू यथागुरुः १९ मन्यमानो हतं कर्णं धर्मराजो युधिष्ठिरः ह
र्षगद्गदयावाचाप्रीतः प्राहपरंतपः २० ॥
नात् ९० भ्रातुर्वचः श्रुत्वा तदैव सत्यं वचो नारायणं प्रतिकपिध्वजउवाचेत्यन्वयः १२ १२ १४ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ५९ अनिलानिलयोवितिक्रमात्तेजोवलाभ्यां ७ ८ ९ १० ११ ॥

१३०

संजयउवाच अथोपयातौपृथुलोहिताक्षौशराचितांगौहतधीरशत्रू समीक्ष्यसेनाग्रनरप्रवी
रोयुधिष्ठिरोवाक्यमिदंबभाषे २१ महासत्वोहितोदृष्ट्वासहितोकेशवार्जुनो हतमाधिरथिंमे
नेसंख्येगांडीवधन्वना २२ तावभ्यनंदत्कौंतेयः साम्नापरमवल्गुना स्मितपूर्वममित्रघ्नौ
जयत्नरतर्षभ २३ इतिश्रीकर्णपर्वणि १२८ युधिष्ठिरउवाच स्वागतंदेवकीमातः स्वागतंते
धनंजय प्रियंमेदर्शनंगाढंयुवयोरच्युतार्जुनौ १ अक्षताभ्यामरिष्टाभ्यांहतः कर्णोमहारथः
आशीविषसमेयुद्धेसर्वशस्त्रविशारदं २ अग्रगंधार्तराष्ट्राणांसर्वेषांशर्मवर्मच रक्षितंह
षसेनेनसुषेणेनचधन्विना ३ अनुज्ञातंमहावीर्यंरामेणास्त्रेषुदुर्जयं अग्र्यंसर्वस्यलोकस्य
रथिनंलोकविश्रुते ४ त्रातारंधार्तराष्ट्राणांगंतारंवाहिनीमुखे हंतारंपरसैन्यानाममित्रग
णमर्दनं ५ दुर्योधनहितेयुक्तमस्मद्दुःखायचोद्यतं अप्रधृष्यंमहायुद्धेदेवैरपिसवासवैः ६
अनलानिलयोस्तुल्यंतेजसाचबलेनच पातालमिवगंभीरंसुहृदांनंदिवर्द्धनं ७ अंतकंममामि
त्राणांहत्वाकर्णंमहामृधे दिष्ट्यायुवामनुप्राप्तौजित्वासुरमिवामरौ ८ घोरंयुद्धमदीनेनमयाह्यद्य
च्युतार्जुनौ कृतंतेनांतकेनेवप्रजाः सर्वाजिघांसता ९ तेनकेतुश्चमेछिन्नोहतौचपार्ष्णिसारथी हत १३०
वाहःकृतश्चास्मियुयुधानस्यपश्यतः १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१० मरणेऽपस्थितेमतियातःपलायितोस्मि वार्ध्रीणसःमेषविशेषःयस्यनासाहृदयोर्वेश्रीसदृशंचर्मभव
ध्रुवपुत्रस्यममयोर्वीरस्यचशितैर्विंडिनः पश्यतांद्रौपदेयानांपांचालानांचसर्वशः ११ एतान्जित्वाम
हावीर्यःकर्णःशत्रुगणान्बहून् जितवान्मांमहाबाहोयत्तमानोमहारणे १२ अभिहत्यचमांयुद्धे
रुषाणयुक्तवान्बहु तत्रतत्रयुधांश्रेष्ठपरिभूयनसंशयः १३ भीमसेनप्रभावात्तुयज्जीवामिधनंजय
बहुनात्रकिमुक्तेननाहंतत्सोढुमुत्सहे १४ त्रयोदशाहंवर्षाणियस्माद्भीतोधनंजय नस्मनिद्रांल
भेरात्रौनचाहनिसुखंक्वचित् १५ तस्माद्द्वेषेणसंयुक्तःपरिदह्येधनंजय आत्मनोमरणंयातोवार्ध्री
णसरवद्विजः १६ तस्यायमगमत्कालश्चिंतयानस्यमेचिरं कथंकर्णोमयाशक्योयुद्धेव्यपयितुं
भवेत् १७ जाग्रत्स्वपंश्चकौंतेयकर्णमेवसदाप्यहं पश्यामितत्रतत्रैवकर्णभूतमिदंजगत् १८
यत्रयत्रहिगच्छामिकर्णाद्भीतोधनंजय तत्रतत्रहिपश्यामिकर्णमेवाग्रतःस्थितं १९ सोहंतेने
ववीरेणसमरेष्वपलायिना सहयःसरथःपार्थजित्वाजीवन्विसर्जितः २० कोनुमेजीवितेना
र्थोराज्येनार्थोभवेत्पुनः ममैवंधिक्कृतस्याद्यकर्णेनाहवशोभिना २१ नप्राप्तपूर्वंयद्भीष्मात्कृ
पाद्द्रोणाच्चसंयुगे तत्प्राप्तमद्यमेयुद्धेसूतपुत्रान्महारथात् २२ सत्वांपृच्छामिकौंतेययथाद्यकुश
लस्त्वया तन्ममाचक्ष्वकार्त्स्न्येनयथाकर्णोहतस्त्वया २३ शक्रतुल्यबलोयुद्धेयमतुल्यःपराक्रमे
तिद्विजःइतिपाठःक्वसस्त्रीवारक्तशिराश्वेतपक्षोविहंगमःसवैवार्ध्रीणसःप्रोक्तोयाज्ञिकैःपितृकर्मणीति

क०टी०
१२१

रामतुल्यस्तथास्त्रेण स कथं वै निषूदितः २५ महारथः समाख्यातः सर्वयुद्धविशारदः धनुर्धराणां प्रवरः।
सर्वेषामेकपूरुषः २६ पूजितो धृतराष्ट्रेण सपुत्रेण विशांपते त्वदर्थमेव राधेयः स कथं निहतस्त्वया
२७ धार्तराष्ट्रो हि योधेषु सर्वेष्वेव सदार्जुन तव मृत्युं रणे कर्णं मन्यते पुरुषर्षभ २८ स त्वया पुरुषव्या
घ्र कथं युद्धे निषूदितः तन्ममाचक्ष्व कौंतेय यथा कर्णो हतस्त्वया २९ युध्यमानस्य च शिरः पश्य
तो सुहृदां हृतं त्वया पुरुषशार्दूल सिंहेनेव यथा रुरोः ३० यः पर्युपासीत्प्रदिशो दिशश्च त्वां सूतपु
त्रः समरे परीप्सन् दिदृक्षुः कर्णः समरे हि तीक्ष्णैः वै यः स हीदानीं कंकपत्रैः सुतीक्ष्णैः ३१ त्वया रणे
निहतः सूतपुत्रः कच्चिच्छेते भूमितले दुरात्मा प्रियं च मे परमो वै कृतोद्य त्वया रणे सूतपुत्रं निहत्य
३२ यः सर्वतः पर्यपतत्त्वदर्थे सदार्चितो गर्वितः सूतपुत्रः स शूरमानी समरे समेत्य कच्चित्त्वया निह
तः संयुगे सौ ३३ रौक्मं वरं हस्तिगवाश्वयुक्तं रथं प्रदित्सुर्यः परेभ्यस्त्वदर्थे सदा रणे यः स्पर्धते स पापः
कच्चित्त्वया निहतस्तात युद्धे ३४ यो सौ सदा शूरमदेन मत्तो विकत्थते संसदि कौरवाणां प्रियोत्यर्थं त
स्य सुयोधनस्य कच्चित्स पापो निहतस्त्वयाद्य ३५ कच्चित्समागम्य धनुःप्रयुक्तैस्त्वत्प्रेषितैर्लोहितां
गैर्विहंगैः शेते स पापः सुविभिन्नगात्रः कच्चिद्भग्नौ धार्तराष्ट्रस्य बाहू ३६ यो सौ सदा श्लाघते राजम
ध्ये दुर्योधनं हर्षयन्दर्पपूर्णः अहं हंता फाल्गुनस्येति मोहात्कच्चिद्वचस्तस्य न वै तथा तत् ३७ नाहं पा
दौ धावयिष्ये कदाचिद्यावत्स्थितः पार्थ इत्यल्पबुद्धेः व्रतं तस्यैतत्सर्वदा शक्रसूनो कच्चिन्न त्वया निह १२१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तः सोद्य कर्णः ३८ योमां क्षत्तामब्रवीद्दुष्टबुद्धिः कर्णः सभायां कुरुवीरमध्ये किं पांडवांस्त्वं न जहासि कृ
ष्णे सुदुर्बलान्पतितान्हीनसत्वान् ३९ योमां कर्णः प्रत्यजानात्त्वदर्थे नाहत्वाहं सह कृष्णेन पार्थ इहोप
यातेति स पापबुद्धिः कच्चित्तेन शरसंभिन्नगात्रः ४० कच्चित्संग्रामो विदितो वै तवायं समागमे सृंजयकौ
रवाणां यत्रावस्थामीदृशीं प्रापितोहं कच्चित्त्वया सोद्य हतो दुरात्मा ४१ कच्चित्त्वया तस्य सुमंदबुद्धेर्गा
ण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः सकुंडलं भानुमदुत्तमांगं कायात्प्रकृत्तं युधि सव्यसाचिन् ४२ यत्तन्मया बा
णसमर्पितेन ध्यातोसि कर्णस्य वधाय वीर तन्मे त्वया कच्चिदमोघमद्य ध्यानं कृतं कर्णनिपातनेन
४३ यद्दर्पपूर्णः स सुयोधनोस्मानवेक्षते कर्णसमाश्रयेण कच्चित्त्वया सोद्य समाश्रयोस्य भग्नः पराक्र
म्य सुयोधनस्य ४४ यो नः पुरा षंढतिलानवोचत्सभामध्ये कौरवाणां समक्षं स दुर्मतिः कच्चिदुपेत्य सं
ख्ये त्वया हतः सूतपुत्रोद्य मर्षी ४५ यः सूतपुत्रः प्रहसन्दुरात्मा पुराब्रवीन्निर्जितां सौबलेन स्वयं प्र
सह्यानय याज्ञसेनीमपीह कच्चित्स हतस्त्वयाद्य ४६ यः शस्त्रभृच्छ्रेष्ठतमं पृथिव्यां पितामहं व्या
क्षिपदल्पचेताः संख्यायमानोर्धरथः स कच्चित्त्वया हतोद्याधिरथिर्महात्मन् ४७ अमर्षजं निकृतिसमी
रणेरितं हृदि स्थितं ज्वलनमिमं सदा मम हतो मया सोद्य समेत्य कर्ण इति ब्रुवन्प्रशमय मेद्य फाल्गुन ४८
ब्रवीहि मे दुर्लभमेतदद्य कथं त्वया भिहतः सूतपुत्रः अनुध्याये त्वां सततं प्रवीर वृत्रे हते सो भगवानिवेंद्रः
४९ इति कर्णपर्वणि ११९ संजय उ० तद्धर्मशीलस्य वचो निशम्य राज्ञः क्रुद्धस्यातिरथो महात्मा उवाच दुर्धर्ष।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ त्वगमान्बाणान् १२ वध्यतां वध्यमानानां कौरवाणां उज्जिहीर्षी उद्धर्त्तुमिच्छामकार्षीत् ४ ५ अष्टौ गावो य

१११ मदीनसत्वं युधिष्ठिरं जिष्णुरनंतवीर्यः १ अर्जुन उवाच संसप्तकैर्युध्यमानस्य मे द्य सेनाग्रयायी कुरु

सैन्येषु राजन् आशीविषाभान्नगमान्समं चन्द्रोणिः पुरस्तात्सहसाभ्यतिष्ठत् २ दृष्ट्वा रथं मेघव

वं ममैव सम्मस्य सेनाबलेनाभ्यतिष्ठत् तेषामहं पंचशतानि हत्वा ततो द्रोणिमगमं पार्थिवाग्र्य स

मासमासाद्य नरेंद्र यत्तः समभ्ययात्सिंहमिव द्विपेंद्रः अकार्षीच्च रथिनामुज्जिहीर्षी महाराज वध्य

तां कौरवाणां ४ ततो रणे भारत दुःप्रकम्प्य आचार्यपुत्रः प्रवरः कुरूणां मामर्दयामास शितैः पृष।

त्कैर्जनार्दनं चैव विषाग्निकल्पैः ५ अष्टौ गवामष्टशतानि बाणान् मया प्रयुद्धस्य वहन्ति तस्य तांस्तेन

मुक्तानहमस्य बाणैर्व्यनाशयं वायुरिवाभ्रजालं ६ ततोपरान्बाणसंघाननेकानाकर्णपूर्णायतवि

प्रमुक्तान् ससर्ज शिक्षास्त्रबलप्रयत्नैस्तथा यथा प्रावृषि कालमेघः ७ नैवाददानं न च संदधानं

जानीमहे केन तरेण सतीति वामेन वा यदि वा दक्षिणेन स द्रोणपुत्रः समरे पर्यवर्त्तत् ८ तस्यात तम

उलमेव सज्यं प्रदृश्यते कार्मुकं द्रोणसूनोः सोविध्यन्मां पंचभिर्द्रोणपुत्रः शितैः शरैः पंचभिर्वासु

देवं ९ अहं हि तं त्रिंशता वज्रकल्पैः समार्दयं निमिषस्यांतरेण ततस्ततो वित्सम हा पो बभूव स।

मार्दितो महिषस्पृष्टैः पृषत्कैः ९ ॥

च्छिन्नतत् अष्टौ गवं शकटं तेषामष्टगवामष्टसंख्यानि शकटानि शतानि बाणान् अनेकशतसंख्यान्व १११

सविव्रणंरुधिरंसर्वगात्रैरथानीकंसहसातमनोविविशः मयाभिभूतान्सैनिकानांप्रवर्हान्सोऽपश्यन्तरुधिरप्रदि
ग्धान् ११ ततोभिभूतंयुधिवीरसैन्यंविचित्रत्तयोधंहतवाजिनागं पंचाशतारथमुख्यैः समेतस्तकर्णस्त्वरमा
णपयात्सभार्थो १२ तान्सूदयित्वाहमथास्यकर्णंदृष्टुंभवंतंत्वरयाभियातः सर्वेपंचालाह्युद्विजंतेस्मकर्णं
दृष्ट्वागावः केसरिणंयथैव १३ मत्स्यारास्यंव्यात्तमिवाभ्युपेयप्रभद्रकाः कर्णमासाद्यराजन् रथास्तता
स्तत्रशतान्यभिमग्नास्तदाकर्णः शरैर्हिणोन्मृत्युसद्म १४ नचाप्यभूत्क्रान्तमनाः सराजन्यावन्नास्मान्दृष्ट
वान्स्वतेपुत्रः श्रुत्वातत्वांतेनदृष्टंसमेतमस्तस्यास्त्राद्धर्ववतरेत्ततेच १५ मन्येकालमपयानस्यराजन्कृ
तात्मानतेहमचिंत्यकर्मन् मयाकर्णस्यास्त्रमिदंपुरस्तात्युद्धेदृष्टंपांडवचित्ररूपं १६ नह्यन्ययोद्धावि
द्यतेसंजयानांमहारथंयोधसहेतकर्णं शैनेयोमेसात्यकिश्चक्ररक्षौधृष्टद्युम्नश्चापितथैवराजन् १७
युधामन्युश्चोत्तमौजाश्चशूरौपृष्ठतोमांरक्षतांराजपुत्रौ रथप्रवीरेणमहानुभावद्विषत्सैन्येवर्त्तताङ्गसरे
ण १८ समेत्याहंसूतपुत्रेणसंख्येवृत्रेणवज्रीवनरेंद्रमुख्य योत्स्याम्यहंभारतसूतपुत्रमस्मिन्संग्रामेयदि
वैदृष्टपतेद्य १९ आयाहिपश्यघयुयुत्समानंमांसूतपुत्रंचरणेजयाय महर्षभस्येवमुखंप्रपन्नाः प्रभ
द्रकाः कर्णमभिद्रवंति २० वहवो हताभारतराजपुत्राः स्वर्गाप्यलोकायरणेनिमग्नाः कर्णंनचेदद्यनिहृ
न्मिराजन्सत्यंप्रयुद्ध्यमानेनप्रसह्य २१ प्रतिश्रुत्याकुर्वतोवैगतिर्याकष्टायातांतामहंराजसिंह आमंत्र
येत्वांविजयंरणेमेपुराभीमंधार्तराष्ट्राग्रसंते २२ सोतिंहनिष्यामिनरेंद्रसिंहमेंस्यंतथापार्त्तगणांश्च
सर्वान् २३ इतिश्रीमहाभारतेकर्णपर्वणि ११ ५२ संजयउवाच श्रुत्वाकर्णंकल्यमुदारवीर्यंक्रुद्धःपा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
१११

र्थः फाल्गुनसामितौजाः धनंजयं वाक्यमुवाच चेदं युधिष्ठिरः कर्णशराभितप्तः १ विप्रद्रुता तात चमूस्त्व
दीया निराकृता चाद्य यथा न साधु भीतो भीमं त्यज्य चायास्तथा त्वं यन्नाशकः कर्णमथो निहंतुं २ स्नेह
स्त्वया पार्थ कृतः पृथायां गर्भे समाविश्य यथा न साधु त्यक्त्वा रणे यद्यायाः स भीमं यन्नाशकः सूतपु
त्रं निहंतुं ३ यत्तद्वाक्यं द्वैतवने त्वयोक्तं कर्णं हंतास्म्येकरथेन सत्यं त्यक्त्वा न तं कथमद्य प्रयातः क
र्णाद्भीतो भीमसेनं विहाय ४ इदं यदि द्वैतवने ह्यवक्ष्यः कर्णं योद्धुं न प्रसहे नृपेति वयं ततः प्राप्त
कालं च सर्वे कृत्वानुपैष्याम तथैव पार्थ ५ मयि प्रतिश्रुत्य वधं हि तस्य न वै कृतं तच्च तथैव वीर आ
नीय नः शत्रुमध्ये स कस्मात्समुत्क्षिप्य स्थंडिले प्रत्यपिष्टाः ६ अप्याशिष्म वयमर्जुन त्वयि यियास
वो बहु कल्याणमिष्टं तन्नः सर्वं विफलं राजपुत्र फलार्थिनाम फलं इवातिपुष्पः ७ प्रच्छादितं बडिशमा
मिवामिषेण संछादितं गरलमिवाशनेन अनर्थकं मे दर्शितवानसि त्वं राज्यार्थिनो राज्यरूपं विना
शं ८ त्रयोदशेमा हि समाः सदा वयं त्वामन्वजीविष्म धनंजयाशया काले वर्षं देवमिवोप्तबीजं त
न्नः सर्वान्नरके त्वं न्यमज्जः ९ यत्तत्पृथां वागुवाचांतरिक्षे सप्ताहजाते त्वयि मंदबुद्धे जातः पुत्रो
वासवविक्रमोयं सर्वान्शूरान्शात्रवान्जेष्यतीति १० अयं जेता खांडवे देवसंघान्सर्वाणि भूतान्यपि
चोत्तमौजाः अयं जेता मद्रकलिंगकेकयानयं कुरून्हंता राजमध्ये निहंता ११ अस्मात्परो नो भविता धनुर्धरो ने
व भूतः किंचन जातु जेता इच्छन्नयं सर्वभूतानि कुर्याद्वशे वशी सर्वसमाप्तविद्यः १२ कांत्या शशांकस्य जवेन
वायोः स्थैर्येण मेरोः क्षमया पृथिव्याः सूर्यस्य भासा धनदस्य लक्ष्म्या शौर्येण शक्रस्य बलेन विष्णोः १३ १११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेभ्यो महात्मा न च कुंतिपुत्रो जातो हि तेर्विलुरिवारिहंता त्वेषां जयाय हि धनं वधाय ख्यातोसि मित्रौजाः कुलंतं
कर्त्ता १४ इत्यंतरिक्षे प्रातरस्तरा मूर्ध्नि तपस्विना स्यात्वनतां वा गुवाच एवंविधं तत्त्वनाभूत्तथा च देवापि नन्नमस्तं
वदंति १५ तथा परेषाम् ऋषिसत्तमानां श्रुत्वा गिरः पूजयतां महात्मां नसंनतिं प्रेमि सुयोधनस्य नतां ज्ञानांस्मा
धिराथेर्भयार्त्तं १६ त्वष्ट्राकृतं वाहमकूजनाक्षं शुभं समास्थाय कपिध्वजं तं खड्गं गृहीत्वा हेमपट्टानुबद्धं धनु
श्चेदं गांडिवं तालमात्रं १७ स केशवेनोह्यमानः कथं त्वं कर्णाद्भीतो व्यपयातोसि पार्थ धनुश्चैतत्केशवाय
प्रयच्छ यंता भविष्यस्त्वं रणे केशवस्य १८ तदाहनिष्यत्केशवः कर्णमुग्रं मरुत्पतिर्वृत्रमिवात्तवज्रः राधे
यमेतं यदि नाद्य शक्तश्चरंतमुग्रं प्रतिबाधनाय १९ प्रयच्छान्यस्मै गांडीवमेतदद्य त्वत्तो योस्त्रैरभ्यधिको
वा नरेंद्रः अस्मानेवं पुत्रदारैर्विहीनान्सुखाद्भ्रष्टान्राज्यनाशाच्च भूयः २० इष्टालोकः पतितान्यगाधे
पापेज्जुष्टे नरके पांडवेय मासे पतिष्यः पंचमे त्वं सकृच्छ्रे न वा गर्भे प्राभविष्यः पृथायाः २१ तन्नश्रेयो राज
पुत्राभविष्यन्न चेत्संग्रामादपयातं दुरात्मन् धिग्गांडीवं धिक् च ते बाहुवीर्यमसंख्येयान्बाणगणांश्च
धिक्ते धिक्केतुः केसरिणः सुतस्य कृशानुदत्तं च रथं च धिक्ते २२ इति श्रीमहाभारते कर्णपर्वणि
२२ ६४ संजय उवाच युधिष्ठिरेणैवमुक्तः कौंतेयः श्वेतवाहनः असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभ
१ तस्य कोपं समुद्वीक्ष्य चित्तज्ञः केशवस्तदा उवाच किमिदं पार्थ गृहीतः खड्ग इत्युत २ नहि पश्यामि यो
द्धव्यं त्वया किंचिद्धनंजय ते ग्रस्ता धार्त्तराष्ट्रा हि भीमसेनेन धीमता ३ अपयातोसि कौंतेय राजा द्रष्टव्य
स्त्वयि स राजा भवता दृष्टः कुशली च युधिष्ठिरः ४ स दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमं हर्षका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. भवान्यत्संरंभश्रगात् तत्कालेनश्रकालेस्त्यर्थः १९ कर्तव्ययोग्यानां कर्मणां संयोगं कर्तव्ययोग्यानामपि

१३४

लेच संप्राप्ते किमिदं मोहकारितं ५ न तं पश्यामि कौंतेय यस्ते वध्यो भविष्यति प्रहर्तुमिच्छसे क
स्मात्किं वा ते चित्तविभ्रमः ६ कस्माद्भवान्महाखड्गं परिगृह्णाति सत्वरः तत्वां पृच्छामि कौंतेय कि
मिदं ते चिकीर्षितं ७ परामृशसि यत्क्रुद्धः खड्गमद्भुतविक्रमः एवमुक्तस्तु कृष्णेन प्रेक्षमाणो
युधिष्ठिरं ८ अर्जुनः प्राह गोविंदं क्रुद्धः सर्प इव श्वसन् अन्यस्मै देहि गांडीवमिति मां योभिचोदयेत्
९ भिंद्यामहं तस्य शिर इत्युपांशुव्रतं मम तदुक्तं मम चानेन राज्ञामितपराक्रम १० समक्षं तव गो
विंद न तत्क्षंतुमिहोत्सहे तस्मादेनं वधिष्यामि राजानं धर्मभीरुकं ११ प्रतिज्ञां पालयिष्यामि ह
त्वेनं नरसत्तम एतदर्थं मया खड्गो गृहीतो यदुनंदन १२ सोहं युधिष्ठिरं हत्वा सत्येनानृण्यतां ग
तः विशोको विज्वरश्चापि भविष्यामि जनार्दन १३ किं वा त्वं मन्यसे प्राप्तमस्मिन्काल उपस्थिते
त्वमस्य जगतस्तात वेत्थ सर्वं गतागतं १४ तत्तथा प्रकरिष्यामि यथा मां वक्ष्यते भवान् संजय उ
वाच धिग्धिगित्येव गोविंदः पार्थमुक्त्वाब्रवीत्पुनः १५ कृष्ण उवाच इदानीं पार्थ जानामि न वृद्धाः से
विता स्त्वया काले न पुरुषव्याघ्र संरंभं यद्भवानगात् १६ न हि धर्मविभागज्ञः कुर्यादेवं धनंजय य
था त्वं पांडवाद्येह धर्मभीरुरपंडितः १७ ॥

अक्रियाणां निषिद्धक्रियाणां संयोगं यः करोति स पुरुषाधमः इत्याह अकार्याणामिति २० ॥ ७ १३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मस्थिताः शिष्यैरनुसृताः गुरवः १९ २० सर्वं ह्यनधीयेत्पार्थः श्रुतेन ज्ञानेन २१ यद्भवान्धर्मरक्षतिनदा
त्वानान् अधर्ममेव धर्मं मन्यसे पार्थ यतः प्राणिनां वधं दोषकरं त्वमेतन्नावबुध्यसे २२ २३ अशक्तोः
अकार्याणां क्रियाणां च संयोगं यः करोति वै कार्याणामक्रियाणां च स पार्थ पुरुषाधमः १८ अनुस
मतं ये धर्मकवयः समुपस्थिताः समासविस्तरविदां न तेषां वेत्ति निश्चयं १९ अनिश्चयज्ञो हि नरः
कार्याकार्यविनिश्चये अवशो मुह्यते पार्थ यथा त्वं मूढ एव तत् २० न हि कार्यमकार्यं वा सुखं ज्ञातुं क
थंचन श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे २१ अविज्ञानाद्भवान्यच्च धर्मं रक्षति धर्मवित् प्राणि
नां त्वं वधं पार्थ धार्मिको नावबुध्यसे २२ प्राणिनामवधस्तात सर्वज्यायान्मतो मम अनृतां वा वदे
द्वाचं न तु हिंस्यात्कथंचन २३ स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदं हन्याद्भवान्नरश्रेष्ठ प्राकृतो
यः पुमानिव २४ अयुध्यमानस्य वधस्तथा शत्रोश्च मानद पराङ्मुखस्य द्रवतः शरणं चापि गच्छतः
२४ कृतांजलेः प्रपन्नस्य प्रमत्तस्य तथैव च न वधः पूज्यते सद्भिस्तच्च सर्वं गुरौ तव २५ त्वया चैव
व्रतं पार्थ बालेनैव कृतं पुरा तस्माद्धर्मसंयुक्तं मौर्ख्यात्कर्म व्यवस्यति २६ स गुरुं पार्थ कस्मात्त्वं ह
न्तुकामोऽभिधावसि असंप्रधार्य धर्माणां गतिं सूक्ष्मां दुरन्वयां २७ इदं धर्मरहस्यं च वक्ष्यामि पांड
व यद्ब्रूयात्तव भीष्मो हि पांडवो वा युधिष्ठिरः २८ विदुरो वा तथा क्षत्ता कुंती वापि यशस्विनी तन्ते वक्ष्या
मि तत्त्वेन तन्निबोध धनंजय २९ ॥ अज्ञातनीयस्य प्रवाचकस्य २४ सत्यं तत्त्वेन पाठ्यातथ्येन सर्वदैवं ३०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टि॰ पश्यपक्वविस्तसमस्यधर्मोयंभवतीत्यर्थः ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५
१३५
सत्यस्यवदितासाधुर्नसत्याद्विद्यतेपरं तत्वेनैवसुदुर्ज्ञेयंपश्यसत्यमनुष्ठितं ३० भवेत्सत्यमवक्तव्यं
वक्तव्यमनृतंभवेत् यत्रानृतंभवेत्सत्यंसत्यंचाप्यनृतंभवेत् ३१ विवाहकालेरतिसंप्रयोगेप्रा
णात्ययेसर्वधनापहारे विप्रस्यचार्थेह्यनृतंवदेतपंचानृतान्याहुरपातकानि ३२ सर्वस्वस्याप
हारेतुवक्तव्यमनृतंभवेत् तत्रानृतंभवेत्सत्यंसत्यंचाप्यनृतंभवेत् ३३ तादृशंपश्यतेबालोय
स्यसत्यमनुष्ठितं सत्यानृतेविनिश्चित्यततोभवतिधर्मवित् भवेत्सत्यमवक्तव्यंनवक्तव्यमनुष्ठि
तं ३४ किमाश्चर्यंकृतप्रज्ञःपुरुषोपिसुदारुणः सुमहत्प्राप्नुयात्पुण्यंबलाकोंधवधादिव ३५
किमाश्चर्यंपुनर्मूढोधर्मकामोह्यपंडितः सुमहत्प्राप्नुयात्पापमापगास्विवकौशिकः ३६ अर्जु
नउवाच आचक्ष्वभगवन्नेतद्यथाविद्यामहंतथा बलाकस्यानुसंबद्धंनदीनांकौशिकस्यच
३७ वासुदेवउवाच मृगव्याधोभवत्कश्चिद्बलाकोनामभारत यात्रार्थंपुत्रदारस्यमृगान्हंतिन
कामतः ३८ वृद्धौचमातापितरौबिभर्त्यन्यांश्चसंश्रितान् स्वधर्मनिरतोनित्यंसत्यवागनसूयकः
३९ सकदाचिन्मृगांल्लिप्सुर्नान्वविंदत्प्रयत्नवान् अपःपिबंतंददृशेश्वापदंघ्राणचक्षुषं ४०
अदृष्टपूर्वमपितत्सत्वंतेनहतंतदा अंधेहतेततोव्योम्नःपुष्पवर्षंपपातच ४१ अप्सरोगीतवा
दित्रैर्नादितंचमनोरमं विमानमागमत्स्वर्गान्मृगव्याधनिनीषया ४२ ॥ १३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सच्छ्रमिवनरकं ग्रहष्टाप्रश्नेनार्हतितत्रधर्माधर्मयोस्ततेनिश्चितंबेललक्षणाम्ड्देष्टपःवचनेभविष्यति ५१
कश्चित्तर्केणाविधर्मस्वरूपंनिर्णयमित्याहदुष्करमिति ५२ नप्रत्यसूयामिनदूषयामि ग्रनुमानतोपि
तद्दृष्टंसर्वभूतानामभावायकिलार्जुन तपस्तप्त्वावरंप्राप्तंकृतमंधेनयेनवा ५३ तद्दत्वासर्वभू
तानामभावकृतंनिश्चयं ततोबलाकःस्वर्गाद्देवंधर्मःसुदुर्विदः ५४ कौशिकोप्यभवद्विप्रस्त
पस्वीनोबहुश्रुतः नदीनांसंगमेग्रामाददूरात्सकिलावसत् ५५ सत्यंमयासदावाच्यमितितत्
स्याभवद्व्रतं सत्यवादीतिविख्यातःसतदासीद्धनंजय ५६ अथदस्युभयात्केचित्तदातद्वनमावि
शन् तत्रापिदस्यवःक्रुद्धास्तान्मार्गंतयत्नतः ५७ अथकौशिकमभ्येत्यप्राहुस्तेसत्यवादिनं क
तमेनपथायाताभगवन्बहवोजनाः ५८ सत्येनपृष्टःप्रब्रूहियदितान्वेत्थशंसनः सपृष्टःकौ
शिकःसत्यंवचनंतानुवाचह ५९ बहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः इतितान्ख्यापयामा
सतेभ्यस्तत्वंसकौशिकः ६० ततस्तेतान्समासाद्यक्रूराजघ्नुरितिश्रुतिः तेनाधर्मेणमहतावाग्दु
रुक्तेनकौशिकः ६१ गतःसकष्टंनरकंसूक्ष्मधर्मेष्वकोविदः यथाबालश्रुतोमूढोधर्माणामम
विभागवित् ६२ वृद्धानपृष्ट्वासंदेहंमहच्छ्वभ्रमिहार्हति तत्रतेलक्षणोद्देशःकश्चिदेवंभविष्य
ति ६३ दुःकरंपरमंज्ञानंतर्केणानुव्यवस्यति श्रुतेर्धर्मइतिह्येकेवदंतिबहवोजनाः ६४ नत्वेतत्
प्रत्यसूयामिनचसर्वंविधीयते प्रभवार्थायभूतानांधर्मप्रवचनंकृतं ६५ ॥

धर्मोत्रियःस्यात्प्रायेणाहहनचेतिलक्षणोद्देशमाहप्रभवेति ६५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अहिंसैव यथारणां तु धर्मः स्यादहिंसार्थायेति ननु संतोषं जनयेत्त्यान्तत् दैवे स्वर्ग इत्यनमित्यादिवाक्यावष्ट
भेन अश्वोन्मसृतवेदेनन्वास्यारुहार्यादिकमपि धर्म इति वदतो धर्मोपहारमिच्छतिते अकूजनेन वेदश
ब्दस्यहिंसेनन तद्दिरूढं धर्ममोन्तवावेदवाग्यमिच्छति तान्प्रतिनानृकूजनेन तैः सह संवादमपि न कुर्या
दसंभाष्यास्ते· तेन वेदाविरोधे सति यदन्यमप्ये सत्वकं तत्तद्धर्म इत्यर्थः ५५ यत्नत्नु धर्मसंदेहे वेदशाब्दो

यस्माद्धारणसंयुक्तः स धर्म इति निश्चयः अहिंसार्थाय हिंस्राणां धर्मप्रवचनं कृतं ५६ धारणाद्ध
र्ममित्याहुर्धर्मो धारयते प्रजाः यस्माद्धारणसंयुक्तः स धर्म इति निश्चयः ५७ येन्यायेन जिहीर्ष
न्तो धर्ममिच्छंति कर्हिचित् अकूजनेन मोक्षो वा नानुकूजेत्कथंचन ५८ अवश्यं कूजितव्ये वा
शंकेरन्वाप्यकूजतः श्रेयस्तत्रानृतं वक्तुं तत्सत्यमविचारितं ५९ यः कार्येभ्यो व्रतं कृत्वा कर्म
णा नोपपादयेत् न तत्फलमवाप्नोति एवमाहुर्मनीषिणः ६० ॥

नास्ति नापि लौकिकी युक्तिरस्ति तत्र किं कर्तव्यमित्याशंक्याह अवश्यमिति यत्र ब्राह्मणेन त्वेनत्ता
नः नत्वेते तेषां स्तेनो यमस्ते नो वेति संशये पतद्दृये पि हिंसा शास्त्रे मौनमेवाश्रयेत् मौनेनाप्यसिद्धे अ
नृतमपि वदेदित्यर्थः ५९ यइति कार्येभ्यः यत्किंचित्कार्यं मनसि उद्दिश्य व्रतं कृत्वा तत्स्वव्रतस्य नानाप्रये
दप्रकारेणोपपादनं करोति स दांभिको व्रतफलं नाप्नोतीत्यर्थः ६० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तैर्यः स्तेनैर्भृशं पीडयेत नरकं प्रापयेत् ६३ ६४ अविदित्वमितिच्छेदः ६८ अनुग्रहं अवधेन प्रतिज्ञारक्षणं
प्राणात्यये विवाहे वा सर्वज्ञातिवधात्यये नर्मण्यभिप्रवृत्ते वा न च प्रोक्तं मृषा भवेत् अधर्मं नात्र पश्यं
ति धर्मतत्त्वार्थदर्शिनः ६१ यः स्तेनैः सह संबंधान्मुच्यते शपथैरपि श्रेयस्तत्रानृतं वक्तुं तत्सत्यमवि
चारितं ६२ नच तेभ्यो धनं देयं शक्ये सति कथंचन पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत् ६३ त
स्माद्धर्मार्थमनृतमुक्त्वा नानृतभाग्भवेत् एष ते लक्षणोद्देशः समयोद्दिष्टो यथाविधि ६४ यथाधर्मं
यथाबुद्धि मया चैवेहितार्थिना एतच्छ्रुत्वा ब्रूहि पार्थ यदि वध्यो युधिष्ठिरः ६५ अर्जुन उवाच यथा
ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महामतिः ६६ हितं चैव यथास्माकं तथैतद्वचनं तव भवान्मातृसमो
स्माकं तथा पितृसमोपि च गतिश्च परमा कृष्ण त्वमेव च परायणं ६७ न हि ते त्रिषु लोकेषु विद्यते
विदितं क्वचित् तस्माद्भवान्परं धर्मं वेद सर्वं यथातथं ६८ अवध्यं पांडवं मन्ये धर्मराजं युधिष्ठिरं
अस्मिंस्तु मम संकल्पे ब्रूहि किंचिदनुग्रहं ६९ इदं चापरमत्रैव शृणु हृत्स्थं विवक्षितं जानासि दा
शार्ह मम व्रतं त्वं यो मां ब्रूयात्कश्चन मानुषेषु ७० अन्यस्मै त्वं गांडिवं देहि पार्थ त्वत्तोस्त्रैर्वीर्यभविता वा
विशिष्टः हन्यामहं केशव तं प्रसह्य भीमो हन्यात्तूवरकेति चोक्तः ७१ तन्मे राजा प्रोक्तवांस्ते समक्षं
धनुर्देहीत्यसकृत्तव ष्णिवीर तं हन्मां चेत्केशव जीवलोके स्थाता नाहं कालमप्यल्पमात्रं ७२॥

७१ तूवरकः बहुभोजनः तं हन्यामिति स्यात्तानस्यास्ये ७२ ॥

क.टी. एनमामुक्तोपिकृतप्रायश्चित्तोपिनस्यात्सोस्त्वर्थः किं कृत्वभ्रातावध्यं ध्यात्वा ७० ७१ समतत्तंग्राच्यप्रोवितिशेषः ७२
१८२ ध्यात्वा नत्वेयेनसा चापि मुक्तो वध्यं राज्ञो हं भ्रष्टवीर्यो विचेताः यथाप्रतिज्ञाममलोकवृद्धो भवेत्सत्वाध
र्मभृतां वरिष्ठ ७३ यथा जीवेत्पांडवो हं च कृष्ण तथाबुद्धिं दातुमप्यर्हसित्वं वासुदेव उवाच राजाश्रा
न्तोविक्षतो दुःखितश्च कर्णेन संख्ये निशितैर्बाणसंघैः यच्चातिशेत सूतपुत्रेण वीर शरैर्भृशं ताडितो युध्य
मानः ७४ अतस्त्वमेतेन सरोषमुक्तो दुःखान्वितेनेदमयुक्तरूपं अकोपितो ह्येष यदि स्म संख्ये कर्णं
निहन्यादिति चाब्रवीत्त्वं ७५ जानातितं पांडव एव चापि पापं लोके कर्णमसह्यमन्यैः ततस्त्वमुक्तो
भृशरोषितेन राज्ञासमक्षं परुषाणि पार्थ ७६ नित्योद्युक्ते सततं चाप्रसह्ये कर्णे द्यूतं ह्यत्र रणेनिब
द्धं तस्मिन्हते कुरवो निर्जिताः स्युरेवं बुद्धिः पार्थिवे धर्मपुत्रे ७७ ततो वधं नार्हति धर्मपुत्रस्त्वया प्रति
ज्ञार्जुन पालनीया जीवन्नयं येन मृतो भवेद्धि तन्मे निबोधेह तवानुरूपं ७८ यदा मानं लभते मान
नार्हस्तदा सवै जीवति जीवलोके यदावमानं लभते महान्तं तदा जीवन्मृत इत्युच्यते सः ७९ संमानि
तः पार्थिवोयं सदैव त्वया च भीमेन तथा यमाभ्यां वृद्धैश्च लोके पुरुषैश्च शूरैस्तस्यापमानं कलया।
प्रयुंक्ष्व ८० त्वमित्यत्रभवन्तं हि ब्रूहि पार्थ युधिष्ठिरं त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ८१ एवं।
माचर कौन्तेय धर्मराजे युधिष्ठिरे अधर्मयुक्तं संयोगं कुरुष्वैनं कुरूद्वह ८२ ॥ कर्णपार्थौ कृते युक्ते पुरुष
योगं ग्रासमनानुष्ठितं कुरुष ८२॥
पै. २२ ८० अत्रभवंतं मान्यं च त्वमिति ब्रूहि तावते वतद्वधः कृतो भवतीत्यर्थः ८१ एवं श्लाघमानरूपं मे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्रमानमाहअथर्वैति ८८ यत्गुरुस्त्वमितिप्रोक्तस्तन् अवधेनशस्त्रपातनमंतरेणैववधः वधकरंभवतीत
र्थः ८४ अयुक्तमेवंत्वतोवधंवेत्स्यतेअनेनाहं हतइतिनास्यतीत्यर्थः समंवैषम्यपरिहारे अनसत्रतितमः
अथर्वांगिरसीह्येषाश्रुतीनामुत्तमाश्रुतिः अविचार्यैवकार्यैषाश्रेयस्कामैर्नरैःसदा ८८ अवधेनवधः
प्रोक्तोयद्गुरुस्त्वमितिप्रभुः तद्ब्रूहित्वंयन्मयोक्तंधर्मराजस्यधर्मवित् ८४ वधंह्येयंपांडवधर्मराजस्त्व
योयुक्तंवेत्स्यतेचैवमेषः ततोस्यपादावभिवाद्यपश्चात्समंब्रूयाःसांत्वयित्वाचपार्थं ८५ भ्राताप्राज्ञ
स्तवकोपंनजातुकुर्याद्राजाधर्ममवेक्ष्यचापि मुक्तोनृतात्भ्रातृवधाच्चपार्थहृष्टःकर्णंत्वंजहिसूतपु
त्रं ८९ इतिश्रीमहाभारतेकर्णपर्वणि ४७० संजयउवाच इत्येवमुक्तस्तुजनार्दनेनपार्थःप्रशस्याथ।
सुहृद्वचस्तत् ततोब्रवीदर्जुनोधर्मराजमनुक्तपूर्वंपरुषंप्रसह्य १ अर्जुनउवाच मात्वंराजन्व्याहरव्या
हरयस्तिष्ठसेक्रोशमात्रेरणाद्धि भीमस्तुमामर्हतिगर्हणाययोयुध्यतेसर्वलोकप्रवीरैः २ कालेहिशत्रू
न्प्रतिपीड्यसंख्येहत्वाचशूरान्पृथिवीपतींस्तान् रथप्रधानोत्तमनागमुख्यान्सादिप्रवेकानमितांश्च
वीरान् ३ यः कुंजराणामधिकंसहस्रंहत्वानदत्तुमुलंसिंहनादं कांबोजानामयुतंपार्वतीयानांमृगा
न्सिंहोविनिहत्यचाजौ ४ सुदुष्करंकर्मकरोतिवीरःकर्तुंयथानार्हसित्वंकदाचित् रथादवप्लुत्य
गदांपरामृशंस्तयानिहंत्यश्वरथद्विपान्रणे ५ वरासिनावाजिरथाश्वकुंजरांस्तथारथांगैर्धनुषाचहं=
न्त्यरीन् प्रदग्ध्वपद्भ्यामहितान्निहं ५
व्याहरव्याहरवचनंक्रोशमात्रेनतिष्ठसिअपिततततोपिहरेस्तर्थः २ ६ ॥ तिपुनस्तुदोर्भ्यांशतमन्युविक्र मः

क॰टी॰ १३८

महाबलोवैश्रवणांतकोपमः प्रमथ्यहंताद्विषतामनीकिनीं सभीमसेनोर्हतिगर्हणांमेनत्वंनिमंत्रत्वमे
यःसुहृद्भिः ७ महारथान्नागवरान्हयांश्च पदातिमुख्यानपि च प्रमथ्य एकोभीमोधार्तराष्ट्रेषुमग्नः
समामनुपालभ्युमरिंदमोर्हति ८ कलिंगवंगांगनिषादमागधान्सदाममदान्नीलबलाहकोपमान्
निहंतियःशत्रुजनाननेकान्समामनुपालभ्युमरिंदमोर्हति ९ सयुक्तमास्थायरथंहिकालेधनुर्विधु
न्वन्शरपूर्णमुष्टिः सृजत्यसौशरवर्षाणिवीरोमहाहवेमेघइवांबुधाराः १० शतान्यष्टौवारणाना
मवृश्यपविशातितेःकुंभकराग्रहस्तैः भीमेनाजौनिहतान्यद्यबाणैःसमांक्रूरंवक्तुमर्हत्यरिघ्नः ११
बलंतुवाचिद्विजसत्तमानांतात्रेवुधाबाहुबलंवदंति त्वंवाग्बलोभारतनिष्ठुरश्चत्वमेवमांवेत्थय
थाबलोहं १२ यतेहिनित्यंतवकर्तुमिष्टंदारैःसुतैर्जीवितेनात्मनाच एवंयन्मांवाग्विशिखैर्निहंसि
त्वत्तःसुखंनवयंविद्मकिंचित् १३ मामावमंस्थाद्रौपदीतल्पसंस्थोमहारथान्प्रतिहन्मित्वदर्थे ते
नाभिशंकीभारतनिष्ठुरोसित्वत्तःसुखंनाभिजानामिकिंचित् १४ प्रोक्तःस्वयंसत्यसंधेनमृत्युस्तव
प्रियार्थंनरदेवयुद्धे वीरःशिखंडीद्रौपदोसौमहात्मामयाभिगुप्तेनहतश्चतेन १५ नचाभिनंदामितवा
धिराज्यंयतस्त्वमत्यंतहितायसक्तः स्वयंकृत्वापापमनार्यजुष्टमस्माभिर्वाततर्तुमिच्छसीत्वं १६ अक्षेषु
दोषाबहवोविधर्माःश्रुतास्त्वयासहदेवोब्रवीद्यान् तान्नैषितुंसाधुजुष्टांस्तेनसमंस्त्वंनिरयंप्रप १३८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२२ अनुतेपेअनुतापंप्राप्तवान्उद्ववर्हकोशान्निष्काशितवान् २२ २४ ॥
नृतंवस्त्वत्तोनाभिजानीमकिंचिद्यतस्त्वमस्तेदंवितंसंभ्रमतः सर्पंकृत्वाव्यसनेपांडवत्वमस्मांस्तीव्राःस्था
वयस्यद्यवाचः १८ श्रोतेस्माभिर्निहताशत्रुसेनाछिन्नैर्गात्रैर्भूमितलेनदंती त्वयाहितत्कर्मकृतंनरश
संयस्माद्दोषःकौरवाणांवधश्च १९ हताउदीच्यानिहताःप्रतीच्यानष्टाःप्राच्यादाक्षिणात्याविशस्ताः
कृतंकर्माप्रतिरूपंमहद्भिस्तेषांयोधैःसमरेदेवयुद्धे २० त्वंदेवितात्वत्कृतेराज्यनाशस्त्वत्संभवंनोव्य
सनंनरेंद्र मास्मान्क्रूरैर्वाक्प्रतोदैस्तुदंस्त्वंभूयोराजन्कोपयेत्वल्पभाग्यः २१ संजयउवाच एतावाचः
परुषाःसव्यसाचीस्थिरप्रज्ञःश्रावयित्वातुरूक्षाः बभूवासौविमनाधर्मभीरुःकृत्वाप्राज्ञःपातकं
किंचिदेवं २२ तदानुतेपेसुरराजपुत्रोविनिःश्वसंश्चासिमथोद्ववर्ह तमाहकृष्णःकिमिदंपुनर्भवा
न्विकोशमाकाशनिभंकरोष्यसिं २३ ब्रवीहिमांत्वंपुनरुत्तरंवचस्तथाप्रवक्ष्याम्यहमर्थसिद्धये इत्ये
वमुक्तःपुरुषोत्तमेनसुदुःखितःकेशवमर्जुनोब्रवीत् २४ अहंहनिष्येस्वशरीरमेवप्रसह्ययेना
हितमाचरंवै निशम्यतत्पार्थवचोब्रवीदिदंधनंजयंधर्मभृतांवरिष्ठः २५ राजानमेनंत्वमिती
दमुक्त्वाकिंकश्मलंप्राविशःपार्थघोरं त्वंचात्मानंहंतुमिच्छस्यरिघ्ननेदंसद्भिःसेवितंवैकिरीटिन्
२६ धर्मात्मानंभ्रातरंज्येष्ठमद्यखड्गेनचैनंयदिहन्यान्नरवीर धर्माद्भीतस्तत्कथंनामतेस्यात्किंचो
त्तरंवाकरिष्यसित्वमेव २७ ॥ २२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
२५९

श्लोकमस्तवादात्महत्यापरहत्याम्यकृत्स्नादित्यध्यायतात्पर्यं २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ॥
त्मलोधर्मोदुर्विदश्चापिपार्थविशेषतोऽज्ञैःप्रोच्यमानंनिबोध हत्वात्मानमात्मनाप्राप्नुयास्त्वंवधाद्भ्रा
तुर्नरकंवातिघोरं २८ ब्रवीहिवाचाद्यगुणानिहात्मनस्तथाहतात्माभवितासिपार्थ तथास्त्वक्ले
त्यभिनंद्यतद्वचोधनंजयःप्राहधनुर्विनाम्य युधिष्ठिरंधर्मभृतांवरिष्ठंशृणुष्वराजन्नितिशक्रसू
नुः नमादृशोऽन्योनरदेवविद्यतेधनुर्धरोदेवमृतेपिनाकिनं २९ अहंहितेनानुमतोमहात्मनाक्षणा
नहन्यांसचराचरंजगत् मयाहिराजन्सदिगीश्वरादिशोविजित्यसर्वाभवतःकृतावशे ३० सराजसू
यश्चसमाप्तदक्षिणःसभाचदिव्याभवतोममौजसा पाणौपृषत्कानिशिताममैवधनुश्चसज्यंविततं
सबाणं ३१ पादौचमेसरथौसध्वजौचनमादृशंयुद्धगतंजयंति हताउदीच्यानिहताःप्रतीच्याःप्रा
च्यानिरस्तादाक्षिणात्यानिशस्ताः ३२ संशप्तकानांकिंचिदेवावशिष्टंसर्वस्यसैन्यस्यहतंमयार्द्धंशे
तेमयानिहताभारतीयंचमूराजन्देवचमूप्रकाशा ३३ येवास्त्रज्ञास्तानहंहन्मिचास्त्रैस्तस्माल्लोका
न्नेहकरोमिभस्म जैत्रंरथंभीममास्थायकृष्णयावःशीघ्रंसूतपुत्रंनिहंतुं ३४ राजाभवत्वद्यसुनिर्वृ
तोयंकर्णंरणेनाशयितास्मिबाणैः इत्येवमुक्त्वापुनराहपार्थोयुधिष्ठिरंधर्मभृतांवरिष्ठं ३५ अद्याप्र
जासूतमाताभविष्ठीकुंतीवाप्यथवातेमयानवापि सत्यंवदाम्यद्यनकर्णमाजौशरैरहत्वाकवचं
विमोक्ष्ये ३६ ॥ ॥

२५९

संजय उवाच इत्येवमुक्त्वा पुनरेव पार्थो युधिष्ठिरं प्रांजलिरभ्युवाच प्रसीद राजन्क्षमयन्मयोक्तं काले भवान्वेत्स्य
ति तन्नमस्ते ३८ प्रसाद्य राजानममित्रसाहं स्थितोब्रवीच्चैव पुनः प्रवीरः नेदं चिरात्क्षिप्रमिदं भविष्यत्यावर्त्त
ते सावभियामि चैनं ३९ यास्येष भीमं समरात्प्रमोक्तुं सर्वात्मना सूतपुत्रं च हंतुं तव प्रियार्थं मम जीवितं
हि ब्रवीमि सत्यं तदवेहि राजन् ४० इति प्रयास्यन्नुपगृह्य पादौ समुत्थितो दीप्ततेजाः किरीटी एतच्छ्रुत्वा
पांडवो धर्मराजो भ्रातुर्वाक्यं परुषं फाल्गुनस्य ४१ उत्थाय तस्माच्छयनादुवाच पार्थं ततो दुःखपरीत
चेताः कृतं मया पार्थ यथा न साधु येन प्राप्तं व्यसनं वः सुघोरं ४२ तस्माच्छिरः छिंधि ममेदमद्य कुलां
तकस्याधमपूरुषस्य पापस्य पापव्यसनान्वितस्य विमूढबुद्धेरलसस्य भीरोः ४३ वृद्धावमंतुः परुषस्य
चैव किं ते चिरं मे ह्यनुसृत्य रूक्षं गच्छाम्यहं वनमेवाद्य पापः सुखं भवान्वर्त्ततां महिहीनः ४४ योग्यो
राजा भीमसेनो महात्मा क्लीबस्य वा मम किं राज्यकृत्यं न चापि शक्तः परुषाणि सोढुं पुनस्तवेमानि रुषा
न्वितस्य ४५ भीमस्तु राजा मम जीवितेन न कार्यमद्यावमतस्य वीर इत्येवमुक्त्वा सहसोत्पपात राजन् त
तस्तच्छयनं विहाय ४६ इयेष निर्गंतुमथो वनाय तं वासुदेवः प्रणतोभ्युवाच राजन्विदितमेतद्धि य
था गांडीवधन्वनः ४७ प्रतिज्ञा सत्यसंधस्य गांडीवं प्रतिविश्रुता ब्रूयाद्य एवं गांडीवमन्यस्मै देयमित्युत ४८
वध्योस्य स पुमांल्लोके त्वया चोक्तोयमीदृशं ततः सत्यां प्रतिज्ञां तां पार्थेन प्रतिरक्षता ४९ मच्छंदादवमानोयं
कृतस्तव महीपते गुरूणामवमानो हि वध इत्यभिधीयते ५० तस्मात्त्वं वै महाबाहो मम पार्थस्य चोभयोः स

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५८ ५९ समतितमः धर्मराजस्येति स्पष्टार्थः १ २ ३ ४ ५ ६ ७ ८

अतिक्रममिमंराजन्सत्यसेरक्षणंप्रति ५१ शरणंत्वांमहाराजप्रपन्नौस्वउभावपि क्षंतुमर्हसिमेरा
जन्प्रणतस्याभियाचतः ५२ राधेयस्याद्यपापस्यभूमिःपास्यतिशोणितं सत्यंतेप्रतिजानामिहतंवि
द्ध्यद्यसूतजं ५३ यस्येछसितवधंतस्यगतमद्यसजीवितं इतिकृष्णवचःश्रुत्वाधर्मराजोयुधिष्ठिरः ५४
ससंभ्रमंहृषीकेशमुत्थाप्यप्रणतंतदा कृतांजलिस्ततोवाक्यमुवाचानंतरंवचः ५५ एवमेवयथा
त्थत्वमस्त्वेषोतिक्रमोमम अनुनीतोस्मिगोविंदतारितश्चास्मिमाधव ५६ मोचिताव्यसनाद्घोराद्वय
मद्यत्वयाच्युत भवंतंनाथमासाद्यह्यावांव्यसनसागरात् ५७ घोरादद्यसमुत्तीर्णावुभावज्ञानमो
हितौ त्वद्बुद्धिप्लवमासाद्यदुःखशोकार्णवाद्वयं ५८ समुत्तीर्णाःसहामात्याःसनाथाःस्मत्वयाच्यु
त ५९ इतिश्रीमहाभारतेकर्णपर्वणि ६९ संजयउवाच धर्मराजस्यतच्छ्रुत्वाप्रीतियुक्तंवचस्त
तः पार्थंप्रोवाचधर्मात्मागोविंदोयदुनंदनः १ इतिस्मकृष्णवचनात्प्रत्युच्चार्ययुधिष्ठिरं बभूवविम
नाःपार्थःकिंचित्कृत्वेवपातकं २ ततोब्रवीद्वासुदेवःप्रहसन्निवपांडवं कथंनामभवेदेतद्यदित्वंपार्थ
धर्मज्ञं असिनातीक्ष्णधारेणहन्याद्धर्मेव्यवस्थितं त्वमित्युक्त्वायराजानमेवंकश्मलमाविशः ४ हत्वातुनृप
तिंपार्थअकरिष्यःकिमुत्तरं एवंहिदुर्विदोधर्मोमंदप्रज्ञैर्विशेषतः ५ सभवान्धर्मभीरुत्वाद्ध्रुवमेष्यन्महत्तमः
नरकंघोररूपंचभ्रातुर्ज्येष्ठस्यवैवधात् ६ सत्वंधर्मभृतांश्रेष्ठंराजानंधर्मसंहितं प्रसादयकुरुश्रेष्ठमेतदत्रमतं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रसाद्यभक्त्याराजानंप्रीतेचैवयुधिष्ठिरे प्रयाबस्त्वरितोयोद्धुंसूतपुत्ररथंप्रति ८ हत्वातुसमरेकर्णंत्वमद्य
निशितैःशरैः विपुलांप्रीतिमाधत्स्वधर्मपुत्रस्यमानद ९ एतदद्यमहाबाहोप्राप्तकालंमतंमम एवंकृ
तेकृतंचैवतवकार्यंभविष्यति १० ततोर्जुनोमहाराजलज्जयावैसमन्वितः धर्मराजस्यचरणौप्रपद्यशि
रसानतः ११ उवाचभरतश्रेष्ठप्रसीदेतिपुनःपुनः क्षमस्वराजन्यत्प्रोक्तंधर्मकामेनभीरुणा १२ दृष्ट्वा
तुपतितंपादयोर्धर्मराजोयुधिष्ठिरः धनंजयममित्रघ्नंरुदंतंभरतर्षभ १३ उत्थाप्यभ्रातरंराजाधर्मरा
जोधनंजयं समाश्लिष्यचसस्नेहंप्ररुरोदमहीपतिः १४ रुदित्वातुचिरंकालंभ्रातरौसुमहाद्युती कृ
तशौचौमहाराजप्रीतिमंतौबभूवतुः १५ ततआश्लिष्यतंप्रेम्णामूर्ध्निचाघ्रायपांडवः प्रीत्यापरमयायु
क्तोविस्मयंश्चपुनःपुनः अब्रवीत्तंमहेष्वासंधर्मराजोधनंजयं १६ कर्णेनमेमहाबाहोसर्वसैन्यस्यप
श्यतः कवचंचध्वजंचैवधनुःशक्तिर्हयाःशराः १७ शरैःकृत्तामहेष्वासयतमानस्यसंयुगे सोहंज्ञात्वा
रणेतस्यकर्मदृष्ट्वाचफाल्गुन १८ व्यवसीदामिदुःखेननचमेजीवितंप्रियं नचेदद्यहितंवीरंनिहनि
ष्यसिसंयुगे १९ प्राणानेवपरित्यक्ष्येजीवितार्थोहिकोमम एवमुक्तःप्रत्युवाचविजयोभरतर्षभ २० स
त्येनतेशपेराजन्प्रसादेनतथैवच भीमेनचनरश्रेष्ठयमाभ्यांचमहीपते २१ यथाद्यसमरेकर्णंहनिष्या
मिहतोपि वामहीतलेपतिष्यामिसत्येनायुधमालभे २२ एवमाभाष्यराजानमब्रवीन्माधवंवचः अद्य
कर्णंरणेकृष्णसूदयिष्येनसंशयः २३ तवबुध्याहिभद्रंतेवधस्तस्यदुरात्मनः एवमुक्तोब्रवीत्पार्थंकेशवो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

राजसत्तम २४ शक्तोसि भरतश्रेष्ठ हंतुं कर्णं महाबलं एष चापि हि मे कामो नित्यमेव महारथ २५ कथं
भवान्रणे कर्णं निहन्यादिति सत्तम भूयश्चोवाच मतिमान्माधवो धर्मनंदनं २६ युधिष्ठिरेमं बीभत्सु
त्वं सांत्वयितुमर्हसि अनुज्ञातं च कर्णस्य वधायाद्य दुरात्मनः २७ श्रुत्वा ह्यहमयं चैव त्वां कर्णशरपी
डितं प्रवृत्तिं ज्ञातुमायाताविह त्वां पांडुनंदन २८ दिष्ट्यासि राजन्न हतो दिष्ट्या न ग्रहणं गतः परिसां
त्वय बीभत्सुं जयमाशाधि चानघ २९ युधिष्ठिर उवाच एह्येहि पार्थ बीभत्सो मां परिष्वज पांडव वक्तव्य
मुक्तोस्मि हितं त्वया क्षांतं च तन्मया अहं त्वामनुजानामि जहि कर्णं धनंजय मन्युं च मा कृथाः पार्थ
यन्मयोक्तोसि दारुणं ३१ संजय उवाच ततो धनंजयो राजन् शिरसा प्रणतस्तदा पादौ जग्राह पाणिभ्यां
भ्रातुर्ज्येष्ठस्य मारिष ३२ तमुत्थाप्य ततो राजा परिष्वज्य च पीडितं मूर्ध्न्युपाघ्राय चैवैनमिदं पुनरुवा
च ह ३३ धनंजय महाबाहो मानितोस्मि दृढं त्वया माहात्म्यं विजयं चैव भूयः प्राप्नुहि शाश्वतं ३४ अ
र्जुन उवाच अद्य तं पापकर्माणं सानुबंधं रणे शरैः नयाम्यंतं समासाद्य राधेयं बलगर्वितं ३५ येन त्वं पी
डितो बाणैर्दृढमायम्य कार्मुकं तस्याद्य कर्मणः कर्णः फलमाप्स्यति दारुणं अद्य त्वामनुपश्यामि
कर्णं हत्वा महीपते सभाजयितुमाक्रंदादिति सत्यं ब्रवीमि ते ३६ नाहत्वा विनिवर्तिष्ये कर्णमद्य र
णाजिरात् इति सत्येन ते पादौ स्पृशामि जगतीपते ३७ संजय उवाच इति ब्रुवाणं सुमनाः किरीटिनं
युधिष्ठिरः प्राह वचो बृहत्तरं यशोक्षयं जीवितमीप्सितं ते जयं सदा वीर्यमरिक्षयं तदा ३८ प्रयाहि वृद्धिं च

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दिशं तं देवता यथाहमिष्ठामितवास्तनतथा प्रयाहि शीघ्रं जहि कर्णमाहवे पुरंदरो वृत्रमिवात्मवृद्धये ५६
इति श्रीमहाभारते शतसाहस्र्यां संहितायां कर्णपर्वणि १५५८ संजय उवाच प्रसाद्य धर्मराजानं प्रहृष्टेनां
तरात्मना । पार्थः प्रोवाच गोविंदं सूतपुत्रवधोद्यतः १ कल्प्यतां मे रथो भूयो युज्यतां च हयोत्तमाः शस्त्र
णानि च सर्वाणि सज्यंतां मे महारथे २ उपावृत्ता ह्यश्वतरगाः शिक्षिता ह्यश्वसादिभिः रथोपकरणैः स
ह्ना उपायांतु त्वरान्विताः ३ प्रयाहि शीघ्रं गोविंद सूतपुत्रजिघांसया एवमुक्तो महाराज फाल्गुनेन म
हात्मना ४ उवाच दारुकं कृष्णः कुरु सर्वं यथाब्रवीत् अर्जुनो भरतश्रेष्ठः श्रेष्ठः सर्वधनुष्मतां ५ आज्ञ
प्तस्त्वथ कृष्णेन दारुको राजसत्तम योजयामास स रथं वैयाघ्रं शत्रुतापनं ६ सज्जं निवेदयामास पांडव
स्य महात्मनः युक्तं तं तु रथं दृष्ट्वा दारुकेण महात्मना ७ आपृच्छ्य धर्मराजानं ब्राह्मणान्स्वस्ति वाच्य च
सुमंगलस्वस्त्ययनमारुरोह रथोत्तमं ८ तस्य राजा महाप्राज्ञो धर्मराजो युधिष्ठिरः आशिषो युंक्त सत
तः प्रायात्कर्णरथं प्रति ९ तमायांतं महेष्वासं दृष्ट्वा भूतानि भारत निहतं मेनिरे कर्णं पांडवेन मह
त्मना १० बभूवुर्विमलाः सर्वा दिशो राजन्समंततः चाषाश्च शतपत्राश्च क्रौंचाश्चैव जनेश्वर ११ प्रद
क्षिणमकुर्वंत तदा वै पांडुनंदनं बहवः पक्षिणो राजन्पुन्नामानः शुभाः शिवाः १२ त्वरयंतोऽर्जुनं युद्धे हृ
ष्टरूपा ववाशिरे कंकागृध्रा बकाः श्येना वायसाश्च विशांपते । १३ अग्रतस्तस्य गच्छंति मांसहेतोर्भया
नकाः निमित्तानि च धन्यानि पार्थिवस्य प्रशंसिरे १४ विनाशमरिसैन्यानां कर्णस्य च वधं प्रति प्रयातस्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. यथापार्थस्यमहान्स्वेदोव्यजायत १५ चिंताचविपुलाजज्ञेकथंचेदंभविष्यति ततोगांडीवधन्वानमब्रवी
१४२ न्मधुसूदनः १६ दृष्ट्वापार्थंतथायांतंचिंतापरिगतंतदा वासुदेवउवाच गांडीवधन्वन्संग्रामेयेत्वया
धनुषाजिताः १७ नतेषांमानुषोजेतात्वदन्यःक्षविद्यते दृष्टाहिबहवःशूराःप्राकृतुल्यपराक्रमाः त्वां
प्राप्यसमरेशूरायेगताःपरमांगतिं १८ कोहिद्रोणंचभीष्मंचभगदत्तंचमारिष विंदानुविंदावावं
त्यौकांबोजंचसुदक्षिणं १९ श्रुतायुषंमहावीर्यमच्युतायुषमेवच प्रत्युद्गम्यभवेत्क्षेमीयोनस्यात्त्व
मिवप्रभो २० तवह्यस्त्राणिदिव्यानिलाघवंबलमेवच असंमोहश्चयुद्धेषुविज्ञानस्यचसंनतिः
२१ भेदःपातश्चलक्षेषुयोगश्चैवतवार्जुन भवान्देवान्सगंधर्वान्हन्यात्सहचराचरान् २२ पृथि
व्यांतुरणेपार्थनयोद्धात्वत्समःपुमान् धनुर्ग्राहाहियेकेचित्क्षत्रियायुद्धदुर्मदाः २३ आदेवात्वत्स
मंतेषांनपश्यामिशृणोमिच ब्रह्मणाचप्रजाःसृष्टागांडीवंचमहद्धनुः २४ येनत्वंयुध्यसेपार्थत
स्मान्नास्तित्वयासमः अवश्यंतुमयावाच्यंयत्पथ्यंतवपांडव २५ मावमंस्थामहाबाहोकर्णमाह
वशोभिनं कर्णोहिबलवान्दृप्तःकृतास्त्रश्चमहारथः २६ कृतीचचित्रयोधीचदेशकालस्यको
विदः बहुनात्रकिमुक्तेनसंक्षेपात्शृणुपांडव २७ त्वत्समंत्वद्विशिष्टंवाकर्णंमन्येमहारथं परमं
यत्नमास्थायत्वयावध्योमहाहवे २८ तेजसावह्निसदृशोवायुवेगसमोजवे अंतकप्रतिमःक्रो
धेसिंहसंहननोबली २९ ॥ १४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अष्टरत्निरित्यस्य विवरणं महाबाहुर्व्यूढोरस्क इति तथा हि सर्वस्य पुरुषस्य व्याममात्रं देहौन्नत्यं तच्च पंचहस्तं विंश
त्यधिकशतांगुलं रत्निस्त्वेकविंशत्यंगुलः अष्टानामरत्नीनामष्टषष्ट्यधिकं शतमंगुलानि च भवंति आजा
नुबाहुपुरुषस्य व्यामं अष्टरत्निमितं भवति अष्टाचत्वारिंशदंगुलानि अवृद्धिः तत्रापि पंचमांशेन वृद्धिः

अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः अभिमानी च शूरश्च प्रवीरः प्रियदर्शनः ३० सर्वयोधगुणै
र्युक्तो मित्राणामभयंकरः सततं पाण्डवद्वेषी धार्तराष्ट्रहिते रतः ३१ सर्वैरवध्यो राधेयो देवैरपि सवा
सवैः ऋते त्वामिति मे बुद्धिस्तदद्य जहि सूतजं ३२ देवैरपि हि संयत्तैर्बिभ्रद्भिर्मांसशोणितं अशक्यः स
माजेतुं सर्वैरपि युयुत्सुभिः ३३ दुरात्मानं पापवृत्तं नृशंसं दुष्टप्रज्ञं पाण्डवेयेषु नित्यं हीनस्वार्थं पाण्ड
वेयैर्विरोधे हत्वा कर्णं निश्चितार्थो भवाद्य ३४ तं सूतपुत्रं रथिनां वरिष्ठं निष्कालिकं कालवशं नयाद्य
तं सूतपुत्रं रथिनां वरिष्ठं हत्वा प्रीतिं धर्मराजे कुरुष्व ३५ जानामि ते पार्थ वीर्यं यथावद्दुर्वारणीयं च सु
रासुरैश्च सदावजानाति हि पाण्डुपुत्रानसौ दर्पात्सूतपुत्रो दुरात्मा ३६ आत्मानं मन्यते वीरं येन पापः सुयो
धनः तमद्य मूलं पापानां जहि सौतिं धनंजय ३७ खड्गजिह्वं धनुरास्यं शरदंष्ट्रं तरस्विनं दृप्तं पुरुषशा
र्दूलं जहि कर्णं धनंजय ३८ अहं त्वामनुजानामि वीर्येण च बलेन च जहि कर्णं रणे शूरं मातंगमिव
केसरी ३९ यस्य वीर्येण वीर्यं ते धार्तराष्ट्रोऽवमन्यते तमद्य पार्थ संग्रामे कर्णं वैकर्तनं जहि ४०॥

विशालता शोषं
अंसार्दरभ्यवाहोर्व्यूहिरिति ज्ञेयं ३०।३१ ३४ निष्कालिकं निर्गतः कालयिता नेता यस्मात्तं ३५ ३६ ३७ ३८ ४०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१५२

इतिश्रीमहाभारतेकर्णपर्वणि ३५८ संजयउवाच ततःपुनरमेयात्माकेशवोर्जुनमब्रवीत् कृतसं
कल्पमायांतंवधेकर्णस्यभारत १ अद्यसप्तदशाहानिवर्त्तमानस्यभारत विनाशस्यातिघोरस्यनरवार
णवाजिनां २ भूत्वाहिविपुलासेनातावकानांपरैःसह अन्योन्यंसमरंप्राप्यकिंचिच्छेषाविशांपते ३ भू
त्वाचकौरवाःपार्थप्रभूतगजवाजिनः त्वांवैशत्रुंसमासाद्यविनष्टारणमूर्धनि ४ एतेनेपृथिवीपा
लाःसृंजयाश्चसमागताः त्वांसमासाद्यदुर्धर्षंपांडवाश्चव्यवस्थिताःपांचालैःपांडवैर्मत्स्यैःकरूषै
श्चेदिभिःसह त्वयागुप्तैरमित्रघ्नैःकृतःशत्रुगणक्षयः ६ कोहिशक्तोरणेजेतुंकौरवांस्तातसंयुगे
अन्यत्रपांडवान्युद्धेत्वयागुप्तान्महारथान् ७ शक्तस्त्वंहिरणेजेतुंससुरासुरमानुषान् त्रींल्लोकान्सम
वेयुक्तान्किंपुनःकौरवंबलं ८ भगदत्तंचराजानंकोन्यःशक्तस्त्वयाविना जेतुंपुरुषशार्दूलयोपिस्याद्वा
सवोपमः ९ तथेमांविपुलांसेनांगुप्तांपार्थत्वयानघ नशेकुःपार्थिवाःसर्वेचक्षुर्भिरपिवीक्षितुं १० तथै
वसततंपार्थरक्षिताभ्यांत्वयारणे धृष्टद्युम्नशिखंडिभ्यांभीष्मद्रोणौनिपातितौ ११ कोहिशक्तोरणेपार्थ
भारतानांमहारथौ भीष्मद्रोणौयुधाजेतुंशक्रतुल्यपराक्रमौ १२ कोहिशांतनवंभीष्मंद्रोणंवैकर्तनंकृ
पं द्रौणिंचसौमदत्तिंचकृतवर्माणमेवच १३ सैंधवंमद्रराजानंराजानंचसुयोधनं वीरान्कृतास्त्रान्स
मरेसर्वानेवानिवर्तिनः १४ अक्षौहिणीपतीनुग्रान्संरब्धान्युद्धदुर्मदान् त्वामृतेपुरुषव्याघ्रजेतुंशक्तःपु
मानिह १५ श्रेण्यश्चबहुलाःक्षीणाःप्रदीर्णाश्वरथद्विपाः नानाजनपदाश्चोग्राःक्षत्रियाणाममर्षिणां १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२२ यदित्वंजातुनभवेस्तर्हिधार्त्तराष्ट्रबलंकोनुप्रतीयादितिसंबंधः २३ २४ २५ २६ २७ २८ २९ २२

गावासदाससमीपानांवसातीनांचभारत प्राच्यानांवाटधानानांभोजानांचाभिमानिनां १७ उदीर्णा
श्चगजानांसेनाब्रह्मक्षत्रस्यभारत त्वांसमासाद्यनिधनंगताभीमचभारत १८ उग्राश्चभीमकर्माणा
स्तुषारायवनाःखशाः दार्वाभिसारादरदाःशकामाठरतंगणाः १९ अंध्रकाश्चपुलिंदाश्चकिरा
ताश्चोग्रविक्रमाः म्लेछाश्चपार्वतीयाश्चसागरानूपवासिनः २० संरंभिणोयुद्धशौंडाबलिनोद
ढपाणयः एतेसुयोधनस्यार्थेसंरब्धाःकुरुभिःसह २१ नशक्यायुधिनिर्जेतुंत्वदन्येनपरंतप धा
र्तराष्ट्रमुदग्रंहिव्यूढंदृष्ट्वामहाबले २२ यच्चत्वंनभवेस्तातप्रतीयात्कोनुमानवः तत्सागरमिवो
द्धूतंरजसासंवृतंबले २३ विदार्यपांडवैःक्रुद्धैस्त्वयागुप्तैर्हतंविभो मागधानामधिपतिर्जयत्सेनोम
हाबलः २४ अद्यसेनैवचाहानिहतःसंख्येभिमन्युना ततोदशसहस्राणिराजानांभीमकर्मणा २५
जघानगदयाभीमस्तस्यराज्ञःपरिच्छदं ततोन्येभिहतानागारथाश्चशतशोबलात् २६ तदेवंसम
रेपार्थवर्त्तमानेमहाभये भीमसेनंसमासाद्यत्वांचपांडवकौरवाः २७ सवाजिरथमातंगामृत्युलो
कमितोगताः तथासेनामुखेतत्रनिहतेपार्थपांडवैः २८ भीष्मःप्रासृजदुग्राणिशरजालानिमारि
ष सचेदिकाशिपांचालान्करूषान्मत्स्यकेकयान् २९ शरैःप्राछाद्यनिधनमनयत्परमास्त्रवित् तस्य
चापच्युतैर्बाणैःपरदेहविदारणैः ३० पूर्णमाकाशमभवद्रुक्मपुंखैरजिह्मगैः हत्वाद्दशसहस्राणिकेके

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ लन्तं नरद्विपान् त्वामसमेनान्समहाबलान् गत्वा दशाम्यातेगत्वा जघ्नुर्वाजिरथद्विपान् २२ हित्वा नवगतीई शूरः स
१४४ बाणानाहवेऽसृजन् दिनानि दश भीष्मेण निघ्नता तावकं बलं २३ शून्याः कृता रथोपस्था हताश्च गजवाजिनः
दर्शयित्वात्मनो रूपं रुद्रोपेन्द्रसमं युधि २४ पांडवानामनीकानि प्रगाह्य सो व्यशातयत् विनिघ्नन् पृथिवीपालां
श्चेदिपांचालकेकयान् २५ अदहत्पांडवीं सेनां रथाश्वगजसंकुलां मज्जंतमप्लवे मंदमुज्जिहीर्षुः सुयोधनं
२६ तथा चरंतं समरे तपंतमिव भास्करं पदातिकोटिसाहस्राः प्रवरायुधपाणयः २७ न शेकुः संजयाद्रष्टु
तथैवान्ये महीक्षितः विचरंतं तथा तं तु संग्रामे जितकाशिनं २८ सर्वोद्यमेन महता पांडवान्समभिद्रव
न् स तु विद्राव्य समरे पांडवान्सृंजयानपि २९ एकं एव रणे भीष्म एकवीरत्वमागतः तं शिखंडी समासा
द्य त्वयाशुभ्रो महाव्रते ४० जघान पुरुषव्याघ्रं शरैः सन्नतपर्वभिः स एष पतितः शेते शरतल्पे पितामहः
४१ त्वां प्राप्य पुरुषव्याघ्रं ध्वजः श्येनेव वासवं द्रोणः पंचदिनान्युग्रो विधम्य रिपुवाहिनीं ४२ कृत्वा व्यूहम
भेद्यं च पातयित्वा महारथान् जयद्रथस्य समरे कृत्वा रक्षां महारथः ४३ अंतकप्रतिमश्चोग्रो रात्रियुद्धे
दहन्प्रजाः दग्ध्वा योधाञ्छरैर्वीरो भारद्वाजः प्रतापवान् ४४ धृष्टद्युम्नं समासाद्य स गतः परमां गतिं
यदि वा यभवान्युद्धे सूतपुत्रममर्षणं यान् ४५ नावारयिष्यत्संग्रामे न स्म द्रोणो व्यनेशत तत भवता त बले
सर्वे धार्तराष्ट्रस्य वारितं ४६ ततो द्रोणो हतो युद्धे पार्षतेन धनंजय एवं वा को रणे कुर्यात्त्वदन्यः क्षि
तौ युधि ४७ यादृशं ते कृतं पार्थ जयद्रथवधं प्रति निवार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान् ४८ १४५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४८ त्वांहीनितंतोणेनसर्वंभस्मीकर्तुंसमर्थंत्वांप्राप्यपकाहान्नश्पमानेतत्वंप्रयुक्तंबलवत्तरंमन्येपंजानीयांतेणे
निहतः सैंधवोराजात्वयास्त्रबलतेजसा आश्चर्यंसिंधुराजस्यबधंजानेतिपार्थिवाः ४९ अनाश्चर्यंहि
तत्वन्नस्त्वंहिपार्थमहारथः त्वांहिप्राप्यरणेतत्क्षमेकाहादितिभारत ५० नश्पमानमहंयुक्तंमन्येयमिति
मेमतिः सेयंपार्थचमहीपाथांतेनाश्रमसंयुगे ५१ हतसर्वस्ववीराद्धिभीष्मद्रोणौयदाहतौ शीर्णप्रवर
योधायहतवाजिरथद्विपा ५२ हीनासूर्येंदुनक्षत्रैर्द्यौरिवाभातिभारतीविध्वस्ताहिरणेपार्थसेनेयंभी
मविक्रम ५३ आसुरीवपुरासेनाशक्रस्येवपराक्रमैः तेषांहतावशिष्टास्तुसंतिपंचमहारथाः ५४
अश्वत्थामाकृतवर्माकर्णोमद्राधिपःकृपः तांस्त्वमद्यनरव्याघ्रहत्वापंचमहारथान् हतामित्रः
प्रयच्छोर्वींराज्ञेसद्वीपपत्तनां साकाशजलपातालांसपर्वतमहावनां प्राप्नोत्वमितवीर्यश्रीरद्य
पार्थोवसुंधरां ५५ एतांपुराविष्णुरिवहत्वादैतेयदानवान् प्रयच्छमेदिनींराज्ञेशक्रायेवहरिर्य
था ५६ अद्यमोदंतुपांचालानिहतेष्वरिषुत्वया विष्णुनानिहतेष्वेवदानवेयेषुदेवताः ५७ य
दिवाद्विपदांश्रेष्ठद्रोणंमानयतोगुरुं अश्वत्थाम्निकृपातेतस्मिन्कृपेचाचार्यगौरवात् ५८ अत्यंताप
चितान्बंधून्मानयन्मातृबांधवान् कृतवर्माणमासाद्यननेष्यसियमक्षयं ५९ भ्रातरंमातुरा
साद्यशल्यंमद्रजनाधिपं यदित्वमरविंदाक्षदयावान्नजिघांससि ६० ॥
तेनापमपिपरोंकाहपर्यंतंत्वामयित्वा इतिभावः ॥ ॥ ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो॰टी॰ १६५ इमंपापमतिंत्वद्यमत्वंतेपांडवास्तुति कर्णमघनरश्रेष्ठजह्याःसुनिशितैःशरैः ९२ एतेनसुकृतेनैकर्मणात्रकिं
वनयुध्यते वयमप्यनुमानीमोनात्रदोषोस्तिकश्चन दहतेपत्सपुत्रायानिशिमानुस्तवानच यत्नार्थंयत्त्वयु
ध्यास्तुप्रावर्त्ततसुयोधनः ९३ तस्यसर्वस्यदुष्टात्माकर्णोवैमूलमित्युत कर्णंहिमन्यतेत्राणंनित्यमेवसु
योधनः ९४ ततोमामपिसंरब्धोनिगृहीतुंप्रचक्रमे स्थिराबुद्धिर्नरेंद्रस्यधार्त्तराष्ट्रस्यमानद ९५ कर्णः
पार्थान्रणेसर्वान्विजेष्यतिनसंशयः कर्णमाश्रित्यकौंतेयधार्त्तराष्ट्रेणविग्रहः ९६ रोचितोभवतासा
र्धंजानतापिबलंतव कर्णोहिभाषतेनित्यमहंपार्थान्समागतान् ९७ वासुदेवंचदाशार्हंविजेष्यामि
महारथं प्रोत्साहयन्दुरात्मानंधार्त्तराष्ट्रंसुदुर्मतिं ९८ समितोगर्जतेकर्णस्तमयजहिभारत यच्चयुष्मा
सुपापंवैधार्त्तराष्ट्रःप्रयुक्तवान् ९९ तत्रसर्वत्रदुष्टात्माकर्णःपापमतिर्मुखं यच्चतद्धार्तराष्ट्रस्यक्रूरैः
षड्भिर्महारथैः १०० अपश्यंनिहतंवीरंसौभद्रमृषभेक्षणं द्रोणद्रौणिकृपान्वीरान्कर्षयंतंनरर्षभान्
१०१ निर्मनुष्याश्चमातंगान्विरथांश्चमहारथान् व्यश्वारोहांश्चतुरगान्पत्तीन्नायुधजीविनः १०२ कुर्वंत
मृषभस्कंधंकुरुवृष्णियशस्करं विधमंतमनीकानिव्यथयंतंमहारथान् १०३ मनुष्यवाजिमातंगान्प्र
हिण्वंतंयमक्षयं शरैःसौभद्रमायांतंदहंतमिववाहिनीं १०४ तन्मेदहतिगात्राणिसखेसत्येनतेशपे
यत्तत्रापिचदुष्टात्माकर्णोभ्यद्रुह्यतप्रभो १०५ अशक्नुवंश्चाभिमन्योःकर्णःस्थातुंरणेग्रतः सौभद्रशर
निर्भिन्नोविसंज्ञःशोणितोक्षितः १०६ निःश्वसन्क्रोधसंदीप्तोविमुखःसायकार्दितः अपयानकृतोत्सा
होनिराशश्चापिजीविते १०७ तस्थौसुविह्वलःसंख्येप्रहारजनितश्रमः अथद्रोणस्यसमरेतत्कालसदृशंतदा १६५

श्रुत्वा कर्णो वचः क्रूरं ततस्त्विष्टेष्वकार्मुकं ततस्त्विन्माप्युधं तेन रणे पंच महारथाः ७९ तेचैव निकृतिप्रज्ञाः शारद्वन्स्
हुरस्रष्टिभिः तस्मिन्निनिहते वीरे सर्वेषां दुःखमाविशत् ८० प्राह सत्सत्तद् दृष्टात्मा कर्णः सचस्तु योधनः यच्चक
र्णोब्रवीत्सस्मां सभायां परुषं वचः ८१ प्रनष्टाः पांडवेयाश्च कुरूणां चन्न शोभवन् विनष्टाः पांडवाः कृष्णे शाश्व
ते नरकं गताः ८२ पतिमन्यं प्रवृण्वीष्व त्वमद्य भाविषि यथा तेऽद्धृतराष्ट्रस्य दासीभूता निवेशने ८३ श्र
विष्णाल्पत्स्मान्निन मे ते पतयस्तव इत्युक्तवानधर्मज्ञस्तदा परमदुर्मतिः ८४ पापः पापं वचः कर्णः श्रु
एवतस्तव भारत अद्य पापस्य तस्याकोस्तु वर्णं विकृतनाः शराः ८५ प्रणमंतु शिलाधौतास्त्वयो स्तां जीवित
छिदः यानि चान्यानि दुष्टात्मा पापानि कृतवांस्त्वयि ८६ तान्यद्य जीवितं चास्य शमयंतु शरास्तव गांडीवप्र
हितान्घोरान घ्नगात्रैः स्पृशान्तुरान् ८७ कर्णः स्मरतु दुष्टात्मा वचनं द्रोणभीष्मयोः सुवर्णपुंखा नाराचाः शत्रु
घ्नावैद्युतप्रभाः ८८ त्वयास्तास्तस्य वर्माणि भित्त्वा पास्यंति शोणितं उग्रास्त्वद्भुजनिर्मुक्ता मर्म भित्त्वा महाशराः
८९ अद्य कर्णं महावेगाः प्रेषयंतु यमक्षयं अद्य हाहाकृता दीना विषण्णास्त्वच्छरार्दिताः ९० प्रपतंतं रथात्
त्कर्णं पश्यंतु वसुधाधिपाः अद्य शोणितसंमग्नं प्रायाने पतितं भुवि अपविद्धायुधं कर्णं दीनाः पश्यन्तु बा
धवाः ९१ हस्तिकक्षो महानस्य भल्लेनोन्मथितस्त्वया प्रकंपमानः पततु भूमाववशीर्णध्वजः ९२ त्वया श
रशतैश्छिन्नं रथं हेमविभूषितं हतयोधा समुत्सृज्य भीतः शल्यः पलायतां ९३ ततः सुयोधनो दृष्ट्वा हत
माधिरथिं त्वया निराशो जीविते त्वद्य राज्ये चैव भवत्वरिः ९४ एते द्रवंति पांचाला वध्यमानाः शितैः शरैः
कर्णेन भरतश्रेष्ठ पांडवानुजिहीर्षवः ९५ पांचालान्द्रौपदेयांश्च धृष्टद्युम्नशिखंडिनौ धृष्टद्युम्नतनजांश्च

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.प.

शतानीकं च नाकुलिं ९६ नकुलं सहदेवं च दुर्मुखं जनमेजयं सुधर्माणं सात्यकिं च विद्धि कर्णवशं गतान् ९७
अभ्याहतानां कर्णेन पांचालानां महारणे श्रूयते निनदो घोरस्त्वद्बंधूनां परंतप ९८ न त्वेव भीताः पांचालाः
कथंचित्स्युः पराङ्मुखाः नहि मृत्युं महेष्वासा गणयंति महारणे ९९ य एकः पांडवीं सेनां शरौघैः समवे
ष्टयत् तं समासाद्य पांचाला भीष्मं नाभ्यभवन्पराङ्मुखाः १०० तथा ज्वलंतमस्त्राग्निं गुरुं सर्वधनुष्मतां नि
र्दहंतं च समरे दुर्धर्षं द्रोणमोजसा १ ते नित्यमुदिता जेतुं मृधे शत्रून्नरिंदम न जात्वाधिरथेर्भीताः पांचा
लाः स्युः पराङ्मुखाः २ तेषामापततां शूरः पांचालानां तरस्विनां आदत्तासून्शरैः कर्णः पतंगानामि
वानलः ३ तांस्तथाभिमुखान्वीरान्मित्रार्थे त्यक्तजीवितान् क्षयं नयति राधेयः पांचालान्शतशो रणे
४ तं द्वारं तमहेष्वासानगाधे मज्जतोऽप्लवे कर्णार्णवे प्लवो भूत्वा पांचालांस्त्रातुमर्हसि ५ अस्त्रं हि रामात्क
र्णेन भार्गवादृषिसत्तमात् यदुपात्तं महाघोरं तस्य रूपमुदीर्यते ६ तापनं सर्वसैन्यानां घोररूपं सुदा
रुणं समावृत्य महासेनां ज्वलितं स्वेन तेजसा ७ एते चरंति संग्रामे कर्णचापच्युताः शराः भ्रमराणा
मिव व्रातास्तापयंति स्म तावकान् ८ एते द्रवंति पांचाला दिक्षु सर्वासु भारत कर्णास्त्रं समरे प्राप्य दुर्नि
वार्यमनात्मभिः ९ एष भीमो दृढक्रोधो वृतः पार्थ समंततः सृंजयैर्योधयन्कर्णं पीड्यते निशितैः शरैः
१० पांडवान्सृंजयांश्चैव पांचालांश्चैव भारत हन्याद्युपेक्षितः कर्णो रोगो देहमिवागतः ११ नान्यं त्वत्तो
हि पश्यामि योधं यौधिष्ठिरे बले यः समासाद्य राधेयं स्वस्तिमान्प्रव्रजेद्गृहं १२ तमद्य निशितैर्बाणै
र्विनिहत्य नरर्षभ यथाप्रतिज्ञं पार्थ त्वं कृत्वा कीर्तिमवाप्नुहि १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ १५ विमनतिः १२ ५ ज्वलंतंपुंस्त्वमाधं ९ ११ स्मरतोस्मरत ५ मेंडलेयघृतेश्चारीस्थापनपदंद्रोदंपाशं १३
तेद्दिशाक्रोशणेजेतंसकर्णेनपिकोरवान् नान्योयुधिष्ठिरंश्रेष्ठसत्यमेतद्ब्रवीमिते १४ एतत्कृत्वामह
त्कर्महत्वाकर्णंमहारथं कृतास्त्रःसफलःपार्थस्त्वंवीभवनरोत्तम १५ इतिश्रीमहाभारतेकर्णपर्व
णि संजयउवाच सकेशवस्यवीभत्सुःश्रुत्वाभारतभाषितं विशोकःसंप्रहृष्टश्चतत्क्षणेनसमपद्यत
१ ततोऽस्यामभिमज्यासुआलिपङ्क्तिविंशधनुः दृष्टेकर्णविनाशायकेशवंचाभ्यभाषत २ त्वयानाथ
थेनगोविंदध्रुवएवजयोमम प्रसन्नोयस्यमेचत्वंलोकेभूतभविष्यकृत् ३ त्वत्सहायोह्यहंकृष्णत्री
लोकान्वैसमागतान् प्रापयेयंपरंलोकंकिमुकर्णंमहाहवे ४ पश्यामिद्रवतींसेनांपांचालानांज
नार्दन पश्यामिकर्णंसमरेविचरंतमभीतवत् ५ भार्गवास्त्रंचपश्यामिज्वलंतंकृष्णसर्वशः सृष्ट
कर्णेनवार्ष्णेयशक्रेणेवयथाशनिं ६ अयंखलुससंग्रामोयत्रकर्णंमयाहते कथयिष्यंतिभूता
नियावद्भूमिर्धरिष्यति ७ अद्यकृष्णविकर्णंमेकर्णंनेष्यंतिमृत्यवे गांडीवमुक्ताःतिग्मंतोममह
स्तप्रचोदिताः ८ अद्यराजाधृतराष्ट्रःस्वांबुद्धिमवमंस्यते दुर्योधनमराज्यार्हंययाराज्येऽभ्यषिंचयत् ९
अद्यराज्यात्सुखाच्चैवश्रियोराष्ट्रात्तथापुरात् पुत्रेभ्यश्चमहाबाहोधृतराष्ट्रोविमोक्ष्यति १० अद्यदुर्यो
धनोराज्याज्जीविताच्चनिराशकः भविष्यतिहतेकर्णेकृष्णसत्यंब्रवीमिते ११ अद्यदृष्ट्वामयाकर्णंशरैर्वि
शकलीकृतं स्मरतांतववाक्यानिशमंप्रतिजनेश्वरः १२ अद्यासौसौबलःकृष्णग्लहान्जानातुवैशरान् द्रो

क.टी.
१८०

अथकुंतीसुतस्याहंहंदंरात्रःप्रजागरं अपनेष्यामिगोविंदहत्वाकर्णंशितैःशरैः १४ अथकुंतीसुतोराजा
हतेसूतसुतेमया सुप्रहृष्टमनाःप्रीतश्चिरंसुखमवाप्स्यति १५ अथचाहमनाध्यक्षंकेशवाप्रतिमंशरं
उत्स्रक्ष्यामीहयःकर्णंजीवितोद्भ्रंशयिष्यति १६ यस्यचैतद्व्रतंमह्यंवधेकिलदुरात्मनः पादौनधावयेता
वद्यावद्धन्यांनफाल्गुनं १७ मृषाकृत्वाव्रतंतस्यपापस्यमधुसूदन पातयिष्येरथात्कायंशरैःसन्नतप
र्वभिः १८ योसौरणेनरंनान्यंपृथिव्यामनुमन्यते तस्याद्यसूतपुत्रस्यभूमिःपास्यतिशोणितं १९ अप
तिरथोसिकृष्णेतिसूतपुत्रोयदाब्रवीत् धृतराष्ट्रमतेकर्णःश्लाघमानःस्वकान्गुणान् २० अनृतंतत्
त्करिष्यंतिमामकानिशिताःशराः आशीविषाइवक्रुद्धास्तस्यपास्यंतिशोणितं २१ मयाहस्तवतामु
क्तानाराचावैद्युतत्विषः गांडीवसृष्टादास्यंतिकर्णस्यपरमांगतिं २२ अद्यतप्स्यतिराधेयःपांचालींय
त्तदाब्रवीत् सभामध्येवचःक्रूरंकुत्सयन्पांडवान्प्रति २३ येवैषंढतिलास्तत्रभवितारोद्यतेतिलाः हते
वैकर्तनेकर्णेसूतपुत्रेदुरात्मनि २४ अहंवःपांडुपुत्रेभ्यस्त्रास्यामीतियदब्रवीत् धृतराष्ट्रसुतान्क
र्णःश्लाघमानोत्मनोगुणान् २५ अनृतंतत्करिष्यंतिमामकानिशिताःशराः हंताहंपांडवान्सर्वा
न्सपुत्रानितियोब्रवीत् २६ तमद्यकर्णंहंतास्मिमिषतांसर्वधन्विनां यस्यवीर्यंसमाश्वास्यधार्तराष्ट्रो
महामनाः २७ अवमन्यतदुर्बुद्धिर्नित्यमस्मान्दुरात्मवान् अथकर्णेहतेकृष्णधार्तराष्ट्राःसराजकाः
विद्रवंतुदिशोभीताःसिंहत्रस्तामृगाइव अद्यदुर्योधनोराजाआत्मानंचानुशोचतां २९ हतेकर्णेमया १८०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मेत्युसपुत्रेसमहज्जने अद्यकर्णेहतेदृष्ट्वाधार्तराष्ट्रोत्यमर्षणः ३० जानातुमांरणेकृष्ण प्रवरंसर्वधन्वि
नां सपुत्रपौत्रसामात्यंसभृत्यंचनिराशिषं ३१ अद्यराज्येकरिष्यामिध्वजराष्ट्रंजनेश्वरं अद्यकर्णस्य
चक्रांगाःक्रव्यादाश्चपृथग्विधाः ३२ शरैश्छिन्नानिगात्राणिविचरिष्यंतिकेशव अद्यराधासुतस्याहं
संग्रामेमधुसूदन ३३ शिरश्छेत्स्यामिकर्णस्यमिषतांसर्वधन्विनां अद्यतीक्ष्णैर्विपाटैश्चक्षुरैश्चमधुसू
दन ३४ रणेछेत्स्यामिगात्राणिराधेयस्यदुरात्मनः अद्यराजामहत्कृच्छ्रंसंत्यक्ष्यतियुधिष्ठिरः ३५ संता
पंमानसंवीरश्चिरसंभृतमात्मनः अद्यकेशवराधेयमहंहत्वासबांधवं ३६ नंदयिष्यामिराजानंध
र्मपुत्रंयुधिष्ठिरं अद्याहमनुगान्कृष्णकर्णस्यकृपणान्युधि ३७ हंताज्वलनसंकाशैःशरैःसर्पवि
षोपमैः अद्याहंहेमविकचैर्गार्द्धपत्रैरजिह्मगैः ३८ संस्तरिष्यामिगोविंदवसुधांवसुधाधिपैः अ
द्याभिमन्योःशत्रूणांसर्वेषांमधुसूदन ३९ प्रमथिष्यामिगात्राणिशिरांसिचशितैःशरैः अद्यनि
र्धार्तराष्ट्रांचभ्रात्रेदास्यामिमेदिनीं ४० निरर्जुनांवापृथिवींकेशवानुचरिष्यसि अद्याहमनृणःकृ
ष्णभविष्यामिधनुर्भृतां ४१ कोपस्यचकुरूणांचशराणांगांडिवस्यच अद्यदुःखमहंमोक्ष्येत्रयोदश
समार्जितं ४२ हत्वाकर्णंरणेकृष्णशंबरंमघवानिव अद्यकर्णेहतेयुद्धेसोमकानांमहारथाः ४३ कृतं
कार्यंचमन्यंतांमित्रकार्यैप्सवोयुधि ममचैवकथंप्रीतिःशैनेयस्याद्यमाधव ४४ भविष्यतिहतेकर्णेम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰
१५८

विचापिजयाधिके अहंहत्वारणेकर्णपुत्रंचास्यमहारथं ४५ प्रीतिंदास्यामिभीमस्ययमयोःसात्यकस्यच
धृष्टद्युम्नशिखंडिभ्यांपांचालानांचमाधव ४६ अद्यानृण्यंगमिष्यामिहत्वाकर्णंमहाहवे अद्यपश्यं
तुसंग्रामेधनंजयममर्षणं ४७ युध्यंतंकौरवान्संख्येपातयंतंचसूतजं भवत्सकाशेवक्ष्येचपुनरेवा
त्मसंस्तवं ४८ धनुर्वेदेमत्समोनास्तिलोकेपराक्रमेवाममकोस्तितुल्यः कोवाप्यन्योमत्समोस्तिक्ष
मावान्त्याक्रोधेसदृशोन्योनमेस्ति ४९ अहंधनुष्मानसुरान्सुरांश्चसर्वाणिभूतानिचसंगतानि स्व
बाहुवीर्याद्गमयेपराभवंमत्पौरुषंविद्धिपरंपरेभ्यः ५० शरार्चिषागांडिवेनाहमेकः सर्वान्कुरून्बाल्हि
कांश्चाभिहत्य हिमात्ययेकक्षगतोयथाग्निस्तथादहेयंसगणान्प्रसह्य ५१ पाणौपृषत्कालिखिता
ममेतेधनुश्चसव्येविततंसबाणं पादौचमेसरथौसध्वजौचनमादृशंयुद्धगतंजयंति ५२ इत्येवमु
क्त्वार्जुनएकवीरः त्विषेरिपुघ्नःस्वतनजोपमानः भीमंमुमुक्षुःसमरेप्रयातःकर्णस्यकायाच्चशिरोजि
हीर्षुः ५३ इतिश्रीमहाभारतेकर्णपर्वणि ३०९९ धृतराष्ट्रउवाच समागमेपांडवसंजयानांमहा
भयेमामकानामगाधे धनंजयेतातरणायायातेकर्णेनतद्युद्धमभूत्कीदृक् १ संजयउवाच तेषाम
नीकानिबृहद्ध्वजानिरणेसमृद्धानिसमागतानि गर्जंतिभेरीनिनदोन्मुखानिनादैर्यथामेघगणास्त
पांते २ महागजाभ्राकुलमस्त्रतोयंवादित्रनेमीतलशब्दवच्च हिरण्यचित्रायुधविद्युतंचशरासिनारा
चमहास्त्रधारं ३ तद्भीमवेगंरुधिरौघवाहिखड्गाकुलंक्षत्रियजीवघाति अनार्तवंक्रूरमनिष्टवर्षंच १५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भवनं तस्मिन्हरणे प्रजानां ४ एकं रथं संपरिवार्य मृत्युं नयंत्यनेके च रथाः समेताः एकस्तथैकं रथिनं रथाग्र्यस्तथा
रथश्चापि रथाननेकान् ५ रथं ससूतं सहयं च केचित्कश्चिद्रथीन्सध्वजानिनाय निनाय चाप्येकगजेन कश्चि
द्रथान्बहून्सध्वजाँस्तथाश्वान् ६ रथान्ससूतान्सहयान्गजांश्च सर्वानरीन्सध्वजशस्त्रशोभैः निघ्नन्हयांश्चैव
तथा ससादीन्पदातिसंघांश्च तथैव पार्थः ७ कृपः शिखंडी च रणे समेतौ दुर्योधनं सात्यकिरभ्यगच्छत् श्रु
तश्रवा द्रोणसुतेन सार्धं युधामन्युश्चित्रसेनेन सार्धं ८ कर्णस्य पुत्रं तु रथी सुषेणं समागतं सृंजयश्चोत्तमौ
जाः गांधारराजं सहदेवः क्षुधार्तो महर्षभं सिंह इवाभ्यधावत् ९ शतानीको नाकुलिः कर्णपुत्रं युवा युवानं
वृषसेनं शरौघैः समार्पयत्कर्णपुत्रश्च शूरः पांचालेयं शरवर्षैरनेकैः १० रथर्षभः कृतवर्माणमार्छन्मा
द्रीपुत्रो नकुलश्चित्रयोधी पांचालानामधिपो याज्ञसेनिः सेनापतिः कर्णमार्छत्ससैन्यं ११ दुःशासनो भार
त भारती च संसप्तकानां पृतना समृद्धा भीमं रणे शस्त्रभृतां वरिष्ठं भीमं समार्छत्तमसह्यवेगं १२ कर्णात्म
जेन तत्र जघान वीरस्तथा छिन्नश्चोत्तमौजाः प्रसह्य तस्योत्तमांगं निपपात भूमौ निनादयन्गां निनदेन खं च
१३ सुषेणशीर्षं पतितं पृथिव्यां विलोक्य कर्णोथ तदार्तरूपः क्रोधाद्धयांस्तस्य रथं ध्वजं च बाणैः सुधारै
र्निशितैरकृंतत् १४ स तूत्तमौजा निशितैः पृषत्कैर्विव्याध खड्गेन च भास्वरेण पार्ष्णिग्रहांश्चैव कृपस्य हत्वा
शिखंडिवाहं स ततोऽध्यरोहत् १५ कृपं तु दृष्ट्वा विरथं रथस्थो नैच्छच्छरैस्ताडयितुं शिखंडी तं द्रोणिरावार्य रथं
कृपस्य समुज्जह्रे पंकगतां यथा गां १६ हिरण्यवर्मा निशितैः पृषत्कैस्तवात्मजानामनिलात्मजो वै प्रतापयंस्से
न्यमतीव भीमः काले शुचौ मध्यगतो यथार्कः १७ इति श्रीमहाभारते कर्णपर्वणि ४०८२॥
७ पंचसप्ततिः ग्रंथ १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१५१

संजयउवाच यथात्विदानींतुमुलेविमर्देद्विषद्भिरेकोबहुभिःसमावृतः महारणेसारथिमित्युवाचभीम
श्चमूंवाहयधार्तराष्ट्रीं १ त्वंसारथेयाहिजवेनवाहैर्नयाम्येतान्धार्तराष्ट्रान्यमाय संचोदितोभीमसेनेन।
चैवंससारथिःपुत्रबलंत्वदीयं २ प्रायात्ततःसारथिरुग्रवेगोयतोभीमस्तद्बलंगंतुमैच्छत् ततोपरेनाग
रथाश्वपत्तिभिःप्रत्युद्ययुस्तेकुरवःसमंतात् ३ भीमस्यवाहाग्र्यमुदारवेगंसमंततोबाणगणैर्निजघ्नुः
ततःशरानापततोमहात्माचिच्छेदबाणैस्तपनीयपुंखैः ४ तेवैनिपेतुस्तपनीयपुंखाद्विधात्रिधाभी
मशरैर्निकृत्ताः ततोराजन्नागरथाश्वयूनांभीमाहतानांवरराजमध्ये ५ घोरोनिनादःप्रबभौनरेंद्र
वज्राहतानामिवपर्वतानां तेवध्यमानाश्चनरेंद्रमुख्यानिर्भिन्नाभीमशरप्रवेकैः ६ भीमंसमंतात्स
मरेभ्यरोहन्वृक्षंशकुंताइवपुष्पहेतोः ततोभियातेतवसैन्येसभीमःप्रादुश्चक्रेवेगमनंतवेगः ७
यथांतकालेक्षपयन्दिधक्षुर्भूतांतकृत्कालइवात्तदंडः तस्यातिवेगस्यरणेतिवेगंनाशक्नुवन्वार।
यितुंत्वदीयाः ८ व्यात्ताननस्यापततोयथैवकालस्यकालेहरतःप्रजावै ततोबलंभारतभारतानां
प्रदह्यमानंसमरेमहात्मना ९ भीतंदिशोकीर्यतभीमनुन्नंमहानिलेनाभ्रगणोयथैव ततोधीमा
न्सारथिमब्रवीद्बलीसभीमसेनःपुनरेवहृष्टः १० सूताभिजानीहिस्वकान्परान्वारथान्ध्वजांश्चापततः
समेतान् युध्यन्नहंनाभिजानामिकिंचिन्मासैन्यंस्वंछादयिष्येपृषत्कैः ११ अरीन्विशोकाभिनिरीक्ष्य।
सर्वतोरथान्ध्वजाग्राणिधुनोतिमेमनो राजातुरोनागमयत्किरीटीबहूनिदुःखान्यभियातोस्मिसूत १२ १५१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

या

एतद्दुःखंमारथेधर्मराजोयन्मांहित्वायातवान्शत्रुमध्ये नैनंजीवंनाद्यजानाम्यजीवंवीभत्सुंवातन्ममा
द्यातिदुःखं १३ सोहंद्विषत्सैन्यमुदग्रकल्पंविनाशयिष्येपरमप्रतीतः एतन्निहत्वाजिमध्येसमेतंप्रीतो
भविष्यामिसहत्वयाद्य १४ सर्वांस्तूणान्सायकानामवेक्ष्यकिंशिष्टंस्यात्सायकानांरथेमे कावाजातिः
किंप्रमाणंचतेषांज्ञात्वाव्यक्तंतन्ममाचक्ष्वसूत १५ विशोकउवाच षण्मार्गणानामयुतानिवीरक्षुरा
श्चभल्लाश्चतथायुताख्याः नाराचानांद्वेसहस्रेचवीरत्रीण्येवचप्रदराणांस्मपार्थ १६ अस्त्यायुधंपाण्ड
वेयावशिष्टंनयद्वहेच्छकटंषड्गवीयं एतद्विद्वन्मुंचसहस्रशोपिगदासिबाहुद्रविणंचतेस्ति १७ प्रासा
श्चमुद्गराःशक्तयस्तोमराश्चमाभैषीस्त्वंसंख्ययाद्युधानां १८ भीमसेनउवाच सूताद्येनंपश्यभीमप्रयु
क्तैःसंछिंदद्भिःपार्थिवानांसुवेगैःछन्नंबाणैराहवंघोररूपंनष्टादित्यंमृत्युलोकेनचान्यं १९ अद्येतद्वै
विदितंपार्थिवानांभविष्यतिसाकुमारंचसूत निमग्नोवासमरेभीमसेनएकःकुरून्वासमरेव्यजेषीत्
२० सर्वेसंख्येकुरवोनिःपतंतुमांवालोकाःकीर्तयंत्वाकुमारं सर्वानेकस्तानहंपातयिष्येतेवासर्वेभी
मसेनंतुदंतु २१ आशास्तारःकर्मचाप्युत्तमंयेतन्मेदेवाःकेवलंसाधयंतु आयात्विहाद्यार्जुनःशत्रुघा
तीशक्रस्तूर्णंयज्ञइवोपहूतः २२ ईक्षस्वैतांभारतींदीर्यमाणामेतेकस्माद्विद्रवंतेनरेंद्राः व्यक्तंधीमान्सव्य
साचीनराग्र्यःसैन्यंह्येतच्छादयत्याशुबाणैः २३ पश्यध्वजांश्चद्रवतोविशोकनागान्हयान्पत्तिसंघांश्चसं
ख्ये रथान्विकीर्णान्शरशक्तिताडितान्पश्यस्वैतान्रथिनश्चैवसूत २४ आपूर्यतेकौरवीचाप्यभीक्ष्णंसे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
१५

नाराचैरेभिर्भृशंहन्यमाना धनंजयस्याशनितुल्यवेगैर्ग्रस्ताःपार्थैःकांचनबर्हिजालैः २५ एतेद्रवंतिस्म
रथाश्वनागाःपदातिसंघानतिमर्दयंतः संमुह्यमानाःकौरवाःसर्वएवद्रवंतिनागाइवचाग्निभीताः
२६ हाहाकृताश्चैवरणेविशोकमुंचंतिनादान्विपुलान्गजेंद्राः २७ विशोकउवाच किंभीमनैनंत्वमि
हाशृणोषिविस्फारितंगांडीवस्यातिघोरं क्रुद्धेनपार्थेनविकृष्यतोद्यकच्चिन्नेमौतवकर्णौविनष्टौ २८
सर्वेकामाःपांडवतेसमृद्धाःकपिर्ह्यसौदृश्यतेहास्तिसैन्ये नीलाद्धनाद्विद्युतमुच्चरंतींतथापश्यवि
स्फुरंतींधनुर्ज्यां २९ कपिर्ह्यसौवीक्षतेसर्वतोवैध्वजाग्रमारुह्यधनंजयस्य वित्रासयन्रिपुसंघान्वि
मर्देविभेम्यस्मादात्मनैवाभिवीक्ष्य ३० विभ्राजतेचातिमात्रंकिरीटंविचित्रमेतच्चधनंजयस्य दिवा
कराभोमणिरेषदिव्योविभ्राजतेचैवकिरीटसंस्थः ३१ पार्श्वेभीमेपांडुराभ्रप्रकाशंपश्यस्वशंखं
देवदत्तंसुघोषं अभीषुहस्तस्यजनार्दनस्यविगाहमानस्यचमूंपरेषां ३२ रविप्रभंवज्रनाभंक्षुरांतं
पार्श्वेस्थितंपश्यजनार्दनस्य चक्रंयशोवर्द्धनंकेशवस्यसदार्चितंयदुभिःपश्यवीर ३३ महाद्विपानांसर
लद्रुमोपमाःकरानिकृत्ताःप्रपतंत्यमीत्वरैः किरीटिनातेनपुनःससादिनःशरैर्निकृत्ताःकुलिशैरिवा
द्रयः ३४ तथैवकृष्णस्यचपांचजन्यंमहार्हमेतद्द्विजराजवर्णं कौंतेयपश्योरसिकौस्तुभंचजाज्वल्यमा
नंविजयांस्रजंच ३५ ध्रुवंरथाग्र्यःसमुपैतिपार्थोविद्रावयन्सैन्यमिदंपरेषां सिताभ्रवर्णैरसितप्रपुंखैर्हृ
येर्महार्हैरथिनोवरिष्ठः ३६ रथान्हयान्पत्तिगणांश्चसायकैर्विदारितान्पश्यपतंत्यमीयथा तवानुजे १५

नाग्नराजतेजसामहावनानीवसुपर्णवायुना १९ चतुःशतान्सप्तरथानिमान्‌हतान्सवाजिसूतान्समरे
किरीटिना महेषुभिःसप्तशतानिदंतिनांपदातिसादीश्वरथाननेकशः १८ अयंसमभ्येतितवांतिकंव
लीनिघ्नन्कुरून्चित्ररथवग्रहोर्जुनः समरद्धकामोसिहतांस्तवाहिताबलेनवायुश्चविरायवर्द्धतो १९ भीम
सेनउवाच ददानितेग्राममवरांश्चतुर्दशप्रियाख्यानेसारथेसुप्रसन्नः दासीशतंचापिरथांश्चविंशतिं
यदर्जुनंवेदयसेविशोक ५० इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच श्रुत्वातुरथनिर्घोषंसिंह
नादंचसंयुगे अर्जुनःप्राहगोविंदंशीघ्रंनोदयवाजिनः १ अर्जुनस्यवचःश्रुत्वागोविंदोर्जुनमब्रवीत्
एषगच्छामिसुक्षिप्रंयत्रभीमोव्यवस्थितः २ तंयांतमश्वैर्हिमशंखवर्णैः सुवर्णमुक्तामणिजालनद्धैः
जंभंजिघांसुंप्रगृहीतवज्रंजयायदेवेंद्रमिवोग्रमन्युं ३ रथाश्वमातंगपदातिसंघाबाणस्वनेनेमिखु
रस्वनैश्च संनादयंतोवसुधांदिशश्चक्रुद्धान्‌सिंहाजयमभ्युदीरयन् ४ तेषांचपार्थस्यचमारिषासीद्दे
हास्रुपाप्मक्षपणंसुयुद्धं त्रैलोक्यहेतोरसुरैर्यथासीद्देवस्यविष्णोर्जयतांवरस्य ५ तैरस्त्रमुच्चावचमा
युधंतदेकःप्रचिच्छेदकिरीटमाली क्षुरार्द्धचंद्रैर्निशितैश्चभल्लैःशिरांसितेषांबहुधाचबाहून् ६ छत्रा
णिबालव्यजनानिकेतूनश्वान्नथान्पत्तिगणान्द्विपांश्च तेपेतुरुर्व्यांबहुधाविरूपावातप्रभग्नानियथा
वनानि ७ सुवर्णजालावततामहागजाः सवैजयंतीध्वजयोधकल्पिताः सुवर्णपुंखैरिषुभिःसमाचि
ताश्चकाशिरेप्रज्वलितायथाचलाः ८ विदार्यनागाश्वरथान्धनंजयःशरोत्तमैर्वासववज्रसन्निभैः द्रुत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.टी.
१५२

९ षट्सप्ततिः श्रुत्वान्तरथनिर्घोषमिति स्पष्टार्थोऽष्टसप्ततिः १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

यथोक्तं जिष्णुसंयात यथायथा मरुत्वान्बलभेदने पुरा ८ ततः स पुरुषव्याघ्रस्तव सैन्यमरिंदमः प्रविवे
श महाबाहुर्मकरः सागरं यथा ९ ते हृष्टास्तावका राजन्नश्वपत्तिसमन्विताः रथाश्वसादिबहुलाः पांड
वं समुपाद्रवन् ११ तेषामापततां पार्थमारावः सुमहानभूत् सागरस्येव क्षुब्धस्य यथा स्यात्सलिलस्वनः
१२ ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः अभ्यद्रवंत संग्रामे त्यक्त्वा प्राणकृतं भयं १३ तेषामापततां तत्र
शरवर्षाणि मुंचतां अर्जुनो व्यधमत्सैन्यं महावातो घनानिव १४ तेऽर्जुनं सहिता भूत्वा रथवंशैः प्रहारिणः
अभियाय महेष्वासा विव्यधुर्निशितैः शरैः १५ ततोऽर्जुनः सहस्राणि रथवारणवाजिनां प्रेषयामास वि
शिखैर्यमस्य सदनं प्रति १६ ते वध्यमानाः समरे पार्थचापच्युतैः शरैः तत्र तत्र स्म लीयंते भये जाते महा
रथाः १७ तेषां चतुःशतान्वीरान्यतमानान्महारथान् अर्जुनो निशितैर्बाणैरनयद्यमसादने १८ ते व
ध्यमानाः समरे नानालिंगैः शितैः शरैः अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो दश १९ तेषां शब्दो महा
नासीद्द्रवतां वाहिनीमुखे महौघस्येव जलधेर्गिरिमासाद्य दीर्यतः २० तां तु सेनां भृशं विद्ध्वा द्रावयि
त्वार्जुनः शरैः प्रायादभिमुखः पार्थः सूतानीकं हि मारिष २१ तस्य शब्दो महानासीत्परानभिमुखस्य वै
गरुडस्येव पततः पन्नगार्थे यथा पुरा २२ तं तु शब्दमभिश्रुत्य भीमसेनो महाबलः बभूव परमप्रीतः पा
र्थदर्शनलालसः २३ श्रुत्वैव पार्थमायांतं भीमसेनः प्रतापवान् त्यक्त्वा प्राणान्महाराज सेनां तव ममर्द ह २४ १५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सवायुवीर्यप्रतिमोवायुवेगसमोजवे वायुवद्व्यचरद्भीमोवायुपुत्रःप्रतापवान् २५ तेनार्द्यमानाराजेंद्रसे
नातवविशांपते व्यभज्यतमहाराजभिन्नानौरिवसागरे २६ तांतुसेनांतदाभीमोदर्शयन्पाणिलाघवं शरै
रेवचकर्त्तोग्रैःप्रेषयिष्यन्यमक्षये २७ तत्रभारतभीमस्यबलंदृष्ट्वातिमानुषं व्यभ्रमंतरणेयोधाःकाल
स्येवयुगक्षये २८ तथार्दितान्भीमबलान्भीमसेनेनभारत दृष्ट्वादुर्योधनोराजाइदंवचनमब्रवीत् २९
सैनिकांश्चमहेष्वासान्योधांश्चभरतर्षभ समादिशद्रणेसर्वान्हतभीममितिस्मह ३० तस्मिन्हतेहतंम
न्येपांडुसैन्यमशेषतः प्रतिगृह्यचतामाज्ञांतवपुत्रस्यपार्थिवाः ३१ भीमंप्रच्छादयामासुःशरवर्षैःस
मंततः गजाश्चबहुलाराजन्नराश्चजयगृद्धिनः ३२ रथेस्थिताश्चराजेंद्रपरिवव्रुर्वृकोदरं सतैःपरि
वृतःशूरैःशूरोराजन्समंततः ३३ शुशुभेभरतश्रेष्ठनक्षत्रैरिवचंद्रमाः परिवेषीयथासोमःपरिपू
र्णोविराजते ३४ सरराजतथासंख्येदर्शनीयोनरोत्तमः निर्विशेषोमहाराजयथाहिविजयस्तथा ३५
तस्यतेपार्थिवाःसर्वेशरवृष्टिंसमासृजन् क्रोधरक्तेक्षणाःशूराहंतुकामावृकोदरं ३६ तांविदार्यम
हासेनांशरैःसंनतपर्वभिः निश्चक्रामरणाद्भीमोमत्स्योजालादिवांभसि ३७ हत्वादशसहस्राणि।
गजानामनिवर्त्तिनां नृणांशतसहस्रेद्वेद्वेशतेचैवभारत ३८ पंचचाश्वसहस्राणिरथानांशतमे
वच हत्वाप्रास्यंदयद्भीमोनदींशोणितवाहिनीं ३९ शोणितोदांरथावर्त्तांहस्तिग्राहसमाकुलां नर
मीनाश्वनक्रांतांकेशशैवलशाड्वलां ४० संछिन्नभुजनागेंद्रांबहुरत्नापहारिणीं ऊरुग्राहांमज्जप
कांशीर्षोपलसमावृतां ४१ धनुःकाशांशरावापांगदापरिघकेतनां हंसछत्रध्वजोपेतामुष्णीषव।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ रफेनिलां ४२ हारपद्माकरां चैव भूमिरेणूर्मिमालिनीं आर्यवृत्तवतीं संख्ये सुतरां भीरुदुस्तरां ४३ योधग्राह
वतीं संख्ये वहंतीं पितृसादनं तूणीनपुरुषव्याघ्रः प्रावर्त्तयत निम्नगां ४४ यथा वैतरणीमुग्रां दुस्तरामकृ
१५२ तात्मभिः तथा दुस्तरणीं घोरां भीरूणां भयवर्द्धिनीं ४५ यतो यतः पांडवेयः प्रविष्टो रथसत्तमः ततस्ततो
ह्यातयत योधाञ्छतसहस्रशः ४६ एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे दुर्योधनो महाराज शकुनिं वा
क्यमब्रवीत् ४७ जय मातुल संग्रामे भीमसेनं महाबलं अस्मिन् जिते जितं मन्ये पांडवेयं महाबलं ४८
ततः प्रायान्महाराज सौबलेयः प्रतापवान् रणाय महते युक्तो भ्रातृभिः परिवारितः ४९ स समासा
द्य संग्रामे भीमं भीमपराक्रमं वारयामास तं वीरो वेलेव मकरालयं ५० सन्यवर्त्तत तं भीमो वार्यमाणः
शितैः शरैः शकुनिस्तस्य राजेंद्र वामपार्श्वे स्तनांतरे ५१ प्रेषयामास नाराचान्रुक्मपुंखान् शिलाशिता
न् वर्म भित्वा तु ते घोराः पांडवस्य महात्मनः ५२ न्यमज्जंत महाराज कंकबर्हिणवाससः सोतिविद्धो र
णे भीमः शरं रुक्मविभूषितं ५३ प्रेषयामास सहसा सौबलं प्रति भारत तमायांतं शरं घोरं शकुनिः
शत्रुतापनः ५४ चिच्छेद सप्तधा राजन् कृतहस्तो महाबलः तस्मिन्निपतिते भूमौ भीमः क्रुद्धो विशांप
ते ५५ धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान् ५६ अन्यदा
दाय वेगेन धनुर्भल्लांश्च षोडश तैस्तस्य तु महाराज भल्लैः सन्नतपर्वभिः ५७ द्वाभ्यां स सारथिं ह्यर्छत् भीमं
सप्तभिरेव च ध्वजमेकेन चिच्छेद द्वाभ्यां छत्रं विशांपते ५८ चतुर्भिश्चतुरो वाहान्विव्याध सुबलात्मजः
ततः क्रुद्धो महाराज भीमसेनः प्रतापवान् शक्तिं चिक्षेप समरे रुक्मदंडमयस्मयीं सा भीमभुजनिर्मुक्ता। १५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नागाजिह्वेवचंचला ६० निपपातरणेतूर्णंसौबलस्यमहात्मनः ततस्तामेवसंगृह्यशक्तिंकनकभूषणां ६१
भीमसेनायचिक्षेपक्रुद्धरूपोविशांपते सानिर्भिद्यभुजंसव्यंपांडवस्यमहात्मनः ६२ निपपाततदाभूमौ
यथाविद्युन्नभश्च्युता अथोत्क्रुष्टंमहाराजधार्त्तराष्ट्रैःसमंततः ६३ नततंममृषेभीमःसिंहनादंतरस्वि
नां अभ्यद्रवत्सज्यधनुःससंत्वरमाणोमहाबलः ६४ मुहूर्तादिवराजेंद्रछादयामाससायकैः सौबलस्य
बलेसंख्येत्यक्त्वात्मानंमहाबलः ६५ तस्याश्वांश्चतथोहत्वासूतंचैवविशांपते ध्वजंचिच्छेदभल्लेनत्व
रमाणःपराक्रमी ६६ हताश्वंरथमुत्सृज्यत्वरमाणोनरोत्तमः तस्थौविस्फारयंश्चापंक्रोधरक्तेक्षणःश्व
सन् ६७ शरैश्चबहुधाराजन्भीममार्छत्समंततः प्रतिहत्यतुवेगेनभीमसेनःप्रतापवान् ६८ धनुश्चि
च्छेदसंक्रुद्धोविव्याधचशितैःशरैः सोतिविद्धोबलवताशत्रुणाशत्रुकर्शनः ६९ निपपाततदाभूमौकिं
चित्प्राणोनराधिपः ततस्तंविह्वलंज्ञात्वापुत्रस्तवविशांपते ७० अपोवाहरथेनाजौभीमसेनस्यपश्य
तः रथस्थेतुनरव्याघ्रेधार्त्तराष्ट्राःपराङ्मुखाः ७१ प्रदुद्रुवुर्दिशोभीताभीमाज्जातमहाभये सौबले
निर्जितेराजन्भीमसेनेनधन्विना ७२ भयेनमहताविष्टःपुत्रोदुर्योधनस्तव अपायाज्जवनैरश्वैःसापे
क्षोमातुलंप्रति ७३ पराङ्मुखंतुराजानंदृष्ट्वासैन्यानिभारत विप्रजग्मुःसमुत्सृज्यद्वैरथानिसमंततः ७४
तान्दृष्ट्वाविद्रुतान्सर्वान्धार्त्तराष्ट्रान्पराङ्मुखान् जवेनाभ्यपतद्भीमःकिरन्शरशतान्बहून् ७५ तेवध्य
मानाभीमेनधार्त्तराष्ट्राःपराङ्मुखाः कर्णमासाद्यसमरेस्थिताराजन्समंततः ७६ सहितेषांमहावीर्योद्वी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१५२

योभूत्स महाबलः भिन्ननौका यथा राजन्द्वीपमासाद्य निर्वृताः १७ भवंति पुरुषव्याघ्र नाविकाः कालपर्यये
तथा कर्णं समासाद्य तावकाः पुरुषर्षभ १८ समाश्वस्ताः स्थिता राजन्संप्रहृष्टाः परस्परं समीजग्मुश्च युद्धा
य मृत्युं कृत्वा निवर्त्तने १९ इति श्रीमहाभारते कर्णपर्वणि ५२ धृतराष्ट्र उवाच ततो भग्नेषु सैन्येषु भीमसे
नेन संयुगे दुर्योधनोब्रवीत्किं तु सौबलो वापि संजय १ कर्णो वा जयतां श्रेष्ठो योधा वा मामका युधि कृपो वा
कृतवर्मा च द्रौणिर्दुःशासनोपि वा २ अत्यद्भुतमहं मन्ये पांडवेयस्य विक्रमं यदेकः समरे सर्वान्योधया
मास मामकान् ३ यथाप्रतिज्ञं योधानां राधेयः कृतवानपि कुरूणामथ सर्वेषां कर्णः शत्रुनिषूदनः
४ शर्म वर्म प्रतिष्ठा च जीविताशा च संजय तत्प्रभग्नं बलं दृष्ट्वा कौंतेयेनामितौजसा ५ राधेयो वाप्याधि
रथिः कर्णः किमकरोद्युधि पुत्रा वा मम दुर्द्धर्षा राजानो वा महारथाः ६ एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि सं
जय ६ संजय उवाच अपराह्णे महाराज सूतपुत्रः प्रतापवान् जघान सोमकान्सर्वान्भीमसेनस्य पश्यतः
७ भीमोप्यतिबलं सैन्यं धार्त्तराष्ट्रं व्यपोथयत् अथ कर्णोब्रवीच्छल्यं पांचालान्प्रापयस्व मां ८ द्राव्यमाणं ब
लं दृष्ट्वा भीमसेनेन धीमता यंतारमब्रवीत्कर्णः पांचालानेव मां वह ९ मद्रराजस्ततः शल्यः श्वेतानश्वा
न्महाजवान् प्राहिणोच्चेदिपांचालान्करूषांश्च महाबलः १० प्रविश्य च स तां सेनां शल्यः परबलार्दनः
न्यच्छत्तुरगान्हृष्टो यत्र यत्रैच्छदग्रणीः ११ तं रथं मेघसंकाशं वैयाघ्रपरिवारणं संदृश्य पांडुपांचालास्त्रस्ता ह्या
सन्विशांपते १२ ततो रथस्य निनदः प्रादुरासीन्महारणे पर्जन्यसमनिर्घोषः पर्वतस्येव दीर्यतः १३ ततः श १५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रथानैस्तीक्ष्णैः कर्णचापाकर्षनिःसृतैः जघानपांडवबलंशतशोथसहस्रशः १४ तंतथासमरेकर्मकुर्वाणम
पराजितं परिवव्रुर्महेष्वासाःपांडवानांमहारथाः १५ तंशिखंडीचभीमश्चधृष्टद्युम्नश्चपार्षतः नकुलःस
हदेवश्चद्रौपदेयाश्चसात्यकिः १६ परिवव्रुर्जिघांसंतोराधेयंशरवृष्टिभिः सात्यकिस्तुततःकर्णंविंशत्या
निशितैःशरैः १७ अताडयद्रणेशूरोजत्रुदेशेनरोत्तमः शिखंडीपंचविंशत्याधृष्टद्युम्नश्चसप्तभिः १८ द्रौप
देयाश्चतुःषष्ट्यासहदेवश्चसप्तभिः नकुलश्चशतेनाजौकर्णंविव्याधसायकैः १९ भीमसेनस्तुराधेयंन
वत्यानतपर्वणां विव्याधसमरेक्रुद्धोजत्रुदेशेमहाबलः २० अथप्रहस्याधिरथिर्विक्षिपन्धनुरुत्तमं मु
मोचनिशितान्बाणान्पीडयन्समहाबलः २१ तान्प्रत्यविध्यद्राधेयःपंचभिःपंचभिःशरैः सात्यकेस्तुध
नुश्छित्वाध्वजंचभरतर्षभ २२ तंतथानवभिर्बाणैराजघानस्तनांतरे भीमसेनंततःक्रुद्धोविव्याधत्रिंशता
शरैः २३ सहदेवस्यभल्लेनध्वजंचिच्छेदमारिष सारथिंचत्रिभिर्बाणैराजघानपरंतपः २४ विरथान्द्रौप
देयांश्चचकारभरतर्षभ अक्ष्णोर्निमेषमात्रेणतदद्भुतमिवाभवत् २५ विमुखीकृत्यतान्सर्वान्शरैः
सन्नतपर्वभिः पांचालानहनच्छूरांश्चेदीनांचमहारथान् २६ तेवध्यमानाःसमरेचेदिमत्स्याविशांपते
कर्णमेकमभिद्रुत्यशरसंघैःसमर्पयन् २७ तान्जघाननिशितैर्बाणैःसूतपुत्रोमहारथः एतदत्यद्भुतंक
र्णेदृष्टवानस्मिभारत २८ यदेकःसमरेशूरान्सूतपुत्रःप्रतापवान् यतमानान्परंशक्त्यायोधयानो।
चधन्विनः २९ पांडवेयान्महाराजशरैर्वारितवान्रणे तत्रभारतकर्णस्यलाघवेनमहात्मनः ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
१५४
तुष्टुवुर्देवताः सर्वाः सिद्धाश्च सहचारणैः अपूजयन्महेष्वासा धार्तराष्ट्रा नरोत्तमं ३१ कर्णं रथवरश्रेष्ठं श्रेष्ठं
सर्वधनुष्मतां ततः कर्णो महाराज ददाह रिपुवाहिनीं ३२ कक्षमिद्धो महावह्निर्निदाघे ज्वलितो महान् ते
वध्यमानाः कर्णेन पांडवेयास्ततस्ततः ३३ प्राद्रवंत रणे भीताः कर्णं दृष्ट्वा महारथं तत्राक्रंदो महानासीत्पां
चालानां महारणे ३४ वध्यतां सायकैस्तीक्ष्णैः कर्णचापवरच्युतैः तेन शब्देन वित्रस्ता पांडवानां महाचमूः
३५ कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः तत्राद्भुतं पुनश्चक्रे राधेयः शत्रुकर्षणः ३६ यदेनं पांडवाः स
र्वे न शेकुरभिवीक्षितुं यथौघः पर्वतश्रेष्ठमासाद्याभिप्रदीर्यते ३७ तथा तत्पांडवं सैन्यं कर्णमासाद्य दी
र्यते कर्णोपि समरे राजन्विधूमोग्निरिव ज्वलन् ३८ दहंस्तस्थौ महाबाहुः पांडवानां महाचमूं शिरां
सि च महाराज कर्णांश्चैव सकुंडलान् ३९ बाहूंश्च वीरो वीराणां चिच्छेद लघु चेषुभिः हस्तिदंतत्सरून्
खड्गान् ध्वजान्शक्तीर्हयान् गजान् ४० रथांश्च विविधान्राजन्पताका व्यजनानि च अक्षं च युगयोक्त्राणि
चक्राणि विविधानि च ४१ चिच्छेद बहुधा कर्णो योधव्रतमनुष्ठितः तत्र भारत कर्णेन निहतैर्गजवाजि
भिः ४२ अगम्यरूपा पृथिवी मांसशोणितकर्दमा विषमं च समं चैव हतैरश्वपदातिभिः ४३ रथैश्च कुंज
रैश्चैव न प्राज्ञायत किंचन नापि स्वे न परे योधाः प्राज्ञायंत परस्परं ४४ घोरे शरांधकारे तु कर्णास्त्रे च वि
जृंभते राधेयचापनिर्मुक्तैः शरैः कांचनभूषणैः ४५ संछादिता महाराज पांडवानां महारथाः ते पांड
वेयाः समरे राधेयेन पुनः पुनः ४६ अभज्यंत महाराज यतमाना महारथाः मृगसंघा यथा क्रुद्धः सिंहो १५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रावयतेवने ४७ पंचालानांरथश्रेष्ठान्द्रावयन्शात्रवांस्तथा कर्णस्तुसमरेयोधांस्त्रासयन्समहायशाः ४८
कालयामासतत्सैन्यंयथापशुगणान्वृकः दृष्ट्वातत्पांडवीसेनांधार्त्तराष्ट्रःप्रतापवान् ४९ तत्राजगाम्महेष्वा
मारवैतोभैरवान्नवान् दुर्योधनोहिराजेंद्रमुदापरमयायुतः ५० वादयामाससंहृष्टोनानावाद्यानिसर्वशः
पंचालापिमहेष्वासाभग्नास्तत्रनरोत्तमाः ५१ न्यवर्त्ततयथाशूरंमृत्युंकृत्वानिवर्त्तनं तान्निवृत्तान्रणेशूरा
न्राधेयःशत्रुतापनः ५२ अनेकशोमहाराजबभंजपुरुषर्षभः तत्रभारतकर्णेनपंचालाविंशतीरथाः
५३ निहताःसायकैःक्रोधात्चेदयश्चपरंशताः कृत्वाशून्यान्रथोपस्थान्वाजिपृष्ठांश्चभारत ५४ निर्मनु
ष्यान्गजस्कंधान्पदातींश्चैवविद्रुतान् आदित्यइवमध्याह्नेदुर्निरीक्ष्यःपरंतपः ५५ कालांतकवपुःशूरःस
तपुत्रोभ्यराजत एवमेतन्महाराजनरवाजिरथद्विपान् ५६ हत्वातस्थौमहेष्वासःकर्णोरिगणसूदनः यथा
भूतगणान्हत्वाकालस्तिष्ठेन्महाबलः ५७ तथाससोमकान्हत्वातस्थावेकोमहारथः तत्राद्भुतमपश्या
मपंचालानांपराक्रमं ५८ वध्यमानापियत्कर्णंनाजहूरणमूर्द्धनि राजादुःशासनश्चैवकृपःशारद्वत
स्तथा ५९ अश्वत्थामाकृतवर्माशकुनिश्चमहाबलः न्यहनन्पांडवीसेनांशतशोथसहस्रशः ६० कर्ण
पुत्रौतुराजेंद्रभ्रातरौसत्यविक्रमौ निजघ्नातेबलंक्रुद्धौपांडवानामितस्ततः ६१ तत्रयुद्धंमहच्चासीत्क्रूरंविशस
नंमहत् तथैवपांडवाःशूराधृष्टद्युम्नशिखंडिनो ६२ द्रौपदेयाश्चसंक्रुद्धाअभ्यघ्नंस्तावकंबलं एवमेषक्ष
यावृत्तःपांडवानांततस्ततः ६३ तावकानामपिरणेभीमेप्राप्यमहाबलं ६४ इतिमहाभारतेकर्णपर्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टि. णि ॥ २४ ८९ संजय उवाच अर्जुनस्तु महाराज हत्वा सैन्यं चतुर्विधं सूतपुत्रं च संक्रुद्धं दृष्ट्वा चैव महारणे १ शोणि
१५५ तोदां महीं कृत्वा मांसमज्जास्थिपंकिलां मनुष्यशीर्षपाषाणां हस्त्यश्वकृतरोधसं २ शूरास्थिचयसंकीर्णां
काककंकानुनादितां छत्रहंसप्लवोपेतां वीरवृक्षापहारिणीं ३ हारपद्माकरवतीमुष्णीषवरफेनिलां ध
नुःशरध्वजोपेतां नरक्षुद्रकपालिनीं ५ चर्मवर्मभ्रमोपेतां रथोडुपसमाकुलां जयैषिणां च सुतरां भी
रूणां च सुदुस्तरां नदीं प्रावर्तयित्वा च बीभत्सुः परवीरहा वासुदेवमिदं वाक्यमब्रवीत्पुरुषर्षभः ६
अर्जुन उवाच एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते भीमसेनादयश्चैते योधयंति महारथं ७ एते द्रवंति
पांचालाः कर्णत्रस्ता जनार्दन एष दुर्योधनो राजा श्वेतच्छत्रेण धार्यता ८ कर्णेन भग्नान्पांचालान्द्रावय
न्बहु शोभते कृपश्च कृतवर्मा च द्रोणिश्चैव महारथः ९ एते रक्षंति राजानं सूतपुत्रेण रक्षिताः अवध्य
माना अस्माभिर्घातयिष्यंति सोमकान् ११ एष शल्यो रथोपस्थे रश्मिसंचारकोविदः सूतपुत्ररथं कृष्ण वा
हयन्बहु शोभते तत्र मे बुद्धिरुत्पन्ना वाहयात्र महारथ नाहत्वा समरे कर्णं निवर्तिष्ये कथंचन १२ राधे
योऽप्यन्यथा पार्थान्सृंजयांश्च महारथान् निःशेषान्समरे कुर्यात्पश्यतो नो जनार्दन १३ ततः प्रायाद्रथेनाशु
केशवस्तव वाहिनीं कर्णं प्रति महेष्वासं द्वैरथे सव्यसाचिना १४ प्रयातश्च महाबाहुः पांडवानुज्ञया हरिः
आश्वासयन्रथेनैव पांडुसैन्यानि सर्वशः १५ रथघोषः स संग्रामे पांडवेयस्य संबभौ वासवाशनितुल्य
स्य महौघस्येव मारिष १६ महता रथघोषेण पांडवः सत्यविक्रमः अभ्ययादप्रमेयात्मा निर्जयंस्तव वा १५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हितौ १७ तमायांतं समीक्ष्यैव सेनायां कृष्णसारथिं मद्रराजोब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः १८ अयं स रथ
आयाति श्वेताश्वः कृष्णसारथिः १९ निघ्नन्नमित्रान्समरे यं कर्ण परिपृच्छसि २० एष तिष्ठति कौंतेयः संस्पृ
शन्गांडिवं धनुः तं हनिष्यसि चेदद्य तन्नः श्रेयो भविष्यति २१ त्वामभिप्रेप्सुरायाति कर्ण निघ्नन्वरान्रथान् अ
सह्यमानो राधेय यत्तं याहि प्रति भारत २२ एषा विदीर्यते सेना धार्तराष्ट्री समंततः अर्जुनस्य भयात्तूर्णं निघ्नतः
शात्रवान्बहून् २३ वर्जयन्सर्वसैन्यानि त्वरते हि धनंजयः त्वदर्थमिति मन्येहं यथास्योदीर्यते वपुः २४
नह्यवस्थास्यते पार्थो युयुत्सुः केनचित्सह त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे २५ विरथं धर्मराजं
च दृष्ट्वा सुदृढविक्षतं शिखंडिनं सात्यकिं च धृष्टद्युम्नं च पार्षतं २६ द्रौपदेयान्युधामन्युमुत्तमौजसमे
व च नकुलं सहदेवं च भ्रातरौ द्वौ समीक्ष्य च २७ सहसैकरथः पार्थस्त्वामभ्येति परंतपः क्रोधरक्तेक्ष
णः क्रुद्धो जिघांसुः सर्वपार्थिवान् २८ त्वरितोभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यसंशयं त्वं कर्ण प्रतियाह्येनं
नास्त्यन्यो हि धनुर्धरः २९ न तं पश्यामि लोकेस्मिंस्त्वत्तोन्यं धनुर्धरं अर्जुनं समरे क्रुद्धं यो वेलामिव
धारयेत् ३० न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः एक एवाभियाति त्वां पश्य साफल्यमात्मनः ३१
त्वं हि कृष्णौ रणे शक्तः संसाधयितुमाहवे तवैव भारो राधेय प्रत्युद्याहि धनंजयं ३२ समानो ह्यसि भीष्मे
ण द्रोणद्रौणिकृपेण च सव्यसाचिनमायांतं निवारय महारणे ३३ लेलिहानं यथा सर्पं गर्जंतमृषभं
यथा वनस्थितं यथा व्याघ्रं जहि कर्ण धनंजयं ३४ एते द्रवंति समरे धार्तराष्ट्रा महारथाः अर्जुनस्य भया

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ १५९ त्वर्णांनिरपेक्षाजनाधिपाः इक्षतामथतेषांतुनान्योस्तियुधिमानवः भयहायोभवेद्वीरस्त्वामृतेसूतनंदन
पतेत्वांकुरवःसर्वेद्वीपमासाद्यसंयुगे ३४ विष्णितांपुरुषव्याघ्रत्वत्तःशरणकांक्षिणः वैदेहांबष्ठकांबो
जास्तथानग्रजितस्त्वया ३५ गांधाराश्चययाध्रुत्याजिताःसंख्येसुदुर्जयाः तांधृतिंकुरुराधेयततःप्रत्ये
हिपांडवं ३६ वासुदेवंचवार्ष्णेयंप्रीयमाणंकिरीटिना प्रत्युयाहिमहाबाहोपौरुषेमहतिस्थितः ३७
कर्णउवाच प्रकृतिस्थोस्मिमेशल्यइदानींसंमतस्त्वया प्रतिभासिमहाबाहोमाभैषीस्त्वंधनंजयात् ३८
पश्यबाह्वोर्बलंमेद्यशिक्षितस्यचपश्यमे एकोद्यनिहनिष्यामिपांडवानांमहाचमूं ३९ कृष्णौचपुरु
षव्याघ्रौततःसत्यंब्रवीमिते नाहत्वायुधितौवीरौव्यपयास्येकथंचन ४० शयिष्येवानिहतस्ताभ्याम
नित्योहिरणेजयः कृतार्थोद्यभविष्यामिहत्वावाप्यथवाहतः ४१ शल्यउवाच अजय्यमेनंप्रवदंति
युद्धेमहारथाःकर्णरथप्रवीरं एकाकिनंकिमुकृष्णाभिगुप्तंविजेतुमेनंकइहोत्सहेत ४२ कर्णउवा
च नैतादृशोजातुबभूवलोकेरथोत्तमोयावदुपश्रुतंनः तमीदृशंप्रतियोत्स्यामिपार्थंमहाहवेपश्य
चपौरुषंमे ४३ रणेचरत्येषरथप्रवीरःसितैर्हयैःकौरवराजपुत्रः सवाद्यमांनेष्यतिकृच्छ्रमेतत्क
र्णस्यांतादेतदंतास्तुसर्वे ४४ अस्वेदिनौराजपुत्रस्यहस्तावबेपमानौजातकिणौबृहंतौ दृढायुधः
कृतिमान्क्षिप्रहस्तोनपांडवेयेनसमोस्तियोधः ४५ गृह्णात्यनेकानपिकंकपत्रानेकंयथातान्क्षितिया
त्यचाशु तेक्रोशमात्रेनिपतंत्यमोघाःकस्तेनयोधोस्तिसमःपृथिव्यां ४६ अतोषयत्पांडवेयोहुताशं १५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृष्णद्वितीयो विजयो यशस्वी लेभे च वज्रं पुत्र कृष्ण सोमं महात्मा धनुर्गाण्डीवं पाण्डवः सव्यसाची ४७ श्वेताश्वयुक्तं च
सुघोषमुग्रं रथं महाबाहुररीन सत्वः महेषुधी चाक्षये दिव्यरूपे शस्त्राणि दिव्यानि च हव्यवाहात् ४८
तथेंद्रलोके निजघान दैत्यान् संख्येयान् कालकेयांश्च सर्वान् लेभे पुंस्त्वं देवदत्तं स्म तत्र को नाम ततो नाभ्य
धिकः पृथिव्यां ४९ महादेवं तोषयामास योसौ साक्षात्सगुहेन महानुभावः लेभे ततः पाशुपतं सुघो
रं त्रैलोक्यसंहारकरं महास्त्रं ५० पृथक् पृथक् लोकपालाः समेता ददुर्महास्त्राण्यप्रमेयाणि संख्ये ये
नान्त्यघानासुरगणान्नरसिंहः स कालकेयानसुरान्समेतान् ५१ तथा विराटस्य पुरे समेतान्सर्वानस्मानेक
रथेन जित्वा जहार तद्गोधनमाजिमध्ये वस्त्राणि चादत्त महारथेभ्यः ५२ तमीदृशं वीर्यगुणोपपन्नं कृ
ष्णद्वितीयं परमं नृपाणां तमाह्वयस्वाहमनुज्ञमेवै जाने स्वयं सर्वलोकस्य शल्य ५३ अनंतवीर्येण
च केशवेन नारायणेनाप्रतिमेन गुप्तः वर्षायुतैर्यस्य गुणानशक्या वक्तुं समेतैरपि सर्वलोकैः ५४ म
हात्मनः शंखचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य भयं च मे जायते साध्वसं च दृष्ट्वार्जुनावेकर
थे समेतौ ५५ अतीव पार्थो युधि कार्मुकेभ्यो नारायणश्चाप्रतिचक्रयुद्धे एवंविधौ पांडववासुदेवौ चले
त्स्वदेशाद्धिमवान्न कृष्णौ ५६ उभौ हि शूरौ बलिनौ दृढायुधौ महारथौ संहननोपपन्नौ एतादृशौ फाल्गुन
वासुदेवौ कोन्यः प्रतीयान्मदृते नु शल्य ५७ मनोरथो यस्तु ममाद्य तस्य मद्रेश युद्धं प्रति पांडवस्य नैतच्चि
रादाशु भविष्यतीदमत्यद्भुतं चित्रमतुल्यरूपं ५८ एतौ च हत्वा युधि पातयिष्ये मां वापि कृष्णौ निहनिष्यतो
ऽद्य इति ब्रुवन्शल्यममित्रहंता कर्णो रणे मेघ इवोन्ननाद ५९ अभ्येत्य पुत्रेण तवाभिनंदितः समेत्य चोवाच

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰प॰ कुरुप्रवीरं कृपं च भोजं च महाभुजावुभौ तथैव गांधारपतिं सहानुजं ९० गुरोः सुतं चावरजं तथात्मनः पदाति
१५७ नोयहिपसादिनश्चतान् निरुध्यताभिद्रवता युतार्जुनोग्रमेणसंयोजयताशुसर्वशः ९१ यथाभवद्भिर्भ
गोविततावुभौ सुखेनहन्यामहमद्यभूमिपाः तथेतिचोक्त्वात्वरितास्मतेर्जुनंजिघांसवोवीरतराःसमा
वृतुः ९२ शरैश्चजग्मुर्युधितेमहारथाधनंजयंकर्णनिदेशकारिणः नदीनदंभूरिजलामहार्णवोयथा
तथास्तेसमरेर्जुनोग्रसत् ९३ नसंदधानोनतथाशरोत्तमान्प्रमुंचमानोरिपुभिःप्रदृश्यते धनंजयास्ते
स्तशरैर्विदारिताहतानिपेतुर्नरवाजिकुंजराः ९४ शरार्चिषंगांडिवचारुमंडलं युगांतसूर्यप्रतिमान
तेजसं नकौरवाःशेकुरुदीक्षितुंजयंयथारविंव्याधितचक्षुषोजनाः ९५ शरोत्तमान्सप्रहितान्महा
रथेश्चिच्छेदपार्थःप्रहसंछरौघैः भूयश्चतानहनद्बाणसंघान्गांडीवधन्वायतपूर्णमंडले यथोग्ररश्मि
रश्मिःशुचिशुक्रमध्यगोसर्वंविवस्वान्हरतेजलौघान् तथार्जुनोबाणगणान्निरस्य ददाहसेनांतव
पार्थिवेंद्र ९६ तमभ्यधावद्विसृजन्कृपःशरांस्तथैवभोजस्तवचात्मजः स्वयं महारथोद्रोणसुतश्च
सायकैरवाकिरंस्तोयधरायथाचलं ९८ जिघांसुभिस्तान्कुशलैःशरोत्तमान्महाहवेसंजपितान्
प्रयत्नतः शरैःप्रचिच्छेदसपांडवस्त्वरन्पराभिनद्वक्षसिचेषुभिस्त्रिभिः ९९ सगांडिवव्यायतपूर्ण
मंडलस्तपन्रिपूनर्जुनभास्करोवभौ शरोग्ररश्मिःशुचिशुक्रमध्यगोयथैवसूर्यःपरिवेषवांस्तथा
९८ अथाग्र्यबाणैर्दशभिर्धनंजयंपराभिनद्द्रोणसुतोच्युतंत्रिभिः चतुर्भिरश्वांश्चतुरःकपिंततःश
रैश्चनाराचवरैरवाकिरत् ९९ ॥ टीका शुचिशुक्रयोः आषाढज्येष्ठयोर्मध्येगतः ९७ ९८ ॥ १५७

री॰ ग्यायुधं ग्यायुधज्जातं उपनिकीर्य निषंगकोशादिभ्यो निष्क्रम्य भूतले भग्नलले(?)ऽभ्यहनता स सारथिध्वजस्य स्योपस्थे २२
तथापि तं प्रस्फुरदात्तकार्मुकं त्रिभिः शरैर्यन्तृशिरः क्षुरेण हयांश्चतुर्भिश्च पुनस्त्रिभिर्ध्वजं धनंजयो द्रौणिरथा
दपातयत् २३ स रोषपूर्णो मणिवज्रहाटकैरलंकृतं तक्षकभोगवर्चसं महाधनं कार्मुकमन्यदाददे यथा
महाहिप्रवरं गिरेस्तथा २४ स्वमायुधं चोपनिकीर्य भूतले धनुश्च कृत्वा सगुणं गुणाधिकः समार्दयन्ना
वजितौ नरोत्तमौ शरोत्तमैर्द्रौणिरविध्यदन्तिकात् २५ कृपश्च भोजश्च तवात्मजश्च ते शरैरनेकैर्युधि पाण्डव
र्षभं महारथाः संयुगमूर्ध्नि स्थितास्तमोनुदं वारिधरा इवापतन् २६ कृपस्य पार्थः सशरं शरासनं हयान्ध्व
जान्सारथिमेव पत्रिभिः समार्पयद्बाहुसहस्रविक्रमस्तथा यथा वज्रधरः पुरा बलेः २७ स पार्थबाणैर्वि
निपातितायुधो ध्वजावमर्दे च कृते महाहवे कृतः कृपो बाणसहस्रयन्त्रितो यथापगेयः प्रथमं किरीटि
ना २८ शरैः प्रविच्छेद तवात्मजस्य ध्वजं धनुश्च प्रचकर्त नर्दतः जघान चाश्वान्कृतवर्मणः शुभान्ध्वजं
च चिच्छेद ततः प्रतापवान् २९ सवाजिसूतेष्वसनान्सकेतनाञ्जघान नागाश्वरथांस्त्वरंश्च सः ततः प्र
कीर्णं सुमहद्बलं तव प्रदारितं सेतुरिवाम्भसा यथा ३० ततोऽर्जुनस्याशु रथेन केशवश्चकार शत्रून
पसव्यमातुरान् ततः प्रयान्तं त्वरितं धनंजयं शतक्रतुं वृत्रनिजघ्नुषं यथा ३१ समन्वधावन्पुनरुच्छ्रि
तैर्ध्वजै रथैः सुयुक्तैरपरे युयुत्सवः अथाभिसृत्य प्रतिवार्य तानरीन्धनंजयस्याभि रथं महारथाः ३२ शिखं
डिशैनेययमाः शितैः शरैर्विदारयन्तो व्यनदन्सुभैरवं ततोऽभिजघ्नुः कुपिताः परस्परं शरैस्तदाञ्जोगतिभिः सुते॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ री॰ जैनः १० कुरुप्रवीराः सहसंजयैर्यथासुराः पुरा देवगणैस्तथाहवे जयेप्सवः स्वर्गमनाय चोत्सुकाः प्रतेतिना
१५८ गास्वरथाः परंतप ११ जगर्जुरुच्चैर्बलवच्च विव्यधुः शरैः समुद्रैरिव नेरतरं पृथक् ततोथ कारैत महात्मभिः
कृते महामृधे योधवरैः परस्परं १२ चतुर्दिशो वै विदिशश्च पार्थिव प्रभा च सूर्यस्य तमोवृतो भवत् १३ इति
कर्णपर्वणि ४४ संजय उवाच राजन्कुरूणां प्रवरैर्बलैर्भीममभिद्रुते मज्जंतमिव कौंतेयमुज्जिहीर्षु
र्धनंजयः १ विमृद्य सूतपुत्रस्य सेनां भारत सायकैः प्राहिणोन्मृत्युलोकाय प्रवीरान्धनंजयः २ ततो
ऽंबरमाश्रित्य शरजालानि भागशः अदृश्यंत तथान्ये च निघ्नंतस्तव वाहिनीं ३ स पक्षिसंघाचरित
मा काशं पूरयन्धनुषाशनैः धनंजयो महाबाहुः कुरूणामंतको भवत् ४ ततो भल्लैः क्षुरप्रैश्च नाराचैर्विमलै
रपि गात्राणि प्राच्छिनत्पार्थः शिरांसि च चकर्त ह ५ छिन्नगात्रैर्विकवचैर्विशिरस्कैः समंततः पतितैश्च प
तद्भिश्च योधैरासीत्समावृता ६ धनंजयशराभ्यस्तैः स्यंदनाश्वरथद्विपैः संछिन्नभिन्नविध्वस्तैर्व्यंगां
गावयवैस्तता ७ सुदुर्गमा सुविषमा घोरात्यर्थं सुदुर्दृशा रणभूमिरभूद्राजन्महावैतरणी यथा ८ ई
षाचक्राक्षभग्नैश्च व्यश्वैः साश्वैश्च युध्यतां ससूतैर्हतसूतैश्च रथैः स्तीर्णाभवन्मही ९ सुवर्णवर्णसंनाहैर्यो
धैः कनकभूषणैः आस्थिताः कृतवर्माणो भद्रा नित्यमदा द्विपाः १० क्रुद्धाः क्रूरैर्महामात्रैः पार्ष्ण्यंगुष्ठप्रचोदितः
चतुःशताः शरवरैर्हताः पेतुः किरीटिना ११ पर्यस्तानीव शृंगाणि ससत्वानि महागिरेः धनंजयशराभ्यस्तैः स्ती
र्णा भूर्वरवारणैः १२ समंताज्जलदप्रख्यान्वारणान्मदवर्षिणः अभिपेदे र्जुनरथो घनान्भिंदन्निवांशुमान् १३ ॥ १५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हतैर्गजमनुष्याश्वैर्भिन्नैश्च बहुधा रथैः विशस्त्रयंत्रकवचैर्युद्धशौंडैर्गतासुभिः १४ अपविद्धायुधैर्मार्गः स्ती
र्णोभूत्फाल्गुनेन वै विस्फार्यच गांडीवं सुमहद्भैरवस्वनं १५ घोरवज्रविनिष्पेषस्तनयित्नोरिवांबरे
ततः प्रादीर्यत चमूर्धनंजयशराहता १६ महावातसमाविद्धा महानौरिव सागरे नानारूपाः प्राण
हराः शरा गांडीवचोदिताः १७ अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन् महागिरौ वेणुवनं
निशि प्रज्वलितं यथा १८ तथा तव महासैन्यं प्रास्फुरच्छरपीडितं संपिष्टदग्धविध्वस्तं तव सैन्यं कि
रीटिना १९ कृतं प्रविहतं बाणैः सर्वतः प्रद्रुतं दिशः महावने मृगगणा दावाग्नित्रासिता यथा २० कु
रवः पर्यवर्तंत निर्दग्धाः सव्यसाचिना उत्सृज्य च महाबाहुं भीमसेनं तथा रणे २१ बलं कुरूणामुद्विग्नं
सर्वमासीत्पराङ्मुखं ततः कुरुषु भग्नेषु बीभत्सुरपराजितः २२ भीमसेनं समासाद्य मुहूर्तं सोभ्यवर्तत
समागम्य च भीमेन मंत्रयित्वा च फाल्गुनः २३ विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरं भीमसेनाभ्य
नुज्ञातस्ततः प्रायाद्धनंजयः २४ नादयन् रथघोषेण पृथिवीं द्यां च भारत ततः परिवृतो वीरैर्दशभिर्यो
धपुंगवैः २५ दुःशासनादवरजैस्तव पुत्रैर्धनंजयः ते तमभ्यर्दयन्बाणैरुल्काभिरिव कुंजरं २६ आत
तेष्वसनाः क्रूरा नृत्यंत इव भारत अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः २७ निर्मुक्तान्हि स तान्मेने यमा
याशु किरीटिना ततस्ते शाद्वलस्थाः पराङ्मुखरथेर्जुने २८ तेषामापततां केतून्स्वांश्चापानि सायकान्
नाराचैरर्धचंद्रैश्च क्षिप्रं पार्थोन्यपातयत् २९ अथान्यैर्दशभिर्भल्लैः शिरांस्येषामपातयत् रोषसंरक्तनेत्रा
णि संदष्टौष्ठानि भूतले ३० तानि वक्त्राणि विबभुः कमलानीव भूरिशः तांस्तु भल्लैर्महावेगैर्दशभिर्दशकौ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१५८

हयमेघादानुकम्पंवैदेवैत्वाप्रायादमितद्युहा २२ इतिश्रीमहाभारतेकर्णपर्वणि संजयउवाच तेप्रयांतंमहावे
गैरश्वैःकपिवरध्वजं युद्धायाभ्यद्रवन्वीराःकुरूणांनवतीरथाः १ कृत्वासंशप्तकाघोरंशपथंपारलौकि
कं परिवव्रुर्नरव्याघ्रानरव्याघ्रंरणेर्जुनं २ कृष्णःश्वेतान्महावेगानश्वान्कांचनभूषणान् मुक्ताजालप्र
तिच्छन्नान्प्रैषीत्कर्णरथंप्रति ३ ततःकर्णरथंयांतमरिघ्नंतंधनंजयं बाणवर्षैरभिघ्नंतःसंशप्तकरथा
ययुः ४ त्वरमाणांस्तुतान्सर्वान्ससूतेषुसनध्वजान् जघाननवतिंवीरानर्जुनोनिशितैःशरैः ५ तेप
तंतहताबाणैर्नानारूपैःकिरीटिना सविमानायथासिद्धाःस्वर्गात्पुण्यक्षयेतथा ६ ततःसरथनागा
श्वाःकुरवःकुरुसत्तम निर्भयाभरतश्रेष्ठमभ्यवर्तंतफाल्गुनं ७ तदायस्तमनुष्याश्वमुदीर्णवरवा
रणं पुत्राणांतेमहासैन्यंसमरौत्सीद्धनंजयं ८ शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः प्राछादय
न्महेष्वासाःकुरवःकुरुनंदनं ९ तामंतरिक्षेविततांशस्त्रवृष्टिंसमंततः व्यधमत्पांडवोबाणैस्तमः
सूर्यइवांशुभिः १० ततोम्लेच्छास्स्थितैर्मत्तैस्त्रयोदशशतैर्गजैः पार्श्वतोभ्यहनन्पार्थंतवपुत्रस्यशासना
त् ११ कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः मुसलैर्भिंडिपालैश्चरथस्थंपार्थमार्दयन् १२
तांशस्त्रवृष्टिमतुलांद्विपहस्तैःप्रवेरितां चिच्छेदनिशितैर्भल्लैरर्द्धचंद्रैश्चफाल्गुनः १३ अथतान्द्विरद
न्सर्वान्नानालिंगैःशरोत्तमैः सपताकध्वजारोहान्गिरीन्वज्रैरिवाहनत् १४ तेहेमपुंखैरिषुभिरर्दिताहेम
मालिनः हताःपेतुर्महानागाःसाग्निज्वालाइवाद्रयः १५ ततोगांडीवनिर्घोषोमहानासीद्विशांपते स्तन
तांकूजतांचैवमनुष्यगजवाजिनां १६ कुंजराश्चहताराजन्दुद्रुवुस्तेसमंततः अश्वाश्चपर्यधावंतहतारोहादि

१५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रथाहीना महाराज रथिभिर्वाजिभिस्तथा गंधर्वनगराकारा दृश्यंते स्म सहस्रशः १८ अश्वारोहा महाराज
धावमानास्ततस्ततः तत्र तत्रैव दृश्यंते निहताः पार्थसायकैः १९ तस्मिन्क्षणे पांडवस्य बाह्वोर्बलमदृश्यत
यत्सादिनो वारणांश्च रथांश्चैको जयद्युधि २० ततस्त्रैगेणा महता बलेन भरतर्षभ दृष्ट्वा परिवृतं राजन्
भीमसेनः किरीटिनं २१ हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान् जवेनाभ्यद्रवद्राजन्धनंजयर
थं प्रति २२ ततस्तत्र पांडवः सैन्यं हतभूयिष्ठमातुरं दृष्ट्वार्जुनं तदा भीमो जगाम भ्रातरं प्रति २३ हताव
शिष्टांस्तुरगानर्जुनेन महाबलान् भीमो व्यधमदक्लांतो गदापाणिर्महाहवे २४ कालरात्रिमिवात्युग्रां
नरनागाश्वभोजनां प्राकाराट्टपुरद्वारदारणीमतिदारुणां २५ ततो गदां नरनागाश्वेष्वाशु भीमो व्यवा
सृजत् सा जघान बहूनश्वानश्वारोहांश्च मारिष २६ कार्ष्णायसतनुत्राणान्नरानश्वांश्च पांडवः पोथ
यामास गदया सशब्दं ते पतन्हताः २७ दंतैर्दशंतो वसुधां शेरते तत्र जोक्षिताः भग्नमूर्धास्थिचरणाः क्रव्या
दगणभोजनाः २८ असृङ्मांसवसाभिश्च भूयसः भीमो भ्यधावत्संक्रुद्धो गदापाणिरितस्ततः २९ गदापा
णिं ततो भीमं दृष्ट्वा भारत तावकाः मेनिरे समनुप्राप्तं कालदंडोद्यतं यमं ३० समत्त इव मातंगः संक्रुद्धः
पांडुनंदनः प्रविवेश गजानीकं मकरः सागरं यथा ३१ विगाह्य च गजानीकं प्रगृह्य महतीं गदां क्षणेन
भीमः संक्रुद्धस्तन्निन्ये यमसादनं ३२ गजान्सकंकटान्मत्तान्सारोहान्सपताकिनः पततः समपश्याम स
पक्षान्पर्वतानिव ३३ हत्वा तत्तद्गजानीकं भीमसेनो महाबलः पुनः स्वरथमास्थाय पृष्ठतोर्जुनमभ्ययात् ३४

२ त्वन्निमभ्यागता गदा अस्थीन्यप्यन्नतीनस्यो कालरात्रीव दुर्दृशा ३९ सहस्राणि दशाश्वानां हत्वा पत्तींश्च २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ हतंपराह्मुखप्रायंनिरुत्साहंपरंबलं बालंवनमहाराजशरघणैःशाखवेष्टिते ३६ विलंबमानेतत्सैन्यमस
१९ गल्भमवस्थितं दृष्ट्वाप्राच्छादयद्द्रौणिरर्जुनंःआगतायनैः ३७ नराश्वरथमातंगायुधिगांडीवधन्वनाश
रव्रातैर्विश्रितारेजुःकंदवाइवकेसरैः ३८ ततःकुरूणामभवदार्तनादोमहान्नृप नराश्वनागास्तुद्दृष्टैर्वध्य
तामर्जुनेषुभिः ३९ हाहाकृतंभृशंत्रस्तंलीयमानंपरस्परं अलातचक्रवत्सैन्यंतदाभ्रमततावकं तत
स्तद्युद्धमभवत्कुरूणांसुमहद्बलैः नह्यत्रासीदनिर्भिन्नोरथःसादीहयोगजः आसीमसिवतत्सैन्यंश
रैश्छिन्नतनुच्छदं आसीत्स्वशोणितक्लिन्नंफुल्लाशोकवनंयथा ४२ तंदृष्ट्वाकुरवस्तत्रविक्रान्तंसव्यसा
चिनं निराशाःसमपद्यंतसर्वेकर्णस्यजीविते ४३ अविषह्यंतुपार्थस्यशरसंपातमाहवे मत्वान्ववर्तं
कुरवोजितागांडीवधन्वना ४४ तेहित्वासमरेकर्णंवध्यमानास्मसायकैः प्रदुद्रुवुर्दिशोभीताभुक्रु
श्चापिसूतजं ४५ अभ्यद्रवततान्पार्थःकिरन्शरशतान्बहून् हर्षयन्पांडवान्योधान्भीमसेनपुरो
गमान् ४६ पुत्रास्तुतेमहाराजजग्मुःकर्णरथंप्रति अगाधेमज्जतांतेषांद्वीपःकर्णोऽभवत्तदा ४७ कु
रवोहिमहाराजनिर्विषाःपन्नगाइव कर्णमेवोपलीयंतभयाद्गांडीवधन्वनः ४८ यथासर्वाणिभू
तानिमृत्योर्भीतानिमारिष धर्ममेवोपलीयंतेकर्मवंतिहियानिच ४९ तथाकर्णंमहेष्वासंपुत्रास्तव
नराधिप उपालीयंतसंग्रामात्पांडवस्यमहात्मनः ५० तांछोणितपरिक्लिन्नान्विषमस्थाञ्छरातुरान्मा
भैष्टेत्यब्रवीत्कर्णोह्यभितोमामितेतिच ५१ संभग्नंहिबलंदृष्ट्वाबलात्पार्थेनतावकं धनुर्विस्फारयन्कर्ण
स्तस्थौशत्रुजिघांसया ५२ तान्प्रद्रुतान्कुरून्दृष्ट्वाकर्णःशस्त्रभृतांवरः संचिंतयित्वापार्थस्यवधेदधे

मनः स्वसन् ५३ विस्फार्य सुमहच्चापं ततस्त्वाधिरथिर्नृपः पांचालान् पुनराधावत् पश्यतः सव्यसाचिनः ५४
ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः कर्णं ववर्षुर्बाणौघैर्यथा मेघा महीधरं ततः शरसहस्राणि कर्ण
मुक्तानि मारिष व्ययोजयंत पांचालान् प्राणेभ्यो भरतर्षभ ५६ ततः शब्दो महानासीत् पांचालानां महाम
ने वध्यतां सूतपुत्रेण मित्रार्थे मित्रगृद्धिना ५७ इति श्रीमहाभारते कर्णपर्वणि ४१२८ संजय उवाच त
तः कर्णः कुरुषु प्रद्रुतेषु वरूथिना श्वेतहयेन राजन् पांचालपुत्रान् व्यधमत् सूतपुत्रो महेषुभिर्वातइवा
भ्रसंघान् १ सूतं रथादंजलिकैर्निपात्य जघान चाश्वान् जनमेजयस्य शतानीकं सुतसोमं च भल्लैरवा
किरद्धनुषी चाप्यछिनत्तत् २ धृष्टद्युम्नं निर्बिभेदाथ षड्भिर्जघानाश्वान् दक्षिणं तस्य संख्ये हत्वा चाश्वान् सा
त्यकेः सूतपुत्रः कैकेयपुत्रं न्यवधीद्विशोकं ३ तमभ्यधावन्निहते कुमारे केकेयसेनापतिरुग्रकर्मा श
रैर्विधुन्वन् भृशमुग्रवेगैः कर्णात्मजं चाप्यहनत् सुसेनं ४ तस्यार्धचंद्रैस्त्रिभिरुच्चकर्त प्रहस्य बाहू च
शिरश्च कर्णः स स्यन्दनाद्गामगमद्गतासुः परश्वधैः शाल इवावरुग्णः ५ हताश्वमंजोगतिभिः प्र
सेनः शिनिप्रवीरं निशितैः पृषत्कैः प्रछाद्य नृत्यन्निव कर्णपुत्रः शैनेय बाणाभिहतः पपात ६
पुत्रे हते क्रोधपरीतचेताः कर्णः शिनीनामृषभं जिघांसुः हतोसि शैनेय इति ब्रुवन् व्यवासृजद्बा
णममित्रसाहं ७ तमस्य चिछेद शरेण शिखंडी त्रिभिस्त्रिभिश्च प्रततोद कर्णं शिखंडिनः कार्मुकं च
ध्वजं च छित्वा शराभ्यां न्यपतत्सुजातः ८ शिखंडिनं षड्भिरविध्यदुग्रो धार्ष्टद्युम्नेः स शिरश्चोच्चक
र्त तथाभिनत्सुतसोमं शरेण संशितेनाधिरथिर्महात्मा ९ अथाक्रंदे तुमुले वर्तमाने धार्ष्टद्युम्ने ति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टि॰ हतेनत्र कृत्स्नः प्रपांचाल्यं क्रियतेयाहि पार्थ कर्णं जहीत्यब्रवीद्राजसिंह ९ ततः प्रहस्याशु नरप्रवीरो रथं
१६१ रथेनाधिरथेर्जगाम भयेतेषां त्राणमिछन्महाबाहुरभ्याहतानां रथयूथपेन १० विस्फार्य गांडीवमथो
ग्रघोषं ज्यया समाहत्य तलेभृशंच बाणांधकारं सहसैव कृत्वा जघान नागाश्वरथध्वजांश्च ११ प्रति
श्रुतः प्राचरन्नंतरिते गुहा गिरीणामथ तन्नवयांसि यन्मंडलं ज्येन विजृंभमाणो रौद्रो मुहूर्तं भ्यपतत्कि
रीटी १२ तं भीमसेनोनुययौ रथेन पृष्ठे रक्षन्पांडवमेकवीरः तौ राजपुत्रौ त्वरितौ रथाभ्यां कर्णाय याता
वरिभिर्विषक्तौ १३ तत्रांतरे सुमहान्सूतपुत्रश्चक्रे युद्धं सोमकान्संप्रमृद्गन् रथाश्वमातंगगणान्जघा
नप्रच्छादयामास शरैर्दिशश्च १४ तमुत्तमौजा जनमेजयश्च क्रुद्धो युधामन्युशिखंडिनौ च कर्णं विभे
दुः सहिताः पृषत्कैः संमर्दमानाः सहपार्षतेन १५ ते पंच पंचालरथप्रवीरा वैकर्तनं कर्णमभिद्रवंतः
तस्माद्रथाच्च्यावयितुं नशेकुर्धैर्यात्कृतात्मानमिवेंद्रियार्थाः १६ तेषां धनूंषि ध्वजवाजिसूतांस्तूणं
पताकाश्च निकृत्य बाणैः तान्पंचभिस्त्वभ्यहनत्पृषत्कैः कर्णस्ततः सिंह इवोन्ननाद १७ तस्यास्यत
स्तानभिनिघ्नतश्च ज्याबाणहस्तस्य धनुः स्वनेन साद्रिद्रुमा स्यात्पृथिवी विशीर्णेत्यमन्यत जन
नतावसीदत् १८ सशक्रचापप्रतिमेन धन्वना भृशायतेनाधिरथिः शरान्सृजन् बभौ रणे दीप्तमरी
चिमंडलो यथांशुमाली परिवेषवांस्तथा १९ शिखंडिनं द्वादशभिः पराभिनच्छितैः शरैः षड्भिरथोत्त
मौजसं त्रिभिर्युधामन्युमविध्यदाशुगैस्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ २० पराजिताः पंच महार १६१
थास्तु तेमहाहवे सूतसुतेन मारिष निरुद्यमास्तस्थुरमित्रनंदना यथेंद्रियार्थात्मवता पराजिताः २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

निमग्नं तत्स्तानथ कर्णसागरे विपन्ननावो वणिजो यथार्णवे २१ द्विपैरनेकैर्भिरिवार्णवाद्रथैः सुकल्पितैः
र्हृपरिक्षिप्ताः समान्तलान् २२ ततः शिनीनामृषभः शितैः शरैर्निकृत्य कर्णप्रहितानिषून्बहून् विदा
र्य कर्णं निशितैरपस्यैः स्तवात्मजं ज्येष्ठमविध्यद्दृष्टिभिः २३ कृपोथ भोजश्च तवात्मजस्तथा स्वयं च
कर्णं निशितैरताडयत् स तैश्चतुर्भिर्युयुधे यदूत्तमो दिगीश्वरैर्दैत्यपतिर्यथा तथा २४ समानतेनेष्व
सनेन कूजता भृशायतेनामितबाणवर्षिणा बभूव दुर्द्धर्षतरः स सात्यकिः शरन्नभोमध्यगतो यथा
रविः २५ पुनः समास्थाय रथान्सुदंशिताः शिनिप्रवीरं जगृहुः परंतपाः समेत्य पाञ्चालमहारथा रणे
मरुद्गणाः शक्रमिवारिनिग्रहे २६ ततोभवद्युद्धमतीवदारुणं तवाहितानां तव सैनिकैः सह रथा
सुमानेना विनाशनेन तथा यथा सुराणाममसुरैः पुराभवत् २७ रथद्विपा वाजिपदातयस्तथा भवन्ति ना
नाविधशस्त्रवेष्टिताः परस्परेणाभिहताश्च सञ्चलुर्विनेदुरार्ता व्यसवो व्यपेतस्तथा २८ तथागते भी
ममभीस्तवात्मजः समाससादावरजः किरञ्छरैः तमभ्यधावत्त्वरितो वृकोदरो महारुरुं सिंह इवाभि
पेदिवान् २९ ततस्तयोर्युद्धमतीवदारुणं प्रदीव्यतोः प्राणदुरोदरे ह्ययोः परस्परेणाभिनिविष्टरोषयो
रुदग्रयोः शम्बरशक्रयोर्यथा ३० शरैः शरीरान्तिककरैः सुतेजनैर्निजघ्नतुस्ताविततरेतरं भृशं सकृत्सुभि
न्नाविव वासितान्तरे महागजौ मन्मथसक्तचेतसौ ३१ तवात्मजस्याथ वृकोदरः स्वरान्धनुः क्षुराभ्यां
ध्वजमेव चाच्छिनत् ललाटमप्यस्य बिभेद पत्रिणा शिरश्च कायात्प्रजहार सारथेः ३२ स राजपुत्रो
न्यद्वाप्य कार्मुकं वृकोदरं द्वादशभिः पराभिनत् स्वयं नियच्छंस्तुरगानजिह्मगैः शरैश्च भीमं पुन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. १८२

यथावीरुषत् ११ ततः शरंसूर्यमरीचिसप्रभंसुवर्णवज्रोत्तमरत्नभूषितं महेंद्रवज्राशनिपातदुःसहं
मुमोचभीमांगविदारणंतदा १४ सतेननिर्विद्धतनुर्वृकोदरोनिपातितःस्यंदनधुर्यतावत् प्रसा
र्यबाहुस्थवरायमाश्रितः पुनःससंज्ञामुपलभ्यचानदत् १५ इतिश्रीकर्णपर्वणि संजयउवाच त
थाकृतोदुष्करंराजपुत्रोदुःशासनस्तुमुलेयुध्यमानः विच्छेदभीमस्यधनुःक्षुरेणषड्भिःशरैःसारथिम
प्यविध्यत् १ सतत्कृत्वाराजपुत्रस्तरस्वीविव्याधभीमंनवभिःपृषत्कैः ततोभिनद्दृढभिःक्षिप्रमेव
वरेषुभिर्भीमसेनंमहात्मा २ ततःक्रुद्धोभीमसेनस्तरस्वीशक्तिंचोग्रांप्राहिणोत्तेसुताय तामापतं
तींसहसातिघोरांदृष्ट्वासुतस्तेज्वलितामिवोल्कां ३ आकर्णपूर्णैर्विशिखैर्महात्माचिच्छेदपुत्रोद
शभिःपृषत्कैः दृष्ट्वातुतत्कर्मकृतंसुदुष्करंप्रपूजयन्सर्वयोधाःप्रहृष्टाः ४ अथाशुभीमंचश
रेणभूयोगाढंसविव्याधसुतस्त्वदीयः चुक्रोधभीमःपुनराशुतस्मैभृशंप्रजज्वालरुषाभिवीक्ष्य ५
विद्धोस्मिवीराशुभृशंत्वयाद्यसहस्वभूयोपिगदाप्रहारं उक्त्वैवमुच्चैःकुपितोथभीमोजग्राहतांभीम
गदांवधाय ६ उवाचचाद्याहमहंदुरात्मन्पास्यामितेशोणितमाजिमध्ये अथैवमुक्तस्तनयस्त
तोग्रांशक्तिंवेगात्प्राहिणोन्मृत्युरूपां ७ आविध्यभीमोपिगदांसुघोरांविचिक्षेपरोषपरीतमूर्तिः
सातस्यशक्तिंसहसाविरुज्यपुत्रंतवाजौताडयामासमूर्ध्नि ८ सविह्वलस्त्वागमुवप्रभिन्नोगदामसे
तमुलेप्राहिणोद्दु तयाहरद्दृष्ट्वाथत्वत्तनाणि दुःशासनंभीमसेनःप्रसह्य ९ तयाहतःपतितोवेप
मानोदुःशासनोगदयावेगवत्या हयाःससूतानिहतानरेंद्रचूर्णीकृतश्चास्यरथःपतंत्या १० विध्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्तवर्माभरणांवरस्रक्विचेष्टमानोभृशवेदनार्तः दुःशासनेपांडवाःश्रेष्ठाःसर्वेहृष्टाःपांचालाःसिंहना
दानमुंचन् ११ तंपातयित्वाचवृकोदरोथजगर्ज्जहर्षेणविनादयन्दिशः नादेनतेनाखिलपार्श्ववर्त्ति।
नोमूर्छाकुलाःपातिताश्चाजमीढ १२ भीमोपिवेगादवतीर्ययानाद्दुःशासनंवेगवानभ्यधावत् ततः
स्मृत्वाभीमसेनस्तरस्वीसापत्नकंयत्प्रयुक्तंसुतैस्ते १३ तस्मिन्सुघोरेतुमुलेवर्त्तमानेप्रधानभूमिष्ठ
तैःसमंतात् दुःशासनंतत्रसमीक्ष्यराजन्भीमोमहाबाहुरचिंत्यकर्मा १४ स्मृत्वाचकेशग्रहणंचदे
व्यावस्त्रापहारंचरजस्वलायाः अनागसोभर्तृपराङ्मुखायादुःखानिदत्तान्यपिविप्रचिंत्य १५ जज्वाल
क्रोधामर्षेणभीमआज्यप्रसिक्तोहियथाहुताशः तत्राहकर्णंचसुयोधनंचकृपंद्रौणिंकृतवर्माणमेव
१६ निहन्मिदुःशासनमद्यपापंसंरक्षतामद्यसमस्तयोधाः इत्येवमुक्त्वासहसाभ्यधावत् निहन्तुकामोति
बलस्तरस्वी १७ तथातुविक्रम्यरणेवृकोदरोमहागजंकेसरिणोयथैव निगृह्यदुःशासनमेकवीरःसुयो
धनस्याधिरथेःसमक्षं १८ रथादवप्लुत्यगतःसभूमौयत्नेनतस्मिन्प्रणिधायचक्षुः असिंसमुद्यम्यशितं
सुधारंकंठेसमाक्रम्यचवेपमानं १९ उत्कृत्यवक्षःपतितस्यभूमावथापिबच्छोणितमस्यकोष्णं आस्वाद्यचा
स्वाद्यचवीक्षमाणःक्रुद्धोहिचैवंनिजगादवाक्यं २० स्तन्यस्यमातुर्मधुसर्पिषोवामाध्वीकपानस्यचसत्कृ
तस्य दिव्यस्यवातोयरसस्यपानात्पयोदधिभ्यांमथिताच्चमुख्यात् २१ अन्यानिपानानिचयानिलोकेसुधा
मृतस्वादुरसानितेभ्यः सर्वेभ्यएवाभ्यधिकोरसोयंममाद्यचास्याहितलोहितस्य २२ अथाहभीमःपुनरु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ प्रकर्म्य दुःशासनं क्रोधपरीतचेताः गतासुमालोक्य विहस्य सुस्वरं किं वा कुर्यामस्तु नाद्य स्थितोसि १९ एवं
१८३ ब्रुवाणं पुनराद्रवंतमास्राद्यमाने नमति प्रहृष्टे ये भीमसेनं ददृशुस्तदानीं भयेन तेपि व्यथिता निपेतुः २०
ये चापि नासन् व्यथिता मनुष्यास्तेषां करेभ्यः पतितं हि शस्त्रं भयाच्च संचुक्रुशुरस्वरैस्ते निमीलिताक्षा द
दृशुः समंततः २१ तेन च भीमं ददृशुः समंताद्दुःशासनं तद्रुधिरं पिबंतं सर्वे पलायंत भयाभिपन्ना न
वै मनुष्योयमिति ब्रुवाणाः २२ तस्मिन् कृते भीमसेनेन रूपे दृष्ट्वा जनाः शोणितं पीयमानं संप्राद्रवंश्चि
त्रसेनेन सार्द्धं भीमं रक्षो भाषमाणा भयार्त्ताः २३ युधामन्युः प्रद्रुतं चित्रसेनं सहानीकस्त्वभ्ययाद्राज
पुत्रः विव्याध चैनं निशितैः पृषत्कैर्व्यपेतभीः सप्तभिराशु मङ्क्ते २४ संक्रांतभोगा इव लेलिहानो महो
रगः क्रोधविषं सिसृक्षुः निवृत्य पांचालजमभ्यविध्यत् त्रिभिः शरैः सारथिमस्य षड्भिः २५ ततः सुपुंखे
न सुपर्वचित्तेन सुसंशिताग्रेण शरेण शूरः आकर्णमुक्तेन समाहितेन युधामन्युस्तस्य शिरो जहार
२६ तस्मिन् हते भ्रातरि चित्रसेने क्रुद्धः कर्णः पौरुषं दर्शयानः व्यद्रावयत् पांडवानामनीकं प्रत्युद्याते
नकुलेनामितौजाः २७ भीमोपि हत्वा तत्रैव दुःशासनममर्षणं पूरयित्वांजलिं भूयो रुधिरस्योग्रनि
स्वनः २८ शृण्वतां लोकवीराणामिदं वचनमब्रवीत् एष ते रुधिरं कंठात् पिबामि पुरुषाधम ब्रूही
दानीं तु संहृष्टः पुनर्गौरिति गौरिति येऽस्मान् पुरा नृत्यंति पुनर्गौरिति गौरिति तान्वयं प्रतिनृत्यामः पु
नर्गौरिति गौरिति प्रमाणकोट्यां शयनं कालकूटस्य भोजनं २९ दंशनं चाहिभिः कृष्णैर्दाहं च जतुवेश्मनि १८३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्यूतेन राज्यहरणमरण्ये वसतिश्च या १९ द्रौपद्याः केशपक्षस्य ग्रहणं च सुदारुणं इष्वस्त्राणि च संग्रामेष्व
सुखानि च वेश्मनि २० विराटभवने यञ्च क्लेशोस्माकं पृथग्विधः शकुनेर्धार्तराष्ट्रस्य राधेयस्य च मंत्रि
ते २१ अनुभूतानि दुःखानि तेषां हेतुस्त्वमेव हि दुःखान्येतानि जानीमो न सुखानि कदाचन २२ धृतरा
ष्ट्रस्य दौरात्म्यात्सपुत्रस्य सदा वयं इत्युक्त्वा वचनं राजन् जयं प्राप्य वृकोदरः २३ पुनराह महाराज स्मयंस्तौ के
शवार्जुनौ असृग्दिग्धो विस्रवल्लोहितास्यः क्रुद्धोत्यर्थं भीमसेनस्तरस्वी दुःशासने यद्रणे संश्रुतं मे तद्वै
सत्यं कृतमद्येह वीरो २४ अत्रैव दास्याम्यपरं द्वितीयं दुर्योधनं यज्ञपशुं विशस्य शिरो मृदित्वा च पदा दु
रात्मनः शांतिं लप्स्ये कौरवाणां समक्षं २५ एतावदुक्त्वा वचनं प्रहृष्टो ननाद चोच्चै रुधिरार्द्रगात्रः ननर्त
चैवातिबलो महात्मा वृत्रं निहत्येव सहस्रनेत्रः २६ इति श्रीमहाभारते कर्णपर्वणि दुःशासनवधः सं
जय उवाच दुःशासने तु निहते तव पुत्रा महारथाः महाक्रोधविषा वीराः समरेष्वपलायिनः १ दश
राजन्महावीर्या भीमं प्राच्छादयञ्छरैः कवची निषंगी पाशी दंडधारो धनुर्ग्रहः २ अलोलुपः सहः षं
डो वातवेगसुवर्चसौ एते समेत्य सहिता भ्रातृव्यसनकर्षिताः ३ भीमसेनं महाबाहुं मार्गणैः समवा
रयन् स वार्यमाणो विशिखैः समन्तात्तैर्महारथैः ४ भीमः क्रोधाग्निरक्ताक्षः क्रुद्धः काल इवाबभौ ता
न्भल्लैर्महावेगैर्दशभिर्दश भारत तान् ५ रुक्मांगदान् रुक्मपुंखैः पार्थो निन्ये यमक्षयं हतेषु तेषु वी
रेषु प्रदुद्राव बलं तव ६ पश्यतः सूतपुत्रस्य पांडवस्य भयार्दितं ततः कर्णो महाराज प्रविवेश मह
द्भय ७ दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव तस्य त्वाकारभावज्ञः शल्यः समितिशोभनः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१६४

उवाचवचनंकर्णंशल्यःकालमरिंदमं मावधींकुरुराधेयनैवंत्वमुपपद्यते ९ एतेऽद्यवेतिराजानोभीमसे
नभयार्दिताः दुर्योधनश्चसंमूढोभ्रातृव्यसनकर्षितः १० दुःशासनस्यरुधिरेपीयमानेमहात्मना व्या
पन्नचेतसश्चैवशोकोपहतचेतसं ११ दुर्योधनमुपासंतेपरिवार्यसमंततः कृपप्रभृतयश्चैतेहतशेषाः
सहोदराः १२ पांडवाल्लब्धलक्षास्तुधनंजयपुरोगमाः त्वामेवाभिमुखाःशूरायुद्धायसमुपस्थिताः १३
सत्वंपुरुषशार्दूलपौरुषेणसमास्थितः क्षत्रधर्मंपुरस्कृत्यप्रत्युद्याहिधनंजयं १४ भारोहिधार्तराष्ट्रे
णत्वयिसर्वःसमाहितः तमुद्वहमहाबाहोयथाशक्तियथाबलं १५ जयेस्याद्विपुलाकीर्तिर्ध्रुवः
स्वर्गःपराजये वृषसेनश्चराधेयसंक्रुद्धस्तनयस्तव त्वयिमोहंसमापन्नेपांडवानभिधावति एत
च्छ्रुत्वातुवचनंशल्यस्यामिततेजसः १७ हृदिचावश्यकंभावंचक्रेयुद्धायसुस्थिरं ततःक्रुद्धोवृषसेनो
ऽभ्यधावदवस्थितंस्वमृत्वेपांडवंतं १८ वृकोदरंकालमिवात्तदंडंगदाहस्तंयोधयंतंत्वदीयान् तमभ्य
धावन्नकुलःप्रवीरोरोषादमित्रंप्रतुदन्पृषत्कैः १९ कर्णस्यपुत्रंसमरेप्रहृष्टंपुराजिघांसुर्मघवेवजंभं
ततोध्वजंस्फाटिकचित्रकंबुकंचिच्छेदवीरोनकुलःक्षुरेण २० कर्णात्मजस्येष्वसनंचचित्रंभल्लेनजांबू
नदचित्रनद्धं अथान्यदादायधनुःसुशीघ्रंकर्णात्मजःपांडवमभ्यविध्यत् २१ दिव्यैर्महास्त्रैर्नकुलंकृता
स्त्रोदुःशासनस्यापचितिंप्रियासुः ततःक्रुद्धोनकुलस्तंमहात्माशरैर्महोल्काप्रतिमैरविध्यत् २२ दिव्यैरस्त्रै
रभ्यवर्षच्चसोपिकर्णस्यपुत्रोनकुलंकृतास्त्रः शराभिघातात्सरुषाचराजन् स्वयाचभासास्त्रसमीरणाच्च २३ १६४
जज्वालकर्णस्यसुतोतिमात्रमिद्धोयथाज्याहुतिभिर्हुताशः कर्णस्यपुत्रोनकुलस्यराजन्सर्वानश्वानक्षिणोदुत्तमा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेऽसिना विप्रशस्ताः संतो गां रणभूमिं प्रापतन्निति संबंधः =

सैः २४ वनायुजान्वै नकुलस्य शुभ्रानुदग्रगान्हेमजालावनद्धान् ततोहताश्वादवरुह्ययानादादायचर्मामि
लरुक्मचंद्रं २५ आकाशसंकाशमसिंप्रगृह्यदोधूयमानःखगवच्चचार ततोंतरिक्षेचरथाश्वनागांश्चिच्छेद
तूर्णंनकुलश्चित्रयोधी २६ तेप्रापतन्नसिनागांविशस्तायथाश्वमेधेपशवःशमित्रा द्विसाहस्राःपातिता
युद्धशौंडानानादेश्याःसुभृताःसत्यसंधाः २७ एकेनसंख्येनकुलेनकृत्ताजयेप्सुनानुत्तमचंदनांगाःतमा
पतंतंनकुलंसोभिपत्यसमंततःसायकैःप्रत्यविध्यत् २८ सतुद्यमानोनकुलःपृषत्कैर्विव्याधवीरंसतु
कोपविद्धःमहाभयेरक्ष्यमाणोमहात्माभ्रात्राभीमेनाकरोत्तत्रभीमं तंकर्णपुत्रोव्यधमंतमेकंनराश्वमा
तंगरथाननेकान् २९ क्रीडंतमष्टादशभिःपृषत्कैर्विव्याधवीरंनकुलंसरोषः सतेनविद्धोतिभृशंतर
स्वीमहाहवेवृषसेनेनराजन् ३० क्रुद्धोन्वधावत्समरेजिघांसुःकर्णात्मजंपांडुसुतोनरवीरः वितत्यप
क्षौसहसापतंतंश्येनंयथैवामिषलुब्धमाजौ ३१ अवाकिरद्वृषसेनस्ततस्तंशितैःशरैर्नकुलमुदारवी
र्यं सतान्मोघांस्तस्यकुर्वंश्शरौघान्चचारमार्गान्नकुलश्चित्ररूपान् ३२ अथास्यतूर्णंचरतोनरेंद्रखड्गे
नचित्रंनकुलस्यतस्य महेषुभिर्व्यधमत्कर्णपुत्रोमहाहवेचर्मसहस्रतारं ३३ तंचायसंनिशितंतीक्ष्ण
धारंविकोशमुग्रंगुरुभारसाहं द्विषच्छरीरांतकरंसुघोरमाधुन्वतःसर्पमिवोग्ररूपं ३४ क्षिप्रंशरैःष
ड्भिरमित्रसाहश्चकर्तखड्गंनिशितैःसुवेगैः पुनश्चपीतैर्निशितैःपृषत्कैःस्तनांतरेगाढमथाभ्यविध्यत् ३५ कृ
त्वातुतद्दुष्करमार्यजुष्टमन्यैर्नरैःकर्मरणेमहात्मा ययौरथंभीमसेनस्यराजन्शराभितप्तोनकुलस्त्वरावान्
सभीमसेनस्यरथंहताश्वोमाद्रीसुतःकर्णिशराभितप्तः आपुप्लुवेसिंहइवाचलाग्रंसंप्रेक्षमाणस्यधनंजयस्य ३६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१६५

ततःक्रुद्धोवृषसेनोमहात्माववर्षतंविशिखजालेनवीरः महारथावेकरथेसमेतौशरैःप्रभिंदन्निवपांडवेयो १६
तस्मिन्रथेनिहतेपांडवस्यतिष्ठंचरथेऽंविशिखैर्विक्षते अन्येचसंहत्यकुरुप्रवीरास्ततोनिशुंभैरववर्षेदृपे
ण १८ तौपांडवेयोपरितःसमंतात्संहूयमानाविवहव्यवाहौ १९ भीमार्जुनौवृषसेनायकृद्धौववर्षतःश
रवर्षमुग्रं अथाब्रवीन्मारुतिःफाल्गुनंचपश्यस्वेतेनकुलंपीड्यमाने २१ अयंचनोबाधतेकर्णपुत्रस्त
स्माद्भवान्प्रत्युपयातुकर्णिं सतन्निशम्यैववचःकिरीटीरथंसमासाद्यवृकोदरस्य ४० अथाब्रवीन्नकु
लोवीक्ष्यवीरमुपागतंशातयशीघ्रमेनं इत्येवमुक्तःसहसाकिरीटीभ्रात्रासमक्षेननकुलेनसंख्ये ४१
कपिध्वजंकेशवसंगृहीतंप्रैषीदुदग्रोवृषसेनस्यवाहान् इतिश्रीमहाभारतेकर्णपर्वणिवृषसेनयुद्धे
नकुलःपराजयः संजयउवाच नकुलमथविदित्वाछिन्नवाणासनासिंविरथमरिशरार्तंकर्णपु
त्रास्त्रभग्नं पवनधुतपताकाह्रादिनोवल्गिताश्वावरपुरुषनियुक्तास्तेरथैःशीघ्रमीयुः १ द्रुपदसुतव
रिष्ठाःपंचशैनेयषष्ठाःद्रुपददुहितृपुत्राःपंचचामित्रसाहाः द्विरदरथनराश्वान्सूदयंतस्त्वदीयान्
भुजगपतिनिकाशैर्मार्गणैरात्तशस्त्राः २ अथतवरथमुख्यास्तान्प्रतीयुस्त्वरंतः कृपहृदिकसुतौच
द्रौणिर्दुर्योधनौच ३ शकुनिसुतवृकौचक्राथदेवावृधौचद्विरदजलदघोषैःस्यंदनैःकार्मुकैश्च तव
नरवरयोधावीरास्तेदशैकेचवीरान्वरशरवराग्र्यैस्ताडयंतोभ्यरुंधन् नवजलदसवर्णैर्हस्तिभिस्तानुदीयु
र्गिरिशिखरनिकाशैर्भीमवेगैःकुलिंदाः ४ सुकल्पिताहैमवतामदोत्कटारणाभिकामैःकृतिभिःसमास्थिताः ५
सुवर्णजालैर्वितताबभुर्गजास्तथायथावैजलदाःसविद्युतः कुलिंदपुत्रोदशभिर्महायसैःकृपंससूताश्वमपीड

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यद्भुतं ६ ततः शरहतस्तस्य सायकैर्हतः सहैव नागेन पपात भूतले कुलिंदपुत्रावरजस्ततोमरैर्दिवाकरांशुप्र
तिमैरयस्मयैः ७ रथंचविव्याधननादनर्दंस्ततोस्यगांधारपतिः शिरोहरत् ततः कुलिंदेषु हतेषु तेष्वथ
प्रहृष्टरूपास्तव ते महारथाः ८ भृशं प्रदध्मुर्लवणांबुसंभवान्परांश्चबाणासनपाणयोभ्ययुः अथाभवद्यु
द्धमतीवदारुणं पुनः कुरूणां सहपांडुसृंजयैः ९ शरासिशक्त्यृष्टिगदापरश्वधैर्नराश्वनागासुहरं भृशाकु
लं रथाश्वमातंगपदातिभिस्ततः परस्परं विप्रहताः पतन्तितौ १० यथा सविद्युत्स्तनिता बलाहकाः स
माहता दिग्भ्य इवोग्रमारुतैः ततः शतानीकमतान्महागजांस्तथा रथान्पत्तिगणांश्चतान्बहून् ११
जघान भोजस्य हयानथापतन्विशस्त्राः कृतवर्मणः शरैः अथापरे द्रौणिहता महाद्विपास्त्रयः
स सर्वायुधयोधकेतनाः १२ निपेतुरुर्व्यां व्यसवो निपातितास्तथा यथा वज्रहता महाचलाः १३ कुलिं
दराजावरजादनंतरः स्तनांतरे पत्रिवरैरताडयत् तवात्मजं तस्य तवात्मजः शरैः शितैः शरीरं व्यहन
द्विपं च तं १४ स नागराजः सह राजसूनुना पपात रक्तं बहु सर्वतः स्रवन् महेंद्रवज्रप्रहतोंबुदागमे यथा
जलं गैरिकपर्वतस्तथा १५ कुलिंदपुत्रप्रहितोपरो द्विपः क्रथं ससूताश्वरथं व्यपोथयत् ततोपतत्का
थशराभिघातितः प्राकेश्वरो वज्रहतो यथा गिरिः १६ रथी द्विपस्थेन हतोपतत्क्षुरैः क्राथाधिपः पर्वतजे
न दुर्जयः सवाजिसूतेष्वसनध्वजस्तथा यथा महावातहतो महाद्रुमः १७ वृको द्विपस्थं गिरिराजवासि
नं भृशं शरैर्द्वादशभिः पराभिनत् ततो वृकं साश्वरथं महाद्विपो द्रुतं चतुर्भिश्चरणैर्व्यपोथयत् १८ स ना
गराजः सनियंतृकोपतत्प्रभाहतो बभ्रुसुतेषुभिर्भृशं स चापि देवावृधसूनुरर्दितः पपात नुन्नः सहदेव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ दी॰
१९९

सुतेन ॥ १९ ॥ विषाणगात्रावरयोधपातिना गजेन हंतुं शकुनिं कुलिंदजः जगाम वेगेन भृशार्दयंश्च तं ततोस्य
गांधारपतिः शिरोहरत् ॥ २० ॥ ततः कुलिंदेषु हतेषु तेषु प्रहृष्टरूपास्तव ते महारथाः भृशं प्रदध्मुर्लवणांबु
संभवान् परांश्च बाणासनपाणयोभ्ययुः ॥ २१ ॥ अथाभवद्युद्धमतीव दारुणं पुनः कुरूणां सह पांडुसृंजयैः
शरासिशक्त्यृष्टिगदापरश्वधैः रथाश्वनागासुहरं भृशाकुलं ॥ २२ ॥ रथाश्वमातंगपदातयस्ततः परस्परं
विप्रहताः पतन् क्षितौ यथा सविद्युत्स्तनिता बलाहकाः समाहृता दिग्भ्य इवोग्रमारुतैः ॥ २३ ॥ ततः श
तानीकहता महागजाः हया रथाः पत्तिगणाश्च तावकाः सुपर्णवातप्रहता यथा नगास्तथा गता गां वि
वशा विचूर्णिताः ॥ २४ ॥ ततोभ्यविध्यद्बहुभिः शितैः शरैः कुलिंदपुत्रो नकुलात्मजं स्मयन् ततोस्य काया
द्विचकर्त नाकुलिः शिरः क्षुरेणांबुजसन्निभाननं ॥ २५ ॥ ततः शतानीकमविध्यदाशु स त्रिभिः शरैः कर्ण
सुतोर्जुनं त्रिभिः [illegible] त्रिभिश्च भीमं नकुलं च सप्तभिर्जनार्दनं द्वादशभिश्च साय
कैः ॥ २६ ॥ तदस्य कर्मातिमनुष्यकर्मणः समीक्ष्य हृष्टाः कुरवोभ्यपूजयन् पराक्रमज्ञास्तु धनंजयस्य
ये कृतो यमप्राविति ते तु मेनिरे ॥ २७ ॥ ततः किरीटी परवीरघाती हताश्वमालोक्य नरप्रवीरः माद्रीसुतं
नकुलं लोकमध्ये समीक्ष्य कृष्णं भृशविक्षतं च ॥ २८ ॥ समभ्यधावद्वृषसेनमाहवे स सूतजस्य प्रमुखे स्थि
तस्तदा तमापतंतं नरवीरमुग्रं महाहवे बाणसहस्रधारिणं ॥ २८ ॥ अभ्यापतत्कर्णसुतो महारथं यथा महें
द्रं नमुचिः पुरा तथा ततोद्भुतेनैकशरेण पार्थं सितेन विध्वा युधि कर्णपुत्रः ॥ २९ ॥ ननाद नादं सुमहात्म भा १९९
वो विध्वेव शक्रं नमुचिः सुवीरः पुनः स पार्थं वृषसेन उग्रैर्बाणैरविध्यद्भुजमूलमध्ये ॥ ३० ॥ तथैव कृष्णं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नवभिः समार्दयत्तूनमथ पार्थं दशभिर्जघान रुषं पार्थाद्वृषसेनप्रयुक्तैः क्षिप्रं हतः श्वेतहयः शरौघैः ११ संरंभमी
षत्तु मितो वधाय कर्णात्मजस्याथ मनः प्रदध्ये ततः किरीटी रणमूर्ध्नि कोपात् कृत्वा त्रिशाखां भ्रुकुटीं लला
टे १२ मुमोच तूर्णं विशिखान्महात्मा वधे ततः कर्णसुतस्य संख्ये आरक्तनेत्रोन्तकयाच्च हृत्वा उवाच कर्णं
प्रशान्तुत्सयतदा १३ दुर्योधनं द्रोणिमुखांश्च सर्वान् हं रणे वृषसेनं तमुग्रं संपश्यतः कर्ण तवाद्य संख्ये
नयामि लोकं निशितैः पृषत्कैः १४ घ्नन्तं च तावद्धि जनाः वदंति सर्वैर्भवद्भिर्मम सत्रुर्हतोसौ एकोरथोम
हि हीनसत्वरसी अहं हनिष्ये भवतां समक्षं १५ संरक्षतां रथमस्थाः सुतोयमहं हनिष्ये वृषसेनमुग्रं प
श्चाद्धनिष्ये त्वामपि संभ्रमं त्वमहं हनिष्यर्जुन आजिमध्ये १६ त्वमद्य मूलं कलहस्य संख्ये दुर्योधनाया
श्रयजातदर्पः त्वामद्य हंतास्मि रणे प्रसह्य अस्मै वहंता युधि भीमसेनः १७ दुर्योधनस्याधमपुरुषस्य
मानयादेषमहाननयोभूत् सएवमुक्त्वा विनिमृज्य चापं लक्ष्यं हि कृत्वा वृषसेनमाजौ १८ ससर्ज बाणा
न्विशिखान्महात्मा वधाय राजन् कर्णसुतस्य संख्ये विव्याध चैनं दशभिः पृषत्कैः मर्मस्वशंकं प्रहसन् कि
रीटी १९ चिच्छेद चास्येष्वसनं भुजौ च तथैव तीक्ष्णैश्चतुर्भिर्निशितैः शिरश्च स पार्थबाणाभिहतः पपात रथाद्वि
बाहुर्विशिरा धरायां २० सुपुष्पितो वृक्षवरोतिकायो वातेरितः शाल इवाद्रिशृंगात् संप्रेक्ष्य बाणाभि
हतं पतंतं रथात्सुतं सूतजः क्षिप्रकारी रथं रथेनाशु जगाम रोषात् किरीटिनः पुत्रवधाभितप्तः २१ ततः
समक्षं स्वसुतं विलोक्य कर्णो हतं श्वेतहयेन संख्ये संरंभमागम्य परं महात्मा कृष्णार्जुनौ सहसैवाभ्यधाव
त् २२ इति श्रीमहाभारते कर्णपर्वणि वृषसेनवधः संजय उवाच तमापतंतमभिप्रेक्ष्य वेलोद्धूतमिवार्णवं ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ ही
१८०

गर्जंतं तु महाकायं दुर्निवारं सुरैरपि १ अर्जुनेनैवमाहदाशार्हः प्रहसन्पुरुषर्षभः अयं स रथयूथपानां तिष्ठेत्ताक्ष्यः शल्यमा
रथिः २ येनैतेसहयोद्धव्यं स्थिरो भव धनंजय पश्यचैनं समायुक्तं रथं कर्णस्य पांडव ३ श्वेतवाजिसमायुक्तं युक्तंरा
धाम्युतेतु च नानापताककलिलं किंकिणीजालमालिनं ४ उह्यमानमिवाकाशे विमानं पांडुरैर्हयैः ध्वजंच
पस्यकर्णस्य नागकक्ष्यं महात्मनः ५ आखंडलधनुःप्रख्यमुल्लिखंतमिवांबरं पश्यकर्णं समायांतं धार्तराष्ट्र
प्रियैषिणा ६ प्रस्थातविमुंचेत धारासारमिवांबुदं एष मद्रेश्वरो राजा रथाग्रे पर्यवस्थितः ७ नियच्छति
हयानस्यायतस्यामितौजसः शृणु दुंदुभिनिर्घोषं शंखशब्दं च दारुणं ८ सिंहनादांश्च विविधान् शृणु
पांडव सर्वतः अंतर्धाय महाशब्दान् कर्णेनामिततेजसा ९ दोधूयमानस्य भृशं धनुषः शृणु निस्वनं
तेदीर्यंति सर्वगणाः पांचालानां महारथाः १० दृष्ट्वा केसरिणं क्रुद्धं मृगा इव महावने सर्वयत्नेन कौंतेय
दंतमर्हसि सततं ११ नहि कर्णं शरानन्यः सोऽन्यस्त्वत्तो हंते नरः सदेवासुरगंधर्वांस्त्रीँल्लोकान्सचराचरान् ॥
त्वंहि जेतुं रणे शक्तस्त्वयैव विदितं मम भीममुग्रं महात्मानं त्र्यंबकं शर्वं कपर्दिनं १२ न शक्रोद्भुमीशानं।
किंपुनर्योधितुं प्रभो त्वया साक्षान्महादेवः सर्वभूतशिवः शिवः १३ युद्धेनाराधितः स्थाणुर्देवाश्च वरदा।
स्तव तस्य पार्थ प्रसादेन देवदेवस्य शूलिनः १४ जहि कर्णं महाबाहो नमुचिं वृत्रहा यथा श्रेयस्तेस्तु सदापा
र्थ युद्धे जयमवाप्नुहि १५ अर्जुन उवाच ध्रुव एव जयः कृष्ण मम नास्त्यत्र संशयः सर्वलोकगुरुर्यस्त्वं तुष्टो
ऽसि मधुसूदन १६ चोदयाश्वान्हृषीकेश रथं मम महारथं नाहत्वा समरे कर्णं निवर्त्स्यति फाल्गुनः १७ अ
द्य कर्णं हतं पश्य मच्छरैः शकलीकृतं मां वा द्रक्ष्यसि गोविंद कर्णेन निहतं शरैः १९ उपस्थितमिदं घोरं युद्धं त्रैलो १८०
क्यमोहनं यज्जनाः कथयिष्यंति यावद्भूमिर्धरिष्यति २० एवं ब्रुवन्सदा पार्थः कृष्णमक्लिष्टकारिणं प्रमथ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दौरथ्येनाभ्युगजेंद्रप्रतिगजोयथा ॥ २१ पुनरप्याहतेजस्वीपार्थः कृष्णमरिंदमं चोदयाश्वान्हृषीकेशकालोयम
तिवर्तते २२ एवमुक्तस्तदातेनपांडवेनमहात्मना जयेनसंशप्तसपांडवेनतदाप्रचोदयामासहयान्मनोजवा
न् सपांडुपुत्रस्यरथोमनोजवः क्षणेनकर्णस्यरथाग्रतोभवत् २३ इतिश्रीकर्णपर्वणिकर्णार्जुनद्वैरथेव
सुदेववाक्ये संजयउवाच वृषसेनंहतंदृष्ट्वाशोकामर्षसमन्वितः पुत्रशोकोद्भवंवारिनेत्राभ्यांसमवासृ
जत् १ रथेनकर्णस्तेजस्वीजगामाभिमुखोरिपुं युद्धायामर्षताम्राक्षः समाहूयधनंजयं २ तौरथौसूर्य
संकाशौवैयाघ्रपरिवारितौ समेतौददृशुस्तत्रद्वाविवार्कौसमुद्गतौ ३ श्वेताश्वौपुरुषादित्यावास्थितावरि
मर्दनौ शुशुभातेमहात्मानौचंद्रादित्यौयथादिवि ४ तौदृष्ट्वाविस्मयंजग्मुः सर्वसैन्यानिमारिष त्रैलोक्यवि
जयेयत्ताविंद्रवैरोचनाविव ५ रथज्यातलनिर्ह्रादैर्बाणसिंहरवैस्तथा तौरथावभ्यधावेतांसमालोक्यम
हीक्षितां ६ ध्वजौचदृष्ट्वासंसक्तौविस्मयः समपद्यत हस्तिकक्षंचकर्णस्यवानरंचकिरीटिनः ७ तौरथौ
संप्रसक्तौतुदृष्ट्वाभारतपार्थिवाः सिंहनादरवांश्चक्रुः साधुवादांश्चपुष्कलान् ८ दृष्ट्वाचद्वैरथंताभ्यांत
त्रयोधाः सहस्रशः चक्रुर्बाहुस्वनांश्चैवतथाचैलावधूननं ९ आजघ्नुःकुरवस्तत्रवादित्राणिसमंततः
कर्णंप्रहर्षयिष्यंतः शंखान्दध्मुश्चसर्वशः १० तथैवपांडवाः सर्वेहर्षयंतोधनंजयं तूर्यशंखविनादेनदि
शः सर्वाअनादयन् ११ क्ष्वेडितास्फोटितोत्कृष्टैस्तुमुलंसर्वतोभवत् बाहुशब्दैश्चशूराणांकर्णार्जुनसमाग
मे १२ तौदृष्ट्वापुरुषव्याघ्रौरथस्थौरथिनांवरौ प्रगृहीतमहाचापौशरशक्तिध्वजायुतौ १३ वर्मिणौबद्धनिस्त्रिं
शौश्वेताश्वौशंखशोभितौ तूणीरवरसंपन्नौद्वावप्येतौसुदर्शनौ १४ रक्तचंदनदिग्धांगौसमदौगोवृषाविव
चापविद्युद्ध्वजोपेतौशस्त्रसंपत्तियोधिनौ १५ चामरव्यजनोपेतौश्वेतछत्रोपशोभितौ कृष्णशल्यरथोपेतौ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी.
१६८

तुल्यरूपौ महारथौ १५ सिंहस्कंधौ दीर्घभुजौ रक्ताक्षौ हेममालिनौ सिंहस्कंधप्रतीकाशौ व्यूढोरस्कौ महाब
लौ १६ अन्योन्यवधमिछंतावन्योन्यजयकांक्षिणौ १७ अन्योन्यमभिधावंतौ गोष्टे गोवृषभाविव प्रभि
न्नाविव मातंगौ सुसंरब्धाविवाचलौ १८ आशीविषशिशुप्रख्यौ यमकालांतकोपमौ इंद्रवृत्राविव
क्रुद्धौ सूर्याचंद्रमसप्रभौ १९ महाग्रहाविव क्रुद्धौ युगांताय समुत्थितौ देवगर्भौ देवबलौ देवतुल्यौ
च रूपतः २० यदृछया समायातौ सूर्याचंद्रमसौ यथा बलिनौ समरे दृप्तौ नानाशस्त्रधरौ युधि तौ दृ
ष्ट्वा पुरुषव्याघ्रौ शार्दूलाविव धिष्ठितौ २१ बभूव परमो हर्षस्तावकानां विशांपते २२ संशयः सर्वभू
तानां विजये समपद्यत समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनंजयौ २३ उभौ वरायुधधरावुभौ रणकृत
श्रमौ उभौ च बाहुशब्देन नादयंतौ नभस्तलं २४ उभौ विश्रुतकर्माणौ पौरुषेण बलेन च उभौ च सदृ
शौ युद्धे शंबरामरराजयोः २५ कार्तवीर्यसमौ चोभौ तथा दाशरथेः समौ विष्णुवीर्यसमौ चोभौ तथा
भवसमौ युधि २६ उभौ श्वेतहयौ राजन् रथप्रवरवाहिनौ सारथी प्रवरौ चैव तयोरास्तां महारणे २७
ततो दृष्ट्वा महाराज राजमानौ महारथौ सिद्धचारणसंघानां विस्मयः समपद्यत २८ तावकास्तु ततः कर्णं
सबला भरतर्षभ परिवव्रुर्महात्मानं क्षिप्रमाहवशोभिनं २९ तथैव पांडवा हृष्टा धृष्टद्युम्नपुरोगमाः
परिवव्रुर्महात्मानं पार्थमप्रतिमं युधि ३० तावकानां रणे कर्णो ग्लहो ह्यासीद्विशांपते तथैव पांडवे
यानां ग्लहः पार्थोऽभवत्तदा ३१ त एव सभ्यास्तत्रासन् प्रेक्षकाश्चाभवन्स्मते तत्रैषां ग्लहमानानां ध्रुवौ ज
यपराजयौ ३२ ताभ्यां द्यूतं समासक्तं विजयायेतराय वा अस्माकं पांडवानां च स्थितानां रणमूर्धनि ३३
तौ तु स्थितौ महाराज समरे युद्धशालिनौ अन्योन्यं प्रतिसंरब्धावन्योन्यवधकांक्षिणौ ३४ तावुभौ प्रजि

१६८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हीर्षंताविंद्रदृष्ट्वाविवप्रभो भीमरूपधराचास्तांमहाधूमाविवग्रहौ ३५ ततोंतरिक्षेसाध्वस्यविवादोभरतर्ष
भ मिथोभेदाश्चभूतानामासन्कर्णार्जुनांतरे ३६ व्याभूयंतमिथोभिन्नाःसर्वलोकास्तुमारिष देवदान
वगंधर्वाःपिशाचोरगराक्षसाः ३७ प्रतिपक्षग्रहंचक्रुःकर्णार्जुनसमागमे द्यौरासीत्सूतपुत्रस्यपक्षेमाते
वधिष्ठिता ३८ भूमिर्धनंजयस्यासीन्मातेवजयकांक्षिणी गिरयःसागराश्चैवनद्यश्चसजलास्तथा ३९
वृक्षाश्चौषधयश्चैवव्याश्रूयंतपरस्परं असुरायातुधानाश्चगुह्यकाश्चपरंतप ४० तेकर्णंसमपद्यंतहृष्ट
रूपाःसमंततः मुनयश्चारणाःसिद्धावैनतेयावयांसिच ४१ रत्नानिनिधयःसर्वेवेदाश्चाख्यानपंचमाः
सोपवेदोपनिषदःसरहस्याःससंग्रहाः ४२ वासुकिश्चित्रसेनश्चतक्षकोमणिकस्तथा सर्पाश्चैवत।
थासर्वेकाद्रवेयाश्चसान्वयाः ४३ विषवंतोमहाराजनागाश्चार्जुनतोभवन् ऐरावताःसौरभेयाःवै
शालेयाश्चभोगिनः ४४ एतेभवन्नर्जुनतःक्षुद्रसर्पाश्चकर्णतः ईहामृगाव्यालमृगाःमंगल्याश्चमृगाद्वि
जाः ४५ पार्थस्यविजयेराजन्सर्वएवाभिसंश्रिताः वसवोमरुतःसाध्यारुद्राविश्वेश्विनौतथा ४६ अग्नि
रिंद्रश्चसोमश्चपवनोथदिशोदश धनंजयस्यतेपक्षेआदित्याःकर्णतोभवन् ४७ वैश्याःशूद्राश्चसूता
श्चयेचसंकरजातयः सर्वशस्तेमहाराजराधेयमभजंस्तथा ४८ देवास्तुपितृभिःसार्द्धंसगणाःसप
शाश्चै व दानुगाः यमोवैश्रवणश्चैववरुणश्चयतोर्जुनः ४९ ब्रह्मक्षत्रंचयज्ञाश्चदक्षिणाश्चार्जुनंश्रिताः प्रेताश्चैवपि
शाचाश्चक्रव्यादाश्चमृगांडजाः ५० राक्षसाःसहयादोभिःश्वशृगालाश्चकर्णतः देवब्रह्मनृपर्षीणांगणाः
पांडवतोभवन् ५१ तुंबुरुप्रमुखाराजन्गंधर्वाश्चयतोर्जुनः प्रावेयाःसहमौनेयगंधर्वाप्सरसांगणाः ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टी॰ १९६

ईहामृगाः पक्षिगणा द्विपाश्वरथपत्तिभिः उह्यमानास्तथा मेघैर्वायुना च मनीषिणः ५३ दिदृक्षवः समाज
ग्मुः कर्णार्जुनसमागमे देवदानवगंधर्वा नागा यक्षाः पतत्रिणः ५४ महर्षयो वेदविदः पितरश्च स्वधा
भुजः तपो विद्यास्तथौषध्यो नानारूपबलान्विताः ५५ अंतरिक्षे महाराज विनदंतो व्यवतस्थिरे ब्रह्मा ब्र
ह्मर्षिभिः सार्द्धं प्रजापतिभिरेव च ५६ भवश्चैव स्थितो याने दिव्यं तं देशमागमत् समेतौ तौ महात्मा
नौ दृष्ट्वा कर्णधनंजयौ अर्जुनो जयतां कर्णमिति शक्रोऽब्रवीत्तदा जयतामर्जुनं कर्ण इति सूर्योऽभ्यभा
षत ५७ हत्वार्जुनं मम सुतः कर्णो जयतु संयुगे हत्वा कर्णं जयत्वद्य मम पुत्रो धनंजयः ५८ इति
सूर्यस्य चैवासीद्विवादो वासवस्य च पक्षसंस्थितयोस्तत्र तयोर्विबुधसिंहयोः ५९ द्विपक्षमासीद्देवा
नामसुराणां च भारत ६० समेतौ तौ महात्मानौ दृष्ट्वा कर्णधनंजयौ अकंपंत त्रयो लोकाः सहदेवर्षि
चारणाः ६१ सर्वे देवगणाश्चैव सर्वभूतानि यानि च यतः पार्थस्ततो देवा यतः कर्णस्ततोऽसुराः ६२ रथ
यूथपयोः पक्षौ कुरुपांडववीरयोः दृष्ट्वा प्रजापतिं देवाः स्वयंभुवमचोदयन् ६३ को नयोर्विजयी
देव कुरुपांडवयोधयोः समोऽस्तु विजयो देव एतयोर्नरसिंहयोः ६४ कर्णार्जुनविवादेन सर्वं संशयि
तं जगत् स्वयंभो ब्रूहि नस्तथ्यमेतयोर्विजयं प्रभो ६५ स्वयंभो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः तदु
पश्रुत्य मघवा प्रणिपत्य पितामहं ६६ व्यज्ञापयत देवेश इदं मतिमतां वर पूर्वं भगवता प्रोक्तं कृष्णयो
र्विजयो ध्रुवः ६७ तन्नयास्तु नमस्तेऽस्तु प्रसीद भगवन्मम ब्रह्मेशानावथो वाक्यमूचतुस्त्रिदशेश्वरं ६८
विजयो ध्रुवमेवास्य विजयस्य महात्मनः खांडवे येन हुतभुक् तोषितः सव्यसाचिना ६९ स्वर्गं च सम

नुभावमाहात्म्यं शक्रतेकृतं कर्णोश्वदानवःपक्षश्चतःकार्यःपराजयः ७० एवंकृतेभवेत्कार्यंदेवानामेवति
ष्ठितं आत्मकार्यंचसर्वेषांगरीयस्त्रिदशेश्वर ७१ महात्माफाल्गुनश्चापिसत्यधर्मरतःसदा विजयस्तस्यनि
यतंजायतेनात्रसंशयः ७२ तोषितोभगवान्येनमहात्मावृषभध्वजः कथंवातस्यनजयोजायतेशतलो
चन ७३ यस्यचक्रेस्वयंविष्णुःसारथ्यंजगतःप्रभुः मनस्वीबलवान्शूरःकृतास्त्रोथतपोधनः ७४ बिभर्तिच
महातेजाधनुर्वेदमशेषतःपार्थःसर्वगुणोपेतोदेवकार्यमिदंयतः ७५ क्लिश्यन्तेपाण्डवानित्यंवनवासा
दिभिर्भृशं संपन्नस्तपसाचैवपर्याप्तःपुरुषर्षभः ७६ अतिक्रमेच्चमाहात्म्यादिष्टमर्थस्यपर्ययं अतिक्रां
तेचलोकानामभावोनियतंभवेत् ७७ नविद्यतेव्यवस्थानंक्रुद्धयोःकृष्णयोःक्वचित् स्रष्टारौजगतश्चै
वसततंपुरुषर्षभौ ७८ नरनारायणावेतौपुराणावृषिसत्तमौ अनियम्यौनियन्तारावेतौतस्मात्परंतपौ ७९
नैतयोस्तिसमःकश्चिद्दिविवामानुषेषुवा अनुगम्यत्रयोलोकाःसहदेवर्षिचारणैः ८० सर्वदेवगणाश्चा
पिसर्वभूतानियानिच अनयोस्तुप्रभावेनवर्ततेनिखिलंजगत् ८१ कर्णोलोकानयंमुख्यान्नाप्नुयात्पुरुष
र्षभः कर्णोवैकर्तनःशूरोविजयस्त्वस्तुकृष्णयोः ८२ वसूनांसलोकतांगच्छतांवासमाप्नुयात् सहितोद्रो
णभीष्माभ्यांनाकलोकमवाप्नुयात् ८३ इत्युक्तोदेवदेवाभ्यांसहस्राक्षोऽब्रवीद्वचः आमंत्र्यसर्वभूतानिब्र
ह्मशासनानुशासने ८४ श्रुतंभवद्भिर्यत्प्रोक्तंभगवद्भ्यांजगद्धितं तत्तथानान्यथातद्धितिष्ठध्वंविगतज्वराः
८५ इतिश्रुत्वेन्द्रवचनंसर्वभूतानिमारिष विस्मितान्यभवन्राजन्पूजयांचक्रिरेतदा ८६ व्यसृजंश्चशुभं
धीनिपुष्पवर्षाणिहर्षिताः नानारूपाणिविबुधादेवतूर्याण्यवादयन् ८७ दिदृक्षवश्चाप्रतिमंद्वैरथंन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

रथसिंहयोः देवदानवगंधर्वाः सर्वएवावतस्थिरे ८८ रथौतयोःश्वेतहयौ दिव्यौयुक्तौमहात्मनोः यौतौकर्णा
र्जुनौराजन्समृहस्थौव्यवतिष्ठतां ८९ समागतालोकवीराःशंखान्दध्मुःपृथक्पृथक् वासुदेवार्जुनौवीरौक
र्णशल्यौचभारत ९० तद्भीरुसंत्रासकरंयुद्धंसमभवत्तदा अन्योन्यस्पर्द्धिनोरुग्रंशक्रशंबरयोरिव ९१ तयो
र्ध्वजौवीतमलौशुशुभातेरथेस्थितौ राहुकेतूयथाकाशेउदितौजगतःक्षये ९२ कर्णस्याशीविषनिभार
त्नसारमयीदृढा पुरंदरधनुःप्रख्याहस्तिकक्ष्याविराजते ९३ कपिश्रेष्ठस्तुपार्थस्यव्यादितास्यइवांतकः
दंष्ट्राभिर्भीषयन्भाभिर्दुर्निरीक्ष्योरविर्यथा ९४ युद्धाभिलाषुकोभूत्वाध्वजोगांडीवधन्वनः कर्णध्वजमुपा
तिष्ठत्स्वस्थानाद्भगवान्कपिः ९५ उत्पातमहावेगःकक्ष्यामभ्याहनत्तदा नखैश्चदशनैश्चैवगरुडःप
न्नगंयथा ९६ साकिंकिणीकाभरणाकालपाशोपमायसी अभ्यद्रवत्सुसंरब्धाहस्तिकक्ष्याथतंकपिं
९७ तयोर्घोरतरेयुद्धेद्वैरथेद्यूतआहिते प्राकुर्वतांध्वजौयुद्धंपूर्वंपूर्वतरंतदा हयाहयानभ्यहेषन्स्पर्द्ध
मानाःपरस्परं ९८ अविध्यत्पुंडरीकाक्षःशल्यंनयनसायकैः शल्यश्चपुंडरीकाक्षंतथैवाभिसमैक्षत ९९
ततोराजंस्तदादेवःशल्यंनयनसायकैः कर्णंचाप्यजयद्दृष्ट्याकुंतीपुत्रोधनंजयः १०० अथाब्रवीत्सूतपु
त्रःशल्यमाभाष्यसस्मितं यदिपार्थोरणेहन्यादद्यमामिहकर्हिचित् १ किंकरिष्यसिसंग्रामेशल्यसत्य
मथोच्यतां शल्यउवाच यदिकर्णरणेहन्यादद्यत्वांश्वेतवाहनः उभावेकरथेनाहंहन्यांमाधवपांडवौ २ सं
जयउवाच एवमेवतुगोविंदमर्जुनःप्रत्यभाषत तंप्रहस्याब्रवीत्कृष्णःपार्थःसत्यमिदंवचः ३ पतेद्दिवाक
रःस्थानाच्छुष्येदपिमहोदधिः शैत्यमग्निरियान्नत्वांहन्यात्कर्णोधनंजय ४ यदिचैतत्कथंचित्स्याल्लोक

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पर्यासनेभवेत् हत्वांकर्णंतथाशल्यंबाहुभ्यामेवसंयुगे ५ इतिकृष्णवचःश्रुत्वाप्रहसन्कपिकेतनः अर्ज
नःशौ प्रत्युवाचेदंकृष्णमक्लिष्टकारिणं ६ ममत्वावश्यपर्याप्तौकर्णशल्यौजनार्दन सपताकध्वजंक
र्णंसशल्यरथवाजिनं ७ सछत्रकवचंचैवसशक्तिशरकार्मुकं द्रष्टास्यद्यरणेकृष्णशरैश्छिन्नमनेक
धा ८ अद्यैवसरथंसाश्वंसशक्तिकवचायुधं संचूर्णितमिवारण्येपादपंदंतिनायथा ९ अद्यराधेय
भार्याणांवैधव्यंसमुपस्थितं ध्रुवंस्वप्नेयनिष्टानितासांमिद्दृष्टानिमाधव ११ द्रष्टासिध्रुवमद्यैवविधवाःकर्ण
योषितः नहिमेशाम्यतेमन्युर्यदनेनपुराकृतं १२ कृष्णांसभामानीतांदृष्ट्वामूढेनादीर्घदर्शिना अस्मांस्तथा
वहसतात्तिपताचपुनःपुनः १३ अद्यद्रष्टासिगोविंदकर्णमुन्मथितंमया वारणेनेवमत्तेनपुष्पितंजग
तीरुहं १४ अद्यताःमधुरावाचःश्रोतासिमधुसूदन दिष्ट्याजयसिवार्ष्णेयइतिकर्णेनिपातिते १५ अद्याभि
मन्युजननींप्रहृष्टःसांत्वयिष्यसि कुंतींपितृष्वसारंचप्रहृष्टःसनुजनार्दन १६ अद्यवाष्पमुखींकृष्णांसां
त्वयिष्यसिमाधव वाग्भिश्चामृतकल्पाभिर्धर्मराजंचपांडवं १७ इतिश्रीमहाभारतेकर्णपर्वणिकर्णार्जु
नसमागमेद्वैरथे संजयउवाच ततोदेवनागासुरसिद्धयक्षैर्गंधर्वरक्षोप्सरसांचसंघैः ब्रह्मर्षिराजर्षिसुप
र्णजुष्टंबभौवियद्विस्मयनीयरूपं १ नानद्यमानंनिनदैर्मनोज्ञैर्वादित्रगीतस्तुतिनृत्यहासैः सर्वंतदित
ददृशुर्मनुष्याःस्वस्थाश्चतद्विस्मयनीयरूपं २ ततःप्रहृष्टाःकुरुपांडुयोधावादित्रशंखस्वनसिंहनादैः वि
नादयंतोवसुधांदिशश्चस्वनेनसर्वान्द्विषतोनिजघ्नुः ३ नराश्वमातंगरथैःसमाकुलंशरासिशक्त्यृष्टिनिपातदुः
सहं अभीरुजुष्टंहतदेहसंकुलंरणाजिरंलोहितमाबभौतदा ४ बभूवयुद्धंकुरुपांडवानांयथासुराणामसुरैः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ १७१ द्विधनःप्राकृत ३९ एकौमृत्योरथोरथिनौकर्णार्जुनौ एकौचतौरथौचेतिविग्रहः ३ नभोन्तरीक्षंसर्पंचैडोग्र

महाभवत् तथाप्रवृत्तेतुमुलेमृधेदारुणेधनंजयस्याधिरथेश्चसायकैः ४ दिशाश्चसैन्यंचशितैरजिह्मगैः

परस्परंप्राप्नुणातामुदंशितैः ततस्त्वदीयाश्चपरेचसायकैःकृतेंधकारेददृशुर्नकिंचन ५ भयान्नराव

करथयोःसमाश्रयंस्ततोभवत्तद्भुतमेवसर्वतः ततोस्त्रमस्त्रेणपरस्परस्यतौविधूयवातानिवशंर्वपश्चि

मौ ६ घनांधकारेविततेतमोन्तदौयपश्चोदितौतद्वदतीवरेजतुः नवाभिसर्त्तव्यमितिप्रहर्षिताःपरेत

दीयाश्चतथावतस्थिरे ७ महारथौतौपरिवार्यसर्वतःसुरासुराःशंबरवासवाविव मृदंगभेरीपण

वानकस्वनैःससिंहनादैर्नदतुर्नरोत्तमौ ८ शशांकसूर्याविवमेघनिस्वनैर्विरेजतुस्तौपुरुषर्षभौ

तदा महाधनुर्मंडलमध्यगावुभौसुवर्चसौबाणसहस्रदीपितौ ९ दिधक्षमाणौसचराचरंजगद्युगां

तसूर्याविवदुःसहौरणे उभावजेयावहितांतकावुभौजिघांसतुस्तौकृतिनौपरस्परं १० महाहवेवीत

भयौसमीयतुर्महेंद्रजंभाविवकर्णपांडवौ ततोमहास्त्राणिमहाधनुर्द्धरौविमुंचमानाविषुभिर्भया

नकैः ११ नराश्वनागानमितौत्विजघ्नतुःपरस्परंचापिमहारथौन्नृप ततोविसस्रुःपुनरर्दितानरा

नरेंद्रनागाश्चकुरुपांडवाश्रयाः १२ सनागपत्त्यश्वरथादिशोदशतथायथासिंहहतावनौकसः

ततस्तकुरवोधनभोजसौबलाःकृपेणशारद्वतसूनुनासह १३ ॥ भिसर्त्तव्यंनापयातव्यमिति

नियमेनप्रचोदिताःप्रेरिताः ८ १२ विसृष्टाःविप्रद्रुताः १३ पंचैवावशिष्टाःत्माहततःइति १४ ॥ १७१

महारथाः पंच धनंजयाच्युतौ शरैः शरीरांतिकैरेवताडयन् धनं(?)षितेषामिषुधीन् ध्वजान् हयान्रथांश्च सूतांश्च
धनंजयः शरैः १५ समं भ्रमध्याशु परास्समं ततः शरोत्तमैर्द्वादशभिश्च सूतजं अथाभ्यधावंस्त्वरिताः शतं र
थाः शतं गजानां श्चार्जुनमाततायिनः १६ प्राकाम्ततुषारायवनाश्च सादिनः सहैव कांबोजवरैर्जिघांसवः बा
णुधान् पाणिगतैः शरैः महद्भुरैन्यकृंतन्प्रपतन्नृशिरांसि च १७ हयांश्च नागांश्च रथांश्च युध्यतो धनंजयः श
त्रुगणानतितिनैस्तिरणात् ततोंतरिक्षे सुरतूर्यनिःस्वनाः ससाधुवादा हृषितैः समीरिताः १८ निपेतुरप्युत्तम
पुष्पवृष्टयः सगंधिगंधाः पवनेरिताः शुभाः तदद्भुतं देवमनुष्यसाक्षिकं समीक्ष्य भूतानि विसिस्मयुस्त
दा १९ तवात्मजः सूतसुतश्च न व्यथां न विस्मयं जग्मतुरेकनिश्चयौ अथाब्रवीद्द्रोणसुतस्तवात्मजं करं क
रेण प्रतिपीड्य सांत्वयन् २० प्रसीद दुर्योधन शाम्य पांडवैरलं विरोधेन धिगस्तु विग्रहं हतो गुरुर्ब्रह्मसमो
महास्त्रवित्तथैव भीष्मप्रमुखा महारथाः २१ अहं त्ववध्यो मम चापि मातुलः प्रशाधि राज्यं सह पांडवैः
श्चिरं धनंजयः शाम्यति वारितो मया जनार्दनो नैव विरोधमिच्छति २२ युधिष्ठिरो भूतहिते रतः सदा वृ
कोदरोस्मद्वशगस्तथा यमौ त्वया च पार्थैश्च कृते च संविदे प्रजाः शिवं प्राप्नुयुरिच्छया तव २३ व्रजंतु शेषाः स्व
पुराणि बांधवा निवृत्तयुद्धाश्च भवंतु सैनिकाः न चेद्वचः श्रोष्यसि मे नराधिप ध्रुवं प्रतप्तासि हतोरिभिर्युधि
२४ इदं च दृष्टं जगता सह त्वया कृतं यदेकेन किरीटमालिना यथा न कुर्याद्बलभिन्न चांतको न चापि धाता भ
गवान्न यक्षराट् २५ अतोपि भूयान् स्वगुणैर्धनंजयो न चातिवर्तिष्यति मे वचोऽखिलं तवानुयात्रां च सदा करि
ष्यति प्रसीद राजेंद्र शमं त्वमाप्नुहि २६ ममापि मानः परमः सदा त्वयि ब्रवीम्यतस्त्वां परमाच्च सौहृदात्॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ ४८ निसर्गतस्तु निसहजमित्रत्वोपपादनं साम्नाप्रीत्या प्रसन्नोराज्यार्धदानेन ४९ हितं अर्जुनकोपशमनेनेति च
१२२ निवारयिष्यामि च कर्णमप्यहं यदा भवान्सप्रणयो भविष्यति ५० वदंति मित्रं सहजं विचक्षणास्तथैव साम्ना
च धनेन चार्जितं प्रतापतश्चोपनतं चतुर्विधं तदस्ति सर्वं तव पांडवेषु ५१ निसर्गतस्ते तव वीर बांधवाः पु
नश्च साम्ना समवाप्नुहि प्रभो त्वयि प्रसन्ने यदि मित्रतां गता हितं कृतं स्याज्जगतस्त्वयातुलं ५२ स एवमुक्तः
सुहृदा वचो हितं विचिंत्य निःश्वस्य च दुर्मनाब्रवीत् यथा भवानाह सखे तथैव तन्ममापि विज्ञापयतो व
चः शृणु ५३ निहत्य दुःशासनमुक्तवान्वचः प्रसह्य शार्दूलवदेष दुर्मतिः वृकोदरस्तद्धृदये मम स्थि
तं न ततः परोक्षे भवतः कुतः शमं ५४ न चापि कर्णं प्रसहेद्रणेर्जुनो महागिरिं मेरुमिवोग्रमारुतः न चाश्व
सिष्यंति पृथात्मजा मयि प्रसह्य वैरं बहुशो विचिंत्य ५५ न चापि कर्णं गुरुपुत्र संयुगादुपारमेत्यर्हसि वक्तुम
च्युत श्रमेण युक्तो महता यफाल्गुनस्तमेष कर्णः प्रसभं हनिष्यति ५६ तमेवमुक्त्वाप्यनुनीय चासकृ
त्तवात्मजः स्वाननुशास्ति सैनिकान् समाहिताभिद्रवताहितान्मम सबाणहस्ताः किमु जोषमासत ५७
इति श्रीमहाभारते कर्णपर्वणि अश्वत्थामवाक्यं संजय उवाच ततः शंखभेरीनिनदे समृद्धे समीयतुः श्वे
तहयौ नराग्र्यौ वैकर्तनः सूतपुत्रोर्जुनश्च दुर्मंत्रिते तव पुत्रस्य राजन् १
तुर्योपदेशोपि विवृतः वचः दुर्योध
नस्य हतस्य शिरः पदा ताडयिष्यामीत्येवंरूपं ५१ यथार्जुनः कर्णं न प्रसहेत् तदपि भवतः परोक्षेनेति हर्षेण १२२

यथागजौहैमवतौप्रभिन्नौप्रवृद्धदंताविववासितार्थे तथासमाजग्मतुरुग्रवीर्यौधनंजयश्चाधिरथिश्च
वीरौ २ बलाहकेनेवमहाबलाहकोयदृच्छयावागिरिणायथागिरिः तथाधनुर्ज्यातलनेमिनिःस्वनैःस
मीयतुस्ताविषुवर्षवर्षिणौ ३ प्रवृद्धशृंगद्रुमवीरुधौषधीप्रवृद्धनानाविधनिर्झरौकसौ यथाचलावाचलि
तौमहाबलौतथामहास्त्रैरितरेतरंहतः ४ ससंनिपातस्तुतयोर्महानभूत्सुरेशवैरोचनयोर्यथापुरा श
रैर्विभिन्नांगनियंतृवाहयोःसुदुःसहोन्यैःकटुशोणितोदकः ५ प्रभूतपद्मोत्पलमत्स्यकच्छपौमहाह्रदौप
क्षिगणैरिवावृतौ ससंनिकृष्टावनिलोद्धुतौयथातथारथौतौध्वजिनौसमीयतुः ६ उभौमहेंद्रस्यसमानवि
क्रमावुभौमहेंद्रप्रतिमौमहारथौ महेंद्रवज्रप्रतिमैश्चसायकैर्महेंद्रवृत्राविवसंप्रजह्रतुः ७ सनागपत्त्य
श्वरथेउभेबलेविचित्रवर्माभरणांबरायुधे चकंपतुर्विस्मयनीयरूपेवियद्गताश्चार्जुनकर्णसंयुगे ८
भुजाःसवस्त्रांगुलयःसमुच्छ्रिताःससिंहनादैर्हृषितैर्दिदृक्षुभिः यदर्जुनोमत्तइवद्विपोद्विपंसमभ्ययादा
धिरथिंजिघांसया ९ उदक्रोशन्सोमकास्तत्रपार्थंपुरःसराश्चार्जुनभिंधिकर्णं छिंध्यस्यमूर्धानमलंविरे
णश्रद्धांचराज्याद्धृतराष्ट्रसूनोः १० तथास्माकंबहवस्तत्रयोधाःकर्णंतथायाहियाहीत्यवोचन् जह्यर्जु
नंकर्णशरैःसुतीक्ष्णैःपुनर्वनंयांतुचिरायपार्थाः ११ ततःकर्णःप्रथमंतत्रपार्थंमहेषुभिर्दशभिःप्रत्यवि
ध्यत् तंचार्जुनःप्रत्यविध्यच्छिताग्रैःकक्षांतरेदशभिःसंप्रहस्य १२ परस्परंतौविशिखैःसुपुंखैस्ततक्षतुःसूतपु
त्रार्जुनश्च परस्परंतौविभिद्धविमर्देसुभीममभ्यापततुश्चहृष्टौ १३ ततोर्जुनःप्रासृजदुग्रधन्वाभुजावुभौगां
डिवंवानुसृज्यनाराचनालीकवराहकर्णान् क्षुरांस्तथासांजलिकार्धचंद्रान् १४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ केतार्थस्यानार्थनीडेपत्तिगणाश्चदेहेवाणालीयंतस्मर्थः १५ संधानवाणासंधान १६ ॥
१०३ तेसर्वतःसमकीर्यंतराजन्पार्श्वेषवःकर्णरथंविशंतःप्रवाप्नुवाःपत्तिगणादिनोतेविशंतिकेतार्थमि
वाशुवृत्तं १५ यानर्जुनःसम्कुटीकरातंकर्णापरानन्त्रसृजज्जिताविः नान्स्यायकैर्ग्रसतेसूतपुत्रःत्रिमान्
तिमान्पाडुवस्येषुमहान् १६ ततोस्त्रमाग्नेयममित्रसाधनंमुमोचकर्णायमहेंद्रसूनुः भूम्यंतरिक्षेच
दिशोर्कमार्गप्राप्यास्यदेहोस्य बभूवदीप्तः १७ योधाश्चसर्वेज्वलितांवराभूःप्राद्रवंस्तत्रविदग्धवस्त्राः
शब्दश्चघोरोतिवभूवतत्रयथावनेवेणुवनस्यदह्यतः १८ तदीक्ष्यकर्णोज्वलनास्त्रमुद्यतंसवारुणंतत्
प्रशमार्थमाहवे समुत्ससर्जात्मसूतस्सुतःप्रतापवान्सतेननवह्निःशमयांबभूव १९ बलाहकैश्चाशुदिशःसम
स्तावचकारसर्वास्तिमिरेणसंवृताः ततोधरित्रीधरतुल्यरोधसःसमंततोवैपरिवार्यवारिणा २० तैश्चातिवे
गात्सतथाविघोपिनीतःशमंवह्निरतिप्रचंडः बलाहकैश्चैवदिगंतराणिव्याप्तानिसर्वाणियथानभश्च
२१ तथाचसर्वास्तिमिरेणवैदिशोमेघैर्वृतानप्रदृश्यंतकिंचित् अथापोवाह्याद्रहसंघास्ततस्तान्वाय
वास्त्रेणततःसकर्णात् २२ ततोप्यसह्यंदयितंदेवराजःप्राडश्चक्रेवज्रमतिप्रभावं गांडीवंज्यांविशिखांश्चा
नुमंत्र्यधनंजयःशत्रुभिरप्रधृष्यः २३ ततःक्षुरप्रांजलिकार्धचंद्रनालीकनाराचवराहकर्णाःगांडी
वतःप्राद्रवन्सन्नतीक्ष्णाःसहस्रशोवज्रसमानवेगाः २४ तेकर्णमासाद्यमहाप्रभावाःसतेजनाश्चार्द्धप १०३
त्रैःसवेगाः गात्रेषुसर्वेषुहयेषुचापिशरासनेयुगचक्रेध्वजेच २५ ॥

निर्भिद्यन्मर्माणिविविशुः सुतीक्ष्णास्तासर्वत्रस्ताभूमिमिवोरगास्ते शराचितांगोरुधिरार्द्रगात्रः कर्णस्तदासी
द्विवृत्तनेत्रः २६ हन्यमानानाममसमृद्धयोधंपांडुसृक्केभार्गवास्त्रमहात्मा महेंद्रशास्त्राभिमुखोविमुक्ता
न्हष्ट्वाकर्णः पांडवसैन्यसंघान् २७ तस्मात्त्वमस्त्रेणनिहत्यसोथजघानसंख्येरथनागपत्तीन् अमरश्च
मानाश्चमहेंद्रकर्मामहारणेभार्गवास्त्रप्रतापात् २८ पांचालानांप्रवरांश्चापियोधान् क्रोधाविष्टः सूतपु
त्रस्तरसावाणैर्विव्याधाहवेसुप्रसक्तैः शिलाशितैरुक्मपुंखैः प्रगृह्य २९ ततःपांचालाः सोमकाश्चापिरा
जन्कर्णेनाजौपीड्यमानाः शरौघैः क्रोधाविष्टाविव्यधुस्तंसमेतास्तीक्ष्णैर्बाणैः सूतपुत्रंसमेताः ३० तान्सू
तपुत्रोनिजघानवाणैः पांचालानांरथनागाश्वसंघान् अभ्यर्द्यबाणगणैः प्रसह्यविध्वाहृषीकैस्तरसारणेसू
तपुत्रः ३१ तेभिन्नदेहाव्यसवोनिपेतुः कर्णेषुभिर्भूमितलेस्वनेन तः क्रुद्धेनसिंहेनयथेभयूथामहाब
लेभीमबलेनतद्वत् ३२ पांचालानांप्रवरांस्तेनिहत्यप्रसह्ययोधानखिलानरीन्नः ततःसराजन्विरराज
कर्णोयथांबरेभास्करउग्ररश्मिः ३३ कर्णस्यमत्वातुजयंत्वदीयाः परांमुदंसिंहनादांश्चचक्रुः सर्वेह्यम
संसंतभृशाहतौवैकर्णेनकृष्णावितिकौरवेंद्र ३४ तत्राहृष्टोप्रेक्ष्यमहारथस्यकर्णस्यवीर्यंचपरैरसह्यंह
ष्ट्वाचकर्णेनधनंजयस्यतथाजिमध्येनिहतंतदस्त्रं ३५ ततस्त्वमर्षीक्रोधसंदीप्तनेत्रोवातात्मजःपाणि
नापाणिमार्छन् भीमोब्रवीदर्जुनंसत्यसंध ममर्षितोनिश्वसन्जातमन्युः ३६ कथंनुपापोयमपेतधर्मः
सूतात्मजःसमरेद्यप्रसह्य पांचालानांयोधमुख्याननेकान्निजघ्निवांस्तवजिष्णोसमक्षं ३७ पूर्वंदेवैरजि
तेकालकेयैःसाक्षात्स्थाणोर्बाहुसंस्पर्शमेत्यकथंनुत्वांसूतपुत्रःकिरीटिन्विध्येदिषुभिर्दशभिःशराविध्यत ३८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
३४

तथातिष्ठं स्वाग्रसहायानसंख्यान् आश्चर्यमेतत्प्रतिभाति मेद्य कस्मात्परिक्लेशमनन्यसत्वं यथाब्रवीत्त्वं इति
लोमसवाचः ४१ हताः स्वनीतानास्त्वहि पापबुद्धिः स तान्मजनार्यं गतभीईशात्मा संसत्यसर्वं तदिहायपा
पंजमस्यास्तु कर्णापृथिसव्यसाचिन् ४० कस्मादुपेताकुरुषैकिरीटिन् उपेक्षितं तु नायमिहायकालः य
याप्यासर्वभूतान्यजैषीग्रामेदग्दतं वाडवे पावकाय ४२ तथाध्यत्वामूतपुत्रंजहित्व अद्वैवेनगद
यायोथ्यपिषो अथाब्रवीद्दासदेवोपि पार्श्वेदस्वारथ्ये प्रतिहन्यमानान् ४२ अमीमरुदन्स्वर्यातेघ
कर्णोह्यस्येरस्त्रं किमिदं भो किरीटिन् सवीरकिं तद्यासिनावधस्तेनदंष्टतेकुरवः संप्रहृष्टाः ४३ क
र्णप्रवहत्वविडहिंसर्वं तवास्त्रमस्त्रे विनिपात्यमाने यथाध्यत्वानिहतंतामसास्त्रंयुगेयुगेराक्षसा
स्त्रापिघोराः दंभोद्भवाश्चासुराश्चाहवेषु तथाध्यत्वाजहि कर्णमद्य ४४ अनेनचास्यत्वरनेमिना
घसंछिंधिमर्ज्जनमरेः अमत्यमयाविसृष्टेन सुदर्शनेनवज्रेणशाक्रोनमुचेरिवारेः ४५ किरातरूपी
भगवान्स्तुश्चत्वात्वयामहात्मापरितोषितोभूत् तांत्वंपुनर्वीरध्वतिंगृहीत्वासहानुबंधंजहिसूत
पुत्रं ४६ ततोमहीसागरमेखलांत्वं सपत्ननांग्रामहतींसमस्तां प्रयच्छराज्ञेनिहतारिसंघांयथाश्चपा
र्थातुलमाद्यहित्वं सएवमुक्तोतिबलोमहात्माचकारबुद्धिंहिवधायसौतेः सचोदितोभीमजनार्द
नाभ्यांस्मृत्वातथात्मानमवेक्ष्यसर्वं इहात्मनश्चागमनेविदित्वाप्रयोजनंकेशवमित्युवाच ४८ ॥

टी॰ ५० आत्मनोनरस्यचात् नारायणस्यचइहभूमौप्रयोजनंभूभारावतरणंविदित्वास्मृत्वा ४८ ४९ ५० २०४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्राङ्मुखो मेघमहास्त्रमुग्रं शिवाय लोकस्य वधाय सौतेः ततो नु जाना त्वभवान्तरिक्षं ब्रह्मा भवो वेदविदश्च
सर्वे ४९ इत्युच्यदेवं सततं सव्यसाची नमस्कृत्वा ब्रह्मणे सोमितात्मा तदुत्तमं ब्राह्ममसह्यमस्त्रं प्राउश्चकेम
नसा यथा हृदयं ५० तदस्य हत्वा विरराज कर्णो मुक्त्वा शरान्मेघ इवाम्बुधाराः समीक्ष्य कर्णेन किरीटिनं कृत
माजिमध्ये निहतं तनत्रं ५१ ततो मर्षी बलवान्क्रोधदीप्तो भीमो ब्रवीदर्जुनं सत्यसंधं ननु त्वाहुर्वेदितारं प
रास्त्रं ब्राह्मं विधेयं परमं जनास्तत् ५२ तस्मादन्यद्योजय सव्यसाचि नित्येति सोक्तो योजयत्सव्यसाची ततो दि
शः प्रदिशश्चापि सर्वाः समावृणोत्सायकैर्भूरितेजाः ५३ गांडीवमुक्तैर्भुजगैरिवोग्रैर्दिवाकरांशुप्रतिमैर्ज्व
लद्भिः सृष्टाः खबाणा भरतर्षभेण शतेश्वतानीव सुवर्णपुंखाः ५४ प्राच्छादयत्कर्णरथं क्षणेन युगान्तवन्हि
र्ककरप्रकाशाः ततश्च शूलानि परश्वधानि चक्राणि नाराचशतानि चैव ५५ निश्चक्रमुर्घोररूपाणि योधा
स्ततो ह्यहन्यंत समंततोपि छिन्नं शिरः कस्यचिदाजिमध्ये पपात योधस्य परस्य कायात् ५६ भयेन सोप्याशु
पपात भूमावन्यः प्रनष्टः पतितं विलोक्य अन्यस्य मासिर्निपपात कृत्तो योधस्य बाहुः करिहस्ततुल्यः ५७
अन्यस्य सव्यः सह चर्मणा च क्षुरप्रकृत्तः पतितो धरण्यां एवं समस्तान्विपिधमुख्यान्विध्वंसयामास किरी
टमाली ५८ घोरैः शरीरांतकरैः सुघोरैर्दौर्योधने सैन्यमशेषमेव वैकर्तनेनापि तथाजिमध्ये सहस्रशो वा
णगणा विसृष्टाः ५९ ते घोषिणः पाण्डवमभ्युपेयुः पर्जन्यमुक्ता इव वारिधाराः ततः सकृष्णं च किरीटिनं च
वृकोदरं चाप्रतिमप्रभावः ६० त्रिभिस्त्रिभिर्भीमबलो निहत्य ननाद घोरं महता स्वरेण स कर्णबाणाभिह
तः किरीटी भीमं तथा प्रेक्ष्य जनार्दनं च ६१ अमृष्यमाणः पुनरेव पार्थः शरान्दशाष्टौ च समुद्ववर्ह सके

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क·टी· तमेकेनशरेणविध्याशल्यंचतुर्भिस्त्रिभिरेवकर्णं ९२ ततःसुमुक्तैर्दशभिर्जघानसभापतिंकांचनव
१०५ र्मनद्धं ९३ सराजपुत्रोविशिखोविबाहुर्विवाजिसूतोविधनुर्विकेतुः हतोरथाग्रादपतत्सुरुग्णः पर
शुधैःशालइवावकृत्तः ९४ पुनश्चकर्णस्त्रिभिरष्टभिश्चद्वाभ्यांचतुर्भिर्दशभिश्चविध्वाचतःशतान
द्विरदान्सायुधान्वैहत्वारथान्ष्टशतान्जघान ९५ सहस्रशोश्वांश्चपुनःसमारोहान्ष्टौसहस्राणि
चपत्तिवीरान् कर्णंससूतंसरथंसकेतुमदृश्यमंजोगतिभिःप्रचक्रे ९६ अथाक्रोशनकुरवोवध्य
मानाधनंजयेनाधिरथिंसमंतात् मुंचाभिविध्यार्जुनमाशुकर्णबाणैःपुराहंतिकुरूनसमग्रान ९७
सचोदितःसर्वयत्नेनकर्णोमुमोचबाणानसकृद्बहून्भीष्मा ९८ तेपांडुपांचालगणान्निजघ्नुर्मर्म
च्छिदःशोणितपाःसुदिग्धाः तावुत्तमौसर्वधनुर्धराणांमहाबलौसर्वसपत्नसाहौ ९९ निजघ्नतु
श्चाहितसैन्यमुग्रमन्योन्यमप्यस्त्रविदौमहास्त्रैः अथोपयातस्त्वरितोदिदृक्षुर्मंत्रौषधीभिर्निरुजो
विशल्यः १०० नासत्यदस्राविवसुतोभवाद्यैरष्टांगविद्यासनमुष्ठहृद्भिः आवद्दपृद्यणवच्चवेताग्रथा
सुरेशोदितिजैःसुतांगः १०१ कृतःसवक्रद्भिर्भिषजांवरिष्ठैर्युधिष्ठिरस्तत्रसुवर्णवर्मा तथोपयातेयु
धिधर्मराजेहृष्टास्तदासर्वभूतान्यनंदन् १०२ राहोर्विमुक्तंविमलंसमग्रंचंद्रंयथैवाभ्युदितंतथैव
दृष्ट्वातमाद्यावथयुध्यमानौदिदृक्षवःसूरवराविरेजौ १०३ कर्णंचपार्थंचविलोकयंतःराख्यामहीस्था
श्चजनावतस्थुः सकार्मुकज्यातलसंनिपातःसमुत्क्रबाणस्तुमुलोबभूव १०४ ततोस्त्रयाम्यास्त्रमिषु
प्रवेकैर्धनंजयस्याधिरथश्चतत्र ततोधनुर्ज्यासहसातिकृष्टासुघोषमच्छिद्यतपांडवस्य १०५ ॥ १०५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्मिंस्ततो पांडवं सूतपुत्रः समाचिनोत्क्षुद्रकाणां शतेन निर्मुक्तसर्पप्रतिमैश्च भीमैस्तैलप्रधौतैः खगप
त्रवाजैः ७९ षष्ट्या विभेदाशु च वासुदेवमनंतरं फाल्गुनमष्टभिश्च शुभात्मजो मर्मसु निर्बिभेद समरुत्स
तवायुतशः शराग्र्यैः ८० कर्णं च पार्थश्च तथा ध्वजं च पार्थानुजान् सोमकान् पातयंश्च प्राच्छादयंस्तेवि
शिखैः शरैस्तैर्जीमूतसंघा नभसीव सूर्यं ८१ प्रागाद्भुतस्तान्विशिखैरनेकैर्वृष्टैर्भृशं सूतपुत्रः कृता
स्त्रः तैरस्त्रमस्त्रैर्विनिहत्य सर्वं जघान तेषां रथवाजिनागान् ८२ तथा तु सैन्यप्रवरांश्च राजन्नभ्यर्दय
न्मार्गणैः सूतपुत्रः ते भिन्नदेहा व्यसवो निपेतुः कर्णेषुभिर्भूमितले स्वनेन ८३ सिंहेन क्रुद्धेन यथा
श्वा स्वयूथ्या महाबला भीमबलेन तद्वत् पुनश्च पांचालवरास्तथा मे तदंतरे कर्णधनंजयाभ्यां प्रस्क
दंतो बलिना साधुमुक्तैः कर्णेन बाणैर्निहताः प्रसह्य ८४ जयं मत्वा विपुलं वै त्वदीयास्तलान्निजघ्नुः सिं
हनादांश्च नेदुः सर्वे ह्यमन्यंत वशीकृतौ तौ कर्णेन कृष्णाविति ते विमर्दे ८५ ततो धनुर्ज्यामवमृज्य शी
घ्रं शरानस्तानाधिरथेर्विधम्य सुसंरब्धः कर्णशरक्षतांगो रणे पार्थः कौरवान् प्रत्यगृह्णात् ८६ ज्यां चात
स्पृश्याभ्यहनत्तलत्रे बाणांधकारं सहसा च चक्रे कर्णं च शल्यं च कुरूंश्च सर्वान् बाणैरविध्यत्स समं कि
रीटी ८७ न पक्षिणो बभ्रमुरंतरिक्षे तदा महास्त्रेण कृतांधकारे वायुर्वियत्स्थैरीरितो भृशं सघैरुवाह दि
व्यः शरैरभिस्तरश्मी ८८ शल्यं च पार्थो दशभिः शरैस्तैर्भृशं तनुत्रे प्रहसन्नविध्यत् ततः कर्णं द्वादशभिः सु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰प॰ स्यात्वेसमेनेनपातालंगंगायास्तलंप्राप्यतदभिपातेनपराभूतास्तथा: १७ ततस्तक्षकपुत्रस्यदाशितिते सर्पवाणा: कतमे ॥नप्रयुक्ता:
२५६ मुक्ते विविध्यापुनः सप्तभिरभ्यविध्यत १८ सपार्थवाणासमनवेगमुक्तैर्दशाहत: पत्रिभिरुग्रवेगै:
विभिन्नगात्र: ततनोत्थितोग: कर्णोबभौरूढरवानतेषु: १९ प्रक्रीडमानोथस्मशानमध्येरौद्रेमुहूर्तेरु
धिरार्द्रगात्र: ततस्त्रिभिस्तंत्रिदशाधिपोपमंशरैर्विभेदाधिरथिर्हिनेत्रये २० शरास्त्रयपंचज्वलितानिवोर
गान्प्रवेशयामासमजितोसयाच्युते तेवर्मभित्वापुरुषोत्तमस्यसुवर्णचित्रान्यपतन्सुमुक्ता: २१ भोग
गामाविविशु: सुवेगा: स्नात्वाचकर्णोहिमुखा: प्रतीपुस्तान्पंचभल्लैर्दशभि: समुक्तैस्त्रिधाचिच्छेदके
कमथोह्यकर्ने २२ धनंजयस्तेन्यपतन्पृथिव्यांमहाहृयस्तक्षकपुत्ररुस्ता: ततः प्रजज्वालकिरीट
मालीक्रोधेनकक्षंप्रदहन्निवाग्नि: २३ तथाविनुन्नोगमवेसकृत्स्नमर्थ्यैषुभि: कर्णभुजप्रसृष्टै: सक
र्णमाकर्णविकृष्टसृष्टै: शरै: शरीरांतकरैर्ज्वलद्भि: २४ मर्मस्वविध्यत्सचचालदु:खाद्देवाटवातिष्ठ
तधैर्यबुद्धि: २५ तत: शरौघै: प्रदिशोदिशश्चरवे: प्रभा: कर्णरथश्चराजन् अदृश्यमासीत्कुपितेधनं
जयेतुषारनीहारवृत्तंयथानभ: २५ सचक्ररक्षानथपादरक्षान्पुर: सरान्पृष्ठगोपांश्चसर्वान् दु
र्योधनेनानुमतानरिघ्न: समुद्यतान्सरथान्सारभूतान् २६ द्विसाहस्रान्समरेसव्यसाचीकुरुप्रवीरान्
ऋषभ: कुरूणां क्षणेनसर्वान्सरथाश्वसूतान्निनायराजन्क्षयमेकवीर: २७ ततोपलायंतविहायक
र्णंतवात्मजा: कुरवोयेचशिष्टा: हतानपाकीर्यशरैस्ततोश्चलालप्यमानोस्तनयानपितेस्म २८ ॥ २५६

समसर्वतः प्रेक्षदिशो विप्रद्रुता भयाद्वदीर्णाः कुरुभिर्विहीनाः नविव्यथे भारत तत्र कर्णः प्रहृष्ट एवार्जुनमभ्य
धावत् ९९ इति श्रीमहाभारते कर्णपर्वणि ॥ संजय उवाच ततः प्रयाताः शरपातमात्रमवस्थिताः कुरवो
भिन्नसेनाः विद्युत्प्रकाशं ददृशुः समंतात् धनंजयास्त्रं समुदीर्यमाणं १ तदर्जुनास्त्रं ग्रसति स्म कर्णो विय
त्गतं घोरतरैः शरैस्तत् क्रुद्धेन पार्थेन भृशाभिसृष्टं वधाय कर्णस्य महाविमर्दे २ उदीर्यमाणं स्म कुरून् दह
न्तं सुवर्णपुंखैर्विशिखैर्ममर्द कर्णस्त्वमोघेष्वसनं दृढज्यं विस्फारयित्वा विसृजञ्छरौघान् ३ रामादुपा
त्तेन महामहिम्ना आथर्वणेनारिविनाशनेन तदर्जुनास्त्रं व्यधमद्दहन्तं कर्णस्तु बाणैर्निशितैर्महात्मा
४ ततो विमर्दः सुमहान् बभूव तत्रार्जुनस्याधिरथेश्च राजन् अन्योन्यमासादयतोः पृषत्कैर्विषाणघा
तैर्द्विपयोरिवोग्रैः ५ तत्रास्त्रसंपातसमावृतं तत् तदा बभूवा राजन् त्वमलेस्मसर्वतः तत् कर्णपार्थौ शरवृ
ष्टिसंघैर्निरंतरं चक्रतुरंबरं तदा ६ ततो जालं बाणमयं महत्तं सर्वे ह्यपश्यन् कुरवः सोमकाश्च नान्यच्च भूतं
ददृशुस्तदा ते बाणांधकारे तुमुलेथ किंचित् ७ तौ संदधानावनिशं च राजन् समस्यंतौ चापि शरानने
कान् संदर्शयेतां युधि मार्गान् विचित्रान् धनुर्धरौ तौ विविधैः कृतास्त्रैः ८ तयोरेवं युध्यतो राजिमध्ये सू
तात्मजोभूदधिकः कदाचित् पार्थः कदाचित्त्वधिकः किरीटी वीर्यास्त्रमायाबलपौरुषेण ९ दृष्ट्वा तयो
स्तं युधि संप्रहारं परस्परस्यांतरमीक्षमाणयोः घोरं तयोर्दुर्विषहं रणेन्ये योधाः सर्वे विस्मयमभ्यगच्छन् १०
ततो भूतान्यंतरिक्षस्थितानि तौ कर्णपार्थौ प्रशशंसुर्नरेंद्र भो कर्ण साध्वर्जुन साधु चेति वियत्सु वाणी।
श्रूयते सर्वतोपि ११ तस्मिन् विमर्दे रथवाजिनागैस्तदाभिघाते दलिते भूतले च ततस्तु पातालतलेश।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१८८

यानेनागोऽस्य सेनः कृतवैरोऽर्जुनेन १२ राजंस्तदा लोऽवदाहमुक्तो विवेश कोपादुरगस्तथा तलेयः अथोर्ध्व
यानेोर्ध्वगतिर्जवेन संदृश्यमकर्णार्जुनयोर्विमर्दे १३ अयं हि कालोस्य दुरात्मनो वै पार्थस्य वैरप्रतियात
नाय संचिंत्य तूणं प्रविवेश चैव कर्णस्य राजन् शररूपधारी १४ ततोस्त्रसंघातसमाकुलेन तदा बभूव
जाले वितते तोऽसुजाले तौ कर्णपार्थौ शरसंघवृष्टिभिर्निरंतरं चक्रतुरंबरं तदा १५ तद्बाणजालैकमयं
महांतं सर्वे त्रसन् कुरवः सोमकाश्च नान्यत् किंचिद्ददृशुः संपतद्धि बाणांधकारे तुमुलेतिमात्रे १६ त
तस्तौ पुरुषव्याघ्रौ सर्वलोकधनुर्द्धरौ त्यक्तप्राणौ रणे वीरौ युद्धश्रममुपागतौ समुत्क्षेपैर्वीज्यमा
नौ सिक्तौ चंदनवारिणा १७ सवालव्यजनैर्दिव्यैर्दिविस्थैरप्सरोगणैः शक्रसूर्यकराब्जाभ्यां प्रमार्जि
तमुखावुभौ १८ कर्णोथ पार्थं न विशेषयद्यदा भृशं च पार्थेन शराभितापितः ततस्तु वीरः शरविक्षतांगो
दध्रे मनो ह्येकशयस्य तस्य १९ ततो रिपुघ्नं समधत्त कर्णः सुसंचितं सर्पमुखं ज्वलंतं रौद्रं शरं संनतमु
ग्रधौतं पार्थार्थमत्यर्थचिराभिगुप्तं २० सदार्चितं चंदनचूर्णशायितं सुवर्णतूणीरशयं महार्चिषं
प्राकर्णपूर्णं च विकृष्य कर्णः पार्थोन्मुखः संदधे चोत्तमौजाः २१ प्रदीप्तमैरावतवंशसंभवं शिरो जि
हीर्षुर्युधि सव्यसाचिनः ततः प्रजज्वाल दिशो नभश्च उल्काश्च घोराः शतशः प्रपेतुः २२ तस्मिंस्तु ना
गे धनुषि प्रयुक्ते हाहाकृता लोकपालाः सशक्राः न चापि तं बुबुधे सूतपुत्रो बाणे प्रविष्टं योगबलेन ना
गं २३ दशशततनयो हि दृष्ट्वा बाणं प्रविष्टं निहतइतिस ततो मे स्रस्तगात्रो बभूव नलजकुसुमयोनिः
श्रेष्ठभावो जितात्मा त्रिदशपतिमवोचन् मा व्यथिष्ठा जयेऽश्रीः २४ ततोऽब्रवीन्मद्रराजो महात्मा ह

१८८

ह्याकर्णप्रहितं सुतमुग्रं नकर्णग्रीवामिषुरेष लप्स्यते समीक्ष्य संधत्स्व शरं शिरोघ्नं ॥ २३ ॥ अथाब्रवीत्क्रोधसंरक्त
नेत्रो मद्राधिपं सूतपुत्रस्तरस्वी ॥ २४ ॥ न संधत्ते द्विः शरं शल्य कर्णो न मादृशाजिह्मयुद्धा भवंति ॥ इतीदमुक्त्वा वि
ससर्ज तं शरं प्रयत्नतो वर्षगणाभिपूजितं ॥ २५ ॥ हतोसि वै फाल्गुन इत्यवोचत्त्वरन्सराजन्विजयार्थमुग्र
तः ससायकः कर्णभुजप्रसृष्टो हुताशनार्कप्रतिमः सुघोरः ॥ २६ ॥ गुणाच्युतः कर्णधनुःप्रमुक्तो वियद्गतः
प्राज्वलदंतरिक्षे तं प्रेक्ष्य दीप्तं युधि माधवस्तु त्वरान्वितः सत्वरमेव लीलया ॥ २७ ॥ पदा विनिष्पिष्य रथोत्त
मं सः प्रावेशयत्पृथिवीं किंचिदेव क्षितिं गता जानुभिस्ते च वाहा हेमच्छन्नाश्चंद्रमरीचिवर्णाः ॥ २८ ॥ संधी
यमाने भुजगं दृष्ट्वा कर्णेन माधवः आक्रमत्स्यंदनं पद्भ्यां बलेन बलिनां वरः अवगाढे रथे भूमौ जानु
भ्यामगमन्हयाः ततोंतरिक्षे सुमहान्निनादः संपूजनार्थं मधुसूदनस्य दिव्याश्च वाचः सहसा बभूवुः
दिव्यानि पुष्पाण्यथ सिंहनादाः ॥ २९ ॥ तस्मिंस्तथा वै धरणीनिमग्ने रथे प्रयत्नान्मधुसूदनस्य ततः श
रः सोभ्यहनत्किरीटं तस्येंद्रदत्तं सुदृढं च धीमतः अथार्जुनस्योत्तमगात्रभूषणं धरावियद्द्योः सलिले
षु विश्रुतं ॥ ३० ॥ बलास्त्रसर्गोत्तमयत्नमन्युभिः शरेण मूर्ध्नः प्रजहार सूतजः दिवाकरेंदुज्वलनप्रभत्विषं
सुवर्णमुक्तामणिवज्रभूषितं ॥ ३१ ॥ पुरंदरार्थं तपसा प्रयत्नतः स्वयं कृतं यद्विभुना स्वयंभुवा महार्हरू
पं द्विषतां भयंकरं विभर्तुरत्यर्थसुखं सुगंधिनं ॥ ३२ ॥ जिघांसते देवरिपून्सुरेश्वरः स्वयं ददौ यत्सुमनाः कि
रीटिने हरांबुपाखंडलवित्तगोप्तृभिः पिनाकपाशाशनिसायकोत्तमैः ॥ ३३ ॥ सुरोत्तमैरप्यविषह्यमर्दितं ।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कि.टी. १२८

अथेति मर्त्यः सकाशात् व्यालास्त्रसमर्गश्चोत्तमयत्नस्य मन्त्रयत्नैः प्रयुक्तेन घोरेणोत्तमांगभूषणं प्रजहा

प्रसह्य नागेन जहार यदूद्वहः स दृष्टभावो वितथप्रतिज्ञः किरीटमत्यद्भुतमर्जुनस्य
२४ नागो महार्हं तपनीयचित्रं पार्थोत्तमांगात् प्रहरन्नरस्वी तद्धेमजालावततं स
घोषं जाज्वल्यमानं निपपात भूमौ २५ तदुत्तमेषून्मथितं विषाग्निना प्रदीप्तमर्चि
ष्मद्द्योतितं तोप्रियं पपात पार्थस्य किरीटमुत्तमं दिवाकरास्तादिव रक्तमंडलः
२६ सैव किरीटं बहुरत्नभूषितं जहार नागोऽर्जुनमूर्द्धतो बलात् गिरेः सुजातां
कुरपुष्पितद्रुमं महेंद्रवज्रः शिखरोत्तमं यथा २७ महीवियद्द्यौः सलिलं च वा
युनाऽप्रसह्यमुग्रं विनिचूर्णितं यथा अतीवशब्दो भुवनेषु वै न राजन्नाध्वस्य
न्व्यथिताश्च चस्खलुः २८ विना किरीटं शुशुभे स पार्थः श्यामो युवा नीलइवोच्च
शृंगः ततः समुद्ग्रथ्यासितेन वाससा स्वमूर्धजानव्यथितस्त
दाऽर्जुनः २९ ॥

इति द्वयोः संबंधः २१ २२ २३ २४ २५ २६ २७ २८ २९ १२८

गोकर्णामुकुटंजहारेत्यन्वयः अर्जुनस्यमुकुटहरणमपिमहत्कर्मेतिसूचयन्मुकुटंविशिनष्टि गवि
वत्वेषिकर्णीयस्याःसाचद्रुः अवाःसर्पिणी अर्जुनेनखांडवेनिहतासतीइहनिमित्तभूतातस्मकु
टमेवजहारहतवतीनतुशिरः कथंहतायाहननिमित्तत्वमतआह स्वमुखीकृतेनरघुणागोपु
त्रसंप्रेषिता सुधिरविवर्तितत्वात्प्रभवतिशोभनेपुत्रजीवनकरं स्वंयस्याःसा स्वमुखी साहिपुत्रं
निर्गीर्यद्रुमानात्खांडवाद्बुत्पतंतीशिरोदेशेऽर्जुनेनछिन्नासतीस्वयंमृतापुत्रंचरतितवतीसा

विभासितःसूर्यमरीचिनाहृदंशिरोगतेनोदयपर्वतोयथा" गोकर्णीस्वमुखीकृतेनरघुणा
गोपुत्रसंप्रेषितागोशापाद्धात्मजभूषणंस्वविहितंस्वयंकृतंगोस्तूपभं दृष्ट्वागोगतकंजहारमु
कुटंगोशापाद्गोपुरिवैगोकर्णासननमर्दनस्थनपयावशाप्यमृतोर्वेशं ५० ॥

दिपर्वतस्तुपाव्यायते कृतेनस्वयंनिर्मितेनपुत्रेणत्रातेनरघुणारघुभावंगतेन आत्मावैपुत्रनामासी
तिश्रुतेरिक्ष्वाकवपुत्ररूपेणसंपन्नामती गोमतःरश्मिमतोऽर्कस्यपुत्रेणकर्णेनप्रेषिता रघुणानीत्यं
भावंन्रतीया गोपुत्रेतिमतत्वाःप्रार्थः किंकृत्वामुकुटंजहारेत्यतआह स्वयंकृतगोस्तूपभंगोगतकं
दृष्ट्वास्वयंकृतः अतिशायेनाविर्भूताःगावोरश्मयस्तेजश्चतियावत् स्वयंकृतेर्गोभिरस्वभिश्चप्रकर्षेणभास
मानंनिरतिशयतेजोबलमर्जुनेगोगतकंगोशाह्वेनहृयरश्मीनां प्रदेशोलसते तत्रगतंविद्यमानंकंशि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कु॰टी॰ १८८ णेयस्मिंते अर्जुनस्यग्रीवादेशंकर्णेनलक्षीकृते विज्ञायभगवतास्वभारेणाश्वेषुजानुभ्यामवनींग
मितेषुरश्मिभिः समस्तत्रदेशेऽर्जुनस्यशिरोदृष्ट्वापिवेगातिशयात्स्वयं नीचीभवितुमशक्नुवतो स्व
तद्देशास्यमुकुटंजहारेत्यर्थः गोशब्दात्मजभूषणंसुविहितमिति गोः पृथिवीतयाश[illegible]तइति
गोशब्दात्मादितिः इयंवाअदितिरितिपृथिव्याअदितेर्निर्देशात् तस्याआत्मजस्येंद्रस्यभूषणंसु।
विहितंवेधसेतिशेषः तथाचात्रैवोक्तं पुरंदरार्थंतपसाप्रयत्नतः स्वयंकृतंयद्विधिनास्वयंभुवे
ति कीदृशंमुकुटंवैनिश्चितंप्रसिद्धंवा गोभासृगोपूरि गोभीरश्मिभिःशा[illegible]ते रश्मिमालीतिकथ्यत
इतिसूर्यः तस्येवभुवनगर्भव्यापिनोगावःकिरणाःतैःभवनंपूरयितुंशीलमस्यतत्तथा सूर्यस
मप्रभमित्यर्थः ननुचेतनाधिष्ठितोबाणःपुनरेत्यार्जुनंकुतोनहतवानित्यतआह गोकर्णास
नमर्दनस्यननयथावशाप्यमत्यार्वेशामिति गोकर्णसर्पपुनरर्जुनंहंतुंदृष्टंतंप्रसेनेनबाणतेप
णामर्दयतियः सतथाभूतोअर्जुनस्यतमेवसर्पमनवाप्यमत्यार्वेशानयथोसर्पस्यपुनरागम
नेवपश्चात्रैवकीर्त्यते ५॰ ॥ २२ ॥

१८८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५० कर्णेनवाक्यंउक्तःसन्नतद्वाक्यमसहन्नसहमानः स्वयंप्रायादित्यन्नरेणान्वयः ५१ ५२ ॥
ससायकःकर्णभुजप्रसृष्टोद्भूतप्रभार्कप्रतिमोमहार्हः महोरगःकृतवैरोर्जुनेन किरीटमाहृत्यत
तोव्यतीयात् तेचापिदग्धात्तपनीयचित्रंकिरीटमाकृष्यतदर्जुनस्य ५१ इयेषगंतुंपुनरेवतूर्णमदृष्ट
श्चकर्णेनततोब्रवीत्तं मुक्तस्त्वयाहंत्वसमीक्ष्यकर्णशिरोहृतंयन्नमयार्जुनस्य ५२ समीक्ष्यमांमुं।
चरणेत्वमास्महेतास्मिशत्रुंतवचात्मनश्च सएवमुक्तोयुधिसूतपुत्रस्तमब्रवीत्कोभवानुग्ररूपः
५३ नागोब्रवीत्विद्धिकृतागसंमांपार्थेनमातुर्वधजातवैरं यदिस्वयंवज्रधरोस्यगोप्तातथापिया
तापितृराजवेश्मनि ५४ कर्णउवाच ननागकर्णोद्यरणेपरस्यबलंसमास्थायजयंवुभूषेत्
नसंदध्यांद्विःशरंचैवनागयद्यर्जुनानांशतमेवहन्यां ५५ तमाहकर्णःपुनरेवनागंतदाजिम
ध्येरविसूनुसत्तमः व्यालास्त्रसर्गोत्तमयत्नमन्युभिर्हंतास्मिपार्थंसुसुखीव्रजत्वं ५६ इत्येव
मुक्तोयुधिनागराजःकर्णेनरोषादसहंस्तस्यवाक्यं स्वयंप्रायात्पार्थवधायराजन्कृत्वास्वरूपं
विजिघांसुरुग्रः ५१ ततःकृष्णःपार्थमुवाचसंख्येमहोरगंकृतवैरंजहित्वं सएवमुक्तोमधुसूद
नेनगांडीवधन्वारिपुवीर्यसाहः उवाचकोह्येषममाद्यनागःस्वयंयआयाद्गरुडस्यवक्त्रं ५२ कृष्ण
उवाच योसौत्वयाखांडवेचित्रभानुंसंतर्पयानेनधनुर्धरेण ५३ ॥

क॰टी॰ महोल्कामिति पाठः ईवेत्यथाहत्य योऽजं ५५ गते गमिते विभुः समर्थः बर्हिणां बर्हाण्येव वाजाः पक्षाः सेजा
१८

विषक्तो जननीगुप्तदेहो मत्वैकरूपं निहतास्य माता सूर्यषत्रेहं मनुस्मरन्वै तां प्रार्थयत्यात्मव
धायनूनं ५४ नभस्युतो प्रज्वलितामिवोल्कां पश्यैनमायांतममित्रसा॑ संजय उवाच ततः सजिष्णुः
परिवृत्य रोषाच्चिच्छेद षड्भिर्निशितैः सुधारैः ५५ नागं विषत्तिर्यगिवोत्पतंतं स छिन्नगात्रो निपपात
भूमौ गते च तस्मिन्भुजगे किरीटिनास्वयं विभुः पार्थिव भूतलाद्य ५६ समुज्जहाराशु पुनः पतं
तेरथं भुजाभ्यां पुरुषोत्तमस्ततः तस्मिन्मुहूर्ते दशभिः पृषत्कैः शिलाशितैर्बर्हिणबर्हवाजितैः ५७
विव्याध कर्णः पुरुषप्रवीरो धनंजयं तिर्यगवेक्षमाणः ततोर्जुनो द्वादशभिः सुमुक्तैर्वराहकर्णैर्नि
शितैः समर्प्य ५८ नाराचमाशीविषतुल्यवेगमाकर्णपूर्णायतमुत्ससर्ज सचित्रवर्मेषुवरो विदा
र्यप्राणान्निरस्यन्निव साधुमुक्तः ५९ कर्णस्य पीत्वा रुधिरं विवेश पावसुंधरां शोणितदिग्धवाजः ततो
वृषो बाणनिपातकोपितो महोरगो दंडविघट्टितो यथा ६० तथाशुकारी व्यसृजच्छरोत्तमान्महावि
षः सर्प इवोत्तमं विषं जनार्दनं द्वादशभिः पराभिनन्नवैर्नवत्या च शरैस्तथार्जुनं ६१ शरेण चोरेण
पुनश्च पांडवं विदार्य कर्णो व्यनदज्जहास च तमस्य हृष्टममृष्यन्पांडवो बिभेद मर्माणि ततो स समर्
वित् ६२ ॥

ताचेषांतैर्बर्हिणबर्हवाजितैः ५७ ५८ ५९ ६० ६१ ६२ ॥ १८

९९ अग्निजः कौशिकेयः ७० ईषिवान् मनसि कृतवान् ११ १२ १३ १४ १५ ॥

परः शातैः पत्रिभिर्विद्धविक्रमस्तथाप्यथेंद्रो बलमोजसावृणोत् ततः शराणां नवतिं तदार्जुनः ससर्ज कर्णे
न कदंडसंनिभां ९३ तैः पत्रिभिर्विद्धतनुः सविव्यथे तथापप्यथा वज्रविदारितो बलः मणिप्रवेकोत्तम
वज्रहाटकैरलंकृतं चास्य वरांगभूषणं ९४ प्रविद्धमुर्व्यां निपपात पत्रिभिर्धनंजयेनोत्तमकुंडलेपि
च महाधनं शिल्पिवरैः प्रयत्नतः कृतं यदस्योत्तमवर्मभास्वरं ९५ सुदीर्घकालेन ततोस्य पांडवः क्ष
णेन बाणैर्बहुधा व्यशातयत् स तं विवर्माणमथोत्तमेषुभिः शितैश्चतुर्भिः कुपितः पराभिनत् ९६
स विव्यथेत्यर्थमरिप्रताडितो यथातुरः पित्तकफानिलज्वरैः महाधनुर्मंडलनिःसृतैः शितैः क्रिया
प्रयत्नप्रहितैर्बलेन च ९७ ततक्ष कर्णं बहुभिः शरोत्तमैर्बिभेद मर्मस्वपि चार्जुनस्त्वरन् दृढाहतः पत्रि
भिरुग्रवेगैः पार्थेन कर्णो विविधैः शिताग्रैः ९८ बभौ गिरिर्गैरिकधातुरक्तः क्षरन्प्रपातैरिव रक्तमंभः
ततोर्जुनः कर्णमवक्रगैर्नवैः सुवर्णपुंखैः सुदृढैरयस्मयैः ९९ यमाग्निदंडप्रतिमैः स्तनांतरे पराभिनत्
क्रौंचमिवाद्रिमग्निजः ततः शरावापमपास्य सूतजो धनुश्च तच्छक्रशरासनोपमं ११ ततो रथस्थः स
मुमोह च स्खलन् प्रशीर्णमुष्टिः सुभृशाहतः प्रभो नवार्जुनस्तं व्यसने तदेषिवान्निहंतुमार्यः पुरुषव्रते स्थि
तः १२ ततस्तमिंद्रावरजः ससंभ्रमादुवाच किं पांडव हे प्रमाद्यसे नैवाहितानां समनंतविपश्चितः तां प्रतीक्षंत्यपि
दुर्बलीयसां १३ विशेषतो रोगव्यसनेषु पंडितो निहत्य धर्मं च यशश्च विंदते तदेकवीरं त्वमवाहितं सदा त्वरस्व कर्णं
सहसाभिमर्दितुं १४ पुरा समर्थः समुपैति सूतजो विध्यत्वमेनं नमुचिं यथा हरिः ततस्तदेवेत्यभिपूज्य सत्वरं जनार्दं

क॰टी॰ १८१

८१ कालइति हेनपकर्णवधंग्रमिलसेतिशोषः ब्रुवाणःवक्रा ८२ ८३ वामंचक्रंग्रसति न्रवीरेत्यत्रातिसौनेती
शसोन्नमैः सर्वकुरूत्तमस्त्वरन्नतथायथाशंबरहापुराबलिं साश्वंतुकर्णंसरथंकिरीटीसमाचिनोद्बाण
नतैर्नतवक्रैः ७९ प्रच्छादयामासदिशश्चबाणैः सर्वप्रयत्नात्तपनीयपुंखैः सवत्सदंतैः पृथुपीनवक्षाः स
माचितःसोधिरथिर्विभाति ७७ सुपुष्पिताशोकपलाशशाल्मलिर्यथाचलश्चंदनकाननायुतः शरैः
शरीरेबहुभिःसमर्पितैर्विभातिकर्णःसमरेविशांपते ७८ महीरुहैराचितसानुकंदरोयथागिरींद्रः
स्फुटकर्णिकारवान् सबाणसंघान्बहुधाव्यवासृजन्विभातिकर्णःशरजालरश्मिवान् ७९ सलो
हितोरक्तगभस्तिमंडलोदिवाकरोस्ताभिमुखोयथातथा बाहंतराताधिरथेर्विमुक्तान्बाणान्महा
हीनिवदीप्यमानान् ८० विध्वंसयन्नर्जुनबाहुमुक्ताःशराःसमासाद्यदिशःशितायाः ततःसकर्णः
समवाप्यधैर्यंबाणान्विमुंचन्कुपिताहिकल्पान् ८१ विव्याधपार्थंदशभिःपृषत्कैःकृष्णंचषड्भि
र्कुपिताहिकल्पैः ततःकिरीटीभृशमुग्रनिस्वनंमहाशरंसर्पविषानलोपमं ८२ अयस्मयंरौ
द्रमहास्त्रसंहृतंमहाहवेक्षेप्तुमनामहामतिः कालोह्यदृश्योनृपविप्रकोपान्निदर्शयन्कर्ण
वधंब्रुवाणः ८३ भूमिस्तुचक्रंग्रसतीत्यवोचत्कर्णस्यतस्मिन्वधकालआगते ततस्तदस्त्रंमन
सःप्रनष्टंयद्भार्गवोस्मैप्रददौमहात्मा ८४ चक्रंचवामंग्रसद्भूमिरस्यप्राप्तेतस्मिन्वधकालेनृवी
र ततोरथोघूर्णितवान्नरेंद्रशापात्तदाब्राह्मणसत्तमस्य ८५ ॥
तिष्ठेयसमेप्रतिचनरुनिगीर्णमहमतीत्यर्थः ८५ ॥ ॥ १८१

वैत्स्यः सवेदिको ग्रामस्तचको महाद्रुमः ८५ ९१ अभ्युपमर्दयन् गांडीवमित्रतनरान्वपि ९२ ॥ ९६

ततश्चक्रमपतत्तस्य भूमौ स विह्वलः समरे सूतपुत्रः सवेदिकश्चैत्य इवातिमात्रः सुपुष्पितो भूमितले
निमग्नः घूर्णे रथे ब्राह्मणस्याभिशापाद्रामादुपात्ते त्वविभाति चास्त्रे ८५ छिन्ने शरे सर्पमुखे च घोरे
पार्थेन तस्मिन्विषसाद कर्णः अमृष्यमाणो व्यसनानि तानि हस्तौ विधुन्वन्स विगर्हमाणः ८६ धर्मप्र
धानं किल पाति धर्म इत्यब्रुवन् धर्मविदः सदैव वयं च धर्मे प्रयताम नित्यं यथाबलं शक्तियया श्रुते
च ८७ स चापि निघ्नाति न पाति भक्तान्मन्ये न नित्यं परिपाति धर्मः एवं ब्रुवन्प्रस्खलिताश्वसूतो वि
चाल्यमानोऽर्जुनबाणपातैः ८८ मर्माभिघाताच्छिथिलः क्रियासु पुनः पुनर्धर्ममसौ जगर्ह ततः शरैर्भी
मतरैरविध्यत्त्रिभिराहवे हस्ते कृष्णं तथा पार्थमभ्यविध्यच्च सप्तभिः ८९ ततोऽर्जुनः सप्तदश तिग्मवेगा
नजिह्मगानिंद्राशनिसमानघोरान् ससर्ज तस्यावकोपमान् ९० निर्भिद्य ते भीमवेगा ह्यपतन्पृथिवीत
ले कंपितात्मा ततः कर्णः शक्त्या चेष्टामदर्शयत् ९१ बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदैरयत् ऐंद्रं त
तोऽर्जुनश्चापि तं दृष्ट्वाभ्युपमंत्रयत् ९२ गांडीवं ज्यां च बाणांश्च सोऽनुमंत्र्य परंतपः असृजच्छरवर्षाणिव
र्षाणीव पुरंदरः ९३ ततस्तेजोमया बाणा रथात्पार्थस्य निःसृताः प्रादुरासन्महावीर्याः कर्णस्य रथमं
तिकात् ९४ तान्कर्णस्त्वग्रतो न्यस्तान्मोघांश्चक्रे महारथः ततोऽब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रे विनाशिते
९५ विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान् ततो ब्रह्मास्त्रमत्युग्रं संमंत्र्य समयोजयत् ९६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टि॰
१८२

प्रत्यस्तप्रतिपादितपत् ९७ ९८ १०२ अभ्यसेत्पुनः पुनः अग्रसंग्रातिष्ठेरयेत्यब्रवीदितियोजना ॥

छादयित्वाततोबाणैः कर्णंप्रत्यसदर्जुनः ततः कर्णः शितैर्बाणैरर्जुनंविच्छेदसप्तभिः ९७ द्वितीयंचतृ
तीयंचचतुर्थींपंचमींतथा षष्ठीमथास्यविच्छेदसप्तमींचतथाष्टमीं ९८ नवमींदशमींचास्यतथावैका
दशींनृप ज्याशतंशतसंधानः सकर्णोनावबुध्यते ९९ ततोज्यांविनिधायान्यामभिमंत्र्यचपांडवः शरै
रवाकिरत्कर्णंदीप्यमानैरिवाहिभिः १०० तस्यज्याछेदनंकर्णोज्यावधानंचसंयुगे नान्वबुध्यतशीघ्रत्वा
त्तदद्भुतमिवाभवत् १ अस्त्रैरस्त्राणिसंवार्यप्रत्यघ्नत्सव्यसाचिनः चक्रेचाप्यधिकंपार्थात्स्ववीर्यमतिद
र्शयन् १०२ ततः कृष्णोर्जुनंदृष्ट्वाकर्णास्त्रेणचपीडितं अभ्यसेत्यब्रवीत्पार्थमातिष्ठास्त्रंव्रजेतिच ३ ततो
ग्निसदृशंघोरंशरंसर्पविषोपमं अश्मसारमयंदिव्यमभिमंत्र्यपरंतपः ४ रौद्रमस्त्रंसमाधायक्षेप्तुकामः
किरीटवान् ततोग्रसन्महीचक्रंराधेयस्यतदानृप ५ ततोवतीर्यराधेयोरथादाशुसमुद्यतः चक्रंभुजा
भ्यामालंब्यसमुत्क्षेप्तुमियेषसः ६ सप्तद्वीपावसुमतीसशैलवनकानना गीर्णचक्रासमुत्क्षिप्ताकर्णे
नचतुरंगुलं ७ ग्रस्तचक्रस्तुराधेयः क्रोधादश्रूण्यवर्तयत् अर्जुनंवीक्ष्यसंरब्धमिदंवचनमब्रवीत्
१०८ भोभोपार्थमहेष्वासमुहूर्तंपरिपालय यावच्चक्रमिदंग्रस्तमुद्धरा
मिमहीतलात् १०९ ॥ ३३ ॥

१८२

मध्यचक्रंमहीग्रस्तंदृष्ट्वादैवादिदंमम पार्थकापुरुषाचीर्णमभिसंधिंविसर्जय १० नत्वंकापुरुषाचीर्णमा
र्गमास्थातुमर्हसि ख्यातस्त्वमसिकौंतेयविशिष्टोरणकर्मसु ११ विशिष्टतरमेवत्वंकर्तुमर्हसिपांडव
प्रकीर्णकेशेविमुखेब्राह्मणेथकृतांजलौ १२ शरणागतेन्यस्तशस्त्रेयाचमानेतथार्जुन अबाणेभ्रष्ट
कवचेभ्रष्टभग्नायुधेतथा १३ नविमुंचंतिशस्त्राणिशूराःसाधुव्रतेस्थिताः त्वंचशूरतमोलोकेसाधुवृ
त्तश्चपांडव १४ अभिज्ञोयुद्धधर्माणांवेदांतावभृथाप्लुतः दिव्यास्त्रविदमेयात्माकार्तवीर्यसमोयुधि १५
यावच्चक्रमिदंग्रस्तमुद्धरामिमहाभुज नमांरथस्थोभूमिष्ठंविकलंहंतुमर्हसि १६ नवासुदेवात्त्वत्तो
वापांडवेयबिभेम्यहं त्वंहिक्षत्रियदायादोमहाकुलविवर्धनः १७ अतस्त्वांप्रब्रवीम्येषमुहूर्तंक्षमपां
डव १८ इतिश्रीमहाभारतेकर्णपर्वणिरथचक्रग्रसने ४९८३ संजयउवाच तमब्रवीद्वासुदेवोरथ
स्थंराधेयदिष्ट्यास्मरसीहधर्मं प्रायेणनीचाव्यसनेषुमग्नानिंदंतिदैवंकुकृतंनतत्स्वं १ यद्द्रौपदीमे
कवस्त्रांसभायामानाययेस्त्वंचसुयोधनश्च दुःशासनःशकुनिःसौबलश्चनतेकर्णप्रत्यभात्तत्रधर्मः २
यदासभायांराजानमनक्षज्ञंयुधिष्ठिरं अजैषीच्छकुनिर्ज्ञानात्क्वतेधर्मस्तदागतः ३ वनवासेव्यतीतेच
कर्णवर्षेत्रयोदशे नप्रयच्छसियद्राज्यंक्वतेधर्मस्तदागतः ४ यद्भीमसेनंसर्पैश्चविषयुक्तैश्चभोजनैः आ
चरस्त्वन्मतेराजाक्वतेधर्मस्तदागतः ५ यद्वारणावतेपार्थान्सुप्तान्जतुगृहेतदा आदीपयस्त्वंराधेय
क्वतेधर्मस्तदागतः ६ यदारजस्वलांकृष्णांदुःशासनवशेस्थितां सभायांप्राहसःकर्णक्वतेधर्मस्तदा
गतः ७ यदानार्यैःपुराकृष्णांक्लिश्यमानामनागसं उपप्रेक्षसिराधेयक्वतेधर्मस्तदागतः ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰ विनष्टाः पांडवाः कृष्णे शाश्वतं नरकं गताः पतिमन्यं वृणीष्वेति वदंस्त्वं गजगामिनीं ९ उपप्रेक्षसि राधेय क्व ते
१८२ धर्मस्तदागतः राज्यलुब्धः पुनः कर्ण समाह्वयसि पांडवान् १० यदा शकुनिमाश्रित्य क्व ते धर्मस्तदागतः य
दाभिमन्युं बहवो युद्धे जघ्नुर्महारथाः ११ परिवार्य रणे बालं क्व ते धर्मस्तदागतः यद्येष धर्मस्तत्र न विद्यते
हि किं सर्वथा तालुविशोषणेन १२ अद्येह धर्म्याणि विधत्स्व सूत तथापि जीवन्न विमोक्ष्यसे हि नलो ह्यक्षै
र्निर्जितः पुष्करेण पुनर्यशो राज्यमवाप वीर्यात् १३ प्राप्तास्तथा पांडवा बाहुवीर्यात्सर्वैः समेताः परिवृत्तलो
भाः निहत्य शत्रून्समरे प्रवृद्धान्ससोमका राज्यमवाप्नुयुस्ते १४ तथा गता धार्त्तराष्ट्रा विनाशं धर्माभि
गुप्तैः सततं नरसिंहैः संजय उवाच एवमुक्तस्तदा कर्णो वासुदेवेन भारत १५ लज्जयावनतो भूत्वा नोत्त
रं किंचिदुक्तवान् क्रोधात्प्रस्फुरमाणोष्ठो धनुरुद्यम्य भारत १६ योधयामास वै पार्थं महावेगपराक्रमः त
तोब्रवीद्वासुदेवः फाल्गुनं पुरुषर्षभं १७ दिव्यास्त्रेणैव निर्भिद्य पातयस्व महाबल एवमुक्तस्तु देवेन क्रो
धमागात्तदार्जुनः १८ मन्युमभ्याविशद्घोरं स्मृत्वा तत्र धनंजयः तस्य क्रुद्धस्य सर्वेभ्यः स्रोतोभ्यस्तेजसो
र्चिषः १९ प्रादुरासंस्तदा राजंस्तदद्भुतमिवाभवत् तत्समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनंजयं २० अभ्यव
र्षत्पुनर्यत्नमकरोद्रथमज्जने ब्रह्मास्त्रेणैव तं पार्थो ववर्ष शरवृष्टिभिः तदस्त्रमस्त्रेणावार्य प्रजहार च
पांडवः ततोन्यदस्त्रं कौंतेयो दयितं जातवेदसः २२ मुमोच कर्णमुद्दिश्य तत्प्रजज्वाल तेजसा वारुणे
न ततः कर्णः शमयामास पावकं २३ जीमूतैश्च दिशः सर्वाश्चक्रे तिमिरदुर्द्दिनाः पांडवेयस्त्वसंभ्रांतो वाय
व्यास्त्रेण वीर्यवान् २४ अपोवाह तदाभ्राणि राधेयस्य प्रपश्यतः ततः शरं महाघोरं ज्वलंतमिव पावकं २५ १८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आददे पांडुपुत्रस्य सूतपुत्रो जिघांसया योज्यमाने ततस्तस्मिन्बाणे धनुषि पूजिते ४७ चचाल पृथिवी राज
सशैलवनकानना ववौ सशर्करो वायुर्दिशश्च रजसा वृताः हाहाकारश्च संजज्ञे सुराणां दिवि भारत तमि
षुं संधितं दृष्ट्वा सूतपुत्रेण मारिष ४८ विषादं परमं जग्मुः पांडवा दीनचेतसः स सायकः कर्णभुजप्रमुक्तः
शक्राशनिप्रख्यरुचिः शिताग्रः ४९ भुजांतरं प्राप्य धनंजयस्य विवेश वल्मीकमिवोरगोत्तमः स गाढविद्धः
समरे महात्मा विघूर्णमानः श्लथहस्तगांडिवः ५० चचाल बीभत्सुरमित्रमर्दनः क्षितेः प्रकंपे च यथाचलो
त्तमः तदंतरं प्राप्य वृषो महारथो रथांगमुर्वीगतमुज्जिहीर्षुः ५१ रथादवप्लुत्य निगृह्य दोर्भ्यां शशाक दैवान्न
महाबलोपि ततः किरीटी प्रतिलभ्य संज्ञां जग्राह बाणं यमदंडकल्पं ५२ ततोर्जुनः प्रांजलिकं महात्मा ततो
ब्रवीद्वासुदेवोपि पार्थं छिंध्यस्य मूर्धानमरेः शरेण न यावदारोहति वै रथं वृषः ५३ तथैव संपूज्य स तद्वचः
प्रभोस्ततः शरं प्रज्वलितं प्रगृह्य जघान कक्षाममलार्कवर्णां महाचक्रे रथचक्रे विमर्दे ५४ तं हस्तिकक्षाप्र
वरं च केतुं सुवर्णमुक्तामणिवज्रपृष्ठं ज्ञानप्रकर्षोत्तमशिल्पियुक्तैः कृतं सुरूपं तपनीयचित्रं ५५ जयास्पदं
तव सैन्यस्य नित्यममित्रवित्रासनमीड्यरूपं विख्यातमादित्यसमस्य लोके त्विषा समं पावकभानुचंद्रैः ५६ ततः
क्षुरप्रेण सुसंशितेन सुवर्णपुंखेन हुताग्निवर्चसा श्रिया ज्वलंतं ध्वजमुन्ममाथ महारथस्याधिरथेः किरीटी ५७
यशश्च दर्पश्च तथा प्रियाणि सर्वाणि कार्याणि च तेन केतुना साकं कुरूणां हृदयानि चापतन् बभूव हाहेति च निः
स्वनो महान् ५८ दृष्ट्वा ध्वजं पातितमाशुकारिणा कुरुप्रवीरेण निकृत्तमाहवे नाशंसिरे सूतपुत्रस्य सर्वे जयं तदा भा
रत येत्वदीयाः ५९ अथ त्वरन् कर्णवधाय पार्थो महेंद्रवज्रानलदंडसंनिभं आददत्पार्थोंजलिकं निषंगात्सहस्र

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.पी. रौमेविकं भिमृत्युमं ४० मर्मछिदं शोणितमांसदिग्धं वैश्वानरार्कप्रतिमंमहार्हं नराश्वनागासुहरं त्र्यरत्निं
२८४ षड्वाजमंजोगतिमुग्रवेगं ४१ सहस्रनेत्राशनितुल्यवीर्यं कालानलं व्यात्तमिवातिघोरं पिनाकनारायण
चक्रसंनिभं भयंकरं प्राणभृतां विनाशनं ४२ जग्राह पार्थः सशरं प्रहृष्टो यो देवसंघैरपि दुर्निवार्यः संपूजि
तोयः सततं महात्मा देवासुरान्यो विजयेन्महेषुः ४२ तं वै प्रमृष्टं प्रसमीक्ष्य युद्धे चचाल सर्वं सचराचरं ज
गत् स्वस्ति जगतस्त्वृषयः प्रचुक्रुशुस्तमुद्यतं प्रेक्ष्य महाहवेषु ४३ ततस्तु तं वै शरमप्रमेयं गांडीवधन्वा
धनुषि व्ययोजयत् युक्त्वा महास्त्रेण परेण चापं विकृष्य गांडीवमुवाच सत्वरं ४४ अयं महास्त्रः प्रहितो म
हाशरः शरीरहृच्चासुहरश्च दुर्हृदः तपोस्ति तप्तं गुरवश्च तोषिता मया यदीष्टं सुहृदां श्रुतं तथा ४५ अनेन
सत्येन निहंत्वयं शरः सुसंहितः कर्णमरिं ममौजसा इत्यूचिवांस्तं प्रमुमोच बाणं धनंजयः कर्णवधाय
घोरं ४६ कृत्यामथर्वांगिरसीमिवोग्रां दीप्तामसह्यां युधि मृत्युनापि ब्रुवन्किरीटी तमतिप्रहृष्टो ह्ययं शरो
मे विजयावहोस्तु ४७ जिघांसुरर्केंदुसमप्रभावः कर्णं मयास्तो नयतां यमाय तेनेषुवर्येण किरीटमा
ली प्रहृष्टरूपो विजयावहेन ४८ जिघांसुरर्केंदुसमप्रभेण चक्रे विषक्तं रिपुमाततायी तथा विमुक्तो
बलिनार्कतेजाः प्रज्वालयामास दिशो नभश्च ४९ ततोर्जुनस्तस्य शिरो जहार वृत्रस्य वज्रेण यथा महें
द्रः शरोत्तमेनांजलिकेन राजन्तदा महास्त्रप्रतिमंत्रितेन पार्थोपराह्णे शिर उच्चकर्त वैकर्तनस्याथ
महेंद्रसूनुः ५० तस्यापतच्चांजलिकेन छिन्नमथास्य कायो निपपात पश्चात् तदुद्यतादित्यसमान
तेजः शरन्नभोमध्यगभास्करोपमं ५१ वरांगमुर्व्यामपतच्चमूमुखे दिवाकरोस्तादिव रक्तमंडलः १८४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अपराह्णेदिवसस्यपश्चिमेभागेअपरंचरमंअहःमरणदिनंयस्य ५३ ॥

ततोस्यदेहंसततंसुखोचितंसरूपमत्यर्थमुदारकर्मणः ५२ परेणकृच्छ्रेणशिरःसमत्यजद्गृहंमहर्द्धीवस
संगमीश्वरः शरैर्विभिन्नंव्यसुतत्सुवर्चसः पपातकर्णस्यशरीरमुच्छ्रितं ५३ स्रवद्व्रणंगैरिकतोयविस्र
वंगिरेर्यथावज्रहतंमहाशिरः देहाच्चकर्णस्यनिपातितस्यतेजःसूर्यंखंवितत्याविवेश ५४ तदद्भुतंस
र्वमनुष्ययोधाःसंदृष्टवंतोनिहतेस्मकर्णे ततःशंखान्पांडवादध्मुरुच्चैर्दृष्ट्वाकर्णंपातितंफाल्गुनेन
५५ तथैवकृष्णश्चधनंजयश्चहृष्टौयमौदध्मतुर्वारिजातौ तंसोमकाःप्रेक्ष्यहतंशयानंसैन्यैःसार्द्धंसिं
हनादान्प्रचक्रुः ५६ तूर्याणिसंजघ्नुरतीवहृष्टावासांसिचैवादुधुवुर्भुजांश्च संवर्द्धयंतश्चनरेंद्रयोधाः
पार्थंसमाजग्मुरतीवहृष्टाः ५७ बलान्वितास्त्वापरेह्यनृत्यंस्त्वन्योन्यमाश्लिष्यनदंतऊचुः दृष्ट्वातक
र्णंभुविवाविपन्नंकृत्तंरथात्सायकैरर्जुनस्य ५८ महानिलेनाद्रिमिवापविद्धंयज्ञावसानेग्निमिव
प्रशांतं रराजकर्णस्यशिरोनिकृत्तमस्तंगतंभास्करस्येवबिंबं ५९ प्रताप्यसेनांसततंपांडवींश
रांशुभिर्भास्करतुल्यदीधितिः किरीटिकालेनहतोकर्णभास्करोप्यनीयतास्तंदिवसावसाने ६०
शरैराचितसर्वांगःशोणितौघपरिप्लुतः विभातिदेहःकर्णस्यस्वरश्मिभिरिवांशुमान् ६१ प्रताप्य
सेनामामित्रींदीप्तैःशरगभस्तिभिः बलिनार्जुनकालेननीतोस्तंकर्णभास्करः ६२ अस्तंगच्छन्
यथादित्यःप्रभामादायगच्छति तथाजीवितमादायकर्णस्येषुर्जगामसः ६३ ॥ ३५

९२ अपायाच्छल्यः रथेनगतचक्रेणहेतनापरान्गोपदचारिणि १ २ ३ महेष्वासार्जुनाद्यः वि
अपवाह्यापराह्णस्यसूतपुत्रस्यमारिष ९३ छिन्नमंजलिकेनाजौसोत्सेधमपतच्छिरः उपर्युपरिसैन्या
नामस्यशत्रोस्तदंजसा शिरः कर्णस्यसोत्सेधमिषुः सोप्यहरद्द्रुतं ९४ कर्णंतुशूरंपतितंपृथिव्यांश
राचितंशोणितदिग्धगात्रं दृष्ट्वाशयानंभुविमद्रराजः छिन्नध्वजेनाथययौरथेन ९५ हतेकर्णेकु
रवः प्राद्रवंतभयार्दितागाढविद्धाश्चसंख्ये अवेक्षमाणामुहुरर्जुनस्यध्वजंमहांतंवपुषाज्वलंतं
९६ सहस्रनेत्रप्रतिमानकर्मणःसहस्रनेत्रप्रतिमाननंशुभं सहस्ररश्मिर्दिनसंक्षयेयथातथा
पतत्कर्णशिरोवसुंधरां ९७ इतिश्रीमहाभारतेकर्णपर्वणिकर्णवधःसमाप्तः ५०५ संजयउवा
च शल्यस्तुकर्णेनिहतेकिरीटिनाद्रवत्सुबलेषुसमीक्ष्यार्तरूपं ययौहतेवाधिरथौपदानुगेरथे
नसंछिन्नपरिच्छदेन १ शल्यस्तुकर्णार्जुनयोर्विमर्दंबलानिदृष्ट्वामृदितानिबाणैः ययोपरीतो
ऽश्वामस्तुनासोरथेनसंछिन्नपरिच्छदेन २ निपातितस्यंदनवाजिनागंबलंचदृष्ट्वाहतसूतपुत्रं
दुर्योधनोऽश्रुपरिपूर्णनेत्रोदीनोमुहुर्निश्वसंश्चार्तरूपः ३ कर्णंतुशूरंपतितंपृथिव्यांशराचितंशो
णितदिग्धगात्रं यदृच्छयासूर्यमिवावनिस्थंदिदृक्षवःसंपरिवार्यतस्थुः ४ ॥
त्रस्ताभीरवःविषण्णाःशात्रवःविस्मिताःप्रेक्षकाः ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रहृष्टवित्रस्तविषण्णविस्मितास्त्वयेतेशोकहतास्त्वभवन् पेत्वदीयाश्च परस्परेण यथायथैषांप्रकृतिस्तथा
भवन् ५ प्रविद्धवर्म्माभरणांबरायुधंधनंजयेनाभिहतंमहौजसं निशाम्यकर्णंकुरवःप्रदुद्रुवुर्हतर्षभागा
वइवाजनेवने ६ भीमश्चभीमेनतदास्वनेननादंकृत्वारोदसीकंपयानः आस्फोटयन्वल्गतेनृत्यतेचहते
कर्णेत्रासयन्धार्त्तराष्ट्रान् ६ तथैवराजन्सोमकाःसृंजयाश्चशंखान्दध्मुःसस्वजुश्चापिसर्वे परस्परं
त्क्षत्रियाहृष्टरूपाःसूतात्मजेवैनिहतेतदानीं ७ कृत्वाविमर्दंमहदर्जुनेनकर्णोहतःकेसरिणेवनागः
तीर्णप्रतिज्ञापुरुषर्षभेणवैरस्यांतंगतवांश्चापिपार्थः ८ मद्राधिपश्चापिविमूढचेतास्तूर्णंरथेनाप
कृतध्वजेन दुर्योधनस्यांतिकमेत्यराजन्सबाष्पदुःखाद्वचनंबभाषे ९ विशीर्णनागाश्वरथप्रवीरंबलं
त्वदीयंयमराष्ट्रकल्पं अन्योन्यमासाद्यहतंमहद्भिर्नराश्वनागैर्गिरिकूटकल्पैः १० नैतादृशंभारतयुद्धमा
सीद्यथात्वकर्णार्जुनयोर्बभूव ग्रस्तौहिकर्णेनसमेत्यकृष्णावन्येचसर्वेतवशत्रवोये ११ दैवंप्रवृत्तंपार्थ
वशात्प्रवृत्तंयत्पांडवान्पातिहिनस्तिचास्मान् १२ तवार्थसिद्ध्यर्थकराश्चसर्वेप्रसह्यवीरानिहताद्विषद्भिः
कुबेरवैवस्वतवासवानांतुल्यप्रभावान्नृपतेस्तुवीराः १३ वीर्येणशौर्येणबलेनतेजसातैस्तैश्चयुक्ताविवि
धैर्गुणौघैः अवध्यकल्पानिहतानरेंद्रास्तवार्थकामायुधिपांडवेयैः १४ तन्मासुचोभारतदिष्टमेतत्पर्या
श्वसत्वंनसदास्तिसिद्धिः एतद्वचोमद्रपतेर्निशम्यस्वंचापनीतंमनसानिरीक्ष्य १५ दुर्योधनोदीनमनाववि
संज्ञः पुनःपुनर्न्यश्वसदार्त्तरूपः १६ इतिश्रीमहाभारतेकर्णपर्वणि ४२८ धृतराष्ट्रउवाच तस्मिंस्तु
कर्णार्जुनयोर्विमर्देदग्धस्यरौद्रेहनिविद्रुतस्य बभूवरूपंकुरुसृंजयानांबलस्यबाणोन्मथितस्यकीदृक्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टि॰ संजयउवाच शृणुराजन्नवहितोयथावृत्तोमहान्क्षयः घोरोमनुष्यदेहानामाजौनरवरक्षयः २ यत्तत्क
१९९ र्णेहतेपार्थःसिंहनादमथाकरोत् तदातवसुतान्राजन्नाविवेशमहद्भयं ३ अपारेपारमिच्छंतोहते
द्वीपेकिरीटिना सूतपुत्रेहतेराजन्वित्रस्ताःशस्त्रविक्षताः ४ अनाथानाथमिच्छंतोमृगाःसिंहैरिवार्दि
ताः भग्नशृंगावृषायद्वद्भग्नदंष्ट्राइवोरगाः ५ प्रत्यपायामसायाह्नेनिर्जिताःसव्यसाचिना हतप्रवीरावि
ध्वस्तानिकृत्तानिशितैःशरैः ६ सूतपुत्रेहतेराजन्पुत्रास्तेदुद्रुवुर्भयात् विस्रस्तयंत्रकवचाःकांदि
ग्भूताविचेतसः ७ अन्योन्यमवमर्दंतोवीक्षमाणाभयार्दिताः मामेवनूनंबीभत्सुर्मामेववृकोद
रः ८ अभियातीतिमन्वानाःपेतुर्मृत्युश्चसंभ्रमात् हयानन्येगजानन्येरथानन्येमहारथाः ९ आरु
ह्यजवसंपन्नाःपदातीन्प्रजहुर्भयात् कुंजरैःस्यंदनाःक्षुण्णाःसादिनश्चमहारथैः १० पदातिसंघाश्चा
श्वौघैःपलायद्भिर्भयार्दितैः व्यालतस्करसंकीर्णेसार्थहीनायथावने ११ सूतपुत्रेहतेराजंस्तवयोधा
स्तथाभवन् हतारोहायथानागाःछिन्नहस्तायथानराः १२ सर्वपार्थमयंलोकंसंपश्यंतोभयार्दि
ताः तान्दृष्ट्वाविद्रुतान्सर्वान्योधांस्तत्रसहस्रशः दुर्योधनोथस्वंसूतंहाहाकृत्वेदमब्रवीत् नातिक्र
मेतमांपार्थोधनुःपाणिमवस्थितं जघनेसर्वसैन्यानांशनैरश्वान्प्रचोदय युध्यमानंहिकौंतेयं
हनिष्यामिनसंशयः नोत्सहेन्मामतिक्रांतंवेलामिवमहोदधिः १६ अद्यार्जुनंसगोविंदमानिनं
चवृकोदरं हत्वाशिष्टांस्तथाशत्रून्कर्णस्यानृण्यमाप्नुयां १७ तच्छ्रुत्वाकुरुराजस्यसूतार्यसदृ
शंवचः सतोहेमपरिच्छन्नान्शनैरश्वानचोदयत् १८ रथाश्वनागहीनास्तुपादातास्तवमारिष १९९

पंचविंशतिसाहस्राःपृष्ठायैवव्यवस्थिताः १८ तान्भीमसेनःसंक्रुद्धोधृष्टद्युम्नश्चपार्षतः बलेनचतुरंगेणसं
हृन्याजच्छ्रतःशरैः १९ प्रत्ययुध्यंतसमरेभीमसेनंसपार्षतं पार्थपार्षतयोश्चान्येजगृहुस्तत्रनामनी २० अ
क्रुध्यतरणेभीमसेनस्तदापर्यवस्थितैः सोवतीर्यरथात्तूर्णंगदापाणिरयुध्यत नतान्रथस्थोभूमिष्ठान्ध
र्मापेक्षीवृकोदरः योधयामासकौंतेयोभुजवीर्यमुपाश्रयः जातरूपपरिच्छन्नांप्रगृह्यमहतींगदां २१ अ
वधीत्तावकान्सर्वान्दंडपाणिरिवांतकः पदातिनोपिसंरब्धास्त्यक्त्वाप्रियंजीवितमात्मनः २२ भीममभ्यद्रवन्सं
ख्येपतंगाज्वलनंयथा आसाद्यभीमसेनंतेसंरब्धायुद्धदुर्मदाः २३ विनेदुःसहसादृष्ट्वाभूतग्रामाइवांतकं
श्येनवद्विचरन्भीमोगदाहस्तोमहाबलः २४ पंचविंशतिसाहस्रांस्तावकानवपोथयत् हत्वातत्पुरुषा
नीकंभीमःसत्यपराक्रमः २५ धृष्टद्युम्नंपुरस्कृत्यतस्थौतत्रमहाबलः धनंजयोरथानीकमभ्यवर्तत वी
र्यवान् २६ माद्रीपुत्रौतुशकुनिंसात्यकिश्चमहारथः जवेनाभ्यपतन्हृष्टाघ्नंतोदौर्योधनंबलं २७ तस्या
श्ववाहान्सुबहूंस्तेनिहत्यशितैःशरैः समभ्यधावंस्त्वरितास्तत्रयुद्धमभून्महत् धनंजयोपिचाभ्येत्यरथा
नीकंतवप्रभो विश्रुतंत्रिषुलोकेषुगांडीवंव्याक्षिपद्धनुः २८ कृष्णसारथिमायांतंदृष्ट्वाश्वेतहयंरथं अर्जु
नंचापियोद्धारंत्वदीयाःप्राद्रवन्भयात् २९ विप्रहीनरथाश्चैवशरैश्चपरिकर्षिताः पंचविंशतिसाहस्राःका
लमार्छन्पदातयः हत्वातान्पुरुषव्याघ्रःपांचालानांमहारथः पुत्रःपांचालराजस्यधृष्टद्युम्नोमहामनाः
भीमसेनंपुरस्कृत्यनचिरात्प्रत्यदृश्यत महाधनुर्धरःश्रीमानमित्रगणतापनः ३० पारावतसवर्णाश्वंको
विदारमयध्वजं धृष्टद्युम्नंरणेदृष्ट्वात्वदीयाःप्राद्रवन्भयात् ३१ गांधारराजंशीघ्रास्त्रमनुसृत्ययशस्विनो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श॰ पै॰
१८७

नविरास्त्रत्पदृष्टपेतांमाद्रीपुत्रौससात्यकी ३८ चेकितानःशिखंडीचद्रौपदेयाश्चमारिष हतास्तदीयंसुमहः
त्सैन्यंप्रांत्वांसमथायमन् तेसर्वेतावकान्भेरुडवंतोपिपरासुभृत्वान् अभ्यवर्त्तंतसंख्यान्वृषान्जित्वाय
शात्रुषाः ३९ सेनावशेषंतंदृष्ट्वातवसैन्यस्यपांडवः अवस्थितंसमुद्धमाचीद्रुक्रोधबलवान्नृप ४० धनंजय
योरथानीकमभ्यवर्त्ततवीर्यवान् विश्रुतंत्रिषुलोकेषुव्यात्तिपद्गांडिवंधनुः ४१ ततएनंशरव्रातैःसहसा
समवाकिरन् तमसासंवृतेनाथनस्मकिंचिद्ददृशपत ४२ अंधकारीकृतेलोकेरजोभूतेमहीतले यो
धाःसर्वेमहाराजतावकाःपाडवन्भयात् ४३ संभज्यमानेसैन्येतुकुरुराजोविशांपते परानभिमुखांश्चै
वसुतस्तेसमुपाद्रवत् ४४ ततोदुर्योधनःसर्वानाजुहावाथपांडवान् युद्धायभरतश्रेष्ठदेवानिवपुराबलिः
४४ तएनमभिगर्जंतःसहिताःसमुपाद्रवन् नानाशस्त्रभृताःक्रुद्धाभर्त्सयंतोमुहुर्मुहुः ४५ दुर्योधनो
प्यसंभ्रांतस्तान्रणेनिशितैःशरैः तत्रावधीत्ततःक्रुद्धःशतशोथसहस्रशः ४६ तत्सैन्यंपांडवेयानांयोधया
मासमर्वतः तत्राद्भुतमपश्यामस्तवपुत्रस्यपौरुषं ४७ यदेकःसहितान्सर्वान्रणेयुध्यतपांडवान् ततो
पश्यन्महात्मानःस्वसैन्यंभृशविक्षतं ४८ ततोवस्थाप्यराजेंद्रकृतबुद्धिस्तवात्मजः हर्षयन्निवतातान्
योधानिदंवचनमब्रवीत् ४९ नतंदेशंप्रपश्यामियत्रयातामयाहिताः गताभोयत्रवैमोक्षःपांडवात्किं
गतेनवः ५० अल्पंचबलमेतेषांकृष्णौचभृशविक्षतौ अद्यसर्वान्हनिष्यामिध्रुवोहिविजयोभवेत् ५१
विप्रयातांस्ततोभिन्नान्पांडवाःकृतकिल्बिषान् अनुसृत्यवधिष्यंतिश्रेयान्नःसमरेवधः ५२ सुखंसांग्रा
मिकोमृत्युःक्षत्रधर्मेणयुध्यतां मृतोदुःखंनजानीतेप्रेत्यचानंत्यमश्नुते ५३ श्रुत्वैवंक्षत्रियाःसर्वेपावं १८७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तः स्म समागताः यदा शूरं च भीरुं च मारयत्यंतको यमः ५४ कोनु मूढो न युध्येत मादृशः क्षत्रियब्रुवः द्विषतो १८८
भीमसेनस्य क्रुद्धस्य वशमेष्यथ ५५ पितामहैराचरितं न धर्मं हातुमर्हथ न स्वधर्मोस्ति पापीयान् क्षत्रियस्य
पलायनात् ५६ न युद्धधर्माच्छ्रेयो हि पंथाः स्वर्गस्य कौरवाः सुचिरेण हतांल्लोकान् सद्यो योधाः समश्नुते ५७
संजय उवाच एवं ब्रुवति पुत्रे ते सैनिका भृशविक्षताः अनवेक्ष्यैव तद्वाक्यं प्राद्रवन् सर्वतो दिशः ५८ इति श्रीम
हाभारते कर्णपर्वणि ॥ ८४ ॥ संजय उवाच दृष्ट्वा तु सैन्यं परिवर्त्तमानं पुत्रेण ते मद्रपतिस्तदानीं संत्रस्तरू
पः परिमूढचेता दुर्योधनं वाक्यमिदं बभाषे १ शल्य उवाच पश्येदमुग्रं नरवाजिनागैः रायोधनं वीरहतैः
समाकीर्णं महीधराभैः पतितैश्च नागैः सकृत्प्रभिन्नैः शरभिन्नदेहैः २ संविह्वलद्भिश्च गतासुभिश्च प्रध्वस्त
वर्मायुधचर्मखड्गैः वज्रापविद्धैरिव चाचलाग्रैर्विभिन्नपाषाणमहाद्रुमौषधैः ३ प्रविद्धघंटांकुशतोम
रध्वजैः सहेमजालैरुधिरौघसंप्लुतैः शराविभिन्नैः पतितैस्तुरंगमैः श्वसद्भिरार्त्तैः क्षतजं वमद्भिः ४ दीनंस्त
नुद्भिः परिवृत्तनेत्रैर्महीं दशद्भिः कृपणं नदद्भिः तथापविद्धैर्गजवाजियोधैर्बलापविद्धैः रथवीरसंघैः ५
मदासु भिन्नैश्च महीमहाहवे नून्नं यथा वैतरणी विभाति ६ गजैर्निकृत्तैर्वरहस्तिगात्रैरुद्वेपमानैः पति
तैः पृथिव्यां विशीर्णदंतैः क्षतजं वमद्भिः स्फुरद्भिरार्त्तैः करुणं नदद्भिः ७ निकृत्तचक्रेषुयुगैः सयोक्त्र
१८८ भिः त्रिविष्टतूणीरपताककेतुभिः सुवर्णजालावततैर्भृशाहतैर्महारथौघैर्जलदैरिवावृता ८ यशस्वि
भिर्नागरथाश्वयोधिभिः पदातिभिश्चाभिमुखैर्हतैः परैः विशीर्णवर्माभरणांबरायुधैर्वृता प्रशांतैरिव पाव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰टी॰
१८८

कैर्मही ९ प्रासहस्तानभिहतैर्महाबलैरवेक्ष्यमाणैः पतितैः सहस्रशः दिवश्च्युतैर्भाति रदीप्तिमद्भिर्नक्षत्रग्रहै।
द्यौरमलप्रदीप्तैः १० प्रनष्टसंज्ञैः पुनरस्तु सद्भिर्मही बभूवानुगतैरिवार्चिभिः कर्णार्जुनाभ्यां शरभि
न्नगात्रैर्हतैः प्रवीरैः कुरुसृंजयानां ११ शरास्तु कर्णार्जुनबाहुमुक्ता विदार्य नागाश्वमनुष्यदेहान्
प्राणान्निरस्याशु महीं प्रतीपुर्महोरगा वाममिवाभिनम्राः १२ हतैर्मनुष्याश्वगजैश्च संख्ये शरावपवि
द्धैश्च रथैर्नरेंद्र धनंजयस्याधिरथेश्च मार्गणैरगम्यरूपा वसुधा बभूव १३ रथैर्वरेषून्मथितैः।
सकल्पैः सयोधशस्त्रैश्च वरायुधैर्ध्वजैः विशीर्णयोक्त्रैर्विनिकृत्तबंधनैर्निकृत्तचक्राक्षयुगत्रिवे
णुभिः १४ विमुक्तशस्त्रैश्च तथाप्युपस्करैर्हतानुकर्षैर्विनिषंगबंधनैः प्रभग्ननीडैर्मणिहेमभूषि
तैर्वृता मही द्यौरिव शारदैर्घनैः १५ विकृष्यमाणैर्जवनैस्तुरंगमैर्हतेश्वरै राजरथैः सकल्पितैः म
नुष्यमातंगरथाश्वराशिभिर्द्रुतैर्व्रजंतो बहुधा विचूर्णिताः १६ सहेमपट्टाः परिघाः परश्वधाः शिताः
श्च शूला मुसलानि मुद्गराः पेतुश्च खड्गा विमला विकोशा गदाश्च जांबूनदपट्टनद्धाः १७ चापानि
रुक्मांगदभूषणानि शराश्च कार्तस्वरचित्रपुंखाः ऋष्टयश्च पीता विमला विकोशाः प्रासाश्च दंडैः कन
कावभासैः १८ छत्राणि बालव्यजनानि शंखाश्चित्रापविद्धाश्च स्रजो विचित्राः कुथाः पताकांबरभू
षणानि किरीटमालामुकुटाश्च शुभ्राः १९ प्रकीर्णकाविप्रकीर्णाश्च राजन्प्रबालमुक्तातरलाश्च हा
राः आपीडकेयूरवरांगदानि ग्रैवेयनिष्काः ससुवर्णसूत्राः २० मण्युत्तमा वज्रसुवर्णमुक्तारत्नानि।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वोच्चावचमंगलानि गात्राणि चास्यंतनस्य चोचितानि शिरांसि चेंदुप्रतिमाननानि २२ देहांश्च भोगांश्च परि
त्यज्य त्यक्त्वा मनोज्ञानि सुखानि चैव स्वधर्मनिष्ठां महतीमवाप्य व्याप्यास्तु लोकान्यशसा गतास्ते २३
निवर्त्त दुर्योधन यांतु सैनिका व्रजस्व राजन् शिबिराय मानद दिवाकरोप्येष विलंबते प्रभो प्रत्नस्त्वमेवा
त्र नरेंद्र कारणं २४ इत्येवमुक्त्वा विरराम शल्यो दुर्योधनं शोकपरीतचेताः हा कर्ण हा कर्ण इति ब्रुवा
णमार्त्तं विसंज्ञं भृशमश्रुनेत्रं २५ तं द्रोणपुत्रप्रमुखा नरेंद्राः सर्वे समाश्वास्य मुहुः प्रयांति निरीक्षमाणा
मुहुरर्जुनस्य ध्वजं महांतं यशसा ज्वलंतं २६ नराश्वमातंगशरीरजेन रक्तेन सिक्तां च तथैव भूमिं रक्तां
बरस्रक्तपनीययोगान्नारीं प्रकाशामिव सर्वगम्यां २७ प्रच्छन्नरूपा रुधिरेण राजन् रौद्रे मुहूर्त्तेति विराज
माने नैवावतस्थुः कुरवः समीक्ष्य प्रव्राजिता देवलोकाय सर्वे २८ वधेन कर्णस्य तु दुःखितास्ते हा कर्ण हा
कर्ण इति ब्रुवाणाः द्रुतं प्रयाताः शिबिराणि राजन् दिवाकरं रक्तमवेक्षमाणाः २९ गांडीवमुक्तैस्तु सुवर्णपुं
खैः शिलाशितैः शोणितदिग्धवाजैः शरैश्चितांगो युधि भाति कर्णो हतोपि सन्सूर्य इवांशुमाली ३० कर्ण
स्य देहं रुधिरावसिक्तं भक्तानुकंपी भगवान्विवस्वान् स्पृष्ट्वांशुभिर्लोहितरक्तरूपः सिस्नासुरभ्येति परं
समुद्रं ३१ इतीव संचिंत्य सुरर्षिसंघाः संप्रस्थिता यांति यथानिकेतनं संचिंतयित्वा जनता विसस्रुर्य
था सुखं खं च महीतलं च ३२ तदद्भुतं प्राणभृतां भयंकरं निशाम्य युद्धं कुरुवीरमुख्ययोः धनंजयस्या
धिरथेश्च विस्मिताः प्रशंसमानाः प्रययुस्तदा जनाः ३३ प्रोरंसस्कृतनवर्माणं रुधिरोक्षितवाससं गतासुम

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰द्रो॰
१८९

विराधयैनैवलक्ष्मीर्विमुंचति तप्तजांबूनदनिभंज्वलनार्कसमप्रभं ३५ जीवंतमिवतंदृष्ट्वासर्वभूतानिमे
निरे हतस्यापिमहाराजसूतपुत्रस्यसंयुगे ३६ वित्रेसुःसर्वतोयोधाःसिंहस्येवेतरेमृगाः हतोपिपुरुषव्या
घ्रोजीववानिवलक्ष्यते ३७ नाभवद्विकृतिःकाचिद्धतस्यापिमहात्मनः चारुवेषधरंवीरंचारुमौलिशि
रोधरं ३८ तन्मुखंसूतपुत्रस्यपूर्णचंद्रसमद्युति नानाभरणवान्राजंस्तप्तजांबूनदांगदः हतोवैकर्तनः
शेतेपादपोंकुरवानिव कनकोत्तमसंकाशोज्वलन्निवविभावसुः ३९ सशांतःपुरुषव्याघ्रःपार्थसा
यकवारिणा यथाहिज्वलनोदीप्तोजलमासाद्यशाम्यति ४० कर्णाग्निःसमरेतद्वत्पार्थमेघेनशामि
तः आहृत्यचयशोदीप्तंसपुत्रेणात्मनाभुवि विसृज्यशरवर्षाणिप्रताप्यचदिशोदश सपुत्रःसमरे
कर्णःसशांतःपार्थतेजसा ४२ प्रताप्यपांडवान्सर्वान्पंचालांश्चास्त्रतेजसा वर्षित्वाशरवर्षेण
प्रताप्यरिपुवाहिनीं ४३ श्रीमानिवसहस्रांशुर्जगत्सर्वंप्रताप्यच हतोवैकर्तनःकर्णःसपुत्रःस
हवाहनः ४४ अर्थिनांपक्षिसंघस्यकल्पवृक्षोनिपातितः ददानीत्येवयोवाचनानास्तीत्य
र्थितोर्थिभिः सद्भिःसदासत्पुरुषःसहतोद्वैरथेवृषः ४५ यस्यब्राह्मणसात्सर्वंवित्तमासीन्म
हात्मनः नादेयंब्राह्मणेष्वासीद्यस्यस्वमपिजीवितं ४६ सदास्त्रीणांप्रियोनित्यंदाताचैवमहारथः
सवैपार्थास्त्रनिर्दग्धोगतःपरमिकांगतिं यमाश्रित्याकरोद्वैरंपुत्रस्तेसगतोदिवं ४७ आदायत
वपुत्राणांजयाशांशर्मवर्मच हतेकर्णेसरितोनप्रसस्रुर्जगामचास्तंसवितादिवाकरः ४८ ॥

१८९

ग्रहश्चतिर्यक्ज्वलनार्कवर्णःसोमस्यपुत्रोभ्युदियायतिर्यक् ४९ नभःप्रफालेवननादचोर्वीववुश्चवा
ताःपरुषाःसुघोराः दिशोबभूवुर्ज्वलिताःसधूमामहार्णवाःसस्वनुश्चुक्षुभुश्च ५० सकाननाश्चाद्रिच
याश्चकंपिरेप्रविव्यथुर्भूतगणाश्चसर्वे बृहस्पतिःसंपरिवार्यरोहिणींबभूवचंद्रार्कसमोविशांपते ५१
हतेनकर्णेविदिशोपिजज्वलुस्तमोवृताद्यौर्विचचालभूमिः पपातचोल्काज्वलनप्रकाशानिशाचरा
श्चाप्यभवन्प्रहृष्टाः ५२ शशिप्रकाशाननमर्जुनोयदाक्षुरेणकर्णस्यशिरोन्यपातयत् तदांतरिक्षे
महस्रेवशब्दोबभूवहाहेतिसुरैर्विमुक्तः सदेवगंधर्वमनुष्यपूजितेनिहत्यकर्णंरिपुमाहवेर्जुनः ५३
रराजराजन्परमेणवर्चसायथापुरावृत्रवधेशतक्रतुः ततोरथेनांबुदवृंदनादिनाशरन्नभोमध्यगदिवा
करार्चिषा ५४ पताकिनाभीमनिनादकेतुनाहिमेंदुशंखस्फटिकावभासिना महेंद्रवाहप्रतिमेनतौ
तुभौमहेंद्रवीर्यप्रतिमानपौरुषौ ५५ सुवर्णमुक्तामणिवज्रविद्रुमैरलंकृताप्रतिमेनरंहसा नरोत्त
मौकेशवपांडुनंदनौनदाहितावग्निदिवाकराविव ५६ रणाजिरेवीतभयौविरेजतुःसमानयानावि
वविष्णुवासवौ ततोधनुर्ज्यातलबाणनिस्वनैःप्रसह्यकृत्वाचरिपून्हतप्रभान् ५७ संछादयित्वा
तुकुरून्शरोत्तमैःकपिध्वजःपक्षिवरध्वजश्च हृष्टौततस्तावमितप्रभावौमनांस्यरीणामवदारयंतौ
सुवर्णजालावततौमहास्वनौहिमावदातौपरिगृह्यपाणिभिः ५८ चुचुंबतुःशंखवरौनृणांवरौवरा
ननाभ्यांयुगपच्चदध्मतुः पांचजन्यस्यनिर्घोषोदेवदत्तस्यचोभयोः ५९ पृथिवींचांतरिक्षंचदिशश्चै

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टी. वान्नादयन् विवस्ताश्चाभवन्सर्वे कौरवा राजसत्तम शंखशब्देन तेनाथ माधवस्यार्जुनस्य च ६०
५८. तौ शंखशब्देन निनादयंतौ वनानि शैलान्सरितो गुहाश्च वित्रासयंतौ तव पुत्रसेनां युधिष्ठिरं नंद
यंतौ वरिष्ठौ ६१ ततः प्रयाताः कुरवो जवेन श्रुत्वैव शंखस्वनमीर्यमाणं विहाय मद्राधिपतिं पतिं
च दुर्योधनं भारत भारतानां ६२ महाहवे तं बहु रोचमानं धनंजयं भूतगणाः समेताः तदान्वमो
दंत जनार्दनं च दिवाकरावभ्युदितौ यथैव ६३ समाचितौ कर्णशरैः परंतपावुभौ व्यभातां समरे
ऽच्युतार्जुनौ तमो निहत्याभ्युदितौ यथामलौ शशांकसूर्यौ दिवि रश्मिमालिनौ ६४ विहाय तान्
बाणगणानथागतौ सुहृद्वृतावप्रतिमानविक्रमौ सुखं प्रविष्टौ शिबिरं स्वमीश्वरौ सदस्यहूताविव विष्णुवासवौ ६५ सदेवगंधर्वमनुष्यचारणैर्महर्षिभिर्यक्षमहोरगैरपि जयाभिवृद्ध्या परया
भिपूजितौ हते तु कर्णे परमाहवे तदा ६६ यथानुरूपं प्रतिपूजितावुभौ प्रशस्यमानौ स्वकृतैर्
गुणैश्च तौ ननंदतुस्तौ ससुहृद्गणौ तदा बलिं नियम्येव सुरेशकेशवौ ६७ इति श्रीमहाभारते
शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि ५९ संजय उवाच हते वैकर्तने राजन्कु
रवो भयपीडिताः वीक्षमाणा दिशः सर्वाः पर्यपेताः सहस्रशः १ कर्णं तु निहतं दृष्ट्वा शत्रुभिः पर
माहवे भीता दिशो व्यदीर्यंत तावकाः क्षतविक्षताः २ ततो वहारं चक्रुस्ते योधाः सर्वे समेततः नि
वार्यमाणाश्चोद्विग्नास्तावकाः भृशदुःखिताः ३ तेषां तन्मतमाज्ञाय पुत्रो दुर्योधनस्तव अवहारं ते ५८.

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कृतवर्मारथैस्तूर्णंवृतोभारततावकैः नारायणावशेषैश्चशिबिरायैवदुद्रुवे ५ गांधारराजःसहस्रैर्गणानांशकुनिः
परिवारितःहतमाधिरथिंदृष्ट्वाशिबिरायैवदुद्रुवे ६ कृपःशारद्वतोराजन्नागानीकेनभारत महामेघनि
भेनाशुशिबिरायैवदुद्रुवे ७ अश्वत्थामाततःशूरोविनिःश्वस्यपुनःपुनः पांडवानांजयंदृष्ट्वाशिबिरायैवदु
द्रुवे ८ संसप्तकावशिष्टेनबलेनमहतावृतः सुशर्मापिययौराजन्वीक्षमाणोभयार्दितः ९ दुर्योधनो
पिन्टपतिर्हतसर्वस्वबांधवः ययौशोकसमाविष्टश्चिंतयन्विमनाबहु १० छिन्नध्वजेनशल्यस्तुरथेन
रथिनांवरः प्रययौशिबिरायैववीक्षमाणोदिशोदश ११ ततोपरेसुबहवोभारतानांमहारथाः प्राद्रवंत
भयत्रस्ताह्रियाविष्टाविचेतसः १२ असृक्क्षरंतःसोद्विग्नावेपमानास्तथातुराः कुरवोदुद्रुवुःसर्वेदृ
ष्ट्वाकर्णंनिपातितं १३ प्रशंसंतोर्जुनंकेचित्केचित्कर्णंमहारथाः व्यद्रवंतदिशोभीताःकुरवःकुरु
सत्तम १४ तेषांयोधसहस्राणांतावकानांमहामृधे नासीत्तत्रपुमान्कश्चिद्योयुद्धायमनोदधे १५ हृ
तेकर्णेमहाराजनिराशाःकुरवोभवन् जीवितेष्वपिराज्येषुदारेषुचधनेषुच १६ तान्समानीयपुत्र
स्तेयत्नेनमहताविभुः निवेशायमनोदध्रेदुःखशोकसमन्वितः १७ तस्याज्ञांशिरसायोधाःपरिगृ
ह्यविशांपते विवर्णवदनाराजन्नविशंतमहारथाः १८ इतिश्रीमहाभारतेकर्णपर्वणिशिबिरप्रया
णं ४९ १८ संजयउवाच तथानिपातितेकर्णेपरसैन्येचविद्रुते आश्लिष्यपार्थंदाशार्होहर्षाद्वचनमब्र
वीत् १ हतोवज्रभृतावृत्रस्त्वयाकर्णोधनंजय वृत्रकर्णवधंघोरंकथयिष्यंतिमानवाः वज्रेणनिहतोवृ
त्रःसंयुगेभूरितेजसा त्वयातुनिहतःकर्णोधनुषानिशितैःशरैः २ तमिमंविक्रमंलोकेप्रथितंतेयशः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क॰ टि॰
२८१

स्तव निवेदयावः कौंतेय कुरुराजस्य धीमतः ३ वधं कर्णस्य संग्रामे दीर्घकालं चिकीर्षितं निवेद्य धर्मराजा
य त्वमानृण्यं गमिष्यसि ४ वर्त्तमाने महायुद्धे तव कर्णस्य चोभयोः द्रष्टुमायोधनं पूर्वमागतो धर्मनंदनः ५
भृशं तु गाढविद्धत्वान्नाशकत्स्थातुमाहवे ततः स शिबिरं गत्वा स्थितवान्पुरुषर्षभः ६ तथेत्युक्तः के
शवस्तु पार्थेन यदुपुंगवः पर्यवर्त्तयदव्यग्रो रथं रथवरस्य ते ७ एवमुक्त्वार्जुनेनाथ सैनिकानिदमब्रवी
त् परानभिमुखा यत्तास्तिष्ठध्वं भद्रमस्तु वः ८ धृष्टद्युम्नं युधामन्युं माद्रीपुत्रौ वृकोदरं युयुधानं च गोविं
दइदं वचनमब्रवीत् यावदावेद्यते राज्ञे हतः कर्णोर्जुनेन वै ९ तावद्भवद्भिर्यत्नोस्तु भवितव्यं नराधिपैः
स तैः शूरैरनुज्ञातो ययौ राजनिवेशनं १० पार्थमादाय गोविंदो ददर्श च युधिष्ठिरं शयानं राजशार्दूलं कां
चने शयनोत्तमे अगृह्णीतां च मुदितौ चरणौ पार्थिवस्य तौ तयोः प्रहर्षमालक्ष्य प्रहारांश्चाप्यवर्त्तयत्
११ राधेयं निहतं मत्वा समुत्तस्थौ युधिष्ठिरः उवाच च महाबाहुः पुनः पुनररिंदमः १२ वासुदेवार्जुनौ प्रेम्णा
तावुभौ परिषस्वजे तस्मै तद्यथावृत्तं वासुदेवः सहार्जुनः कथयामास कर्णस्य निधनं यदुपुंगवः ईषद
त्स्मयमानस्तु कृष्णो राजानमब्रवीत् १४ युधिष्ठिरं हतामित्रं कृतांजलिरथाच्युतः दिष्ट्या गांडीवधन्वा
च पांडवश्च वृकोदरः १५ त्वं चापि कुशली राजन्माद्रीपुत्रौ च पांडवौ मुक्ता वीरक्षयादस्मात्संग्रामाल्लोमह
र्षणात् १६ क्षिप्रमुत्तरकालानि कुरु कार्याणि पांडव हतो वैकर्त्तनो राजन्सूतपुत्रो महारथः १७ दिष्ट्या ज
यसि राजेंद्र दिष्ट्या वर्धसि भारत यस्स द्यूतजितां कृष्णां प्राहसत्पुरुषाधमः १८ तस्याद्य सूतपुत्रस्य भूमिः पि
बति शोणितं शेते सोस्मान्शरपूर्णांगः शत्रुस्ते कुरुपुंगव तं पश्य पुरुषव्याघ्र विभिन्नं बहुभिः शरैः १९ हता २८१

मित्रामिमामुर्वीमनुशाधि महाभुज यद्वाभुक्ता सहास्माभिर्भुंक्ष्व भोगांश्च पुष्कलान् संजय उवाच इति श्रुत्वा
वचस्तस्य केशवस्य महात्मनः धर्मपुत्रः प्रहृष्टात्मा दाशार्हं वाक्यमब्रवीत् ११ दिष्ट्या दिष्ट्येति राजेंद्र वाक्यं
चेदमुवाच ह नैतच्चित्रं महाबाहो त्वयि देवकिनंदन त्वया सारथिना पार्थो यत्तवानहनच्च तं १२ न तच्चित्रं
महाबाहो युष्मद्बुद्धिप्रसादजं प्रगृह्य च कुरुश्रेष्ठ सांगदं दक्षिणं भुजं १३ उवाच धर्मभृत्पार्थ उभौ तौ केश
वार्जुनौ नरनारायणौ देवौ कथितौ नारदेन मे १४ धर्मात्मानौ महात्मानौ पुराणावृषिसत्तमौ असकृच्चापि
मेधावी कृष्णद्वैपायनो मम १५ कथामेतां महाभागो कथयामास तत्त्ववित् तव कृष्ण प्रसादेन पांडवोयं
धनंजयः १६ जिगायाभिमुखः शत्रून्न चासीद्विमुखः क्वचित् जयश्चैव ध्रुवोस्माकं न त्वस्माकं पराजयः १७
यदा त्वं युधि पार्थस्य सारथ्यमुपजग्मिवान् भीष्मो द्रोणश्च कर्णश्च महात्मा गौतमः कृपः १८ अन्ये च
बहवः शूरा ये च तेषां पदानुगाः १९ त्वद्बुद्ध्या निहते कर्णे हता गोविंद सर्वथा इत्युक्त्वा धर्मराजस्तु रथे हेम
विभूषिते २० श्वेतवर्णैर्हयैर्युक्ते कालवालैर्मनोजवैः आस्थाय पुरुषव्याघ्रः स्वबलेनाभिसंवृतः २१ प्र
ययौ स महाबाहुर्द्रष्टुमायोधनं तदा कृष्णार्जुनाभ्यां वीराभ्यामनुमंत्र्य ततः श्रियं २२ आभाषमाणस्तौ वी
रावुभौ माधवफाल्गुनौ स ददर्श रणे कर्णं शयानं पुरुषर्षभं २३ यथा कदंबकुसुमं केसरैः सर्वतो वृतं
चितं शरशतैः कर्णं धर्मराजो ददर्श सः २४ गंधतैलावसिक्ताभिः कांचनीभिः सहस्रशः दीपिकाभिः कृ
तोद्योतं पश्यते वै वृषं तदा २५ संछिन्नभिन्नकवचं बाणैश्च विदलीकृतं सपुत्रं निहतं दृष्ट्वा कर्णं राजा
युधिष्ठिरः २६ संजातप्रत्ययोतीव वीक्ष्य चैवं पुनः पुनः प्रशशंस नरव्याघ्रावुभौ माधवपांडवौ २७ अद्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

राजास्मि गोविंदद्याहं भ्रातृभिः सह त्वया नाथेन वीरेण विदुषा परिपालितः ४८ हतं कृत्वा नरव्याघ्रं
राधेयमतिमानिनं निराशोद्य हते कर्णे धार्त्तराष्ट्रो भविष्यति जीविते चैव राज्ये च हते राधात्मजे रणे ४९
त्वत्प्रसादाद्वयं चैव कृतार्थाः पुरुषर्षभ दिष्ट्या जयसि गोविंद दिष्ट्या शत्रुर्निपातितः ५० दिष्ट्या गांडी
वधन्वा च विजयी पांडुनंदनः त्रयोदश समास्तीर्णा जागरेण सुदुःखिताः ५१ स्वप्स्यामोद्य सुखं रा
त्रौ त्वत्प्रसादान्महाभुज एवं स बहुशो राजा प्रशशंस जनार्दनं ५२ अर्जुनं च कुरुश्रेष्ठं धर्मराजो यु
धिष्ठिरः संजय उवाच दृष्ट्वा च निहतं कर्णं सपुत्रं पार्थसायकैः पुनर्जातमिवात्मानं मेने च स महीप
तिः समेत्य च महाराज कुंतीपुत्रं युधिष्ठिरं ५४ हर्षयंति स्म राजानं हर्षयुक्ता महारथाः नकुलः सह
देवश्च पांडवश्च वृकोदरः सात्यकिश्च महाराज वृष्णीनां प्रवरो रथः धृष्टद्युम्नः शिखंडी च पांडुपांचा
लसृंजयाः ५५ पूजयंति स्म कौंतेयं निहते सूतनंदने तेवर्द्धयित्वा नृपतिं धर्मात्मानं युधिष्ठिरं ५६
जितकाशिनो लब्धलक्षा युद्धशौंडाः प्रहारिणः स्तुवंतस्तव युक्ताभिर्वाग्भिः कृष्णौ परंतपौ ५८ जग्मुः
स्वशिबिरायैव मुदा युक्ता महारथाः एवमेष क्षयो वृत्तः सुमहांल्लोमहर्षणः ५९ तव दुर्मंत्रितेरा
जन् किमर्थमनुशोचसि वैशंपायन उवाच श्रुत्वैतदप्रियं राजा धृतराष्ट्रो विचेतनः ६० पपात भू
मौ निश्चेष्टश्छिन्नमूल इव द्रुमः तथा सा पतिता देवी गांधारी दीर्घदर्शिनी ६१ शुशोच बहुलालापैः कर्ण
स्य निधनं युधि तां पर्यगृह्णाद्विदुरो नृपतिं संजयस्तथा पर्याश्वासयतां चैवमुभावेव भूमिपं ६२ तथै
वोत्थापयामासुर्गांधारीं कुरुयोषितः स दैवं परमं मत्वा भवितव्यं च पार्थिवः ६३ परां पीडां समाश्रित्य नष्ट

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क.टि.
१८२

चित्तोमहातपाः चिंताशोकपरीतात्मानजज्ञेमोहपीडितः ५४ समभ्यासाभितोराजान्तूष्णीमासीद्विचेतनः इदं
महायुद्धमत्वेमहात्मनोर्धनंजयस्याधिरथेश्चयःपठेत् ५५ सम्यगिष्टस्यमखस्ययत्फलंतदाप्नुयात्संश्रव
णाच्चभारत मखोहिविष्णुर्भगवान्सनातनोवदंतितच्चाग्निलेंडभानवः ५६ अतोनसूयुःशृणुयात्
द्वयःससर्वलोकान्नुवाःसुखीभवेत् तांसर्वदाभक्तिमुपागतानराःपठंतिपुण्यामवसंहितामिमां ५७
धनेनधान्येनयशसाचमानुषानंदंतितेनात्रविचारणास्ति अतोनसूयुःशृणुयात्सदात्वेनरःससर्वा
णिसुखानिचाप्नुयात् ५८ विष्णुःस्वयंभूर्भगवान्भवश्चतुष्यंतियस्यमनरोत्तमस्य वेदाप्तिर्ब्राह्मणस्ये
हदृष्टानरणेबलंक्षत्रियाणांजयोयुधि ५९ धनज्येष्ठाश्चापिभवंतिवैश्याःशूद्रारोगंप्राप्नुवंतीहसर्वे न
थैवविष्णुर्भगवान्सनातनःसचात्रदेवःपरिकीर्त्यतेयतः ६० ततःसकामान्लभतेसुखीनरोमहामुनेस्त
स्यवचोर्चितंयथा कपिलानांसवत्सानांवर्षमेकंनिरंतरं योदद्यात्सकृतंतद्धिश्रवणात्कर्णपर्वणि अति
श्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांकर्णपर्वसमाप्तमिति ५९ ७१ शुभमस्तु अतःपरंविचि
त्रार्थंशल्यपर्वभविष्यति यस्यायमाद्यश्लोकः जनमेजयउवाच एवंनिपातितेकर्णेसमरेसव्यसाचिना अ
ल्पावशिष्टाःकुरवःकिमकुर्वतवैद्विज १ हतांतत्राश्चास्मिन्पर्वणिकर्णाभिषेकः पौराणंत्रिपुराख्याने कर्णश
ल्ययोर्विवादः हंसकाकीयोपाख्यानेभीमादिभिःसहयुद्धं अर्जुनगर्हणंयुधिष्ठिरार्जुनयोःक्रोधः युधिष्ठिर
प्रसादनंदुःशासनवधः वृषसेनादिवधःकर्णार्जुनयोर्द्वैरथेदिव्यास्त्रयुद्धं किरीटहरणं चक्रग्रसनेकर्णवासु
देवसंवादःकर्णवधः शल्यपलायनंकौरवपलायनं शिबिरागमनेयुधिष्ठिरहर्षः इतिवृत्तांताः इतिनीलकंठे

ठे भारतभावदीपे कर्णपर्वार्थप्रकाशः ॥

१८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

महाभारत

कर्णपर्वपत्रे १८३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मंहाभारत

शल्यपर्वपत्रे ८।

॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ श्रीगणेशाय नमः अथ नवमं शल्यपर्व व्याख्यायते । तत्र संगतिः कर्णपर्वांते एवं निपातिते इति अध्यमं पलाय
नेवाप्यकुरिति प्रश्नुरभिप्रायः २ तत्र द्वितीयमेव वत्त्वाह उदीर्यमाणमिति पांडवबलस्योत्कर्षं दृष्ट्वा किमभिप्रा

ॐ श्रीगणेशाय नमः नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् जन
मेजय उवाच एवं निपातिते कर्णे समरे सव्यसाचिना अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज उदीर्य
माणं च बलं पांडवानां सुयोधनः पांडवैः प्राप्तकालं च किं प्रापद्यत कौरवः एतदिच्छाम्यहं श्रोतुं तदाचक्ष्व
द्विजोत्तम न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् वैशं॰ ततः कर्णे हते राजन् धार्तराष्ट्रः सुयोधनः भृ
शं शोकार्णवे मग्नो निराशः सर्वतोऽभवत् हा कर्ण हा कर्ण इति शोचमानः पुनः पुनः कृच्छ्रात् स्वशिबिरं प्राया
द्धतशेषैर्नृपैः सह स समाश्वास्यमानोऽपि हेतुभिः शास्त्रनिश्चितैः राजभिर्नालभच्छर्म सूतपुत्रवधं स्मर
न् स दैवं बलवन्मत्वा भवितव्यं च पार्थिवः संग्रामे निश्चयं कृत्वा पुनर्युद्धाय निर्ययौ शल्यं सेनापतिं कृ
त्वा विधिवद्राजपुंगवः रणाय निर्ययौ राजा हतशेषैर्नृपैः सह ततः सुतुमुलं युद्धं कुरुपांडवसेनयोः अभ
वद्भरतश्रेष्ठ देवासुररणोपमं ततः शल्यो महाराज कृत्वा कदनमाहवे हतसैन्योऽथ मध्याह्ने धर्मराजेन घा
तितः ततो दुर्योधनो राजा हतबंधू रणाजिरात् अपसृत्य ह्रदं घोरं विवेश रिपुजाद्भयात् अथापराह्णे तस्याह्नः
परिवार्य सुयोधनः ह्रदादाहूय वेगेन भीमेन विनिपातितः तस्मिन् हते महेष्वासे हतशिष्टास्त्रयो रथाः
यामयान्दृप्तान्सुबहून्धनदालये जघान गुह्यकान्क्रुद्धो नदन्पार्थो महाबलः ५४ निवार्यमा
णो बहुभिः द्रौपद्याः प्रियमास्थितः तां वज्रमणिरत्नाढ्यामष्टाश्रीं वज्रगौरवां ५५ समुद्यम्य म
हाबाहुः शल्यमभ्यपतद्रणे गदया युद्धकुशलस्तया दारुणनादया ५६ पोथयामास शल्यस्य
चतुरोश्वान्महाजवान् ततः शल्यो रणे क्रुद्धः पीने वक्षसि तोमरं ५७ निचखान नदन्वीरो वर्म
भित्वास्य सोभ्यगात् वृकोदरस्त्वसंभ्रांतस्तमेवोद्धृत्य तोमरं ५८ यंतारं मद्रराजस्य निर्बिभेद त
तो हृदि स भिन्नवर्मा रुधिरं वमन्वित्रस्तमानसः ५९ पपाताभिमुखो दीनो मद्रराजस्त्वपा
क्रमत् कृतप्रतिकृतं दृष्ट्वा शल्यो विस्मितमानसः ६० गदामाश्रित्य धीरात्मा प्रत्यमित्रमवै
क्षत ततः सुमनसः पार्था भीमसेनमपूजयन् ६१ तं दृष्ट्वा कर्म संग्रामे घोरमक्लिष्टकर्म
णः इति श्रीमहाभारते शल्यपर्वणि गदायुद्धे ५९९ संजय उवाच पतितं प्रेक्ष्य यंतारं २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शल्यः सर्वायसींगदां आदायतरसाराजंस्तस्थौगिरिरिवाचलः १ तंदीप्तमिवकालाग्निंपाशहस्तमि
वांतकं सश्रृंगमिवकैलासंसवज्रमिववासवं २ सशूलमिवहर्यक्षंवनेमत्तमिवद्विपं जवेनाभ्य
पतद्भीमः प्रगृह्यमहतींगदां ३ ततःशंखविनिनादश्चतूर्याणांचसहस्रशः सिंहनादश्चसंजज्ञेशू
राणांहर्षवर्धनः ४ प्रेक्षंतःसर्वतस्तौहियोधायोधमहाद्विपौ तावकाश्चपरेचैवसाधुसाध्वि
त्यपूजयन् ५ नहिमद्राधिपादन्योरामाद्वायदुनंदनात् सोढुमुत्सहतेवेगंभीमसेनस्यसंयुगे ६
तथामद्राधिपस्यापिगदावेगंमहात्मनः सोढुमुत्सहतेनान्योयोधोयुधिवृकोदरात् ७ तौवृषा
विवनर्दंतौमंडलानिविचेरतुः आवल्गितौगदाहस्तौमद्रराजवृकोदरौ ८ मंडलावर्तमार्गेषुगदा
विहरणेषुच निर्विशेषमभूद्युद्धंतयोःपुरुषसिंहयोः ९ तप्तहेममयैःशुभ्रैर्बभूवभयवर्धि
नी अग्निज्वालैरिवाविद्धापट्टैःशल्यस्यसागदा १० तथैवचरतोमार्गान्मंडलेषुमहात्मनः विद्यु
दभ्रप्रतीकाशाभीमस्यशुशुभेगदा ११ ताडितामद्रराजेनभीमस्यगदयागदा दह्यमानेववैराज
न्ससृजेपावकार्चिषः १२ तथाभीमेनशल्यस्यताडितागदयागदा अंगारवर्षंमुमुचेतदद्भुतमिवा
भवत् १३ दंतैरिवमहानागौशृंगैरिवमहर्षभौ तोत्रैरिवतदान्योन्यंगदाग्राभ्यांनिजघ्नतुः १४
तौगदानिहतैर्गात्रैःक्षणेनरुधिरोक्षितौ प्रेक्षणीयतरावास्तांपुष्पिताविवकिंशुकौ १५ गद

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प०
२२

यामद्रराजस्यसव्यदक्षिणमाहतः भीमसेनोमहाबाहुःनचचालाचलोयथा १५ तथाभीमगदावेगैस्ता
ड्यमानोमुहुर्मुहुः शल्योनविव्यथेराजन्दंतिनेवमहागिरिः १६ शुश्रुवेदिक्षुसर्वासुतयोःपुरुष
सिंहयोः गदानिपातसंह्रादोवज्रयोरिवनिस्वनः १७ निवृत्यतुमहावीर्यौसमुच्छ्रितमहागदौ पु
नरंतरमार्गस्थौमंडलानिविचेरतुः १८ तथाभ्येत्यपदान्यष्टौसंनिपातोभवत्तयोः उद्यम्यलोहदं
डाभ्यामतिमानुषकर्मणोः १९ प्रार्थयानौतथान्योन्यंमंडलानिविचेरतुः क्रियाविशेषकृतिनौ
दर्शयामासतुस्तदा २० अथोद्यम्यगदेघोरेसशृंगाविवपर्वतौ तावाजघ्नतुरन्योन्यंमंडलानिवि
चेरतुः २१ क्रियाविशेषकृतिनौरणभूमितलेचलौ २२ तौपरस्परसंरंभात्गदाभ्यांसुभृशा
हतौ युगपत्पेततुर्वीरावुभाविंद्रध्वजाविव २३ उभयोःसेनयोर्वीरास्तदाहाहाकृतोभवन् भृशं
मर्मण्यभिहतावुभावास्तांसुविह्वलौ २४ ततःस्वरथमारोप्यमद्राणामृषभंरणे अपोवाहकृ
पःशल्यंतूर्णमायोधनादथ २५ क्षीववद्विह्वलत्वात्तुनिमेषात्पुनरुत्थितः भीमसेनोगदापा
णिःसमाह्वयतमद्रपं ततस्तुतावकाःशूरानानाशस्त्रसमायुताः नानावादित्रशब्देनपांडुसे
नामयोधयन् २७ भुजावुच्छ्रित्यशस्त्रेचशब्देनमहताततः अभ्यद्रवन्महाराजदुर्योधन
पुरोगमाः २८ तदानीकमभिप्रेक्ष्यततस्तेपांडुनंदनाः प्रययुःसिंहनादेनदुर्योधनपुरोगमान् २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तेषामापततांतूर्णंपुत्रस्तेभरतर्षभ प्रासेनचेकितानंवैविव्याधहृदयेभृशं २० सपपातरथोपस्थे
तवपुत्रेणताडितः रुधिरेणचपरिक्लिन्नःप्रविश्यविपुलंतमः २१ चेकितानंहतंदृष्ट्वापांडवेयामहा।
रथाः असक्तमभ्यवर्षंतशरवर्षाणिभागशः २२ तावकानामनीकेषुपांडवाजितकाशिनः
व्यचरंतमहाराजप्रेक्षणीयाःसमंततः २३ कृपश्चकृतवर्माचसौबलश्चमहारथः अयोधयन्
धर्मराजंमद्रराजपुरस्कृताः २४ भारद्वाजस्यहंतारंभूरिवीर्यपराक्रमं दुर्योधनोमहाराजधृष्टद्युम्न
मयोधयत् २५ त्रिसाहस्रारथाराजंस्तवपुत्रेणचोदिताः अयोधयतविजयंद्रोणपुत्रपुरस्कृताः
२६ विजयेधृतसंकल्पाःसमरेत्यक्तजीविताः प्राविशंस्तावकाराजन्हंसाइवमहत्सरः २७
ततोयुद्धमभूद्घोरंपरस्परवधैषिणां अन्योन्यवधसंयुक्तमन्योन्यप्रीतिवर्धनं २८ तस्मिन्प्रवृत्ते
संग्रामेराजन्वीरवरक्षये अनिलेनेरितंघोरमुत्तस्थौपार्थिवंरजः २९ श्रवणान्नामधेयानांपांड।
वानांचकीर्तनात् परस्परंविजानीमोयदयुध्यन्नभीतवत् ३० तद्रजःपुरुषव्याघ्रशोणितेनप्र।
शामितं दिशश्चविमलाजग्मुस्तस्मिंस्तमसिनाशिते ३१ तथाप्रवृत्तेसंग्रामेघोररूपेभयानके ।
तावकानांपरेषांचनासीत्कश्चित्पराङ्मुखः ३२ ब्रह्मलोकपराभूत्वाप्रार्थयंतोजयंयुधि सुयु
द्धेनपराक्रांतानराःस्वर्गमभीप्सवः ३३ भर्तृपिंडविमोक्षार्थंभर्तृकार्यविनिश्चिताः स्वर्गसं।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श॰ प॰ सक्रमनसोयोधायुयुधिरेतव ४४ नानारूपाणिशस्त्राणिविसृजंतोमहारथाः अन्योन्यमभिगर्जं
११ तःप्रहरंतःपरस्परं हतविध्यतगृह्णीतप्रहरध्वंनिकृंतत इतिस्मवाचःश्रूयंतेतवतेषांचवैब
ले ४६ ततःशल्योमहाराजधर्मपुत्रंयुधिष्ठिरं विव्याधनिशितैर्बाणैर्हंतुकामोमहारथं ४७ त
स्यपार्थोमहाराजनाराचान्वैचतुर्दश मर्माण्युद्दिश्यमर्मज्ञोनिचखानहसन्निव ४८ आवार्य
पांडवंबाणैर्हंतुकामोमहाबलः विव्याधसमरेक्रुद्धोबहुभिःकंकपत्रिभिः ४९ अथभूयोम
हाराजशरेणानतपर्वणा युधिष्ठिरंसमाजघ्नेसर्वसैन्यस्यपश्यतः ५० धर्मराजोपिसंक्रुद्धोम
द्रराजंमहायशाः विव्याधनिशितैर्बाणैःकंकबर्हिणवाससैः ५१ चंद्रसेनंचसप्तत्यासूतंचन
वभिःशरैः द्रुमसेनंचतुःषष्ट्यानिजघानमहारथः चक्ररक्षेहतेशल्यःपांडवेनमहात्मना
निजघानततोराजाचेदीन्वैपंचविंशतिः सात्यकिंपंचविंशत्याभीमसेनंचपंचभिः माद्रीपु
त्रौशतेनाजौविव्याधनिशितैःशरैः ५४ एवंविचरतस्तस्यसंग्रामेराजसत्तम संप्रेषयन्शिता
न्पार्थःशरानाशीविषोपमान् ५५ ध्वजाग्रंचास्यसमरेकुंतीपुत्रोयुधिष्ठिरः प्रमुखेवर्तमान
स्यभल्लेनापहरद्रथात् ५६ पांडुपुत्रेणवैतस्यकेतुःछिन्नोमहात्मना निपतंतमपश्याम।
गिरिशृंगमिवाहतं ५७ ध्वजंनिपतितंदृष्ट्वापांडवंचव्यवस्थितं संक्रुद्धोमद्रराजोभूच्छरवर्षं ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मुमोचह ५८ शल्यः सायकवर्षेण पर्जन्य इव वृष्टिमान् अभ्यवर्षदमेयात्मा तावुभौ भरतर्ष
र्षभः ५९ सात्यकिं भीमसेनं च माद्रीपुत्रौ च पांडवौ एकैकं पंचभिर्विद्ध्वा युधिष्ठिरमपीडयत् ६०
ततो बाणमयं जालं विततं पांडवोरसि अपश्याम महाराज मेघजालमिवोद्गतं ६१ तस्य शल्यो
रणे क्रुद्धः शरैः संनतपर्वभिः दिशः संछादयामास प्रदिशश्च महारथः ६२ ततो युधिष्ठिरो रा
जा बाणजालेन पीडितः बभूव हतविक्रांतो जंभो वृत्रहणा यथा ६३ इति श्रीमहाभारते शल्य
पर्वणि गदायुद्धे संजय उवाच पीडिते धर्मराजे तु मद्रराजेन मारिष सात्यकिर्भीमसेनश्च मा
द्रीपुत्रौ च पांडवौ परिवार्य रथैः शल्यं पीडयामासुराहवे १ तमेकं बहुभिर्दृष्ट्वा पीड्यमानं म
हारथैः साधुवादो महाराज सिद्धाश्चासन्प्रहर्षिताः २ आश्चर्यमित्यभाषंत मुनयश्चापि संग
ताः भीमसेनो रणे शल्यं शल्यभूतं पराक्रमे ३ एकेन विद्ध्वा बाणेन पुनर्विव्याध सप्तभिः
सात्यकिश्च शतेनैनं धर्मपुत्रपरीप्सया ४ मद्रेश्वरमवाकीर्य सिंहनादमथानदत् नकुलः
पंचभिश्चैनं सहदेवश्च सप्तभिः ५ विद्ध्वा तं तु पुनस्तूर्णं ततो विव्याध सप्तभिः स तु शूरो रणे
यत्नः पीडितस्तैर्महारथैः ६ विकृष्य कार्मुकं घोरं वेगघ्नं भारसाधनं सात्यकिं पंचविंशत्या ।
शल्यो विव्याध मारिष ७ भीमसेनं तु सप्तत्या नकुलं सप्तभिस्तथा ततः सविशिखं चापं सह

शा०प०

२४

देवस्यचिच्छिदे ८ छित्वाभल्लेनसमरेविव्याधैनंत्रिसप्तभिः सहदेवस्ततस्समरेमातुलंभूरिवर्चसं ९
सज्यमन्यद्धनुःकृत्वापंचभिःसमताडयत् शरैराशीविषाकारैर्ज्वलज्ज्वलनसंनिभैः १० सारथिं
चास्यसमरेशरेणानतपर्वणा विव्याधभृशसंक्रुद्धस्तंचभूयस्त्रिभिःशरैः ११ भीमसेनस्ततस्सप्तत्या
सात्यकिर्नवभिःशरैः धर्मराजस्तथाषष्ट्यागात्रेशल्यंसमर्दयत् १२ ततःशल्योमहाराजनि
विद्धस्तैर्महारथैः सुस्रावरुधिरंगात्रैर्गैरिकंपर्वतोयथा १३ तांश्चसर्वान्महेष्वासान्पंचभिःपं
चभिःशरैः विव्याधतरसाराजंस्तदद्भुतमिवाभवत् १४ ततोपरेणभल्लेनधर्मपुत्रस्यमारिष
धनुश्चिच्छेदसमरेसज्यंसमहारथः १५ अथान्यद्धनुरादायधर्मपुत्रोयुधिष्ठिरः साश्वसूत
ध्वजरथंशल्यंप्राच्छादयच्छरैः १६ सछाद्यमानःसमरेधर्मपुत्रस्यसायकैः युधिष्ठिरमथावि
ध्यद्दशभिर्निशितैःशरैः १७ सात्यकिस्ततःक्रुद्धोधर्मपुत्रेशरार्दिते मद्राणामधिपंशूरंशरा
रैर्विव्याधपंचभिः १८ ससात्यकेःप्रचिच्छेदक्षुरप्रेणमहद्धनुः भीमसेनमुखांस्तांश्चत्रिभि
स्त्रिभिरताडयत् १९ तस्यक्रुद्धोमहाराजसात्यकिःसत्यविक्रमः तोमरंप्रेषयामासस्वर्णदंडंम
हाधनं २० भीमसेनोथनाराचंज्वलंतमिवपन्नगं नकुलःसमरेशक्तिंसहदेवोगदांशुभां
२१ धर्मराजःशतघ्नींचजिघांसुःशल्यमाहवे तानापततएवाशुपंचानांवैभुजच्युतान् २२

२४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सात्यकिप्रहितंशल्योभल्लेश्चिच्छेदतोमरं प्रहितंभीमसेनेनशरंकनकभूषणं २३ द्विधाचि
च्छेदसमरेक्षतहस्तःप्रतापवान् नकुलप्रेषितांशक्तिंहेमदंडांभयावहां २४ गदांचसहदेवेन।
शरौघैःसमवारयत् शराभ्यांचैशातनप्त्रींतांराजतश्चिच्छेदभारत २५ पश्यतांपांडुपुत्राणांसिंहना
दंननादच नामृष्यत्तत्रशैनेयःशत्रोर्विजयमाहवे २६ अथान्यद्धनुरादायसात्यकिःक्रोधमूर्छि
तः द्वाभ्यांमद्रेश्वरंविध्वासारथिंचत्रिभिःशरैः २७ ततःशल्योरणेराजन्सर्वांस्तान्दशभिःशरैः
विव्याधसमरेक्रुद्धस्तोत्रैरिवमहाद्विपान् २८ तेवार्यमाणाःसमरेमद्रराज्ञामहारथाः नशेकुः
समरेस्थातुंतस्यशत्रुनिषूदनाः २९ ततोदुर्योधनोराजा दृष्ट्वाशल्यस्यविक्रमं निहतान्पांडवा
न्मेनेपंचालानथसृंजयान् ३० ततोराजन्महाबाहुर्भीमसेनःप्रतापवान् संत्यज्यमनसाप्राणा
न्मद्राधिपमयोधयत् ३१ नकुलःसहदेवश्चसात्यकिश्चमहारथः परिवार्यतदाशल्यंसमंता
द्व्यकिरन्शरैः ३२ सचतुर्भिर्महेष्वासैःपांडवानांमहारथैः वृतस्तान्योधयामाससमद्रराजःप्रताप
वान् ३३ तस्यधर्मसुतोराजन्क्षुरप्रेणमहाहवे चक्ररक्षंजघानाशुमद्रराजस्यपार्थिवः ३४ तस्मिं
स्तुनिहतेशूरेचक्ररक्षेमहारथे मद्रराजोपिबलवान्सैनिकानावृणोच्छरैः ३५ समावृतांस्तत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प०
२५

लोस्तुराजन्वीरस्तस्मैनिकात् चिंतयामाससमरेधर्मपुत्रोयुधिष्ठिरः ३६ कथंनुसमरेशक्यंतन्मा
धववचोमहत् नहिक्रुद्धोरणेराजन्नुत्पयेतवलंमहत् ३७ ततःसरथनागाश्वाःपांडवाःपांडु
पूर्वज मद्रराजेसमापेतुःपीडयंतःसमंततः ३८ नानाशस्त्रौघबहुलांशस्त्रवृष्टिंसमुद्यतां व्य
धमत्समरेराजामहाभ्राणीवमारुतः ३९ ततःकनकपुंखानांशल्यक्षिप्तांवियद्गतां शरवृ
ष्टिमपश्यामशलभानामिवायतिं ४० तेशरामद्रराजेनप्रेषितारणमूर्धनि संपतंतस्मदृ
श्यंतेशकुनानांव्रजाइव ४१ मद्रराजधनुर्मुक्तैःशरैःकनकभूषणैः निरंतरमिवाकाशंसं
वभूवजनाधिप ४२ नपांडवानांनास्माकंतत्रकिंचिद्व्यदृश्यत वाणांधकारेमहतिकृतेतत्र
महाहवे ४३ मद्रराजेनवलिनालाघवाच्छरवृष्टिभिः चाल्यमानंतुतंदृष्ट्वापांडवानांमहा
र्णवं ४४ विस्मयंपरमंजग्मुर्देवगंधर्वमानवाः सचतान्सर्वतोयत्नात्शरैःसंछाद्यभारत
४५ धर्मराजमवछाद्यसिंहवद्व्यनदन्मुहुः तेछन्नाःसमरेतेनपांडवानांमहारथाः ४६
नशेकुस्तेततोयुद्धेप्रत्युद्यातुंमहारथं धर्मराजपुरोगास्तुभीमसेनमुखारथाः ४७ नजग्मुः
समरेशूरंशल्यमाहवशोभिनं इतिशल्यपर्वणि ९९ संजयउवाच अर्जुनोद्रौणिनाविद्धो २५

युद्धेबहुभिरायसैः तस्मचानुचरैः शूरैः त्रिगर्त्तानांमहारथैः १ द्रोणिर्विव्याधसमरेत्रिभिरेवशि
लीमुखैः तथैतरान्महेष्वासान्द्वाभ्यांद्वाभ्यांधनंजयः २ भूयश्चैवमहाराजशरवर्षैरवाकिर
न् शरकंटकितांस्तेतुतावकाभरतर्षभ ३ नजह्नुःपार्थमासाद्यताड्यमानाःशितैःशरैः अर्जुनंर
थवंशेनद्रोणपुत्रपुरोगमाः ४ अयोधयंतसमरेपरिवार्यमहारथाः तेस्तदिप्ताःशराराजन्
कार्तस्वरविभूषिताः ५ अर्जुनस्यरथोपस्थंपूरयामासुरंजसा तथाकृष्णौमहेष्वासौवृषभौ
सर्वधन्विनौ ६ शरैर्वीक्ष्यविनुन्नांगौप्रहृष्टायुद्धदुर्मदाः कूवरंरथचक्राणिईषायोक्त्राणिवै।
विभो ७ युगंचैवानुकर्षंचशरभूतमभूत्तदा नैतादृशंदृष्टपूर्वंराजन्नैवचनश्रुतं ८ यादृ
शंतत्रपार्थस्यतावकाःसंप्रचक्रिरे सरथःसर्वतोभातिचित्रपुंखैःशितैःशरैः ९ उल्काश
तैःसंप्रदीप्तंविमानमिवभूतले ततोर्जुनोमहाराजशरैःसन्नतपर्वभिः १० अवाकिरत्तां
पृतनांमेघोवृष्ट्यायथाचलं तेवध्यमानाःसमरेपार्थनामांकितैःशरैः ११ पार्थभूतमम
संततेप्रेक्षमाणास्तथाविधं ततोप्यद्भुतशरज्वालोधनुःशब्दानिलोमहान् १२ सैन्येंधनंददाहा।
शुतावकंपार्थपावकः चक्राणांपततांचापियुगानांचधरातले १३ तूणीराणांपताकानांध्व
जानांचरथैःसह ईषाणामनुकर्षाणांत्रिवेणूनांचभारत १४ अक्षाणामथयोक्त्राणांप्र।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो॰प॰
४६

तोदानां च सर्वशः शिरसां पततां चापि कुंडलोष्णीषधारिणां १५ भुजानां च महाभागास्केयानां
च समंततः छत्राणां व्यजनैः सार्धं मुकुटानां च राशयः १६ समदृश्यंत पार्थस्य रथमार्गेषु
भारत तत्र क्रुद्धस्य पार्थस्य रथमार्गो विशांपते १७ अगम्यरूपा पृथिवी मांसशोणितकर्दमा
बभूव भरतश्रेष्ठ रुद्रस्याक्रीडनं यथा १८ भीरूणां त्रासजननं शूराणां हर्षवर्धनं हत्वा तु स
मरे पार्थः सहस्रे द्वे परंतपः १९ रथानां सवरूथानां विधूमोग्निरिव ज्वलन् यथा हि भगवा
नग्निर्जगद्दग्ध्वा चराचरं २० विधूमो दृश्यते राजंस्तथा पार्थो धनंजयः द्रोणिस्तु समरे दृ
ष्ट्वा पांडवस्य पराक्रमं २१ रथेनातिपताकेन पांडवं प्रत्यवारयत् तावुभौ पुरुषव्याघ्रौ ता
वुभौ धन्विनां वरौ समीयतुस्तदान्योन्यं परस्परवधैषिणौ तयोरासीन्महाराज बाणवर्षं सु
दारुणं जीमूतयोर्यथा वृष्टिस्तपांते भरतर्षभ २२ अन्योन्यस्पर्धिनौ तौ तु शरैः सन्नतपर्व
भिः ततक्षतुस्तदान्योन्यं शृंगाभ्यां वृषभाविव २३ तयोर्युद्धं महाराज चिरं सममिवाभवत्
शस्त्राणां संगमश्चैव घोरस्तत्राभवत्ततः २४ ततोर्जुनं द्वादशभी रुक्मपुंखैः सुतेजनैः वा
सुदेवं च दशभिर्विव्याध भरतर्षभ २५ ततः प्रहर्षात् बीभत्सुर्व्याक्षिपद्गांडिवं धनुः मान
यित्वा मुहूर्तं तु गुरुपुत्रं महाहवे २६ व्यश्वसूतरथं चक्रे सव्यसाची परंतपः मृदुपूर्वं तत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शैनेयंपुनःपुनरताडयत् १७ हताश्वस्तुरथेतिष्ठन्द्रोणपुत्रस्तदास्मयन् मुशलंपांडुपुत्रायचिक्षे
पपरिघोपमं १८ तमापतंतंसहसाहेमपट्टविभूषितं चिछेदसप्तधावीरःपार्थःशत्रुनिवर्ह
णः १९ सछिन्नंमुसलंदृष्ट्वाद्रौणिःपरमकोपनः आददेपरिघंघोरंनगेंद्रशिखरोपमं २० चि
क्षेपचैवपार्थायद्रौणिर्युद्धविशारदः तमंतकमिवक्रुद्धंपरिघंप्रेक्ष्यपांडवः २१ अर्जुनस्त्वरि
तोजघ्नेपंचभिःसायकोत्तमैः सछिन्नःपतितोभूमौपार्थबाणैर्महाहवे २२ दारयन्पृथिवीं।
द्राणांमनांसीवचभारत ततोपरैस्त्रिभिर्भल्लैर्द्रौणिंविव्याधपांडवः २३ सोतिविद्धोबलवता
पार्थेनसुमहात्मना नाकंपतततोद्रौणिःपौरुषेस्वेव्यवस्थितः २४ सुरथंतुततोराजन्
भारद्वाजोमहारथः अवाकिरत्छरव्रातैःसर्वक्षत्रस्यपश्यतः ततस्तुसुरथोप्याजौपांचालानां
महारथः रथेनमेघघोषेणद्रौणिमेवाभ्ययावत २५ विकर्षन्वैधनुःश्रेष्ठंसर्वभारसहंदृढ
ज्वलनाशीविषनिभैःशरैश्चैनमवाकिरन् सुरथंवीक्ष्यसंक्रुद्धमापतंतंमहारथं चुकोपसम
रेद्रौणिर्दंडाहतइवोरगः २६ त्रिशिखांभ्रुकुटींकृत्वासृक्किणीपरिसंलिहन् उद्वीक्ष्यसुरथंको
पाद्धनुर्ज्यामवमृज्यच २७ मुमोचतीक्ष्णंनाराचंयमदंडोपमद्युतिं सतस्यहृदयंभित्वाप्रवि
वेशातिवेगतः २८ शक्राशनिरिवोत्सृष्टाविदार्यधरणीतले ततःसपतितोभूमौनाराचे।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा॰प॰
१२

नसमाहतः ३९ वज्रेणवयथाशृंगंपर्वतस्येवदीर्यतः तस्मिन्विनिहतेवीरेद्रोणपुत्रःप्रतापवा
न् ४० आनुरोहरथंतूर्णंतमेवरथिनांवरः ततःसज्जोमहाराजद्रौणिराहवदुर्मदः ४१ अर्जुनंयो
धयामाससंसप्तकवृतोरणे तत्रयुद्धंमहच्चासीदर्जुनस्यपरैःसह ४२ मध्यंदिनगतेसूर्येयमरा
ष्ट्रविवर्धनं तत्राश्चर्यमपश्यामदृष्ट्वातेषांपराक्रमं ४३ यदेकोयुगपद्वीरान्समयोधयदर्जुनः
विमर्दःसुमहानासीदेकस्यबहुभिःसह ४४ शतक्रतोर्यथापूर्वंमहत्यादैत्यसेनया ४५ इति
श्रीमहाभारतेशल्यपर्वणि २४ संजयउवाच दुर्योधनोमहाराजधृष्टद्युम्नश्चपार्षतः चक्रतुः
सुमहद्युद्धंशरशक्तिसमाकुले १ तयोरासन्महाराजशरधाराःसहस्रशः अंबुदानांयथाकाले
जलधाराःसमंततः २ राजाचपार्षतंविध्वाशरैःपंचभिराशुगैः द्रोणहंतारमुग्रेषुंपुनर्विव्याध
सप्तभिः ३ धृष्टद्युम्नस्तुसमरेबलवान्दृढविक्रमः सप्तत्याविशिखानांवैदुर्योधनमपीडयत्
४ पीडितंवीक्ष्यराजानंसोदर्याभरतर्षभ महत्यासेनयासार्धंपरिवव्रुःस्मपार्षतं ५ सतैःपरिवृतः
शूरःसर्वतोतिरथैर्भृशं व्यचरत्समरेराजन्दर्शयन्हस्तलाघवं ६ शिखंडीकृतवर्माणंगौतमंच
महारथं प्रभद्रकैःसमायुक्तोयोधयामासधन्विनौ ७ तत्रापिसुमहद्युद्धंघोररूपंविशांपते प्रा
णान्संत्यजतांयुद्धेप्राणद्यूताभिदेवने ८ शल्यःसायकवर्षाणिविमुंचन्सर्वतोदिशं पांड

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वान्पीडयामाससमसात्यकिवृकोदरान् ९ तथा तौ च यमौ युद्धे यमतुल्यपराक्रमौ योधयामास राजेंद्र
वीर्येण स्वबलेन च १० शल्यसायकनुन्नानां पांडवानां महामृधे त्रातारं नाभ्यगच्छंत केचित्तत्र महा
रथाः ११ ततस्तु नकुलः शूरो धर्मराजे प्रपीडिते अभिदुद्राव वेगेन मातुलं मातृनंदनः १२ संछा
द्य समरे वीरं नकुलः परवीरहा विव्याध चैनं दशभिः स्मयमानस्तनांतरे १३ सर्वपारशवैर्बाणैः क
र्मारपरिमार्जितैः स्वर्णपुंखैः शिलाधौतैर्धनुर्यंत्रप्रचोदितैः १४ शल्यस्तु पीडितस्तेन स्वस्रीयेण म
हात्मना नकुलं पीडयामास पत्रिभिर्नतपर्वभिः १५ ततो युधिष्ठिरो राजा भीमसेनोथ सात्यकिः
सहदेवश्च माद्रेयो मद्रराजमुपाद्रवन् १६ तानापतत एवाशु पूरयन् रथनिःस्वनैः दिशश्च प्रदि
शश्चैव कंपयानश्च मेदिनीं १७ प्रतिजग्राह समरे सेनापतिरमित्रजित् युधिष्ठिरं त्रिभिर्विद्ध्वा भीम
सेनं च पंचभिः १८ सात्यकिं च शतेनाजौ सहदेवं त्रिभिः शरैः ततस्तु सशरं चापं नकुलस्य महात्म
नः १९ मद्रेश्वरः क्षुरप्रेण तदा चिच्छेद मारिष तदशीर्यत विच्छिन्नं धनुः शल्यस्य सायकैः २० अथा
न्यद्धनुरादाय माद्रीपुत्रो महारथः मद्रराजरथं तूर्णं पूरयामास पत्रिभिः २१ युधिष्ठिरस्तु मद्रेशं सहदेव
श्च मारिष दशभिर्दशभिर्बाणैरुरस्येनमविध्यतां भीमसेनस्ततः षष्ट्या सात्यकिर्दशभिः शरैः २२ मद्र
राजमभिद्रुत्य जघ्नतुः कंकपत्रिभिः मद्रराजस्ततः क्रुद्धः सात्यकिं नवभिः शरैः २३ विव्याध भूयः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रा॰ व॰ समंताच्छुभ्राणांनतपर्वणां अथास्यसशरंचापंमुष्टौचिच्छेदमारिष २४ हयांश्चचतुरःसंख्येप्रेषयामा
५८ समृत्यवे विरथंसात्यकिंकृत्वामद्रराजोमहारथः २५ विशिखानांशतेनैनमाजघानसमंततः मा
द्रीपुत्रौचसंरब्धौभीमसेनंचपांडवं २६ युधिष्ठिरंचकौरव्यविव्याधदशभिःशरैः तत्राद्भुतमपश्याम
मद्रराजस्यपौरुषं २७ यदेनंसहिताःपार्थानाभ्यवर्तंतसंयुगे अथान्यंरथमास्थायसात्यकिः
सत्यविक्रमः २८ पीडितान्पांडवान्दृष्ट्वामद्रराजवशंगतान् अभिदुद्राववेगेनमद्राणामधिपंब
ली २९ आपतंतंरथंतस्यशल्यःसमितिशोभनः प्रत्युद्ययौरथेनैवमत्तोमत्तमिवद्विपं ३० ससंनिपा
तस्तुमुलोबभूवाद्भुतदर्शनः सात्यकेश्चैवशूरस्यमद्राणामधिपस्यच ३१ यादृशोवैपुरावृत्तःशं
बरामरराजयोः सात्यकिःप्रेक्ष्यसमरेमद्रराजमवस्थितं ३२ विव्याधदशभिर्बाणैस्तिष्ठतिष्ठेतिचा
ब्रवीत् मद्रराजस्तुसुभृशंविद्धस्तेनमहात्मना ३३ सात्यकिंप्रतिविव्याधचित्रपुंखैःशितैःशरैः
ततःपार्थामहेष्वासाःसात्वताभिसृतंनृपं ३४ अभ्यवर्त्तन्रथैस्तूर्णंमातुलंवधकाम्यया ततआ
सीत्परामर्दस्तुमुलःशोणितोदकः ३५ शूराणांयुध्यमानानांसिंहानामिवनर्दतां तेषामासीन्महा
राजव्यतिक्षेपःपरस्परं ३६ सिंहानामामिषेप्सूनांकूजतामिवसंयुगे तेषांबाणसहस्रौघैरा
कीर्णावसुधाभवत् ३७ अंतरिक्षंचसहसाबाणभूतमभूत्तदा शरांधकारंसहसाकृतंतेनस ५८

मेततः ४८ अभ्यद्रावयेवसंजज्ञेशरैर्युक्तैर्महात्मभिः तत्रराजन्शरैर्मद्रैर्निर्मुक्तैरिवपन्नगैः ४९ स्व
र्णपुंखैःप्रकाशद्भिर्व्यरोचंततदिशस्तदा तत्राद्भुतंपरंचक्रेशल्यःशत्रुनिबर्हणः ५० यदेकःसमरेशू
रोयोधयामासवैबहून् मद्रराजभुजोत्सृष्टैःकंकबर्हिणवाजितैः ५१ संपतद्भिःशरैर्नीरैरवकीर्य
तमेदिनी तत्रशल्यरथंराजन्विचरंतंमहाहवे ५२ अपश्यामयथापूर्वंशक्रस्यासुरसंक्षये ५३
इतिश्रीमहाभारतेशल्यपर्वणि १२ संजयउवाच ततःसैन्यास्तवविभोमद्रराजपुरस्कृताः पुन
रभ्यद्रवन्पार्थान्वेगेनमहतारणे १ पीडितास्तावकाःसर्वेप्रधावंतोरणोत्कटाः क्षणेनैवचपा
र्थानांबहुत्वात्समलोडयन् तेवध्यमानाःकुरुभिःपांडवानावतस्थिरे निवार्यमाणाभीमेनप
श्यतोःकृष्णयोस्तदा २ ततोधनंजयःक्रुद्धःकृपंसहपदानुगैः अवाकिरच्छरौघेणकृतवर्माण
मेवच ४ शकुनिंसहदेवस्तुसहसैन्यमवाकिरत् नकुलःपार्श्वतःस्थित्वामद्रराजमवैक्षत
५ द्रौपदेयानरेंद्रांश्चभूयिष्ठंसमवारयन् द्रोणपुत्रंचपांचाल्यःशिखंडीसमवारयत् ६ भीम
सेनस्तुराजानंगदापाणिरवारयत् शल्यंतुसहसैन्येनकुंतीपुत्रोयुधिष्ठिरः ७ ततःसमभव
त्सैन्यंसंसक्तंतत्रतत्रह तावकानांपरेषांचसंग्रामेष्वनिवर्तिनां ८ तत्रपश्यामसुमहत्कर्मशल्यस्य
तिमहद्रणे यदेकःसर्वसैन्यानिपांडवानामयुध्यत ९ अदृश्यततदाशल्योयुधिष्ठिरसमीपतः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प०
२४

णोवंद्रमसोभ्याशेशनैश्वरइवग्रहः १० पीडयित्वातुराजानंशरैराशीविषोपमैः अभ्यधावत्पुनर्भी
मंशरवर्षैरवाकिरत् ११ तस्यतल्लाघवंदृष्ट्वातथैवचकृतास्त्रतां अपूजयन्ननीकानिपरेषांताव
कानिच १२ पीड्यमानास्तुसमरेपांडवाभृशपीडिताः प्राद्रवंतरणंहित्वाक्रोशमानेयुधिष्ठिरे १३
वध्यमानेष्वनीकेषुमद्रराजेनपांडवः अमर्षवशमापन्नोधर्मराजोयुधिष्ठिरः १४ ततःपौरुष
मास्थायमद्रराजमताडयत् जयोवास्तुवधोवास्तुकृतबुद्धिर्महारथः १५ समाहूयाब्रवीत्स
र्वान्भ्रातॄन्कृष्णंचमाधवं भीष्मोद्रोणश्चकर्णश्चयेचान्येपृथिवीक्षितः १६ कौरवार्थेपराक्रां
ताःसंग्रामेनिधनंगताः यथाभागंयथोत्साहंभवंतःकृतपौरुषाः १७ भागोवशिष्टएकोयं।
ममशल्योमहारथः सोहमद्ययुधाजेतुमाशंसेमद्रकाधिपं १८ तत्रयन्मानसंमह्यंतत्सर्वं
निगदामिवः चक्ररक्षाविमौवीरौममभाद्रवतीसुतौ १९ अजेयौवासवेनापिसमरेशूरसम
तौ साध्विमौमातुलंयुद्धेक्षत्रधर्मपुरस्कृतौ २० मदर्थंप्रतियुध्येतांमानार्हौसत्यसंगरौ मांवाश
ल्योरणेहंतातेवाहंभद्रमस्तुवः २१ इतिसत्यामिमांवाणींलोकवीरानिबोधतयोत्स्येहंमातुले।
नाद्यक्षात्रधर्मेणपार्थिवाः २२ स्वयंसमभिसंधायविजयायेतरायच तस्यमेप्यधिकंशस्त्रं।
सर्वोपकरणानिच संयुज्यंतुरथेक्षिप्रंशास्त्रवद्रथयोजकाः शैनेयोदक्षिणंचक्रंधृष्टद्युम्न
२४

स्तयोरन्तरे श्रेष्ठो योयो भवन्नृपसत्तम पार्थो धनंजयः शूरः सोमभागाद्यस्तु भीमः पार्श्वं ततो वरः २५ एव

मभ्ययिकः शल्यात्मविष्यामि महामृधे एवमुक्तास्तथा चक्रुस्ते राजन्नः प्रियैषिणः ततः प्रह

र्षः सैन्यानां पुनरासीन्नरा मृधे पांचालानां सोमकानां मत्स्यानां च विशेषतः २७ प्रतिज्ञां तां तदा रा

ज्ञां कृत्वा मद्रेशमभ्ययात् ततः शंखांश्च भेरीश्च शतशश्चैव पुष्कलान् २८ अवादयंत पांचालाः सिं

हनादांश्च नेदिरे तेभ्यधावंत संरब्धा मद्रराजं तरस्विनं २९ महता हर्षजेनाथ नादेन कुरुपुंगवाः

ह्रादेन गजघंटानां शंखानां निनदेन च ३० तूर्यशब्देन महता नादयंतश्च मेदिनीं तान्प्रत्यगृह्णा

त्पुत्रस्ते मद्रराजश्च वीर्यवान् महामेघानिव बहून् शैलावस्तोदयाविव ३१ शल्यस्तु समरश्ला

घी धर्मराजमरिंदमं ववर्ष शरवर्षेण वर्षेणेव मघवानिव ३२ तथैव कुरुराजोपि प्रगृह्य रुचिरं धनुः

द्रोणोपदेशान्विविधान्दर्शयानो महामनाः ३३ ववर्ष शरवर्षाणि चित्रं लघु च सुष्ठु च न चास्य

विवरं कश्चिद्ददर्श चरतो रणे ३४ तावुभौ विविधैर्बाणैस्ततक्षाते परस्परं शार्दूलावामिषप्रेप्सू प

राक्रांताविवाहवे ३५ भीमस्तु तव पुत्रेण युद्धशौंडेन संगतः पांचाल्यः सात्यकिश्चैव माद्रीपुत्रौ च

पांडवौ शकुनिप्रमुखान्वीरान्प्रत्यगृह्णन्समंततः तदासीत्तुमुलं युद्धं पुनरेव जयैषिणां ३६ ताव

कानां परेषां च राजन् दुर्मंत्रितेन तव दुर्योधनस्तु भीमस्य शरेणानतपर्वणा ३८ चिच्छेदादिश्य संग्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श॰प॰ मेध्वजंहेमपरिष्कृतं सकिंकिणीकजालेनमहताचारुदर्शनः ३९ पपातरुचिरःसंख्येभीमसेनस्य
१० पश्यतः पुनश्चान्यंधनुश्छित्वागजराजकरोपमं ४० क्षुरेणशितधारेणप्रचकर्त्तनराधिपः सच्छि
न्नधन्वातेजस्वीरथशक्त्यासुतंतव ४१ विभेदोरसिविक्रम्यसरथोपस्थआविशत् तस्मिन्मोहम
नुप्राप्तेपुनरेववृकोदरः ४२ यंतुरेवशिरःकायात्क्षुरेणापाहरत्तदा हतसूताहयास्तस्यरथमा
दायभारत ४३ व्यद्रवंतदिशोराजन्हाहाकारस्तदाभवत् तमभ्यधावत्त्राणार्थंद्रोणपुत्रोम
हारथः ४४ कृपश्चकृतवर्माचपुत्रंतवपरीप्सवः तस्मिन्विलुलितेसैन्येत्रस्तास्तस्यपदानुगाः
४५ गांडीवधन्वाविस्फार्यधनुस्तानहनच्छरैः युधिष्ठिरस्तुमद्रेशमभ्यधावदमर्षितः ४६ स्वयं
संचोदयन्हयान्दंतवर्णान्मनोजवान् तत्राश्चर्यमपश्यामकुंतीपुत्रेयुधिष्ठिरे ४७ पुराभूत्वा
मृदुर्दांतोयत्तदादारुणोभवत् विवृत्ताक्षस्तुकौंतेयोवेपमानश्चमन्युना ४८ चिछेदयोधान्निशि
तैःशरैःशतशोथसहस्रशः यांयांप्रत्युद्ययौसेनांतांतांज्येष्ठःसपांडवः ४९ शरैरपातयद्राजन्गिरी
न्वज्रैरिवोत्तमैः साश्वसूतध्वजरथान्रथिनःपातयन्बहून् ५० आक्रीडदेकोबलवान्पवनस्तो
यदानिव साश्वारोहांश्चतुरगान्पत्तींश्चैवसहस्रशः व्यपोथयतसंग्रामेक्रुद्धोरुद्रःपशूनिवशून्य
मायोधनंकृत्वाशरवर्षैःसमंततः ५२ अभ्यद्रवतमद्रेशंतिष्ठतिष्ठेतिचाब्रवीत् तस्यतच्चरितं १०

दृष्ट्वा संग्रामे भीमकर्मणः ५३ विद्रुतास्तावकाः सर्वे शल्यस्त्वेनं समभ्ययात् ततस्तौ भृशसंक्रुद्धौ प्र
ध्माय सलिलोद्भवौ ५४ समाहूय तदान्योन्यं भर्त्सयन्तौ समीयतुः शल्यस्तु शरवर्षेण पीडयामास पां
डवं ५५ मद्रराजं तु कौन्तेयः शरवर्षैरवाकिरत् अदृश्येतां तदा राजन् कंकपत्रैः शिलाचितौ ५६ उद्भि
न्नरुधिरौ शूरौ मद्रराज युधिष्ठिरौ पुष्पिताविव शुशुभाते वसंते किंशुकौ यथा दीप्यमानौ महात्मानौ
प्राणद्यूतेन दुर्मदौ दृष्ट्वा सर्वाणि सैन्यानि नाध्यवस्यंस्तयोर्जयं ५७ हत्वा मद्राधिपं पार्थो भोक्ष्यतेद्य व
सुंधरां शल्यो वा पांडवं हत्वा दद्याद्दुर्योधनाय गां ५८ इतीव निश्चयो नाभूद्योधानां तत्र भारत प्रद
क्षिणमभूत्सर्वं धर्मराजस्य पृथ्वीतः ५९ ततः शरशतं शल्यो मुमोचाथ युधिष्ठिरे धनुश्चास्य शि
ताग्रेण क्षुरप्रेण निकृंतत ६० सोन्यत्कार्मुकमादाय शल्यं शरशतैस्त्रिभिः अविध्यत्कार्मुकं चास्य
क्षुरेण निरकृंतत ६१ अथास्य निजघानाश्वांश्चतुरो नतपर्वभिः द्वाभ्यामतिशिताग्राभ्यामुभौ
च पार्ष्णिसारथी ६२ ततोस्य दीप्यमानेन पीतेन निशितेन च प्रमुखे वर्तमानस्य भल्लेनापाहर
द्ध्वजं ६३ ततः प्रभग्नं तत्सैन्यं दौर्योधनमरिंदम ततो मद्राधिपं द्रौणिरभ्यधावत्तथाकृते ६४
आरोप्य चैनं स्वरथे त्वरमाणः प्रदुद्रुवे मुहूर्त्तमिव तौ गत्वा नर्दमाने युधिष्ठिरे ६५ स्थित्वा ततो
मद्रपतिरन्यं स्यंदनमास्थितः विधिवत्कल्पितं शुभ्रं महांबुदनिनादितं ६६ सज्जयंत्रोपकरणं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श.प. हिषतांलोमहर्षणं इतिशल्यपर्वणि ८३ संजयउवाच अथान्यद्धनुरादायबलवान्वेगवत्तरं यु
३१ धिष्ठिरंमद्रपतिर्विद्ध्वासिंहइवोन्वदत् १ ततःसशरवर्षेणपर्जन्यइववृष्टिमान् अभ्यवर्षदमे
यात्माक्षत्रियान्क्षत्रियर्षभः २ सात्यकिंदशभिर्विध्वाभीमसेनंत्रिभिःशरैः सहदेवंत्रिभिर्वि
ध्वायुधिष्ठिरमपीडयत् ३ तांस्तानन्यान्महेष्वासान्साश्वान्सरथकुंजरान् अर्दयामासविशिखै
रुल्काभिरिवकुंजरान् ४ कुंजरान्कुंजरारोहानश्वानश्वप्रयायिनः रथांश्चरथिनःसार्धंजघा
नरथिनांवरः ५ बाहूंश्चिच्छेदतरसासायुधान्केतनानिच चकारचमहींयोधैस्तीर्णांवेदींकुशै
रिव तथातमरिसैन्यानिघ्नंतंमृत्युमिवांतकं परिवव्रुर्भृशंक्रुद्धाःपांडुपांचालसोमकाः ६
तंभीमसेनश्चशिनेश्चनप्तामाद्र्याश्चपुत्रौपुरुषप्रवीरौ समागतंभीमबलेनराज्ञापर्यापुरन्यो
न्यमथाह्वयंतः ६ ततस्तुशूराःसमरेनरेंद्रनरेश्वरंप्राप्ययुधांवरिष्ठं आवार्यचैनंसमरेन्नवीरंज
घ्नुःशरैःपत्रिभिरुग्रवेगैः ७ संरक्षितोभीमसेनेनराजामाद्रीसुताभ्यामथमाधवेन मद्राधिपं
पत्रिभिरुग्रवेगैस्तनांतरेधर्मसुतोनिजघ्ने ८ ततोरणेतावकानांरथौघाःसमीक्ष्यमद्राधिपतिंश
रार्त्तं पर्याववृःप्रवरास्तेसमग्रादुर्योधनस्यानुमतेपुरस्तात् ९ ततोद्रुतंमद्रजनाधिपोरणेयुधि
ष्ठिरंसप्तभिरभ्यविध्यत् तंचापिपार्थोनवभिःपृषत्कैर्विव्याधराजंस्तुमुलेमहात्मा १० आकर्ण ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शूर्णायतसंप्रयुक्तैः शरैस्तदासंशयितैस्तैलधौतैः अन्योन्यमाच्छादयतां महारथौ मद्राधिपश्चापि युधि
ष्ठिरश्च ११ ततस्तु तूर्णं समरे महारथौ परस्परस्यान्तरमीक्षमाणौ शरैर्भृशं विव्यधतुर्नृपोत्तमौ महा
बलौ शत्रुभिरप्रधृष्यौ १२ तयोर्धनुर्ज्यातलनिस्वनो महान् महेन्द्रवज्राशनितुल्यनिःस्वनः परस्प
रं बाणगणैर्महात्मनोः प्रकर्षतोर्मद्रपपाण्डुवीरयोः १४ तौ चेरतुर्व्याघ्रशिशुप्रकाशौ महावनेष्वा
मिषगृद्धिनाविव विषाणिनौ नागवराविवोभौ ततस्तदा संयुगजातदर्पौ १५ ततस्तु मद्राधि।
पतिर्महात्मा युधिष्ठिरं भीमबलं प्रसह्य विव्याध वीरं हृदयेतिवेगं शरेणसूर्याग्निसमप्रभेण
१७ ततोतिविद्धोथ युधिष्ठिरोपि सुसंप्रयुक्तेन शरेण राजन् जघान मद्राधिपतिं महात्मा मुदं च
लेभे ऋषभः कुरूणां १८ ततो मुहूर्तादिव पार्थिवेन्द्रो लब्ध्वा संज्ञां क्रोधसंरक्तनेत्रः शतेन पार्थं त्वरि
तो जघान सहस्रनेत्रप्रतिमप्रभावः १९ त्वरंस्ततो धर्मसुतो महात्मा शल्यस्य कोपान्नवभिः पृषत्।
कैः भित्त्वा ह्युरस्तपनीयं च वर्म जघान षड्भिस्त्वपरैः पृषत्कैः २० ततस्तु मद्राधिपतिः प्रहृष्टो धनु
र्विकृष्य व्यसृजत्पृषत्कान् द्वाभ्यां शराभ्यां च तथैव राज्ञः चिच्छेद चापं कुरुपुङ्गवस्य २१ नवं ततोन्य
त्समरे प्रगृह्य राजा धनुर्घोरतरं महात्मा शल्यं हि विव्याध शरैः समन्ताद्यथा महेन्द्रो नमुचिं शिताग्रैः
२२ ततस्तु शल्यो नवभिः पृषत्कैर्भीमस्य राज्ञश्च युधिष्ठिरस्य निकृत्य रौक्मे पटुवर्मणी तयो।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श.प.
२२

विद्रावयामास भुजौ महात्मा २१ ततोपरेण ज्वलनार्कतेजसा क्षुरेण राज्ञो धनुरुन्ममाथ कृपस्य
तस्यैव जघान सूतं षड्भिः शरैः सोभिमुखे पपात २२ मद्राधिपस्यापि युधिष्ठिरस्य शरैश्चतुर्भिर्निज
घान वाहान् वाहांश्च हत्वाथ क रोन्महात्मा योधक्षयं धर्मसुतस्य राज्ञः २३ तथा कृते राजनि
भीमसेनो मद्राधिपस्याशु ततो महात्मा छित्त्वा धनुर्वेगवता शरेण द्वाभ्याम विध्यत् सुभृशं नरे
न्द्रं २४ तथापरेणास्य जहार यन्तुः कायाच्छिरः संहननीयमध्यात् जघान चाश्वांश्चतुरः स्वशी
घ्रं तथा भृशं कुपितो भीमसेनः २५ तमग्रणीः सर्वधनुर्धराणामेकं चरन्तं समरे तिवेगं भीमः श
तेनावकिरच्छराणां माद्रीपुत्रः सहदेवस्तथैव २६ तैः सायकैर्मोहितं वीक्ष्य शल्यं भीमः शरैर
स्य चकर्त वर्म स भीमसेनेन निकृत्तवर्मा मद्राधिपश्चर्म सहस्रतारं २७ प्रगृह्य खड्गं च रथान्महा
त्मा प्रस्कन्द्य कुन्तीसुतमभ्यधावत् छित्त्वा रथेषां नकुलस्य सोथ युधिष्ठिरं भीमबलोभ्यधावत्
२८ तं चापि राजानमथापतन्तं क्रुद्धं यथैवान्तकमापतन्तं धृष्टद्युम्नो द्रौपदेयाः शिखण्डी शिने
श्च नप्ता सहसा परीयुः २९ अथास्य चर्माप्रतिमं न्यकृन्तद्भीमो महात्मा नवभिः पृषत्कैः खड्गं च भ
ल्लैर्निचकर्त मुष्टौ नदन् प्रहृष्टस्तव सैन्यमध्ये ३० तत्कर्म भीमस्य समीक्ष्य हृष्टास्ते पाण्डवानां प्रव
राश्च योधाः नादं च चक्रुर्भृशमुत्स्मयन्तः शङ्खांश्च दध्मुः शशिसंनिकाशान् ३१ तेनाथ शब्दे

२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नविभीषणोनतथाभिगुप्तंबलमप्रधृष्यं कोहिमृतंरुधिरेणोक्षितांगंविसंज्ञकल्पंचतदाविष
ण्णं ४२ समद्रराजंसहसावकीर्णोभीमाग्रजैःपांडवयोधमुख्यैः युधिष्ठिरस्याभिमुखंजवेनसिं
होयथामृगरहेतोःप्रयातः ४३ सधर्मराजोनिहताश्वसूतःक्रोधेनदीप्तोज्वलनप्रकाशः दृष्ट्वा
तुमद्राधिपतिंचतूर्णंसमभ्यधावंतमरिंबलेन ४४ गोविंदवाक्यंत्वरितेविचिंत्यदध्रेमतिंशल्य
विनाशनाय सधर्मराजोनिहताश्वसूतोरथेतिष्ठन्शक्तिमेवाभ्यकांक्षत् ४५ तच्चापिशल्यस्य
निशम्यकर्ममहात्मनोभागमथावशिष्टं स्मृत्वामनःशल्यवधेमहात्मायथोक्तमिंद्रावरजस्य
चक्रे ४६ सधर्मराजोमणिहेमदंडांजग्राहशक्तिंकनकप्रकाशां नेत्रेचदीप्तेसहसाविवृत्यमद्रा
धिपंक्रुद्धमनानिरैक्षत् ४७ निरीक्षितोसौनरदेवराज्ञापूतात्मनानिर्हतकल्मषेण आसीन्नयद्भ
स्मसान्मद्रराजस्तदद्भुतंमेप्रतिभातिराजन् ४८ ततस्तुशक्तिंरुचिरोग्रदंडांमणिप्रवेकोज्वलि
तांप्रदीप्तां चिक्षेपवेगात्सुभृशंमहात्मामद्राधिपायप्रवरःकुरूणां ४९ दीप्तामथैनांमहताबले
नसविस्फुलिंगांसहसापतंतीं प्रैक्षंतसर्वेकुरवःसमेतादिवोयुगांतेमहतीमिवोल्कां ५० तांका
लरात्रीमिवपाशहस्तांयमस्यधात्रीमिवचोग्ररूपां सब्रह्मदंडप्रतिमाममोघांससर्जयत्नाद्युधिधर्म
राजः ५१ गंधस्रगग्र्यासनपानभोजनैरभ्यर्चितांपांडुसुतैःप्रयत्नात् संवर्तकाग्निप्रतिमांज्वलं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ह.प. तीं कन्यामथर्वांगिरसीमिवोग्रां ४२ ईशानहेतोः प्रतिनिर्मितां तां त्वष्टारिशृगाममत्वदेहभत्तां भूम्यंत
२२ विलादिज्जलाशयानि प्रगृह्य भूतानि निहंत्वमीशां ४३ तं दापताकामणिवज्रनालां वैडूर्यचित्रांत
पनीयदंडां त्वष्टाप्रयत्नान्नियमेन क्लृप्तां ब्रह्मद्विषामंतकरीममोघां ४४ बलप्रयत्नादधिरूढवे
गांमंत्रैश्च घोरैरभिमंत्र्य यत्नात् ससर्ज मार्गेण च तां वरेण वधाय मद्राधिपतेस्तदानीं ४५ हतोसि पा
पेत्यभिगर्जमानो रुद्रोंधकायांतकरं यथेषुं प्रसार्य बाहुं सुदृढं सुपाणिं क्रोधेन नृत्यन्निव धर्मराजः
४६ तां सर्वशक्त्या प्रहितां सुशक्तिं युधिष्ठिरेणाप्रतिवार्यवीर्यां प्रतिग्रहायाभिननर्द शल्यः सम्य
गुतामग्निरिवाज्यधारां ४७ सा तस्य मर्माणि विदार्य शुभ्रमुरो विशालं च तथैव भित्त्वा विवेश गां
तोयमिवाप्रसक्ता यशो विशालं नृपतेर्दहंती ४८ नासाक्षिकर्णास्यविनिःसृतेन प्रस्यंदता च व्रण
संभवेन संसिक्तगात्रो रुधिरेण सो भूत्क्रौंचो यथा स्कंदहतो महाद्रिः ४९ प्रसार्य बाहू च रथाद्ग
तो गां संछिन्नवर्मा कुरुनंदनेन महेंद्रवाहप्रतिमो महात्मा वज्राहतं शृंगमिवाचलस्य ५० बा
हू प्रसार्याभिमुखो धर्मराजस्य मद्रराट् ततो निपतितो भूमिमिंद्रध्वज इवोच्छ्रितः ५१ स तथाभि
न्नसर्वांगो रुधिरेण समुक्षितः प्रत्युद्गत इव प्रेम्णा भूम्या स नरपुंगवः ५२ प्रियया कांतया कांतः
पतमान इवोरसि चिरं भुक्त्वा वसुमतीं प्रियां कांतामिव प्रभुः ५३ सर्वैरंगैः समाश्लिष्य प्रसुप्त इव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चाभवत् धर्म्यधर्मात्मनायुद्धेनिहतोधर्मसूनुना ५४ सम्यग्हुतमिवस्विष्टः प्रशांतोग्निरिवाध्वरे
शक्त्याविभिन्नहृदयंविप्रविद्धायुधध्वजं ५५ प्रशांतमपिमद्रेशंलक्ष्मीर्नैवविमुंचति ततोयुधि
ष्ठिरश्चापमादायेंद्रधनुःप्रभं ५६ व्यधमद्द्विषतःसंख्येखगराडिवपन्नगान् देहासून्निशितैर्भ
ल्लैरिपूणांनाशयत्क्षणात् ५७ ततःपार्थस्यबाणौघैरावृताःसैनिकास्तव निमीलिताक्षाःक्षि
ण्वंतोभृशमन्योन्यमर्दिताः ५८ त्वरंतोरुधिरंदेहैर्विशस्त्रायुधजीविताः ततःशल्येनिपतिते
मद्रराजानुजोयुवा ५९ भ्रातुस्तुल्योगुणैःसर्वैरथीपांडवमभ्ययात् विव्याधचनरश्रेष्ठोनारा
चैर्बहुभिस्त्वरन् ६० हतस्यापचितिंभ्रातुश्चिकीर्षुर्युद्धदुर्मदः तंविव्याधाशुगैःषड्भिर्धर्मराज
स्त्वरन्निव ६१ कार्मुकंचास्यचिच्छेदक्षुराभ्यांध्वजमेवच ततोस्यदीप्यमानेनसुदृढेनशितेनच
६२ प्रमुखेवर्त्तमानस्यभल्लेनापाहरच्छिरः सकुंडलंतद्ददृशेपतमानंशिरोरथात् ६३ पुण्यक्षय
मनुप्राप्यपतन्स्वर्गादिवच्युतः तस्यापकृष्टशीर्षंतच्छरीरंपतितंरथात् ६४ रुधिरेणावसिक्तां
गंदृष्ट्वासैन्यमभज्यत विचित्रकवचेतस्मिन्हतेमद्रनृपानुजे हाहाकारंप्रकुर्वाणाःकुरवोविप्रद
द्रुवुः शल्यानुजंहतंदृष्ट्वातावकास्त्यक्तजीविताः वित्रेसुःपांडवभयाद्रजोध्वस्तास्तदाभृशं तांस्तथा
भज्यमानांस्तुकौरवान्भरतर्षभ ६५ शिनेर्नप्ताकिरन्बाणैरभ्यवर्त्ततसात्यकिः तमायांतंमहे।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो॰ प॰
३४

ष्वासमप्रधृष्यंदुरासदं १८ हार्दिक्यस्त्वरितोराजन्प्रत्युद्गच्छादभीतवत् तौसमेतौमहात्मानौवार्ष्णे
यावपराजितौ १९ हार्दिक्यःसात्यकिश्चैवसिंहाविवबलोत्कटौ इषुभिर्विमलाभासैश्छादयंतौ
परस्परं २० अर्चिर्भिरिवसूर्यस्यदिवाकरसमप्रभौ चापमार्गबलोद्धूतान्मार्गणान्वृष्णिसिंहयोः
२१ आकाशगानपश्यामपतंगानिवशीघ्रगान् सात्यकिंदशभिर्विध्वाहयांश्चास्यत्रिभिःशरैः
२२ चापमेकेनचिच्छेदहार्दिक्योनतपर्वणा तन्निकृत्तंधनुःश्रेष्ठमपास्यशिनिपुंगवः २३ अ
न्यदादत्तवेगेनवेगवत्तरमायुधं तदादायधनुःश्रेष्ठंवरिष्ठःसर्वधन्विनां २४ हार्दिक्यंदशभि
र्बाणैःप्रत्यविध्यत्स्तनांतरे ततोरथंयुगंईषांचछित्वाभल्लैःसुसंयतैः २५ अश्वांस्तस्यावधीत्तूर्णं
मुभौचपार्ष्णिसारथी ततस्तंविरथंदृष्ट्वाकृपःशारद्वतःप्रभो अपोवाहततःक्षिप्रंरथमारोप्यवी
र्यवान् सारथ्येचहतेराजन्विरथेकृतवर्मणि २६ दुर्योधनबलंसर्वंपुनरासीत्पराङ्मुखं त
त्परेनान्वबुध्यंतसैन्येनरजसावृते बलंचहतभूयिष्ठंतत्तदासीत्पराङ्मुखं ततोमुहूर्त्तात्तेप
श्यन्नाजौभीमंसमभ्युत्थितंते २७ विविधैःशोणिताक्तांगैःप्रसिक्तंपुरुषर्षभ ततोदुर्योधनोदृष्ट्वाभ।
ग्नंचबलमंतिकात् २८ जवेनापततःपार्थानेकःसर्वानवारयत् पांडवान्सरथान्दृष्ट्वाधृष्टद्यु
म्नंचपार्षतं २९ आनर्त्तंचदुराधर्षंशितैर्बाणैरवारयत् तंपरेनाभ्यवर्त्तंतमर्त्यामृत्युमिवागतं। ३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अथान्यं रथमास्थाय हार्दिक्योऽप्यन्ववर्तत ततो युधिष्ठिरो राजा त्वरमाणो महारथः ८२ चतुर्भिर्निज-
घानाश्वान्पत्रिभिः कृतवर्मणः विव्याध गौतमं चापि षड्भिर्भल्लैः सुतेजनैः ८३ अश्वत्थामा ततो राज्ञा
हताश्वं विरथीकृतं तमपोवाह हार्दिक्यं स्वरथेन युधिष्ठिरात् ८४ ततः शारद्वतः षड्भिः प्रत्यविध्य
युधिष्ठिरं विव्याध चाश्वान्निशितैस्तथाष्टाभिः शिलीमुखैः ८५ एवमेतन्महाराज युद्धशेषमव
र्तत तव दुर्मन्त्रिते राजन्सह पुत्रस्य भारत ८६ तस्मिन्महेष्वासवरे विशस्ते संग्राममध्ये कुरुपुंग
वेन पार्थाः समेताः परमप्रहृष्टाः शंखान्प्रदध्मुर्हतमीक्ष्य शल्यं ८७ युधिष्ठिरं च प्रशशंसुरा
जौ पुरा कृते वृत्रवधे यथेंद्रं चक्रुश्च नानाविधवाद्यशब्दान्निनादयन्तो वसुधां समन्तात् ८८
इति शल्यपर्वणि शल्यवधः समाप्तः १ संजय उवाच शल्ये तु निहते राजन्मद्रराजपदानुगाः र
थाः सप्तशता वीरा निर्ययुर्महतो बलात् १ दुर्योधनस्तु द्विरदमारुह्याचलसंनिभं छत्रेण ध्रिय
माणेन वीज्यमानश्च चामरैः २ न गन्तव्यं न गन्तव्यमिति मद्रानवारयत् दुर्योधनेन ते वीराः वार्य
माणाः पुनः पुनः ३ युधिष्ठिरं जिघांसन्तः पांडूनां प्राविशन्बलं ते तु शूरा महाराज कृतचित्ताश्च यो
धने ४ धनुःशब्दं महत्कृत्वा सहायुध्यन्त पांडवैः श्रुत्वा च निहतं शल्यं धर्मपुत्रेण पीडितं ५ मद्ररा
जप्रिये युक्तैर्मद्रकाणां महारथैः आजगाम ततः पार्थो गांडीवं विक्षिपन्धनुः ६ पूरयन्रथघो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो०प० घेणादिष्टाः सर्वामहारथाः ततोर्जुनश्चभीमश्चमाद्रीपुत्रौचपांडवौ ७ सात्यकिश्चनरव्याघ्रोद्रौपदे
१५ याश्चसर्वशः धृष्टद्युम्नःशिखंडीचपांचालाःसहसोमकैः ८ युधिष्ठिरंपरीप्संतःसमंतात्पर्य
वारयन् तेसमंतात्परिवृताःपांडवाःपुरुषर्षभाः ९ क्षोभयंतिस्मतांसेनांमकराःसागरंयथा
९ वृक्षानिवमहावाताःकंपयंतिस्मतावकान् पुरोवातेनगंगेवक्षोभ्यमाणामहानदी १०
अक्षोभ्यततदाराजन्पांडूनांध्वजिनीपुनः प्रस्कंद्यसेनांमहतींमहात्मानोमहारथाः ११ ब
हवश्चुक्रुशुस्तत्रक्वसराजायुधिष्ठिरः भ्रातरोवास्यतेशूराःदृश्यंतेनेहकेचन १२ धृष्टद्युम्नो
वाशैनेयोद्रौपदेयाश्चसर्वशः पांचालाश्चमहावीर्याःशिखंडीचमहारथः एवंतान्वादिनः
शूरान्द्रौपदेयामहारथाः अभ्यघ्नन्युयुधानश्चमद्रराजपदानुगान् १३ चक्रैर्विमथिताःकेचि
त्केचिच्छिन्नैर्महाध्वजैः प्रत्यदृश्यंतसमरेतावकानिहताःपरैः १४ आलोक्यपांडवान्युधेयो
धाराजन्समंततः वार्यमाणाययुर्वेगात्पुत्रेणतवभारत १५ दुर्योधनस्ततान्वीरान्वारयामा
ससांत्वयन् नचास्यशासनंकेचित्तत्रचक्रुर्महारथाः १६ ततोगांधारराजस्यपुत्रःशकुनिरब्र
वीत् दुर्योधनंमहाराजवचनंवचनक्षमः १७ किंनःसंप्रेक्षमाणानांमद्राणांहन्यतेबलं नयु
क्तमेतत्समरेत्वयितिष्ठतिशासति १८ सहितैश्चापियोद्धव्यमित्येषसमयःकृतः अथकस्मा १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्मरानेवञ्चतोमर्षयसेनच १९ दुर्योधनउवाच वार्यमाणोमयापूर्वंनैतेचक्रुर्वचोमम एतेविनिहताः
सर्वेप्रस्कन्नापांडुवाहिनी २० शकुनिरुवाच नभर्तुःशासनंवीरारणेकुर्वंत्यमर्षिताः अलंक्रुद्धेनचैवै
तेषांनायंकालउपेक्षितुं २१ यामःसर्वेचसंभूयसवाजिरथकुंजराः परित्रातुंमहेष्वासान्मद्रराज॥
पदानुगान् २२ अन्योन्यंपरिरक्षामोयत्नेनमहतानृप एवंसर्वेतुसंचिंत्यप्रययुर्यत्रसैनिकाः २३
एवमुक्तस्ततोराजाबलेनमहतावृतः प्रययौसिंहनादेनकंपयन्निवमेदिनीं २४ हतविध्यत
गृह्णीतप्रहरध्वंनिकृंतत इत्यासीत्तुमुलःशब्दस्तवसैन्यस्यभारत २५ पांडवास्तुरणेदृष्ट्वामद्रा
जपदानुगान् सहितानभ्यवर्तंतगुल्ममास्थायमध्यमं २६ तेमुहूर्ताद्रणेवीराहस्ताहस्तिवि॥
शांपते निहताःप्रत्यदृश्यंतमद्रराजपदानुगाः २७ ततोनःसंप्रयातानांहतामित्रास्तरस्विनः हृ
ष्टाःकिलिकिलाशब्दमकुर्वन्सहिताःपरे २८ अथोत्थितानिकबंधानिसमदृश्यंतसर्वशः पपातम
हतीचोल्कामध्येनादित्यमंडलात् २९ रथैर्भग्नैर्युगाक्षैश्चनिहतैश्चमहारथैः अश्वैर्निपतितैश्चै
वसंछन्नाभूद्वसुंधरा ३० वातायमानैस्तुरगैर्युगासक्तैस्ततस्ततः अदृश्यंतमहाराजयोधास्तत्रर
णाजिरे ३१ भग्नचक्रान्रथान्केचिदवहंस्तुरगारणे रथार्धंकेचिदादायदिशोदशविबभ्रमुः
तत्रतत्रचअदृश्यंतयोक्त्रैःश्लिष्टाःसवाजिनः रथिनःपतमानाश्चअदृश्यंतेस्मनरोत्तम ३३ गगनात्तु॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श. प.
३६

च्युताः सिंहाः पुराणानामिवसंतये निहतेषुचशूरेषुमद्रराज्ञानुगेषुवै २४ अस्मानापततश्चापिदृष्ट्वा
पार्थामहारथाः अभ्यवर्त्ततवेगेनजयगृध्नाःप्रहारिणः २५ बाणासनानिधुन्वानाःसिंहनादान्प्र
चुकुशुः ततोहतमभिप्रेक्ष्यमद्रराजबलंमहत् २६ मद्रराजेचसमरेदृष्ट्वाशूरंनिपातितं दुर्योध
नबलंसर्व्वंपुनरासीत्पराङ्मुखं वध्यमानंमहाराजपांडवैर्जितकाशिभिः दिशोभेजेथसंभ्रांतं
त्रासितंदृढधन्विभिः इतिश्रीशल्यपर्वणि ८८२ १८ संजयउवाच पातितेयुधिदुर्धर्षेमद्रराजेम
हारथे तावकास्तवपुत्राश्चप्रायशोविमुखाभवन् १ वणिजोनाविभग्नायांयथागाधेप्लवेर्णा
वे अपारेपारमिच्छंतोहतेशूरेमहात्मना २ मद्रराजेमहाराजवित्रस्ताःशरविक्षताः अनाथाना
थमिच्छंतोमृगाःसिंहार्दिताइव ३ वृषायथाभग्नशृंगाःशीर्णदंतायथागजाः मध्याह्नेप्रत्युपा
यामनिर्जिताजातशत्रुणा ४ नसंधातुमनीकानिनचराजन्पराक्रमे आसीत्बुद्धिर्हतेश।
ल्येभूपोयोधस्यकस्यचित् ५ भीष्मेद्रोणेचनिहतेसूतपुत्रेचभारत यद्दुःखंतवयोधानांभ
यंचासीद्विशांपते ६ तद्भयंसचनःशोकोभूयएवाभ्यवर्तत निराशाश्चजयेतस्मिन्हतेश।
ल्येमहारथे ७ हतप्रवीराविध्वस्तानिकृत्ताश्चशितैःशरैः मद्रराजेहतेराजन्योधास्तेप्राद्रवन्
भयात् ८ अश्वानन्येगजानन्येरथानन्येमहारथाः आरुह्यजवसंपन्नाःपादाताःप्राद्रवंस्तथा ३६

द्विसाहस्रास्त्रमातंगागिरिरूपाः प्रहारिणः संप्राद्रवन् हते शल्ये अंकुशांगुष्ठनोदिताः ९ तेरणाद्रव
न्ते प्रेष्टताः वकाः पांडवैर्दिशः धावतस्त्वाप्यपश्यामस्त्रसमानान् शराहतान् १० तान् प्रभग्नान् द्रुतान्
दृष्ट्वा हृतोत्साहान् पराजितान् अभ्यद्रवंत पांचालाः पांडवाश्च जयैषिणः ११ बाणशब्दरवांश्च वसि
हनादांश्च पुष्कलान् शंखशब्दांश्च शूराणां दारुणाः समपद्यत १२ दृष्ट्वा तु कौरवं सैन्यं भयत्रस्तं प्र
विद्रुतं अन्योन्यं समभाषंत पांचालाः पांडवैः सह १३ अथ राजा सत्यधृतिर्हतामित्रो युधिष्ठिरः
अथ दुर्योधनो हीनो दीनयानः पतिश्रिया १४ अथ श्रुत्वा हते पुत्रे धृतराष्ट्रो जनेश्वरः विह्वलः पा
तितो भूमौ किल्बिषं प्रतिपद्यतां १५ अथ जानात कौंतेयं समर्थं सर्वधन्विनां अथात्मानं तु दु
र्मेधा गार्हयिष्यति पापकृत् १६ अथ तत्तु वचः सत्यं विजानात महीपतिः अथ प्रभृति पार्थश्च प्र
च्छन्नस्तु उपावसन् १७ विजानात् नृपो दुःखं यत्स्वामि पांडुनंदनैः अथ कृष्णस्य माहात्म्यं जानात।
स महीपतिः १८ अथार्जुनधनुर्वीर्यं घोरं जानात संयुगे अस्त्राणां च बलं सर्वं वाह्नेश्च बलं।
माहवे १९ अथ ज्ञास्यति भीमस्य बलं घोरं महात्मनः हते दुर्योधने युद्धे शाक्रेणावासवे बले २०
यत्कृतं भीमसेनेन दुःशासनवधे तदा नान्यः कर्ता त्रिलोकेस्मिन् ऋते भीमान्महाबलात् २१
अथ ज्ञेष्ठस्य नानीतां पांडवस्य पराक्रमे मद्रराजे हते श्रुत्वा दैवैरपि सुदुःसहे २२ अथ ज्ञास्यति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प०

संग्रामेमाद्रीपुत्रौसहदः सहौ निहतेसौबलेवीरेगांधारेषुचसर्वशः ३३ कथंजयोनतेषांस्याद्येषांयो
द्धाधनंजयः सात्यकिर्भीमसेनश्चधृष्टद्युम्नश्चपार्षतः ३४ द्रौपदेयास्तनयाः पंचमाद्रीपुत्रौचपांड
वौ शिखंडीचमहेष्वासोराजाचैवयुधिष्ठिरः ३५ येषांचजगतोनाथोनाथः कृष्णोजनार्दनः कथं
तेषांजयोनस्याद्येषांधर्मोव्यपाश्रयः ३६ भीष्मंद्रोणंचकर्णंचमद्रराजानमेवच तथान्यान्नृपती
न्वीरान्शतशोथसहस्रशः ३७ कोन्यः शक्तोरणेजेतुंऋतेपार्थान्युधिष्ठिरात् यस्यनाथोहृ
षीकेशः सदासत्ययशोनिधिः ३८ इत्येवंवदमानास्तेहर्षेणमहतायुताः प्रभग्नांस्तावका
न्योधान्सहृष्टाः पृष्ठतोन्वयुः ३९ धनंजयोरथानीकमभ्यवर्त्ततवीर्यवान् माद्रीपुत्रौचशकु
निंसात्यकिश्चमहारथः ४० तान्प्रेक्ष्यद्रवतः सर्वान्भीमसेनभयार्दितान् दुर्योधनस्तदासूत
मब्रवीद्विस्मयन्निव ४१ मामतिक्रमतेपार्थोधनुःपाणिमवस्थितं जघनेसर्वसैन्यानांममा
श्वान्प्रतिपादय ४२ जघनेयुध्यमानंहिकौंतेयोमांसमंततः नोत्सहेदभ्यतिक्रांतुंवेलामिव
महोदधिः ४३ पश्यपसैन्यंमहत्सूतपांडवैः समभिद्रुतं सैन्यरेणुंसमुद्भूतंपश्यस्वैनंसमंततः
४४ सिंहनादांश्चबहुशः शृणुघोरान्महाभयात् तस्माद्याहिशनैः सूतजघनंपरिपालय ४५
मयिस्थितेचसमरेनिरुद्धेषुचपांडुषु पुनरावर्त्ततेतूर्णंमामकंबलमोजसा ४६ तच्छ्रुत्वातव

पुत्रस्य कृतार्थसहर्षो वचः सारथिर्हेमसंछन्नान् प्रेसैस्वान चोदयत् ४७ गजाश्वरथिभिर्हीनास्त्य
क्तात्मानः पदातयः एकविंशतिसाहस्राः संयुगायावतस्थिरे ४८ नानादेशसमुद्भूतानानान
गरवासिनः अवस्थितास्तदा योधाः प्रार्थयंतो महद्यशः ४९ तेषामापततां तत्र संहृष्टानां पर
स्परं संमर्दः सुमहान् जज्ञे घोररूपो भयानकः ५० भीमसेनस्तदा राजन् धृष्टद्युम्नश्च पार्षतः
बलेन चतुरंगेण नानादेश्यानवारयत् ५१ भीममेवाभ्यवर्त्तंत रणेन्ये तु पदातयः प्रक्ष्वेड्यास्फो
ट्य संहृष्टा वीरलोकं यियासवः ५२ आसाद्य भीमसेनं तु संरब्धा युद्धदुर्मदाः धार्त्तराष्ट्रा विने
दुर्हि नान्यामकथयन्कथां ५३ परिवार्य रणे भीमं निजघ्नुस्ते समंततः स वध्यमानः समरे प
दातिगणसंवृतः ५४ न चचाल ततः स्थानान्मैनाक इव पर्वतः ते तु क्रुद्धा महाराज पाण्डवानां म
हारथं ५५ निग्रहीतुं प्रचक्रुर्हि योधांश्चान्यानवारयन् अक्रुध्यत रणे भीमस्तैस्तदा पर्यवस्थि
तैः ५६ सोवतीर्य रथात्तूर्णं पदातिः समवस्थितः जातरूपपरिच्छन्नां प्रगृह्य महतीं गदां ५७
अवधीत्तावकान्योधान् दंडपाणिरिवांतकः विप्रहीणरथाश्वांस्तानवधीत्पुरुषर्षभः ५८ एक
विंशतिसाहस्रान्पदातीन् समपोथयत् हत्वा तत्पुरुषानीकं भीमः सत्यपराक्रमः ५९ धृष्ट
द्युम्नं पुरस्कृत्य न चिरात्प्रत्यदृश्यत पादाता निहता भूमौ शिश्यिरे रुधिरोक्षिताः ६० संभग्ना

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्ववातेन कर्णिकाराः सपुष्पिताः नानाशस्त्रसमायुक्ता नानाकुंडलधारिणः ९१ नानाजात्या ह-
तास्तत्र नानादेशसमागताः पताकाध्वजसंपन्ने पदातीनां महद्बले ९२ निकृत्ते विद्रुते रौद्रे।
घोररूपं भयावहे युधिष्ठिरपुरोगाश्च सहसैन्यैर्महारथाः ९३ अभ्यधावन्महात्मानः पुत्रं दुर्योध-
नं नृप ते सर्वे तावकान् दृष्ट्वा महेष्वासान्पराङ्मुखान् ९४ नाभ्यवर्त्तन्त ते पुत्रा वेलेव मकराल-
यं तदद्भुतमपश्याम तव पुत्रस्य पौरुषं ९५ यदेकं सहिताः पार्था न शेकुरतिवर्त्तितुं नातिदूरा-
पयातं तु कृतबुद्धिं पलायने ९६ दुर्योधनः स्वकं सैन्यमब्रवीद्भृशविक्षतं न तं देशं प्रपश्या-
मि पृथिव्यां पर्वतेषु च यत्र यातान्न वो हन्युः पाण्डवाः किं सृतेन वः अल्पं च बलमेतेषां कृष्णौ
च भृशविक्षतौ यदि सर्वेत्र तिष्ठामो ध्रुवं नो विजयो भवेत् ९७ विप्रयातांस्तु वो भिन्नान्पाण्ड-
वाः कृतविप्रियाः अनुसृत्य हनिष्यन्ति श्रेयो नः समरे वधः ९८ शृण्वन्तु क्षत्रियाः सर्वे यावन्तोऽत्र
समागताः यदा शूरं च भीरुं च मारयत्यंतकः सदा ९९ को नु मूढो न युध्येत पुरुषः क्षत्रियो ध्रु-
वं श्रेयो नो भीमसेनस्य क्रुद्धस्याभिमुखे स्थितं १०० सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्य-
तां मर्त्यो नावश्यमर्त्तव्यं गृहेष्वपि कदाचन युध्यतः क्षत्रधर्मेण मृत्युरेषः सनातनः कृत्वेह
सुखमाप्नोति हतः प्रेत्य महत्फलं १०१ न युद्धधर्माच्छ्रेयान्वै पंथाः स्वर्गस्य कौरवाः अचिरेण।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

जितांल्लोकान्हतोयुद्धेसमवाप्स्यते १२ कृत्वातद्वचनंतस्यपूजयित्वाचपार्थिवाः पुनरेवाभ्यवर्त्तं
तपांडवानाततायिनः १३ तानापततएवाशुव्यूढानीकाःप्रहारिणः प्रत्युद्ययुस्तदापार्थाजय
गृध्राःप्रमन्यवः १४ धनंजयोरथेनाजावभ्यवर्त्ततवीर्यवान् विश्रुतंत्रिषुलोकेषुव्याक्षिपन्
गांडिवंधनुः १५ माद्रीपुत्रौचशकुनिंसात्यकिश्चमहाबलः जवेनाभ्यपतन्हृष्टायतोवैताव
केवलं १६ इतिश्रीशल्यपर्वणि १९ ५२ श्लो १९ संजयउवाच संनिवृत्तेजनौघेतुशाल्वोम्लेछग
णाधिपः अभ्यवर्त्ततसंक्रुद्धःपांडवानांमहद्बलं १ आस्थायसुमहानागंप्रभिन्नंपर्वतोपमं
दृप्तमैरावतप्रख्यममित्रगणमर्दनं २ योसौमहान्भद्रकुलेप्रसूतःसंपूजितोधार्त्तराष्ट्रेण
नित्यं सुकल्पितःशास्त्रविनिश्चयज्ञैःसदोपवाह्यःसमरेषुराजन् ३ तमास्थितोराजवरोबभूव
यथोदयस्थःसविताक्षपांते सतेननागप्रवरेणराजन्नभ्युद्ययौपांडुसुतान्समंतात् ४ सितैः
पृषत्कैर्विददारवेगैर्महेंद्रवज्रप्रतिमैःसुघोरैः ततःशरान्वैविसृजन्महारणेयोधांश्चराजन्न
यतोयमालये ५ नास्यांतरंददृशुःस्वेपरेवायथापुरावज्रधरस्यदैत्याः ऐरावणस्थस्यचमूंविम
र्द्दैत्याःपुरावासववदेवराजन् ६ तेपांडवाःसोमकाःसृंजयाश्चतमेवनागंददृशुःसमंतात् सह
स्रशोवैविचरंतमेकंयथामहेंद्रस्यगजंसमीपे ७ संद्राव्यमाणंतुबलंपरेषांपरीतकल्पंविब

द्रो॰प॰ भीमसमंतात् नचावतस्थुःसमरेभ्रष्टोभयात् विमर्द्यमानेत्वपरस्परेंनरा ८ ततःप्रभग्नासहसामा
३९ हाचमूःसापांडवीतेननराधिपेन दिशश्चतस्त्रःसहसाप्रधाविताग जेंद्रवेगेनतमपारयंती ९
दृष्ट्वाचतांवेगवतींप्रभग्नांसर्वेत्वदीयायुधियोधमुख्याः संपूजयंतस्तेतनराधिपंतंदध्मुश्चशं
खान्शशिसंनिकाशान् १० श्रुत्वानिनादंत्वथकौरवाणांहर्षाद्विमुक्तंसहशंखशब्दैः सेना
पतिःपांडवसृंजयानांपांचालपुत्रोममृषेनभाषितं ११ ततस्तुतंवैद्विरदंमहात्माप्रत्युद्ययौ
त्वरमाणोजयाय जंभोयथाशक्रसमागमाद्वैनागेंद्रमैरावणमिंद्रवाह्यं १२ तमापतंतंसहसा
तुदृष्ट्वापांचालपुत्रंयुधिराजसिंहः तंवैद्विपंप्रेषयामासतूर्णंवधायराजन्द्रुपदात्मजस्य १३
सतंद्विपेंद्रंसहसापतंतंसमाविध्यदग्निप्रतिमैःपृषत्कैः कर्मारधौतैर्निशितैर्ज्वलद्भिर्नाराचमु
ख्यैस्त्रिभिरुग्रवेगैः १४ ततोपरान्पंचशितान्महात्मानाराचमुख्यान्विससर्जकुंभे सतैस्तु
विद्धःपरमद्विपोरणेतदापरावृत्यभृशंप्रदुद्रुवे १५ तंनागराजंसहसाप्रणुन्नंविद्राव्यमाणं
विनिवर्त्यशाल्वःतोत्रांकुशैःप्रेषयामासतूर्णंपांचालराजस्यसुतंप्रहस्य १६ दृष्ट्वापतंतंसह
सातुनागंधृष्टद्युम्नःस्वरथाच्छीघ्रमेव गदांप्रगृह्योग्रजवेनवीरोभूमिंप्रपन्नोभयविह्वलांगः
१७ सतंरथंहेमविभूषितांगंसाश्वंससूतंसहसाविकृष्य उत्क्षिप्यहस्तेननदन्महाद्विपोविपो ३९

विपो

मामवसेधरातले १८ पांचालराजस्यसुतंचदृष्ट्वातदार्दितंनागवरेणतेन तमभ्यधावत्सहसा
जवेनभीमःशिखंडीचशिनेश्चनप्ता १९ शरैश्चवेगंसहसानिगृह्यतस्याभितोघ्नापततोगजस्य
ससंगृहीतोरथिभिर्गजोवैचचालतैर्वार्यमाणश्चसंख्ये २० ततःपृषत्कान्प्रववर्षराजासूर्यो
यथारश्मिजालैःसमंतात् तेनाशुगैर्वध्यमानारथौघाःप्रदुद्रुवुःसहितास्तत्रतत्र २१ तत्कर्मशा
ल्वस्यसमीक्ष्यसर्वेपांचालमत्स्यान्नृपसृंजयाश्च हाहाकारैर्नादयंतस्मसर्वेद्विपंसमंताद्रुरुधु
र्नराग्र्याः २२ पांचालपुत्रस्त्वरितस्तुशूरोगदांप्रगृह्याचलशृंगकल्पां ससंभ्रमंभारतशत्रुघा
तीजवेनवीरोनुससारनागं २३ ततोथनागंधरणीधराभंमदंस्रवंतंजलदप्रकाशं गदां
समाविध्यभृशंजघानपांचालराजस्यसुतस्तरस्वी २४ सभिन्नकुंभःसहसाविनद्यमुखात्प्रभू
तंक्षतजंविमुंचन् पपातनागोधरणीधराभःक्षितिप्रकंपाच्चलितोयथाद्रिः २५ निपात्यमा
नेतुतदागजेंद्रेहाहाकृतेतवपुत्रस्यसैन्ये सशाल्वराजस्यशिनिप्रवीरोजहारभल्लेनशिरःशि
तेन २६ हृतोत्तमांगोयुधिसात्वतेनपपातभूमौसहनागराज्ञा यथाद्रिशृंगंसुमहत्प्रणुन्नंवज्रे
णदेवाधिपचोदितेन २७ इतिश्रीमहाभारतेशल्यपर्वणिशाल्ववधः २० ५९ संजयउवाच तस्मिं
स्तुनिहतेशूरेशाल्वेसमितिशोभने तवाभज्यद्बलंवेगाद्वातेनेवयथाद्रुमः १ तत्प्रभग्नंबलं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.प.
४.

दृष्ट्वाकृतवर्म्मामहारथः दधारसमरेशूरःशत्रुसैन्येमहाबलः २ संनिवृत्तास्ततेशूराःदृष्ट्वासात्व
तमाहवे शैलोपमंस्थितेराजन्कीर्यमाणाशरैर्युधि ३ ततःप्रववृतेयुद्धंकुरूणांपांडवैःसह
निवृत्तानांमहाराजमृत्युंकृत्वानिवर्त्तने ४ तत्राश्चर्यमभूद्युद्धंसात्वतस्यपरैःसह यदेकोवार
यामासपांडुसेनांदुरासदां ५ तेषामन्योन्यसुहृदांकृतेकर्म्मणिदुष्करे सिंहनादःप्रहृष्टानांदि
वस्पृक्सुमहानभूत् ६ तेनशब्देनवित्रस्ताःपांचालाभरतर्षभ शिनेर्नप्तामहाबाहुरन्वप
द्यतसात्यकिः ७ ससमासाद्यराजानंक्षेमधूर्त्तिंमहाबलं सप्तभिर्निशितैर्वाणैरनयद्यमसा
दनं ८ तमायांतंमहाबाहुंप्रतिपन्नंशितान्शरान् जवेनाभ्यपतद्धीमान्हार्दिक्यःशिनिपुं
गवं ९ सात्वतौतौमहावीर्यौधन्विनौरथिनांवरौ अन्योन्यमभिधावेतांशस्त्रप्रवरधारिणौ १०
पांडवाःसहपंचालायोधाश्चान्येनृपोत्तमाः प्रेक्षकाःसमपद्यंततयोर्घोरेसमागमे ११ नारा
चैर्वत्सदंतैश्चवृष्ण्यंधकमहारथौ अभिजघ्नतुरन्योन्यंप्रहृष्टाविवकुंजरौ १२ चरंतौविवि
धान्मार्गान्हार्दिक्यशिनिपुंगवौ मुहूर्त्तंतर्हितावेतौवाणवृष्ट्यापरस्पर १३ चापवेगबलो
द्धूतान्मार्गणान्वृष्णिसिंहयोः आकाशेसमपश्यामपतंगानिवशीघ्रगान् १४ तमेकंसत्यक
र्म्माणमासाद्यहार्दिकात्मजः अविध्यन्निशितैर्वाणैश्चतुर्भिश्चतुरोहयान् १५ सदीर्घबाहुः। ४०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सेक्रुद्धस्तोत्रार्दितस्त्वद्विपः अष्टभिः कृतवर्माणमविध्यत्परमेषुभिः १६ ततः शूर्णायवेगोस्त्रैः
कृतवर्मा शिलाशितैः सात्यकिं त्रिभिराहत्य धनुरेकेन चिच्छिदे १७ निकृत्तं तं धनुःश्रेष्ठमपास्य
शिनिपुंगवः अन्यदादत्तवेगेन शैनेयः सशरं धनुः १८ तदादाय धनुःश्रेष्ठं वरिष्ठः सर्वधन्विनां आ
रोप्य च महावीर्यो महाबुद्धिर्महाबलः १९ अमृष्यमाणो धनुषश्छेदनं कृतवर्मणः ततो राज
न्महेष्वासः कृतवर्माणमभ्ययात् २० ततस्तु निशितैर्बाणैर्दशभिः शिनिपुंगवः जघान सू
तमश्वांश्च ध्वजं च कृतवर्मणः २१ ततो राजन्महेष्वासः कृतवर्मा महारथः हताश्वसूतं संख्ये
स्वरथं हेमपरिष्कृतं २२ रोषेण महताविष्टः शूलमुद्यम्य मारिष चिक्षेप भुजवेगेन जिघां
सुः शिनिपुंगवं २३ तच्छूलं सात्वतो राजन्निर्भिद्य निशितैः शरैः चूर्णितं पातयामास मोह
यन्निव माधवं २४ ततोऽपरेण भल्लेन हृदयेनं समताडयत् युयुधे युयुधानेन हताश्वो हत
सारथिः २५ कृतवर्मा कृतास्त्रेन धरणीमन्वपद्यत तस्मिन्सात्यकिना वीरे द्वैरथे विरथीकृ
ते २६ समपद्यत सर्वेषां सैन्यानां सुमहद्भयं पुत्रस्य तव चात्यर्थं विषादः समजायत २७
हतसूते हताश्वे तु विरथे कृतवर्मणि हताश्वं च समालक्ष्य हतसूतमरिंदमं २८ अभ्यधाव
त्कृपो राजन्जिघांसुः शिनिपुंगवं तमारोप्य रथोपस्थे मिषतां सर्वधन्विनां २९ अपोवाह म

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श.प.
६१

हावाहुस्तूर्णमायोधनादपि शैनेयाधिष्ठितेराजन्‌ विरथेकृतवर्मणि॥ ३० दुर्योधनबलंसर्वंपुन
रासीत्पराङ्मुखं तत्सैन्यनावबुध्यंतसैन्येनरजसाद्भृताः ३१ तावकाःपुरुषाराजन्‌ दुर्योधनमृ
तेनृप दुर्योधनस्तु संप्रेक्ष्यभग्नंस्वबलमंतिकात्‌ ३२ जवेनाभ्यपतत्तूर्णंसर्वांश्चैकोन्यवारय
त्‌ पांडूंश्चसर्वान्संक्रुद्धोधृष्टद्युम्नंसपार्षतं ३३ शिखंडिनंद्रौपदेयान्पांचालानांचयेगणाः
कैकेयान्सोमकांश्चैवसृंजयानांचमारिष ३४ असंभ्रमंदुराधर्षःशितैर्बाणैरवारयत्‌ अतिष्ठ
दाहवेयत्तःपुत्रस्तवमहाबलः ३५ यथायज्ञेमहानग्निर्मंत्रपूतःप्रतापवान्‌ तथादुर्योधनो
राजासंग्रामेसर्वतोभवत्‌ ३६ तंपरेनाभ्यवर्त्तंतमर्त्यामृत्युमिवाहवे अथान्यंरथमास्थाय।
हार्दिक्यःसमपद्यत ३७ इतिशाल्यपर्वणि ॥११॥ संजयउवाच पुत्रस्तुतेमहाराजरथस्थोर
थिनांवरः दुरुत्सहोबभौयुद्धेयथारुद्रःप्रतापवान्‌ १ तस्यबाणसहस्रैस्तुप्रच्छन्नाह्यभव
न्मही परांश्चसिषिचेबाणैर्धाराभिरिवपर्वतान्‌ २ नचसोस्तिपुमान्कश्चित्पांडवानांबला।
र्णवे हयोगजोरथोवापियोस्यबाणैरविक्षतः ३ यंयंहिसमरेयोधंप्रपश्यामिविशांपते सस
बाणैश्चितोभूद्वैपुत्रेणतवभारत ४ यथासैन्येनरजसासमुद्भूतेनवाहिनी प्रत्यदृश्यतसंछ
न्नातथाबाणैर्महात्मनः ५ बाणभूतामपश्यामपृथिवींपृथिवीपते दुर्योधनेनप्रहितांति ६१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रहस्तेनेनधन्विना ९ तेषुयोधसहस्रेषुतावकेषुपरेषुच एकोदुर्योधनोह्यासीत्सुमहानितिमेम
तिः ७ ततोर्जुनमपश्यामतवपुत्रस्यविक्रमं यदेनंसहिताःपार्थानाभ्यवर्त्तंतभारत ८ युधिष्ठि
रंशतेनाजौविव्याधभरतर्षभ भीमसेनंचसप्तत्यासहदेवंचसप्तभिः ९ नकुलंचचतुःषष्ट्या
धृष्टद्युम्नंचसप्तभिः सप्तभिर्द्रौपदेयांश्चत्रिभिर्विव्याधसात्यकिं १० धनुश्चिच्छेदभल्लेनसह
देवस्यमारिष तदपास्यधनुश्छिन्नंमाद्रीपुत्रःप्रतापवान् ११ अभ्यद्रवतराजानंप्रगृह्यान्यन्मह
द्धनुः ततोदुर्योधनंसंख्येविव्याधदशभिःशरैः १२ नकुलश्चततोवीरोराजानंनवभिःश
रैः घोररूपैर्महाबाणैर्विव्याधचननादच १३ सात्यकिश्चैवराजानंशरेणानतपर्वणा द्रौ
पदेयास्त्रिसप्तत्याधर्मराजश्चपंचभिः १४ अशीत्याभीमसेनश्चशरैराजानमार्पयत् समंतात्
कीर्यमाणस्तुबाणसंघैर्महात्मभिः १५ नचचालमहाराजसर्वसैन्यस्यपश्यतः लाघवंसौ
ष्ठवंचापिवीर्यंचापिमहात्मनः १६ अतिसर्वाणिभूतानिददृशुःसर्वमानवाः धार्त्तराष्ट्रा
हिराजेंद्रयोधास्तस्वल्पमंतरं १७ अपश्यमानाराजानंपर्यवर्त्तंतदंशिताः तेषामापततांघोर
स्तुमुलंसमपद्यत १८ क्षुब्धस्यहिसमुद्रस्यप्रावृट्कालेयथास्वनः समासाद्यरणेतेतुराजान
मपराजितं १९ प्रत्युद्ययुर्महेष्वासाःपांडवानाततायिनः भीमसेनंरणेक्रुद्धंद्रोणपुत्रोन्यवारयत्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प० ६२

त् २० नानाबाणैर्महाराजप्रमुक्तैः सर्वतोदिशं नाशायंतरणेवीरानदिशः प्रदिशः कृतः २१ ता
वुभौ क्रूरकर्माणावुभौ भारतदुःसहौ घोररूपमयुध्येतां कृतप्रतिकृतैषिणौ २२ आसयंतौ।
दिशः सर्वाज्यातेपकठिनत्वचौ शकुनिस्तुरणेवीरोयुधिष्ठिरमपीडयत् २३ तस्याश्वांश्चत
रोहत्वासबलस्यसुतोबली नादंचकारबलवत्सर्वसैन्यानिकंपयन् २४ एतस्मिन्नंतरे
वीरंराजानमपराजितं अपोवाहरथेनाजौसहदेवःप्रतापवान् २५ अथान्यंरथमास्था।
यधर्मपुत्रोयुधिष्ठिरः शकुनिंनवभिर्विध्वापुनर्विव्याधपंचभिः २६ ननादचमहाना।
दंप्रवरःसर्वधन्विनां तद्युद्धमभवच्चित्रंघोररूपंचमारिष २७ प्रेक्षतांप्रीतिजननंसिद्धचा
रणसेवितं उलूकस्तुमहेष्वासंनकुलंयुद्धदुर्मदं २८ अभ्यद्रवदमेयात्माशरवर्षैःसमंत।
तः तथैवनकुलःशूरःसौबलस्यसुतंरणे २९ शरवर्षेणमहतासमंतात्पर्यवारयत् तौ
तत्रसमरेवीरौकुलपुत्रौमहारथौ ३० योधयंतावपश्येतांकृतप्रतिकृतैषिणौ तथैवकृत
वर्माणंशैनेयःशत्रुतापनः ३१ योधयन्शुशुभेराजन्बलिंशक्रइवाहवे दुर्योधनोधनु।
श्छित्वाधृष्टद्युम्नस्यसंयुगे ३२ अथैनंछिन्नधन्वानंविव्याधनिशितैःशरैः ३३ धृष्टद्युम्नोपिस
मरेप्रगृह्यपरमायुधं ३४ राजानंयोधयामासपश्यतांसर्वधन्विनां तयोर्युद्धंमहच्चासीत्सं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रामेभरतर्षभ ३४ प्रभिन्नयोर्यथासक्तंमत्तयोर्वरहस्तिनोः गौतमस्कृपाणोक्रुद्धोद्रौपदेयान्म
हाबलान् ३५ विव्याधबहुभिःशूरःशरैःसंनतपर्वभिः तस्यैतेरभवद्युद्धमिंद्रियैरिवदेहिनः
३६ घोररूपमसंहार्यंनिर्मर्यादमवर्त्तत तेचसंपीडयामासुरिंद्रियाणीवबालिशं ३७ सचता
न्प्रतिसंरब्धःप्रत्ययोधयदाहवे एवंचित्रमभूद्युद्धंतस्यतैःसहभारत ३८ उत्थायोत्थायहि
तदादेहिनामिंद्रियैर्विभो नराश्चवनरैःसार्धंदंतिनोदंतिभिस्तथा ३९ हयाहयैःसमासक्ता
रथिनोरथिभिःसह संकुलेचाभवद्भूयोघोररूपंविशांपते ४० इदंचित्रमिदंघोरमिदंरौद्र
मितिप्रभो युद्धान्यासन्महाराजघोराणिचबहूनिच ४१ तेसमासाद्यसमरेपरस्परमरिंदमाः
विव्यधुश्चैवजघ्नुश्चसमासाद्यमहाहवे ४२ तेषांपत्रसमुद्भूतंरजस्तीव्रमवर्त्तत वातेनचोद्धू
तेराजन्धावद्भिश्चाश्वसादिभिः ४३ रथनेमिसमुद्भूतंनिश्वासैश्चापिदंतिनां रजःसंध्याभ्रक
लिलंदिवाकरपथंययौ ४४ रजसातेनसंपृक्तोभास्करोनिःप्रभःकृतः संछादिताभवद्भू
मिस्तेचशूरामहारथाः ४५ मुहूर्त्तादिवसंवृत्तेनीरजस्केसमंततः वीरशोणितसिक्तायांभूमौ
भारतसत्तम ४६ उपाशाम्यत्ततस्तीव्रंतद्रजोघोरदर्शनं ततोपश्यमहंभूयोद्वंद्वयुद्धानिभारत
४७ यथाप्राणंयथाश्रेष्ठंमध्याह्नेवैसुदारुणं वर्मणांतत्रराजेंद्रव्यदृश्यंतोज्ज्वलाःप्रभाः ४८ शब्द

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा. प.

४३

श्रुतुमुलःसंछेश्राराणांपततामभूत् महावेणुवनस्येवदह्यमानस्यपर्वते ४९ इतिशाल्यपर्व
णि ॥६५ संजयउवाच वर्त्तमानेतथायुद्धेघोररूपेभयानके अभज्यतबलंतत्रतवपुत्रस्य
पांडवैः १ तांस्तुयत्नेनमहतासंनिवार्यमहारथान् पुत्रस्तेयोधयामासपांडवानामनीकि
नीं २ निवृत्ताःसहसायोधास्तवपुत्रजयैषिणः संनिवृत्तेषुतेष्वेवयुद्धमासीत्सुदारुणं ३
तावकानांपरेषांचदेवासुररणोपमं परेषांतवसैन्येवानासीत्कश्चित्पराङ्मुखः ४ अनु
मानेनयुध्यंतेसंज्ञाभिश्चपरस्परं तेषांक्षयोमहानासीद्युध्यतामितरेतरं ५ ततोयुधिष्ठि
रोराजाक्रोधेनमहतायुतः जिगीषमाणःसंग्रामेधार्त्तराष्ट्रान्सराजकान् ६ त्रिभिःशार
द्वतंविध्वारुक्मपुंखैःशिलाशितैः चतुर्भिर्निजघानाश्वान्नाराचैःकृतवर्मणः ७
अश्वत्थामातुहार्दिक्यमपोवाहयशस्विनं अथशारद्वतोष्टाभिःप्रत्यविध्यद्युधिष्ठिरं ८ त
तोदुर्योधनोराजारथान्सप्तशतान्रणे प्रेषयद्यत्रराजासौधर्मपुत्रोयुधिष्ठिरः ९ तेरथारथि
भिर्युक्तामनोमारुततरंहसः अभ्यद्रवंतसंग्रामेकौंतेयस्यरथंप्रति १० तेसमंतान्महाराजप
रिवार्ययुधिष्ठिरं अदृश्यंसायकैश्चक्रुर्मेघाइवदिवाकरं तेदृष्ट्वाधर्मराजानंकौरवेयैस्तथाकृतं
११ नामृष्यंतसुसंरब्धाःशिखंडिप्रमुखारथाः रथैरश्ववरैर्युक्ताःकिंकिणीजालसंवृतैः १२

४३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शाजन्माभिरतेततः कुंतीपुत्रेयुधिष्ठिरे ततःप्रववृतेरौद्रःसंग्रामःशोणितोदकः १३ पांडवानांकु
रूणांचयमराष्ट्रविवर्धनः रथान्सप्तशतान्हत्वाकुरूणामाततायिनां १४ पांडवाःसहपांचा
लैःपुनरेवाभ्यवर्त्तयन् तत्रयुद्धंमहच्चासीत्तवपुत्रस्यपांडवैः १५ नचतज्ञाहृष्टंनैवचापिप
तिष्ठन्ते वर्त्तमानेमहायुद्धेनिर्मर्यादेसमंततः १६ वध्यमानेषुयोधेषुतावकेष्वितरेषुच विन
दन्तुचयोधेषुशंखवर्यैश्चपूरितैः १७ उत्कृष्टैःसिंहनादैश्चगर्जितेनचधन्विनां प्रतिप्रवृद्धेयुद्धे
चछिद्यमानेषुमर्मसु १८ धावमानेषुयोधेषुजयगृद्धिषुमारिष संहारेसर्वतोजातेपृथिव्यां।
शोकसंभवे १९ बह्वीनामुत्तमस्त्रीणांसीमंतोद्धरणेतदा निर्मर्यादेततोयुद्धेवर्त्तमानेसुदारुणे
२० प्रादुरासन्विनाशायतदोत्पाताःसुदारुणाः चचालशब्दंकुर्वाणासपर्वतवनामही सदैश।
सोल्मुकाराजन्नकीर्यमाणाःसमंततः उल्काःपेतुर्दिवोभूमावाहत्यरविमंडलं २१ विष्वग्वाताः
प्रादुरासन्नीचैःशर्करवर्षिणः अश्रूणिमुमुचुर्नागावेपथुंचास्पृशन्भृशं २२ एतान्घोरान्।
नाहत्यसमुत्पातांस्तुदारुणान् पुनर्युद्धायसंमंत्र्यक्षत्रियास्तस्थुरव्यथाः २४ रमणीयेकुरुक्षेत्रे।
पुण्येस्वर्गंयियासवः ततोगांधारराजस्यपुत्रःशकुनिरब्रवीत् २५ युध्यध्वमग्रतोयोधाःपृष्ठतो
हन्मिपांडवान् ततोनःसंप्रयातानांमद्रयोधास्तरस्विनः २६ हृष्टाःकिलकिलाशब्दमकुर्वंत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प० पैरेनथा अस्मांस्तुपुनरासाद्यलब्धलक्षाद्रुतामदाः २७ शरासनानिधुन्वंतःशरवर्षैरवाकिरन् त
४४ तोहतेपरैराजन्मद्रराजबलेतदा २८ दुर्योधनबलेदृष्ट्वापुनरासीत्पराङ्मुखं गांधारराजस्तु
न्वर्वाक्यमाहततोबली २९ निवर्त्तध्वमधर्मज्ञायुध्यध्वंकिंसृतेनवः अनीकेदशसाहस्रम
श्वानांभरतर्षभ ३० आसीद्गांधारराजस्यविशालप्रासयोधिनां बलेनतेनविक्रम्यवर्त्तमानेज\
नक्षये ३१ पृष्ठतःपांडवानीकमभ्यघ्नन्निशितैःशरैः तदभ्रमिववातेनक्षिप्यमाणंसमंततः
३२ अभज्यतमहाराजपांडूनांसुमहद्बलं ततोयुधिष्ठिरःप्रेक्ष्यभग्नंस्वबलमंतिकात् ३३ अ
भ्यचोदयदव्यग्रःसहदेवंमहाबलं असौसुबलपुत्रोनोजघनेपीड्यदंशितः ३४ सैन्यानिसूदय
त्येषपश्यपांडवदुर्मते गच्छत्वंद्रौपदेयैश्चशकुनिंसौबलंजहि ३५ रथानीकमहंधक्ष्येपांचाल
सहितोनघ गच्छंतुकुंजराःसर्वेवाजिनश्चसहत्वया ३६ पदाताश्चत्रिसाहस्राःशकुनिंसौबलं
जहि ततोगजाःसप्तशताश्चापपाणिभिरास्थिताः ३७ पंचचाश्वसहस्राणिसहदेवश्चवीर्य
वान् पदाताश्चत्रिसाहस्राद्रौपदेयाश्चसर्वशः ३८ रणेह्यभ्यद्रवंस्तेतुशकुनिंयुद्धदुर्मदं तत\
स्तुसौबलोराजन्नभ्यतिक्रम्यपांडवान् ३९ जघानपृष्ठतःसेनांजयगृध्रःप्रतापवान् अश्वारो
हास्तुसंरब्धाःपांडवानांतरस्विनां ४० प्राविशन्सौबलानीकमभ्यतिक्रम्यतान्रथान् तेतत्रसा ४४

दिनःस्मृताःसौवलस्यमहद्दले ४१ रणमध्येव्यतिष्ठन्तैशरवर्षैरवाकिरन् नद्द्यतगदाप्रासमहा
पुरुषसेविते ४२ प्रावर्त्ततमहद्युद्धंराजन्दुर्मंत्रितेतव उपारमंतस्याश्वाहाःप्रेतकारथिनोभवन् ४३
पश्यां२ नहिस्वेषांवाविशेषःप्रत्यदृश्यत शूरबाहुविसृष्टानांशक्तीनांभरतर्षभ ४४ ज्योतिषामिवसंपा
तमपश्यन्कुरुपांडवाः ऋष्टिभिर्विमलाभिश्चतत्रतत्रविशांपते ४५ संपतंतीभिराकाशमा
वृतंवहुशोभत प्रासानांपततांराजन्रूपमासीत्समंततः ४६ शलभानामिवाकाशेतदाभर
तसत्तम रुधिरोक्षितसर्वांगाविप्रविद्धाश्वपत्रिभिः ४७ हयाःपरिपतंतिस्मशतशोथसहस्र
स्वशाः अन्योन्यंपरिपिष्टाश्चसमासाद्यपरस्परं आविक्षताःस्मदृश्यंतेवमंतोरुधिरंमुखैः त
तोभवत्तमोघोरंसैन्येनरजसावृते ४९ तानापक्रमतोद्राक्षंतस्माद्देशादरिंदम अश्वान्राजन्
मनुष्यांश्चरजसासंवृतेसति ५० भूमौनिपतिताश्चान्येवमंतोरुधिरंबहु केशाकेशिसमा
यानशेकुश्चेष्टितुंनराः ५१ अन्योन्यमश्वपृष्ठेभ्योविकर्षंतोमहाबलाः मल्लाइवसमासाद्यनि
जघ्नुरितरेतरं ५२ अश्वैश्चव्यपकृष्यंतबहवोत्रगतासवः भूमौनिपतिताश्चान्येबहवोविजये
षिणः ५३ तत्रतत्रव्यदृश्यंतपुरुषाःशूरमानिनः रक्तोक्षितैश्छिन्नभुजैरपकृष्टशिरोरुहैः
५४ व्यदृश्यतमहीकीर्णाशतशोथसहस्रशः दूरंनशक्यंतत्रासीद्गंतमश्वेनकेनचित् ५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

साश्वारोहैर्हतैरश्वैरास्तृतेव वसुधातले रुधिरोक्षितसंनाहैः शातशस्त्रैरुदायुधैः ५६ नानाप्रहर
णैर्घोरैः परस्परवधैषिभिः सुसंनिकृष्टैः संग्रामे हतभूयिष्ठसैनिके ५७ स मुहूर्तं ततो यु
द्ध्वा सौबलोऽथ विशांपते षट्साहस्रैर्हयैः शिष्टैरपायाच्छकुनिस्ततः ५८ इति श्रीमहाभा
रते शल्यपर्वणि २२ ३ संजय उवाच तथैव पाण्डवानीके रुधिरेण समुक्षिते षट्सहस्रैर्हयैः
शिष्टैरपायाच्छ्रान्तवाहनं १ अश्वारोहाश्च पाण्डूनामब्रुवन्रुधिरोक्षिताः सुसंनिकृष्टे संग्रा
मे भूयिष्ठे त्यक्तजीविताः २ नेह शक्यं रथैर्योद्धुं कुत एव महागजैः रथानेव रथा यान्तु
कुंजराः कुंजरानपि ३ प्रतियातो हि शकुनिः स्वमनीकमवस्थितः न पुनः सौबलो राज
न्युद्धमभ्यागमिष्यति ४ ततस्तु द्रौपदेयाश्च ते च मत्ता महाद्विपाः प्रययुर्यत्र पाञ्चाल्यो धृ
ष्टद्युम्नो महारथः ५ सहदेवोपि कौरव्य रजोमेघे समुत्थिते एकाकी प्रययौ तत्र यत्र राजा
युधिष्ठिरः ६ ततस्तेषु प्रयातेषु शकुनिः सौबलः पुनः पार्श्वतोभ्यहनत्क्रुद्धो धृष्टद्युम्न
स्य वाहिनीं ७ तत्पुनस्तुमुलं युद्धं प्राणांस्त्यक्त्वाभ्यवर्तत तावकानां परेषां च परस्परवधैषि
णां ८ तेन्योन्यमवैक्षन्त तस्मिन्वीरसमागमे योधाः पर्यपतन्राजन्शतशोथ सहस्र
शः ९ असिभिश्छिद्यमानानां शिरसां लोकसंक्षये प्रादुरासीन्महाशब्दस्तालानां पततां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मिव विमुक्तानां शरीराणां छिन्नानां पततां भुवि सायुधानां च बाहूनामूरूणां च विशांपते आसी
च्चटचटाशब्दस्सुमहांल्लोमहर्षणः निघ्नतो निशितैः शस्त्रैर्भ्रातृन्पुत्रान्पितृनपि योधाः परिप
तंतिस्म यथामिषकृते खगाः अन्योन्यं प्रतिसंरब्धाः समासाद्य परस्परं अहंपूर्वमहंपूर्वमिति नि
घ्नन्सहस्रशः संघर्षेणासनाद्भ्रष्टैरश्वारोहैर्गतासुभिः हयाः परिपतंतिस्म शतशोथ सहस्रशः
स्फुरतां प्रतिपिष्टानामश्वानां शीघ्रगामिनां स्तनतां च मनुष्याणां सन्नद्धानां विशांपते शक्त्यृ
ष्टिप्रासशब्दस्तुमुलः समपद्यत भिंदतां परमर्माणि राजन्दुर्मंत्रितेन तव ११ श्रमाभिभूताः
संरब्धाः श्रांतवाहाः पिपासवः विक्षताश्च शितैः शस्त्रैरभ्यवर्त्तंत तावकाः १२ मत्ता रुधिरगंधे
न वहवोत्र विचेतसः जघ्नुः परान्स्वकांश्चैव प्राप्तान्प्राप्ताननंतरान् १३ वहवश्च गतप्राणाः क्ष
त्रिया जयगृद्धिनः भूमावभ्यपतन्राजन्शरवृष्टिभिरावृताः १४ वृकगृध्रशृगालानां तुमु
लेभोदनेहनि आसीद्बलक्षयो घोरस्तव पुत्रस्य पश्यतः १५ नराश्वकायैः संछन्ना भूमिरासी
द्विशांपते रुधिरोदकचित्रा च भीरूणां भयवर्द्धिनी १६ असिभिः पट्टिशैः शूलैस्तक्षमाणाः
पुनः पुनः तावकाः पांडवेयाश्च नन्यवर्त्तंत भारत १७ प्रहरंतो यथाशक्ति यावत्प्राणस्य धार
णं योधाः परिपतंतिस्म वमंतो रुधिरं व्रणैः १८ शिरो गृहीत्वा केशेषु कबंधश्च प्रदृश्यत ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा॰प॰ ४९ तथास्थितेषु वै तेषु कौरवेषु नराधिप १९ तथा हि पार्थिवं येन योधाः कश्मलमाविशन् मेदीभू

तेन ततः प्राह्णे पांडवानां महद्बले २० अल्पावशिष्टैस्तुरगैरभ्यवर्त्तत सौबलः ततोऽभ्यधावंस्त्वरि

ताः पांडवा जयगृद्धिनः २१ पदातयश्च नागाश्च सादिनश्चोद्यतायुधाः कोष्ठकीकृत्य चाप्येनं

परिक्षिप्य च सर्वशः २२ शस्त्रैर्नानाविधैर्जघ्नुर्युद्धपारं तितीर्षवः त्वदीयास्तांस्तु संप्रेक्ष्य सर्व

तः समभिद्रुतान् २३ रथाश्वपत्तिद्विरदाः पांडवानभिदुद्रुवुः केचित्पदातिनः पत्तीन् मुष्टि

भिश्च परस्परं २४ निजघ्नुः समरे शूराः क्षीणशस्त्रास्ततोऽपतन् रथेभ्यो रथिनः पेतुर्द्विपेभ्यो

हस्तिसादिनः २५ विमानेभ्यो दिवो भ्रष्टाः सिद्धाः पुण्यक्षयादिव एवमन्योन्यमायस्ता योधा

जघ्नुर्महाहवे २६ पितॄन् भ्रातॄन् वयस्यांश्च पुत्रानपि तथापरे एवमासीदमर्यादं युद्धं भार

तसत्तम प्रासासिबाणकलिले वर्त्तमाने सुदारुणे इति श्री शल्यपर्वणि १२३१ संजय उवा

च तस्मिन् शब्दे मृदौ जाते पांडवैर्निहते बले अश्वैः सप्तशतैः शिष्टैरुपावर्त्तत सौबलः १

स यात्वा वाहिनीं तूर्णमब्रवीत्त्वरयन्युधि युध्यध्वमिति संहृष्टाः पुनः पुनररिंदमः २ अपृच्छ

त क्षत्रियांस्तत्र क्व नु राजा महारथः शकुनेस्तु वचः श्रुत्वा त ऊचुर्भरतर्षभ ३ असौ तिष्ठति कौ

रव्यो रणमध्ये महारथः यत्रैतत्सुमहच्छत्रं पूर्णचंद्रसमप्रभं ४ यत्रैते सतनुत्राणा रथास्तिष्ठ ४९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तिरेषिताः यत्रैषतुमुलःशब्दःपर्जन्यनिनदोपमः ५ तत्रगछद्रुतंराजंस्ततोऽहसमिकौरवंद
वमङ्गस्ततोयोधैःशकुनिःसौबलस्तथा ६ प्रययौतत्रयत्रासौपुत्रस्तवनराधिप संवृतःसर्व
तोवीरैःसमरेचित्रयोधिभिः ततोदुर्योधनेदृष्ट्वारथानीकेर्व्यवस्थिते ७ सरथांस्तावकान्सर्वान्
हर्षयन्शकुनिस्ततः दुर्योधनमिदंवाक्यंहृष्टरूपोविशाम्पते ८ कृतकार्यमिवात्मानंमन्य
मानोब्रवीन्नृपं जहिराजन्रथानीकमश्वाःसर्वेजितामया ९ नात्यक्त्वाजीवितंसंख्येशक्योजे
तुंयुधिष्ठिरः हतेतस्मिन्रथानीकेपांडवेनाभिपालिते १० गजानेतान्हनिष्यामःपदातींश्चे
तरांस्तथा श्रुत्वातुवचनंतस्यतावकाजयगृद्धिनः ११ रथेनाभ्यपतन्हृष्टाःपांडवानामनी
किनीं सर्वेविध्यंतस्तूणीराःप्रगृहीतशरासनाः १२ शरासनानिधुन्वानाःसिंहनादान्प्रणेदि
रे ततोज्यातलनिर्घोषःपुनरासीद्विशाम्पते १३ प्रादुरासीच्छराणांचसुमुक्तानांसुदारुणः ता
न्समीपगतान्दृष्ट्वाजवेनोद्यतकार्मुकान् १४ उवाचदेवकीपुत्रंकुंतीपुत्रोधनंजयः चो
दयाश्वानसंभ्रांतःप्रविशैनंबलार्णवं १५ अंतमद्यगमिष्यामिशत्रूणांनिशितैःशरैः अष्टाद
शादिनान्यद्ययुद्धस्यास्यजनार्दन १६ वर्त्तमानस्यमहतःसमासाद्यपरस्परं अनंतकल्पाध्वजि
नीभूत्वाह्येषांमहात्मनां १७ क्षयमद्यगतायुद्धेपश्यदैवंयथाविधं समुद्रकल्पंचबलंधार्त्तरा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श०प०

ष्ठस्य माधव १८ असमानाममायसं जानं गोः परोपममच्युत हते भीष्मे तु संदृश्या छिवं स्यादिह माधव १९ न वैकृतवानं मूढो धार्त्तराष्ट्रः सबालिशः उक्तो भीष्मेण यद्वाक्यं हितं पथ्यं च माधव

२० तथापि नाशोकृतवान् वीतबुद्धिः सुयोधनः तस्मिन् कृते मूले भीष्मे प्रच्युते धरणीतले २१

न जाने कारणं किं तु येन युद्धमवर्त्तत मूढात्मा सर्वथा मन्ये धार्त्तराष्ट्रान् सबालिशान् २२

पतिते शंतनोः पुत्रे ये कार्षुः समरे पुनः अनंतरं च निहते द्रोणे ब्रह्मविदांवरे २३ राधेये च विकर्णे च नैवाशाम्यत वैशसं अल्पावशिष्टे सैन्ये स्मिन् सूतपुत्रे च पातिते २४ कृतायुषि हते

वीरे जलसंधे च पौरवे श्रुतायुधे च नृपतौ नैवाशाम्यत वैशसं २५ भूरिश्रवसि शल्ये च शाल्वे चैव जनार्दन आवंत्येषु च वीरेषु नैवाशाम्यत वैशसं २६ जयद्रथे च निहते राक्षसे चाप्यलायुधे बाल्हिके सोमदत्ते च नैवाशाम्यत वैशसं २७ भगदत्ते हते शूरे कांबोजे च सुदक्षिणे दुःशासने च निहते नैवाशाम्यत वैशसं २८ दृष्ट्वा च निहतान् शूरान् पृथङ्माण्डलिकान्नृपान् बलिनश्च रणे कृष्ण नैवाशाम्यत वैशसं अक्षौहिणीपतीन् दृष्ट्वा भीमसेनेन पातितान् मोहाद्वा यदि वा लोभान्नैवाशाम्यत वैशसं २९ को नु राजः कुले जातः कौरवेयो विशेषतः निरर्थकं महद्वैरं कुर्यादन्यः सुयोधनात् ३० गुणतोभ्यधिकान् ज्ञात्वा बलतः शौर्यतोपि वा अम ४७

ङःकोनुपुण्येतजानन्नृप्राज्ञोहिताहितं ३१ यन्नतस्यमनोह्यासीत्त्वयोक्तस्यहितंवचः प्रशमेपांडु
वैःसार्धंसोन्यस्यश्रृणुयात्कथं ३२ येनप्रोक्तंनवोवाचभीष्मद्रोणौविदुरएवच प्रत्याख्यातःशमस्यार्थे
किंतन्नस्यादौषधंजे ३३ मोहाद्येनपितावृद्धःप्रत्याख्यातोजनार्दन तथामाताहितंवाक्यंभाष
माणाहितैषिणी प्रत्याख्याताह्यसत्कृत्यसकस्मान्नुचयेद्वचः कुलांतकरणोव्यक्तंजातएषज
नार्दन तथास्यदृश्यतेचेष्टानीतिश्चैवविशांपते ३४ नैवदास्यतिनोराज्यमितिमेमतिरच्युत उ
क्तोहंबहुशस्तातविदुरेणमहात्मना ३५ नजीवन्दास्यतेभागंधार्तराष्ट्रःश्रमानद यावत्प्राणा
धरिष्यंतिधार्तराष्ट्रस्यदुर्मतेः तावद्युष्मास्वपापेषुप्रचरिष्यतिपातकं नचयुक्तोन्यथाजातुमस्ते
युद्धेनमाधव ३७ इत्यब्रवीत्सदामांहिविदुरःसत्यदर्शनः तत्सर्वमद्यजानामिव्यवसायंदुरात्म
नः ३८ यदुक्तंवचनंतेनविदुरेणमहात्मना योहिश्रुत्वावचःपथ्यंजामदग्न्याद्यथातथं अव
मन्यतदुर्बुद्धिर्ध्रुवंनाशमुपस्थितः उक्तंहिबहुशःसिद्धैर्जातमात्रेसुयोधने ३९ एनंप्राप्यदुरा
त्मानंक्षयंक्षत्रंगमिष्यति तदिदंवचनंतेषांनिरुक्तंवैजनार्दन ४० सुयंगताहिराजानोदुर्योधनकृ
तेभृशं सोद्यसर्वान्रणेयोधान्निहनिष्यामिमाधव ४१ तस्मिन्क्षयेप्रवृत्तेस्मिञ्शून्येचशिबिरेकृते
वधायचात्मनोस्माभिःसंयुगंरोचयिष्यति ४२ तदंतंहिभवेद्वैरमनुमानेनमाधव एवंपश्यामि

मिवार्ष्णेयचिंतयन्त्वजयाम्बया ४३ विदुरस्यचवाक्येनचेष्टयाचदुरात्मनः तस्माद्याहिचमूंवीर
यावद्धन्मिशितैःशरैः ४४ दुर्योधनेमहाबाहोवाहिनींचास्यसंयुगे क्षेममद्यकरिष्यामिध
र्मराजस्यमाधव ४५ हत्वैतद्दुर्बलंसैन्यंधार्त्तराष्ट्रस्यपश्यतः ४६ संजयउवाच अभीषुहः
स्तोदाशार्हस्तथोक्तःसव्यसाचिना तद्बलौघममित्राणामभीतःप्राविशद्बलात् ४७ गदाख
ड्गशरैर्घोरैःशक्तिकंटकसंकुलं गदापरिघपंथानंरथनागमहाद्रुमं ४८ हयपत्तिलताकी
र्णगाहमानोमहायशाः व्यचरत्तत्रगोविंदोरथेनातिपताकिना ४९ तेहयाःपांडुराराजन्वहं
तोर्जुनमाहवे दिक्षुसर्वास्वदृश्यंतदाशार्हेणप्रचोदिताः ५० ततःप्रायाद्रथेनाजौसव्यसा
चीपरंतपः किरन्शरशतांस्तीक्ष्णान्वारिधाराघनोयथा ५१ प्रादुरासीन्महाशब्दःशराणां
नतपर्वणां इषुभिस्तुद्यमानानांसमरेसव्यसाचिना ५२ असज्जंतस्तनुत्रेषुशरौघाःप्रापतन्
न्भुवि इंद्राशनिसमस्पर्शागांडीवप्रेषिताःशराः ५३ नरान्नागान्समासाद्यहयांश्चापिविशां
पते अपतंतरणेवाणाःपतंगाइवघोषिणः ५४ आसीत्सर्वमवच्छन्नंगांडीवप्रेषितैःशरैः ५५
नप्राज्ञायंतसमरेदिशोवाप्रदिशोपिवा ५६ सर्वमासीज्जगत्पूर्णंपार्थनामांकितैःशरैः रु
क्मपुंखैस्तैलधौतैःकर्मारपरिमार्जितैः तेदह्यमानाःपार्थेनपावकेनेवकुंजराः पार्थेन।

प्राजह्रुर्द्रौणिं वध्यमानाः शितैः शरैः शरचापधरः पार्थः प्रज्वलन्निव भास्करः ५७ ददाह समरे
योधान्कतमग्निरिव ज्वलन् यथा वनान्ते वनजैर्विसृष्टः कक्षं दहेत्कृष्णगतिः सुघोषः भूरि
द्रुमं शुष्कलतावितानं भृशं समृद्धो ज्वलनः प्रतापी ५८ एवं स नाराचगणप्रतापी शरार्चिरुच्चा
वचतिग्मतेजाः ददाह सर्वां तव पुत्रसेनाममृष्यमाणस्तरसा तरस्वी ५९ न तस्येषवः प्राणह
राः सुमुक्ता नासज्जन्वै वर्मसु रुक्मपुंखाः न च द्वितीयं प्रमुमोच बाणं नरे हये वा परमद्विपे
वा ६० अनेकरूपाकृतिभिर्हि बाणैर्महारथानीकमनुप्रविश्य स एव एकस्तव पुत्रसेनां ज
घान दैत्यानिव वज्रपाणिः ६१ इति शल्यपर्वणि ५९१ संजय उवाच पश्यतां यतमाना
नां शूराणामनिवर्तिनां संकल्पमकरोन्मोघं गाण्डीवेन धनंजयः १ इन्द्राशनिसमस्पर्शान
विषह्यान्महौजसः विसृजन्दृश्यते बाणान्धारा मुंचन्निवाम्बुदः २ तत्सैन्यं भरतश्रेष्ठ व
ध्यमानं किरीटिना संप्रदुद्राव संग्रामात्तव पुत्रस्य पश्यतः ३ पितॄन्भ्रातॄन्परित्यज्य वय
स्यानपि चापरे हतधुर्या रथाः केचिद्धतसूतास्तथापरे ४ भग्नाक्षयुगचक्रेषाः केचिदासन्वि
शांपते अन्येषां सायकाः क्षीणास्तथान्ये बाणपीडिताः ५ अक्षता युगपत्केचित्प्राद्रवन्भय
पीडिताः केचित्पुत्रानुपादाय हतभूयिष्ठबांधवाः ६ विचुक्रुशुः पितॄंस्त्वन्ये सहायानपरे पुनः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.प.
४१

वांधवाश्चनरव्याघ्रभ्रातॄन्संबंधिनस्तथा ऊचुःकेचिदुन्मत्तवत्तत्रविशांपते बहवोत्रभृशं
विह्वलायुध्यमानामहारथाः ८ निःस्वनंतस्तथात्वन्येपार्थवाणहतानराः तानन्येरथमारोप्यश्रा
स्वास्यायमुहूर्तकं ९ विश्रांताश्चवितृष्णाश्चपुनर्युद्धायजग्मिरे तानपास्यगताःकेचित्तत्र
देवयुयुत्सवः १० कुर्वंतस्तवपुत्रस्यशासनंयुद्धदुर्मदाः पानीयमपरेपीत्वापर्याश्वास्यच।
वाहनं ११ वर्माणिचसमारोप्यकेचिद्भरतसत्तम समाश्वास्यापरेभ्रातॄन्निक्षिप्यशिबिरे
स्वके १२ पुत्रानन्येपितॄनन्येपुनर्युद्धमरोचयन् सज्जयित्वारथान्केचिद्यथामुख्यंविशांपते
आप्लुत्यपांडवानीकंपुनर्युद्धमरोचयन् तेशूराःकिंकिणीजालैःसमाच्छन्नाव्यभासिरे १३
त्रैलोक्यविजयेयुक्तायथादैतेयदानवाः आगम्यसहसाकेचिद्रथैःस्वर्णविभूषितैः १४
पांडवानामनीकेषुधृष्टद्युम्नमयोधयन् पांचाल्यस्ततःक्रुद्धःसैन्येनमहतावृतः १५
नाकुलिश्चशतानीकोरथानीकमयोधयत् धृष्टद्युम्नोपिपांचाल्यःशिखंडीचमहारथः
१६ प्रभद्रकाश्चसंक्रुद्धास्तावकान्हंतुमुद्यतः ततस्त्वापततस्तस्यतवपुत्रोजनाधिप १७
बाणसंघाननेकान्वैप्रेषयामासभारत धृष्टद्युम्नस्ततोराजंस्तवपुत्रेणधन्विना १८ नारा
चैरर्धनाराचैर्बहुभिःक्षिप्रकारिभिः वत्सदंतैश्चबाणैश्चकर्मारपरिमार्जितैः १९ अश्वांश्च

४९

तवोहत्वावाहांस्तरसिचार्पयत् सोतिविद्धोमहेष्वासस्तोत्रार्दितइवद्विपः २० तस्याश्वांश्चतुरो
बाणैःप्रेषयामासमृत्यवे २१ सारथेश्चापिबाणेनशिरःकायादपाहरत् ततोदुर्योधनोराजापृष्ठ
मारुह्यवाजिनः २२ अपाक्रामद्गतरथोनातिदूरमरिंदमः दृष्ट्वातद्धतविक्रांतंस्वमनीकंमहा
बलः २३ तवपुत्रोमहाराजप्रययौयत्रसौबलः ततोरथेषुभग्नेषुत्रिसाहस्रामहाद्विपाः २४ पां
डवान्रथिनःपंचसमंतात्पर्यवारयन् तेवृताःसमरेपंचगजानीकेनभारत २५ अशोभंतम
हाराजग्रहाव्याप्ताघनैरिव ततोर्जुनोमहाराजलब्धलक्षोमहाभुजः २६ विनिर्ययौरथेनैव
श्वेताश्वःकृष्णसारथिः सतैःसमंतात्परिवृतःकुंजरैःपर्वतोपमैः २७ नाराचैर्विविधैस्तीक्ष्णै
र्गजानीकमपोथयत् तत्रैकबाणनिहतानपश्याममहागजान् २८ पतितान्पात्यमानांश्च
निर्भिन्नान्सव्यसाचिना भीमसेनस्तुतान्दृष्ट्वानागान्मत्तगजोपमः २९ करेणादायमह
तींगदामभ्यपतद्बली अवप्लुत्यरथात्तूर्णंदंडपाणिरिवांतकः ३० तमुद्यतगदंदृष्ट्वापांड
वानांमहारथं वित्रेसुस्तावकाःसैन्याःशकृन्मूत्रेप्रसुस्रुवुः ३१ आविग्नंचबलंसर्वंगदाहस्ते
वृकोदरे गदयाभीमसेनेनभिन्नकुंभान्रजस्वलान् ३२ धावमानानपश्यामकुंजरान्पर्व
तोपमान् प्राद्रवन्कुंजरास्तेतुभीमसेनगदाहताः ३३ पेतुरार्तस्वरंकृत्वाछिन्नपक्षाइवा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श.प. द्विपः प्रभिन्नकुंभान्स्तु बहून्इव मार्गणानिनिस्तृतः ३४ पतमानांश्च संप्रेक्ष्य वित्रेसुस्तव सैनिकाः
५० युधिष्ठिरोपिसंक्रुद्धोमाद्रीपुत्रौचपांडवौ ३५ रथपत्रैःशितैर्बाणैःनिन्युर्वैवस्वतसादनं धृष्टद्यु
म्नस्तुसमरेपराजित्यनराधिपं ३६ अपक्रांतेतुबलवतिहार्दिक्येसमाश्रिते दृष्ट्वाचपांडवान्सर्वा
न्कुंजरैःपरिवारितान् ३७ धृष्टद्युम्नोमहाराजमहसासमुपाद्रवत् पुत्रःपांचालराजस्यजि
घांसुःकुंजरान्ययौ ३८ अदृष्ट्वातुरथानीकेदुर्योधनमरिंदमं अश्वत्थामाकृपश्चैवकृत।
वर्माचसात्वतः ३९ अपृच्छन्क्षत्रियांस्तत्रक्वनुदुर्योधनोगतः तेपश्यमानाराजानंवर्त्तमाने
जनक्षये ४० मन्वानानिहतंतत्रतवपुत्रंमहारथाः विवर्णवदनाभूत्वापर्यपृच्छंततेसुतं
४१ आहुःकेचिद्धतेसूतेप्रयातोयत्रसौबलः अपरेत्वब्रुवंस्तत्रक्षत्रियाभृशविक्षताः दुर्यो
धनेनकिंकार्यंद्रक्ष्यध्वंयदिजीवति ४२ युध्यध्वंसहिताःसर्वेकिंवोराजाकरिष्यति तेक्षत्रियाः
क्षतैर्गात्रैर्हतभूयिष्ठवाहनाः ४४ शरैःसंपीड्यमानास्तुनातिव्यक्तमथाब्रुवन् इदंसर्वंबलं
हन्मोयेनास्मपरिवारिताः ४५ एतेसर्वेगजान्हत्वाउपायांतिस्मपांडवाः श्रुत्वातुवचनंते
षामश्वत्थामामहाबलः ४६ हत्वापांचालराजस्यतदनीकंदुरुत्सहं कृपश्चकृतवर्माच।
ययुर्यत्रसौबलः ४७ रथानीकंपरित्यज्यशूराःसुदृढधन्विनः ततस्तेषुप्रयातेषुधृष्ट ५०

द्युम्नपुरस्कृताः ४८ आययुःपांडवाराजन्विनिघ्नंतस्समंततावकान् दृष्ट्वातुतानापततःसंप्रहृ
ष्टान्महारथान् ४९ पराक्रांतांस्तथावीरान्निराशान्जीवितेनरा विवर्णमुखभूयिष्टमभवा
त्तावकंबलं ५० परिक्षीणायुधान्दृष्ट्वानानहंपरिवारितान् राजन्बलेनद्व्यंगेनत्यक्त्वाजी
वितमात्मनः ५१ आत्मनापंचमोयुद्धेपांचालस्यबलेनह तस्मिन्देशेव्यवस्थाप्यपत्रशार
द्वतस्थितः ५२ संप्रयुध्यावयंपंचकिरीटिशरपीडिताः धृष्टद्युम्नंमहारौद्रंतत्रनोभूद
णोमहान् ५३ जितास्तेनवयंसर्वेव्यपयामरणात्ततः अथापश्यंसात्यकिंतमुपयांतंम
हारथं ५४ रथैश्चतुःशतैर्वीरोमामभ्यद्रवदाहवे धृष्टद्युम्नादहंमुक्तःकथंचिच्छ्रांतवा
हनात् ५५ पतितोमाधवानीकंदुःकृतीनरकंयथा तत्रयुद्धमभूद्घोरंमुहूर्तमतिदारु
णं ५६ सात्यकिस्तुमहाबाहुर्ममहत्वापरिछदं जीवग्राहमगृह्णान्मांमूर्छितंपतितंभु
वि ५७ ततोमुहूर्तादिवतन्नागानीकमवध्यत गदयाभीमसेनेननाराचैरर्जुनेनच ५८
तेप्रभग्नामहानागाःसमंतात्पर्वतोपमाः नातिप्रसिद्धैवगतिःपांडवानामजायत ५९ रथ
मार्गंस्ततश्चक्रेभीमसेनोमहाबलः पांडवानांमहाराजव्यपाकर्षन्महागजान् ६० अ
श्वत्थामाकृपश्चैवकृतवर्माचसात्वतः अपश्यंतोरथानीकेदुर्योधनमरिंदमं ६१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा॰प॰
४१
राजानंमृगयामासतवपुत्रंमहारथं पतित्यज्यचपांचाल्यंप्रयातोयत्रसौबलः ६२ राज्ञोदर्शन।
संविग्नावर्त्तमानेजनक्षये ६३ इतिश्रीमहाभारतेशल्यपर्वणि १२८४ संजयउवाच राजानीके
हतेतस्मिन्पांडुपुत्रेणभारत वध्यमानेबलेचैवभीमसेनेनसंयुगे १ चरंतंचतथादृष्ट्वाभीम
सेनमरिंदमं दंडहस्तंयथाक्रुद्धमंतकंप्राणहारिणं २ समेत्यसमरेराजन्हतशेषाःसुता
स्तव प्रदृश्यमानेकौरव्येपुत्रेदुर्योधनेतव ३ सोदर्याःसहिताभूत्वाभीमसेनमुपाद्रवन्
दुर्मर्षणःश्रुतांतश्चजैत्रोभूरिवलोरविः ४ जयत्सेनःसुजातश्चतथादुर्विषहोरिहा दुर्विमो
चननामाचदुःप्रधर्षस्तथैवच ५ श्रुतर्वाचमहाबाहुःसर्वेयुद्धविशारदाः इत्येतेसहिता
भूत्वातवपुत्राःसमंततः भीमसेनमभिद्रुत्यरुरुधुःसर्वतोदिशं ततोभीमोमहाराजस्वरथंपु
नरास्थितः मुमोचनिशितान्बाणान्पुत्राणांतवमर्मसु ६ तेकीर्यमाणाभीमेनपुत्रास्तवम
हारणे भीमसेनमुपासेदुःप्रवणादिवकुंजरं ७ ततःक्रुद्धोरणेभीमःशिरोदुर्मर्षणस्यह
क्षुरप्रेणप्रमथ्याशुपातयामासभूतले ८ ततोपरेणभल्लेनसर्वावरणभेदिना श्रुतांतमव
धीद्भीमस्तवपुत्रंमहारथं ९ जयत्सेनंतथाविध्वानाराचेनहसन्निव पातयामासकौरव्यंरथो
पस्थादरिंदमः १० सपपातरथाद्भूमौराजन्तूर्णंममारच श्रुतर्वाणंततोभीमंक्रुद्धोविव्याध ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मारिष ॥ श्रातेनगरप्रवानानांशराणांनतपर्वणां ततःक्रुद्धोरणेभीमोजघ्नेभ्रमृविवलेरवि १२
ज्ञीनेतोरिविभिरानर्छद्विषाग्निप्रतिमैःशरैः तेहताःपतितान्भूमौस्यंदनेभ्योमहारथाः १३ व
संतेपुष्पशवलानिकृंतान्इवकिंशुकाः ततोपरेणभल्लेनतीक्ष्णेनचपरंतपः १४ दुर्विमो
चनमाहत्यप्रेषयामाससत्वये सहतःप्रापतद्भूमौस्वरथाद्धन्विनांवरः १५ गिरेस्तुकूटजोभ
ग्नोमारुतेनेवपादपः दुःप्रधर्षततश्चैवसुजातंचसुतंतव १६ एकैकंन्यवधीत्संख्येद्वाभ्यांद्वा
भ्यांचमृष्तुवे तौशिलीमुखविद्धांगौपेततूरथसत्तमौ १७ ततोपतंतंसमरेअभिवीक्ष्यसुतंतव
व भल्लेनपातयामासभीमोदुर्विषहंरणे १८ सपपाततत्तोवाहात्पश्यतांसर्वधन्विनां दृ
ष्ट्वातुनिहतान्भ्रातॄन्बहूनेकेनसंयुगे १९ अमर्षवशमापन्नःश्रुतर्वाभीमसभ्ययात् वि
क्षिपन्सुमहच्चापंकार्त्तस्वरविभूषितं २० विसृजन्सायकांश्चैवविषाग्निप्रतिमान्बहून् स
तुराजन्धनुश्छित्त्वापांडवस्यमहामृधे २१ अथैनंछिन्नधन्वानंविंशत्यासमवाकिरत् ततो
न्यद्धनुरादायभीमसेनोमहाबलः २२ अवाकिरत्तवसुतंतिष्ठतिष्ठेतिचाब्रवीत् महदासीत्तयोर्यु
द्धंचित्ररूपंभयानकं २३ यादृशंसमरेपूर्वंजंभवासवयोर्युधि तयोस्तत्रशितैर्मुक्तैर्यमदंडनि
भैःशरैः २४ समाच्छन्नाधरासर्वाखंदिशोविदिशस्तथा ततःश्रुतर्वासंक्रुद्धोधनुरादायसा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.प.
५२

यकेः २५ भीमसेनंरणेराजन्बाह्वोरुरसिचार्पयत् सोतिविद्धोमहाराजतवपुत्रेणधन्विना २६
भीमःसंचुक्षुभेक्रुद्धःपर्वणीवमहोदधिः ततोभीमोरुषाविष्टःपुत्रस्यतवमारिष २७ सारथिं
चतरस्वाश्वशरैर्निन्येयमक्षयं विरथंतंसमालक्ष्यविशिखैर्लोमवाहिभिः २८ अवाकिरदमेया
त्मादर्शयन्पाणिलाघवं ऋतवीविरथोराजन्नाददेखड्गचर्मणी २९ अथास्याददतःखड्गं
शतचंद्रंचभानुमत् क्षुरप्रेणशिरःकायात्पातयामासपांडवः ३० छिन्नोत्तमांगस्यततःक्षुरा
प्रेणमहात्मना पपातकायःसरथाद्वसुधामनुनादयन् ३१ तस्मिन्निपतितेवीरेतावकाभ
यमोहिताः अभ्यद्रवंतसंग्रामेभीमसेनंयुयुत्सवः ३२ तानापततएवाशुहतशेषाद्बलार्ण
वात् दंशितान्प्रतिजग्राहभीमसेनःप्रतापवान् ३३ तेतंतंवैसमासाद्यपरिवव्रुःसमंततः त
तस्तुसंवृतोभीमस्तावकैर्निशितैःशरैः ३४ पीडयामासतान्सर्वान्सहस्राक्षइवासुरान् त
तःपंचशतान्हत्वासवरूथान्महारथान् ३५ जघानकुंजरानीकंपुनःसप्तशतंयुधि हत्वा
शतसहस्राणिपत्तीनांपरमेषुभिः ३६ वाजिनांचशतान्यष्टौपांडवःसविराजत भीमसेन
स्तुकौंतेयोहत्वायुद्धेसुतांस्तव ३७ मेनेकृतार्थमात्मानंसफलंजन्मचप्रभो तंतथायुध्यमा
नंवैविनिघ्नंतंचतावकान् ३८ ईक्षितुंनोत्सहंतेस्मतवसैन्यानराधिप विद्राव्यचकुरून्सर्वा ५२

सोश्वहत्वापदानुगान् ४९ दौर्योधनिस्ततश्चक्रेत्रासयानोमहाद्विपान् हतभूयिष्ठयोधात्तव
सेनाविशांपते ५० किंचिच्छेषामहाराजकृपणंसमपद्यत ५१ इतिश्रीशाल्यपर्वणि १२५ संजय
उवाच दुर्योधनोमहाराजदुर्दर्शश्चापितेसुतः हतशेषोतदासंख्येवाजिमध्येव्यवस्थितो १
ततोदुर्योधनंदृष्ट्वावाजिमध्येव्यवस्थितं उवाचदेवकीपुत्रःकुंतीपुत्रंधनंजयं २ शत्रवोहता
भूयिष्ठाःज्ञातयःपरिवारिताः गृहीत्वासंजयंचासौनिवृत्तःशिनिपुंगवः ३ परिश्रांतश्चनकु
लःसहदेवश्चभारत योधयित्वारणेपापान्धार्तराष्ट्रान्पदानुगान् ४ दुर्योधनमभित्यज्य
त्रयएवव्यवस्थिताः कृपश्चकृतवर्माचद्रोणिश्चैवमहारथः ५ असौतिष्ठतिपांचाल्यःश्रिया
परमयायुतः दुर्योधनबलंहत्वासहसर्वैःप्रभद्रकैः ६ असौदुर्योधनःपार्थवाजिमध्येव्यवस्थि
तः छत्रेणध्रियमाणेनप्रेक्षमाणोमुहुर्मुहुः ७ प्रतिव्यूह्यबलंसर्वंरणमध्येव्यवस्थितं एनं
हत्वाशितैर्बाणैःकृतकृत्योभविष्यसि ८ गजानीकंहतंदृष्ट्वात्वांचप्राप्तमरिंदम यावन्नविद्र
वंत्येतेतावज्जहिसुयोधनं ९ यातुकश्चित्तुपांचाल्यंक्षिप्रमागम्यतामिति परिश्रांतबलस्तात
नैषमुच्येतकिल्बिषी १० हत्वातवबलंसर्वंसंग्रामेधृतराष्ट्रजः जितान्पांडुसुतान्मत्वारूपंधार
यतेमहत् ११ निहतंस्वबलंदृष्ट्वापीडितंचापिपांडवैः ध्रुवमेष्यतिसंग्राममेवायैवात्मनोनृपः १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श॰प॰ एवमुक्तःफाल्गुनस्तुकेशवंवचनमब्रवीत् धृतराष्ट्रसुताःसर्वेहताभीमेनमाधव १३ यावेता
५२ वास्थितौकृष्णतावघनभविष्यतः हतोभीष्मोहतोद्रोणःकर्णोवैकर्त्तनोहतः १४ मद्रराजो
हतःशल्योहतःकृष्णजयद्रथः हयाःपंचशताःशिष्टाःशकुनेःसौबलस्यतु १५ रथानांतु
शतेशिष्टेद्वेचएवजनार्दन दंतिनांचशतंसाग्रंत्रिसाहस्राःपदातयः १६ अश्वत्थामाकृप
श्चैवत्रिगर्त्ताधिपतिस्तथा उलूकःशकुनिश्चैवकृतवर्माचसात्वतः १७ एतद्बलमभूच्छेषं
धार्त्तराष्ट्रस्यमाधव मोक्षोननूनंकालात्तुविद्यतेभुविकस्यचित् १८ तथाविनिहतेसैन्येप
श्यदुर्योधनंस्थितं अद्याहनिमहाबाहोहतामित्रोभविष्यति १९ नहिमेमोक्ष्यतेकश्चित्परे
षामितिचिंतये यत्वद्यसमरंकृष्णनहास्यतिमदोत्कटः २० तान्वैसर्वान्हनिष्यामियद्य
पिस्युरमानुषाः अद्ययुद्धेसुसंक्रुद्धोदीर्घंराज्ञःप्रजागरं २१ अपनेष्यामिगांधारंघातयित्वा
शितैःशरैः निकृत्यावैदुराचारोयानिरत्नानिसौबलः २२ सभायामहरद्द्यूतेपुनस्तान्याह
राम्यहं अद्यताअपिवेत्स्यंतिसर्वानागपुरेस्त्रियः २३ श्रुत्वापतींश्चपुत्रांश्चपांडवैर्निहतान्युधि
समाप्तमद्यवैकर्मसर्वंकृष्णभविष्यति अद्यदुर्योधनोदीप्तांश्रियंप्राणांश्चमोक्ष्यति २४ नाप
यातिभयात्कृष्णसंग्रामाद्यदिचेन्मम निहतंविद्धिवार्ष्णेयधार्त्तराष्ट्रंसुबालिशं २५ ममह्ये ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तदश्वानीकंवैवाजित्वंदमरिंदम सोऽहंज्ञातलनिर्ह्रोषंयाहियावन्निहन्म्यहं २६ एवमुक्तस्तदाशा
र्हः पांडवेनयशस्विना अचोदयद्धयान्राजन्दुर्योधनबलंप्रति तदनीकमभिप्रेक्ष्यत्रयःसङ्ग्राम
हारथाः भीमसेनोऽर्जुनश्चैवसहदेवश्चमारिष प्रययुःसिंहनादेनदुर्योधनजिघांसया २७ ता
न्प्रेक्ष्यसहितान्सर्वान्जवेनोद्यतकार्मुकान् सौबलोऽभ्यद्रवद्युद्धेपांडवानाततायिनः २८ सु
दर्शनस्तवसुतोभीमसेनंसमभ्ययात् सुशर्माशकुनिश्चापियुयुधातेकिरीटिना २९ सहदे
वंतवसुतोहयपृष्ठगतोऽभ्ययात् ततोहियत्नतःक्षिप्रंतवपुत्रोजनाधिप ३० प्रासेनसहदेव
स्यशिरस्यभिप्राहरद्भृशं सोपाविशद्रथोपस्थेतवपुत्रेणताडितः रुधिराप्लुतसर्वांगआशीविष
इवश्वसन् ३२ प्रतिलभ्यततःसंज्ञांसहदेवोविशांपते दुर्योधनंशरैस्तीक्ष्णैःसंक्रुद्धःसमवाकि
रत् ३३ पार्थोपियुधिविक्रम्यकुंतीपुत्रोधनंजयः शूराणामश्वपृष्ठेभ्यःशिरांसिनिचकर्तह
३४ तदनीकंतदापार्थोव्यधमद्बहुभिःशरैः पातयित्वाहयान्सर्वांस्त्रिगर्तानांरथान्ययौ ३५
ततस्तेसहिताभूत्वात्रिगर्तानांमहारथाः अर्जुनंवासुदेवंचशरवर्षैरवाकिरन् ३६ सत्यकर्माण
माक्षिप्यक्षुरप्रेणमहायशाः ततोऽस्यस्यंदनस्येषांचिच्छेदपांडुनंदनः शिलाशितेनचविभोक्षुर
प्रेणमहायशाः शिरश्चिच्छेदसहसातप्तकुंडलभूषणं ३७ सत्येषुमथचादत्तयोधानांमिषतां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्रो.प.
४४

तव यथासिंहोवनेराजन्मृगांपरिबुभुक्षितः ३८ तेनिहत्यततःपार्थःसुशर्माणंत्रिभिःशरैः विध्वा
तानहनत्सर्वान्रथान्रुक्मविभूषितान् ३९ ततःप्रयात्त्वरन्पार्थोदीर्घकालंसुसंहृतं मुंचन्
क्रोधविषंतीक्ष्णंप्रस्थलाधिपतिंप्रति ४० तमर्जुनःपृषत्कानांशतेनभरतर्षभ पूरयित्वाततो
वाहान्प्राहरत्तस्यधन्विनः ४१ ततःशरंसमादाययमदंडोपमंतदा सुशर्माणंसमुद्दिश्यचि
क्षेपाशुहसन्निव ४२ सशरःप्रेषितस्तेनक्रोधदीप्तेनधन्विना सुशर्माणंसमासाद्यबिभेदहृ
दयंरणे ४३ सगतासुर्महाराजपपातधरणीतले नंदयन्पांडवान्सर्वान्व्यथयंश्चापितावका
न् ४४ सुशर्माणंरणेहत्वापुत्रानस्यमहारथान् सप्तचाष्टौचत्रिंशच्चसायकैरनयत्क्षयं
४५ ततोस्यनिशितैर्बाणैःसर्वान्हत्वापदानुगान् अभ्यगाद्भारतींसेनांहतशेषांमहारथः
४६ भीमस्तुसमरेक्रुद्धःपुत्रंतवजनाधिप सुदर्शनमदृश्यंतंशरैश्चक्रेहसन्निव ४७ ततोस्य
प्रहसन्क्रुद्धःशिरःकायादपाहरत् क्षुरप्रेणसुतीक्ष्णेनसहतःप्रापतद्भुवि ४८ तस्मिंस्तु
निहतेवीरेततस्तस्यपदानुगाः परिवव्रूरणेक्रुद्धाःकिरंतोविविधान्शरान् ४९ ततस्तुनि
शितैर्बाणैस्तदनीकंवृकोदरः इंद्राशनिसमस्पर्शैःसमंतात्पर्यवाकिरत् ५० ततःक्षणेनतान्
भीमोन्यहनद्भरतर्षभ तेषुत्सायमानेषुसेनाध्यक्षामहारथाः भीमसेनंसमासाद्यततो ४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

युध्यंतभारत सतान्सर्वान्शरैर्घोरैरवाकिरतपांडः ५२ तथैवतावकाराजन्पांडवेयान्महारथा
न् शरवर्षेणमहतासमंतात्पर्यवारयन् ५३ आकुलेनदभूत्सर्वपांडवानांपरैःसह तावकानांचस
मेरपांडवेयैर्युयुत्सतां ५४ तत्रयोधास्तदापेतुःपरस्परसमाहताः उभयोःसेनयोराजन्संशोचंतस्म
बांधवान् ५५ इतिशल्यपर्वणिसुशर्मवधः १४५ संजयउवाच तस्मिन्प्रवृत्तेसंग्रामेगजवाजिन
रक्षये शकुनिःसौबलोराजन्सहदेवंसमभ्ययात् १ ततोस्यापतन्तंतूर्णंसहदेवःप्रतापवान् श
रौघान्प्रेषयामासपतंगानिवशीघ्रगान् २ उलूकश्चरणेभीमंविव्याधदशभिःशरैः शकुनिश्च
महाराजभीमंविध्वात्रिभिःशरैः ३ सायकानांनवत्याचसहदेवमवाकिरत् तेशूराःसमरेराज
न्समासाद्यपरस्परं ४ विव्यधुर्निशितैर्बाणैःकंकबर्हिणवाजितैः स्वर्णपुंखैःशिलाधौतैराक
र्णप्रहितैःशरैः ५ तेषांचापभुजोत्सृष्टाशरवृष्टिर्विशांपते आछादयत्दिशःसर्वाधाराभिरिव
तोयदः ६ ततःक्रुद्धोरणेभीमःसहदेवश्चभारत चेरतुःकदनंसंख्येकुर्वंतौसुमहद्बलौ ७
ताभ्यांशरशतैश्छन्नंतद्बलंतवभारत अंधकारमिवाकाशमभवत्तत्रतत्रह ८ अश्वैर्विपरिधाव
द्भिःशरैश्छन्नैर्विशांपते तत्रतत्रकृतोमार्गोविकर्षद्भिर्हतान्बहून् ९ निहतानांहयानांचसहै
वहयसादिभिः वर्मभिर्विनिकृत्तैश्चप्रासैश्छिन्नैश्चमारिष १० ऋष्टिभिःशक्तिभिश्चैवसासिप्रा।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा.प. ५५

शापरत्नथैः संछन्ना पृथिवी जनते कृत्स्नमेः शावलाइव ११ योधास्तत्र महाराज समासाद्य परस्परं च्यव
रोतरणेक्रुद्धा विनिघ्नंतः परस्परं १२ उद्धृत्तनयनैरोषात्संदष्टौष्ठपुटैर्मुखैः सकुंडलैर्मही छन्ना
पद्मकिंजल्कसंनिभैः १३ भुजैश्छिन्नैर्महाराज नागराजकरोपमैः सांगदैः सतनुत्रैश्च सासि
प्रासपरश्वधैः १४ कबंधैरुत्थितैश्छिन्नैर्नृत्यद्भिश्चापरैर्युधि क्रव्यादगणसंपन्ना घोराभूत्पृ
थिवी विभो १५ अल्पावसिष्टे सैन्येतु कौरवेयान्महाहवे प्रहृष्टाः पांडवाभूत्वा निन्यिरे यमसा
दनं १६ एतस्मिन्नंतरे शूरः सौबलेयः प्रतापवान् प्रासेन सहदेवस्य शिरसि शाहरद्भृशं १७
सविह्वलो महाराज रथोपस्थ उपाविशत् सहदेवं तथा दृष्ट्वा भीमसेनः प्रतापवान् १८ स
र्वसैन्यानि संक्रुद्धो वारयामास भारत निर्बिभेद च नाराचैः शतशोथ सहस्रशः १९ विनिर्भि
द्याकरोत्चैव सिंहनादमरिंदमः तेन शब्देन वित्रस्ताः सर्वे सहयवारणाः २० प्राद्रवन्सहसा भी
ताः शकुनेश्च पदानुगाः प्रभग्नानथ तान्दृष्ट्वा राजा दुर्योधनोब्रवीत् २१ निवर्तध्वमधर्मज्ञा यु
ध्यध्वं किं सृतेन वः इह कीर्तिं समाधाय प्रेत्यलोकान्समश्नुते २२ प्राणान्जहाति योवीरो युधि
पृष्ठमदर्शयन् एवमुक्तास्तु ते राज्ञा सौबलस्य पदानुगाः २३ पांडवानभ्यवर्त्तंत मृत्युं कृत्वा निव
र्त्तनं द्रवद्भिस्त्वराजेंद्र कृतः शब्दोतिदारुणः २४ क्षुब्धसागरसंकाशः क्षुभितः सर्वतोभवत् ५५

तांस्तथापतितान्दृष्ट्वासौबलस्यपदानुगान् २५ प्रत्युद्ययुर्महाराजपांडवाविजयेछताः त
स्यास्वस्यचडर्धर्षः सहदेवोविशांपते २६ शकुनिंदशभिर्विद्ध्वाहयांश्चास्यत्रिभिः शरैः धनुश्चि
छेदचशरैः सौबलस्यहसन्निव २७ अथान्यद्धनुरादायशकुनिर्युद्धदुर्मदः विव्याधनकुलं
षष्ट्याभीमसेनंचसप्तभिः २८ उलूकोपिमहाराजभीमंविव्याधसप्तभिः सहदेवंचसप्तत्या
परीप्सन्पितरंरणे २९ तंभीमसेनः समरेविव्याधनवभिः शरैः शकुनिंचचतुः षष्ट्यापार्श्वस्थां
स्त्रिभिस्त्रिभिः ३० तेहन्यमानाभीमेननाराचैस्तैलपायितैः सहदेवंरणेक्रुद्धंछादयन्शरवृ
ष्टिभिः ३१ पर्वतंवारिधाराभिः सविद्युतइवांबुदः ततोस्यापततः शूरः सहदेवः प्रतापवान् ३२
उलूकस्यमहाराजभल्लेनापहरच्छिरः सजगामरथाद्भूमिंसहदेवेनपातितः ३३ रुधिराप्लुत
सर्वांगोनंदयन्पांडवान्युधि पुत्रंतुनिहतंदृष्ट्वाशकुनिस्तत्रभारत ३४ साश्रुकंठोविनिश्व
सन्तद्वाक्यमनुस्मरन् चिंतयित्वामुहूर्तंसवाष्पपूर्णेक्षणः श्वसन् ३५ सहदेवंसमासा।
द्यत्रिभिर्विव्याधसायकैः तानपास्यशरान्मुक्तान्शरसंघैः प्रतापवान् ३६ सहदेवोमहाराज
धनुश्चिच्छेदसंयुगे छिन्नेधनुषिराजेंद्रशकुनिः सौवलस्तथा ३७ प्रगृह्यविपुलंखड्गंसहदेवाय ह २
प्राहिणोत्तु तमापतंतंसहसाघोररूपंविशांपते ३८ द्विधाचिच्छेदसमरेसौबलस्यहसन्निव।

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा॰प॰ असिंदृष्ट्वातथाछिन्नंप्रगृह्यमहतींगदां ४९ प्राहिणोत्सहदेवायसामोघान्यपतद्भुवि ततःशक्तिंम
५९ हाघोरांकालरात्रिमिवोद्यतां ५० प्रेषयामाससंक्रुद्धःपांडवंप्रतिसौबलः तामापतंतींसहसाशरैः
कनकभूषणैः ५१ त्रिधाचिछेदसमरेसहदेवोहसन्निव सापपातत्रिधाछिंनाभूमौकनकभूष
णा ५२ शीर्यमाणायथादीप्तागगनाद्वैशतह्रदा शक्तिंविनिहतांदृष्ट्वासौवलेचभयार्दिते ५३
दुद्रुवुस्तावकाःसर्वेभयेजातेससौबलाः अथोत्क्रुष्टंमहद्ध्यासीत्पांडवैर्जितकाशिभिः ५४
धार्तराष्ट्रास्ततःसर्वेप्रायशोविमुखाभवन् तान्वैविमनसोदृष्ट्वामाद्रीपुत्रःप्रतापवान् ५५
शरैरनेकसाहस्रैर्वारयामाससंयुगे ततोगांधारकैर्गुप्तंपृष्ठैरश्वैर्जयेधृतं ५६ आससादरणे
यांतंसहदेवोथसौवले स्वमंशमवशिष्टंतंसंस्मृत्यशकुनिंनृपे ५७ रथेनकांचनांगेनसह
देवःसमभ्ययात् अधिज्यंबलवत्कृत्वाव्याक्षिपन्सुमहद्धनुः ५८ ससौबलमभिद्रुत्यगृध्रप
त्रैःशिलाशितैः भृशमभ्यहनत्क्रुद्धस्तोत्रैरिवमहाद्विपं ५९ उवाचचैनंमेधावीविगृह्यस्मा
रयन्निव क्षत्रधर्मेस्थितोभूत्वायुध्यस्वपुरुषोभव ६० यत्तदाहृष्यसेमूढग्लहन्नक्षैःसभातले
फलमद्यप्रपद्यस्वकर्मणस्तस्यदुर्मते ६१ निहतास्तेदुरात्मानोयेस्मानवहसन्पुरा दुर्योधनः
कुलांगारःशिष्टस्त्वंचास्यमातुलः ६२ अद्यतेविहनिष्यामिक्षुरेणोन्मथितंशिरः वृक्षात्फ ५९

लमिवाविह्वलंगुडेनप्रमाथिना ५३ एवमुक्त्वामहाराजसहदेवोमहाबलः संक्रुद्धोबाणपूर्णार्द्दूलोवे
गेनाभिससारतं ५४ अभिगम्यसुदुर्धर्षः सहदेवोयुधांपतिः विकृष्यसुमहच्चापंक्रोधेनप्रज्वलन्नि
व ५५ शकुनिंदशभिर्विध्वाचतुर्भिश्चास्यवाजिनः छत्रंध्वजंधनुश्चास्यछित्वासिंहइवानदत् ५६
छिन्नध्वजधनुश्छत्रः सहदेवेनसौबलः कृतोविद्धश्चबहुभिः सर्वमर्मसुसायकैः ५७ ततो
भूयोमहाराजसहदेवः प्रतापवान् शकुनेः प्रेषयामासशरवृष्टिंदुरासदां ५८ ततस्तुक्रुद्धः
सुबलस्यपुत्रोमाद्रीसुतंसहदेवंविमर्दे प्रासेनजांबूनदभूषणेनजिघांसुरेकोभिपपातशीघ्रं
५९ माद्रीसुतस्तस्यसमुद्यतंतंप्रासंसुवृत्तौचभुजौरणाग्रे भल्लैस्त्रिभिर्युगपत्संचकर्त्तननादचो
च्चैस्तरसाजिमध्ये ६० तस्याशुकारीसुसमाहितेनसुवर्णपुंखेनदृढायसेन भल्लेनसर्वावर
णातिगेनशिरः शरीरात्प्रममाथभूयः ६१ शरेणकार्त्तस्वरभूषितेनदिवाकराभेनसुसं
शितेन हृतोत्तमांगोयुधिपांडवेनपपातभूमौसुबलस्यपुत्रः ६२ सतच्छिरोवेगवताशरेण
सुवर्णपुंखेनशिलाशितेन प्रावेरयत्कुपितः पांडुपुत्रोयत्तत्कुरूणामनयस्यमूलं ६३ भ
जौसुवृत्तौप्रचकर्त्तवीरः पश्चात्कबंधंरुधिरावसिक्तं विस्पंदमानंनिपपातघोरंरथोत्तमात् पार्थिव
पार्थिवस्य ६४ सुवर्णताराराणभूषितोंगंससिंहनादेविनदन्महात्मा सुवर्णपुंखैर्विशिखैभिः

श०प० शिरस्त्वेः प्रवेपयद्भूमिपतेर्महात्मा ६५ तंपांडुपुत्राः प्रतिपूजयंतो हृष्टा ब्रुवाणाः सहदेवमाजौ दिष्ट्या
८२ हतो नैः कृतिको दुरात्मा सहात्मजो वीर वरत्वयेति ६६ कृत्तोत्तमांगं शकुनिं समीक्ष्य भूमौ शयानं रु
धिरार्द्रगात्रं योधास्त्वदीया भयनष्टसत्त्वा दिशः प्रजग्मुः प्रगृहीतशस्त्राः ६७ विप्रद्रुताः शुष्कमु
खा विसंज्ञा गांडीवघोषेण समाहताश्च भयार्दिता भग्नरथाः स्वनागाः पदातयश्चैव सधार्तराष्ट्राः
६८ ततो रथाच्छकुनिं पातयित्वा मुदान्विता भारत पांडवेयाः शंखान्प्रदध्मुः समरे प्रहृष्टाः सके
शवान्सैनिकान्हर्षयंतः ६९ तं चापि सर्वे प्रतिपूजयंतो हृष्टा ब्रुवाणाः सहदेवमाजौ दिष्ट्या
हतो नैकृतिको दुरात्मा सहात्मजो वीर रणे त्वयेति ७० इति श्रीशल्यपर्वणि शकुन्युलूकवधः
१५२ संजय उवाच ततः क्रुद्धा महाराज सौबलस्य पदानुगाः त्यक्त्वा जीवितमाक्रंदे पांडवान्प
र्यवारयन् १ तानर्जुनः प्रत्यगृह्णात्सहदेवजये धृतः भीमसेनश्च तेजस्वी क्रुद्धाशीविषद
र्शनः २ शक्त्यृष्टिप्रासहस्तानां सहदेवं जिघांसतां संकल्पमकरोन्मोघं गांडीवेन धनंज
यः ३ संगृहीतायुधान्बाहून्योधानामभिधावतां भल्लैश्चिच्छेद बीभत्सुः शिरांस्यपि हयानपि
४ ते हयाः प्रत्यपद्यंत वसुधां विगतासवः त्वरिता लोकवीरेण प्रहताः सव्यसाचिना ५ ततो दु ८२
र्योधनो राजा दृष्ट्वा स्वबलसंक्षयं हतशेषान्समानीय क्रुद्धो रथगणान्बहून् ६ कुंजरांश्चह

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यांश्चैवपदातींश्चसमंततः उवाचसहितान्सर्वान्धार्तराष्ट्रइदंवचः ७ समासाद्यरणेसर्वान्पां
डवान्ससुहृद्गणान् पांचाल्यंचापिसबलंहत्वाशीघ्रंन्यवर्तत ८ तस्यतेशिरसागृह्यवचनंयु
द्धदुर्मदाः अभ्यघ्नन्रणेपार्थान्तवपुत्रस्यशासनात् ९ तानभ्यापततःशीघ्रंहतशेषान्महार
णे शरैराशीविषाकारैःपांडवाःसमवारयत् १० तत्सैन्यंभरतश्रेष्ठमुहूर्तेनमहात्मभिः अवध्य
तरणंप्राप्यत्रातारंनाभ्यविंदत ११ प्रतिष्ठमानंतुभयान्नावतिष्ठतदंशितं अश्वैर्विपरिधावद्भिःसै
न्येनरजसावृते १२ नप्राज्ञायंतसमरेदिशःसप्रदिशस्तथा ततस्तुपांडवानीकान्निःसृत्यबहवो
जनाः १३ अभ्यघ्नंस्तावकान्युद्धेमुहूर्तादिवभारत ततोनिःशेषमभवत्तत्सैन्यंतवभारत १४ अ
क्षौहिण्यःसमेतास्तुतवपुत्रस्यभारत एकादशहतायुद्धेताःप्रभोपांडुसृंजयैः १५ तेषुराजसह
स्रेषुतावकेषुमहात्मसु १६ एकोदुर्योधनोराजन्नदृश्यतभृशंक्षतः ततोवीक्ष्यदिशःसर्वादृष्ट्वा
शून्यांचमेदिनीं १७ विहीनःसर्वयोधैश्चपांडवान्वीक्ष्यसंयुगे मुदितान्सर्वतःसिद्धान्नर्दमानान्स न्
मंततः १८ बाणशब्दरवांश्चैवश्रुत्वातेषांमहात्मनां दुर्योधनोमहाराजकश्मलेनाभिसंवृतः १९
अपयानेमतिंचक्रेविहीनबलवाहनः धृतराष्ट्रउवाच निहतेमामकेसैन्येनिःशेषेशिबिरेकृ
ते २० पांडवानांबलेसूतकिंनुशेषमभूत्तदा एतन्मेपृच्छतोब्रूहिकुशलोह्यसिसंजय यच्चदुर्यो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धनोमेदःकृतवांस्तेनयोममबलक्षयं तथाहृष्ट्वासएकःपृथिवीपतिः २२ संजयउवाच रथानांद्वेस
हस्रेतुसप्तनागशतानिच पंचचाश्वसहस्राणिपत्तीनांचशतंशताः २३ एतच्छेषमभूद्राजन्पां
डवानांमहद्बलं परिगृह्यहियद्युद्धे धृष्टद्युम्नोव्यवस्थितः २४ एकाकीभरतश्रेष्ठततोदुर्योध
नोनृपः नापश्यत्समरेकिंचित्सहायंरथिनांवरः २५ नर्दमानान्परान्दृष्ट्वास्वबलस्यचसंक्षयं
तथादृष्ट्वामहाराजएकःसपृथिवीपते २६ हतंस्वहयमुत्सृज्यप्राङ्मुखःप्राद्रवद्भयात्
एकादशचमूभर्त्तापुत्रोदुर्योधनस्तव २७ गदामादायतेजस्वीपदातिःप्रस्थितोह्रदं नातिदू
रंततोगत्वापद्भ्यामेवनराधिपः २८ सस्मारवचनंक्षत्तुर्धर्मशीलस्यधीमतः इदंनूनंमहाप्रा
ज्ञोविदुरोदृष्टवान्पुरा २९ महद्वैशसमस्माकंक्षत्रियाणांचसंयुगे एवंविचिंतयानस्तुप्रवि
विक्षुर्ह्रदंनृपः ३० दुःखसंतप्तहृदयोदृष्ट्वाराजन्बलक्षयं पांडवास्तुमहाराजधृष्टद्युम्नपुरो
गमाः ३१ अभ्यद्रवंतसंक्रुद्धास्तवराजन्बलंप्रति शक्त्यृष्टिप्रासहस्तानांबलानामभिगर्जतां ३२
संकल्पमकरोन्मोघंगांडीवेनधनंजयः तान्हत्वानिशितैर्बाणैःसामात्यान्सहबंधुभिः ३३ र
थेश्वेतहयेतिष्ठन्नर्जुनोव्यशोभत सुबलस्यहतेपुत्रेसवाजिरथकुंजरे ३४ महावनमिवा
छिन्नमभवत्तावकंबलं अनेकशतसाहस्रेबलेदुर्योधनस्यह ३५ नान्योमहारथोराजन्जीव

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मानोव्यहृष्यत द्रोणपुत्राद्धतेवीरात्तथैवकृतवर्मणः ३७ कृपाच्चगौतमाद्राजन्पार्थिवाच्चतवात्म
जात् धृष्टद्युम्नवचःश्रुत्वाशिनेर्नप्तामहारथः ३८ उद्यम्यनिशितंखड्गंहंतुमामुद्यतस्तदा तमाग
मन्महाप्राज्ञःकृष्णद्वैपायनोब्रवीत् ३९ मुच्यतांसंजयोजीवन्नहंतव्यःकथंचन द्वैपायनवचः
श्रुत्वाशिनेर्नप्ताकृतांजलिः ४० ततोमामब्रवीन्मुक्त्वास्वस्तिसंजयसाधय अनुज्ञातस्त्वहंतेन
न्यस्तवर्मानिरायुधः ४१ प्रातिष्ठंयेननगरंसायाह्नेरुधिरोक्षितः क्रोशमात्रमपाक्रांतंगदापाणि
मवस्थितं ४२ एकंदुर्योधनंराजन्नपश्यंभृशविक्षतं सतुमामश्रुपूर्णाक्षोनाशक्नोदभिवीक्षितुं
४३ उपप्रैक्षतमांदृष्ट्वातथादीनमवस्थितं तंचाहमपिशोचंतंदृष्ट्वैकाकिनमाहवे ४४ मुहू
र्त्तंनाशकंवक्तुमतिदुःखपरिप्लुतः ततोस्मैतदहंसर्वमुक्तवान्ग्रहणंतदा ४५ द्वैपायनप्रसादा
च्चजीवतोमोक्षमात्मनः समुहूर्त्तमिवध्यात्वाप्रतिलभ्यचचेतनां ४६ भ्रातॄंश्चसर्वसैन्यानि
पर्यपृच्छतमांततः तस्मैतदहमाचक्षेसर्वंप्रत्यक्षदर्शिवान् ४७ भ्रातॄंश्चनिहतान्सर्वान्सै
न्यंचविनिपातितं त्रयःकिलरथाःशिष्टास्तावकानांनराधिप ४८ इतिप्रस्थानकालेमांकृ
ष्णद्वैपायनोब्रवीत् सदीर्घमिवनिश्वस्यप्रत्यवेक्ष्यपुनःपुनः ४९ अंसेमांपाणिनास्पृष्ट्वापुत्रस्ते
पर्यभाषत त्वदन्योनेहसंग्रामेकश्चिज्जीवतिसंजय ५० द्वितीयंनेहपश्यामिससहायाश्चपांड

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा० प० ५ः श्रुत्वाः संजयराजानेत्राभ्यामेषमीश्वरं ५१ दुर्योधनस्तथा ततः प्रविष्टो ह्रदमीश्वर सुहृद्भि
५९ स्तादृशो हीनः पुत्रैर्भ्रातृभिरेव च ५२ पांडवैश्च हृते राज्ये को नु जीवेत मादृशः आचक्षीथाः सर्वा
मिदं मां च मुक्तं महाहवात् ५३ अस्मिंस्तोयह्रदे गुप्तं जीवंतं भृशविक्षतं एवमुक्त्वा महाराज प्रा
विशत्तं महाह्रदे ५४ अस्तंभयत तोयं च मायया मनुजाधिपः तस्मिन् ह्रदे प्रविष्टे तु त्रीन् रथान्
श्रांतवाहनान् ५५ अपश्यं सहितानेकस्तं देशं समुपेयुषः कृपं शारद्वतं वीरं द्रोणिं च रथिनां
वरं ५६ भोजं च कृतवर्माणं सहितान् शरविक्षतान् ते सर्वे मामभिप्रेक्ष्य तूर्णमश्वानचोदय
न् ५७ उपायाय च मामूचुर्दिष्ट्या जीवसि संजय अपृच्छंश्चैव मां सर्वे पुत्रं तव जनाधिप ५८ क
च्चिद्दुर्योधनो राजा स नो जीवति संजय आख्यातवानहं तेभ्यस्तदा कुशलिनं नृपं ५९ तच्चैव सर्व धृ०८
माचख्ये यन्मां दुर्योधनोऽब्रवीत् ह्रदं चैवाहमाचख्ये यं प्रविष्टो नराधिपः ६० अश्वत्थामा तु तद्रा
जन् निशम्य वचनं मम तं ह्रदं विपुलं प्रेक्ष्य करुणं पर्यदेवयत् ६१ अहो धिक् स न जानाति जी
वतोऽस्मान् नराधिपः पर्याप्ता हि वयं तेन सह योधयितुं परान् ६२ ते तु तत्र चिरं कालं विलप्य च
महारथाः प्राद्रवन् रथिनां श्रेष्ठा दृष्ट्वा पांडुसुतान् रणे ६३ ते तु मां रथमारोप्य कृपस्य सुपरिष्कृतं
सेनानिवेशमाजग्मुर्हतशेषास्त्रयो रथाः ६४ तत्र गुल्माः परित्रस्ताः सूर्ये चास्तमिते सति सर्वे वि ५९

चुक्रुशुःश्रुत्वापुत्राणांतवसंक्षयं ६५ ततोवृद्धामहाराजयोषितांरक्षिणोनराः राजदारानुपादा
यप्रययुर्नगरंप्रति ६६ तत्रविक्रोशतीनांचरुदतीनांचसर्वशः प्रादुरासीन्महान्शब्दःश्रुत्वातद्बल
संक्षयं ६७ ततस्तायोषितोराजन्क्रंदंत्योवैमुहुर्मुहुः कुरर्यइवशब्देननादयंत्योमहीतले ६८ आ
जघ्नुःकरजैश्चापिपाणिभिश्चशिरांस्युत लुलुंचुश्चतदाकेशान्क्रोशंत्यस्तत्रतत्रह ६९ हाहाकार
विनादिन्योविनिघ्नंत्यउरांसिच शोचंत्यस्तत्ररुरुदुःक्रंदमानाविशांपते ७० ततोदुर्योधनामात्याःसा
श्रुकंठाभृशातुराः राजदारानुपादायप्रययुर्नगरंप्रति ७१ वेत्रव्यासक्तहस्ताश्चद्वाराध्यक्षाविशांप
ते शयनीयानिशुभ्राणिस्पर्ध्यास्तरणवंतिच ७२ समादायततस्तूर्णंनगरंजनरक्षिणः आस्थायाश्व
तरीयुक्तान्स्यंदनानपरेपुनः ७३ स्वान्स्वान्दारानुपादायप्रययुर्नगरंप्रति अदृष्टपूर्वायानार्यो
भास्करेणापिवेश्मसु ददृशुस्तामहाराजजनायांतीःपुनःपुनः ७४ ताःस्त्रियोभरतश्रेष्ठसौकुमार्य
समन्विताः प्रययुर्नगरंतूर्णंहतस्वजनबांधवाः ७५ आगोपालाविपालेभ्योद्रवंतोनगरंप्रति
ययुर्मनुष्याःसंभ्रांताःभीमसेनभयार्दिताः ७६ अपितेषांभयंतीव्रंपार्थेभ्योभूत्सुदारुणं ७७ प्रे
क्षमाणास्तदान्योन्यमधावन्नगरंप्रति तस्मिंस्तथावर्त्तमानेविद्रवेभृशदारुणे ७८ युयुत्सुःशो
कसंमूढःप्राप्तकालमचिंतयत् जितोदुर्योधनःसंख्येपांडवैर्भीमविक्रमैः ७९ एकादशचमूभर्त्ता

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा॰प॰ भ्रातरश्चास्य सहिताः हताश्च कुरवः सर्वे द्रोणभीष्मपुरःसराः ८० अहमेको विमुक्तश्च भागधेयो
६ गाद्यदृच्छया विद्रुतानि च सर्वाणि शिबिराणि समंततः ८१ इतस्ततः पलायंते हतनाथा हतौ
जसः अहृष्टस्वरा दुःखार्त्ता भयव्याकुललोचनाः ८२ हरिणा इव वित्रस्ताः प्रेक्षमाणा दिशो द
श दुर्योधनस्य सचिवा ये केचिदवशेषिताः ८३ राजदारानुपादाय प्रययुर्नगरं प्रति प्राप्तका
लमहं मन्ये प्रवेशं तैः सहप्रभोः ८४ युधिष्ठिरमनुज्ञाप्य भीमसेनं तथैव च एतमर्थं महाबा
हू उभयोः संन्यवेदयत् ८५ तस्य प्रीतोभवद्राजा नित्यं करुणवेदिता परिष्वज्य महाबाहुर्वैश्या
पुत्रं व्यसर्जयत् ८६ ततः स्वरथमास्थाय द्रुतमश्वानचोदयत् संवाहयितवांश्चापि राजदारा
न्पुरं प्रति ८७ तैश्चैव सहितः क्षिप्रमस्तंगच्छति भास्करे प्रविष्टो हास्तिनपुरं बाष्पकंठोश्रु
लोचनः ८८ अपश्यत महाप्राज्ञं विदुरं साश्रुलोचनः राज्ञः समीपान्निःक्रांतं शोकोपहतचे
तसं ८९ तमब्रवीत्सत्यधृतिः प्रणतं त्वग्रतः स्थितं दिष्ट्या कुरुक्षये वृत्ते अस्मिंस्त्वं पुत्र जीवसि ६
विना राज्ञः प्रवेशाद्धि किमसित्वमिहागतः एतद्धे कारणं सर्वं विस्तरेण निवेदय ९१ युयुत्सुरुवा
च निहते शकुनौ तात सज्ञातिसुतबांधवे हतशेषपरीवारो राजा दुर्योधनस्ततः ९२ हतं स्वहय
मुत्सृज्य प्राङ्मुखः प्राद्रवन्भयात् अपक्रांते तु नृपतौ स्कंधावारनिवेशनात् ९३ भयव्याकुलितं ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शा॰प॰ सर्वे प्राद्रवं नगरं प्रति ततो राज्ञः कलत्राणि भ्रातॄणां चैव सर्वशः ५४ वाहनेषु समारोप्याध्यक्षाः
६१ प्राद्रवन् भयात् ततोहं समनुज्ञाप्य राजानं सह केशवं ५५ प्रविष्टो हास्तिनपुरं रक्षन् लोकान्यथा
वतः एतच्छ्रुत्वा तु वचनं वैश्यापुत्रेण भाषितं ५६ प्राप्तकालमिति ज्ञात्वा विदुरः सर्वधर्मवित् प्र
पूजयदमेयात्मा युयुत्सुं वाक्यमब्रवीत् ५७ प्राप्तकालमिदं सर्वं भवता भरतक्षये संरक्षितं कुलध
र्मं च सानुक्रोशतया त्वया ५८ दिष्ट्या त्वामिह संग्रामादस्माद्वीरक्षयात्पुरं समागतमपश्याम अंशु
मंतमिव प्रजाः ५९ अंधस्य नृपतेर्यष्टिर्लुब्धस्यादीर्घदर्शिनः बहुशो याच्यमानस्य दैवोपहतचे
तसः ६० त्वमेको व्यसने ह्यस्य ध्रियसे पुत्र सर्वशः अद्य त्वमिह विश्रान्तः श्वोभिगंता युधिष्ठि
रं ६१ एतावदुक्त्वा वचनं विदुरः साश्रुलोचनः युयुत्सुं समनुज्ञाप्य प्रविवेश नृपक्षयं ६२ पौरजान
पदैर्दुःखाद्धाहेति भृशनादितं निरानंदं गतश्रीकं हतारामिवाशयं शून्यरूपमपध्वस्तं दृष्ट्वा
दुःखतरोभवत् विदुरः सर्वधर्मज्ञो विक्लवेनांतरात्मना ६३ विवेशान्नृपते राजन्निश्वासश
नैः शनैः युयुत्सुरपि तां रात्रिं स्वगृहे न्यवसत्तदा ६४ वंद्यमानः स्वकैश्चापि नाभ्यनंदत्सुदुःखितः
चिंतयानः क्षयं तीव्रं भरतानां परस्परं ६५ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासि
क्यां शल्यपर्व समाप्तं शुभमस्तु सर्वजगतां ॥ ५५ ॥ ६१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. अभिशोंकसेमामनिर्त्कृतमिवमन्यसे १६ दिव्यंविधानेभूभारापहारार्थस्वर्गाद्देवानामवतरणं १७ आशंसेसंभावयामि १८ कथमितिभीष्मेणएतत्कर्मयाच्यमानोपिसः हितंकथ्येनोक्तः अपितुउक्तः उपदिष्ट
टी. एवदुर्योधनस्तथापिनगृहीतवानितिभावः संवत्सरेगतेगतसंवत्सरे १९ संकल्पिताःवध्यत्वेनति
१८ संज्ञानेस्तस्यचात्मानंममचैवपरंमतं अजानन्निवमांकस्मादर्जुनायाभिशंकसे
१६ यच्चापिपरमंदिव्यंतच्चाप्यवगतंत्वया विधानंविहितंपार्थकथंशर्मभवेत्परैः
१७ एतद्वाचामयाशक्यंकर्मणावापिपांडव करिष्यतदहंपार्थनत्वाशंसेशमंपरैः
१८ कथंगोहरणेप्रोक्तोनैतत्कर्मतथाहितं याच्यमानोहिभीष्मेणसंवत्सरगतेध्व
नि १९ तदैवतेपराभूतायदासंकल्पितास्त्वया लवशःक्षणशश्चापिनचतुष्टःसु
योधनः २० सर्वथातुमयाकार्यंधर्मराजस्यशासनं विभाव्यंतस्यभूयश्चकर्मपापं
दुरात्मनः २१ इत्युद्योगेभगवद्याने ७९ नकुलउ॰ उक्तंबहुविधंवाक्यंधर्मराजेनमा
धव धर्मज्ञेनवदान्येनश्रुतंचैवहितंत्वया १ मतमाज्ञायराज्ञश्चभीमसेनेनमाध
व संशमोबाहुवीर्यंचख्यापितंमाधवात्मनः २ तथैवफाल्गुनेनापियदुक्तंतत्व
याश्रुतं आत्मनश्चमतंवीरकथितंभवतासकृत ३ ॥
ख्यिताःलवशःलवोंशः क्षणःस्वीकारःराज्यलेशस्यस्वीकारेपिनसंतुष्टःस्वार्थःक्रमेणाघ्रष्टव्यर्थस ॥२३॥
मम्यर्थंचशास्त्रेतयः २१ विभाव्यंविचारणीयं ४ अध्यायः ७९ उक्तम् १ राज्ञोमतंआज्ञायसंशमःस हरि
म्यक्शमःख्यापितः हेमाधवमधुदेशजआत्मनःमतंआज्ञायबाहुवीर्यंख्यापितं हेमाधवला। हरिः १९

दैवं कर्मेति शापकृतं कर्म कर्तुं अन्यथाकर्तुं ६ ७ पुरुषकाराच्छ्रेयोप्यज्ञः संपादयेदित्याह महीति त्यागेनदा
नेन ८ सानुबंधः सपरीवारः नचेति एको राज्यं त्यक्तुं नेच्छति परो दातुं नेच्छतीत्यर्थः ९ शासनं पंच

दैवं तु न मया शक्यं कर्म कर्तुं कथंचन नहि धर्मं च लोकं च त्यक्त्वा चरति दुर्मतिः ६ न
हि संतप्यते तेन न तथा रूपेण कर्मणा तथापि बुद्धिपापिष्ठा वर्धयंत्यस्य मे त्रयः ७
शकुनिः सूतपुत्रश्च भ्राता दुःशासनस्तथा महीत्यागेन राज्यस्य न शमं समुपेष्यति ८
अंतरेणा वधं पार्थ सानुबंधः सुयोधनः न चापि प्रणिपातेन त्यक्तुमिच्छति धर्मराट् या
च्यमानः स्वराज्यस्य न प्रदास्यति दुर्मतिः ९ न तु मन्ये स तद्वाच्यो युधिष्ठिर शासनं उक्तप्र
योजनं यत्तु धर्मराजेन भारत १० तथा पापस्तु तत्सर्वं न करिष्यति कौरवः तस्मिंश्चाक्षि
यमाणेसौ लोकक्षयो भविष्यति ११ मम चापि स वध्यो हि जगतश्चापि भारत येन कौ
मारके यूयं सर्वे विप्रकृताः सदा १२ विप्रलब्धं च वो राज्यं नृशंसेन दुरात्मना न चोपशा
म्यते पापः श्रियं दृष्ट्वा युधिष्ठिरे १३ असकृच्चाप्यहं तेन त्वत्कृते पार्थ भेदितः न मया त
द्गृहीतं च पापं तस्य चिकीर्षितं १४ जानासि हि महाबाहो त्वमप्यस्य परं मतः प्रियं चि
कीर्षमाणं च धर्मराजस्य मामपि १५ ॥

ग्रामान्देहीति तत्तु न वक्तव्यं दैन्यद्योतकत्वादिति भावः अफलत्वाच्च नैवं स वाच्य इत्याह उक्तमि
तिप्रयोजनं शमं १० ११ १२ १३ १४ १५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
१८९

१८ अर्थेप्रयोजनंविवर्तंतंअप्रयुक्तं १९ अध्यायः ८० पदे १२२ यदिपिभीमाद्योधार्मिकाःस्तथा

काशिराजंचविक्रांतंधृष्टकेतुंचचेदिकं मांसशोणितभृन्मर्त्यःप्रतिशुध्येतकोपु
पि १४ सभवान्नामनादेवसाधयिष्यत्यसंशयं इष्टमर्थंमहाबाहोधर्मराजस्यकेव
ले १५ विदुरश्चैवभीष्मश्चद्रोणश्चसहबाल्हिकः श्रेयःसमर्थाविज्ञातुमुच्यमानास्त्व
यानघ १६ तेचैवमनुनेष्यंतिधृतराष्ट्रंजनाधिपं तंचपापसमाचारंसहामात्यंसुयो
धनं १७ श्रोताचार्थस्यविदुरस्त्वंचवक्ताजनार्दन कमिवार्थंविवर्तंतंस्थापयेथान
वर्त्मनि १८ इत्युद्योगेभगवद्याने ८० सहदेवउ॰ यदेतत्कथितंराज्ञाधर्मएषसना
तनः यथाचयुद्धमेवस्यात्तथाकार्यमरिंदम १ यदिप्रशममिच्छेयुःकुरवःपांड
वैःसह तथापियुद्धंदाशार्हयोजयेथाःसहैवतैः २ कथंनुदृष्ट्वापांचालींतथा
क्लिष्टांसभागतां अवधेनप्रशाम्येतममन्युःसुयोधने ३ यदिभीमार्जुनौकृष्णधर्म
राजश्चधार्मिकाः धर्ममुत्सृज्यतेनाहंयोद्धुमिच्छामिसंयुगे ४ सात्यकिरुवा॰ स
त्यमाहमहाबाहोसहदेवोमहामतिः दुर्योधनवधेशांतिस्तस्यकोपस्यमेभवेत् ५॥

पिअहंधर्ममुत्सृज्यतेनसहयोद्धुमिच्छामि ४ महाबाहोहेकृष्ण॰ ५ ॥ ८१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४ तस्मिन्निति निमित्तभेदान्मतभेदो भवति कुलधुर्यस्य युधिष्ठिरस्य मतं कुलोच्छेदो माभूदिति केशाकर्ष
णक्लिष्टायाद्रौपद्या मतं शात्रवो निर्मूलनीय इति तत्र कालानुरूप्यं तत्समयोग्यं तत्तया कार्यमित्यर्थः
५ अनित्यानाशवतीमतिर्येषां ते ६ न केवलं व्यक्तिभेदान्मतभेदः किंतु व्यक्त्यैक्येपि अवस्थाभेदान्म

सर्वमेतदतिक्रम्य श्रुत्वा परमतं भवान्। यत्क्षमं काले मन्येथास्तत्कुर्याः पुरुषोत्तम ४
तस्मिंस्तस्मिन्निमित्ते हि मतं भवति केशव। प्राप्तकालं मनुष्येण स्वयं कार्यमरिंदम ५
अन्यथाचिंतितो ह्यर्थः पुनर्भवति सोन्यथा। अनित्यमतयो लोके नराः पुरुषसत्तम ६
अन्यथा बुद्धयो ह्यासन्नस्मासु वनवासिषु। अदृश्येष्वन्यथा कृष्ण दृश्येषु पुनरन्यथा।
७ अस्माकमपि वार्ष्णेय वने विचरतां तदा। न तथा प्रणयो राज्ये यथा संप्रति वर्तते ८
निवृत्तवनवासान्नः श्रुत्वा वीर समागताः। अक्षौहिण्यो हि सप्तेमास्त्वत्प्रसादाज्जनार्द
न ९ इमान्हि पुरुषव्याघ्रानचिंत्यबलपौरुषान्। आत्तशस्त्रान्रणे दृष्ट्वा न व्यथेदिह
कः पुमान् १० स भवान्कुरुमध्ये तं सांत्वपूर्वं भयान्वितं। ब्रूयाद्वाक्यं यथा मंदो न व्यथेत
सुयोधनः ११ युधिष्ठिरं भीमसेनं बीभत्सुं चापराजितं। सहदेवं च मां चैव त्वां च रामं च
केशव १२ सात्यकिं च महावीर्यं विराटं च सहात्मजं। द्रुपदं च सहामात्यं धृष्टद्युम्नं च माधव

तभेदो भवतीत्याहान्यथेत्यादिना अदृश्येष्विति अज्ञातवासकाले कथमनावृत्ताः स्थास्यामइत्येव
मनोरथ आसीत् दृश्येषु इदानीं तनेषु अस्मासु कदा राज्यं प्राप्स्यामइत्यस्तीति भावः ७ प्रणयआदरः ८

उ ७९ ॥

उद्योगपर्वटीका ॥ ७९ ॥

म॰ उ॰
टी॰
९६॰

९ १० प्रतिसमासितेप्रतिपत्तनयास्थाते ॥ कश्चन अर्थः शमोपायः शक्यः कर्तुमिति शेषः १२ १३ सम

नचाप्रियकरोस्माकं श्रुत्वाकृष्णस्य योधनः युधिष्ठिरस्तदाशार्हं श्रीमतः संधिमि
च्छतः ९ अप्रदानेन राज्यस्य यदि कृष्णसुयोधनः संधिमिच्छेन्न कर्तव्यं तत्र गत्वा क
थंचन १० शक्ष्यंति हि महाबाहो पांडवाः संजयैः सह धार्तराष्ट्रबलं घोरं क्रुद्धं प्रति
समासितं ११ नहि साम्ना न दानेन शक्योर्थस्तेषु कश्चन तस्मात्तेषु न कर्तव्या कृपा
ते मधुसूदन १२ साम्ना दानेन वा कृष्ण ये न शाम्यंति शत्रवः योक्तव्यस्तेषु दंडः स्या
ज्जीवितं परिरक्षता १३ तस्मात्तेषु महादंडः क्षेप्तव्यः क्षिप्रमच्युत त्वया चैव महा
बाहो पांडवैः सह संजयैः एतत्समर्थं पार्थानां तव चैव यशस्करं १४ क्रियमाणं
भवेत्कृष्ण क्षत्रस्य च सुखावहं क्षत्रियेण हि हंतव्यः क्षत्रियो लोभमास्थितः अक्ष
त्रियो वा दाशार्ह स्वधर्ममनुतिष्ठता १५ अन्यत्र ब्राह्मणात्तात सर्वपापेष्ववस्थि
तात् गुरुर्हि सर्ववर्णानां ब्राह्मणः प्रसृताग्रभुक् १६ ॥

र्थेयुक्तं १४ १५ प्रसृतं प्रदत्तं च तदग्रं च तस्य भोक्ता प्रसृताग्रभुक् सर्वस्य स्वामीत्यर्थः १६ ॥ १ ९६॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नजानामिययाहृष्टाचीराजिनधराग्वने नवापिमस्युरुद्भूतोडुःखितान्नेत्रपांडवान् ६
तस्मान्माद्रीसुतःशूरोयदाहरणकर्कशः वचनंसर्वयोधानांतन्मतंपुरुषोत्तम ७
वैशंपायनउ॰ एवंवदतिवाक्यंतुयुयुधानेमहामतौ सुभीमःसिंहनादोभूद्योधानां
तत्रसर्वशः ८ सर्वेहिसर्वशोवीरास्तद्वचःप्रत्यपूजयन् साधुसाध्वितिशैनेयंहर्षयं
तोयुयुत्सवः ९ इतियौगेभगवद्याने ८१ वैशंपायनउ॰ राज्ञस्तुवचनंश्रुत्वाधर्मार्थस
हितंहितं कृष्णादाशार्हमासीनमब्रवीच्छोककर्षिता १ सुताद्रुपदराजस्यस्वसिता
यतमूर्धजा संपूज्यसहदेवंचसात्यकिंचमहारथं २ भीमसेनंचसंशांतंदृष्ट्वापरमदु
र्मना अश्रुपूर्णेक्षणावाक्यमुवाचेदंमनस्विनी ३ विदितंतेमहाबाहोधर्मज्ञमधुसू
दन यथानिकृतिमास्थायभ्रंशिताःपांडवाःसुखात् ४ धृतराष्ट्रस्यपुत्रेणसामा
त्येनजनार्दन यथाचसंजयोराज्ञामंत्रंरहसिश्रावितः ५ युधिष्ठिरेणदाशार्हत
च्चापिविदितंतव यथोक्तःसंजयश्चैवतच्चसर्वंश्रुतंत्वया ६ पंचनस्तातदीयंतां
ग्रामाइतिमहाद्युते अविस्थलंवृकस्थलंमाकंदीवारणावतं ७ अवसानंमहाबा
होकिंचिदेकंचपंचमं इतिदुर्योधनोवाच्यःसुहृदश्चास्यकेशव ८ ॥ ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
१६१

२९ मृदुहसंहारंवेणींसुपेणसमाहृतमपिमृदुंवृजिनाग्रंकुटिलाग्रं केशपक्षस्याग्रंवा वृजिनंकुटि

ननहंकृष्णभीष्मस्यधृतराष्ट्रस्यचोभयोः स्नुषाभवामिधर्मेणसाहंदासीकृताबला
त् २९ धिक्पार्थस्यधनुष्मत्तांभीमसेनस्यधिग्बलं यत्रदुर्योधनःकृष्णमुहूर्तमपि
जीवति ३० यदितेहमनुग्राह्यायदितेस्तिकृपामयि धार्तराष्ट्रेषुवैकोपःसर्वःकृ
ष्णविधीयतां ३१ वैशंपायनउ॰ इत्युक्त्वामृदुसंहारंवृजिनाग्रंसुदर्शनं सुनीलम
सितापांगीसर्वगंधाधिवासितं ३२ सर्वलक्षणसंपन्नंमहाभुजगवर्चसं केशप
क्षंवरारोहागृह्यसव्येनपाणिना ३३ पद्माक्षीपुंडरीकाक्षमुपेत्यगजगामिनी अ
श्रुपूर्णेक्षणाकृष्णाकृष्णंवचनमब्रवीत् ३४ अयंतेपुंडरीकाक्षदुःशासनकरो
द्धृतः स्मर्तव्यःसर्वकार्येषुपरेषांसंधिमिच्छता ३५ यदिभीमार्जुनौकृष्णकृप
णौसंधिकामुकौ पितामेयोत्स्यतेवृद्धःसहपुत्रैर्महारथैः ३६ पंचचैवमहावी
र्याःपुत्रामेमधुसूदन अभिमन्युंपुरस्कृत्ययोत्स्यन्तेकुरुभिःसह ३७ दुःशासनभुजं
श्यामंसंछिन्नंपांसुगुंठितं यद्यहंतंनपश्यामिकाशांतिर्हृदयस्यमे ३८ ॥

लेस्यवदितिविग्रहः सुदर्शनंरमणीयं ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ॥

यथाःवध्येवध्यमानेभवेद्दोषोजनार्दन सवध्यस्यावधेदृष्टइतिधर्मविदोविदुः १७
यथात्वांनस्पृशेदेषदोषःकृत्स्नतयाकुरु पांडवैःसहदाशार्हैःसृंजयैश्चससैनिकैः
१८ पुनरुक्तंचवक्ष्यामिविश्रंभेणजनार्दन कातुसीमंतिनीमादृक्पृथिव्यामस्ति
केशव १९ सुताद्रुपदराजस्यवेदिमध्यात्समुत्थिता धृष्टद्युम्नस्यभगिनीतवकृष्ण
प्रियासखी २० अजमीढकुलंप्राप्तास्नुषापांडोर्महात्मनः महिषीपांडुपुत्राणांपं
चानामिंद्रवर्चसां २१ सुतामेपंचभिर्वीरैःपंचजातामहारथाः अभिमन्युर्यथाकृ
ष्णतथातेतवधर्मतः २२ साहंकेशग्रहंप्राप्तापरिक्लिष्टासभांगता पश्यतांपांडुपुत्राणां
त्वयिजीवतिकेशव २३ जीवत्सुपांडुपुत्रेषुपांचालेष्वथवृष्णिषु दासीभूतास्मिपापा
नांसभामध्येव्यवस्थिता २४ निरमर्षेष्वचेष्टेषुप्रेक्षमाणेषुपांडुषु पाहिमामितिगो
विंदमनसाचिंतितोसिमे २५ यत्रमांभगवान्राजाश्वशुरोवाक्यमब्रवीत् वरंवृणी
ष्वपांचालिवरार्हासिमतासिमे २६ अदासाःपांडवाःसंतुसरथाःसायुधाइति मयोक्ते
यत्रनिर्मुक्तावनवासायकेशव २७ एवंविधानांदुःखानामभिज्ञोसिजनार्दन त्राहि
मांपुंडरीकाक्षसभर्तृज्ञातिबांधवान् २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ प्रतिपाद्यं संपाद्यं प्रनामयं कृपालो २४ यास्यामि तदेव कर्त्तुमिति शेषः अभीप्सया प्राप्तुमिच्छया ५ विम
टी॰ लम्कृते निर्मलाकाशगे मैत्रे जन्मस्थानादष्टमताराया हृतस्य हि स्यामि बलेनैव बलवत्वमित्यर्थः को

१६२

पांडवैर्धार्त्तराष्ट्राणां प्रतिपाद्यमनामयं समर्थः प्रशमं चैव कर्त्तुमर्हसि केशव २
त्वमितः पुंडरीकाक्ष सुयोधनममर्षणं शांत्यर्थं भ्रातरं ब्रूया यत्तद्वाच्यममित्रहन्
३ त्वया धर्मार्थयुक्तं चेदुक्तः शिवमनामयं हितं नादास्यते बालो दिष्टस्य वशमेष्यति ४
श्रीभगवान्॰ धर्म्यमस्मद्धितं चैव कुरूणां यदनामयं एष यास्यामि राजानं धृतरा
ष्ट्रमभीप्सया ५ वैशंपायन॰ ततो व्यपेते तमसि सूर्ये विमलतां गते मैत्रे मुहूर्ते
संप्राप्ते मृद्वर्चिषि दिवाकरे ६ कौमुदे मासि रेवत्यां शरदंते हिमागमे स्फीतसस्य
सुखे काले कल्यः सत्ववतां वरः ७ मंगल्याः पुण्यनिर्घोषा वाचः शृण्वंश्च सूनृ
ताः ब्राह्मणानां प्रतीतानामृषीणामिव वासव ८ कृत्वा पौर्वाह्णिकं कृत्यं स्नातः
शुचिरलंकृतः उपतस्थे विवस्वंतं पावकं च जनार्दनः ९ ऋषभं पृष्ठ आलभ्य ब्राह्म
णानभिवाद्य च अग्निं प्रदक्षिणं कृत्वा पश्यन्कल्याणमग्रतः १० ॥

मृदे कार्त्तिके रेवत्यां अर्जुनस्य पूर्वाफल्गुनीजातस्य रेवती मैत्रतारा भवतीति प्रसिद्धं ६ ॥ ९ १६२

३९ हेभीमशत्रुभयंकरकृष्णयोर्यंभवान् ४० ४१ श्रुत्वैवंसंवक्ष्यं ४२ ४३ रोत्स्यंतिरोदिष्यंति ४४ ४८ अध्यायः
८२

त्रयोदशहिवर्षाणिप्रतीक्षंत्यागतानिमे निधायहृदयेमन्युंप्रदीप्तमिवपावकं ३९
विदीर्यतेमेहृदयंभीमवाक्छल्यपीडितं योयमद्यमहाबाहुर्धर्ममेवानुपश्यति ४०
इमंतुकामंवाक्ष्यमत्वेनकंठेनायतलोचना हरोदकृष्णासासोत्कंपंसस्वरंबाष्पगद्गदं ४१
स्तनौपीनायतश्रोणीसहितावभिवर्षती द्रवीभूतमिवात्यर्थंमुंचतीवारिनेत्रजं ४२
तामुवाचमहाबाहुःकेशवःपरिसांत्वयन् अचिराद्द्रक्ष्यसेकृष्णेरुदतीर्भरतस्त्रियः
४३ एवंताभीरुरोत्स्यंतिनिहतज्ञातिबांधवाः हतमित्राहतबलायेषांक्रुद्धासिभामि
नि ४४ अहंचतत्करिष्यामिभीमार्जुनयमैःसह युधिष्ठिरनियोगेनदैवाच्चविधिनि
र्मितात् ४५ धार्तराष्ट्राःकालपक्वानोचेच्छृण्वंतिमेवचः शेष्यंतेनिहताभूमौश्व
सृगालादनीकृताः ४६ चलेद्धिहिमवान्शैलोमेदिनीशतधाफलेत् द्यौःपतेच्च
सनक्षत्रानमेमोघंवचोभवेत् ४७ सत्यंतेप्रतिजानामिकृष्णेबाष्पोनिगृह्यतां हता
मित्रान्श्रियायुक्तानचिराद्द्रक्ष्यसेपतीन् ४८ इत्युद्योगेभगवद्याने ८२ अर्जुनउ॰
कुरूणामद्यसर्वेषांभवान्सुहृदनुत्तमः संबंधीदयितोनित्यमुभयोःपक्षयोरपि
१ ॥

कृष्ण । १ ॥ १ ॥ १ ॥ १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
५६३
१

२१ २२ २३ २४ मंगल्यार्थप्रदैर्विजयीभवेत्यादिमंगलावहैः २५ २६ २७ २८ २९ ३० ॥

तंमेरुशिखरप्रख्यंमेघदुंदुभिनिःस्वनं आरुरोहरथंशौरिर्विमानमिवकामगं २१
ततःसात्यकिमारोप्यप्रययौपुरुषोत्तमः पृथिवींचांतरिक्षंचरथघोषेणनाद॑
यन् २२ व्यपोढाभ्रस्ततःकालःक्षणेनसमपद्यत शिवश्चानुववौवायुःप्रशांत
मभवद्रजः २३ प्रदक्षिणानुलोमाश्चमंगल्यामृगपक्षिणः प्रयाणेवासुदेवस्य
बभूवुरनुयायिनः २४ मंगल्यार्थपदैःशब्दैरन्ववर्तंतसर्वशः सारसाःशतपत्रा
श्चहंसाश्चमधुसूदनं मंत्राहुतिमहाहोमैर्हूयमानश्चपावकः प्रदक्षिणमुखो
भूत्वाविधूमःसमपद्यत २६ वसिष्ठोवामदेवश्चभूरिद्युम्नोगयःक्रथः शुक्रना
रदवाल्मीकामरुतःकुशिकोभृगुः २७ देवब्रह्मर्षयश्चैवकृष्णंयदुसुखावहं प्र
दक्षिणमवर्तंतसहितावासवानुजं २८ एवमेतैर्महाभागैर्महर्षिगणसाधुभिः
पूजितःप्रययौकृष्णःकुरूणांसदनंप्रति २९ तंप्रयांतमनुप्रायात्कुंतीपुत्रोयुधि
ष्ठिरः भीमसेनार्जुनौचोभौमाद्रीपुत्रौचपांडवौ ३० ॥

५६३
२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रतिज्ञाय प्रवसस्तत्र ॥ १४ आकाशगतः सूर्यः आकाशमिव चेति पाठे जंगमाकाशतुल्यमिवेत्य
र्थः विशालत्वात् नक्षत्रोपमरत्नखचितत्वाच्च तदेवाह सूर्येति १५ १७ सुपस्करं शोभनैरुपक

तत्प्रतिज्ञाय वचने पांडवस्य जनार्दनः शिनेर्नप्तारमासीनमभ्यभाषत सात्यकिं ॥
रथश्चारोप्यतां शैव्यश्चक्रं च गदया सह उपासंगाश्च शक्त्यश्च सर्वप्रहरणानि च १२
दुर्योधनश्च दुष्टात्मा कर्णश्च सह सौबलः न च शत्रुरवज्ञेयो दुर्बलोपि बलीयसा १३ त
तस्तन्मतमाज्ञाय केशवस्य परंतपः प्रमुखे कपिध्वजयिष्यंतो रथं चक्रगदाभृतः १४
तं दीप्तमिव कालाग्निमाकाशगमिवाशुगं सूर्यचंद्रप्रकाशाभ्यां चक्राभ्यां समलंकृ
तं १५ अर्द्धचंद्रैश्च मत्स्यैश्च रुचिरैर्मृगपक्षिभिः पुष्पैश्च विविधैश्चित्रं मणिरत्नैश्च
सर्वशः १६ तरुणादित्यसंकाशं बृहंतं चारुदर्शनं मणिहेमविचित्रांगं सुध्वजं
सुपताकिनं १७ सुपस्करमनाधृष्यं वैयाघ्रपरिवारणं यशोघ्नं प्रत्यमित्राणां यदू
नां नंदिवर्धनं १८ वाजिभिः शैब्यसुग्रीवमेघपुष्पबलाहकैः स्नातैः संपादयामासुः
संपन्नैः सर्वसंपदा १९ महिमानं च कृष्णस्य भूय एवाभिवर्धयन् सुघोषः पतगेंद्रे
ण ध्वजेन युयुजे रथः २० ॥

रणैरुपेतं १८ संपादयामासुः सज्जीकृतवंतः १९ २० ॥ ~

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
१६३
२

ऊढात् विवाहात् ऊढस्तं इति वालयोरिति विषयः भावप्रधानो निर्देशः वाल्यादित्यर्थः ४२ ४३ ४४ ५०

ऊढात्प्रभृति दुःखानि श्वशुराणामरिंदम निकारान्नतदर्हांश्च पश्यंती दुःखमश्नुते
४२ अपि जातः स कालः स्यात्क्लेशदुःखविपर्ययः यदाहं मातरं क्लिष्टां सुखे दध्याम
रिंदम ४३ प्रव्रजंतोनुधावंतीं कृपणां पुत्रगृद्धिनीं रुदतीमपहायैनामगच्छाम
वयं वनं ४४ न नूनं म्रियते दुःखैः साचेज्जीवति केशव तथा पुत्राधिभिर्गाढमार्त्ता
ह्यानर्त्तसत्कृत ४५ अभिवाद्याथ सा कृष्ण त्वया मद्वचनाद्विभो धृतराष्ट्रश्च कौर
व्या राजानश्च वयोधिकाः ४६ भीष्मं द्रोणं कृपं चैव महाराजं च वाह्लिकं द्रौणिं च
सोमदत्तं च सर्वांश्च भरतान्प्रति ४७ विदुरं च महाप्राज्ञं कुरूणां मंत्रधारिणं अगाधबु
द्धिं धर्मज्ञं स्वजेथा मधुसूदन ४८ इत्युक्त्वा केशवं तत्र राजमध्ये युधिष्ठिरः अनुज्ञा
तो निववृते कृष्णं कृत्वा प्रदक्षिणं ४९ व्रजन्नेव तु बीभत्सुः सखायं पुरुषर्षभं
अब्रवीत्परवीरघ्नं दाशार्हमपराजितं ५० ॥

१६३

३१ संसाधनार्थंकार्यनिष्पत्त्यर्थः ३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ॥

चेकितानश्चविक्रान्तोधृष्टकेतुश्चचेदिपः द्रुपदःकाशिराजश्चशिखंडीचमहार
थाः ३१ धृष्टकेतुःसपुत्रश्चविराटःकैकयैःसह संसाधनार्थंप्रययुःक्षत्रियाः।
क्षत्रियर्षभः ३२ ततोनुव्रज्यगोविंदंधर्मराजोयुधिष्ठिरः राज्ञांसकाशेद्युतिमान
वाचेदंवचनस्तदा ३३ योवैनकामान्नभयान्नलोभान्नार्थकारणात् अन्यायमनुव
र्तेतस्थिरबुद्धिरलोलुपः ३४ धर्मज्ञोधृतिमान्प्राज्ञःसर्वभूतेषुकेशवः ईश्वरःसर्व
भूतानांदेवदेवःसनातनः ३५ तंसर्वगुणसंपन्नंश्रीवत्सकृतलक्षणं सपरिष्वा
ज्यकौन्तेयःसंदेष्टुमुपचक्रमे ३६ युधिष्ठिरउ॰ यासावाल्यात्प्रभृत्यस्मान्पर्यवर्धयता
वला उपवासतपःशीलास्वस्त्ययनेरता ३७ देवतातिथिपूजासुगुरुशुश्रू
षणेरता वत्सलाप्रियपुत्राचप्रियास्माकंजनार्दन ३८ सुयोधनभयाद्यानोत्रा
यतामित्रकर्शन महतोमृत्युसंबाधादुत्तरेन्नौरिवार्णवात् ३९ अस्मत्कृतेचसतत
तंयथादुःखानिमाधव अनुभूतान्यदुःखार्हातांस्मपृच्छेरनामयं ४० भृशमा
श्वासयेश्चैनांपुत्रशोकपरिप्लुतां अभिवाद्यस्वजेथास्त्वंपाण्डवान्परिकीर्तयन् ४१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६१ ६२ वीथीमार्गः ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० ॥

सोवतीर्यरथात्तूर्णमभिवाद्यजनार्दनः यथावत्तानृषीन्सर्वानभ्यभाषतपूजयन्
६१ कच्चिल्लोकेषुकुशलंकच्चिद्धर्मःस्वनुष्ठितः ब्राह्मणानांत्रयोवर्णाःकच्चित्तिष्ठं
तिशासने ६२ तेभ्यःप्रयुज्यतांपूजांप्रोवाचमधुसूदनः भगवंतःक्कसंसिद्धाःका
वीथीभवतामिह किंवाकार्यंभगवतामहंकिंकरवाणिवः ६३ केनार्थेनेहसं
प्राप्ताभगवंतोमहीतलं तमब्रवीन्नारदस्तुउपेत्यमधुसूदनं ६४ परिव्रज्यच
गोविंदसुरासुरपतेःसखा देवर्षयःपुण्यकृतोब्राह्मणाश्चबहुश्रुताः ६५ राज
र्षयश्चदाशार्हमानयंतस्तपस्विनः देवासुरस्यद्रष्टारःपुराणस्यमहामते ६६
समेतंपार्थिवंक्षत्रंदिदृक्षंतश्चसर्वतः सभासदश्चराजानस्त्वांचसत्यंजनार्दनं
६७ एतन्महाप्रेक्षणीयंद्रष्टुंगच्छामकेशव धर्मार्थसहितावाचःश्रोतुमिच्छाम
माधव त्वयोच्यमानःकुरुषुराजमध्येपरंतप भीष्मद्रोणादयश्चैवविदुरश्चम
हामतिः ६९ त्वंचयादवशार्दूलसभायांवैसमेष्यथ तववाक्यानिदिव्यानितथा
तेषांचमाधव ७० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यदस्माकंविभोवृत्तंपुरावैमंत्रनिश्चये अदर्मराज्यस्यगोविंदविदितंसर्वराजसु ५१
तेचाद्यादसंयोगेनसत्कृत्यानवमन्यच श्रियंमेस्यान्महाबाहोमुच्येतन्महतोभया
त् ५२ अतश्चेदन्यथाकर्ताधार्तराष्ट्रोनुपायवित् अंतेनंकरिष्यामितत्रिया
णोजनार्दन ५३ एवमुक्तेपांडवेनसमहृष्यद्वृकोदरः मुहुर्मुहुःक्रोधवशात्सा
वेपतचपांडवः ५४ वेपमानश्चकौंतेयःशाकोशान्महतोरवान् धनंजयवचः
श्रुत्वाहर्षोत्सिक्तमनाभृशं ५५ तस्यतेनिनदंश्रुत्वासंप्रावेपंतधन्विनः वाहना
निचसर्वाणिशकृन्मूत्रेप्रसुसुवुः ५६ इत्युक्त्वाकेशवंतत्रतथाचोक्त्वाविनिश्चयं
अनुज्ञातोनिववृतेपरिश्वज्यजनार्दनं ५७ तेषुराजसुसर्वेषुनिवृत्तेषुजनार्दनः
तूर्णमभ्यागमद्धृष्टःशैब्यसुग्रीववाहनः ५८ तेहयावासुदेवस्यदारुकेणप्रचो
दिताः पंथानमाचेमुरिवग्रसमानाइवांबरं ५९ अथापश्यन्महाबाहुर्ऋषी
नध्वनिकेशवः ब्राह्म्याश्रियादीप्यमानान्स्थितानुभयतःपथि ६० ॥

म॰उ॰ त्वेषाशीरं छायापुरुषशरीरं ८ दक्षिणपश्चिमतः निर्ऋतिर्दिशः ९ औत्पातिकान्मुक्त्वा देवान्याह यत्रयत्रे
टी॰

१९५ प्रादुरासीन्महाशब्दः त्वेषाशीरेन नृपत्पते सर्वेषु राजन्देवेषु तदद्भुतमिवाभवत् ९
प्रामश्चाद्यास्मिन्नपुरे वातो दक्षिणपश्चिमः प्राक्रजनगणशोन्मृतानपरुषोऽग्नि
निनिःस्वनः १० यत्रयत्र च वासो यो वर्तते पथि भारत तत्रतत्र सखो वायुः सर्वदा
सीत्सदक्षिणं ११ ववर्ष पुष्पवर्षं च कमलानि च भूरिशः समश्च पंथा निर्द्वंद्वो
व्यपेतकुशकंटकः १२ संस्तूतो ब्राह्मणैर्गीर्भिस्तत्रतत्र सहस्रशः अर्च्यते मधु
पर्केश्च वसुभिश्च वसुधरः १३ तं किरंति महात्मानं वन्यैः पुष्पैः सुगंधिभिः स्त्रि
यः पथि समागम्य सर्वभूतहिते रतं १४ सशालिभवने रम्ये सर्वसस्यसमाचिते सु
खं परमधर्मिष्टमभ्यगाद्भरतर्षभ १५ पशूनबहुपश्चून्नग्रामान्नरम्यान्हृदयतो
षणान् पुराणि च व्यतिक्रामन्राष्ट्राणि विविधानि च १६ नित्यं हृष्टाः सुमनसो
भारतैरभिरक्षिताः नोद्विग्नाः परचक्राणां व्यसनानामकोविदाः १७ उपप्लव्याद्यथा
गम्य जनाः पुरनिवासिनः पश्यंतिष्ठंत सहिता विष्वक्सेनादि हस्तया १८ ॥

ति ११ १२ १३ १४ भवंति अस्मिन्निति भवनं तेवं १५ १६ १७ उपप्लव्यात् ग्रामात् १८ ॥ १९५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११ १२ अध्यायः ५२ श्लो १२२ दैवानिशकुनानिऔत्पातिकानिअपशकुनानि ४ प्रत्यक्प्रतीयंतद्रुः प्रवा

श्रोतुमिच्छामि गोविंद स्थानानि च हितानि च आपृष्टोसि महाबाहो पुनर्द्रक्ष्यामहे व
यं ११ याहि विष्णो न वै वीर द्रक्ष्यामस्त्वां सभागतं आसीनमासने दिव्ये बलतेजः समारि
तं १२ इत्युद्योगे भगवद्याने ५२ वैशंपायन उ॰ प्रयांतं देवकीपुत्रं परवीररुजो दश
महारथा महाबाहुमन्वयुः शस्त्रपाणयः १ पदातीनां सहस्रं च सादिनां च परंतप भो
ज्यं च विपुलं राजन् प्रेष्याश्च शतशोपरे २ जनमेजय उ॰ कथं प्रयातो दाशार्हो महा
त्मा मधुसूदनः कानि वा व्रजतस्तस्य निमित्तानि महौजसः ३ वैशंपायन उ॰ तस्य
प्रयाणे यान्यासन्निमित्तानि महात्मनः तानि मे शृणु सर्वाणि दैवान्यौत्पातिकानि च
४ अनभ्रे शनिनिर्घोषः सविद्युत्समजायत अन्वगेव च पर्जन्यः प्रावर्षद्विघने भृशं ५
प्रत्यगूहुर्महानद्यः प्राङ्मुखाः सिंधुसत्तमाः विपरीता दिशः सर्वा न प्राज्ञायत किंचन
६ प्राज्वलन्नग्नयो राजन् पृथिवी समकंपत उदपानाश्च कुंभाश्च प्रासिंचन् शतशो
जलं ७ तमः संवृतमप्यासीत्सर्वं जगदिदं तथा न दिशो नादिशो राजन् प्रज्ञायंते स्म रे
णुना ८ ॥

हंकृतवत्यः ६ ७ ८ ॥

तथा १ २ ३ ४ ५ ६ ७ अभिप्रायान् मनोरथान् ८ ९ १० ॥

वैशंपायन उ॰ तथाहूतैः समाज्ञाय प्रयांतं मधुसूदनं ५ धृतराष्ट्रोब्रवीद्भीष्ममर्चयित्वा
महाभुजं १ द्रोणं च संजयं चैव विदुरं च महामतिं दुर्योधनं समामंत्य हृष्टरोमाब्रवीदिदं
२ अद्भुतं महदाश्चर्यं श्रूयते कुरुनंदन स्त्रियो बालाश्च वृद्धाश्च कथयंति गृहे गृहे ३ स
त्कृत्याचक्षते चान्ये तथैवान्ये समागताः पृथग्वादाश्च वर्तंते चत्वरेषु सभासु च ४
उपायास्यति दाशार्हः पांडवार्थे पराक्रमी स नोमान्यश्च पूज्यश्च सर्वथा मधुसूदनः ५
तस्मिन् हि यात्रा लोकस्य भूतानामीश्वरो हि सः तस्मिन् धृतिश्च वीर्यं च प्रज्ञा चौज
श्च माधवे ६ स मान्यो नरश्रेष्ठः स हि धर्मः सनातनः पूजितो हि सुखाय स्यादसु
खः स्यादपूजितः ७ स चेत्तुष्यति दाशार्ह उपचारैररिंदमः कृत्स्नान्सर्वानभिप्राया
न्प्राप्स्यामः सर्वराजसु ८ तस्य पूजार्थमद्यैव संविधत्स्व परंतप सभाः पथि विधीयंतां
सर्वकामसमन्विताः ९ यथा प्रीतिर्महाबाहो त्वयि जायेत तस्य वै तथा कुरुष्व गां
धारे कथं वा भीष्म मन्यसे १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ अध्यायः ८४ ॥

तेतुसर्वेसमायांतमग्निसिद्धमिवप्रभुं अर्चयामासुरर्चार्हंदेशातिथिमुपस्थितं १९
वृकस्थलंसमासाद्यकेशवःपरवीरहा प्रकीर्णरश्मावादित्येव्योम्निवैलोहिताय
ति २० अवतीर्यरथात्तूर्णंकृत्वाशौचंयथाविधि रथमोचनमादिश्यसंध्यामुपवि
वेशह २१ दारुकोपिहयान्मुक्त्वापरिचर्यचशास्त्रतः मुमोचसर्वंयोक्त्रादिमुक्त्वाचैता
नवासृजत् २२ अभ्यतीत्यतुतत्सर्वमुवाचमधुसूदनः युधिष्ठिरस्यकार्यार्थमिह
वत्स्यामहेक्षपां २३ तस्यतन्मतमाज्ञायचक्रुरावसथंनराः क्षणेनचान्नपानानि
गुणवंतिसमार्जयन् २४ तस्मिन्ग्रामेप्रधानास्तुयआसन्ब्राह्मणान्नृप आर्याःकु
लीनाह्रीमंतोब्राह्मींवृत्तिमनुष्ठिताः २५ तेभिगम्यमहात्मानंहृषीकेशमरिंदमं पू
जांचक्रुर्यथान्यायमाशीर्मंगलसंयुतां २६ तेपूजयित्वादाशार्हंसर्वलोकेषुपूजितं
निवेदयंतिवेश्मानिरत्नवंतिमहात्मने २७ तान्प्रभुःकृतमित्युक्त्वासत्कृत्यचयथा
र्हतः अभ्येत्यचैषांवेश्मानिपुनरायात्सहैवतैः २८ सुमृष्टंभोजयित्वाचब्राह्मणां
स्तत्रकेशवः भुक्त्वाचसहतैःसर्वैरवसत्तांक्षपांसुखं २९ इत्युद्योगेभगवद्याने ८४

॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ प्रपितामहः पितामहस्य ब्रह्मणोपि पिता ३ ६ ईषालांगलदंडस्तस्य दृशदंतात् अष्टौ अनुचराः यस्या
टी॰
९९०

स्फीतस्य त्रिशिराष्ट्रस्य भर्ता गोप्ता च माधवः त्रयाणामपि लोकानां भगवान्प्रपितामहः
३ त्रस्यपथकाः स्वमनसोयस्य प्रज्ञामुपासते आदित्यावसवोरुद्राः यथावुद्धिर्वृहस्पतेः
४ तस्मै प्रजोप्रवस्यामि दाशार्हाय महात्मने प्रत्यंतनवधर्मंज्ञतोमेकथयतः श्रृणु ५
एकवर्णाः सुकृष्णांगावाह्लिजातेहयोत्तमेः चतुर्युक्तान्रथांस्तस्मैरौक्मान्दास्यामिषो
डश ६ नित्यप्रभिन्नान्मातंगानीषादंतान्प्रहारिणः अष्टानुचरमेकैकमष्टौदास्यामि
कौरव ७ दासीनामप्रजातानांशुभानांरुक्मवर्चसां शतमस्मैप्रदास्यामि दासाना
मपितावतः ८ आविकंचसुखस्पर्शंपार्वतीयैरुपाहृतं तदप्यस्मैप्रदास्यामिस
हस्राणिदशाष्टच ९ अजिनानांचसहस्राणिचीनदेशोद्भवानिच तान्यप्यस्मैप्र
दास्यामियावदर्हतिकेशवः १० दिवारात्रौचभात्येषसुतेजाविमलोमणिः तम
प्यस्मैप्रदास्यामितमर्हतिसकेशवः ११ एकेनाभिपतत्यह्नायोजनानिचतुर्दश
यानमश्वतरीयुक्तंदास्येतस्मैतदप्यहं १२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११ १२ १३ १४ १५ १६ १७ १८ अध्यायः ८५ उपलब्धात् १ २ ॥

ततोभीष्मादयःसर्वेधृतराष्ट्रंजसाधिपं ऊचुःपरममित्येवंसृजयंतोस्मतद्वचः ११ तेषा
मनुमतंज्ञात्वाराजादुर्योधनस्तथा सभावस्तूनिरम्याणिप्रदेशेषूपचक्रमे १२ त
तोदेशेषुदेशेषुरमणीयेषुभागशः सर्वरत्नसमाकीर्णाःसभाश्चक्रुरनेकशः १३
आसनानिविचित्राणियुक्तानिविविधैर्गुणैः स्त्रियोगंधानलंकारान्सूक्ष्माणिव
स्त्राणिच १४ गुणवंत्यन्नपानानिभोज्यानिविविधानिच माल्यानिचसुगंधीनि
तानिराजाददौततः १५ विशेषतश्चवासार्थंसभांग्रामेवृकस्थले विदधेकौरवो
राजाबहुरत्नांमनोरमां १६ एतद्विधायवैसर्वंदेवार्हमतिमानुषं आचख्यौधृतरा
ष्ट्रायराजादुर्योधनस्तदा १७ ताःसभाःकेशवःसर्वारत्नानिविविधानिच असमी
क्ष्यैवदाशार्हउपायात्कुरुसद्मतत् १८ इत्युद्योगेभगवद्याने· ८५ धृतराष्ट्रउ· उप
लब्धादिहक्षत्तरुपायातोजनार्दनः वृकस्थलेनिवसतिसचप्रातरिहैष्यति १ आ
हुकानामधिपतिःपुरोगःसर्वसत्वतां महात्मानामहा
वीर्योमहासत्वोजनार्दनः २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०उ०
टी०
१९८

३ भावितः दृष्टः ४ नीनशइतिहेतुमण्णिचमानंदीःमानार्थंशाम्बहि ५ ७ मायाइंद्रजालंछ

लेखाभाशिनिभाः सर्वे महोर्मिरिव सागरे धर्मस्त्वयि तथा राजन्निति व्यवसिताः
प्रजाः ३ सदैव भावितो लोको गुणैरेतैस्तव पार्थिव गुणानां रक्षणे नित्यं प्रयत
स्व सबांधवः ४ आर्जवं प्रतिपद्यस्व माबाल्याद्बहु नीनशः राजन् पुत्रांश्च पौत्रांश्च
सुहृदश्चैव सुप्रियान् ५ यत्त्वमिच्छसि कृष्णाय राजन्नतिथये बहु एतदन्यच्च दा
शार्हः पृथिवीमपि चार्हति ६ न तत्त्वं धर्ममुद्दिश्य तस्य वा प्रियकारणात् एत
दिच्छसि कृष्णाय सत्येनात्मानमालभे ७ मायैषा सत्यमेवैतच्छद्मैतद्भूरिद।
क्षिण जानामि त्वन्मतं राजन् गूढं बाह्येन कर्मणा ८ पंच पंचैव लिप्संति ग्राम।
कान्पांडवान्नृप न च दित्ससि तेभ्यस्तांस्तत्समं न करिष्यसि ९ अर्थेन तु महा।
बाहुं वार्ष्णेयं त्वं जिहीर्षसि अनेन चाप्युपायेन पांडवेभ्यो विभेत्स्यसि १० न च
वित्तेन शक्योसौ नोद्यमेन न चार्हया अन्यो धनंजयात्कर्तुमेतत्तत्त्वं ब्रवीमि ते
॥ ॥

अवंचनं ८ ९ विभेत्स्यसि पृथक्करिष्यसि १० ॥ ११ ॥ १९८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ १४ २१ सर्वर्त्तुसर्वैश्चरत्नैर्वायुगपदस्मिन्संनीतियथा २२ २३ अध्यायः ८८ राजन् १ २ ॥

यावंतिवाहनान्यस्ययावंतःपुरुषाश्चते ततोष्टगुणमप्यस्मैभोज्यंदास्याम्यहंसदा
१३ ममपुत्राश्चपौत्राश्चसर्वेदुर्योधनादृते प्रत्युद्यास्यंतिदाशार्हंरथैर्मृष्टैःस्वलंकृ।
ताः १४ स्वलंकृताश्चकल्याण्यःपादैरेवसहस्रशः वारमुख्यामहाभागाःप्रत्युद्यास्यं
तिकेशवं १५ नगरादपियाःकाश्चिद्गमिष्यंतिजनार्दनं द्रष्टुंकन्याश्चकल्याण्यस्ता
श्चयास्यंत्यनावृताः १६ सस्त्रीपुरुषबालंचनगरंमधुसूदनं उदीक्षतांमहात्मानं
भानुमंतमिवप्रजाः १७ महाध्वजपताकाश्चक्रियंतांसर्वतोदिशं जलावसिक्तो
विरजाःपंथास्तस्येतिचान्वशात् १८ दुःशासनस्यचगृहंदुर्योधनगृहाद्वरं तदस्य
क्रियतांक्षिप्रंसुसंमृष्टमलंकृतम् १९ एतद्धिरुचिराकारैःप्रासादैरुपशोभितं
शिवंचरमणीयंचसर्वर्त्तुसुमहाधनं २० सर्वमस्मिन्गृहेरत्नंममदुर्योधनस्य।
च यद्यदर्हतिवार्ष्णेयस्तत्तद्देयमसंशयं २१ इत्युद्योगेभगवद्याने० विदुरउ० राज
न्बहुमतश्चासित्रैलोक्यस्यापिसत्तमः संभावितश्चलोकस्यसंमतश्चासिभारत १
यत्वमेवंगतेब्रूयाःपश्चिमेवयसिस्थितः शास्त्राद्वासुप्रतर्काद्वासुस्थिरःस्थविरो
ह्यसि २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५ कार्यगतिः कर्त्तव्यरीतिः अविग्रहात् आतिथ्यमात्रेण ६ ७ नालंनपर्याप्तोसि ८ १० तीर्थेनप्रवर्तनेण

सहित्वप्रत्नतमोलोकेकृत्स्नः पृथुललोचनः त्रयाणामपिलोकानांविदितंममस
र्वथा ५ नतत्तस्मैप्रदेयंस्यात्तथाकार्यगतिःप्रभो विग्रहःसमुपारब्धोनहिशा
म्यत्यविग्रहात् ६ वैशंपायनउ॰ तस्यतद्वचनंश्रुत्वाभीष्मःकुरुपितामहः वै
चित्रवीर्यंराजानमिदंवचनमब्रवीत् ७ सत्कृतोसत्कृतोवापिनक्रुध्येतजना
र्दनः नालमेनमवज्ञातुंनावज्ञेयोहिकेशवः ८ यत्तुकार्यंमहाबाहोमनः
साकर्यतांगतं सर्वोपायैर्नतच्छक्यंकेनचित्कर्तुमन्यथा ९ सयद्ब्रूयान्महाबाहु
स्तत्कार्यमविशंकया वासुदेवेनतीर्थेनक्षिप्रंसंशाम्यपांडवैः १० धर्म्यमर्थ्यं
चधर्मात्माध्रुवंवक्ताजनार्दनः तस्मिन्वाच्याःप्रियावाचोभवतावांधवैःसह ११
दुर्योधनउ॰ नपर्यायोस्तियद्राजन्श्रियंनिष्केवलामहं तैःसहेमामुपाश्नीयां
यावज्जीवंपितामह १२ इदंतुसुमहत्कार्यंशृणुमेयत्समर्थितं परायणंपांडवा
नांनियच्छामिजनार्दनं १३ तस्मिन्बद्धेभविष्यंतिवृष्णयःपृथिवीतथा पांडवाश्च
विधेयामेसचप्रातरिहेष्यति १४ अत्रोपायान्यथासम्यङ्नबुध्येतजनार्दनः नचापा
योभवेत्कश्चित्तद्भवान्प्रब्रवीतुमे १५ ॥

वर्त्मनासंशाम्यशांतोभव ११ पर्यायःप्रकारांतरंनिष्केवलांकृत्स्नांपांडवान्यथादासवद्दासयेयंतथा १५९

वेदवेद्य १२ नैवेस्यतिनैवांगीकरिष्यति १३ ग्रातिथ्यंज्ञानरूपं १४ दुर्योधनगर्वपर्यय १५ ५ ग्रध्यायः ९०३

वेदव्यासस्यमहात्म्यंवेदास्यहृदभक्तितो ग्रवाज्यमस्यजानामिशाणोस्तलस्थनेज
यं १२ ग्रन्यत्कंभारपांशूर्णांदन्यत्स्यादावसेचनात् ग्रन्यतकुशलसंप्रश्नान्नैवेत्स्य
तिजनार्दनः १३ यत्तस्यप्रियमातिथ्यमानार्हस्यमहात्मनः तदस्मैक्रियतांराज
मानार्होसौजनार्दनः १४ ग्राशासमानाःकल्याणंकुरून्नभ्येतिकेशवः येनैवरा
जन्नर्थेननतदेवास्माउपाकुरु १५ शममिच्छतिदाशार्हस्तवदुर्योधनस्यच पांडु
वानांचराजेंद्रतदस्यवचनंकुरु १६ पितासिराजन्पुत्रास्तेवृद्धस्त्वंशिशवःपरे
वर्तस्वपितृवत्तेषुवर्तंतेतेहिपुत्रवत् ५ इत्युद्योगेभगवद्याने ९० दुर्योधनउ० या
दाहविदुरःक्षत्तासर्वंतत्सत्यमच्युते ग्रनुरक्तोह्यसंहार्यःपार्थान्प्रतिजनार्दनः
१ यत्तत्सत्कारसंयुक्तंदेयंवसुजनार्दने ग्रनेकरूपंराजेंद्रनतद्देयंकदाचन २
देशःकालस्तथायुक्तोनहिनार्हतिकेशवः मंस्यत्यधोक्षजोराजन्भयादर्चतिमामिति ३ ग्रवमानश्चयत्रस्यात्क्षत्रियस्यविशांपते नतत्कुर्याद्बुधःकार्यमिति
मेनिश्चितामतिः ४ ॥

संहार्यःकर्तुमशक्यः १२ देशइतियद्यपिकेशवोर्चामर्हत्येवतथापिग्रर्चायांदेशःकालश्चायुक्तःइत्य

[illegible] ५७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धार्तराष्ट्राःसमायांतंप्रत्युज्जग्मुःस्वलंकृताः दुर्योधनादृतेसर्वेभीष्मद्रोणकृपादयः
३ पौराश्चबहुलाराजन्हृषीकेशंदिदृक्षवः यानैर्बहुविधैरन्येपद्भिरेवतथापरे
४ सवैपथिसमागम्यभीष्मेणाक्लिष्टकर्मणा द्रोणेनधार्तराष्ट्रैश्चतैर्वृतोनगरं
ययौ ५ कृष्णसंमाननार्थंचनगरंसमलंकृतं बभूवराजमार्गश्चबहुरत्नसमा
चितः ६ नचकश्चिद्गृहेराजंस्तदासीद्भरतर्षभ नस्त्रीनवृद्धोनशिशुर्वासुदेवदि
दृक्षया ७ राजमार्गेनरास्तस्मिन्संस्तुवंत्यवनिंगताः तस्मिन्कालेमहाराजहृ
षीकेशप्रवेशने ८ आवृतानिवरस्त्रीभिर्गृहाणिसुमहांत्यपि प्रचलंतीवभा
रेणदृश्यंतेस्ममहीतले ९ यथाचगतिमंतस्तेवासुदेवस्यवाजिनः प्रनष्टग
तयोभवन्राजमार्गेनरैर्वृताः १० सगृहंधृतराष्ट्रस्यप्राविशच्छत्रुकर्शनः पां
डुरंपुंडरीकाक्षःप्रासादैरुपशोभितं ११ तिस्रःकक्षाव्यतिक्रम्यकेशवोराजवे
श्मनः वैचित्रवीर्यंराजानमभ्यगच्छदरिंदमः १२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१६ १७ १८ १९ २० २१ २२ २३ अध्यायः ८८ प्रातः १ २ ॥

वैशंपायन उ॰ तस्मिन्हतेवनेकृत्वाघोरंकृत्स्नाभिसंहिते धृतराष्ट्रःसहामात्योव्यथितो
विमनाभवत् १६ ततोदुर्योधनमिदंधृतराष्ट्रोब्रवीद्वचः मैवंवोचःप्रजापालनेषधर्मः
सनातनः १७ हतश्चहिहृषीकेशःसंवधीचप्रियश्चनः अपापःकौरवेयेषुसकथंवध
मर्हति १८ भीष्म उ॰ परीतस्तवपुत्रोयंधृतराष्ट्रसमंदधीः हन्यात्यनर्थनैवार्थयाच्य
मानःसुहृज्जनैः १९ इममुत्पथिवर्ततंपापंपापानुबंधिनं वाक्यानिसुहृदांहित्वा।
त्वमप्यस्यानुवर्तसे २० कृष्णमक्लिष्टकर्माणमासाद्यायंसुदुर्मतिः तवपुत्रःसहामा
त्यःक्षणेननभविष्यति २१ पापस्यास्यनृशंसस्यत्यक्तधर्मस्यदुर्मतेः नोत्सहेनर्थसंयु
क्ताःश्रोतुंवाचःकथंचन २२ इत्युक्त्वाभरतश्रेष्ठोवृद्धःपरममन्युमान् उत्थायतस्मा
त्स्थानाद्भीष्मःसत्यपराक्रमः २३ इत्युद्योगेभगवद्याने ८८ वैशंपायन उ॰ प्रात
रुत्थायकृष्णस्तुकृतवान्सर्वमाह्निकं ब्राह्मणैरभ्यनुज्ञातःप्रययौनगरंप्रति १ तं
प्रयांतंमहाबाहुमनुज्ञाप्यमहाबलं पर्यवर्ततनतेसर्वेवृकस्थलनिवासिनः २॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
२॰१

प्रीयमाणस्येत्यादिश्लोकः द्वितीयार्थे २९ अध्यायः ८९ अथो १ ५ प्रियंराज्यादिस्त्वंभोगोत्रआह्लादः ९ ८

प्रीयमाणस्यसुहृदोविदुषोबुद्धिसत्तमः धर्मार्थनित्यस्यसतोगतदोषस्यधीमतः २९
तस्यसर्वंसविस्तारंपांडवानांविचेष्टितं क्षत्ताराचष्टदाशार्हःसर्वप्रत्यक्षदर्शिवान् ३०
इतिश्रीभगवद्याने ८९ वैशंपायनउ॰ अथोपगम्यविदुरमपराह्णेजनार्दनः पि
तृष्वसारंसपृथामभ्यगच्छदरिंदमः १ साहृष्ट्वाकृष्णमायांतंप्रसन्नादित्यवर्चसं कं
ठेगृहीत्वाप्राक्रोशत्स्मरंतीतनयांस्तथा २ तेषांसत्ववतांमध्येगोविंदंसहचारिणं
चिरस्यदृष्ट्वावार्ष्णेयंबाष्पमाहारयत्पृथा ३ साब्रवीत्कृष्णमासीनंकृतातिथ्यंयुधांपतिं
बाष्पगद्गदपूर्णेनमुखेनपरिशुष्यता ४ येतेबाल्यात्प्रभृत्येवगुरुशुश्रूषणेरताः पर
स्परस्यसुहृदःसंमताःसमचेतसः निकृत्याभ्रंशिताराज्याज्जनार्हानिर्जनेगताः ५
विनीतक्रोधहर्षाश्चब्राह्मण्याःसत्यवादिनः त्यक्त्वाप्रियसुखेपार्थारुदतीमपहाय
मां ६ अहार्षुश्चवनंयांतःसमूलंहृदयंमम अतदर्हामहात्मानःकथंकेशवपांड
वाः ७ ऊषुर्महावनेतातसिंहव्याघ्रगजाकुले बालाविहीनाःपित्रातेमयासततलालिताः

८ ॥

२॰१

१३ १४ १७ सहस्रेशोपिते १८ १९ परिहसन् नर्मकुर्वन् सांबंधिकं धनंजयादिसंबंधहेतुकं व्यवहारं २० पूजितस्तु

अभ्यागच्छतिदाशार्हेप्रज्ञाचक्षुर्नराधिपः सहैवद्रोणभीष्माभ्यामुदतिष्ठन्महायशाः १३
कृपश्चसोमदत्तश्चमहाराजश्चबाह्लिकः आसनेभ्योचलन्सर्वेपूजयंतोजनार्दनं १४ त
तोराजानमासाद्यधृतराष्ट्रंयशस्विनं सभीष्मंपूजयामासवार्ष्णेयोवाग्भिरंजसा १५ ते
षुधर्मानुपूर्वींतांप्रयुज्यमधुसूदनः यथावयःसमीयायराजभिःसहमाधवः १६ अ
थद्रोणंसवाह्लीकंसपुत्रंचयशस्विनं कृपंचसोमदत्तंचसमीयायजनार्दनः १७ त
त्रासीदूर्जितंमृष्टंकांचनंमहदासनं शासनाद्धृतराष्ट्रस्यतत्रोपविशदच्युतः १८ अथ
गामधुपर्कंचाप्युदकंचजनार्दने उपजह्रुर्यथान्यायंधृतराष्ट्रपुरोहिताः १९ कृता
तिथ्यस्तुगोविंदःसर्वान्परिहसन्कुरून् आस्तेसांबंधिकंकुर्वन्कुरुभिःपरिवारितः =
२० सोर्चितोधृतराष्ट्रेणपूजितश्चमहायशाः राजानंसमनुज्ञाप्यनिरक्रामदरिंदमः २१
तैःसमेत्ययथान्यायंकुरुभिःकुरुसंसदि विदुरावसथंरम्यमुपातिष्ठतमाधवः २२ वि
दुरःसर्वकल्याणैरभिगम्यजनार्दनं अर्चयामासदाशार्हंसर्वकामैरुपस्थितं २३ याभे
प्रीतिःपुष्कराक्षत्वद्दर्शनसमुद्भवा साकिमाख्यायतेतुभ्यमंतरात्मासिदेहिनां २४ कृता
तिथ्यंतुगोविंदंविदुरःसर्वधर्म
तः २१ २४ विदुरःपांडवानांविचेष्टितंकुशलंप्रतिपृच्छतीत्यन्वयः २५ ॥ वित् कुशलंपांडुपुत्राणामपृ
च्छन्मधुसूदनं २६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९ १० ११ १२ १३ १४ १५ १६ १७ १८ पुरंभारं १९ २० ॥

अपश्यंतस्त्वपि तैरेकथमृष्यमहावने शंखदुंदुभिनिर्घोषैर्मृदंगैर्वेणुनिःस्वनैः ९ पां
डवाः समबोध्यंत बाल्यात्प्रभृति केशव येस्म वारणशब्देन हयानां हेषितेन च १० रथ
नेमिनिनादैश्च व्यबोध्यंत तदा गृहे शंखभेरीनिनादेन वेणुवीणानिनादिना ११ पुण्या
हघोषमिश्रेण पूज्यमाना द्विजातिभिः वस्त्रै रत्नैरलंकारैः पूजयंतो द्विजन्मनः १२ गी
र्भिर्मंगलयुक्ताभिर्ब्राह्मणानां महात्मनां अर्चितैरर्चनार्हैश्च स्तुवद्भिरभिनंदिताः १३
प्रासादाग्रेष्वबोध्यंत राकवाजिनशायिनः क्रूरं च निनदं श्रुत्वा श्वापदानां महावने १४
न स्मोपयांति निद्रां ते न तदर्हा जनार्दन भेरीमृदंगनिनदैः शंखवैणवनिःस्वनैः १५
स्त्रीणां गीतनिनादैश्च मधुरैर्मधुसूदन वंदिमागधसूतैश्च स्तुवद्भिर्बोधिताः कथं
१६ महावने प्यबुध्यंत श्वापदानां रुतेन च ह्रीमान्सत्यधृतिर्दांतो भूतानामनुकंपि
ता १७ कामद्वेषौ वशे कृत्वा सतां वर्त्मानुवर्तते अंबरीषस्य मांधातुर्ययातेर्नहुषस्य
च १८ भरतस्य दिलीपस्य शिबेरौशीनरस्य च राजर्षीणां पुराणानां धुरं धत्ते दुरुद्वहां १९
शीलवृत्तोपसंपन्नो धर्मज्ञः सत्यसंगरः राजा सर्वगुणोपेतस्त्रैलोक्यस्यापि यो भवेत् २०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रियोदर्शोदर्शनं दर्शादिश्राद्धकर्मवायस २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०

अजातशत्रुर्धर्मात्मासृहृजांवूनदप्रभः श्रेष्ठःकुरुषुसर्वेषुधर्मतःश्रुतवृत्ततः प्रियद
र्शोदीर्घभुजःकथंकुसलयुधिष्ठिरः २१ यःसनागायुतप्राणोवातरंहामहाबलःसाम
र्षःपांडवोनित्यंप्रियोभ्रातुःप्रियंकरः २२ कीचकस्यतुसज्ञातेर्योहंतामधुसूदन शू
रःक्रोधवशानांचहिडिंबस्यबकस्यच २३ पराक्रमेशक्रसमोमातरिश्वसमोबले म
हेश्वरसमःक्रोधेभीमःप्रहरतांवरः २४ क्रोधंबलममर्षंचयोनिधायपरंतपः जि
तात्मापांडवोमर्षीभ्रातुस्तिष्ठतिशासने २५ तेजोराशिंमहात्मानंवरिष्ठममितौज
सं भीमंप्रदर्शनेनापिभीमसेनंजनार्दन २६ तन्ममाचक्ष्ववार्ष्णेयकथमद्यवृको
दरः आस्तेपरिघबाहुःसमध्यमःपांडवोबली अर्जुनेनार्जुनोयःसकृष्णबाहुसह
स्त्रिणा। हिबाहुःस्पर्धतेनित्यमतीतेनापिकेशव २८ क्षिपत्येकेनवेगेनपंचबाण
शतानियः इष्वस्त्रेसदृशोराज्ञःकार्तवीर्यस्यपांडवः २९ तेजसादित्यसदृशोमहर्षि
सदृशोदमे क्षमयापृथिवीतुल्योमहेंद्रसमविक्रमः ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११ सामर्षत्वादेवपांडवः पांडुरेवपांडवः स्वार्थेतद्धितः पांडवः पांडुपुत्रः पांडुः कुंतीपतौ सितेश्वेतविस्पः १२ ३०

आधिराज्यंमहद्दीप्तंप्रथितंमधुसूदन आहृतंयेनवीर्येणक्षत्रूणांसर्वराजसु ११ यस्य
बाहुबलेसर्वेपांडवाः पर्युपासते ससर्वरथिनांश्रेष्ठः पांडवःसत्यविक्रमः १२ यं
गत्वाभिमुखः संख्येनजीवन्कश्चिदाव्रजेत् योजेतासर्वभूतानामजेयोजिष्णुरच्यु
त १३ योपाश्रयः पांडवानांदेवानामिववासवः सतेभ्रातासखाचैवकथमद्यधनं
जयः १४ दयावान्सर्वभूतेषुह्रीनिषेवोमहास्त्रवित् मृदुश्चसुकुमारश्चधार्मिक
श्चप्रियश्चमे १५ सहदेवोमहेष्वासःशूरःसमितिशोभनः भ्रातृणांकृष्णशुश्रू
षुर्धर्मार्थकुशलोयुवा १६ सदैवसहदेवस्यभ्रातरोमधुसूदन वृत्तंकल्याणवृत्तस्य
पूजयंतिमहात्मनः १७ ज्येष्ठापचायिनंवीरंसहदेवंयुधांपतिं शुश्रूषुंममवार्ष्णे
यमाद्रीपुत्रंप्रचक्ष्वमे १८ सुकुमारोयुवाशूरोदर्शनीयश्चपांडवः भ्रातृणांचैव
सर्वेषांप्रियःप्राणोबहिश्चरः १९ चित्रयोधीचनकुलोमहेष्वासोमहाबलः क
च्चित्सकुशलीकृष्णवत्सोममसुखैधितः २० सुखोचितमदुःखार्हंसुकुमारंमहा
रथं अपिजातुमहाबाहोपश्येयंनकुलंपुनः २१ ॥

ज्येष्ठापचायिनंज्येष्ठानांभावबृंहितकरं १८ ३ ५१

म० उ०
टी०
२०३

पक्ष्मणोः संपातजे निमेषमात्रेऽस्त्यर्थः ४२ ४३ पुत्रलोकात् पुत्रसंनिकर्षात्पक्षात् पतिलोकं पतिसंनिधिं ज्ञात्वा

पक्ष्मसंपातजे कालेन कृष्णेन विनाकृता न लभामि धृतिं वीरस्ताय जीवामि पश्यतो ४२
सर्वैः पुत्रैः प्रियतरा द्रौपदी मे जनार्दन कुलीना रूपसंपन्ना सर्वैः समुदिता गुणैः ४३
पुत्रलोकात्पतिलोकं वृण्वाना सत्यवादिनी प्रियान्पुत्रान्परित्यज्य पाण्डवाननुरुध्य
ते ४४ महाभिजनसंपन्ना सर्वकामैः सुपूजिता ईश्वरी सर्वकल्याणी द्रौपदी कथमच्यु
त ४५ पतिभिः पंचभिः शूरैरग्निकल्पैः प्रहारिभिः उपपन्ना महेष्वासैर्द्रौपदी दुःखभागिनी
४६ चतुर्दशमिदं वर्षं यन्नापश्यमरिंदम पुत्राधिभिः परिद्यूनां द्रौपदीं सत्यवादिनीं ४७
न नूनं कर्मभिः पुण्यैरश्नुते पुरुषः सुखं द्रौपदी चेन्न याप्नुयान्नाश्नुते सुखमव्ययं ४८
न प्रियो मम कृष्णाया बीभत्सुर्न युधिष्ठिरः भीमसेनो यमौ चापि यदपश्यं सभागतां ४९
न मे दुःखतरं किंचिद्भूतपूर्वं ततोधिकं स्त्रीधर्मिणीं द्रौपदीं यच्छ्वशुराणां समीपगां ५०
आनायितामनार्येण क्रोधलोभानुवर्तिना सर्वे प्रैक्षन्त कुरव एकवस्त्रां सभां गतां
५१ तत्रैव धृतराष्ट्रश्च महाराजश्च बाह्लिकः कृपश्च सोमदत्तश्च निर्विण्णाः कुरवस्तथा
५२ तस्यां संसदि सर्वेषां क्षत्तारं पूजयाम्यहं वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ५३

ना ४४ ४७ तथाव्रताचरणशीला ४८ ४९ ५० ५१ ५२ ५३ ॥ २०३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५४ ५५ कच्चिदितिकाङ्क्षास्तुत्वावहत्वंनास्तीतिव्यज्यते एषांमन्तृत्रभर्त्रादीनां ५६ नक्रुशलंमरणं ५७ अवरो
धःराज्यप्रदानरूपोवृत्तिनिरोधः ५८ यदिसुत्वेगुणपत्वयरूपंतर्हिदुःखोत्पादत्वयहेतोःततःनःअस्माकंस्या
त्तथाचनवयंदुःखोद्भयेशास्त्रमर्हस्यर्थः ५९ अस्मात्भाविनःकुरुपांडवसंग्रामात् गोत्रकलहेविषम
तस्यकुलस्यमहाबुद्धेर्गभीरस्यमहात्मनः तत्तुःशीलमलंकारोलोकान्विष्टभ्यतिष्ठ
ति ५४ वैशंपायनउः सांत्वमाकार्तांचहृष्टाचहृष्टाङ्गोविंदमागते नानाविधानिदुःखा
निसर्वाण्येवान्वकीर्तयत् ५५ पूर्वंगाचरितंयत्तत्कुराजभिररिन्दम अक्षद्यूतंमृगवधः
कच्चिदेषांसुखावहं ५६ तन्मांदहतियत्कृष्णासभायांकुरुसन्निधौ धार्तराष्ट्रैःपरि
क्लिष्टायथानकुशलंतथा ५७ निर्वासनंचनगरात्प्रव्रज्याचपरंतप नानाविधानांदुः
खानामभिज्ञास्मिजनार्दन ५८ अज्ञातचर्याबालानामवरोधश्चमाधव नमेक्लेशात
मंतस्मात्पुत्रैःसहपरंतप ५९ दुर्योधनेननिकृतावर्षमद्यचतुर्दश दुःखादपिसुखं
नस्याद्यदिपुण्यफलक्षयः नमेविशेषोजात्वासीद्धार्तराष्ट्रेषुपांडवैः ५९ तेनसत्येन
कृष्णत्वांहतामित्रंश्रियावृतं अस्माद्विमुक्तंसंग्रामात्पश्येयंपांडवैःसह ६० नैवशक्याः
पराजेतुंसर्वंयेषांतथाविधं पितरंत्वेवगर्हेयंनात्मानंनसुयोधनं ६१ येनाहंकुंतिभो
जायधनंवृत्तेरिवार्पिता बालामामार्यकस्तुभ्यंक्रीडंतींकंडुहस्तिकां ६२ ॥ धियामेवावमर्दः
समबुद्धीनांतुसुखमेवेतिभावः ६० सर्ववृत्तंयेषांपांडवानांतथाविधंसुविषमं ६१ वृत्तेर्वदान्यत्वेन
ख्यातेर्धनंयथाश्रद्धेशेनार्प्यतेतद्वत्येनाहमर्पितानृमोतीतेहृष्टख्यातेःइतिविस्रब्धःपूर्तैरिवेत्यपपाठःश्री

धृतःप्रतिज्ञामहंकृतव ८२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ०
टी०
२०४

श्वशुरैर्भीष्मादिभिः स्वतरां तेषामपि पितृज्येष्ठत्वात् श्वशुरा एव ६३ ६४ महाजन्ये महायुद्धे मेधान् अश्वमेधान् ६५ अभ्यसूया
मि निन्दामि वेधसे विश्वकर्त्रे महते इति कृष्णस्येश्वरस्य निर्देशार्थ उपहासः कर्मणा एव प्राबल्यं धर्मपदस्यार्थदर्शनेन ।

अदात्कुन्तिभोजाय सखा सख्ये महात्मने साहं पित्रा च निकृता श्वशुरैश्च परंतप ६३ अत्यंत
दुःखिता कृष्ण किं जीवितफलं मम यन्मां वागब्रवीन्नक्तं सूतके सव्यसाचिनः ६४ पुत्रस्ते
पृथिवीं जेता यशश्चास्य दिवं स्पृशेत् हत्वा कुरून्महाजन्ये राज्यं प्राप्य धनंजयः ६५ भ्रातृ
भिः सह कौंतेयस्त्रीन्मेधानाहरिष्यति नाहं तामभ्यसूयामि नमो धर्माय वेधसे कृष्णाय
महते नित्यं धर्मो धारयति प्रजाः ६६ धर्मश्चेदस्ति वार्ष्णेय यथा वागभ्यभाषत त्वं चापि तत्त
था कृष्ण सर्वं संपादयिष्यसि न मां माधव वैधव्यं नार्थनाशो न वैरिता तथा शोकाय दह
ति यथा पुत्रैर्विनाभवः याहं गांडीवधन्वानं सर्वशस्त्रभृतां वरं ६९ धनंजयं न पश्यामि
का शांतिर्हृदयस्य मे इदं चतुर्दशं वर्षं यन्नापश्यं युधिष्ठिरं ७० धनंजयं च गोविंद यमौ
तं च वृकोदरं जीवनाशं प्रणष्टानां श्राद्धं कुर्वंति मानवाः ७१ अर्थतस्ते मम मृतास्तेषां चा
हं जनार्दन ब्रूया माधव राजानं धर्मात्मानं युधिष्ठिरं ७२ भूयांस्ते हीयते धर्मो मा पुत्रक
वृथा कृथाः पराश्रया वासुदेव या जीवति धिगस्तु तां ७३ ॥

ह धर्म इति धारयतीति धर्म इति व्युत्पत्त्या धर्म एव कर्ता धारयिता ईश्वराराधनं तद्धृष्ट्यैवेति भावः ६६ धर्मश्चेदिति
धर्मोपि संपादयद् द्रक्ष्यति सतोपीश्वरस्य किंचित्करत्वमाह त्वं चेति नैव श्रेय इति भावः ६७ ६८ ६९ ७३ २०४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

७४ अतिक्रमिष्यति अयुद्धेनेत्यर्थः स्वनर्शसंअत्यंतबीभत्सं ७५ ७६ ७७ अतेराज्यंवावनेवा मध्यंअल्पेस्मर्यं अत

वृत्तेः कार्यणपलब्धायाअप्रतिष्ठेवज्यायसी अथोथनंजयंब्रूयानित्याद्युक्तेवृकोदरं ७४
यदर्थंतत्रियामहेतत्तस्यकालोयमागतः अस्मिंश्चेदागतेकालेमिथ्याचातिक्रमिष्यति
७५ लोकसंभाविताःसंतः सुनृशंसंकरिष्यथ नृशंसेनचवोयुक्ताःस्युजेयेप्रशास्वतीस
माः ७६ कालेहिसमनुप्राप्तेत्यक्तव्यमपिजीवितं माद्रीपुत्रोचवक्तव्यौत्वत्रधर्मरतोसदा
७७ विक्रमेणार्जितान्भोगान्वृणीतंजीवितादपि विक्रमाधिगताह्यर्थाःक्षत्रधर्मेणजी
वतः ७८ मनोमनुष्यस्यसदाप्रीणंतिपुरुषोत्तम गत्वाब्रूहिमहाबाहोसर्वशस्त्रभृतां
वरं ७९ अर्जुनंपांडवंवीरंद्रौपद्याःपदवींचर विदितोहितवात्यंतंसंक्रुद्धोतोयथांत
कौ ८० भीमार्जुनौनयेतांहिदेवानपिपरांगतिं तयोश्चैतदवज्ञानंयत्साकृष्णासभांग
ता ८१ दुःशासनश्चकर्णश्चपरुषाण्यभ्यभाषतां दुर्योधनोभीमसेनमभ्यगच्छन्मन
स्विनं ८२ पश्यतांकुरुमुख्यानांतस्यद्रक्ष्यतियत्फलम् नहिवैरंसमासाद्यप्रशाम्यति
वृकोदरः ८३ अचिरादपिभीमस्यनहिवैरंप्रशाम्यति यावदंतंननयतिशात्रवान्
छत्रुकर्शनः ८४ नदुःखंराज्यहरणंनचद्यूतेपराजयः प्रव्राजनेनपुत्राणांनमेतद्दुःख
कारणं ८५ ॥

पदंव्याचष्टेउत्तमानिति उत्तमान्तीव्रवैराग्ययत्नान्परिक्लेशान्प्रीतवातादीन् ७८ ७९ ८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८६ ८७ ८८ ८९ ९० ९१ ९२ ९३ ९४ ॥

यत्साबृहतीश्यामाएकवस्त्रासभांगता अश्रौषीत्परुषावाचःकिंनुदुःखतरंततः ८६
स्त्रीधर्मिणीवरारोहाक्षत्रधर्मरतासदा नाभ्यगच्छत्तदानाथंकृष्णानाथवतीसती ८७
यस्याममसपुत्रायास्त्वंनाथोमधुसूदन रामश्चबलिनांश्रेष्ठःप्रद्युम्नश्चमहारथः
८८ साहमेवंविधंदुःखंसहेयंपुरुषोत्तम भीमेजीवतिदुर्धर्षेविजयेचापलायिनि
८९ वैशंपायनउ॰ ततआश्वासयामाससपुत्राधिभिरभिप्लुतां पितृष्वसारंशोचंतींशौ
रिःपार्थसखःपृथां ९० वासुदेवउ॰ कातुसीमंतिनीत्वादृक्लोकेष्वस्तिपितृष्वसः
शूरस्यराज्ञोदुहिताआजमीढकुलंगता ९१ महाकुलीनाभवतीह्रदाद्ध्रदमिवागता ईश्व
रीसर्वकल्याणीभर्त्रापरमपूजिता ९२ वीरसूर्वीरपत्नीत्वंसर्वैःसमुदितागुणैः सुखदुः
खेमहाप्राज्ञेत्वादृशीसोढुमर्हति ९३ निद्रातंद्रीक्रोधहर्षौक्षुत्पिपासेहिमातपौ एता
निपार्थानिर्जित्यनित्यंवीरसुखेरताः

९४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९५ ग्रंतेषु ग्रंतयोः परमानंदे सुषुप्तौ वा उभयत्रैवाहं तदर्शनात्सुखमस्मि एतयोरंतरं जाग्रत्स्वप्नौ दुःखं दुःखरूपं स्वयमा
त्मा नित्यं दुःखमेव जाग्रत्स्वप्नयोस्तु यापि सवधा तत्र भासमानं दुःखमागमापायित्वात एवं पुत्राः सहंते त्वं च सहस्वेति भा
वः ९६ ९८ ग्रबुद्धिजमज्ञानजं तमो विपर्ययज्ञानं ग्रनात्मनि देहादावात्माभिमानरूपं ९९ १०० निकृत्याग्रच्छ
न्नकृग्रामसुखाः पार्थानित्यं वीरसुखप्रियाः न ते स्वल्पेन तुष्येयुर्महोत्साहा महाबलाः
९५ ग्रंतं धीरः निषेवंते मध्यं ग्राम्यसुखप्रियाः उत्तमांश्च परिक्लेशान्‌ भोगांश्चातीव मानु
षान्‌ ९६ ग्रंतेषु रेमिरे धीरा न ते मध्येषु रेमिरे ग्रंतप्राप्तिं सुखामाहुर्दुःखमंतरमेतयोः ९९
ग्रभिवादयंति भवतीं पांडवाः सह कृष्णया ग्रात्मानं च कुशलिनं निवेद्याहं तु नाम ते ९० ग्र
रोगान्सर्वसिद्धार्थान्‌ क्षिप्रं द्रक्ष्यसि पांडवान्‌ ईश्वरान्सर्वलोकस्य हतामित्रान्श्रियावृतान्‌
९८ एवमाश्वासिता कुंती प्रत्युवाच जनार्दनं पुत्राधिभिरभिध्वस्ता निगृह्याबुद्धिजं तमः ९९
कुंत्युवाच यद्यत्तेषां महाबाहो पथ्यं स्यान्मधुसूदन यथा यथा त्वं मन्येथाः कुर्याः कृष्ण तथा
तथा १०० ग्रविलोपेन धर्मस्य ग्रनिकृत्या परंतप प्रभावज्ञास्मि ते कृष्ण सत्यस्याभिजनस्य च १
व्यवस्थायां च मित्रेषु बुद्धिविक्रमयोस्तथा त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं तपो महत्‌ २ त्वं त्रा
ता त्वं महद्ब्रह्म त्वयि सर्वं प्रतिष्ठितं यथैवात्थ तथैवैतत्त्वयि सत्यं भविष्यति ३ वैशंपायन उ० ता
मामंत्र्य च गोविंदः कृत्वा चाभिप्रदक्षिणं प्रातिष्ठत महाबाहुर्दुर्योधनगृहान्प्रति ९४ इत्यु
द्योगपर्वणि भगवद्याने ९० वैशंपायन उ० पृथामामंत्र्य गोविंदः कृत्वा चापि प्रदक्षिणं दुर्यो
लेन १ त्वमेवेति भगवतः सार्वात्म्यं सर्वाधिष्ठानत्वं चोक्तं १०२ तामामंत्र्येति पूर्वश्लोकेन प्रस्थानमात्रमुक्तं पृथामामं
त्र्येत्यत्र तु तद्दर्शनानुवादपूर्वकं विदुरगृहप्राप्तिरुच्यत इत्यपौनरुक्त्यं १०४ ग्रध्यायः ९० पृथा १ ॥ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०उ० टी० २९६

अभ्रघनः सजलो मेघः सह विद्युता तत्सादृश्येन महेंद्रनीलमणिमयत्वं सुवर्णमयत्वं च सूचितं अन्येत्वभ्र

लस्यापरमया युक्तं पुरंदरगृहोपमं विचित्रैरासनैर्युक्तं प्रविवेश जनार्दनः २ तस्य क
क्ष्या व्यतिक्रम्य तिस्रो द्वास्थैरवारितः ततोऽभ्रघनसंकाशं गिरिकूटमिवोच्छ्रितं ३ श्रि
या ज्वलंतं प्रासादमारुरोह महायशाः तत्र राजसहस्रैश्च कुरुभिश्चापि संवृतं ४ धा
र्तराष्ट्रं महाबाहुं ददर्शासीनमासने दुःशासनं च कर्णं च शकुनिं चापि सौबलं ५
दुर्योधनसमीपे तानासनस्थान् ददर्श सः अभ्यागच्छति दाशार्हे धार्तराष्ट्रो महायशाः
६ उदतिष्ठत्सहामात्यः पूजयन्मधुसूदनं समेत्य धार्तराष्ट्रेण सहामात्येन केशवः ७
राजभिस्तत्र वार्ष्णेयः समागच्छद्यथावयः तत्र जांबूनदमयं पर्यंकं सुपरिष्कृतं ८
विविधास्तरणास्तीर्णमभ्युपाविशदच्युतः तस्मिन् गामधुपर्कं चाप्युदकं च जना
र्दने ९ निवेदयामास तदा गृहान्राज्यं च कौरवः तत्र गोविंदमासीनं प्रसन्नादित्य
वर्चसं १० उपासां चक्रिरे सर्वे कुरवो राजभिः सह ततो दुर्योधनो राजा वार्ष्णेयं जयतां
वरं ११ ॥

घनः आकाशमात्रवर्तिघनः सहिशारत्संबंधा इहुल इति व्याचख्युः ३ ४ ५ ६ ७ ११ २९६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ शठोदर्कं शाठ्यपर्यवसानं आभाष्य संबोधनेनोन्मुखीकृत्य १३ १६ अगदस्य उपघ्न १७ अलघुकृतं पाठांतरेऽप्र
नवृक्षते अनिष्ठीवने अनन्यकृतमित्यपि पठंति प्रयत्नशैथिल्यहीनकरणे अग्रस्तं अलब्धादरं अनिरस्तं अश्या

न्यमंत्रयद्भोजनेननाभ्यनंदच्चकेशवः ततोदुर्योधनःकृष्णमब्रवीत्कुरुसंसदि १२ मृदु
पूर्वंशठोदर्कंतूर्णमाभाष्यकौरवः कस्मादन्नानिपानानिवासांसिशयनानिच १३ त्व
दर्थमुपनीतानिनाग्रहीस्त्वंजनार्दन उभयोश्चददःसाह्यमुभयोश्चहितेरतः १४ संबंधी
दयितश्चासिधृतराष्ट्रस्यमाधव त्वंहिगोविंदधर्मार्थौवेत्थतत्वेनसर्वशः तत्रकारण
मिच्छामिश्रोतुंचक्रगदाधर १६ वैशंपायनउ० सएवमुक्तोगोविंदःप्रत्युवाचमहाम।
नाः उद्धन्मेघस्वनःकालेप्रगृह्यविपुलंभुजं १७ अलघूकृतमग्रस्तमनिरस्तमसंकु
लं राजीवनेत्रोराजानंहेतुमद्वाक्यमुत्तमं १८ कृतार्थाभुंजतेदूताःपूजांगृह्णंतिचैवहि
कृतार्थंमांसहामात्यंसमर्चिष्यसिभारत १९ एवमुक्तःप्रत्युवाचधार्तराष्ट्रोजनार्दनं
नयुक्तंभवतास्मासुप्रतिपत्तुमसांप्रतं २० कृतार्थंचाकृतार्थंचत्वांवयंमधुसूदन य
तामहेपूजयितुंदाशार्हनचशक्नुमः २१ नचतत्कारणंविद्मोयस्मिन्नोमधुसूदन पू
जांकृतांप्रीयमाणैर्नामंस्थाःपुरुषोत्तम २२ वैरंनोनास्तिभवतागोविंदनचविग्रहः सभ
वान्प्रसमीक्ष्यैतन्नेदृशंवक्तुमर्हति २३ ॥

नक्षेपरहितं असंकुलं असंकीर्णवर्णं १८ १९ असांप्रतं प्रतिपत्तुं अयुक्तं कर्तुं २० २२ वैरं द्वेषः विग्रहो युद्धं २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ संरंभात्क्रोधात् हेतुवादात्कपरात् द्वेष्टिभवान् २६ २७ विरुरुत्सति विरोधंकर्तुमिच्छति ३० ३१

एवमुक्तः प्रत्युवाच धार्तराष्ट्रं जनार्दनः अभिवीक्ष्य सहामात्यं दाशार्हः प्रहसन्निव
२४ नाहं कामान्न संरंभान्न द्वेषान्नार्थकारणात् न हेतुवादाल्लोभाद्वा धर्मं जह्यां क
थंचन २५ संप्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः न च संप्रीयसे राजन्न चै
वापद्गता वयं २६ अकस्माद्द्विषसे राजन् जन्मप्रभृति पांडवान् प्रियानुवर्तिनो
भ्रातॄन्सर्वैः समुदितान्गुणैः २७ अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते धर्मे
स्थिताः पांडवेयाः कस्तान्किं वक्तुमर्हति २८ यस्तान्द्वेष्टि स मां द्वेष्टि यस्ताननु स मा
मनु ऐकात्म्यं मां गतं विद्धि पांडवैर्धर्मचारिभिः २९ कामक्रोधानुवर्ती हि यो मोहाद्वि
रुरुत्सति गुणवंतं च यो द्वेष्टि तमाहुः पुरुषाधमं ३० यः कल्याणगुणान् ज्ञातीन्मो
हाल्लोभाद्दिदृक्षते सोजितात्माजितक्रोधो न चिरं तिष्ठति श्रियं ३१ अथ यो गुणसंप
न्नान्हृदयस्याप्रियानपि प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ३२ ॥ ३३

मोहात् अदृष्टेऽदृष्टबुद्धिर्मोहः लोभः परकीयधनापहारेच्छा अजितेतिच्छेदः ३२ ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ १५ शुभ्रातनानारत्नमयत्वेनप्रदीप्तान् शुभ्रंप्रदीप्तेधवलेप्रकेचेतिविश्वः १६ १८ अपचितिःपूजा १९ ४२ अथा

सर्वमेतन्नभोक्तव्यमन्नंदुष्टाभिसंहितं तत्वेकस्यभोक्तव्यमितिमेधीयतेमतिः १४
एवमुक्तामहाबाहुर्दुर्योधनममर्षणं निश्चक्रामततःशुभ्राद्धार्तराष्ट्रनिवेशनात् १५
निर्यायचमहाबाहुर्वासुदेवोमहामनाः निवेशायययौवेश्म विदुरस्यमहात्मनः १६ त
मभ्यगच्छद्द्रोणश्चकृपोभीष्मोथबाह्लिकः कुरवश्चमहाबाहुं विदुरस्यगृहेस्थितं १७
तऊचुर्माधवंवीरंकुरवोमधुसूदनं निवेदयामवार्ष्णेयसरत्नांस्तेगृहान्वयं १८ तानुवा
चमहातेजाःकौरवान्मधुसूदनः सर्वेभवन्तोगच्छन्तुसर्वामेपचितिःकृता १९ यातेषु
कुरुष्वत्तर्दाशार्हमपराजितं अभ्यर्चयामासतदासर्वकामैःप्रयत्नवान् ४० ततःत्व
तान्नपानानिशुचीनिगुणवंतिच उपाहरदनेकानिकेशवायमहात्मने ४१ तैस्तर्पयित्वा
प्रथमंब्राह्मणान्मधुसूदनः वेदविद्यान्ददौकृष्णःपरमद्रविणान्यपि ४२ ततोनुयायि
भिःसार्धंमरुद्भिरिववासवः विदुरान्नानिबुभुजेशुचीनिगुणवंतिच ४३ इतिश्रीभ
गवद्याने ९१ वैशंपायनउ० तंभुक्तवंतमाश्वस्तं निशायांविदुरोब्रवीत् नेदंसम्यग्व्यवसि
तंकेशवागमनंतव १ अर्थधर्मातिगोमंदःसंरंभीचजनार्दन मानघ्नोमानकामश्चवृ
द्धानांशासनातिगः २ ॥ य० ९१ ॥ तं भ २ ॥ २ ॥

अप्यहंनिवत्स्यंप्रत्यन्ताभिनिवेशामित्यर्थः अतेयःश्रेयसांकर्मणिपष्टी ३ शंकितःसर्वत्रविश्वासहीनः

धर्मेस्थास्यातिगामेतांदूरात्माप्यहंगतः अतेयःश्रेयसांमंदोधार्तराष्ट्रोजनार्दन ३ कामा
त्माप्राज्ञमानीचमित्रध्रुक्सर्वशंकितः अकर्ताचाकृतज्ञश्चत्यक्तधर्माप्रियानृतः ४ मूढ
श्चाकृतबुद्धिश्चइंद्रियाणामनीश्वरः कामानुसारीकृत्येषुसर्वेष्वकृतनिश्चयः ५ एतेश्चा
न्यैश्चबहुभिर्दोषैरेषसमन्वितः त्वयोच्यमानःश्रेयोपिसंरंभान्नग्रहीष्यति ६ भीष्मद्रोण
कृपेकर्णेद्रोणपुत्रेजयद्रथे भूयसींवर्ततेवृत्तिंनशमेकुरुतेमनः ७ निश्चितंधार्तराष्ट्रा
णांसकर्णानांजनार्दन भीष्मद्रोणमुखान्पार्थान्नशक्ताःप्रतिवीक्षितुं ८ सेनासमुद
यंकृत्वापार्थिवंमधुसूदन कृतार्थंमन्यतेबालआत्मानमविचक्षणः ९ एकःकर्णःप
राञ्जेतुंसमर्थइतिनिश्चितं धार्तराष्ट्रस्यदुर्बुद्धेःसशमंनोपयास्यति १० संविच्चधार्तरा
ष्ट्राणांसर्वेषामेवकेशव शमेप्रयतमानस्त्वंसौभ्रात्रंकांक्षिणः ११ नपांडवाना
मस्माभिःप्रतिदेयंयथोचितं इतिव्यवसितास्तेषुवचनंस्यान्निरर्थकं १२ ॥

४ ६ वृत्तिंजीविकां एतेयुद्धेनमह्यंराज्यंदास्यंतीत्याशयेत्यर्थः ७ ८ पार्थिवंपृथ्वीसंबंधिनं ९ ११ प्रतिदेयंपरा
वृत्त्यदेयं व्यवसितानिश्चिताः १२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१३ तेत्वतः १८ २२ बद्धंभवदीयत्वेनप्रतिबद्धमपिलब्धंमन्यते २३ ॥

यत्रसूक्तंदुरुक्तंचसमंस्यान्मधुसूदन नतत्रप्रलपेत्प्राज्ञोबधिरेष्विवगायनः १३ अवि
जानत्सुमूढेषुनिर्मर्यादेषुमाधव नत्वंवाक्यंब्रुवन्युक्तश्चांडालेषुद्विजोयथा १४ सोयं
बलस्थोमूढश्चनकरिष्यतितेवचः तस्मिन्निरर्थकंवाक्यमुक्तंसंपत्स्यतेतव १५ तेषां
समुपविष्टानांसर्वेषांपापचेतसां तवमध्यावतरणंममकृष्णनरोचते १६ दुर्बुद्धीनाम
शिष्टानांबहूनांदुष्टचेतसां प्रतीपंवचनंमध्येतवकृष्णनरोचते १७ अनुपासितवृद्ध
त्वाच्छ्रियोदर्पाच्चमोहितः वयोदर्पादमर्षाच्चनतेश्रेयोग्रहीष्यति १८ बलंबलवदप्य
स्ययदिवक्ष्यसिमाधव त्वय्यस्यमहतींशंकांनकरिष्यतितेवचः १९ नेदमद्ययुधाश
क्यमिंद्रेणापिसहामरैः इतिव्यवसिताःसर्वेधार्तराष्ट्राजनार्दन २० तेष्वेवमुपपन्ने
षुकामक्रोधानुवर्तिषु समर्थमपितेवाक्यमसमर्थंभविष्यति २१ मध्येतिष्ठन्हस्त्य
नीकस्यमंदोरथाश्वयुक्तस्यबलस्यमूढः दुर्योधनोमन्यतेवीतभीतिःकृत्स्नाममेयंपृ
थिवीजितेति २२ आशंसतेवैधृतराष्ट्रस्यपुत्रोमहाराज्यमसपत्नंपृथिव्यां तस्मिञ्छ
मःकेवलोनोपलभ्योबद्धंसंतंमन्यतेलब्धमर्थं २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पर्यस्तेयंपृथिवीकालपक्वाडुर्योधनार्थेपांडवान्योद्धुकामाः समागताःसर्वयोधाःपृथि
व्यांराजानश्चक्षितिपालैःसमेताः २४ सर्वेचैतेकृतवैराःपुरस्तात्वयाराजानोहृतसभा
श्चकृष्ण ततोद्वेगात्संश्रिताधार्तराष्ट्रान्समेहताःसहकर्णेनवीराः २५ त्यक्तात्मानःसह
डुर्योधनेनहृष्टायोद्धुंपांडवान्सर्वयोधाः तेषांमध्येप्रविष्टोथायदित्वंननतन्मतेममदाशा
र्हवीर २६ तेषांसमुपविष्टानांबहूनांदुष्टचेतसां कथंमध्येप्रपद्येथाःशत्रूणांशत्रुक
र्शन २७ सर्वथात्वंमहाबाहोदेवैरपिदुरुत्सहः प्रभावंपौरुषंबुद्धिंजानामितवशत्रुह
न् २८ यामेप्रीतिःपांडवेषुभूयसीत्वयिमाधव प्रेम्णाचबहुमानाच्चसौहृदाच्चब्रवीम्य
हं २९ यामेप्रीतिःपुष्कराक्षत्वद्दर्शनसमुद्भवा साकिमाख्यायतेतुभ्यमंतरात्मासिदे
हिनां ३० इत्युद्योगेभगवद्याने ४२ श्रीभगवान् यथाब्रूयान्महाप्राज्ञोयथाब्रूयाद्विच
क्षणः यथावाच्यस्त्वद्विधेनभवतामद्विधःसुहृत् १ धर्मार्थयुक्तंतथ्यंचयथात्वय्युपपद्य
ते तथावचनमुक्तोस्मित्वयैतत्पितृमातृवत् २ सत्यंप्राप्तंचयुक्तंचाप्येवमेवयथात्थमां
शृणुष्वागमनेहेतुंविदुरावहितोभव ३ दौरात्म्यंधार्तराष्ट्रस्यक्षत्रियाणांचवैरितां सर्वमेतद
हंजानन्क्षत्तःप्राप्तोद्यकौरवान् ४ ॥

पर्यस्तां ग्रन्यथाभूतां ५ यतन्तं यतमानः ६ ७ ८ ९ तं नः शंसं अनर्थाय विदुरितिसंबंधः १० १२ हितं कर्तुमिति शेषः

पर्यस्तां पृथिवीं सर्वां साश्वां सरथकुञ्जरां योमोचयेन्मृत्युपाशात्प्राप्नुयाद्धर्ममुत्तमं ५
धर्मकार्यं यतन्शक्त्या नोचेत्प्राप्नोति मानवः प्राप्नो भवति तत्पुण्यमत्र मे नास्ति संशयः
६ मनसा चिंतयन्पापं कर्मणा नाभिरोचयेत् न प्राप्नोति फलं तस्य एवं धर्मविदो विदुः ७
सोहं यतिष्ये प्रशमं तत: कर्तुं ममायया कुरूणां सृंजयानां च संग्रामे विनशिष्यतां ८ से
यमापन्महाघोरा कुरुष्वेव समुत्थिता कर्णदुर्योधनकृता सर्वे ह्येते तदन्वयाः ९ व्यस
नेक्लिश्यमाने हियो मित्रेनाभिपद्यते अनुनीय यथाशक्ति तं नः शंसं विदुर्बुधाः १० आ
केश्यग्रहणान्मित्रमकार्यात्संनिवर्तयेत् अवाच्यः कस्यचिद्भवति कृतयत्नो यथाब
ले ११ तत्समर्थं शुभं वाक्यं धर्मार्थसहितं हितं धार्तराष्ट्रः सहामात्यो ग्रहीतुं विदुरार्हति
१२ हितं हि धार्तराष्ट्राणां पांडवानां तथैव च पृथिव्यां क्षत्रियाणां च यतिष्येहममायया
१३ हिते प्रयतमानं मां शंकेद्दुर्योधनो यदि हृदयस्य च मे प्रीतिरानृण्यं च भविष्यति १४
ज्ञातीनां हि मिथोभेदे यन्मित्रं नाभिपद्यते सर्वयत्नेन मध्यस्थं न तन्मित्रं विदुर्बुधाः १५
नमां ब्रूयुरधर्मिष्ठा मूढा ह्यसुहृदस्तथा शक्तो नावारयत्कृष्णः संरब्धान्कुरुपांडवान् १६

१२ १४ नाभिपद्यते नोपकरोति १५ ॥ १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उभयोःसाधयन्नर्थमहमागतइत्युत तत्रयत्नमहंकृत्वागच्छेयंनृष्ववाच्यतां १७ ममध
र्मार्थयुक्तंहिकृत्वावाक्यमनामयं नचेदादास्यतेबालोदिष्टस्यवशमेष्यति १८ अहापय
न्पांडवार्थंयथावच्छमंकुरूणांयदिवाचरेयं पुण्यंचमेस्याच्चरितंमहात्मन्मुच्येरंश्चकुरवो
मृत्युपाशात् १९ अपिवाचंभाषमाणस्यकाव्यांधर्मारामामर्थवतीमहिंस्रां अवेक्षेरन्
धार्तराष्ट्राःशमार्थंमांचप्राप्तंकुरवःपूजयेयुः २० नचापिममपर्याप्ताःसहिताःसर्वपा
र्थिवाः क्रुद्धस्यप्रमुखेस्थातुंसिंहस्येवेतरेमृगाः २१ वैशंपायनउ॰ इत्येवमुक्त्वावचनं
वृष्णीनामृषभस्तदा शयनेसुखसंस्पर्शेशिश्येयदुसुखावहः २२ इत्युद्योगेभग॰
८३ वैशंपायनउ॰ तथाकथयतोरेवतयोर्बुद्धिमतोस्तदा शिवानक्षत्रसंपन्नासा
व्यतीयायशर्वरी १ धर्मार्थकामयुक्ताश्चविचित्रार्थपदाक्षराः शृण्वतोविविधावाचो
विदुरस्यमहात्मनः २ कथाभिरनुरूपाभिःकृष्णस्यामिततेजसः अकामस्येव
कृष्णस्यसाव्यतीयायशर्वरी ३ ततस्तुस्वरसंपन्नाबहवःसूतमागधाः शंखदुंदुभि
निर्घोषैःकेशवंप्रत्यबोधयन् ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५ उदकं स्नानाचमनादि अनुजप्यं संध्योपासनादि ते उभे कृते येन सः कृतोदकानुजप्यः ६ तिष्ठंतं उपासीनं १८ १५ ॥

तत उत्थाय दाशार्ह ऋषभः सर्वसात्वतां सर्वमावश्यकं चक्रे प्रातः कार्यं जनार्दनः ५ कृतो
दकानुजप्यः स हुताग्निः समलंकृतः ततश्चादित्यमुद्यंतमुपातिष्ठत माधवः ६ अथ दु
र्योधनः कृष्णं शकुनिश्चापि सौबलः संध्यां तिष्ठंतमभ्येत्य दाशार्हमपराजितं ७ आच
क्षेतां तु कृष्णस्य धृतराष्ट्रं सभागतं कुरूंश्च भीष्मप्रमुखान् राज्ञः सर्वांश्च पार्थिवान् ८ त्वा
मर्थयंते गोविंद दिवि शक्रमिवामराः तावभ्यनंदद्गोविंदः साम्ना परमवल्गुना ९ ततो
विमल आदित्ये ब्राह्मणेभ्यो जनार्दनः ददौ हिरण्यं वासांसि गाश्चाश्वांश्च परंतपः १० वि
सृज्य बहुरत्नानि दाशार्हमपराजितं तिष्ठंतमुपसंगम्य ववंदे सारथिस्तदा ११ ततो र
थेन शुभ्रेण महता किंकिणीकिना हयोत्तमयुजा शीघ्रमुपातिष्ठत दारुकः १२ तमुप
स्थितमाज्ञाय रथं दिव्यं महामनाः महाभ्रघननिर्घोषं सर्वरत्नविभूषितं १३ अग्निं प्रद
क्षिणं कृत्वा ब्राह्मणांश्च जनार्दनः कौस्तुभं मणिमामुच्य श्रिया परमया ज्वलन् १४ कु
रुभिः संवृतः कृष्णो वृष्णिभिश्चाभिरक्षितः आतिष्ठत रथं शौरिः सर्वयादवनंदनः १५
अन्वारुरोह दाशार्हं विदुरः सर्वधर्मवित् सर्वप्राणभृतां श्रेष्ठः सर्वबुद्धिमतां वरः १६ त
तो दुर्योधनः कृष्णं शकुनिश्चापि सौबलः द्वितीयेन रथेनैनमन्वयातां परंतपं १७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ चित्रास्वतेरथाश्च १९ संमृष्टं दूरीकृतं संसिक्तं जलेनाप्लावितं च रजो यस्मात्तं प्रविभक्तिकं पदं २० एकपुष्कराः काह

सात्यकिःकृतवर्माचवृष्णीनांचापरेरथाः पृष्ठतोन्वयुःकृष्णंगजैरश्वैरथैरपि १८ तेषां
हेमपरिष्कारैर्युक्ताःपरमवाजिभिः गच्छतांघोषिणश्चित्रारथाराजन्विरेजिरे १९ संमृ
ष्टसंसिक्तरजःप्रतिपेदेमहापथं राजर्षिचरितंकालेकृष्णोधीमान्श्रियाज्वलन् २०
ततःप्रयातेदाशार्हेप्रावाद्यंतैकपुष्कराः शंखाश्चदध्मिरेतत्रवाद्यान्यन्यानियानिच
२१ प्रवीराःसर्वलोकस्ययुवानःसिंहविक्रमाः परिवार्यरथंशौरेरगच्छंतपरंतपाः २२
ततोन्येबहुसाहस्राविचित्राद्भुतवाससः असिप्रासायुधधराःकृष्णस्यासन्पुरःसराः
२३ गजाःपंचशतास्तत्ररथाश्चासन्सहस्रशः प्रयांतमन्वयुर्वीरंदाशार्हमपराजितं २४
पुरंकुरूणांसंवृत्तंद्रष्टुकामंजनार्दनं सबालवृद्धंसस्त्रीकंरथ्यागतमरिंदम २५ वेदिका
माश्रिताभिश्चसमाक्रांतान्यनेकशः प्रचलंतीवभारेणयोषिद्भिर्भवनान्युत २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सपूज्यमानः कुरुभिः संशृण्वन्मधुराः कथाः यथार्हं प्रतिसत्कुर्वन्प्रेक्षमाणः शनैर्ययौ २७ ततः
सभां समासाद्य केशवस्यानुयायिनः सशंखवेणुनिर्घोषैर्दिशः सर्वा व्यनादयन् २८ ततः सा
समितिः सर्वा राज्ञाममिततेजसां संप्राकंपत हर्षेण कृष्णागमनकांक्षया २९ ततोभ्याशा
गते कृष्णे समहृष्यन्नराधिपाः श्रुत्वा तं रथनिर्घोषं पर्जन्यनिनदोपमं ३० आसाद्य तु सभा
द्वारमृषभः सर्वसात्वतां अवतीर्य रथाच्छौरिः कैलासशिखरोपमात् ३१ नवमेघप्रतीका
शां ज्वलंतीमिव तेजसा महेंद्रसदनप्रख्यां प्रविवेश सभां ततः ३२ पाणौ गृहीत्वा विदुरं सात्य
किं च महायशाः ज्योतींष्यादित्यवद्राजन्कुरून्प्राच्छादयन् श्रिया ३३ अग्रतो वासुदेवस्य कर्ण
दुर्योधनावुभौ वृष्णयः कृतवर्मा चाप्यासन्कृष्णस्य पृष्ठतः ३४ धृतराष्ट्रं पुरस्कृत्य भीष्मद्रो
णादयस्ततः आसनेभ्योचलन्सर्वे पूजयंतो जनार्दनं ३५ अभ्यागच्छति दाशार्हे प्रज्ञाचक्षु
र्नरेश्वरः सहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः ३६ उत्तिष्ठति महाराजे धृतराष्ट्रे जने
श्वरे तानि राजसहस्राणि समुत्तस्थुः समंततः ३७ आसनं सर्वतोभद्रं जांबूनदपरिष्कृतं कृ
ष्णार्थे कल्पितं तत्र धृतराष्ट्रस्य शासनात् ३८ स्मयमानस्तु राजानं भीष्मद्रोणौ च माधवः अभ्य
भाषत धर्मात्मा राज्ञश्चान्यान्यथावयः ३९ तत्र केशवमानर्चुः सम्यगभ्यागतं सभां राजानः
पार्थिवाः सर्वे कुरवश्च जनार्दनं ४० तत्र तिष्ठन्स दाशार्हो राजमध्ये परंतपः अपश्यदंतरि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तस्यानृषीन्परपुरंजयः ततस्तानभिसंप्रेक्ष्य नारदप्रमुखानृषीन् ५१ अभ्यभाषत
दाशार्हो भीष्मं शांतनवं शनैः पार्थिवीं समितिं द्रष्टुमृषयोऽभ्यागता नृप ५२ निमंत्र्य
तामासनैश्च सत्कारेण च भूयसा नैतेष्वनुपविष्टेषु शक्यः केनचिदासितुं ५३ पूजाप्र
युज्यतामाशु मुनीनां भावितात्मनां ऋषीन् शांतनवो दृष्ट्वा सभाद्वारमुपस्थितान् ५४
त्वरमाणस्ततो भृत्यानासनानीत्यचोदयत् आसनान्यथ मृष्टानि महांति विपुलानि च ५५
मणिकांचनचित्राणि समाजह्रुस्ततस्ततः तेषु तत्रोपविष्टेषु गृहीतार्घेषु भारत ५६
निषसादासने कृष्णो राजानश्च यथासनं दुःशासनः सात्यकये ददावासनमुत्तमं ५७
विविंशतिर्ददौ पीठं कांचनं कृतवर्मणे अविदूरे तु कृष्णस्य कर्णदुर्योधनावुभौ ५८
एकासने महात्मानौ निषीदतुरमर्षणौ गांधारराजः शकुनिर्गांधारैरभिरक्षितः ५९
निषसादासने राजा सहपुत्रो विशांपते विदुरो मणिपीठे तु शुक्लस्पर्ध्याजिनोत्तरे ५०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५१ ५२ ५३ ५४ अध्यायः ६४ कृष्ण १ आगतोस्मीति शेषः २ ३ ४ ५ कृपापरस्यसमर्थवार्थंयतः अनुकंपापर
दुःखेदर्शनेत्रासः कारुण्यंपरदुःखप्रहाणाययत्नः आनृशंस्यंपरदुःखाप्रदानं ६ असंप्राप्तंकृपादिभ्योवि

संस्पृशन्नासनंशौरेर्महामतिरुपाविशत् विस्मयहृष्ट्वादाशार्हेराजानःसर्वपवते अ
मतस्यैवनात्मानमेतमागाज्जनार्दने ५१ अतसीपुष्पसंकाशःपीतवासाजनार्द
नः सभ्राजतसभामध्येहेम्नीवोपहितोमणिः ५२ ततस्तूष्णींसर्वमासीद्गोविंदगा
तमानसं नतत्रकश्चित्किंचिद्धिव्याजहारपुमान्क्वचित् ५३ इत्युद्योगेभगवद्याने
६४ वैशंपायनउ॰ तेष्वासीनेषुसर्वेषुतूष्णींभूतेषुराजसु वाक्यमभ्याददेकृष्णः
सुदंष्ट्रोदुंदुभिस्वनः १ जीमूतइवघर्मांतेसर्वांसंश्रावयन्सभां धृतराष्ट्रमभिप्रेक्ष्य
समभाषतमाधवः २ श्रीभगवान्॰ कुरूणांपांडवानांचशमःस्यादितिभारत अ
प्रणाशेनवीराणामेतद्याचितुमागतः ३ राजन्नान्यत्प्रवक्तव्यंतवनिःश्रेयसंवचः
विदितंह्येवतेसर्वंवेदितव्यमरिंदम ४ इदमद्यकुलंश्रेष्ठंसर्वराजसुपार्थिव श्रुत
वृत्तोपसंपन्नंसर्वैःसमुदितंगुणैः ५ कृपानुकंपाकारुण्यमानृशंस्यंचसातथार्ज
वंतथासत्यंकुरुष्वेतद्विशिष्यते तस्मिन्नेवंविधेराजन्कुलेमहतितिष्ठति त्वन्निमित्तंविशे

परीतंपरस्यदुःखोर्थायत्नःपरदुःखदर्शनेआह्लादःसुखेनाप्राप्यत्वंयत्नःपरस्यदुःखसंपादनंकौटिल्यादिकंचनवा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बाह्येषुद्यूतादिषुआभ्यंतरेषुजतुगृहदाहादिषु ८ ९ १० कुरुष्वेवभवत्स्वेवनतुपांडवेषु ११ इच्छसिकुरून्स्था।
पयितुमिच्छसितर्हिशमोनदुष्करः १२ १३ बलवत्अत्यंतंएषामेव अपिशब्दःएवार्थे १४ शासनकारि

त्वंहिधारयिताश्रेष्टःकुरूणांकुरुसत्तम मिथ्याप्रचरतांतातबाह्येष्वाभ्यंतरेषुच ८ ते
पुत्रास्तवकौरव्यदुर्योधनपुरोगमाः धर्मार्थौपृष्टतःकृत्वाप्रचरंतिनृशंसवत् ९ अ
शिष्टागतमर्यादालोभेनहृतचेतसः स्वेषुबंधुषुमुख्येषुतद्वेत्थपुरुषर्षभ १० सेय।
मापन्महाघोराकुरुष्वेवसमुत्थिता उपेक्ष्यमाणाकौरव्यपृथिवींघातयिष्यति ११ श
क्याचेयंशमयितुंत्वंचेदिच्छसिभारत नदुष्करोह्यत्रशमोमतोमेभरतर्षभ १२ त्वय्य
धीनःशमोराजन्मयिचैवविशांपते पुत्रान्स्थापयकौरव्यस्थापयिष्याम्यहंपरान्
१३ आज्ञातवहिराजेंद्रकार्यापुत्रैःसहान्वयैः हितंबलवदप्येषांतिष्टतांतवशासने
१४ तवचैवहितंराजन्पांडवानामथोहितं शमेप्रयतमानस्यतवशासनकारिणः
१५ स्वयंनिष्फलमालक्ष्यसंविधत्स्वविशांपते सहायभूताभरतास्तवैवस्युर्जनेश्वर १६

णःपुत्रान्शासितुमिच्छतस्तव १५ निष्फलंवैरंसंविधत्स्वशमंकुरु १६ ॥ ८

१७ १८ २२ पांडवैःसहसंधास्यतेसंधिंकरिष्यंति २३ २४ अखिलोनिष्कंटको २५ २६ २७ २८ २९

धर्मार्थयोस्तिष्ठराजन्पांडवैरभिरक्षितः नहिशक्यास्तथाभूतायत्नादपिनराधिप १७
नहित्वापांडवैर्जेतुंरक्ष्यमाणंमहात्मभिः इंद्रोपिदेवैःसहितःप्रसहेतकुतोनृपाः १८
यत्रभीष्मश्चद्रोणश्चकृपःकर्णोविविंशतिः अश्वत्थामाविकर्णश्चसोमदत्तोथबा
ह्लिकः १९ सैंधवश्चकलिंगाश्चकांबोजश्चसुदक्षिणः युधिष्ठिरोभीमसेनःसव्य
साचीयमौतथा २० सात्यकिश्चमहातेजायुयुत्सुश्चमहारथः कोनुतान्विपरीता
त्मायुध्येतभरतर्षभ २१ लोकस्येश्वरतांभूयःशत्रुभिश्चाप्यधृष्यतां प्राप्स्यसित्वम
मित्रघ्नसहितःकुरुपांडवैः २२ तस्यतेपृथिवीपालास्त्वत्समाःपृथिवीपते श्रेयां
सश्चैवराजानःसंधास्यंतेपरंतप २३ सत्वंपुत्रैश्चपौत्रैश्चपितृभिर्भ्रातृभिस्तथा सु
हृद्भिःसर्वतोगुप्तःसुखंशक्ष्यसिजीवितुं २४ एतानेवपुरोधायसत्कृत्यचयथापु
रा अखिलांभोक्ष्यसेसर्वांपृथिवींपृथिवीपते २५ एतैर्हिसहितःसर्वैःपांडवैःस्वैश्च
भारत अन्यान्विजेष्यसेशत्रूनेषस्वार्थस्तवार्थितः तैरेवोपार्जितांभूमिंभोक्ष्यसेच
परंतप यदिसंपत्स्यसेपुत्रैःसहामात्यैर्नराधिप २६ संयुगेवैमहाराजदृश्यतेसुम
हान्क्षयः क्षयेचोभयतोराजन्कंधर्ममनुपश्यसि २७ पांडवैर्निहतैःसंख्येपुत्रैर्वा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
२२९

१० ११ प्रकृतिंसत्वगुणां १२ १३ १४ हार्दिक्यशीतिः आसीत्पूर्वंबाल्ये १६ १७ १८ ॥

विमहाबलैः यद्विदेष्याः सर्वे राजेंद्र बुद्धि भरतर्षभ २९ शूराश्च हि कृतास्त्राश्च सर्वे
युद्धाभिकांक्षिणः पांडवास्तावकाश्चैव तान्त्वं महतो भयात् १० नपश्येम कुरून्सर्वा
न्पांडवांश्चैव संयुगे क्षीणान्भयतः शूरान्रथिनो रथिभिर्हतान् ११ समवेताः पृथि
व्यां हि राजानो राजसत्तम अमर्षवशमापन्ना नाशयेयुरिमाः प्रजाः १२ त्राहि राजन्निमं
लोकं न नश्येयुरिमाः प्रजाः त्वयि प्रकृतिमापन्ने शेषः स्यात्कुरुनंदन १३ शुक्ला वदा
न्या ह्रीमंत आर्याः पुण्याभिजातयः अन्योन्यसचिवा राजंस्तान्पाहि महतो भयात् १४
शिवेनेमे भूमिपालाः समागम्य परस्परं सह भुक्त्वा च पीत्वा च प्रतियांतु यथागृहं १५
सुवाससः स्रग्विणश्च सत्कृता भरतर्षभ अमर्षं च निराकृत्य वैराणि च परंतप १६
हार्दं यत्पांडवेष्वासीत्प्राप्तेऽस्मिन्नायुषः क्षये तदेव ते भवत्वद्य संधत्स्व भरतर्षभ १७
बाला विहीनाः पित्रा ते त्वयैव परिवर्धिताः तान्पालय यथान्यायं पुत्रांश्च भरतर्षभ
१८ भवतैव हि रक्ष्यास्ते व्यसनेषु विशेषतः मा ते धर्मस्तथैवार्थो नश्येत भरतर्षभ १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्यातास्यास्यति ४१ ४२ गुरोःगुरौ ४४ परिषदंधर्मज्ञसभां पुत्राःपांडवाः ४७ ४९ आरुजतिहिनस्तिग्रनक

आड्दुसांपांडवाराजन्नभिवाद्यप्रसाद्यच भवतःशासनाद्दुःखमनुभूतंमहानुगैः ४९ द्वा
दशेमानिवर्षाणिवनेनिर्मुषितानिनः त्रयोदशंतथाज्ञातैःसजनेपरिवत्सरं ५० स्था
तानःसमयेतस्मिन्नयितेतिकृतनिश्चयाः नाहास्मसमयंतातत्त्वनोब्राह्मणाविदुः ५१
तस्मिन्नःसमयेतिष्ठस्थितानांभरतर्षभ नित्यंसंक्लेशिताराजन्स्वराज्यांशंलभेमहि ५२
त्वंधर्ममर्थंसंजानन्सम्यङ्नस्त्रातुमर्हसि गुरुत्वंभवतिप्रेक्ष्यबहून्क्लेशांस्तितिक्ष्महे
५३ सभवान्मातृपितृवदस्मासुप्रतिपद्यतां गुरोर्गरीयसीवृत्तिर्याचवशिष्यस्यभारत ५४
वर्तामहेत्वयिचतांत्वंचवर्तस्वनस्तथा पित्रास्थापयितव्याहिवयमुत्पथमास्थिताः
५५ संस्थापयपथिष्वस्मांस्तिष्ठधर्मेस्ववर्त्मनि आहुश्चेमांपरिषदंपुत्रास्तेभरतर्षभ
५६ धर्मज्ञेषुसभासत्सुनेहयुक्तमसांप्रतं यत्रधर्मोह्यधर्मेणसत्यंयत्रानृतेनच ५७
हन्यतेप्रेक्षमाणानांहतास्तत्रसभासदः विद्धोधर्मोह्यधर्मेणसभांयत्रप्रपद्यते ५९
नचास्यशल्यंकृंतंतिविद्धास्तत्रसभासदः धर्मएतानारुजतियथानद्यनुकूलजा
न् ५० येधर्ममनुपश्यंतस्तूष्णींध्यायंतआसते तेसत्यमाहुर्धर्म्यंचन्याय्यंचभरतर्षभ ५१

स्तजानकूलमनुसत्यजातानवृत्तादीन् ५१ येपांडवास्तूष्णीमासतेकालंनिर्वाह्यभवद्योराज्यांशंलब्धुमि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५२ ५३ ५४ ५५ दाहितः जतुगृहे निरस्तो द्यूतेन राज्यात् दूरीकृतः ५६ ५८ परमोपधिः महच्छद्म ५९ ६०

प्राप्तं किमन्यद्दत्तं ते दानादन्यज्जनेश्वर ब्रुवंतु वा महीपालाः सभायां ये समासते ५२
धर्मार्थौ संप्रधार्यैव यदि सत्यं ब्रवीम्यहं प्रमुंचेमान्स्म पापात्त्वं प्रियान्पुरुषर्षभ ५३
प्रशाम्य भरतश्रेष्ठ मामनु वशमन्वगाः पितृंस्तेभ्यः प्रदापार्थं पांडवेभ्यो यथोचितं ५४
ततः सपुत्रः सिद्धार्थो भुंक्ष्व भोगान्परंतप अजातशत्रुं जानीषे स्थितं धर्मे सतां सदा ५५
सपुत्रे त्वयि वृत्तिं च वर्तते यां नराधिप दाहितश्च निरस्तश्च त्वामेवोपाश्रितः पुनः ५६
इंद्रप्रस्थं त्वयैवासौ सपुत्रेण विवासितः सतत्र निवसन्सर्वान्वशमानीय पार्थिवान् ५७
त्वन्मुखानकरोद्राजन्न च त्वामत्यवर्तत तस्यैवं वर्तमानस्य सौबलेन जिहीर्षता ५८
राष्ट्राणि धनधान्यं च प्रयुक्तः परमोपधिः सतामवस्थां संप्राप्य कृष्णां प्रेक्ष्य सभागतां
५९ नतत्र धर्मादमेयात्मानाकंपत युधिष्ठिरः अहं तु तव तेषां च श्रेय इच्छामि भारत
६० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९१ ९२ ९३ अध्यायः ९५ तस्मिन्निति १ २ ३ ४ ५ ६ ७ ८ ॥

धर्मादर्थात्सुखाच्चैवमाराजन्नीनशाः प्रजाः अनर्थमर्थं मत्वानो ऽप्यर्थं चानर्थमात्मनः
९१ लोभेतिप्रसृतान्पुत्रान्निगृह्णीष्व विशांपते स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुम
रिंदमाः यत्तेपथ्यतमं राजंस्तस्मिंस्तिष्ठपरंतप ९२ वैशंपायनउ० तद्वाक्यं पार्थिवाः स
र्वे हृदयैः समपूजयन् न तत्र कश्चिद्वक्तुं हि वाचं प्राक्रामदग्रतः ९३ इति भगवद्
याने ९५ वैशंपायनउ० तस्मिन्नभिहिते वाक्ये केशवेन महात्मना स्तिमिता हृष्टरोमा
ण आसन्सर्वे सभासदः १ कः स्विदुत्तरमेतेषां वक्तुं सोत्सहते पुमान् इति सर्वे मनोभि
स्ते चिंतयंति स्म पार्थिवाः २ तथा तेषु च सर्वेषु तूष्णींभूतेषु राजसु जामदग्न्य इदं वाक्य
मब्रवीत्कुरुसंसदि ३ इमां मे सोपमां वाचं शृणु सत्यमशंकितः तां श्रुत्वा श्रेय आद
त्स्व यदि साध्विति मन्यसे ४ राजा दंभोद्भवो नाम सार्वभौमः पुराभवत् अखिलां बुभु
जे सर्वां पृथिवीमिति नः श्रुतं ५ स स्म नित्यं निशापाये प्रातरुत्थाय वीर्यवान् ब्राह्म
णान्क्षत्रियांश्चैव पृच्छन्नास्ते महारथः ६ अस्ति कश्चिद्विशिष्टो वा मद्विधो वा भवेद्यु
धि शूद्रो वैश्यः क्षत्रियो वा ब्राह्मणो वापि शस्त्रभृत् ७ इति ब्रुवन्नन्वचरत्स राजा
पृथिवीमिमां दर्पेण महता मत्तः कंचिदन्यमचिंतयन् ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ०
टी०
२२६

९ १० ११ वेदप्रत्ययदर्शिनौवेदजःप्रत्ययोब्रह्मात्मैक्यापरोक्ष्यंतद्देवद्रष्टुंशीलंययोस्तौ १२ १४ तप्येतेताभ्यामितिशेषः

तेचवैश्याश्चक्षत्रियाब्राह्मणास्सर्वतोऽभयाः प्रत्यषेधंतराजानंश्लाघमानंपुनःपुनः
निषिध्यमानोप्यसकृत्पृच्छत्येवंसवैद्विजान् अतिमानश्रियायत्तंतमूचुर्ब्राह्मणास्त
दा १० तपस्विनोमहात्मानोवेदव्रतसमन्विताः उदीर्यमाणंराजानंक्रोधदीप्ताद्विजात
यः ११ तपस्विनोमहात्मानोवेदप्रत्ययदर्शिनो अनेकजयिनोसंख्येतौवैपुरुषसत्त
मौ तयोस्त्वंनसमोराजन्भवितासिकदाचन १२ एवमुक्तःसराजातुपुनःपप्रच्छता
न्द्विजान् क्वतौवीरौक्वजन्मानौकिंकर्माणौचकौचतौ १३ ब्राह्मणाऊचुः नरोनाराय
णश्चैवतापसावितिनःश्रुतं आयातौमानुषेलोकेताभ्यांयुध्यस्वपार्थिव १४ श्रूयेते
तौमहात्मानौनरनारायणावुभौ तपोघोरमनिर्देश्यंतप्येतेगंधमादने १५ सराजाम
हतींसेनांयोजयित्वाषडंगिनीं अमृष्यमाणःसंप्रायाद्यत्रतावपराजितौ १६ सगत्वावि
षमंघोरंपर्वतंगंधमादनं मार्गमाणोन्वगच्छत्तौतापसौवनमाश्रितौ १७ ॥

१५ १६ षडंगिनींरथनागाश्वपादातप्राकरोष्ट्रवतीं १६ १७ ॥ ७ २२६

१८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ॥

तौदृष्ट्वाक्षत्रियास्ताभ्यांकृष्णोथमनिसंततौ शीतवातातपैश्चैवकर्षितौपुरुषोत्तमौ
१८ अभिगम्योपसंगृह्यपर्यपृच्छदनामयं तमर्चित्वामूलफलैरासनेनोदकेनच १९
न्यमंत्रयेतांराजानेकिंकार्यंक्रियतामिति ततस्तामानुपूर्वीसपुनरेवान्वकीर्तयत्
२० बाहुभ्यांमेजिताभूमिर्निहताःसर्वशत्रवः भवद्भ्यांयुद्धमाकांक्षन्नुपयातोस्मि
पर्वतं आतिथ्यंदीयतामेतत्कांक्षितंमेचिरंप्रति २१ नरनारायणावूचतुः अपेत
क्रोधलोभोयमाश्रमोराजसत्तम नह्यस्मिन्नाश्रमेयुद्धंकुतःशस्त्रंकुतोनृजुः २२ अ
न्यत्रयुद्धमाकांक्षबहवःक्षत्रियाःक्षितौ २३ रामउ० उच्यमानस्तथापिस्मभूयएवाभ्य
भाषत पुनःपुनःक्षम्यमाणःसांत्व्यमानश्चभारत २४ दंभोद्भवोयुद्धमिच्छन्नाह्वय
त्येवतापसौ ततोनरस्त्वैषीकाणांमुष्टिमादायभारत २५ अब्रवीदेहियुध्यस्वयुद्ध
कामुकक्षत्रिय सर्वशस्त्राणिचादत्स्वयोजयस्वचवाहिनीं २६ अहंहितेविनेष्यामि
युद्धश्रद्धामितःपरं दंभोद्भवउ० यद्येतदस्त्रमस्मासुयुक्तंतापसमन्यसे एतेनापित्वया
योत्स्येयुद्धार्थीह्यहमागतः २८ रामउ० इत्युक्त्वाशरवर्षेणसर्वतःसमवाकिरत् दंभोद्भ
वस्तापसंतंजिघांसुःसहसैनिकः २९ तस्यतानस्यतोघोरानिषून्परतनुच्छिदः कद

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

र्षीकृत्यसमुत्निरिषीकाभिःसमार्पयत् ३० ततोस्मैप्रासृजद्घोरमैषीकमपराजितं
अस्त्रमप्रतिसंधेयंतदद्भुतमिवाभवत् ३१ तेषामक्षीणिकर्णांश्चनासिकाश्चैवमाय
या निर्मितवेधीसमुत्निरिषीकाभिःसमार्पयत् ३२ सतथाश्वेतमाकाशमिषीकाभिः
समावृतं पादयोर्न्यपतद्राजास्वस्तिमेस्त्वितिचाब्रवीत् ३३ तमब्रवीन्नरोराजन्शरण्य
श्शरणैषिणां ब्राह्मणेभवधर्मात्मामाचास्मैवंपुनःकृथाः ३४ नैतादृक्पुरुषोराजन्
क्षत्रधर्ममनुस्मरन् मनसानृपशार्दूलभवेत्परपुरंजयः ३५ माचदर्पसमाविष्टः
क्षेप्सीःकांश्चित्कथंचन अल्पीयांसंविशिष्टंवातत्तेराजन्समाहितं कृतप्रज्ञोवीतलो
भोनिरहंकारआत्मवान् ३६ दान्तःक्षान्तोमृदुःसौम्यःप्रजाःपालयपार्थिव मास्मभूयः
क्षिपेःकंचिदविदित्वाबलाबलं ३७ अनुज्ञातःस्वस्तिगच्छमैवंभूयःसमाचरेः कुशलं
ब्राह्मणान्पृच्छेरावयोर्वचनाद्भृशं ३८ ततोराजातयोःपादावभिवाद्यमहात्मनोःप्र
त्याजगामस्वपुरंधर्मंचैवाचरद्भृशं ३९ सुमहच्चापितत्कर्मयन्नरेणाकृतंपुरा ततोगु
णैःसुबहुभिःश्रेष्ठोनारायणोभवत् ४० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४० काकुदीकमित्यादि योऽष्टावस्त्रजातयः येनास्त्रेणाभिभूताः अर्जुनादीनां ककुद्ये वृषे शेरते तत्काकुदीकं प्रस्वाप-
नं नाम येन शुकवत् लिकाद्यायेन भ्रमये पिभयदर्शिनो हयरथ्यादियादेषु गाढं श्लिष्यन्ति तत् शुकं मोहनं ना-
म येन स्वर्गनगरप्रपश्यन्ति तत् आकं उन्मादनं नाम येनातिमात्रेणानुविद्धाः त्रासात् शकृन्मूत्रं स्रवन्ति तत् अ-

तस्माद्यावद्धनुःश्रेष्ठं गाण्डीवं संनयुज्यते तावत्त्वं मानमुत्सृज्य गच्छ राजन् धनंजयं ४१ का-
कुदीकं शुकं नाकमक्षिसंतर्जनं तथा संतानं नर्तकं घोरमास्यमोदकमष्टमं ४२ एतैर्विद्धाः
सर्व एव मरणं यान्ति मानवाः कामक्रोधौ लोभमोहौ मदमानौ तथैव च ४३ मात्सर्याहंकृ-
ती चैव क्रमादेतद्गुताहताः उन्मत्ताश्च विचेष्टन्ते नष्टसंज्ञा विचेतसः ४४ स्वपन्ति च प्लवन्ते
च छर्दयन्ति च मानवाः मूत्रयन्ते च सततं रुदन्ति च हसन्ति च ४५ निर्माता सर्वकर्मणामी-
श्वरः सर्वकर्मवित् यस्य नारायणो बंधुरर्जुनो ऽसहो युधि ४६ कस्तमुत्सहते जेतुं त्रिषु
लोकेषु भारत वीरं कपिध्वजं विष्णुं यस्य नास्ति समो युधि असंख्येया गुणाः पार्थे तद्भक्तिवि-
ष्टो जनार्दनः त्वमेव भूयो जानासि कुंतीपुत्रं धनंजयं ४८ नरनारायणौ यौ तौ तावेवार्जुनके-
शवौ विजानीहि महाराज प्रवरौ पुरुषोत्तमौ ४९ यद्येतदेवं जानासि न च मामभिशंकसे
आर्यां मतिं समास्थाय शाम्य भारत पाण्डवैः ५० अथ चेन्मन्यसे श्रेयो न मे भेदो भवेदिति प्र-
शाम्य भरतश्रेष्ठ मा च युद्धे मनः कृथाः ५१ भवतां च कुरुश्रेष्ठ कुलं बहुमतं भुवि तत्तथैवा-
स्तु भद्रं ते स्वार्थमेवोपचिन्तय ५२ ॥

क्षिसंतर्जनं त्रासनं नाम संतानं अविच्छेदेन शस्त्राणां वृष्टिकरं ऐंद्रादि दिव्यं नर्तनं नर्तनकरं पैशाचं घोरं क-
दनकरं राक्षसं आस्यमोदकं येनाभिहताः मृत्वे पाषाणं दत्वा मरणार्थमेव प्रतिष्ठन्ते तत् याम्यं नाम अत्रैव उ-
न्मत्ताश्चेति श्लोका कामक्रोधादायथायोग्यं संबंधनीयाः ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० ५२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दंभोद्भवाख्याने अध्यायः ९९ १ अव्ययः अवयवशून्यः २ प्रभवत्यस्मादिति प्रभुर्जगत उपादानकारणं ह्यस्यैव
मूर्त्तिः ३ निमित्तमरणा इति नाशवंत इत्यर्थः पाठांतरे निमित्तकारणानि चक्रचीवरकुलालादिस्थानीयानि ४

इत्युद्योगे भगवद्याने दंभोद्भवोपाख्याने ९९ वैशंपायन उ० जामदग्न्यवचः श्रुत्वा कण्वो
पि भगवानृषिः दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि १ कण्व उ० अक्षयश्चाव्ययश्चैव ब्र
ह्मा लोकपितामहः तथैव भगवंतौ तौ नरनारायणावृषी २ आदित्यानां हि सर्वेषां विष्णु
रेकः सनातनः अजय्यश्चाव्ययश्चैव शाश्वतः प्रभुरीश्वरः ३ निमित्तमरणास्त्वन्ये चंद्रसू
र्यौ मही जलं वायुरग्निस्तथाकाशं ग्रहास्तारागणास्तथा ४ ते च क्षयांते जगतो हित्वा
लोकत्रयं सदा क्षयं गच्छंति वै सर्वे सृज्यंते च पुनः पुनः ५ मुहूर्तमरणास्त्वन्ये मानुषा मृ
गपक्षिणः तिर्यग्योन्यास्तथैवान्ये जीवलोकचरास्तथा ६ भूयिष्ठेन च राजानः श्रियं भुक्त्वा
युषः क्षये तरुणाः प्रतिपद्यंते भोक्तुं सुकृतदुष्कृते ७ स भवान्धर्मपुत्रेण शमं कर्तुमि
हार्हति पांडवाः कुरवश्चैव पालयंतु वसुंधरां ८ बलवानहमित्येव न मंतव्यं सुयोधन
बलवंतो बलिभ्यो हि दृश्यंते पुरुषर्षभ ९ न बलं बलिनां मध्ये बलं भवति कौरव
बलवंतो हि ते सर्वे पांडवा देवविक्रमा १० ॥

५ ६ तरुणा इति भोगकाले पुष्ठेन मरणं प्राप्नुवंतीत्यर्थः ७ ९ बलं सैन्यं बलिनां शूरस्य बलवतो बलं साम
र्थ्यं न भवति १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मातलेरितिहासमितिसंबंधः ११ १२ १३ १४ उच्छ्रितानांमहतयाख्यातानां १५ १६ चक्षुषाज्ञानेनविचिनोमन्वेषि

अत्राप्युदाहरंतीममितिहासंपुरातनं मातलेर्दातुकामस्यकन्यांमृगयतोवरं ११ मतस्त्रि
लोकराजस्यमातलिर्नामसारथिः तस्यैकैवकुलेकन्यारूपतोलोकविश्रुता १२ गुण
केशीतिविख्यातानाम्नासादेवरूपिणी श्रियाचवपुषाचैवस्त्रियोन्याःसातिरिच्यते १३
तस्याःप्रदानसमयंमातलिःसहभार्यया ज्ञात्वाविममर्षेराजंस्तत्परःपरिचिंतयन् १४
धिक्खल्वलघुशीलानामुच्छ्रितानांयशस्विनां नराणांमृदुसत्वानांकुलेकन्याप्ररोहणं
१५ मातुःकुलंपितृकुलंयत्रचैवप्रदीयते कुलत्रयंसंशयितंकुरुतेकन्यकासतां १६
देवमानुषलोकौद्वौमानुसेनेवचक्षुषा अवगाह्यैवविचितौनचमेरोचतेवरः १७ कस्मः
नादेवान्नैवदितिजान्नगंधर्वान्नमानुषान् अरोचयद्वरकृतेतथैवबहुलानृषीन् १८
भार्ययानुसंमंत्र्यसहराज्ञोसुधर्मया मातलिर्नागलोकायचकारगमनेमतिं १९ नमे
देवमनुष्येषुगुणकेश्याःसमोवरः रूपतोदृश्यतेकश्चिन्नागेषुभविताध्रुवं २० इत्यामं
त्र्यसुधर्मांसत्कृत्वाचाभिप्रदक्षिणं कन्यांशिरस्युपाघ्रायप्रविवेशमहीतलं २१ इत्यु
द्योगेमातलिवरान्वेषणे ९७ ॥

तौ १७ १८ १९ २० २१ अध्यायः ९७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
२१९

८ यंतुः यंतारं मातलिंप्रति ९ १० गोपतेः वारिपतेः भूवागवारिषुगौर्मंत्रेतिविश्वः ११ ॥

कण्वउवाच मातलिस्तुव्रजन्मार्गेनारदेनमहर्षिणा वरुणंगच्छताद्रष्टुंसमागच्छद्य
दृच्छया १ नारदोथाब्रवीदेनंक्वभवान्गंतमुद्यतः स्वेनवासूतकार्येणशासनाद्वाश
तक्रतोः २ मातलिर्नारदेनैवंसंपृष्टःपथिगच्छता यथावत्सर्वमाचष्टस्वकार्यंवरुणं
प्रति ३ तमुवाचाथसमुनिर्गच्छावसहिताविति सलिलेशदिदृक्षार्थमहमप्युद्य
तोदिवः ४ अहंतेसर्वमाख्यास्येदर्शयन्वसुधातलं दृष्ट्वातत्रवरंकंचिद्रोचयिष्या
वमातले ५ अवगाह्यततोभूमिमुभौमातलिनारदौ ददृशातेमहात्मानौलोकपाल
मपांपतिं ६ तत्रदेवर्षिसदृशींपूजांसंप्रापनारदः महेंद्रसदृशींचैवमातलिःप्रत्य
पद्यत ७ तावुभौप्रीतमनसौकार्यवंतौनिवेद्यह वरुणेनाभ्यनुज्ञातौनागलोकं
विचेरतुः ८ नारदःसर्वभूतानामंतर्भूमिनिवासिनां जानंश्चकारव्याख्यानंयंतुः
सर्वमशेषतः ९ नारदउ॰ दृष्टस्तेवरुणःसूतपुत्रपौत्रसमावृतः पश्योदकपतेःस्था
नंसर्वतोभद्रमृद्धिमत् १० एषपुत्रोमहाप्राज्ञोवरुणस्येहगोपतेः एषवैशीलवृत्तेन
शौचेनचविशिष्यते ११ ॥

२१९

१२ द्वितीयांसोमपुत्रींतयाः अदित्याः पुत्रः सूर्यः श्रेष्ठः कृतः भर्त्ताकृतः १३ वारुण्यंवारुण्याः सुरायाः इदंवारुण्यंसुराविद्यते
येषांतेसुराः १४ १५ विवर्त्ततेशलिलान्यपिबन्ः पिबन्ः अहर्त्तिर्हसलमायांति १६ जात्यः जातीयाः पूर्वदेवाः दैत्याः सर्वंवेति
पाठेनिर्मिताः निश्चयेनशलिलाः १७ अग्निरितिहविष्मताग्निनाआविद्धंरुद्रंविलसच्चक्रजनमण्डलमयंनास्तीमर्थः
१८ गांडीवकाख्यः पशुविषयः तस्यविकारोगांडीमयः तस्यहिपश्नोवाष्टष्टवेशास्यवाधनुःकर्त्तशाकंयतःगां

एषोऽस्यपुत्रोऽभिमतः पुष्करः पुष्करेक्षणः रूपवान्दर्शनीयश्चसोमपुत्र्याश्चतः पतिः १२ ज्योत्स्ना
कालीतियामाहुर्द्वितीयांरूपतः श्रियं अदित्यास्त्वेवयः पुत्रोज्येष्ठः श्रेष्ठः कृतः स्मृतः १३ भवनं
पश्यवारुण्यंयदेतत्सर्वकांचनं यत्प्राप्यसुरतांप्राप्ताः सुराः सुरपतेः सखे १४ एतानिहृत
राज्यानांदैतेयानांस्मभूमितले दीप्यमानानिदृश्यन्तेसर्वप्रहरणान्युत १५ अत्रयाणिकिलैता
निविवर्त्ततेस्ममातले अनुभावप्रयुक्तानिसुरैरवजितानिह १६ अत्रराक्षसजात्यश्चदैत्यजा
त्यश्चमातले दिव्यप्रहरणाश्चासन्पूर्वदैवतनिर्मिताः १७ अग्निरेषमहार्चिष्मान्जागर्ति
वारुणेह्रदे वैष्णवचक्रमाविद्धंविधूमेनहविष्मता १८ एषगांडीमयश्चापोलोकसंहारसं
भृतः रक्ष्यतेदैवतैर्नित्यंयतस्तद्गाण्डिवंधनुः १९ एषकृत्येसमुत्पन्नेतत्तद्धारयतेबलं सहस्र
शतसंख्येनप्राणेनसततंध्रुवः २० अशास्यानपिशास्त्येषरक्षोबंधुषुराजसु सृष्टः प्रथमतो
भ्रष्टोब्रह्मणाब्रह्मवादिना २१ एतच्छत्रंनरेंद्राणांमहच्छत्रेणभासितं पुत्रःसलिलराजस्यधार

डीमयत्वादेवतत्गाडीवंनामधनुरभूत् गांडिशब्दाद्धिकारार्थोवप्रत्ययः कल्प्यतइतिभावः गांडीवग्रंथिरलम
यइत्यन्ये १९ एषचापः कृत्येप्रभेद्यभेदनादौतत्तन्तावतावत्प्राणेनबलेनसर्वदालक्ष्यचापबलस्यबलोण्ययथा
पः कार्यकालेऽधिकबलोऽपिभवतीत्यनेनबलेऽत्यर्थः २० रक्षोबंधुषुरक्षस्तुल्येषु २१ एतच्छत्रंधनुःचक्र
णाचक्रादपि एतच्छास्त्रमिति पाठेनीति शास्त्रंपुच्छेणकायेनच्छत्रेणाइतिवापाठः २२ ॥ २२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ टी॰ १२॰ २३ मूर्छितंअभिभूतंआवृतमितियावत्येनहेतुनाजनोःस्पर्दर्शनंनार्हतिनप्राप्नोति २४ अध्यायः ९८ एतत्अद्भिः
समंप्राप्ताःजलवेगेनानीताः २ आपारेणयत्नेनध्वतः मर्यादायांस्थापितःअन्यथासद्यःकृत्स्नसमुद्रंलोकांश्च
दहेत् आत्मानंनिवद्धंदेवैरितिशेषःसमवुध्यतअग्निरित्यर्थः ध्वतात्मेतिसंधिरार्षः ३ निहितंस्थापितंअतःसो
मस्येति कंडकाकारंभूगोलंप्रदक्षिणीकुर्वतःसूर्यस्यसोमस्यवाकेनचिद्भूगोलप्रदेशेनआवरणात्कदाचिद्दर्शनं
भवति सैवतेषांरात्रिःयत्रगोलस्यशिरस्तिअधस्तात्तिष्ठतितेसर्वदैवसूर्यादीन्पश्यंति तत्रजलमयंचंद्रमंडू
लंसूर्यरश्मिभिस्तेजसैःप्रकाश्यतेतयोश्चयथायथाविप्रकर्षःतथातथाधिकंचंद्रोवभासते यथायथासंनिकर्षः

एतत्सलिलराजस्यछत्रंछत्रंगृहेस्थितं सर्वतःसलिलंशीतंजीमूतइववर्षति २३ एतच्छत्रा
त्परिभ्रष्टंसलिलंसोमनिर्मलं तमसामूर्छितंभातियेननार्हतिदर्शनं २४ बहून्यद्भुतरू
पाणिदृष्ट्वानीहमातले तवकार्योपरोधस्तुतस्मात्कृत्वाव्रमाचिरं २५ इस्तयोगमातलि
वरान्वेषणे ९८ नारदउ॰ एतत्नागलोकस्यनाभिस्थानेस्थितंपुरं पातालमितिविख्या
तंदैत्यदानवसेवितं १ इदमद्भिःसमंप्राप्तायेकेचिद्भुवजंगमाः प्रविशंतोमहानादंनदंति
भयपीडिताः २ अत्रासुरोग्निःसततंदीप्यतेवारिभोजनः आपारेणध्वतात्मानंनिबद्धंस
मवुध्यत ३ अत्रामृतंसुरैःपीतानिहितंनिहतारिभिः अतःसोमस्यहानिश्चवृद्धिश्चैव
प्रदृश्यते ४ ॥ तथातथाधिकंसूर्यपुरोवर्तिभिरप्यादिभिर्देवताभिस्तिरोधीयतेऽस्मदृष्टचा एतदेवा
भिलत्यप्रथमांपिवतेवह्निर्द्वितीयांपिवतेरविरित्यादिशास्त्रेअमृतंपानंचेहसंनिधानादाप्यायनमात्रंपाता।
लताभिस्थानांतुमेरुशिखरस्थानामिवसर्वदासंपूर्णएवचंद्रोवभासते तद्दृश्यप्रदेशेऽस्याघावरणाभावात् २२०
अतःस्थानात् चंद्रस्यह्रासवृद्धीप्रदृश्येतेइति विकल्पलक्षणयानदृश्येतेइत्यर्थः नदृश्येतेइत्येवलेखकप्रमादा
द्दृष्टौवा ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आदित्योदितेः पुत्रो विष्णुर्हयग्रीवरूपी सुवर्णाख्यं जगत वेदरूपीनामात्मकः प्रपंचः नाम वाङ्ग्वेदः ६ नादिक्ष
तेः तेवाभिराश्रयन्नुत्तिष्ठति वेदाध्यायिनोध्वनिं उपष्टंहयितमाविर्भवतीत्यर्थः ५ जलमूर्तयश्चश्रायाः
पतंति चेद्रकोतवज्जले स्रवंति अतोयं पतज्जलः इति वक्ष्ये पाताल इत्यर्थः ६ ७ ८ अद्रेश्चांतरंगत्वा

अथादित्यो हयशिराः काले पर्वणि पर्वणि उत्तिष्ठति सुवर्णाख्यं वाभिराप्लावयेञ्जगत् ५
यस्माद्द्रेः समस्तास्ताः पतंति जलमूर्तयः तस्मात्पातालमित्येवख्यायते पुरमुत्तमं ६
ऐरावतोस्मात्सलिलं गृहीत्वा जगतोहितः मेघेष्वामुंचते शीतं यन्महेंद्रः प्रवर्षति ७
अत्र नानाविधाकाराः तिमयोनेकरूपिणः अम्बुसोमप्रभा पीत्वा वसंति जलचारिणः
अत्र सूर्यांशुभिर्भिन्नाः पातालतलमाश्रिताः मृता दिवसतः सन्तु पुनर्जीवंति वै निशि ८
उदयन्नित्यमत्रात्र चंद्रमा रश्मिवाड्भिः अमृतं स्पृश्य संस्पर्शात् संजीवयति देहिनः ९
अत्र ते धर्मनिरता बद्धाः कालेन पीडिताः दैतेया निवसंति स्म वासवेन हृतश्रियः ११ अ
त्र भूतपतिर्नाम सर्वभूतमहेश्वरः भूतये सर्वभूतानाम चरत्तप उत्तमं १२ अत्र गोव्रति
नो विप्राः स्वाध्यायाम्नायकर्शिताः त्यक्तप्राणा जितस्वर्गा निवसंति महर्षयः १३ यत्र तत्र
प्रायो नित्यं येन केन विदाशितः येन केन विदाछन्नः स गोव्रत इहोच्यते १४ ऐरावणो ना
गराजो वामनः कुमुदोंजनः प्रसूताः सुप्रतीकस्य वंशे वारणसत्तमाः १५ ॥

अत्र सूर्यांशुभिरिति दिवसेः सदीय रात्रौ निशि असदीय दिवसे ८ ९ स्वाध्यायाम्नायो वेदपाठः त्यक्तप्रा
णाः रेचकाख्य प्राणायामपराः १२ गोव्रतमाचष्टे यत्रेति १४ १५ १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
२२१

१६ आप्रजानांनिसर्गात्प्रजोत्पत्तिमारभ्य १७ जातिंजन्मनिसर्गंस्वभावंततः पूर्वंउत्पन्नस्यकस्यचिदभावात् १८

पश्यपश्यत्रतेकश्चिद्रोचतेगुणतोवरः वरयिष्यामतंगत्वायत्नमास्थायमातले १६
श्रेष्ठमेतज्जलेन्यस्तंदीप्यमानमिवश्रिया आप्रजानांनिसर्गाद्धिनोद्विर्यातिनसर्पति १७
नास्यजातिनिसर्गोवाकथ्यमानंशृणोमिवै पितरंमातरंचापिनास्यजानातिकश्चन
१८ अतःकिलमहानग्निरंतकालेसमुत्थितः भस्मतेमातलेसर्वंत्रैलोक्यंसचरा
चरं १९ मातलिस्त्वब्रवीच्छ्रुत्वानारदस्याथभाषितं नमेत्ररोचतेकश्चिदन्यतोव्रज
माचिरं २० [illegible]घोषोभगवद्यानेमातलिवृत्रन्वेषणे २१ नारदउ॰ हिरण्यपुरमित्ये
तत्ख्यातंपुरवरंमहत् दैत्यानांदानवानांचमायाशतविचारिणां १ अनल्पेन
प्रयत्नेननिर्मितंविश्वकर्मणा मयेनमनसासृष्टंपातालतलमाश्रितं २ अत्रमा
यासहस्राणिविकुर्वाणामहौजसः दानवानिवसंतिस्मशूरादत्तवराःपुरा ३ नै
तेशक्रेणनान्येनयमेनवरुणेनवा शक्यंतेवशमानेतुंतथैवधनदेनच ४
असुराःकालकंजाश्चतथाविष्णुपदोद्भवाः नैर्ऋतायातुधानाश्चब्रह्मपादोद्भवा
श्चये ५ ॥

१९ २० अध्यायः ९९ १ २ ३ ४ ५ ॥ २२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६ ७ ८ ९ १० शैलानि शिलामयानि ११ आक्रीडान् क्रीडास्थानानि १४ १५ १६ १७ १८ ॥

दंष्ट्रिणो भीमवेगाश्च वातवेगपराक्रमाः मायावीर्योपसंपन्ना निवसंत्यत्र मातले ६
निवातकवचा नाम दानवा युद्धदुर्मदाः जानासि च यथा शक्रो नैनान् शक्नोति बाधितुं
७ बहुशो मातले त्वं च तव पुत्रश्च गोमुखः निर्भग्नो देवराजश्च सहपुत्रः शचीपतिः ८
पश्य वेश्मानि रौक्माणि मातले राजतानि च कर्मणा विधियुक्तेन युक्तान्युपगतानि
च ९ वैदूर्यमणिचित्राणि प्रवालरुचिराणि च अर्कस्फटिकशुभ्राणि वज्रसारोज्ज्व
लानि च १० पार्थिवानीव चाभांति पद्मरागमयानि च शैलानीव च दृश्यंते दारवानी
व चाप्युत ११ सूर्यरूपाणि वाभांति दीप्ताग्निसदृशानि च मणिजालविचित्राणि प्रां
शूनि निबिडानि च १२ नैतानि शक्यं निर्देष्टुं रूपतो द्रव्यतस्तथा गुणतश्चैव सिद्धानि
प्रमाणगुणवंति च १३ आक्रीडान् पश्य दैत्यानां तथैव शयनान्युत रत्नवंति महा
र्हाणि भुवनान्यासनानि च १४ जलदाभांस्तथा शैलांस्तोयप्रस्रवणानि च कामपु
ष्पफलांश्चापि पादपान् कामचारिणः १५ मातले कश्चिदत्रापि रुचिरस्ते वरो भवेत् अ
थवान्यां दिशं भूमेर्गच्छाव यदि मन्यसे १६ मातलिस्त्वब्रवीदेनं भाषमाणं तथाविधं देवर्षे
नैव मे कार्यं विप्रियं त्रिदिवौकसां नित्यानुषक्तवैरा हि भ्रातरो देवदानवाः परपक्षेण संबंधो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मानंअहिंसापरंजानामि तथाहिंसात्मकमनंहिंसात्मनांहिंसाप्रधानानांदैत्यानांकमनंअपेत्तणी
यंहिंसोदर्कंतयाजानामिअन्येतुदिसात्मकमलंतथेतिपाठमकल्पदिसात्मकंदानेच्छाप्रचुरअले

अन्यत्रसाधुगच्छावद्रष्टुंनार्हामित्युक्तवान् जानामितवचात्मानंहिंसात्मकमनंत
या १९ इत्युद्योगपर्वणिभगवद्यानेमातलिवरान्वेषणे १० नारदउ॰ अयंलोकःसु
पर्णानांपक्षिणांपन्नगाशिनां विक्रमेगमनेभारेनेषामस्तिपरिश्रमः १ वैनतेयसु
तैःसूतषड्भिस्ततमिदंकुले सुमुखेनसुनाम्नाचसुनेत्रेणसुवर्चसा २ सुरुचापक्षि
राजेनसुबलेनचमातले वर्धितानिप्रसूत्यावैविनताकुलकर्तृभिः ३ पक्षिराजा
भिजात्यानांसहस्राणिशतानिच कश्यपस्यततोवंशेजातैर्भूतिविवर्धनैः ४ सर्वे
ह्येतेश्रियायुक्ताःसर्वेश्रीवत्सलक्षणाः सर्वेश्रियमभीप्संतोधारयंतिबलान्युत ५
कर्मणाक्षत्रियाश्चैतेनिर्घृणाभोगिभोजिनः ज्ञातिसंक्षयकर्तृत्वाद्ब्राह्मण्यंनलभं
तिवै ६ नामानिचैषांवक्ष्यामियथाप्राधान्यतःशृणु मातलेश्लाघ्यमेतद्धिकु
लंविष्णुपरिग्रहं ७ ॥

अन्यर्थंइतिव्याचक्षते १९ अध्यायः १० अयं १ २ प्रसूत्याप्रकृष्टगत्याजवेननह्रदिमंतीत्यर्थः ३ ५ निर्घृणाःनिर्द
पा॰ ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८६१०९६ अध्यायः ९१ इदंरसातलमिति २ वदनात्उत्तोऽदतिष्ठत तेनमुखजेनब्राह्मणेनतस्याएक

दैवतंविस्नोरेतेषांविस्नुरेवपरायणं हृदिचैषांसदाविस्नुर्विस्नुरेवसदागतिः ८ सु
वर्णचूडोनागाशीदारुणश्चण्डतुण्डकः अनिलश्चानलश्चैवविशालाक्षोथकुंडली ९
पक्षजिद्वज्रविष्कंभीवैनतेयोथवामनः वातवेगोदिशाचक्षुर्निमिषोनिमिषस्तथा
१० त्रिवारस्सप्तवारवाल्मीकिर्दीपकस्तथा दैत्यद्वीपःसरिद्वीपःसारसःपद्मकेत
नः ११ सुमुखश्चित्रकेतुश्चचित्रवर्हस्तथानघः मेघकृत्कुमुदोदक्षःसर्पान्तःसोम
भोजनः १२ गुरुभारःकपोतश्चसूर्यनेत्रश्चिरांतकः विस्नुधर्माकुमारश्चपरिवर्हो
हरिस्तथा १३ सुस्वरोमधुपर्कश्चहेमवर्णस्तथैवच मालयोमातरिश्वाचनिशाकर
दिवाकरौ १४ एतेप्रदेशमात्रेणमयोक्तागरुडात्मजाः प्राधान्यतस्तेयशसाकीर्ति
ताःप्राणिनश्चये १५ यद्यत्रनरुचिःकाचिदेहिगच्छावमातले तंनयिष्यामिदेशंत्वां
वरंयत्रोपलप्स्यसे १६ इत्युद्योगेभगवद्यानेमातलिवरान्वेषणे ९१ नारदउ० इदंरसा
तलंनामसप्तमंपृथिवीतलम् १ यत्रास्तेसुरभिर्माताःगवाममृतसंभवा क्षरन्तीसत
ततीरंपृथिवीसारसंभवं षण्णांरसानांसारेणरसमेकमनुत्तमं २ अमृतेनाभितृप्तस्य
सारमुद्गिरतःपुरा पितामहस्यवदनादुदतिष्ठदनिंदिता ३॥

कुलत्वं यथोक्तं ब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतमिति २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ ४ फेनेन पुष्पितस्यैव स्वेतस्यास्य पर्यंतं तीरप्रदेशं फेनेनानुवेष्टितं पिबंतः सादरमवलोकयंत एव वसंति तेनैव फे

टी॰ नपाः समुच्यंते ५ एतेभ्योन्ये फेनाहाराश्चेत्यर्थः ६ ९ इलविलस्येमां ऐलविलसंज्ञिता १० असुरसंहितैः अ

२२३ यस्याः क्षीरस्य धारा या निपतंत्या महीतले ह्रदः कृतः क्षीरनिधिः पवित्रं परमुच्यते ४ पुष्पितस्यैव फेनेन पर्यंतमनुवेष्टितं पिबंतो निवसंत्यत्र फेनपा मुनिसत्तमाः ५ फेनपा नाम ते ख्याताः फेनाहाराश्च मातले उग्रे तपसि वर्तंते येषां बिभ्यति देवताः ६ अस्याश्चतस्रो धेन्वोन्या दिक्षु सर्वासु मातले निवसंति दिक्पाल्यो धारयंत्यो दिशः स्मृताः ७ पूर्वां दिशं धारयते सुरूपा नाम सौरभी दक्षिणां हंसिका नाम धारयत्यपरां दिशं ८ पश्चिमा वारुणी दिक् च धार्यते वै सुभद्रया महानुभावया नित्यं मातले विश्वरूपया ९ सर्वकामदुघा नाम धेनुर्धारयते दिशं उत्तरां मातले धर्म्यां तथैलविलसंज्ञिता १० आसां तु पयसा मिश्रं पयो निर्मथ्य सागरे मंथानं मंदरं कृत्वा देवैरसुरसंहितैः ११ उद्धृता वारुणी लक्ष्मीरमृतं चापि मातले उच्चैःश्रवाश्चाश्वराजो मणिरत्नं च कौस्तुभं १२ सुधाहारेषु च सुधां स्वधाभोजिषु च स्वधां अमृतं चामृताशेषु सुरभीक्षरते पयः १३ अत्र गाथा पुरा गीता रसातलनिवासिभिः पौराणी श्रूयते लोके गीयते या मनीषिभिः १४ न नागलोके न स्वर्गे न विमाने त्रिविष्टपे परिवासः सुखस्तादृग् रसातलतले यथा १५ इति श्रीभगवद्याने मातलिवरान्वेषणे अध्यायः १०२ ॥

सुरसहितैः ११ १२ सुधेति सर्पपितृदेवानां तत्तद्योग्याहाररूपं पयः क्षरतीत्यर्थः सुधा सर्पस्य भोजनं स्वधा भोजिनः पितरः अमृताशेषु देवेषु १३ १४ परिवासो निवासः सुखः सुखकरः २२३

इयं १ २ ३ ४ कमंडलुकलक्षणाः पानपात्रसहस्रावृताः ५ ६ ७ ८ ९ १० ११ १२ १३॥

नारद उ० इयं भोगवती नाम पुरी वासुकिपालिता याहशी देवराजस्य पुरी वर्यामरा
वती १ एष शेषः स्थितो नागो येनेयं धार्यते सदा तपसा लोकमुख्येन प्रभावसहि
ता मही २ श्वेताचलनिभाकारो दिव्याभरणभूषितः सहस्रं धारयन्मूर्ध्नां ज्वाला
जिह्वो महाबलः ३ इह नानाविधाकारा नानाविधविभूषणाः सुरसायाः सुता ना
गा निवसंति गतव्यथाः ४ मणिस्वस्तिकचक्रांकाः कमंडलुकलक्षणाः सहस्र
संख्या बलिनः सर्वे रौद्राः स्वभावतः ५ सहस्रशिरसः केचित्केचित्पंचशताननाः
शतशीर्षास्तथा केचित्केचित्त्रिशिरसोपि च ६ द्विपंचशिरसः केचित्केचित्सप्त
मुखास्तथा महाभोगा महाकायाः पर्वताभोगभोगिनः ७ बहूनीह सहस्राणि प्रय
तान्यर्बुदानि च नागानामेव कश्यानां यथा श्रेष्ठतमेष्ट श्रृणु ८ वासुकिस्तक्षकश्चैव
कर्कोटकधनंजयौ कालियो नहुषश्चैव कंबलाश्वतरावुभौ ९ वाह्यकुंडो मणि
र्नागस्तथैवापूरणः खगः वामनश्चैलपत्रश्च कुकुरः कुकुणस्तथा १० आर्यको
नंदकश्चैव तथा कलशपोतकौ कैलासकः पिंजरको नागश्चैरावतस्तथा ११ सु
मनोमुखो दधिमुखः शंखो नंदोपनंदकौ आप्तः कोटरकश्चैव शिखी निष्ठुरिकस्त
था १२ तित्तिरिर्हस्तिभद्रश्च कुमुदो माल्यपिंडकः द्वौ पद्मौ पुंडरीकश्च पुष्पो मुद्गरपर्णकः १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कुवीरःपिठरकःसंवृतोवृतएवच पिंजरोबिल्वपत्रश्चमूषिकादःशिरीषकः १४ दिलीपः
शंखशीर्षश्चज्योतिष्कोथापराजितः कौरव्योधृतराष्ट्रश्चकुहरःकृशकस्तथा १५
विरजाधारणश्चैवसुबाहुर्मुखरोजयः बधिरांधौविशुंडिश्चविरसःसुरसस्तथा १६
एतेचान्येचबहवःकश्यपस्यात्मजाःस्मृताः मातलेपश्य यद्यत्रकश्चित्तेरोचतेवरः
१७ कण्व उ॰ मातलिस्त्वेकमव्यग्रःसततंसंनिरीक्ष्यवै पप्रच्छनारदंतत्रप्रीतिमानिव
चाभवत् १८ स्थितोयएषपुरतःकौरव्यस्यार्यकस्यतु द्युतिमान्दर्शनीयश्चकस्यै
षकुलनंदनः १९ कःपिताजननीचास्यकतमस्यैषभोगिनः वंशस्यकस्यैषमहान्केतु
भूतइवस्थितः २० प्रणिधानेनधैर्येणरूपेणवयसाचमे मनःप्रविष्टोदेवर्षेगुणाके
श्याःपतिर्वरः २१ कण्वउ॰ मातलिंप्रीतमनसंदृष्ट्वासुमुखदर्शनात् निवेदयामास
तदामाहात्म्यंजन्मकर्मच २२ ऐरावतकुलेजातःसुमुखोनामनागराट् आर्यकस्य
मतःपौत्रोदौहित्रोवामनस्यच एतस्यहिपितानागश्चिकुरोनाममातले नचिराद्वैन
तेयेनपंचत्वमुपपादितः २४ ततोब्रवीत्प्रीतमनामातलिर्नारदंवचः एषमेरुचिरस्ता
तजामाताभुजगोत्तमः २५ क्रियतामत्रयत्नोवैप्रीतिमानस्म्यनेनवै अस्मैनागायवैदा
तुंप्रियांदुहितरंमुने २६ इत्युद्योगपर्वणिमातलिवरान्वेषणेऽध्यायः १०३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सुतोयं १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ ॥

नारद उ॰ सुतोयंमातलिर्नामशाक्रस्यदयितः सुहृत् शुचिःशीलगुणोपेतस्तेजस्वीवी।
र्यवान्बली १ शक्रस्यायंसखाचैवमन्त्रीसारथिरेवच अल्पान्तरप्रभावश्चवासवेनर
णेरणे २ अयंहरिसहस्रेणयुक्तंजैत्रंरथोत्तमं देवासुरेषुयुद्धेषुमनसैवनियच्छति ३
अनेनविजितानश्वैर्दोर्भ्यांजयतिवासवः अनेनबलभित्पूर्वंप्रहृतेप्रहरत्युत ४ अस्य
कन्यावरारोहारूपेणासदृशीभुवि सत्यशीलगुणोपेतागुणकेशीतिविश्रुता ५ त
स्यास्ययत्नाच्चरतस्त्रैलोक्यममरद्युतेः सुमुखोभवतःपौत्रोरोचतेदुहितुःपतिः ६ यदि
तेरोचतेसम्यग्भुजगोत्तममाचिरं क्रियतामार्यकक्षिप्रंबुद्धिःकन्यापरिग्रहे ७ यथावि
ष्णुकुलेलक्ष्मीर्यथास्वाहाविभावसोः कुलेतवतथैवास्तुगुणकेशीसुमध्यमा ८ पौत्र।
स्यार्थेभवांस्तस्माद्गुणकेशींप्रतीच्छतु सदृशींप्रतिरूपस्यवासवस्यशचीमिव ९ पितृ
हीनमपिह्येनंगुणतोवरयामहे बहुमानाच्चभवतस्तथैवैरावतस्यच १० सुमुखस्यगुणै
श्चैवशीलशौचदमादिभिः अभिगम्यस्वयंकन्यामयंदातुंसमुद्यतः ११ मातलेस्तस्यसं
मानंकर्तुमर्होभवानपि कण्व उ॰ सतुदीनःप्रहृष्टश्चप्राहनारदमार्यकः व्रियमाणेतथापौ
त्रेपुत्रेचनिधनंगते १२ कथमिच्छामिदेवर्षेगुणकेशींस्नुषांप्रति १३ आर्यक उ॰ नमेनैतद्बहु
मतंमहर्षेवचनंतव सखाशक्रस्यसंयुक्तःकस्यायंनेप्सितोभवेत् १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१५ १६ १७ १८ १९ २० २१ २२ २३ २४ ॥

कारणस्य भवतो दौर्बल्याच्चिंतयामि महामुने अस्य देहकरस्तात मम पुत्रो महाद्युते १५ भक्षि
तो वैनतेयेन दुःखार्त्तास्तेन वै वयं पुनरेव च तेनोक्तं वैनतेयेन गच्छता १६ मासेनान्येन तम
पि वै भक्षयिष्य इति प्रभो ध्रुवं तथा तद्भविता जानीमस्तस्य निश्चयं १७ तेन हर्षः प्रणष्टो
मे सुपर्णवचनेन वै कण्वउः मातलिस्त्वब्रवीदेनं बुद्धिरत्र कृता मया जामातृभावेन वृतः
सुमुखस्तव पुत्रजः १८ सोयं मया च सहितो नारदेन च पन्नगः त्रिलोकेशं सुरपतिं गत्वा
पश्यतु वासवं १९ शेषेणैवास्य कार्येण प्रज्ञास्याम्यहमायुषः सुपर्णस्य विघातं च प्रयति
ष्यामि सत्तम २० सुमुखश्च मया सार्द्धं देवेशमभिगच्छतु कार्यसंसाधनार्थाय स्वस्ति तेस्तु
भुजंगम २१ ततस्ते सुमुखं गृह्य सर्व एव महौजसः ददृशुः शक्रमासीनं देवराजं महा
द्युतिं २२ संगत्या तत्र भगवान्विष्णुरासीच्चतुर्भुजः ततस्तत्सर्वमाचख्यौ नारदो मातलिं
प्रति वैशंपायनउः ततः पुरंदरं विष्णुरुवाच भुवनेश्वरं अमृतं दीयतामस्मै क्रि
यताममरैः समः २४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मातलिर्नारदश्चैव सुमुखश्चैव वासव लभतां भवतः कामात्काममेतं यथेप्सितं २५ पुरंदरो
थ संचिन्त्य वैनतेयपराक्रमं विष्णुमेवाब्रवीद्देवं भवानेव ददात्विति २६ विष्णुरु० ईशस्त्वम
सि लोकानां चराणामचराश्च ये त्वया दत्तमदत्तं कः कर्तुमुत्सहते विभो २७ प्रादाच्छक्रस्त
तस्तस्मै पन्नगायायुरुत्तमं न त्वेनममृतप्राशं चकार बलवृत्रहा २८ लब्ध्वा वरं तु सुमुखः
सुमुखः संबभूव ह कृतदारो यथाकामं जगाम च गृहान्प्रति २९ नारदस्त्वार्यकश्चैव कृ
तकार्यौ मुदा युतौ अभिजग्मतुरभ्यर्च्य देवराजं महाद्युति ३० इत्युद्योगे मातलिवरान्वेष
णे १०४ कण्व उवाच गरुडस्तत्तु शुश्राव यथावृत्तं महाबलः आयुःप्रदानं शक्रेण कृतं
नागस्य भारत १ पक्षवातेन महता रुद्ध्वा त्रिभुवनं खगः सुपर्णः परमः क्रुद्धो वासवं स
मुपाद्रवत् २ गरुड उवाच भगवन्किमवज्ञानात्क्षुधि प्रतिहता मम कामकारवरं दत्त्वा पु
नश्चलितवानसि ३ निसर्गात्सर्वभूतानां सर्वभूतेश्वरेण वै आहारो विहितो धात्रा किम
र्थं वार्यते त्वया ४ वृतश्चैष महानागः स्थापितः समयश्च मे अनेन च मया देव भर्तव्यः प्र
सवो महान् ५ एतस्मिंस्त्वन्यथाभूते नान्यं हिंसितुमुत्सहे क्रीडसे कामकारेण देवराज यथे
च्छकं ६ सोहं प्राणान्विमोक्ष्यामि तथा परिजनो मम ये च भृत्या मम गृहे प्रीतिमान्भव वासव ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ ९ १० ११ १२ १३ १४ १५ १६ १७ ॥

एतच्चैवाहमर्हामिभूयश्चबलवृत्रहन् त्रैलोक्यस्येश्वरोयोहंपराभूतस्त्वमागतः ८
त्वयितिष्ठतिदेवेशानविष्णुःकारणंमम त्रैलोक्यराजराज्यंहित्वयिवासवशाश्वतं ९
ममापिदक्षस्यसुताजननीकश्यपःपिता अहमप्युत्सहेलोकान्समंताद्वोढुमंजसा
१० असह्यंसर्वभूतानांममापिविपुलंबलं मयापिसुमहत्कर्मकृतंदैतेयविग्रहे ११
श्रुतश्रीःश्रुतसेनश्चविवस्वान्रोचनामुखः प्रसुतःकालकाक्षश्चमयापिदितिजा
हताः १२ यत्तुध्वजस्थानगतोयत्नात्परिचराम्यहं वहामिचैवानुजंतेतेनमामवमन्य
से १३ कोन्योभारसहोह्यस्तिकोन्योस्तिबलवत्तरः मयायोहंविशिष्टःसन्वहामीमंस
बांधवं १४ अवज्ञायतुयन्मेहंभोजनाद्व्यवरोपितः तेनमेगौरवंनष्टंत्वत्तश्चास्माच्चवा
सव १५ आदित्यायदिमेजाताबलविक्रमशालिनः त्वमेषांकिलसर्वेषांबलेनबल
वत्तरः १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९

सोहंपक्षैकदेशेनवहामित्वांगतक्लमः विमृशत्वंशनैस्तातकोन्वत्रबलवानिति १७
काश्यपः सतस्यवचनंश्रुत्वाखगस्योदर्कदारुणं अक्षोभ्यंक्षोभयंस्तार्क्ष्यमुवाचरथच
क्रभृत् १८ गरुत्मन्मन्यसेत्मानंबलवंतंसुदुर्लभं अलमस्मत्समक्षंतेस्तोतुमात्मान
मंडज १९ त्रैलोक्यमपिमेकृत्स्नमशक्तंदेहधारणे अहमेवात्मनात्मानंवहामित्वांच
धारये २० इमंतावन्ममैकंत्वंबाहुंसव्येतरंवह यद्येनंधारयस्येकंसफलंतेविकत्थितं
२१ ततःसभगवांस्तस्यस्कंधेबाहुंसमासजत् निपपातसभारार्तोविह्वलोनष्टचेतनः
२२ यावान्हिभारःकृत्स्नायाःपृथिव्याःपर्वतैःसह एकस्यादेहशाखायास्तावद्भारम
मन्यत २३ नत्वेनंपीडयामासबलेनबलवत्तरः ततोहिजीवितंतस्यनव्यनीनशद
च्युतः २४ व्यात्तास्यःस्रस्तकायश्चविचेताःविह्वलःखगः मुमोचपत्राणितदागुरुभा
रप्रपीडितः २५ सविष्णुंशिरसापक्षीप्रणम्यविनतात्मजः विचेताविह्वलोदीनःकिं
चिद्वचनमब्रवीत् २६ भगवन्लोकसारस्यसदृशेनवपुष्मता भुजेनस्वैरमुक्तेननि
ष्पिष्टोस्मिमहाबल २७ क्षंतुमर्हसिमेदेवविह्वलस्याल्पचेतसः बलदाहविदग्धस्यपक्षि
णोध्वजवासिनः २८ नहिज्ञातंबलंदेवमयातेपरमंविभो तेनमन्याम्यहंवीर्यमात्मनोनस

म० उ०
टी०
२२८

२० २१ २५ ३० मातलिवरान्वेषणे ऽध्यायः १०५ अनर्थे इति परार्थेपरस्त्वनिमित्ते १ २ ॥
ततश्चक्रे स भगवान्प्रसादं वै गरुत्मनः मैवं भूय इति स्नेहात्तदा चैनमुवाच ह २० पादां
गुष्ठेन चिक्षेप सुमुखं गरुडोरसि ततः प्रभृति राजेन्द्र सह सर्पेण वर्तते २१ एवं विष्णु
बलाक्रान्तो गर्वनाशमुपागतः गरुडो बलवान्राजन्वैनतेयो महायशाः २२ कण्व
उ० तथा त्वमपि गान्धारे यावत्पाण्डुसुतान्रणे नासादयसि तान्वीरांस्तावज्जीवसि पुत्रक
२३ भीमः प्रहरतां श्रेष्ठो वायुपुत्रो महाबलः धनंजयश्चेन्द्रसुतो न हन्यातां तु कं रणे २४
विष्णुर्वायुश्च शक्रश्च धर्मस्तौ चाश्विनावुभौ एते देवास्त्वया केन हेतुना वीक्षितुं क्षमाः
२५ तदलं ते विरोधेन शमं गच्छ नृपात्मज वासुदेवेन तीर्थेन कुलं रक्षितुमर्हसि २६
प्रत्यक्षदर्शी सर्वस्य नारदोयं महातपाः माहात्म्यस्य तदा विष्णोः सोयं चक्रगदाधरः २७
वैशंपायन उ० दुर्योधनस्तु तच्छ्रुत्वा निश्वसन्भ्रुकुटीमुखः राधेयमभिसंप्रेक्ष्य जहास
स्वनवत्तदा २८ कदर्थीकृत्य तद्वाक्यमृषेः कण्वस्य दुर्मतिः ऊरुं गजकराकारं ताडय
न्निदमब्रवीत् २९ तथैवेश्वरसृष्टोस्मि यद्भाविया च मे गतिः तथा महर्षे वर्तामि किं
प्रलापः करिष्यति ३० इत्युद्योगे भगवद्याने मातलिवरान्वेषणोऽध्यायः १०५ जनमे
जय उ० अनर्थे जाततिर्बंधं परार्थे लोभमोहितं अनार्यकेष्वभिरतं मरणे कृतनिश्चयं १
ज्ञातीनां दुःखकर्तारं बंधूनां शोकवर्द्धनं सुहृदां क्लेशदातारं द्विषतां हर्षवर्धनं २ ॥

२२८

भगवान्पितामहो व्यासः न तु भीष्मः उक्तेतेन स्पष्टस्य गुणपादानात् उक्तमित्यस्यावृत्तिदर्शनाच्च ४ सुहृत्तत्र तु पकारमनपेक्ष्य
उपकर्तारमाहृत्य नदीयवाक्यस्य श्रोता सुहृच्छ्रोता मूढो यं हितमप्युक्तं न श्रोष्यतीति भावः तिष्ठते स्थिरो भवति यत्र
महासंकटे तत्र बन्धुः उपकारमपेक्ष्योपकर्त्ताकर्णादिः न तिष्ठते न प्रकाशते प्रकाशनं स्थेयाख्यायोश्चेत्युभयत्र।

कथमेनं विमार्गस्थं वारयन्तीह बान्धवाः सौहृदाद्वा सुहृत्स्निग्धो भगवान्वा पितामहः ३
वैशंपायन उ० उक्तं भगवता वाक्यमुक्तं भीष्मेण यत्क्षमं उक्तं बहुविधं चैव नारदेनापि त
च्छृणु ४ नारद उ० दुर्लभो वै सुहृच्छ्रोता दुर्लभश्च हितः सुहृत् तिष्ठते हि सुहृद्यत्र न बन्धु
स्तत्र तिष्ठति ५ श्रोतव्यमपि पश्यामि सुहृदां कुरुनन्दन न कर्तव्यश्च निर्बन्धो निर्बन्धो हि
सुदारुणः ६ अत्राप्युदाहरन्तीममितिहासं पुरातनं यथा निर्बन्धतः प्राप्तो गालवेन प
राजयः ७ विश्वामित्रं तपस्यन्तं धर्मो जिज्ञासया पुरा अभ्यगच्छत्स्वयं भूत्वा वसिष्ठो भग
वानृषिः ८ सप्तर्षीणामन्यतमं वेषमास्थाय भारत बुभुक्षुः क्षुधितो राजन्नाश्रमं कौशिक
स्य तु। विश्वामित्रोऽथ संभ्रान्तः श्रपयामास वै चरुं परमान्नस्य यत्नेन न च तं प्रत्यपालयत् १०
अन्नं तेन यदा भुक्तमन्यैर्दत्तं तपस्विभिः अथ गृह्यान्नमत्युष्णं विश्वामित्रोऽप्युपागमं ११ भुक्तं
मे तिष्ठ तावत्त्वमित्युक्त्वा भगवान्ययौ विश्वामित्रस्ततो राजन्स्थित एव महाद्युतिः १२ भक्तं प्र
गृह्य मूर्ध्ना वै बाहुभ्यां संशितव्रतः स्थितः स्थाणुरिवाभ्याशे निश्चेष्टो मारुताशनः १३ ॥

तद्बन्धुतोपि सुहृद्वचः श्रेयस्करमित्यर्थः ५ श्रोतव्यं श्रोतुं युक्तं निर्बन्धः सत्यपि बलवद्बाधके तत्रैवाग्रहः सु
दारुणो नाशकारी ६ ७ वसिष्ठमूर्त्तिधर्मोऽभ्यागच्छत् ८ ९ न प्रत्यपालयत् अन्नसिद्धिपर्यन्तं न प्रतीक्षितवान्
१० तेन वसिष्ठेन उपागमत् वसिष्ठसमीपं ११ १२ मूर्ध्ना बाहुभ्यां च परिगृह्य अभ्याशे समीपे आश्रमस्य १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ गौरवात् गुरुत्वात् बहुमानात् लोकपूज्यत्वात् हार्देन प्रीत्या १४ १८ शुश्रूषयासेवया भक्त्याराधनत्वज्ञानेन १९ २० गुरुक
टी॰ र्मणि ब्रह्मचर्यव्रतसमाप्तौ सत्यां २१ मानवमिति पाठे सिध्यतीति सिद्धं कृतं कृत्यं करोतीत्यर्थः एतदेवाह दक्षिणानामिति अ
२२८ पवर्गेण फलप्राप्त्या २२ कृतफले दक्षिणा प्रदत्तैव प्राप्तेतिहृतो यत्तस्य दक्षिणाऽतिसृतेः दक्षिणास्य कृतोऽर्हत्वेनाप

तस्य शुश्रूषणोपेतमकरोद्गालवो मुनिः गौरवाद्बहुमानाच्च हार्देन प्रियकाम्यया १४ अथ
वर्षशते पूर्णे धर्मः पुनरुपागमत् वासिष्ठं वेषमास्थाय कौशिकं भोजनेप्सया १५ सहसा ऋषि
रमाभक्तं ध्रियमाणो महर्षिणा तिष्ठता वा शुभं तेन विश्वामित्रेण धीमता १६ प्रतिगृह्य ततो ।
धर्मस्तथैवोष्णं तथा नवं भुक्त्वा प्रीतोऽस्मि विप्रर्षे तमुक्त्वा स मुनिर्गतः १७ तत्र भावादपगतो ।
ब्राह्मणत्वमुपागतः धर्मस्य वचनात्प्रीतो विश्वामित्रस्तथाभवत् १८ विश्वामित्रस्तु शिष्य
स्य गालवस्य तपस्विनः शुश्रूषया च भक्त्या च प्रीतिमानित्युवाच ह १९ अनुज्ञातो मया व
त्स यथेष्टं गच्छ गालव इत्युक्तः प्रत्युवाचेदं गालवो मुनिसत्तमं २० प्रीतो मधुरया वाचा ।
विश्वामित्रं महाद्युतिं दक्षिणाः काः प्रयच्छामि भवते गुरुकर्मणि २१ दक्षिणाभिरुपेतं हि ।
कर्म सिध्यति मानवं दक्षिणानां हि दाता वै अपवर्गेण युज्यते २२ स्वर्गे क्रतुफलं तद्धि द ।
क्षिणा शान्तिरुच्यते किमाहरामि गुर्वर्थं ब्रवीतु भगवानिति २३ स जानंस्तेन भगवान् जि ।
तः शुश्रूषणेन वै विश्वामित्रस्तमसकृद्गच्छ गच्छेत्यचोदयत् २४ असकृद्गच्छ गच्छेति वि
श्वामित्रेण भाषितः किं ददानीति बहुशो गालवः प्रत्यभाषत २५ निर्बध्नतस्तु बहुशो गालवस्य त
पस्विनः किंचिदागतसंरम्भो विश्वामित्रोऽब्रवीदिदं २६ ॥ लत्वात् शान्तिः सर्वोपद्रवहारिणीउच्यते वेदेन २२९
दक्षिणां च धर्मं कृत एव ते विजानन्निति २३ स जानंस्तेनेति पाठे तेन गालवेन शुश्रूषणेनैव जितो वशीकृतेऽस्मीति जानन्नि

॥ म॰ भा॰ उ॰ पं॰ ११

श्यामो हरितः एकतः वहिः अंतेश्चैव श्यामाः कर्णा येषां तेषां एकतः श्यामकर्णानां २० अध्यायः ९९ हरिणः खेदुरस्य
सुनादैन्येन दह्यमानश्चिंताग्निना २४ परंपरात् दूरात् अपि दूरं आत्मानं देहं ५ अनीहया अनुद्यमेन ६ ईप्सितं प्रण
यं कृत्वा ईप्सितं दास्यामीति विश्वासमुत्पाद्य प्रणयः प्रेमा विस्रंभः इति विश्वः ७ एतदेवाह प्रतिश्रुत्येति कवि।

एकतः श्यामकर्णानां हयानां चंद्रवर्चसां अष्टौ शतानि मे देहि गच्छ गालवमाचिरं २० इत्यु
द्योगे अध्यायः १०६ नारद उ० एवमुक्तस्तदा तेन विश्वामित्रेण धीमता नास्ते न शेते नाहारं कु
रुते गालवस्तदा १ त्वगस्थिभूतो हरिणश्चिंताशोकपरायणः शोचमानोतिमात्रं स दह्य
मानश्च मन्युना गालवो दुःखितो दुःखाद्विललाप सुयोधन २ कुतः पुष्टानि मित्राणि कुतो
र्थाः संचयः कुतः हयानां चंद्रशुभ्राणां शतान्यष्टौ कुतो मम ३ कुतो मे भोजने श्रद्धा सुखश्र
द्धा कुतश्च मे श्रद्धा मे जीवितस्यापि छिन्ना किं जीवितेन मे ४ अहं पारे समुद्रस्य पृथिव्या वा
परं परात् गत्वात्मानं विमुंचामि किं फलं जीवितेन मे ५ अधनस्याकृतार्थस्य त्यक्तस्य वि
विधैः फलैः ऋणं धारयमाणस्य कुतः सुखमनीहया ६ सुहृदां हि धनं भुक्त्वा कृत्वा प्रण
यमीप्सितं प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरं ७ प्रतिश्रुत्य करिष्येति कर्तव्यं तदकुर्व
तः मिथ्यावचनदग्धस्य इष्टापूर्तं प्रणश्यति ८ न रूपमनृतस्यास्ति नानृतस्यास्ति संत
तिः नानृतस्याधिपत्यं च कुत एव गतिः शुभा ९ कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सु
खं अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः १० न जीवत्यधनः पापः कुतः पापस्य तंत्रणं
पापो ध्रुवमवाप्नोति विनाशं नाशयन्कृते ११ ॥ ष्यतीति संधिरार्षः ८ अनृतस्य सत्यहीनस्य रूपं स्वरू
पं जीवन्नेव मृतः इत्यर्थः ९ १० तंत्रणं कुटुंबधारणं पाठांतरे मंत्रणं इष्टैः सह विचारणं अविश्वसनीयत्वादिति

म॰ उ॰ तत् भाषितमितिसंबंधः १२ अनुत्तमं यत्नं प्रथमोपायं विषोढं धनादिरूपं कृत्वा प्राणान्मोक्ष्यामीत्यर्थः अर्थिता याचिता १३ अ
टी॰ हं त्विति अत्राहमितिपदस्य द्विरावृत्तिर्वक्तव्या वैक्लव्याद्दोषः १४ भोगाः भोगापवर्गौ विषयादिः प्रतिष्ठंते निःसंततिवीजादि
२२९ वद्वृत्तः १५ यस्य विष्णुदासत्वेन सखा न तत्पूर्वोपकारादिना १६ सुहृदां विषयं विष्णुरिति बुद्ध्या सर्वलोकमित्राणां

सोहं पापः कृतघ्नश्च कृपणश्चानृतोपि च गुरोर्यः कृतकार्यः सन्तत्करोति न भाषितं १२
सोहं प्राणान्विमोक्ष्यामि कृत्वा यत्नमनुत्तमं अर्थिता न मया काचित्कृतपूर्वा दिवौकसां १३
मानयंति च मां सर्वे त्रिदशा यज्ञसंस्तरे अहं तु विबुधश्रेष्ठं देवं त्रिभुवनेश्वरं १४ विष्णुं गत्वा
द्य हं कृष्णं गतिं गतिमतां वरं भोगा यस्मात्प्रतिष्ठंते व्याप्य सर्वान्सुरासुरान् प्रणतोऽद्रष्टुमि
च्छामि कृष्णं योगिनमव्ययं १५ एवमुक्ते सखा तस्य गरुडो विनतात्मजः दर्शयामास तं प्राह
संहृष्टः प्रियकाम्यया १६ सुहृद्भवान्मम मतः सुहृदां च मतः सुहृत् ईप्सितेनाभिलाषेण
योक्तव्यो विभवे सति १७ विभवश्चास्ति मे विप्र वासवावरजो द्विज पूर्वमुक्तस्त्वदर्थं च कृत
कामश्च तेन मे १८ स भवानेतु गच्छाव नयिष्ये त्वां यथासुखं देशं पारं पृथिव्या वा गच्छ गाल
वमाचिरं १९ इत्युद्योगे पर्वणि गालवचरिते १०७ सुपर्ण उ. अनुशिष्टोस्मि देवेन गालवज्ञा
नयोनिना ब्रूहि कामं तु कां यामि द्रष्टुं प्रथमतो दिशं १ पूर्वां वा दक्षिणां वाहमथवा पश्चिमां
दिशं उत्तरां वा द्विजश्रेष्ठ कुतो गच्छामि गालव २ ॥ वासवादवरो विष्णुस्तस्माज्जातः वासवावरजः

उक्तः अहं गालवस्य साहाय्यं करिष्यामीति प्रार्थितः तेन विष्णुना १८ देशं पृथिव्यंतर्गतमेव पृथिव्याः पारं
समुद्रं १९ अध्यायः १०७ अनुशिष्टः आज्ञापितः ज्ञानयोनिना अर्थप्रवर्तकेन पाठांतरे अज्ञातयोनिना सर्वा
दित्वात् अज्ञातः रूपादिहीनत्वात् तादृशोपि योनिः जगदुदयप्रलयस्थानं तेन कामं यथेष्टं १ २ २२९

साध्यानांदेवताविशेषाणांतपआलोचनंवर्ततेः न्ववर्त्तनेसाध्यादेवाः हध्यायेतः सत्यकामावभूवुरित्यर्थः ३
मतिः वुद्धिः यानाशनाप्रातः संध्यायांसवितुः प्रसादात्प्रथमेपूत्रथीशास्त्रिर्भवति गायत्र्यांसवितृर्थीप्रवर्त्त
कत्वदर्शनादित्यर्थः चतुष्षीआज्यभागाख्येअग्नीषोमदेवत्येधर्मस्यपत्नस्यपंत्रवेपंत्रणार्थंपूत्रयतेस्तमर्थेत
वेपमयोवैदिकः ४ तदेवाहहकृतंसंस्कृतंहव्यंपतोडूतंयपयोमध्येडूतंसत् तदाज्यभागावंतरेणाहूतीः प्र

यस्मामुद्यतेपूर्वंसर्वलोकप्रभावनः सविताय्त्रसंध्यायांसाध्यानांवर्ततेतपः ३
यस्यांपूर्वंमतिर्याताययाव्याप्तमिदंजगत् चतुष्षीयत्रधर्मस्यपंत्रवेपत्रतिष्ठिते ४ हु
तंयतोमुखेहव्यंसर्पतेसर्वतोदिशं एतद्वारंद्विजश्रेष्टदिवसस्यतथाध्वनः ५ अत्रपूर्वं
प्रसूतावैदाक्षायण्यःप्रजाव्रिपः यस्यांदिशिप्रवृद्धाश्चकाश्यपस्यात्मसंभवाः ६ अतो
मूलंसुराणांश्रीर्यत्रशक्रोभ्यषिच्यत सुरराज्येनविप्रर्षेदेवैश्चात्रतपश्चितं ७ एतस्मा
त्कारणाद्ब्रह्मन्पूर्वेत्येषादिगुच्यते यस्मात्पूर्वतरेकालेपूर्वमेवावृतासुरैः ८ अतएवच
पूर्वेषांपूर्वामाशांप्रचक्षते पूर्वंसर्वाणिकार्याणिदेवानांसुखमीप्सितां ९ अत्रवेदान्ज
गौपूर्वंभगवान्लोकभावनः अत्रैवोक्तासवित्रासीत्सावित्रीब्रह्मवादिषु १० अत्रदत्तानि
सूर्येणयजूंषिद्विजसत्तम अत्रलब्धवरःसोमःसुरैःक्रतुषुपीयते ११ अत्रतृप्ताहूतवहाः
स्वांयोनिमुपभुंजते अत्रपातालमाश्रित्यवरुणःश्रियमापच १२ ॥

तिपादयेदितिश्रुतेर्यज्ञस्यरक्षणंभवति अन्यत्रगतंत्वर्थात्कर्मनाशकंभवतीतिभावः अध्वनःदेवयानस्य
पितृयानस्यवा ५ दाक्षायण्यःअदितिर्दितिर्दनुःकालाइत्याद्याःप्रजाःलोकान् ६ ८ पूर्वेपूर्वसंस्थानि
सुखमीप्सितांसुखावहार्थिनो ९ १० यजूंषिदत्तानियाज्ञवल्क्यायेतिशेषः ११ स्वांयोनिंसोमाज्यपयआदिरूपं

म॰उ॰ पूर्वंमित्रावरुणयोर्यज्ञकाले पौराणस्यपुराणस्यस्वार्थेतद्धितः निधनंनिमिशापातस्थलेदेहवियोगः मृतिः संभात
टी॰ तस्मिन्नेवयज्ञे १३ दशशतीशब्दस्यपृषोदरादित्वात् शाकारलोपेनदशतीशब्दः सहस्रवाची स्तनपोमार्गाः ओंका
२३॰ रोवैसर्वावागितिश्रुतेर्वेदस्यशाखादिभेदैः त्रैवजातइत्यर्थः १४ १५ येमानुषाः कृतघ्नाः येवासुराः तानग्रैवोद ।

अत्रपूर्वंवसिष्ठस्यपौराणस्यद्विजर्षभ मृतिश्चैवप्रतिष्ठाचनिधनंचप्रकाशते १३ ओं
कारस्यात्रजायंतेस्तनपोदशतीर्दश पिबंतिमुनयोयत्रहविर्धूमंसमंततः १४ प्रोक्ति
तायत्रबहवोवराहायामगावने शक्रेणयज्ञभागार्थेदैवतेषुप्रकल्पिताः १५ अत्राहि
ताःकृतघ्नाश्चमानुषाश्चासुराश्चये उदयंस्तानूहिसर्वान्वैक्रोधादइतिविभावसुः १६ ए
तद्द्वारंत्रिलोकस्यस्वर्गस्यचसुखस्यच एषपूर्वोदिशांभागोविशावोत्रयदीच्छसि १७
प्रियंकार्यंहिमेतस्ययस्यास्मिवचनेस्थितः ब्रूहिगालवयास्यामिशृणुचाप्यपरांदिशं १८
इत्युद्योगेगालवचरिते १०८ सुपर्णउ॰ इयंविवस्वतापूर्वंश्रौतेनविधिनाकिल गुरवेद
क्षिणादत्तादक्षिणेत्युच्यतेचदिक् १ अत्रलोकत्रयस्यास्यपितृपक्षः प्रतिष्ठितः अत्रोष्म
पाणांदेवानांनिवासःश्रूयतेद्विज २ अत्रविश्वेसदादेवाःपितृभिःसार्धमासते इज्यमा
नाःस्मलोकेषुसंप्राप्तास्तुल्यभागतां ३ ॥

यत्नूहंतीतितेषांमासुरल्पीकरोतीत्यर्थः १६ विशावःप्रविशावः १७ १८ अध्यायः १०८ इयमिति श्रौतेनेतिपा
ठक्रमेणाहूयतेस्मिन्नितिश्रौतोविधिर्यज्ञः गुरवेकश्यपाय १ उष्मपाणांउष्मान्नभोजिनां यावदुष्णंभव २३
त्यन्नंपितरस्तावदश्नंतीतिस्मृतेः २ विश्वेत्रयोदशमिताःगणाः ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

द्वितीयंदैवस्यधर्मसंहारंपूर्वोदितंक्रमंप्रथमंतदपेतयापित्र्यस्यधर्मसंहारमिदंद्वितीयंप्राकृसंस्थानिदैवानिकर्माणि
द्वितीयासंस्थानिपित्र्याणीतिसूतः ४ ५ कर्मपुण्यापुण्यरूपंनिगद्यतेप्रकाश्यतेचित्रगुप्तादिभिः प्रवक्तापि
नामतानांकर्मनिग्रहानुग्रहरूपं ६ सर्वोमुमुक्षुमात्रःकृताञ्जलिःप्रनववोधेनतमसापुण्यवान्पापीवामर
णकालेप्रच्युतम्र्छत्वातद्गःख्येवसत्त्वेतोदिशंगच्छतीत्यर्थःकृत्वानववियोधेनेतिपाठःप्रनवःप्राक्तंचितेन
कर्मणाउपस्थितोविरोधोमोहस्तेनसर्वःकृत्वाकर्तापुरुषःप्राप्तोमतिनिन्दतिपश्चेतिसत्रानन्तनिविमन्नः
एतद्द्वितीयंधर्मसंहारमाचक्षतेद्विज त्रुटिशोलवप्राश्चापिगण्यतेकालनिश्चयः ४
अत्रदेवर्षयोनित्यंपितृलोकर्षयस्तथा तथाराजर्षयःसर्वेनिवसंतिगतव्यथाः ५ अ
त्रधर्मश्चसत्यंचकर्मचात्रनिगद्यते गतिरेषाद्विजश्रेष्ठकर्मचात्रावसायिना ६ एषाहि
कस्माद्विजश्रेष्ठयांसर्वःप्रतिपद्यते कृताञ्जलिनववोधेनस्वकेतेननगम्यते ७ नैकसंतानां
सहस्राणिवहून्यत्रद्विजर्षभ स्पृष्टानिप्रतिकूलानिदृष्टव्यान्यकृतात्मभिः ८ अत्रमेरुं
दक्षिणेषुविप्रर्षिसदनेषुच गायंतिगाथागंधर्वाश्चितवुद्धिहराद्विज अत्रसामानिगा
थाभिःश्रुत्वागीतानिरैवतः गतदारोगतामात्योगतराज्योवनंगतः ९ अत्रसावर्णि
नाचैवयवक्रीतात्मजेनच मर्यादास्थापिताब्रह्मन्यांसूर्योनातिवर्तते १० अत्रात्म
राजेनपौलस्त्येनमहात्मना रावणेनतपश्चर्तांसुरेभ्योमरतावृता ११ अत्रावृतेनवृत्रो
वर्तमानेःस्वेभ्योपिदृष्ट्वंतेद्युतिक्रजःकर्तविकृतिपु ७ चित्तंचवुद्धिश्चतयोर्हराःयोगिनांतत्रातत्रसंस्थानेश्रवं
चमिथ्यात्वनिश्चयंचहरंतीत्यर्थः ८ गाथाःवर्णमय्योमंत्राद्याःसामानितद्गाश्रयाणिगीतानिश्रुत्वागीतं
कालमजानन्भूर्लोकेप्रागत्यदारादीन्नष्टान्ज्ञात्वावनेगतइतिपौराणीकथा ९ सावर्णिनामनुनास
यदात्मसूर्यरथस्यवीथीनांवाहकानांदेवतानांचनियमः १०।११ सर्वास्ववःसर्वेषांप्राणाअत्रप्राप्ताःसंततःपुनः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वैतरणैः वैतरणीनदीसंज्ञकनरकगामिभिः १३ सुखस्यांतं तेन नरकं दुःखस्यांतं स्वर्गं च एवं आवृत्तः कर्कायनगतः तदा हि
प्रायेण दीनं तत्र भवति तच्च वर्षाकालस्यादिमत्वात्प्रसिद्धं १४ वासिष्ठीं काष्ठां उदीचीं वसिष्ठोपलक्षितसप्तर्षिभिरधि
ष्ठितां स्थानीष्ठीमिति पाठे तिष्ठत्यनेन धनवान् धनिष्ठः कुवेरस्तदीयां उत्सृजते त्यजति १५ १६ निर्याणकाले मरणे

अत्र दुष्कृतकर्माणो नराः पच्यंति गालव अत्र वैतरणी नाम नदी वैतरणैर्वृता १३ अत्र गत्वा
सुखस्यांतं दुःखस्यांतं प्रपद्यते अत्रावृत्तो दिनकरः सुरं सरति तत्पयः १४ काष्ठां चासाद्य वासि
ष्ठीं हिममुत्सृजते पुनः अत्राहं गालव पुरा क्षुधार्तः परिचिंतयन् १५ लब्धवान् युध्यमानौ
द्वौ बृहंतौ गजकच्छपौ अत्र चक्रधनुर्नाम सूर्याज्जातो महानृषिः १६ विदुर्यं कपिलं देवं ये
नार्ताः सगरात्मजाः अत्र सिद्धाः शिवा नाम ब्राह्मणा वेदपारगाः १७ अधीत्य सकलान्वेदा
न्लेभिरे मोक्षमक्षयं अत्र भोगवती नाम पुरी वासुकिपालिता १८ तक्षकेण च नागेन त
थैवैरावतेन च अत्र निर्याणकालेषु तमः संप्राप्यते महत् १९ अभेद्यं भास्करेणापि स्वयं
वा कृष्णवर्त्मना एष तस्यापि ते मार्गः परितापस्य गालव २० ब्रूहि मे यदि गंतव्यं प्रतीचीं
शृणु चापरां २१ इत्युद्योगे गालवचरिते १०९ सुपर्ण उ॰ इयं दिग्दयिता राज्ञो वरुणस्य तु
गोपतेः सदा सलिलराजस्य प्रतिष्ठा चादिरेव च १ अत्र पश्चादहः सूर्यो विसर्जयति गाः स्व
यं पश्चिमेत्यभिविख्याता दिगियं द्विजसत्तम २ यादसामत्र राज्येन सलिलस्य च गुप्तये
कश्यपो भगवान्देवो वरुणं स्माभ्यषेचयत् ३ अत्र पीत्वा समस्तान्वै वरुणस्य रसान्षट् जाय
ते तरुणः सोमः शुक्लस्यादौ तमिस्रहा ४ ॥

काले तमः प्राप्यं १९ तस्यापि ते तव आर्यस्य सेव्यस्य २० अध्यायः १०९ गोपतेः सूर्यस्य प्रतिष्ठेति संबंधः १ पश्चादेवाहप
श्चादहः इति अह्नः पश्चाद्भागे गाः रश्मीन् विसर्जयति अत एव पश्चिमा दिगिति मे त्वयार्थः २ ३ ४ ॥ २३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पश्चात्कृताः विमुखीकृताः संयताः संनद्धाः संतः ५६ अहं आयुधोद्धर्तेनिद्रयाव्ययीकर्तामित्यर्थः ७८ मंदरं समुद्रमग्नं पतेनहिमवद्गलस्य चाप्रमेयत्वमज्जं ९ कांचनमयानि श्रेष्ठवृक्षरुहाणि यत्र तस्याउदधेः समुद्रतल्पस्य समरसः ११

सुवर्णशिरसो मुनेः हरितोमनाः अपलितस्यनित्यतरुणस्येत्यर्थः १२ पौर्णमेयसोमुनेः कुमारी तिष्ठतिष्ठतिसूर्यस्य शासनात् १३ अत्र वायुरिति वाय्वादयोत्रउःखदंपीतोलस्पर्शं विमुंचतिसदा सुखसंस्पर्शाणवेत्यर्थः १४

अत्र पश्चात्कृता दैत्या वायुना संयतास्तदा निश्वसंतो महावातेरर्दिताः सूर्यपुत्रिज ५ अत्र सूर्यप्रणयिने प्रतिगृह्णाति पर्वतः अस्तो नाम यतः संध्या पश्चिमा प्रतिसर्पति ६ अतो रात्रिश्च निद्रा च निर्गता दिवसक्षये जायते जीवलोकस्य हर्तुमर्धमिवायुषः ७ अत्र देवी दितिः स्नाता स्म प्रसव धारिणी विगर्भा मकरोच्छक्रो यत्र जातो मरुद्गणः ८ अत्र मूलं हिमवतो मंदरं याति शाश्वतं अपि वर्षसहस्रेण न चास्यांतोधिगम्यते ९ अत्र कांचनशैलस्य कांचनांबुरुहस्य च उदधेस्तीरमासाद्य सुरभिः क्षरते पयः १० अत्र मध्ये समुद्रस्य कबंधः प्रतिदृश्यते स्वर्भानोः सूर्यकल्पस्य सोमसूर्यौ जिघांसतः ११ सुवर्णशिरसोप्यत्र हरितोमनाः प्रगायतः अदृश्यस्याप्रमेयस्य श्रूयते विपुलध्वनिः १२ अत्र ध्वजवती नाम कुमारी हरिमेधसः आकाशे तिष्ठ तिष्ठेति तस्थौ सूर्यस्य शासनात् १३ अत्र वायुस्तथा वह्निरापः खं चापि गालव आह्निकं चैव नैशं च दुःखस्पर्शं विमुंचति १४ अतः प्रभृति सूर्यस्य तिर्यगावर्तते गतिः अत्रा

अतः प्रभृतीति मेरुं प्रदक्षिणीकुर्वन्सूर्यः सर्वदा तिर्यग्गतिरेव सन् लोकदृष्ट्या उपर्युपर्यागच्छतीत्येव भाति अतः परं लोकदृष्ट्यभावात् तिर्यग्गेवावर्तत इत्यर्थः आदित्यमंडले कतरे ज्योतींष्यग्न्यादीनि विशंति आदित्यो वा अस्तं यन्नग्निमनुप्रविशतीति श्रुतेः न तत्रादीन्यपि श्रमयुत्वाद् प्रकाशकानि आदित्यप्रभयैव भासंते तेरात्रौ दिवा तत्रैव निरोभवंतीति प्रसिद्धिः १५ ॥

म॰ ३॰ अष्टेति अष्टाविंशतिमे दिने एकैकं नक्षत्रं भानुना चंद्रेण सह संक्रम्य एकोनत्रिंशे पूर्णांशे रात्रौ निष्पतति बहिर्निर्गच्छति चंद्रादे
टी॰ व पुनस्तदुत्तु सोमसंयोगसदृशेन योगेन संबंधेन सूर्येण सहापि संक्रमकाले निष्पततीत्यर्थः एवं च इत्थं सर्वेषा
मपि नक्षत्राणां सर्वग्रहयोगस्तुल्यः १६ स्रवंतीनां नदीनां सागरस्य उदयः स्थितिर्यत्र न ताहृशः प्रभवः १७ १८ द्विगुण
३३२ रेण संक्षेपप्रकारेण ततव १९ अध्यायः ११० यस्मादिति उत्तरेण यथा गतानां द्विपापनाशः स्वर्गप्राप्तिश्च भवतीति यो

अष्टाविंशतिरात्रं च संक्रम्य सह भानुना । निष्पतति पुनः सूर्यात् सोमसंयोगयोगतः १६ अत्र
नित्यं स्रवंतीनां प्रभवः सागरोदयः । अत्र लोकत्रयस्यापत्तिः तिष्ठति वरुणालये १७ यत्र पन्न
गराजस्याप्यनंतस्य निवेशनं १८ एष ते पश्चिमो मार्गो दिगुत्तरेण प्रकीर्तितः । ब्रूहि गालव
गच्छावो बुद्धिः का द्विजसत्तम १९ इ॰ उद्योगपर्वणि भगवद्याने गालवचरिते ११० सुपर्ण उ॰
यस्मादुत्तार्यते पापाद्यस्मान्निःश्रेयसोऽश्नुते । अस्मादुत्तारणबलादुत्तर इत्युच्यते द्विज १ उत्त
रस्य हिरण्यस्य परिवापस्य गालव । मार्गः पश्चिमपूर्वाभ्यां दिग्भ्यां वै मध्यमः स्मृतः २ अ
स्यां दिशि वरिष्ठायामुत्तरायां द्विजर्षभ । नासौम्यो नाविधेयात्मा नाधर्म्यो वसते जनः ३ अ
त्र नारायणः कृष्णो जिष्णुश्चैव नरोत्तमः । बदर्यामाश्रमपदे तथा ब्रह्मा च शाश्वतः ४ अत्र
वै हिमवत्पृष्ठे नित्यमास्ते महेश्वरः । प्रकृत्या पुरुषः सार्धं युगांताग्निसमप्रभः ५ न स दृ
श्यो मुनिगणैस्तथा देवैः सवासवैः । गंधर्वयक्षसिद्धैर्वा नरनारायणादृते ६ ॥

गाउत्तारा उत्कृष्टतरा इयं दिगित्यर्थः १ परिवापः स्थानं हिरण्यस्य निधीनामित्यर्थः उत्तरं यत्त्रिथिस्थानं ततः स्व
र्गमार्गः दिग्भ्यामनुपलक्षितो मध्यमो ज्ञेय इति भावः २ अविधेयात्मा अजितचित्तः ३ ४ प्रकृत्या उमया ५
नसः मायाविष्टोपि नरदृश्यो दर्शनार्हः किंतु मायारहितः शुद्धचिन्मात्रः ६ ॥ श्रीः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सहस्रशिरसः इत्यकारांतः शब्दः मायया ऽपेतमिति शेषः वस्तुतो स्वप्रत्यगात्मत्वेन ऽ ष्टृ दृष्ट्यभावस्याभावादिति
भावः सगुणब्रह्मभावप्राप्तिपूर्वकैव निर्गुणप्राप्तिरिति भजध्वं कार्थः यथोक्तं सोपाधिर्निरुपाधिश्च द्वेधा ब्र
ह्मविदुच्यते सोपाधिकः स्यात्सर्वात्मा निरुपाख्यो ऽनुपाधिक इति एतच्च सम्यग्व्युत्पादितमस्माभिर्वेदांतक
तके १ १२ शाद्वलं जंबाले देवताभेदः कदलीं वैजयंतीं यताकां तस्माः स्कंधवडुत्थितं तेन गाः वृत्ताः कल्प
अत्र विष्णुः सहस्रांशुः सहस्रचरणोऽव्ययः सहस्रशिरसः श्रीमानेकः पश्यति मायया १
अत्र राज्येन विप्राणां वेदमार्गमभिषिच्यत अत्र गंगा महादेवः पतंती गगनाच्च्युता ८
प्रतिगृह्य ततो लोके मानुषे ब्रह्मवित्तमः अत्र देव्या तपस्तप्तं महेश्वरपरीप्सया ९ अत्र
कामश्च रोषश्च शैलश्चोमा च संबभुः अत्र राक्षसयक्षाणां गंधर्वाणां च गालव १० आ
धिपत्येन कैलासे धनदोऽप्यभिषेचितः अत्र चैत्ररथं रम्यमत्र वैखानसाश्रमः ११ अत्र
मंदाकिनी चैव मंदरश्च द्विजर्षभ अत्र सौगंधिकवनं नैरृतैरभिरक्ष्यते १२ शाद्वलं कदली
स्कंधमत्र संतानका नगाः अत्र संयमनित्यानां सिद्धानां स्वैरचारिणां १३ विमानान्यनुरू
पाणि कामभोग्यानि गालव अत्र ते ऋषयः सप्त देवी चारुंधती तथा १४ अत्र तिष्ठति वै स्वा
ती रत्रास्या उदयः स्मृतः अत्र यज्ञं समारुह्य ध्रुवं स्थाता पितामहः १५ ज्योतींषि चंद्रसूर्यौ
च परिवर्तंति नित्यशः अत्र गंगा महाद्वारं रक्षंति द्विजसत्तम १६ धामा नाम महात्मानो मुनयः
सत्यवादिनः न तेषां ज्ञायते सृतिर्नाकृतिर्न तपश्चितं १७ परिवर्तसहस्राणि कामभोज्यानि
ड्मः संयमो धारणाध्यानादिभिर्नित्योन स्याज्ञो येषां तेषां १३ १४ गंगा महाद्वारमिमत्र गायंति काद्वारमिति पाठे गा
यंति का विलविशेषः १६ सृतिः पिंडः आकृतिः संस्थानविशेषः परिवर्तागतागतं सहस्राणि सत्रे ग्रन्थपरिवेष

म०उ०
टी०
२३३

तस्मात्हिमस्थानात्प्रविलीयतिहिमेनतुप्यति १८ १९ ऐलविलस्यकुवेरस्य २० २१ उशीरवीजेस्थाने २२ कन
काकरः जीमूतस्य उपसमीपेतस्यप्रकाशगतः प्रकाशनस्थयाख्येयोश्चेतितद् २४ वध्रैन्ब्राह्मणेभ्यः मन्नाम

यथायथाप्रविशतितस्मात्परतरंनरः १८ तथातथाहिजश्रेष्टप्रविलीयतिगालव नैतत्के
नचिदन्येनगतपूर्वंहिजर्षभ १९ ऋतेनारायणंदेवंनरंवाजिष्णुमव्ययं अत्रकैलासमित्यु
क्तंस्थानमैलविलस्यतत् २० अत्रविद्युत्प्रभानामजज्ञिरेप्सरसोदश अत्रविष्णुपदंनाम
क्रामताविष्णुनाकृतं २१ त्रिलोकविक्रमेब्रह्मन्नुत्तरांदिशमाश्रितं अत्रराज्ञामरुत्तेनय
ज्ञेनेष्टंहिजोत्तम २२ उशीरवीजेविप्रर्षेयत्रजांबूनदंसरः जीमूतस्यात्रविप्रर्षेरुपत
स्थेमहात्मनः २३ साक्षाद्धैमवतःपुण्योविमलःकनकाकरः ब्राह्मणेषुचयत्कृत्स्नं
स्वंतंकृत्वाधनंमहत् २४ वव्रेधनंमहर्षिःसजैमूतंतद्धनंततः अत्रनित्यंदिशांपालाः
सायंप्रातर्हिजर्षभ २५ कस्यकार्यंकिमितिवैपरिक्रोशंतिगालव एवमेषाहिजश्रे
ष्टगुणैरन्यैर्दिगुत्तरा २६ उत्तरेतिपरिख्यातासर्वकर्मसुचोत्तरा एताविस्तरशस्तात्तत
वसंकीर्तितादिशः २७ चतस्रःक्रमयोगेनकामाशांगंतुमिच्छसि उद्यतोहंहिजश्रे
ष्टतवदर्शयितुंदिशः २८ पृथिवींचाखिलांब्रह्मंस्तस्मादारोहमांहिज इतिश्रीउद्योगेगालव
चरिते० १११ गालवउ० गरुत्मन्भुजगेंद्रारेसुपर्णविनतात्मज नयमांतार्क्ष्यपूर्वेणय
त्रधर्मस्यचक्षुषी १ पूर्वमेतांदिशंगच्छयापूर्वंपरिकीर्तिता दैवतानांहिसांनिध्यमत्र
कीर्तितवानसि २ अत्रसत्यंचधर्मश्चत्वयासम्यक्प्रकीर्तितः इच्छेयंतुसमागंतुंसमस्तैर्दैव
तैरेतदस्त्विति २५ उत्तरा उत्कृष्टतरा २६ २७ अध्यायः १११ पूर्वेणपूर्वस्यांदिशिचक्षुषीअग्नीषोमौ १ २ समागंतुं

२३३

४ सहस्रांशोर्विवस्वतः इति पक्षवातानुगामिनां गरुडप्रभया वभासितानां वृक्षाणां मे शुसाम्यं निवारणं वाभिरेत्य
विशेषणाद्वयं एतच्च वाक्यशेषाध्याहृतं भविष्यति वसनाच्छादनैः स्नातःक्षिपिवः वस्त्रातितद्वानवस्त्रान् तद्विपरीतो

भूयश्च तान्सुरान्द्रष्टुमिच्छेयमरुणानुज ३ नारद उ॰ तमाह विनतासूनुरारोहस्वेति वै द्वि
जे आरुरोहाथ स मुनिर्गरुडं गालवस्तदा ४ गालव उवाच क्रममाणस्य ते रूपं दृश्यते पन्न
गाशन भास्करस्येव पूर्वाह्णे सहस्रांशोर्विवस्वतः ५ पक्षवातप्रणुन्नानां वृक्षाणामनुगा
मिनां प्रस्थितानामिव समं पश्यामीह गतिं खग ६ ससागरवनामुर्वीं सशैलवनकाननां
आकर्षन्निव चाभासि पक्षवातेन खेचर ७ समीननागनक्रं च खमिवारोप्यते जलं वायुना
चैव महता पक्षवातेन चानिशं ८ तुल्यरूपाननान्मत्स्यांस्तथा तिमितिमिंगिलान् नागां
श्च नरवक्त्रांश्च पश्याम्युन्मथितानिव ९ महार्णवस्य च रवैः श्रोत्रे मे बधिरीकृते न शृणोमि
न पश्यामि नात्मनो वेद्मि कारणं १० शनैः सत्भवान्यातु ब्रह्मवध्यामनुस्मरन् न दृश्यते र
विस्तात न दिशो न च खं खग ११ तम एव तु पश्यामि शरीरं ते न लक्षये मणी व जात्यौ पश्या
मि चक्षुषी ते ऽहमण्डज १२ शरीरे तु न पश्यामि तव चैवात्मनश्च ह पदे पदे तु पश्यामि शरी
रादग्निमुत्थितं १३ स मे निर्वाप्य सहसा चक्षुषी शाम्यते पुनः तन्नियच्छ महावेगं गमने वि
नतात्मज १४ न मे प्रयोजनं किंचिद्गमने पन्नगाशन निवर्तस्व महाभाग न वेगं विषहामि ते १५
गुरवे संश्रुतानीह शतान्यष्टौ हि वाजिनां एकतः श्यामकर्णानां शुभ्राणां चन्द्रवर्चसां १६ ॥

विवस्वानित्यर्थः ५ ७ खमिवारोप्यते खं वस्थाप्यतइव ८ ९ रवैः शब्दैः कारणं प्रयोजनमपि वेद्मि वेद्मि न स्मरामि १० ॥
तेन व मणीवत् इवार्थे वशब्दः १२ निर्वाप्य मदीक्षणं १४ संनिवर्तते निवर्तस्व १५ १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

योस्मान्नसंपिपार्षेःकृत्रिमःस्वेच्छासंपायःकालोमृत्युः २०।२१ निवर्तिष्यावेत्याशंसनंशोभावः २२ अध्यायः ११२ भ्रष्ट
तनजेछिन्नपतमंगंयस्यतेभ्रष्टतनजांग ४ ५९ किंनुतेमनसाध्यातमशुभंधर्मदूषणं नह्ययंभवतःस्वल्पो

तेषांचैवापवर्गायमार्गंपश्यामिनान्यथा ततोयंजीवितत्यागोदृष्टोमार्गोमयात्मनः १७
नैवमेस्तिधनंकिंचिन्नधनेनापिनःसुहृत् नचार्थेनापिमहताशक्यमेतद्व्यपोहितुं १८
नारदउ॰ एवंबहुचदीनंचब्रुवाणंगालवंतदा प्रत्युवाचव्रजन्नेवप्रहसन्विनतात्मजः १९
नातिप्रज्ञोसिविप्रर्षेयोत्मानंत्यक्तुमिच्छसि नचापिकृत्रिमःकालःकालोहिपरमेश्वरः २०
किमहंपूर्वमेवाहंभवतानाभिचोदितः उपायोत्रमहानस्तियेनैतदुपपद्यते २१ तदेवऋ
षभोनामपर्वतःसागरांतिके अत्रविश्रम्यभुक्त्वाचनिवर्तिष्यावगालव २२ इत्युद्योगप
र्वणिभगवद्यानेध्यायः ११२ नारदउ॰ ऋषभस्यततःशृंगेनिपत्यद्विजपक्षिणौ शांडिलीं
ब्राह्मणींतत्रददृशातेतपोन्वितां १ अभिवाद्यसुपर्णस्तुगालवश्चाभिपूज्यतां तयाचस्वा
गतेनोक्तौविष्टरेसंनिषीदतुः २ सिद्धमन्नंतयादत्तंबलिमंत्रोपबृंहितं भुक्त्वातृप्तावु
भौभूमौसुप्तौतावन्नमोहितौ ३ मुहूर्तात्प्रतिबुद्धस्तुसुपर्णोगमनेप्सया अथभ्रष्टतनू
जांगमात्मानंददृशेखगः ४ मांसपिंडोपमोभूत्समुखपादान्वितःखगः गालवस्तंत
थादृष्ट्वाविषण्णःपर्यपृच्छत ५ किमिदंभवताप्राप्तमिहागमनजंफलं वासोयमिह
कालंतुकियंतंनोभविष्यति ६ ॥

अभिचारोभविष्यति ७ सुपर्णोथाब्रवीद्विप्रंप्रध्यातंवैमयाद्विज इमांसिद्धामितोनेतुंतत्रयत्रप्रजापतिः
अभिचारोधर्मातिक्रमः ७ ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ शोचताकथमियमत्रवसतीति ९ १९ द्रविणावत्तरौ बलवत्तरौ १७ अपवर्गस्यफलप्राप्तेः २० निशाम्यतांविचार्य
यत्रदेवोमहादेवोयत्रविष्णुःसनातनः यत्रधर्मश्चयज्ञश्चतत्रेयंनिवसेदिति ९ सोहंभग
वतींयाचेप्रणतःप्रियकाम्यया मयैतन्नामप्रध्यातंमनसाशोचताकिल १० तदेवंबहुमा
नात्तेमयेहानीप्सितंकृतं सुकृतंदुष्कृतंवात्वंमाहात्म्यात्क्षंतुमर्हसि ११ सातौतदाब्रवीत्तु
ष्टापतगेंद्रंद्विजर्षभौ नभेतव्यंसुपर्णोसिसुपर्णत्यजसंभ्रमं १२ निंदितास्मित्वयावत्स
नचनिंदांक्षमाम्यहं लोकेभ्यःसपरिभ्रश्येद्योमांनिंदेतपापकृत् १३ हीनयालक्षणैःस
र्वैस्तथानिंदितयामया आचारंप्रतिगृह्णंत्यासिद्धिःप्राप्तेयमुत्तमा १४ आचारःफलतेध
र्ममाचारःफलतेधनं आचाराच्छ्रियमाप्नोतिआचारोहंत्यलक्षणं १५ तदायुष्मन्खगा
पतेयथेष्टंगम्यतामितः नचतेगर्हणीयापिगर्हितव्याःस्त्रियःक्वचित् १६ भवितासियथा
पूर्वंबलवीर्यसमन्वितः बभूवतुस्ततस्तस्यपक्षौद्रविणवत्तरौ १७ अनुज्ञातश्चशांडिल्यायथा
गतमुपागमत् नैवचासादयामासतथारूपांस्तुरंगमान् १८ विश्वामित्रोथतंदृष्ट्वागालवं
चाध्वनिस्थितं उवाचवदतांश्रेष्ठोवैनतेयस्यसंनिधौ १९ यस्त्वयास्वयमेवार्थःप्रतिज्ञातोम
मद्विज तस्यकालोपवर्गस्ययथावामन्यतेभवान् २० प्रतीक्षिष्याम्यहंकालमेतावंतंतथा
परं यथासंसिध्यतेविप्रसमार्गस्तुनिशाम्यतां २१ सुपर्णोथाब्रवीद्दीनंगालवंभृशदुःखितं
प्रत्यक्षंखल्विदानींमेविश्वामित्रोयदुक्तवान् २२ तदागच्छद्विजश्रेष्ठमंत्रयिष्यावगालव नाद
त्त्वागुरवेशक्यंकृत्स्नमर्थंत्वयासितुं २३ इत्युद्योगेगालवच० ११३ ॥ तां २१ २२ आसितुंस्थातुं २३ अथा

हिरण्यपदप्रवृत्तिनिमित्तमाह निर्मितमिति भूम्यंतर्गतमेव पार्थिवेषु पांसुषु वह्निना धम्यमाने पुञ्जीभवतीति वह्निना
निर्मितं वायुना वह्निरुद्दीपयता विशोधितं सर्वं जगत् हिरण्यप्रधानं तेन भूमेः सारत्वात् शुद्धत्वात् सर्वजगन्मोह
कत्वाच्च हिरण्यमित्युच्यत इत्यर्थः १ धत्ते पुष्णाति धारयते तीव्रयति २ नित्यमिति प्रोष्ठपदाभ्यामिति तत्तीयामूले
नावाहयेद्देवीमितिवत्सप्तम्यर्थे तेन तस्मिन्नक्षत्रद्वये शुक्रे वा समरे योगे सति शुक्रोऽग्निः धनपतौ कुबेरे सह स्वर्थमन

नारद उ॰ अथाह गालवं दीनं सुपर्णः पततां वरः निर्मितं वह्निना भूमौ वायुना वर्धितं तथा १
यस्माद्धिरण्मयं सर्वं हिरण्यं तेन चोच्यते धत्ते धारयते चेदमेतस्मात्कारणाद्धनं २ तदेतत्त्रि
षु लोकेषु धनं तिष्ठति शाश्वतं नित्यं प्रोष्ठपदाभ्यां च शुक्रे धनपतौ तथा ३ मनुष्येभ्यः समा
दत्ते शुक्रश्चित्तार्जितं धनं अजैकपादहिर्बुध्न्यै रक्ष्यते धनदेन च ४ एवं न शक्यते लब्धु
मलब्धव्यं द्विजर्षभ ऋते च धनमश्वानां नावाप्तिर्विद्यते तव ५ स त्वं याचात्र राजानं कंचि
द्राजर्षिवंशजं अपीड्य राजा पौरान्हि यो नौ कुर्यात्कृतार्थिनौ ६ अस्ति सोमान्ववाये मे जातः
कश्चिन्नृपः सखा अभिगच्छावहे तं वै तस्यास्ति विभवो भुवि ७ ययातिर्नाम राजर्षिर्ना
हुषः सत्यविक्रमः स दास्यति मया चोक्तो भवता चार्थितः स्वयं ८ विभवश्चास्य सुमहाना
सीद्धनपतेरिव एवं गुरुधनं विद्वन्दानेनैव विशोधय ९ तथा तौ कथयन्तौ च चिन्तयन्तौ
च यत्क्षमं प्रतिष्ठाने नरपतिं ययातिं प्रत्युपस्थितौ १० ॥

ष्येभ्यः संप्रधानेभ्यः धनं दत्ते ददाति शुक्रश्चित्तार्जितमित्यनेन वह्निरेतत्स्वत्वं तस्य प्रदर्श्यते शुक्रः काव्येऽनलेऽपि ज्येष्ठे
इति विश्वः धनार्थी उक्तनक्षत्रवारयोगे वह्निं प्रार्थयेत् तत्र धनयागादिद्वारा वा भूमौ निखननेन वा सर्वं कु
बेरस्यैव गच्छतीति भावः ३ अजेति अज एकपात् पूर्वप्रोष्ठपदा देवता अहिर्बुध्न्य उत्तरप्रोष्ठपदा देवता
धनदश्च तदध्यक्षस्तस्माद्देवता निप्रार्थ्य यतां धनं लब्धुं शक्यं नान्यथेत्यर्थः ४ ५ याचयाचस्व यो राजा नो ग्रावौ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रतिगृह्यचसत्कारैरर्घ्यपाद्यादिकंवरं पृष्टश्चागमनेहेतमुवाचविनतासुतः ११ अस्त्ये
मेनाङ्गषसखागालवस्तपसोनिधिः विश्वामित्रस्यशिष्योभूद्वर्षाण्ययुतशोनृप १२
सोयंतेनाभ्यनुज्ञातउपकारेप्सयाद्विजः तमाहभगवान्कालेददानिगुरुदक्षिणां १३
असकृत्तेनचोक्तेनकिंचिदागतमन्युना अयमुक्तःप्रयच्छेतिजानताविभवंलघु १४ ए
कतःश्यामकर्णानांशुभ्राणांशुद्धजन्मनां अष्टौशतानिमेदेहिहयानांचंद्रवर्चसां १५
गुर्वर्थोदीयतामेषयदिगालवमन्यसे इत्येवमाहसक्रोधोविश्वामित्रस्तपोधनः १६
सोयंशोकेनमहतातप्यमानोद्विजर्षभः अशक्तःप्रतिकर्तुंतद्भवंतंशरणंगतः प्रतिगृ
ह्यनरव्याघ्रत्वत्तोभिक्षांगतव्यथः कृत्वापवर्गंगुरवेचरिष्यतिमहत्तपः १८ तपसःसंवि
भागेनभवंतमपियोक्ष्यते स्वेनराजर्षितपसापूर्णंत्वांपूरयिष्यति १९ यावंतिरोमाणि
हयेभवंतीहनरेश्वर तावतोवाजिनोलोकान्प्राप्नुवंतिमहीपते २० पात्रंप्रतिग्रहस्यायं
दातुंमित्रंतथाभवान् शंखेक्षीरमिवासक्तंभवत्वेतत्तथोपमं २१ इत्युद्योगेगालवचरिते
११४ नारदउ० एवमुक्तःसुपर्णेनतथ्यंवचनमुत्तमं विमृश्यावहितोराजानिश्चित्यचपुनःपु
नः १ ॥

॥ २ ३ ४ ५ ६ ७ ८ हताशोऽतिथिरितिशेषः ९ १० ११ ॥

यष्टाक्रतुसहस्राणां दाता दानपतिः प्रभुः ययातिः सर्वकाशीशः इदं वचनमब्रवीत् २
हृष्टः प्रियसखं वत्स गालवं च द्विजर्षभं निदर्शनेन तपसा भिक्षाभ्यां च कीर्तितो
३ अतीत्य च नृपानन्यानादित्यकुलसंभवान् मत्सकाशमनुप्राप्तावेतौ बुद्धिमवेक्ष्य च
४ अद्य मे सफलं जन्म तारितं चाद्य मे कुलं अद्यायं तारितो देशो मम तार्क्ष्य त्वयानघ ५
वक्तुमिच्छामि तु सखे यथा जानासि मां पुरा न तथा वित्तवानस्मि क्षीणं वित्तं च मे सखे ६
न च शक्तोस्मि ते कर्तुं मोघमागमनं खग न चाशामस्य विप्रर्षेर्वितथीकर्तुमुत्सहे ७
तत्तु दास्यामि यत्कार्यमिदं संपादयिष्यति ८ अभिगम्य हताशो हि निवृत्तो दहते कुलं
नातः परं वैनतेय किंचित्पापिष्ठमुच्यते ९ यथाशानाशनाल्लोके देहि नास्तीति वाव
चः हताशो ह्यकृतार्थः सन्नू हतः संभावितो नरः १० हिनस्ति तस्य पुत्रांश्च पौत्रांश्चा
कुर्वतो हितं तस्माच्चतुर्णां वंशानां स्थापयित्री सुता मम ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ १३ १४ १५ १६ १७ १८ १९ २० २१ अध्याय: ११५ ॥ हर्यश्वइति १ ॥

इयंसुरसुतप्रख्यासर्वधर्मोपचायिनी सदादेवमनुष्याणामसुराणांचगालव १२ कां
क्षितान्नृपतोबालासुतामेप्रतिगृह्यतां अस्याःशुल्कंप्रदास्यंतिन्नृपाराज्यमपिध्रुवं १३
किंपुनःश्यामकर्णानांहयानांद्वेचतुःशते सभवान्प्रतिगृह्णातुममैतांमाधवींसुतां
१४ अहंदौहित्रवान्स्यांवैवरमेषममप्रभो प्रतिगृह्यवतांकन्यांगालवःसहपक्षिणा
१५ पुनर्दास्यावःसुक्त्वाप्रतस्थेसहकन्यया उपलब्धमिदंद्वारमश्वानामितिचांडजः
उक्त्वागालवमापृच्छ्यजगामभवनंस्वकं १७ गतेपतगराजेतुगालवःसहकन्यया
चिंतयानःक्षमंदानेराज्ञांवैशुल्कतोगमत् १८ सोगच्छन्मनसेक्ष्वाकुंहर्यश्वंराजसत्तमं
अयोध्यायांमहावीर्यंचतुरंगबलान्वितं १९ कोशधान्यबलोपेतंप्रियपौरंद्विजप्रियं
प्रजाभिकामंशाम्यंतंकुर्वाणंतपउत्तमं २० तमुपागम्यविप्रःसहर्यश्वंगालवोब्रवीत्
कन्येयंममराजेंद्रप्रसवैःकुलवर्द्धिनी २१ इयंशुल्केनभार्यार्थेहर्यश्वप्रतिगृह्यतां शु
ल्कंतेकीर्तयिष्यामितच्छ्रुत्वासंप्रधार्यतां २२ इतिउद्योगेभगवद्यानेगालवचरिते.११५
नारदउ॰ हर्यश्वस्त्वब्रवीद्राजाविचिंत्यबहुधाततः दीर्घमुष्णंचनिःश्वस्यप्रजाहेतोर्नृपो
त्तमः १ ॥

म० उ० टी० २२६

षट्सु करपृष्ठयोः पादपृष्ठयोः ऊरुयोश्च स्तनयोर्नितंबयोश्च तेषूच्चेति शेषः वक्षःकुक्षिललाटस्कंधकरवक्त्रे
षट्सून्नतमिति काशीखंडोक्तिः सप्तसु सूक्ष्मा त्वक्केशदशनेषु कराङ्गुलिषु पादाङ्गुलिषु तदुभयपर्वसु च सूक्ष्मा

उन्नतेषून्नता षट्सु सूक्ष्मा सूक्ष्मेषु सप्तसु गंभीरा त्रिषु गंभीरेष्वियं रक्ता च पंचसु २ ब
हुदेवासुरालोका बहुगंधर्वदर्शना बहुलक्षणसंपन्ना बहुप्रसवधारिणी ३ समर्थे
यं जनयितुं चक्रवर्तिनमात्मजं ब्रूहि शुल्कं द्विजश्रेष्ठ समीक्ष्य विभवं मम ४ गालव उ०
एकतः श्यामकर्णानां शतान्यष्टौ प्रयच्छ मे हयानां चंद्रशुभ्राणां देशजानां वपुष्मतां
५ ततस्तव भवित्रीयं पुत्राणां जननी शुभा अरणीव हुताशानां योनिरायतलोचना ६
नारद उ० स तच्छ्रुत्वा वचो राजा हर्यश्वः काममोहितः उवाच गालवं दीनो राजर्षिर्ऋषि
सत्तमं ७ द्वे मे शते संनिहिते हयानां यद्विधास्तव एष्टव्याः शतशस्त्वन्ये चरंति मम वा
जिनः ८ सोहमेकमपत्यं वै जनयिष्यामि गालव अस्यामेतं भवान्कामं संपादयतु
मे वरं ९ एतच्छ्रुत्वा तु सा कन्या गालवं वाक्यमब्रवीत् मम दत्तो वरः कश्चित्केनचिद्ब्र
ह्मवादिना १० प्रसूत्यंते प्रसूत्यंते कन्यैव त्वं भविष्यसि स त्वं ददस्व मां राज्ञे प्रतिगृह्य ह
योत्तमान् ११ ॥

त्रिषु स्वरसत्वनाभिषु गंभीरा पंचसु पाणितलनेत्रांतताल्वनिजिह्वायां अधरोष्ठे च रक्ता २ बहुभिर्देवैरसुरैश्च
आलोकयितुं योग्या बहुदेवासुरालोका गंधर्वाणां दर्शनं यस्मात्संगीतादिविद्यायस्यां सा तथा ३ ४ ॥ २२७

१२ १३ १४ २० कामतइच्छयायोगबलेनकुमारीभूत्वायौवनंपरित्यजेत्यर्थः २१ २२ अध्यायः ११६ मह १

न्टपेभ्योहिचतुर्भ्यस्तेपूर्णान्यष्टौशतानिमे भविष्यंतितथापुत्रामममचत्वारएवच १२
क्रियतामुपसंहारोगुर्वर्थोद्विजसत्तम एषातावन्ममप्रत्तायथावामन्यसेद्विज १३ एव
मुक्तस्तसमुनिःकन्ययागालवस्तदा हर्यश्वंपृथिवीपालमिदंवचनमब्रवीत् १४ इ
यंकन्यानरश्रेष्ठहर्यश्वप्रतिगृह्यतां चतुर्भागेनशुल्कस्यजनयस्वैकमात्मजं १५ प्र
तिगृह्यसतांकन्यांगालवंप्रतिनंद्यच समयेदेशकालेचलब्धवान्सुतमीप्सितं १६
ततोवसुमनानामवसुभ्योवसुमत्तरः वसुप्रख्योनरपतिःसबभूववसुप्रदः १७ अ
थकालेपुनर्धीमान्गालवःप्रत्युपस्थितः उपसंगम्यचोवाचहर्यश्वंप्रीतमानसं १८
जातोन्टपसुतस्तेयंबालोभास्करसंनिभः कालोगंतुंनरश्रेष्ठभिक्षार्थमपरंन्टपं १९
हर्यश्वःसत्यवचनेस्थितःस्थित्वाचपौरुषे दुर्लभत्वाद्धयानांचप्रददौमाधवींपुनः २०
माधवीचपुनर्दीप्तांपरित्यज्यन्टपश्रियं कुमारीकामतोभूत्वागालवंपृष्ठतोन्वगा
त् २१ त्वय्येवतावतिष्ठंतुहयाइत्युक्तवान्द्विजः प्रययौकन्ययासार्द्धंदिवोदासंप्रजे
श्वरं २२ इत्युद्योगेभगवद्यानेगालवचरितेऽध्यायः ११६ गालवउ॰ महावीर्योमही
पालःकाशीनामीश्वरःप्रभुः दिवोदासइतिख्यातोभैमसेनिर्नराधिपः १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ २ ३ ४ ५ ६ ७ ८ ९ १० अक्षमालयाअरुन्धत्या ११ १२ १३ ॥
टी॰
२२८
तत्रगत्वाववहेभद्रेस्थानेरागच्छमाशुचः धार्मिकःसंयमेयुक्तःसत्येचैवजनेश्वरः २
नारदउ॰ तमुपागम्यसम्युनिर्याच्यतस्तेनसत्कृतः गालवःप्रसवस्यार्थेतत्रपप्रच्छ
वोदयत् ३ दिवोदासउ॰ श्रुतमेतन्मयापूर्वंकिमुक्ताविस्तरैर्द्विज कांक्षितोहिमयैषो
र्थःश्रुत्वैवद्विजसत्तम ४ एतच्चमेबहुमतंयदुत्सृज्यनराधिपान् मामेवमुपयातो
सिभाविचैतदसंशयं ५ सएवविभवोस्माकमश्वानामपिगालव अहमप्येकमेवा
स्मिजनयिष्यामिपार्थिवं ६ तथेत्युक्त्वाद्विजश्रेष्ठःप्रादात्कन्यांमहीपतेः विधिपूर्वं
चतांराजाकन्यांप्रतिगृहीतवान् ७ रेमेसतस्यांराजर्षिःप्रभावत्यांयथारविःस्वा
हायांचयथावह्निर्यथाशच्यांचवासवः ८ यथाचंद्रश्चरोहिण्यांधूमोर्णायांयथा
यमः वरुणश्चयथागौर्यांयथाचर्द्ध्यांधनेश्वरः ९ यथानारायणोलक्ष्म्यांजाह्नव्यां
चयथोदधिः यथारुद्रश्चरुद्राण्यांयथावेद्यांपितामहः १० अदृश्यंत्यांचवासिष्ठोवसिष्ठ
श्चाक्षमालया च्यवनश्चसुकन्यायांपुलस्त्यःसंध्ययायथा ११ अगस्त्यश्चापिवैदर्भ्यांसा
वित्र्यांसत्यवान्यथा यथाभृगुःपुलोमायामदित्यांकश्यपोयथा १२ ऋचीकःसत्यवत्यां २२८
चसरस्वत्यांयथामनुः प्राक्रंतलापांडवोतोदस्यांधर्मस्यप्राप्तवतः १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१३ १४ १५ १६ १७ १८ १९ अध्यायः ११७ तथै १ २ ३ ४ ५ ॥

दमयंत्यांनलश्चैवसत्यवत्यांचनारदः जरत्कारुर्जरत्कार्वांपुलस्त्यस्यप्रतीच्यया १४
मेनकायांयथोर्णायुस्तुंबुरुश्चैवरंभया वासुकिःशतशीर्षायांकुमार्यांचधनंजयः
१५ वैदेह्यांचयथारामोरुक्मिण्यांचजनार्दनः तथातुरममाणस्यदिवोदासस्यभू
पतेः १६ माधवीजनयामासपुत्रमेकंप्रतर्दनं अथाजगामभगवान्दिवोदासंस
गालवः १७ समयेसमनुप्राप्तेवचनंचेदमब्रवीत् निर्यातयतुमेकन्यांभवांस्तिष्ठ
तुवाजिनः यावदन्यत्रगच्छामिशुल्कार्थंपृथिवीपते १८ दिवोदासोथधर्मात्मास
मयेगालवस्यतां कन्यांनिर्यातयामासस्थितःसत्येमहीपतिः १९ इत्युद्योगेगाल
वचरिते ११७ नारदउः तथैवतांश्रियंत्यक्त्वाकन्याभूत्वायशस्विनी माधवीगाल
वंविप्रमन्वयात्सत्यसंगरा १ गालवोविमृशन्नेवस्वकार्यंगतमानसः जगामभो
जनगरंद्रष्टुमौशीनरंनृप २ तमुवाचाथभगवान्नृपतिंसत्यविक्रमं इयंकन्या
सुतौद्वौतेजनयिष्यतिपार्थिवौ ३ अस्यांभवानवाप्तार्थोभविताप्रेत्यचेहच सो
मार्कप्रतिसंकाशौजनयित्वासुतौनृप ४ शुल्कंतुसर्वधर्मज्ञहयानांचंद्रवर्चसां
एकतःश्यामकर्णानांदेयंमह्यंचतुःशतं ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६ ७ ८ ९ प्रवणंपुत्रोत्पत्तौतत्परं १० ११ १२ १३ १४ १५ ॥

गुर्वर्थोयंसमारंभोनतुह्येषःकृत्स्नमस्तिमे यदिशक्यंमहाराजक्रियतामविचारितं ६
अनपत्योहिराजर्षेपुत्रंजनयपार्थिव पितृन्पुत्रप्लवेनत्वमात्मानंचैवधारय ७ नपु
त्रफलभोक्ताहिराजर्षेपात्यतेदिवः नयातिनरकंघोरंयथागच्छंत्यनात्मजाः ८
एतच्चान्यच्चविविधंश्रुत्वागालवभाषितं उशीनरःप्रतिवचोददौतस्यनराधिपः
९ श्रुतवानस्मितेवाक्यंयथावदसिगालव विधिस्तुबलवान्ब्रह्मन्प्रवणंहिमनो
मम १० शतेद्वेतुममाश्वानामीदृशानांद्विजोत्तम इतरेषांसहस्राणिसुबहूनिचरं
तिमे ११ अहमप्येकमेवास्माज्जनयिष्यामिगालव पुत्रंद्विजगतंमार्गंगमिष्यामि
परैरहं १२ मूल्येनापिसमंकुर्यांतवाहंद्विजसत्तम पौरजानपदार्थंतुममार्थोना
त्मभोगतः १३ कामतोहिधनंराजापारक्यंयःप्रयच्छति नसधर्मेणधर्मात्मन्यु
ज्यतेयशसानच १४ सोहंप्रतिग्रहीष्यामिददात्वेतांभवान्मम कुमारींदेवगर्भा
भामेकपुत्रभवायमे १५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१६ १७ १८ १९ २० अध्यायः ११७ गाल १ २ ३ ७ संतारेभावे हृतानि चौरैरिति शेषः ८ ॥

तथावबद्ध्वा कन्यामनुरूपं तेन राधिपं उशीनरं द्विजश्रेष्ठो गालवः प्रत्यपद्यत १६
उशीनरं प्रतिगृह्य गालवः प्रययौ वनं रेमे स तां समासाद्य कृतपुण्य इव श्रियं १७ कं
दरेषु च शैलानां नदीनां निर्झरेषु च उद्यानेषु विचित्रेषु वनेषूपवनेषु च १८ वा
तायनविमानेषु तथा गर्भगृहेषु च १९ ततोस्य समये जज्ञे पुत्रो बालरविप्रभः शि
बिर्नाम्नाभिविख्यातो यः स पार्थिवसत्तमः २० उपस्थाय च तं विप्रो गालवः प्रतिगृ
ह्य च कन्यां प्रयातस्तां राजन् दृष्टवान् विनतात्मजं २१ इत्युद्योगे गालवचरिते ११७ ॥
नारद उ० गालवं वैनतेयोथ प्रहसन्निदमब्रवीत् दिष्ट्या कृतार्थं पश्यामि भवंतमि
ह वै द्विज १ गालवस्तु वचः श्रुत्वा वैनतेयेन भाषितं चतुर्भागावशिष्टं तदाचख्यौ
कार्यमस्य हि २ सुपर्णस्त्वब्रवीदेनं गालवं वदतां वरः प्रयत्नस्तेन कर्तव्यो नैष सं
पत्स्यते तव ३ पुरा हि कन्यकुब्जे वै गाधेः सत्यवतीं सुतां भार्यार्थेवरयत्कन्यामृचीक
स्तेन भाषितः ४ एकतः श्यामकर्णानां हयानां चंद्रवर्चसां भगवन्दीयतां मह्यं सह
स्रमिति गालव ५ ऋचीकस्तु तथेत्युक्त्वा वरुणस्यालयं गतः अश्वतीर्थे हयाँल्ल
ब्ध्वा दत्तवान्पार्थिवाय वै ६ इष्ट्वा ते पुंडरीकेण दत्ता राज्ञा द्विजातिषु तेभ्यो द्वे द्वे शते क्री
त्वा प्राप्तेस्तैः पार्थिवैः सदा ७ अपराण्यपि चत्वारि शतानि द्विजसत्तम नीयमानानि संतारे

म॰उ॰
टी॰
२४०

४ ९ विर्यात्मश्वप्यशिष्यायगालवाय १६ १७ १८ ॥

एवंनशक्यमश्वाणांश्वानांगालवकर्हिचित् इमामश्वशताभ्यांवैद्वाभ्यांतस्मैनिवेद
य ९ विश्वामित्रायधर्मात्मन्षड्भिरश्वशतैःसह ततोसिगतसंमोहःकृतकृत्योद्वि
जोत्तम १० गालवस्तंतथेत्युक्त्वासुपर्णसहितस्ततः आदायाश्वांश्चकन्यांचविश्वा
मित्रमुपागमत् ११ अश्वानांकांक्षितार्थानांषडिमानिशतानिवै शतद्वयेनकन्येयं
भवताप्रतिगृह्यतां १२ अस्यांराजर्षिभिःपुत्राजातावैधार्मिकास्त्रयः चतुर्थंजनयत्वे
कंभवानपिनरोत्तमं १३ पूर्णान्येवंशतान्यष्टौतुरगाणांभवंतुते भवतोह्यनृणोभूत्वा
तपःकुर्यांयथासुखं १४ विश्वामित्रस्तुतंदृष्ट्वागालवंसहपक्षिणा कन्यांचतांवरा
रोहामिदमित्यब्रवीद्वचः १५ किमियंपूर्वमेवेहनदत्तामममगालव पुत्राममैवच
त्वारोभवेयुःकुलभावनाः १६ प्रतिगृह्णामितेकन्यामेकपुत्रफलायवै अश्वाश्चा
श्रममासाद्यचरंतुममसर्वशः १७ सतयारममाणोथविश्वामित्रोमहाद्युतिः
आत्मजंजनयामासमाधवीपुत्रमष्टकं १८ ॥

२४०

निर्यात्यप्रतर्प्य शिष्यायगालवाय २० २१ २४ अध्यायः ११८ सत १ पर्यधावतांवरान्वेषणायेत्यर्थः १ ४ वनेव

जातमात्रंसुतंतंचविश्वामित्रोमहामुनिः संयोज्यार्थैस्तथाधर्मैरश्वैस्तैःसमयोजयत् १९
अथाष्टकःपुरंप्रायात्तदासोमपुरप्रभं निर्यात्यकन्यांशिष्यायकौशिकोपिवनंययौ २०
गालवोपिसुपर्णेनसहनिर्यात्यदक्षिणां मनसाभिप्रतीतेनकन्यामिदमुवाचह २१
जातोदानपतिःपुत्रस्त्वयाशूरस्तथापरः सत्यधर्मरतश्चान्योयज्वाचापितथापरः २२
तदागच्छवरारोहेतारितस्तेपितासुतैः चत्वारश्चैवराजानस्तथाचाहंसुमध्यमे २३
गालवस्त्वभ्यनुज्ञायसुपर्णंपन्नगाशनं पितुर्निर्यात्यतांकन्यांप्रययौवनमेवह २४
इत्युद्योगेभगवद्यानेगालवचरिते॰ ११८ नारदउ॰ सतुराजापुनस्तस्याःकर्तुकामः
स्वयंवरं उपगम्याश्रमपदंगंगायमुनसंगमे १ गृहीत्वामाल्यदामांतांरथमारोप्य
माधवीं पूरुर्यदुश्चभगिनीमाश्रमेपर्यधावतां २ नागयक्षमनुष्याणांगंधर्वमृग
पक्षिणां शैलद्रुमवनौकानामासीत्तत्रसमागमः ३ नानापुरुषदेश्यानामीश्वरैश्चस
माकुलं ऋषिभिर्ब्रह्मकल्पैश्चसमंतादावृतंवनं ४ निर्दिश्यमानेषुतुसावरेषुवरव
र्णिनी वरानुत्क्रम्यसर्वांस्तान्वरंवृतवतीवनं ५ अवतीर्यरथात्कन्यानमस्कृत्वाचबं
धुषु उपगम्यवनंपुण्यंतपस्तेपेययातिजा ६ उपवासैश्चविविधैर्दीक्षाभिर्नियमैस्तथा ।
आत्मनोलघुतांकृत्वाबभूवमृगचारिणी ७ ॥ नवासं ५ ६ अत्मनःचित्तस्यलघुतां रागद्वेषादिमल

८ ९ व्याघ्राणांविशेषितंपर्यटनंयेषु १० ११ १२ १३ १४ १५ १६ १७ १८ ॥

वैडूर्यांकुरकल्पानिमृदूनिहरितानिच चरंतीशष्पमुख्यानितिक्तानिमधुराणिच
८ स्रवंतीनांचपुण्यानांसुरसानिशुचीनिच पिबंतीवारिमुख्यानिशीतानिविम
लानिच ९ वनेषुमृगराजेषुव्याघ्रविप्रोषितेषुच दावाग्निविप्रमुक्तेषुशून्येषुगह
नेषुच १० चरंतीहरिणैःसार्धंमृगीववनचारिणी चचारविपुलंधर्मंब्रह्मचर्येण
संवृतं ११ ययातिरपिपूर्वेषांराज्ञांवृत्तमनुष्ठितः बहुवर्षसहस्रायुर्युयुजेकालध
र्मणा १२ पूरुर्यदुश्चद्वौवंशौवर्धमानौनरोत्तमौ ताभ्यांप्रतिष्ठितोलोकःपरलोकेच
नाहुषः १३ महीपतेनरपतिर्ययातिःस्वर्गमास्थितः महर्षिकल्पोनृपतिःस्वर्गा
ग्र्यफलभुग्विभुः १४ बहुवर्षसहस्राख्येकालेबहुगुणेगते राजर्षिषुनिषण्णेषु
महीयस्सुमहर्षिषु १५ अवमेनेनरान्सर्वान्देवानृषिगणांस्तथा ययातिर्मूढ
विज्ञानोविस्मयाविष्टचेतनः १६ ततस्तंबुबुधेदेवःशक्रोवलनिषूदनः तेचराज
र्षयःसर्वेधिग्धिगित्येवमब्रुवन् १७ विचारश्चसमुत्पन्नोनिरीक्ष्यनहुषात्मजं को
न्वयंकस्यवाराज्ञःकथंवास्वर्गमागतः १८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१९ २० २१ २२ अध्यायः ११९ अथ १ २ ३ धर्मदूषकंपुण्यनाशकं ४ ५ ६ ७ अज्ञायसेहीनतेज

कर्मणाकेनसिद्धोयंक्षवानेनतपश्चितं कथंवाज्ञायतेस्वर्गेकेनुवाज्ञायतेप्युत १९ एवं
विचारयंतस्तेराजानेस्वर्गवासिनः दृष्ट्वापप्रच्छुरन्योन्यंययातिंनृपतिंप्रति २० विमान
पालाःशतशःस्वर्गद्वाराभिरक्षिणः दृष्ट्वाग्रासनंत्रपालाश्चनजानीमेत्ययाब्रुवन् २१ स
र्वैतेस्याच्छतज्ञानानाभ्यजानंततंनृपं सममुहूर्तोदयंनृपोहतौजाश्चाभवत्तदा २२ अध्या
यः ११९ नारदउ० अथसचलितःस्थानादासनाच्चपरिच्युतः कंपितेनैवमनसाधर्षितः
शोकवह्निना १ म्लानस्रक्भ्रष्टविज्ञानःप्रभ्रष्टमुकुटांगदः विघूर्णनस्रस्तसर्वांगःप्र
भ्रष्टाभरणांबरः २ अदृश्यमानस्तान्पश्यन्नपश्यंश्चपुनःपुनः शून्यःशून्येनमनसा
प्रपतिष्यन्महीतले ३ किंमयामनसाध्यातमशुभंधर्मदूषणं येनाहंचलितःस्थाना
दितिराजाव्यचिंतयत् ४ नततत्रैवराजानःसिद्धाश्चाप्सरसस्तथा अपश्यंतनिरालं
बंतंययातिंपरिच्युतं ५ अथैत्यपुरुषःकश्चित्क्षीणपुण्यनिपातकः ययातिमब्रवी
द्राजन्देवराजस्यशासनात् ६ अतीवमदमत्तस्त्वंनकिंचिन्नावमन्यसे मानेनभ्रष्ट
स्वर्गस्तेनार्हस्त्वंपार्थिवात्मज ७ नचप्रज्ञायसेराजच्युतस्त्वेतितमब्रवीत् पतेयंसत्स्वि
तिवचस्त्रिरुक्त्वानहुषात्मजः ८ ॥

स्तेनअप्रकाशत्वात् ८ ॥ ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
२५२

९ शिविरौशीनरः इत्येकः १० ११ एकः इष्टान् पादपूरणार्थः गंगां नदीमिव धूममयीं लेखामालंब्य निपपा

पतिष्यंश्चिंतयामास गतिं गतिमतां वरः एतस्मिन्नेव काले तु नैमिषे पार्थिवर्षभान् ९
चतुरोपश्यत नृपांस्तेषां मध्ये पपात ह प्रतर्दनो वसुमनाः शिबिरौशीनरोष्टकः १०
वाजपेयेन यज्ञेन तर्पयंति सुरेश्वरं तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितं ययातिरु
पजिघ्रन्वै निपपात महीं प्रति ११ भूमौ स्वर्गे च संबद्धां नदीं धूममयीमिव गंगां गामि
वागच्छंतीमालंब्य जगतीपतिः १२ श्रीमत्स्ववभृथाग्र्येषु चतुर्षु प्रतिबंधुषु मध्ये नि
पतितो राजा लोकपालोपमेषु सः १३ चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु पपा
त मध्ये राजर्षिर्ययातिः पुण्यसंक्षये १४ तमाहुः पार्थिवाः सर्वे दीप्यमानमिव श्रिया
को भवान्कस्य वा बंधुर्देशस्य नगरस्य वा १५ यक्षो वाप्यथवा देवो गंधर्वो राक्षसोपि वा न
हि मानुषरूपोसि को वार्थः कांक्षते त्वया १६ ययातिरु॰ ययातिरस्मि राजर्षिः क्षी
णपुण्यश्च्युतो दिवः पतेयं सत्स्विति ध्यायन्भवत्सु पतितस्ततः १७ राजान ऊचुः
सत्यमेतद्भवतु ते कांक्षितं पुरुषर्षभ सर्वेषां नः क्रतुफलं धर्मश्च प्रतिगृह्यतां १८

तेति संबंधः ११ प्रतिबंधुषु दौहित्ररूपेषु १३ १४ बंधुः पालयिता १५ १६ १७ १८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१९ २० २३ पुरातनेअनादिकालप्रवृत्तेवेदे २४ २० अष्टभागेनअष्टमांशेन २८ अध्यायः १२० ॥ श्लो १ २

ययातिरु॰ नाहं प्रतिग्रहधनो ब्राह्मणः क्षत्रियो ह्यहं नच मे प्रवणा बुद्धिः परपुण्यविनाशने
१९ नारद उ॰ एतस्मिन्नेव काले तु मृगचर्याक्रमागता माधवी प्रेक्ष्य राजानस्तेऽभिवाद्येदमब्रु
वन् २० किमागमनकृत्यं ते किं कुर्मः शासनं तव आज्ञाप्या हि वयं सर्वे तव पुत्रास्तपोधने २१
तेषां तद्भाषितं श्रुत्वा माधवी परया मुदा पितरं समुपागच्छद्ययातिं साववंदच २२ स्पृष्ट्वा
मूर्धनि तान्पुत्रांस्तापसी वाक्यमब्रवीत् दौहित्रास्तव राजेंद्र मम पुत्रा न ते पराः २३ इमे त्वां ता
रयिष्यंति दिष्टमेतत्पुरातने अहं ते दुहिता राजन्माधवी मृगचारिणी २४ मयाप्युपचितो
धर्मस्ततोऽर्धं प्रतिगृह्यतां यस्माद्राजन्नराः सर्वे अपत्यफलभागिनः २५ तस्मादिच्छंति
दौहित्रान्यथा त्वं वसुधाधिप ततस्ते पार्थिवाः सर्वे शिरसा जननीं तदा २६ अभिवाद्य न
मस्कृत्य मातामहमथाब्रुवन् उच्चैरनुपमैः स्निग्धैः स्वरैरापूर्य मेदिनीं २७ मातामहंर
पतयस्तारयंतो दिवश्च्युतं अथ तस्मादुपगतो गालवोप्याह पार्थिव तपसो मेऽष्टभागेन
स्वर्गमारोहतां भवान् २८ इत्युद्योगपर्वणि भगवद्याने गालवचरितेऽध्यायः १२० नारद
उ॰ प्रत्यभिज्ञातमात्रोऽथ सद्भिस्तैर्नरपुंगवैः समारुरोह नृपतिरस्पृशन्वसुधातलं य
यातिर्दिव्यसंस्थानो बभूव विगतज्वरः १ दिव्यमाल्यांबरधरो दिव्याभरणभूषितः दि
व्यगंधगुणोपेतो न पृथ्वीमस्पृशत्तदा २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३ ४ आथानेग्रस्याथानोपलक्षितेनश्रोतधर्मे ५ ६ वैहार्येष्वपरिहासेनलालनीयेषु स्मालसंबंध्यादिषु ७ संक

ततोवसुमनाःपूर्वमुच्चैरुच्चारयन्वचः ख्यातोदानपतिर्लोकेआजहारवृषंतदा ३ प्रा
प्तवानस्मिंयल्लोकेसर्ववर्णेष्वगर्हया तदप्यथचदास्यामितेनसंयुज्यतांभवान् ४ ततः
शतर्दनोप्याहवाक्यंतत्रियपुंगवः यथाधर्मरतिर्नित्यंनित्यंयुद्धपरायणः ५ प्राप्तवान
स्मिंयल्लोकेतत्रवंशोद्भवंयशः वीरशब्दफलंचैवतेनसंयुज्यतांभवान् ६ शिविरौशी
नरोधीमानुवाचमधुरांगिरं यथाबालेषुनारीषुवैहार्येषुतथैवच ७ संगरेषुनिपा
तेषुतथापद्यसनेषुच अनृतंनोक्तपूर्वंमेतेनसत्येनखंव्रज ८ यथाप्राणांश्चराज्यंच
राजन्कर्मसुखानिच त्यजेयंनपुनःसत्यंतेनसत्येनखंव्रज ९ यथासत्येनमेधर्मो
यथासत्येनपावकः प्रीतःशतक्रतुश्चैवतेनसत्येनखंव्रज
१० ॥

टेषुव्यसनेषुद्यूतादिषुखंस्वर्गं ९ १० ॥ १० ॥ २६३

११ १२ १३ १४ १५ १६ १७ १८ अध्यायः १२१ सद्भिः १ वर्षेणाभिवृष्टा २ ३ ४ ५ ॥

अष्टकस्त्वथराजर्षिः कौशिकोमाधवीसुतः अनेकशतयज्वानंनाहुषंप्राप्यधर्मवित् ११
शतशःपुंडरीकामेगोसवाश्चरिताःप्रभो क्रतवोवाजपेयाश्चतेषांफलमवाप्नुहि १२ नमे
रत्नानिनधनंनतथान्येपरिच्छदाः क्रतुष्वनुपयुक्तानितेनसत्येनत्वंव्रज १३ यथायथा
हिजल्पंतिदौहित्रास्तंनराधिपं तथातथावसुमतींत्यक्त्वाराजादिवंययौ १४ एवंसर्वेस
मस्तास्तेराजानःसुकृतैस्तदा ययातिंस्वर्गतोभ्रष्टंतारयामासुरंजसा १५ दौहित्राःस्वेनध
र्मेणयज्ञदानकृतेनवै चतुर्षुराजवंशेषुसंभूताःकुलवर्धनाः मातामहंमहाप्राज्ञंदि
वमारोपयंतिते १७ राजानऊचुः राजधर्मगुणोपेताःसर्वधर्मगुणान्विताः दौहित्रास्तेव
यंराजन्दिवमारोहपार्थिव १८ इत्युद्योगेभगवद्यानेगालवचरितेऽध्यायः १२१ नारदउ॰
सद्भिरारोपितःस्वर्गंपार्थिवैर्भूरिदक्षिणैः अभ्यनुज्ञायदौहित्रान्ययातिर्दिवमास्थितः १
अभिवृष्टश्चवर्षेणनानापुष्पसुगंधिनापरिष्वक्तश्चपुण्येनवायुनापुण्यगंधिना २ अच
लंस्थानमासाद्यदौहित्रफलनिर्जितं कर्मभिःस्वैरुपचितोजज्वालपरयाश्रिया ३ उप
गीतोपनृत्तश्चगंधर्वाप्सरसांगणैः प्रीत्याप्रतिगृहीतश्चस्वर्गेदुंदुभिनिःस्वनैः ४ अभिष्टु
तश्चविविधैर्देवराजर्षिचारणैः अर्चितश्चोत्तमार्घेणदैवतैरभिनंदितः ५ प्राप्तःस्व
र्गफलंचैवतमुवाचपितामहः निर्वृतंशांतमनसंवचोभिस्तर्पयन्निव ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

चतुष्पादः तपोयज्ञज्ञानदानवान् अहिंसासत्यमस्तेयमानृशंस्यंचेतिवापादाः ७ स्वकृतेनसम्यक्संपादितेनक
र्मणामयासमोन्योनास्तीतिवाक्ययोगेनतमसाक्रोधेननाभिजानंतिश्रेष्ठोयमितिनांगीकुर्वंतिततोहेतोःअ

चतुष्पादस्त्वयाधर्मश्चितोलोक्येनकर्मणा अक्षयस्तवलोकोयंकीर्तिश्चैवाक्षयादिवि
पुनस्त्वयैवराजर्षेस्वकृतेनविघातितं आवृतंतमसाचेतःसर्वेषांस्वर्गवासिनां ८ ये
नत्वानाभिजानंतिततोज्ञातोसिपातितः प्रीत्यैवचासिदौहित्रैस्तारितस्त्वमिहागतः ९
स्थानंचप्रतिपन्नोसिकर्मणास्वेननिर्जितं अचलंशाश्वतंपुण्यमुत्तमंध्रुवमव्ययं १०
ययातिरुवाच भगवन्संशयोमेस्तिकश्चित्तंछेत्तुमर्हसि नह्यन्यमहमर्हामिप्रष्टुंलो
कपितामह ११ बहुवर्षसहस्रांतंप्रजापालनवर्धितं अनेकक्रतुदानौघैरर्जितंमेमह
त्फलं ११ कथंतदल्पकालेनक्षीणंयेनास्मिपातितः भगवन्वेत्स्यलोकांश्चशाश्वतान्
ममनिर्मितान् १२ कथंनुममतत्सर्वंविप्रणष्टंमहाद्युते पितामह३ बहुवर्षसहस्रां
तंप्रजापालनवर्द्धितं अनेकक्रतुदानौघैर्यत्त्वयोपार्जितंफलं १३ ॥

१४ मायाऽद्भुतार्थप्रदर्शनेनरंजनपूर्वकंपरवंचनं १५ पाठांतरेसमोनास्ति १६ २० पापिष्टत्वेनत्वत्कृतंपापंत्वय्येवभो
क्तव्यंनतुभ्रात्रादिभिरित्याशयेनाह ददातीतिकिंतुकर्त्तैवतदाप्नोति २१ बहुधानानाशास्त्रयुक्त्यादिभिःअ।
तदनेनैवदोषेणात्तीर्णायेनास्मिपातितः अभिमानेननराजेंद्रधिक्कृतःस्वर्गवासिभिः १४ नाधि
मानेनराजर्षेनबलेननहिंसया नशाठ्येननमायाभिर्लोकोभवतिशाश्वतः १५ नावमान्या
स्त्वयाराजन्नधमोत्कृष्टमध्यमाः नहिमानप्रदग्धानांकश्चिदस्तिशमःक्वचित् १६ यत्न
नारोहणमिदंकथयिष्यंतियेनराः विषमाण्यपितेप्राप्तास्तरिष्यंतिनसंशयः १७ नारदः
एषदोषोभिमानेनपुराप्राप्तोययातिना निर्बध्नतातिमात्रंचगालवेनमहीपते १८ श्रोतव्यं
हितकामानांसुहृदांहितमिच्छतां नकर्त्तव्योहिनिर्बंधोनिर्बंधोहितयोदयः १९ तस्मा
त्त्वमपिगांधारेमानंक्रोधंचवर्जय संधत्स्वपांडवैर्वीरसंरंभंत्यजपार्थिव २० ददातियत्पा
र्थिवयत्करोतियत्तपस्तप्यतियज्जुहोति नतस्यनाशोस्तिनचापकर्षोनान्यस्तदश्ना
तिसएवकर्त्ता २१ इदंमहाख्यानमनुत्तमंहितंबहुश्रुतानांगतरोषरागिणां समीक्ष्यलो
केबहुधाप्रधारितंत्रिवर्गदृष्टिःपृथिवीमुपाश्नुते २२ इत्युद्योगपर्वणिभगवद्यानेगाल
वचरिते १२२ धृतराष्ट्रः भगवन्नेवमेवैतद्यथावदसिनारद इच्छामिचाहमप्येवंनत्वी
शोभगवन्नहं १ वैशंपायनः एवमुक्त्वाततःकृष्णमभ्यभाषतकौरवः स्वर्ग्यंलोक्यंचमामा
त्थधर्म्यंन्याय्यंचकेशव २ ॥

यारितेनिश्चितं २२ अध्यायः १२२ भग १ २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नत्वहंस्ववशस्तातक्रियमाणंनमेप्रियं अंगदुर्योधनंकृत्स्नमंदशास्त्रातिगंमम ३ अन
नेतेमहाबाहोयतस्त्वंपुरुषोत्तम नशृणोतिमहाबाहोवचनंसाधुभाषितः ४ गांधार्या
श्चहृषीकेशविदुरस्यचधीमतः अन्येषांचैवसुहृदांभीष्मादीनांहितैषिणां ५ सत्वंपा
पमतिंक्रूरंपापचित्तमचेतनं अनुशाधिदुरात्मानंस्वयंदुर्योधनंनृप ६ सुहृत्कार्यंतुस
महत्कृतंतस्याज्जनार्दन ततोभ्याहृत्यवार्ष्णेयोदुर्योधनममर्षणं अब्रवीन्मधुरांवाचं
सर्वधर्मार्थतत्ववित् दुर्योधननिबोधेदंमद्वाक्यंकुरुसत्तम ८ शमार्थंतेविशेषेणसानु
बंधस्यभारत महाप्राज्ञकुलेजातःसाध्वेतत्कर्त्तुमर्हसि ९ श्रुतवृत्तोपसंपन्नःसर्वैःस
मुदितोगुणैः दौष्कुलेयादुरात्मानोनृशंसानिरपत्रपाः १० यएतदीदृशंकर्मयथात्वंता
तमन्यसे धर्मार्थयुक्तालोकेस्मिन्प्रवृत्तिर्लक्ष्यतेसतां ११ असतांविपरीतातुलक्ष्यतेभ
रतर्षभ विपरीतात्वियंदृष्टाअसकृत्लक्ष्यतेत्वयि १२ अधर्मश्चानुबंधोत्रघोरःप्राणहरो
महान् अनिष्टश्चानिमित्तश्चनचशक्यश्चभारत १३ तमनर्थंपरिहरन्नात्मश्रेयःकरिष्य
सि भ्रातॄणामथभृत्यानांमित्राणांचपरंतप १४ ॥

१७ १८ २०।२१ शास्त्रेशासने १९ किंपाकंमहाकालफलं २२ २३ निःश्रेयसंकल्याणं २४ अर्थकामस्यइच्छार्थिनः

अधर्मोदयशास्मात्त्वंकर्मणस्तवश्रमोसमे प्राज्ञैःशूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः १५
संधत्स्वपुरुषव्याघ्रपाण्डवैर्भरतर्षभ तद्धितंचप्रियंचैवधृतराष्ट्रस्यधीमतः १६ पितामह
स्यद्रोणस्यविदुरस्यमहामतेः कृपस्यसोमदत्तस्यवाह्लीकस्यचधीमतः १७ अश्वत्थाम्नो
विकर्णस्यसंजयस्यविविंशतेः ज्ञातीनांचैवभूयिष्ठंमित्राणांचपरंतप १८ शमेशर्मभवे
तातसर्वस्यजगतस्तथा ह्रीमानसिकुलेजातःश्रुतवाननृशंसवान् १९ तिष्ठतातपितुः
शास्त्रेमातुश्चभरतर्षभ १९ एतच्छ्रेयोहिमन्यंतेपितायच्छास्तिभारत उत्तमापद्गतःसर्वः
पितुःस्मरतिशासनं २० रोचतेतेपितुस्तातपाण्डवैःसहसंगमः सामात्यस्यकुरुश्रेष्ठतत्तुभ्यं
तातरोचतां २१ श्रुत्वायःसुहृदांशास्त्रंमर्त्योनप्रतिपद्यते विपाकांतेदहत्येनंकिंपाक
मिवभक्षितं २२ यस्तुनिःश्रेयसंवाक्यंमोहान्नप्रतिपद्यते सदीर्घसूत्रोहीनार्थःपश्चा
त्तापेनयुज्यते २३ यस्तुनिःश्रेयसंश्रुत्वाप्राक्तदेवाभिपद्यते आत्मनोमतमुत्सृज्यसलो
केसुखमेधते २४ योर्थकामस्यवचनंप्रातिकूल्यान्नमृष्यते शृणोतिप्रतिकूलानिद्विष
तांवशमेतिसः २५ सतांमतमतिक्रम्ययोऽसतांवर्ततेमते शोचंतेव्यसनेतस्यसुहृदोन
चिरादिव २६ ॥ २५ २६ ॥ ॥

२७ २८ २९ ३० ३१ उपचरिताः प्रतारिताः ३२ ३३ ३४ अर्थकलिं कलहहेतुं ३५ अनुपायेन हीनोपायेन ३६

मुख्यानमात्याननुसृज्ययोनिहीनान्निषेवते सघोरामापदंप्राप्यनोत्तारमधिगच्छति २७ योः
सत्सेवीतृष्णयाचारोनश्रोतासुहृदांसतां परानवृणीतेस्वान्द्वेष्टितंगौस्त्यजतिभारत २८ सर्वं
विरुध्यतेवीरैरन्येभ्यस्त्राणमिच्छसि अशिष्टेभ्योःसमर्थेभ्योमूढेभ्योभरतर्षभ २९ कोहि
शक्रसमानज्ञातीनतिक्रम्यमहारथान् अन्येभ्यस्त्राणमाशंसेत्वदन्योभुविमानवः ३०
जन्मप्रभृतिकौन्तेयानित्यंविनिकृतास्त्वया नचतेजातुकुप्यंतिधर्मात्मानोहिपाण्डवाः ३१
मिथ्योपचरितास्तातजन्मप्रभृतिबांधवाः त्वयिसम्यङ्महाबाहोप्रतिपन्नायशस्विनः ३२
त्वयापिप्रतिपत्तव्यंतथैवभरतर्षभ स्वेषुबंधुषुमुख्येषुमामन्युवशमन्वगाः ३३ त्रिवर्ग
युक्तःप्राज्ञानामारंभोभरतर्षभ धर्मार्थावनुरुध्यंतेत्रिवर्गासंभवेनराः ३४ पृथक्चविनि
विष्टानांधर्मंधीरोनुरुध्यते मध्यमोर्थंकलिंबालःकाममेवानुरुध्यते ३५ इंद्रियैःप्राकृ
तोलोभाद्धर्मंविप्रजहातियः कामार्थावनुपायेन
लिप्समानोविनश्यति ३६ ॥

४७ ४८ छिंद्यात् लोभादिना दूषयेत् ४९ ५० छिद्यते प्रमाणमार्गात् च्युतो भवतीत्यर्थः प्रमाणं लोकवेदप्रसिद्धं दुर्ज

कामार्थौ लिप्समानस्तु धर्ममेवादितश्चरेत् नहि धर्मादपैत्यर्थः कामो वापि कदाचन ४७
उपायं धर्ममेवाहुस्त्रिवर्गस्य विशांपते लिप्समानो हि तेनाशु कक्षेऽग्निरिव वर्धते ४८ स त्वं
तातानुपायेन लिप्ससे भरतर्षभ अधिराज्यं महद्दीप्तं प्रथितं सर्वराजसु ४९ आत्मानं तक्ष
ति ह्येष वनं परशुना यथा यः सम्यग्वर्तमानेषु मिथ्या राजन्प्रवर्तते ५० न तस्य हि मतिं छिं
द्याद्यस्य नेच्छेत्पराभवं अविच्छिन्नमतेरस्य कल्याणे धीयते मतिः ५१ आत्मवान्नावमन्ये
त त्रिषु लोकेषु भारत अप्यन्यं प्राकृतं किंचित्किमु तान्पाण्डवर्षभान् ५२ अमर्षवशमा
पन्नो न किंचिद्बुध्यते जनः छिद्यते ह्याततं सर्वं प्रमाणं पश्य भारत ५३ श्रेयस्ते दुर्जनात्ता
त पाण्डवैः सह संगतं तैर्हि संप्रीयमाणस्त्वं सर्वान्कामानवाप्स्यसि ५४ पाण्डवैर्निर्मितां
भूमिं भुञ्जानो राजसत्तम पाण्डवान्पृष्ठतः कृत्वा त्राणमाशंससेऽन्यतः ५५ दुःशासने दुर्वि
षहे कर्णे चापि ससौबले एतेष्वैश्वर्यमाधाय भूतिमिच्छसि भारत ५६ न चैते तव प
र्याप्ता ज्ञाने धर्मार्थयोस्तथा विक्रमे चाप्यपर्याप्ताः पाण्डवान्प्रति भारत ५७ न हीमे स
र्वे राजानः पर्याप्ताः सहितास्त्वया क्रुद्धस्य भीमसेनस्य प्रेक्षितुं मुखमाहवे ५८ ॥

नात् संगिनः पाण्डवैः संगतं श्रेयः ५३ ५४ निर्मितां वशीकरणेनोत्पादितां ५५ ५६ ५७ ५८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०उ० टी० २४७

४९ ५० ५१ ५२ यस्मिन्नर्जुनेजितेसर्वतितेतवजितंजयःस्यात् ५३ ५४ ५५ ५६ ५७ ५८ ५९ ६० ॥

इदंसंनिहितंतातसमग्रंपार्थिवंबलं अयंभीष्मस्तथाद्रोणःकर्णश्चायंतथाकृपः ४९ भूरिश्रवाः
सोमदत्तिरश्वत्थामाजयद्रथः अशक्ताःसर्वएवैतेप्रतियोद्धुंधनंजयं ५० अजेयोह्यर्जुनःसंख्ये
सर्वैरपिसुरासुरैः मानुषैरपिगंधर्वैर्मायुद्धेचेतआधिथाः ५१ दृष्टपूर्वोवापुमान्कश्चित्समग्रे
पार्थिवेबले योर्जुनंसमरेप्राप्यस्वस्तिमानाव्रजेद्गृहान् ५२ किंतेजनेनतयेनेहकृतेनभरत
र्षभ यस्मिन्जितेजितंतेस्यात्पुमानेकःसदृश्यतां ५३ यःसदेवान्सगंधर्वान्सयक्षासुरप
न्नगान् अजयत्खांडवप्रस्थेकस्तंयुध्येतमानवः ५४ तथावैराटनगरेश्रूयतेमहदद्भु
तं एकस्यचबहूनांचपर्याप्तंतन्निदर्शनं ५५ युद्धेयेनमहादेवःसाक्षात्संतोषितःशिवः त
मजेयमनाधृष्यंविजेतुंजिष्णुमच्युतं आशंससीहसमरेवीरमर्जुनमूर्जितं ५६ मद्दिती
यंपुनःपार्थंकःप्रार्थयितुमर्हति युद्धेप्रतीपमायांतमपिसाक्षात्पुरंदरः ५७ बाहुभ्यामुद्ध
रेद्भूमिंदहेत्क्रुद्धइमाःप्रजाः पातयेत्त्रिदिवाद्देवान्योर्जुनंसमरेजयेत् ५८ पश्यपुत्रांस्त
थाभ्रातॄन्ज्ञातीन्संबंधिनस्तथा त्वत्कृतेनविनश्येयुरिमेभरतसत्तमाः ५९ अस्तुशे..
षंकौरवाणांमापराभूदिदंकुलं कुलघ्नइतिनोच्येथानष्टकीर्तिर्नराधिप ६० ॥

२४७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२१ ६२ अध्यायः कृत्स्नवाक्यं १२३ ततइति १ २ ३ मानीनशः मानाशय ४ ७ कुलघ्नोमाभूरितिश्लोकः ८ ९ ॥१०

त्वामेवस्थापयिष्यंतिपौरवाराज्येमहारथाः महाराज्येपिपितरंधृतराष्ट्रंजनेश्वरं ६१ मा
तातश्रियमायांतीमवमंस्थाःसमुद्यतां अर्धंप्रदायपार्थेभ्योमहतींश्रियमाप्नुहि पा
ण्डवैःसंशमंकृत्वाकृत्वाचसुहृदांवचः संप्रीयमाणोमित्रैश्चचिरंभद्राण्यवाप्स्यसि ६२
इत्युद्योगेभगवद्यानेभगवद्वाक्यं १२३ वैशंपायनउ० ततःशांतनवोभीष्मोदुर्योधन
ममर्षणंकेशवस्यवचःश्रुत्वाप्रोवाचभरतर्षभ १ कृष्णेनवाक्यमुक्तोसिसुहृदांश
मिच्छता अनुपश्यस्वतत्तातमामन्युवशमन्वगाः २ अकृत्वावचनंतातकेशव
स्यमहात्मनः श्रेयोनजातुनसुखंनकल्याणमवाप्स्यसि ३ धर्म्यमर्थ्यंमहाबाहु
राहत्वांतातकेशवः तदर्थमभिपद्यस्वमाराजन्नीनशःप्रजाः ४ ज्वलितांत्वमिमांल
क्ष्मींभारतींसर्वराजसु जीवतोधृतराष्ट्रस्यदौरात्म्याद्भ्रंशयिष्यसि ५ आत्मानंचसहा
मात्यंसपुत्रभ्रातृबांधवं अहमित्यनयाबुद्ध्याजीविताद्भ्रंशयिष्यसि ६ अतिक्रामन्
केशवस्यतथ्यंवचनमर्थवत् पितुश्चभरतश्रेष्ठविदुरस्यचधीमतः ७ माकुलघ्नः
कुपुरुषोदुर्मतिःकापथंगमः मातरंपितरंचैवमामज्जीःशोकसागरे ८ अथद्रोणो
ब्रवीत्तत्रदुर्योधनमिदंवचः अमर्षवशमापन्नंनिश्वसंतंपुनःपुनः ९ धर्मार्थयुक्तंव
चनमाहत्वांतातकेशवः तथाभीष्मःशांतनवस्तज्जुषस्वनराधिप १० ॥

॥ १२ एतेकर्णादयःकृत्यायजयायपरेषांअस्मदादीनां १३ माजीघनःमाघातयत्रतानअजेयान्विद्धि १४ १५

प्राज्ञोमेधाविनोदान्तोह्यर्थकामोबहुश्रुतः प्राहत्वांहितंवाक्यंतज्जुषस्वनराधिप।
प ११ अनुतिष्ठमहाप्राज्ञकृष्णभीष्मोयदूचतुः माधवंबुद्धिमोहेनमावमंस्थाःपरंत
प १२ येत्वांप्रोत्साहयन्त्येतेनैतेकृत्यायकर्हिचित् वैरंपरेषांग्रीवायांप्रतिमोक्ष्यन्ति
संयुगे १३ माजीघनःप्रजाःसर्वाःपुत्रान्भ्रातॄंस्तथैवच वासुदेवार्जुनौयत्रविद्ध्यजे
यंबलंहितत् १४ एतच्चैवमतंसत्यंसुहृदोःकृष्णभीष्मयोः यदिनादास्यसेतात।
पश्चात्तप्स्यसिभारत १५ यथोक्तंजामदग्न्येनभूयानेषततोऽर्जुनः कृष्णोहिदेवकी
पुत्रोदेवैरपिदुःसहः किंतेसुखप्रियेणेहप्रोक्तेनभरतर्षभ १६ एतत्तेसर्वमाख्या
तंयथेच्छसितथाकुरु नहित्वामुत्सहेवक्तुंभूयोभरतसत्तम १७ वैशंपायनः
तस्मिन्वाक्यान्तरेवाक्यंततोपिविदुरोऽब्रवीत् दुर्योधनमभिप्रेक्ष्यधार्तराष्ट्रममर्ष
णं १८ दुर्योधननशोचामित्वामहंभरतर्षभ इमौतुवृद्धौशोचामिगान्धारींपितरं
च ते १९ ॥

सात्वंहितावहंप्रियंचन्यायोपेतत्वात् तेनसुखप्रियेणप्रोक्तेनवचनेनतवमहत्त्वस्यकिंनकिमपीत्य
र्थः १८ १९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२॰ २२ स्वसंहतः स्वष्टुएकीभूतः २४ २५ तीर्थेनउपायेन २॰ अपराभवोजयः २८ अध्यायः १४४ मेधाग्नौसंग्रामाग्नौ

यावन्नाथोचरिष्यतेत्वयानाथेनदुर्हृदा हतमित्रोहतामात्योलग्नपत्नाविवांडजो २० भिन्न
नौर्विचरिष्यतेप्राचंनोपृथिवीमिमां कुलघ्नमीदृशंपापंजनयित्वाकुपूरुषं २१ अथदुर्यो
धनंराजाधृतराष्ट्रोभ्यभाषत आसीनंभ्रातृभिःसार्द्धंराजभिःपरिवारितं २२ दुर्योधननि
बोधेदंशौरिणोक्तंमहात्मना आदत्स्वशिवमत्यंतंयोगक्षेमवदव्ययं अनेनहिसहायेन।
कृष्णेनाक्लिष्टकर्मणा इष्टान्सर्वानभिप्रायान्प्राप्स्यामःसर्वराजसु २४ सुसंहितःकेश
वेनतातगच्छयुधिष्ठिरं चरस्वस्त्ययनंकृत्स्नंभरतानामनामयं २५ वासुदेवेनतीर्थेन
तातगच्छस्वसंशमं कालप्राप्तमिदंमन्येमात्वंदुर्योधनातिगाः २६ शमंचेद्याचमानंत्वंप्र
त्याख्यास्यसिकेशवं त्वदर्थमभिजल्पंतंनतवास्त्यपराभवः २८ इत्युद्योगेभगवद्याने १४४
वैशंपायन उ॰ धृतराष्ट्रवचःश्रुत्वाभीष्मद्रोणौसमव्यथौ दुर्योधनमिदंवाक्यमूचतुःशा
सनातिगं १ यावत्कृष्णावसंनद्धौयावत्तिष्ठतिगांडिवं यावद्धौम्योनमेधाग्नौजुहोतीह
द्विषद्बलं २ यावन्नप्रेक्षतेक्रुद्धःसेनांतवयुधिष्ठिरः ह्रीनिषेवोमहेष्वासस्तावच्छाम्यतु
वैशसं ३ यावन्नदृश्यतेपार्थःस्वेष्वनीकेष्ववस्थितः भीमसेनोमहेष्वासस्तावच्छाम्यतु
वैशसं ४ यावन्नचरतेमार्गान्पृतनामभिघर्षयन् भीमसेनोगदापाणिस्तावत्संशाम्यपांड
॥वैः ५॥

मेधाग्निःयान्येवसंग्रामनामानितानियज्ञनामानीतियास्कः १ २ ३ ४ ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६ १ ८ वेणुमंवेरं ९ उरस्तुनिपात्यंतश्तिसंबंधः १ ११ रत्नयुक्ताओषधिवद्दृश्यतीतिरत्नौषधिःरत्नांगुली
यकं रत्नावंधसमेतेनेतिपाठःस्वच्छः आवंधोदृढबंधस्मात् प्रेमालंकारयोरपीतिविश्वः रत्नालंकारेण

यावन्नपश्यतपार्थोशिरांसिगजयोधिनां गदयावीरघातिन्याफलानीववनस्पतेः
६ कालेनपरिपक्वानितावच्छाम्यतवैशसं नकुलःसहदेवश्चधृष्टद्युम्नश्चपार्षतः
७ विराटश्चशिखंडीचशैशुपालिश्चदंशितः यावन्नप्रविशंत्येतेनक्राइवमहार्णवं ८
कृतास्त्राःक्षिप्रमभ्येत्यतावच्छाम्यतवैशसं यावन्नसुकुमारेषुशरीरेषुमहीक्षितां
९ गार्ध्रपत्राःपतंत्युग्रास्तावच्छाम्यतवैशसं १ चंदनागुरुदिग्धेषुहारनिष्कधरेषु
च नोरस्सुयावद्योधानांमहेष्वासैर्महेषवः १० कृतास्त्रैःक्षिप्रमस्यद्भिर्दूरपातिभिराय
साः अभिलक्ष्यैर्निपात्यंतेतावच्छाम्यतवैशसं ११ अभिवादयमानंत्वांशिरसाराजकुंज
रः पाणिभ्यांप्रतिगृह्णातुधर्मराजोयुधिष्ठिरः १२ ध्वजांकुशपताकांकंदक्षिणंतेसु
दक्षिणः स्कंधेनिक्षिपतांबाहुंशांतयेभरतर्षभ १३ रत्नौषधिसमेतेनरत्नांगुलित
लेनच उपविष्टस्यपृष्ठंतेपाणिनापरिमार्जतु १४ ॥

रत्नैःप्रेमणाचसमेतेनचेतिभावः २
तवदारकानिश्चंगुलितलानियस्यतेनरत्नांगुलितलेन १४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सजानः वक्तिसंमिलितः स्वजपरिषद्गो १५ १७ सर्वसंपत्तपरस्परंप्रीतिः १८ अध्यायः १२५ १ प्रसमीक्ष्यविचार्य विभा

शालस्कंधो महाबाहुस्त्वां सजातो वृकोदरः सान्त्वाभिवदन्तो चापिशान्तये भरतर्षभ १५ अर्जु
नेन यमाभ्यां च त्रिभिस्तैरभिवादितः मूर्ध्नि तान्समुपाघ्राय प्रेम्णाभिवद पार्थिव १६ दृष्ट्वा
त्वा पाण्डवैर्वीरैः प्रीतिभिः सह संगतं यावदानन्दजाश्रूणि प्रमुञ्चन्तु नराधिपाः १७ घुष्यतां
राजधानीषु सर्वसंपन्महीक्षितां पृथिवी भ्रातृभावेन भुज्यतां विज्वरो भव १८ इत्युद्योग
भगवद्याने १२५ वैशंपायन उ० श्रुत्वा दुर्योधनो वाक्यमप्रियं कुरुसंसदि प्रत्युवाच महा
बाहुं वासुदेवं यशस्विनं १ प्रसमीक्ष्य भवानेतद्वक्तुमर्हति केशव मामेव हि विशेषेण वि
भाष्य परिगर्हसे २ भक्तिवादेन पार्थानामकस्मान्मधुसूदन भवान्गर्हयते नित्यं किं
समीक्ष्य बलाबलं ३ भवान्क्षत्ता च राजा वाप्याचार्यो वा पितामहः मामेव परिगर्हन्ते ना
न्यं कंचन पार्थिवं ४ न चाहं लक्षये कंचिद्व्यभिचारमिहात्मनः अथ सर्वे भवन्तो मां विद्वि
षन्ति सराजकाः ५ न चाहं किंचिदत्यर्थमपराधमरिंदम विचिन्तयन्प्रपश्यामि सुसू
क्ष्ममपि केशव ६ प्रियाभ्युपगते द्यूते पाण्डवा मधुसूदन जिताः शकुनिना राज्यं तत्र किं
मम दुष्कृतं ७ यत्पुनर्द्रविणं किंचित्तत्राजीयत पाण्डवाः तेभ्य एवाभ्यनुज्ञातं तत्तदा मधु
सूदन ८ अपराधो न चास्माकं यत्ते द्यूते पराजिताः अजेया जयतां श्रेष्ठ पार्थाः प्रव्रजिता
वने ९ ॥

व्यपरुषमनुक्त्वा १ ३ ४ व्यभिचारं अन्यायं ५ प्रियाभ्युपगते प्रीत्या स्वीकृते ७ ८ ९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१० १८ उद्यच्छेदेव उद्यमंकुर्यादेव अपर्वणि अप्रस्तावे पर्वस्याऽस्त्वेव ग्रंथोप्रस्तावेलक्षणांतरे इति विग्रहः १९ मातंगःमुनिः

केनवाप्यपवादेनविरुध्येमारिभिःसह अशक्ताःपांडवाःकृष्णप्रहृष्टाःप्रत्यमित्रवत् १०
किमस्माभिःकृतंतेषांकस्मिन्वापुनरागसि धार्तराष्ट्रान्नियोक्ष्यंतिपांडवाःसृंजयैःस
ह ११ नचापिवयमुग्रेणकर्मणावचनेनवा प्रभ्रष्टाःप्रणमेमेहभयादपिशतक्रतोः १२
नचतंकृष्णपश्यामितत्रधर्ममनुष्ठितं अस्महेतयुधाजेतुंयोनःशत्रुनिवर्हणं १३ न
हिभीष्मकृपद्रोणाःसकर्णामधुसूदन देवैरपियुधाजेतुंशक्याःकिमुतपांडवैः १४
स्वधर्ममनुपश्यंतोयदिमाधवसंयुगे अस्त्रेणनिधनंकालेप्राप्स्यामःस्वर्गमेवतत् १५
एषश्चैवैषनोधर्मःक्षत्रियाणांजनार्दन यच्छयीमहिसंग्रामेशरतल्पगतावयं १६ ते
वयंवीरशयनंप्राप्स्यामोयदिसंयुगे अधर्मेणैवशत्रूणांननस्पास्यतिमाधव १७ क
अजातकुलेजातःक्षत्रधर्मेणवर्तयन् भयाद्वृत्तिंसमीक्ष्यैवप्रणमेदिहकर्हिचित् १८
उद्यच्छेदेवननमेदुद्यमोह्येवपौरुषं अपर्वणिभज्येतननमेदिहकर्हिचित् १९ इति
मातंगवचनंपरीप्संतिहितेप्सवः धर्मायचैवप्रणमेद्ब्राह्मणेभ्यश्चमद्विधः २० अविंत
यत्किंचिदन्यंयावज्जीवंतथाचरेत् एषधर्मःक्षत्रियाणांमतमेतच्चमेसदा २१ ॥ २५०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

न्यस्तशस्त्राःत्यक्तक्षत्रियधर्माःउपजीवामभिक्षुकवत्सिद्धमन्नंभोक्ष्यामइत्यर्थः २३ २४ २५ अध्यायः १२९ प्रह।

राज्यंप्राप्यत्वाभ्यनुज्ञातोयोमेपित्रापुराभवेत् नसलभ्यःपुनर्जातुमयिजीवतिकेशव २२
यावच्चराजाध्रियतेधृतराष्ट्रोजनार्दन न्यस्तशस्त्रावयंतेवाप्युपजीवाममाधव अप्रदे
यंपुरादत्तंराज्यंपरवत्तोमम २३ अज्ञानाद्वाभयाद्वापिमयिबालेजनार्दन नतदद्यपु
नर्लभ्यंपांडवैर्वृष्णिनंदन २४ ध्रियमाणेमहाबाहोमयिसंप्रतिकेशव यावद्धितीक्ष्णा
यास्सूच्याविध्येदग्रेणकेशव २५ तावदप्यपरित्याज्यंभूमेर्नःपांडवान्प्रति २६ इत्यु
द्योगपर्वणिभगवद्याने १२९ वैशंपायनउ० ततःप्रहस्यदाशार्हःक्रोधपर्याकुलेक्ष
णः दुर्योधनमिदंवाक्यमब्रवीत्कुरुसंसदि १ लप्स्यसेवीरशयनंकाममेतदवाप्स्य
सि स्थिरोभवसहामात्योविमर्दोभवितामहान् २ यच्चैवंमन्यसेमूढनमेकश्चिद्व्य
तिक्रमः पांडवेष्वितितत्सर्वंनिबोधतनराधिपाः ३ श्रियासंतप्यमानेनपांडवानां
महात्मनां त्वयादुर्मंत्रितंद्यूतंसौबलेनचभारत ४ कथंचज्ञातयस्तातश्रेयांसः।
साधुसंमताः अथान्याय्यमुपस्थातुंजिह्मेनाजिह्मचारिणः ५ अक्षद्यूतंमहाप्राज्ञ
सताभवतिनाशनं असतांतत्रजायंतेभेदाश्चव्यसनानिच ६ तदिदंव्यसनंघोरंत्वया
द्यूतमुखंकृतं असमीक्ष्यसदाचारैःसार्धंपापानुबंधनैः ७ ॥

स्वविचार्य। १ २ ३ ४ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ ९ १० ११ १२ १३ १४ १५ १६ १७ ॥

कस्त्वान्यो भ्रातृभार्यां वै विप्रकर्तुं तथार्हति ॥ आनीय च सभां वक्तुं यथोक्ता द्रौपदी त्वया
८ कुलीना शीलसंपन्ना प्राणेभ्योपि गरीयसी ॥ महिषी पांडुपुत्राणां तथा विनिकृता
त्वया ९ जानंति कुरवः सर्वे यथोक्ताः कुरुसंसदि ॥ दुःशासनेन कौंतेयाः प्रव्रजंतः पर
तपाः १० सम्यग्वृत्तेष्वलुब्धेषु सततं धर्मचारिषु ॥ स्वेषु बंधुषु कः साधुश्चरेदेवमसा
प्रतं ११ नृशंसानामनार्याणां परुषाणां च भाषणं ॥ कर्णदुःशासनाभ्यां च त्वया च बहुशः
कृतं १२ सह मात्रा प्रदग्धुं तान्बालकान्वारणावते ॥ आस्थितः परमं यत्नं न समृद्धं च तत्
तव १३ ऊषुश्च सुचिरं कालं प्रच्छन्नाः पांडवास्तदा ॥ मात्रा सहैकचक्रायां ब्राह्मणस्य
निवेशने १४ विषेण सर्पबंधैश्च पातिताः पांडवास्त्वया ॥ सर्वोपायैर्विनाशाय न समृद्धं
च तत्तव १५ एवं बुद्धिः पांडवेषु मिथ्यावृत्तिः सदा भवान् ॥ कथं ते नापराधोस्ति पांडवे
षु महात्मसु १६ यच्चैभ्यो याचमानेभ्यः पित्र्यमंशं न दित्ससि ॥ तच्च पापप्रदातासि भ्र
ष्टैश्वर्यो निपातितः १७ ॥

विप्रतिपद्यसेविवादंकुरुषेमात्रादिभिःसह १८ २० निष्क्रम्यअवमन्य २१ २२ २३ २४ २५ २६ ३०

कृत्वाबहूनिकार्याणिपांडवेषुनृशंसवत् मिथ्यावृत्तिरनार्यःसन्ननुविप्रतिपद्यसे १८
मातापितृभ्यांभीष्मेणद्रोणेनविदुरेणच शाम्येतिमुहुरुक्तोसिनचशाम्यसिपार्थिव
१९ शमेहिसुमहाल्लाभस्तवपार्थस्यचोभयोः नचरोचयसेराजन्किमन्यद्बुद्धिलाघ
वात् २० नशर्मप्राप्स्यसेराजन्नुत्क्रम्यसुहृदांवचः अधर्म्यमयशस्यंचक्रियतेपार्थिव
त्वया २१ वैशंपायनउ० एवंब्रुवतिदाशार्हेदुर्योधनममर्षणं दुःशासनइदंवाक्यमब्र
वीत्कुरुसंसदि २२ नचेत्संधास्यसेराजन्स्वेनकामेनपांडवैः बध्वाकिलत्वांदास्यंति
कुंतीपुत्रायकौरवाः २३ वैकर्तनंत्वांचमांचत्रीनेतान्मनुजर्षभ पांडवेभ्यःप्रदास्यंतिभी
ष्मोद्रोणःपिताचते २४ भ्रातुरेतद्वचःश्रुत्वाधार्तराष्ट्रःसुयोधनः क्रुद्धःप्रातिष्ठतोत्थाय
महानागइवश्वसन् २५ विदुरंधृतराष्ट्रंचमहाराजंचबाह्लिकं कृपंचसोमदत्तंचभीष्मं
द्रोणंजनार्दनं २६ सर्वानेताननादृत्यदुर्मतिर्निरपत्रपः अशिष्टवदमर्यादोमानीमान्याव
मानिता २७ तंप्रस्थितमभिप्रेक्ष्यभ्रातरोमनुजर्षभं अनुजग्मुःसहामात्याराजानश्चापिस
र्वशः २८ सभायामुत्थितंक्रुद्धंप्रस्थितंभ्रातृभिःसह दुर्योधनमभिप्रेक्ष्यभीष्मःशांतन
वोब्रवीत् २९ धर्मार्थावभिसंत्यज्यसंरंभंयोनुमन्यते हसंतिव्यसनेतस्यदुर्हृदोनचिरादि
व ३० दुरात्माराजपुत्रोयंधार्तराष्ट्रोनुपायवित् मिथ्याभिमानीराज्यस्यक्रोधलोभवशानु

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कालपक्वमिदंमन्येसर्वंक्षत्रंजनार्दन सर्वेह्यनुसृतामोहात्पार्थिवाःसहमंत्रिभिः ३२
भीष्मस्याथवचःश्रुत्वादाशार्हःपुष्करेक्षणः भीष्मद्रोणमुखान्सर्वानभ्यभाषतवीर्य
वान् ३३ सर्वेषांकुरुवृद्धानांमहानयमतिक्रमः प्रसह्यमंदमैश्वर्येननियच्छतयन्नृप
३४ तत्रकार्यमहंमन्येकालप्राप्तमरिंदमाः क्रियमाणेभवेच्छ्रेयस्तत्सर्वंशृणुतानघाः
३५ प्रत्यक्षमेतद्भवतांयद्वक्ष्यामिहितंवचः भवतामानुकूल्येनयदिरोचतिभारताः ३६
भोजराजस्यवृद्धस्यदुराचारीह्यनात्मवान् जीवतःपितुरैश्वर्यंहृत्वामृत्युवशंगतः ३७
उग्रसेनसुतःकंसःपरित्यक्तःसबांधवैः ज्ञातीनांहितकामेनमयाशस्तोमहामृधे ३८
आहुकःपुनरस्माभिर्ज्ञातिभिश्चापिसत्कृतः उग्रसेनःकृतोराजाभोजराज्यस्यवर्ध
नः ३९ कंसमेकंपरित्यज्यकुलार्थेसर्वयादवाः संभूयसुखमेधंतेभरतान्धकवृष्णयः
४० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४१ ४२ पराभवंयंतिजेष्यंति ४३ ४४ ४५ ४६ ४७ ४८ ४९ ५० अध्यायः १२८ १ २ ३ ॥

अपिचाप्यवदद्राजन्परमेष्ठीप्रजापतिः मूढेदेवासुरेयुद्धेभ्युद्यतेष्वायुधेषुच ४१
द्वैधीभूतेषुलोकेषुविनश्यत्सुचभारत अब्रवीत्सृष्टिमान्देवोभगवाँल्लोकभावनः
४२ पराभविष्यंत्यसुरादैतेयादानवैःसह आदित्यावसवोरुद्राभविष्यंतिदिवौकसः ४३
देवासुरमनुष्याश्चगंधर्वोरगराक्षसाः अस्मिन्युद्धेसुसंक्रुद्धाहनिष्यंतिपरस्परं ४४ इ
तिमत्वाब्रवीद्धर्मंपरमेष्ठीप्रजापतिः वरुणायप्रयच्छैतान्वध्वादैतेयदानवान् ४५
एवमुक्तस्ततोधर्मोनियोगात्परमेष्ठिनः वरुणायददौसर्वान्वध्वादैतेयदानवान्
४६ तान्वध्वाधर्मपाशैश्चस्वैश्चपाशैर्जलेश्वरः वरुणःसागरेयत्तोनित्यंरक्षतिदानवान्
४७ तथादुर्योधनंकर्णंशकुनिंचापिसौबलं वध्वादुःशासनंचापिपांडवेभ्यःप्रयच्छत
४८ त्यजेत्कुलार्थेपुरुषंग्रामस्यार्थेकुलंत्यजेत् ग्रामंजनपदस्यार्थेआत्मार्थेपृथिवींत्य
जेत् ४९ राजन्दुर्योधनंवध्वाततःसंशाम्यपांडवैः त्वत्कृतेनविनश्येयुःक्षत्रियाःक्षत्रिय
र्षभ ५० इत्युद्योगेभगवद्याने १२८ वैशंपायनउ० कृष्णस्यतुवचःश्रुत्वाधृतराष्ट्रोजनेश्
वरः विदुरंसर्वधर्मज्ञंत्वरमाणोभ्यभाषत १ गच्छतातमहाप्राज्ञांगांधारींदीर्घदर्शि
नीं आनयेहतयासार्धमनुनेष्यामिदुर्मतिं २ यदिसापिदुरात्मानंशमयेद्दुष्टचेतसं
अपिकृष्णस्यसुहृदस्तिष्ठेमवचनेवयं ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४ ५ चिररात्राययोगक्षेमवत् बहुकालमप्राप्तस्य तत्वस्य प्राप्तिः प्राप्तस्य संरक्षणं च निर्वहेदित्यर्थः ५ ६ १८ ॥

अपिलोभाभिभूतस्य पंथानमनुदर्शयेत् दुर्बुद्धेर्दुःसहायस्य समर्थं ब्रुवतीवचः ४ अपि
नो व्यसनं घोरं दुर्योधनकृतं महत् शमयेच्चिररात्राय योगक्षेमवदव्ययं ५ राज्ञस्तु व
चनं श्रुत्वा विदुरो दीर्घदर्शिनीं आनयामास गांधारीं धृतराष्ट्रस्य शासनात् ६ धृतराष्ट्र
उवाच एष गांधारि पुत्रस्ते दुरात्मा शासनातिगः ऐश्वर्यलोभादैश्वर्यं जीवितं च प्रहास्य
ति ७ अशिष्टवदमर्यादः पापैः सह दुरात्मवान् सभाया निर्गतो मूढो व्यतिक्रम्य सुहृ
द्वचः ८ वैशंपायन उ० सा भर्तुर्वचनं श्रुत्वा राजपुत्री यशस्विनी अन्विच्छंती महच्छ्रेयो
गांधारी वाक्यमब्रवीत् ९ गांधार्युवाच आनायय सुतं क्षिप्रं राज्यकामुकमातुरं नहि
राज्यमशिष्टेन शक्यं धर्मार्थलोपिना १० आप्तुमाप्तं तथापीदमविनीतेन सर्वथा त्वं ह्ये
वात्र भृशं गर्ह्यो धृतराष्ट्र सुतप्रियः ११ यो जानन्न पापतामस्य तत्प्रज्ञामनुवर्तसे स
एष काममन्युभ्यां प्रलब्धो लोभमास्थितः ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१५ १६ १८ आयत्यांपरिणामे १९ २० अपचितिःपूजा ॥ २१ २२ दीर्घमंतरंचिरेकाले २३ २४ महत्पदंमहद्राज्यविशा

एषाक्रोधात्त्वयाराजन्नविनिवर्तयितुंबलात् राष्ट्रप्रदानेमूढस्यबालिशस्यदुरात्मनः १३
दुःसहोह्ययस्यलुब्धस्यधृतराष्ट्राश्नुतेफलं कथंहिस्वजनेभेदमुपेक्षेतमहीपतिः १४
भिन्नंहिस्वजनेनत्वांप्रहसिष्यंतिशत्रवः याहिशक्यामहाराजसाम्नाभेदेनवापुनः
निस्तर्तुमापदःस्वेषुदंडंकस्तत्रपातयेत् १५ वैशंपायनउ० शासनाद्धृतराष्ट्रस्यदुर्योध
नममर्षणं मातुश्चवचनात्क्षत्तासभांप्रावेशयत्पुनः १६ समातुर्वचनाकांक्षीप्रविवे
शपुनःसभां अभिताम्रेक्षणःक्रोधान्निःश्वसन्निवपन्नगः १७ तंप्रविष्टमभिप्रेक्ष्यपुत्रमु
त्पथमास्थितं विगर्हमाणागांधारीशमार्थंवाक्यमब्रवीत् १८ दुर्योधननिबोधेदंवचनं
ममपुत्रक हितंतेसानुबंधस्यतथायत्यांसुखोदयं १९ दुर्योधनयदाहत्वांपिताभरतस
त्तमः भीष्मोद्रोणःकृपःक्षत्तासुहृदांकुरुतद्वचः २० भीष्मस्यतुपितुश्चैवममचापचि
तिःकृता भवेद्द्रोणमुखानांचसुहृदांशाम्यतात्वया २१ नहिराज्यंमहाप्राज्ञस्वेनकामेन
शक्यते अवाप्तुंरक्षितुंचापिभोक्तुंभरतसत्तम २२ नह्यवश्येंद्रियोराज्यमश्नीयादीर्घ
मंतरं विजितात्मातुमेधावीसराज्यमभिपालयेत् २३ कामक्रोधौहिपुरुषमर्थेभ्योव्य
पकर्षतः तौतुशत्रूविनिर्जित्यराजाविजयतेमहीं २४ लोकेश्वरप्रभुत्वंहिमहदेतद्दुरात्म
भिः राज्यंनामेप्सितंस्थानंनशक्यमभिरक्षितुं २५ ॥ लयोरितिविस्तरः २५ ॥ २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ अविधेयानिअवशीकृतानिआपादयितुंहंतुं २० २८ ३० तृणानेणमसलच्छिद्रेण ३१ अनुष्णागमस्यअनासक्तस्यापि
टी॰ कामक्रोधौस्वर्गनिरोधकावित्यर्थः ३२ अभिजायतेशुगाल्लीत्यर्थः ३३ ३४ यःकामेनअभिभूतःक्रोधाद्वाअभिभूः
२५४ इंद्रियाणांमहत्त्वेणवृत्तिंयच्छेदर्थधर्मयोः इंद्रियैर्नियतैर्बुद्धिर्वर्धतेग्निरिवेंधनैः २६ अ
विधेयानिहीमानिव्यापादयितुमप्यलं अविधेयाइवादांताहयाःपथिकुसारथिं २७
अविजित्ययआत्मानममात्यान्विजिगीषते अमित्रान्वाजितामात्यःसोवशःपरिहीय
ते २८ आत्मानमेवप्रथमंदेशरूपेणयोजयेत् ततोमात्यानमित्रांश्चनमोघंविजिगी
षते २९ वश्येंद्रियंजितामात्यंधृतदंडंविकारिषु परीक्ष्यकारिणंधीरमत्यर्थंश्री
र्निषेवते ३० क्षुद्राक्षेणेवजालेनझषावपिहितावुभौ कामक्रोधौशरीरस्थौ।
प्रज्ञानंतौविलुंपतः याभ्यांहिदेवाःस्वर्यातःस्वर्गस्यपिदधुर्मुखं विभ्यतोनुप।
रागस्यकामक्रोधौस्मवर्धितौ ३२ कामंक्रोधंचलोभंचदंभंदर्पंचभूमिपः सम्यग्वि
जेतुंयोवेदसमहीमभिजायते सततंनिग्रहेयुक्तइंद्रियाणांभवेन्नृपः ईप्सन्नर्थंच
धर्मंचद्विषतांचपराभवं ३४ कामाभिभूतःक्रोधाद्वायोमिथ्याप्रतिपद्यते स्वेषु
चान्येषुवातस्यनसहायाभवंत्युत ३५ ॥

तःमिथ्याकपटेनवाःभिभूतःप्रतिपद्यतेईप्सितार्थादीन्तस्यसहायानभवंतीत्यर्थः ३५ ॥ २५४

रामायनमोनमः ३५

३६ ३७ ३८ ३९ ४० अंशुःभागः ४१ ॥ ४२ ॥ ४३

(त्विभोस्समेसमहितै) एकीभूतैर्महाप्राज्ञशूरैररिनिवर्हणैः पांडवैःपृथिवींतातभोक्ष्य
सेसमहितःसुखी ३६ यथाभीष्मःशांतनवोद्रोणश्चापिमहारथः आहतुस्ताततत्त्वा
त्वमजेयौकृष्णपांडवौ ३७ प्रपद्यस्वमहाबाहुंकृष्णमक्लिष्टकारिणं प्रसन्नोहिसुखा
यस्याडुभयोरेवकेशवः ३८ सुहृदामर्थकामानांयोनतिष्ठतिशासने प्राज्ञानांकृ
तविद्यानांसनरःशत्रुनंदनः ३९ नयुद्धेतातकल्याणंनधर्मार्थौकुतःसुखं नचापि
विजयोनित्यंमायुद्धेचेतआधिथाः ४० भीष्मेणहिमहाप्राज्ञपित्रातेबाह्लिकेनच दत्तों
शःपांडुपुत्राणांभेदाद्भीतैररिंदम ४१ तस्यचेतत्प्रदानस्यफलमद्यानुपश्यसि यद्भुंक्ते
पृथिवींकृत्स्नांशूरैर्निहतकंटकां ४२ प्रयच्छपांडु
पुत्राणांयथोचितमरिंदम यदीच्छसिस
हामात्योभोक्तुमर्द्धंप्रदीयतां
४३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४४ ४५ ४६ ४७ निकारः अपकारः समा वर्षाणि ४७ ॥

अलमर्धंपृथिव्यास्तेसहामात्यस्यजीवनं सुहृदांवचने
तिष्ठन्यशःप्राप्स्यसिभारत ४४ श्रीमद्भिरात्मवद्भिस्तैर्बु
द्धिमद्भिर्जितेंद्रियैः पांडवैर्विग्रहस्तातभ्रंशयेन्महतः
सुखात् ४५ निगृह्यसुहृदांमन्युंशाधिराज्यंयथोचि
तं स्वमंशंपांडुपुत्रेभ्यःप्रदायभरतर्षभ ४६ अलमंगनि
कारोयंत्रयोदशसमाःकृतः शमयैनंमहाप्राज्ञकाम
क्रोधसमेधितं ४७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यत्वंपार्थानांअर्थंअभीप्ससिप्राप्तुमिच्छसि तंनशक्तः तदर्थापहारायेत्यर्थः नापिसूतपुत्रादयःशक्ताः ४८ ४९ मागमत

नचैवशक्तःपार्थानांयस्त्वमर्थमभीप्ससि सूतपुत्रोदृढक्रोधोभ्रातादुःशासनश्चते ४८
भीष्मद्रोणकृपेकर्णेभीमसेनेधनंजये धृष्टद्युम्नेचसंक्रुद्धेनस्युःसर्वाःप्रजाध्रुवं ४९ अ
मर्षवशमापन्नोमाकुरूंस्तातजीघनः एषाहिपृथिवीकृत्स्नामागमत्त्वत्कृतेवधं ५०
यच्चत्वंमन्यसेमूढभीष्मद्रोणकृपादयः योत्स्यंतेसर्वशक्त्येतिनैतदद्योपपद्यते ५१
समंहिराज्यंप्रीतिश्चस्थानंहिविदितात्मनां पांडवेष्वथयुष्मासुधर्मस्त्वभ्यधिकस्ततः
५२ राजपिंडभयादेतेयदिहास्यंतिजीवितं नहिशक्ष्यंतिराजानंयुधिष्ठिरमुदीक्षितुं ५३
नलोभादर्थसंपत्तिर्नराणामिहदृश्यते तदलंतातलोभेनप्रशाम्यभरतर्षभ ५४

इत्युद्योगेभगवद्याने १२८ ॥

मागच्छत ५० ५१ ५२ ५३ ५४ इतिश्रीमहाभारतेउद्योगपर्वणिभगवद्याने। १२८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ २ ३ ४ वैरोचनिंबलिं ५ ॥ ५ ॥

वैशंपायनउ॰ ततस्तद्वाक्यमनादृत्यसोर्थवन्मातृभाषितं
पुनःप्रतस्थेसंरंभात्सकाशमकृतात्मनां १ ततःसभा
यानिर्गम्यमंत्रयामासकौरवः सौबलेनमतज्ञेनरा
ज्ञाशकुनिनासह २ दुर्योधनस्यकर्णस्यशकुनेःसौब
लस्यच दुःशासनचतुर्थानामिदमासीद्विचेष्टितं ३
पुरायमस्मान्गृह्णातिक्षिप्रकारीजनार्दनः सहितो
धृतराष्ट्रेणराज्ञाशांतनवेनच ४ वयमेवहृषीके
शंनिगृह्णीमबलादिव प्रसह्यपुरुषव्याघ्रमिंद्रोवै
रोचनिंयथा ५ ॥

६ ८ केशवंवध्वारिपून्योत्स्यामहे ९ १२ कर्मह्रुतनिग्रहाख्यं १४ विकुर्वतेविकारंकलहाख्यंकुर्वते १५ १८ अशक्यं
कृत्वागृहीतंवार्ष्णेयंपांडवाहतचेतसः निरुत्साहाभाविष्यंतिभग्नदंष्ट्राइवोरगाः ६ अयं
ह्येषांमहाबाहुःसर्वेषांशर्मवर्मच अस्मिन्गृहीतेवरदेऋषभेसर्वसात्वतां ७ निरुद्यमा
भविष्यंतिपांडवाःसोमकैःसह तस्माद्वयमिहैवैनंकेशवंक्षिप्रकारिणं ८ क्रोशतोधृ
तराष्ट्रस्यबध्वायोत्स्यामहेरिपून् तेषांपापमभिप्रायंपापानांदुष्टचेतसां ९ इंगितज्ञः
कविःक्षिप्रमन्वबुध्यतसात्यकिः तदर्थमभिनिष्क्रम्यहार्दिक्येनसहास्थितः १० अब्र
वीत्कृतवर्माणंक्षिप्रंयोजयवाहिनीं व्यूढानीकःसभाद्वारमुपतिष्ठस्वदंशितः ११ या
वदाख्याम्यहंचैतत्कृष्णायाक्लिष्टकारिणे सप्रविश्यसभांवीरःसिंहोगिरिगुहामिव
ह मावमंस्या वचो मह्यं शममिच्छामि वः सदा २१ न विशेषोस्ति मे पुत्र त्वयि तेषु च पार्थिव
मतमेतत्पितुस्तुभ्यं गांधार्या विदुरस्य च २२ श्रोतव्यं खलु वृद्धानां नाभिशंकी वचो मम ना
शयिष्यसि मा सर्वमात्मानं पृथिवीं तथा २३ इत्युद्योगपर्वणि १४९ वासुदेवउ० भीष्मेणोक्ते
ततो द्रोणो दुर्योधनमभाषत मध्ये नृपाणां भद्रं ते वचनं वचनक्षमः १ प्रातीपः शांतनुस्तात
कुलस्यार्थे समुत्थितः यथा देवव्रतो भीष्मः कुलस्यार्थे स्थितोभवत् २ तथा पांडुर्नरपतिः सत्य
संधो जितेंद्रियः राजा कुरूणां धर्मात्मा सुव्रतः सुसमाहितः ३ ज्येष्ठाय राज्यमददाद्धृतराष्ट्राय
धीमते यवीयसे तथा क्षत्रे कुरूणां वंशवर्धनः ४ ॥ विन्यासभूतमददादिति ४ ॥ ४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०उ०
टी०
२८२

५ ६ संवाहनक्रियाः यंत्रायणं दानोपादानादिकं नाप एवक्रियाः ११ १२ कार्पण्यायुद्धभयात् १३ १६ पितुर्भीष्मस्य १७ २०

ततः सिंहासने राजन् स्थापयित्वैनमच्युत वनं जगाम कौरव्यो भार्याभ्यां सहितो नृपः ५
नीचैः स्थित्वा तु विदुर उपास्ते स्म विनीतवत् प्रेष्यवत्पुरुषव्याघ्रो वालव्यजनमुत्क्षिपन् ६
ततः सर्वाः प्रजास्तात धृतराष्ट्रं जनेश्वरं अन्वपद्यंत विधिवद्यथा पांडुं जनाधिप ७ विसृष्ट
धृतराष्ट्राय राज्यं स विदुराय च चचार पृथिवीं पांडुः सर्वां परपुरंजयः ८ कोषसंवलने
दाने भृत्यानां चान्ववेक्षणे भरणे चैव सर्वस्य विदुरः सत्यसंगरः ९ संधिविग्रहसंयुक्ता
राज्ञः संवाहनक्रियाः अवैक्षत महातेजा भीष्मः परपुरंजयः १० सिंहासनस्थो नृपति=
धृतराष्ट्रो महाबलः अन्वास्यमानः सततं विदुरेण महात्मना ११ कथं तत्कुले जा
तः कुलभेदं व्यवस्यति संभूय भ्रातृभिः सार्धं भुंक्ष्व भोगान् जनाधिप १२ ब्रवीम्यहं न
कार्पण्यान्नार्थहेतोः कथंचन भीष्मेण दत्तमिच्छामि न त्वया राजसत्तम १३ नाहं त्वत्तोऽभि
कांक्षिष्ये युधिष्ठिरो जनाधिप यतो भीष्मस्ततो द्रोणो यद्भीष्मस्त्वाह तत्कुरु १४ दीयतां पा
ण्डुपुत्रेभ्यो राज्यार्धमरिकर्शन समस्तमाचार्यकं तात त्वत्तेषां च मे सदा १५ अश्वत्थामा यथा
मह्यं तथा श्वेतहयो मम बहुना किं प्रलापेन यतो धर्मस्ततो जयः १६ वासुदेव एव
मुक्ते महाराज द्रोणेनामिततेजसा व्याजहार ततो वाक्यं विदुरः सत्यसंगरः १७ पितु
र्वदनमन्वीक्ष्य परिवृत्य च धर्मवित् १८ विदुर उवाच देवव्रत निबोधेदं वचनं मम भाषतः
प्रणष्टः कौरवो वंशस्त्वयायं पुनरुद्धृतः १९ तन्मे विलपमानस्य वचनं समुपेक्षसे कोऽयं
दुर्योधनो नाम कुलेऽस्मिन् कुलपांसनः २० यस्य लोभाभिभूतस्य मतिं समनुवर्तसे अनार्यस्य

२८२

त्वग्दोषीकुष्टी १७ २० वृद्धः प्रतीपः २१ २२ आत्मानेदेवापिं २३ २४ राज्यंत्यक्त्वामातुलकुलेसंश्रितइतिसंबंधः २७ अकारय
देवापिस्तुमहातेजास्त्वग्दोषीराजसत्तमः धार्मिकःसत्यवादीचपितुःशुश्रूषणेरतः १७ पौरजान
पदानांचसंमतःसाधुसत्कृतः सर्वेषांबालवृद्धानांदेवापिर्हृदयंगमः १८ वदान्यःसत्यसंधश्चस
र्वभूतहितेरतः वर्तमानःपितुःशास्त्रेब्राह्मणानांतथैवच १९ बाह्लीकस्यप्रियोभ्राताशांतनोश्च
महात्मनः सौभ्रात्रंचपरंतेषांसहितानांमहात्मनां २० अथकालस्यपर्यायेवृद्धोनृपतिसत्तमः
संभारानभिषेकार्थंकारयामासशास्त्रतः २१ कारयामाससर्वाणिमंगलार्थानिवैविभुः तंब्रा
ह्मणाश्चवृद्धाश्चपौरजानपदैःसह २२ सर्वेनिवारयामासुर्देवापेरभिषेचनं सतच्छ्रुत्वातुनृप
तिरभिषेकनिवारणं अश्रुकंठोभवद्राजापर्यशोचतचात्मजं २३ एवंवदान्योधर्मज्ञःसत्यसं
धश्चसोभवत् प्रियःप्रजानामपिसंस्त्वग्दोषेणप्रदूषितः २४ हीनांगंपृथिवीपालंनाभिनं
दंतिदेवताः इतिकृत्वानृपश्रेष्ठप्रत्यषेधन्द्विजर्षभाः २५ ततःप्रव्यथितांगोसौपुत्रशोकस
मन्वितः निवारितंनृपंदृष्ट्वादेवापिःसंश्रितोवनं २६ बाह्लीकोमातुलकुलंत्यक्त्वाराज्यंसमाश्रि
तः पितृभ्रातॄन्परित्यज्यप्राप्तवान्परमर्धिमत् २७ बाह्लीकेनत्वनुज्ञातःशांतनुर्लोकविश्रुतः
पितर्युपरतेराजन्राज्यकामामकारयत् २८ तथैवाहंमतिमतापरिचिंत्येहपांडुना ज्येष्ठःप्र
भ्रंशितोराज्याद्धीनांगइतिभारत २९ पांडुस्तुराज्यंसंप्राप्तःकनीयानपिसन्नृपः विनाशेतस्यपु
त्राणामिदंराज्यमरिंदम ३० मय्यभागिनिराज्यायकथंत्वंराज्यमिच्छसि अराजपुत्रोह्यस्वामीप
रस्वंहर्तुमिच्छसि ३१ युधिष्ठिरोराजपुत्रोमहात्मान्यायागतंराज्यमिदंचतस्य सकौरवस्यास्यकुल
स्यभर्ताप्रशासिताचैवमहानुभावः ३२ ससत्यसंधःसतताप्रमत्तःशास्त्रेस्थितोबंधुजनस्यसाधुः
प्रियःप्रजानांसुहृदानुकंपीजितेंद्रियःसाधुजनस्यभर्ता ३३ ॥ त्. अकरोत् २८ आसमंतात्प्रानुकंपीदया

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
२८७

१९ अध्यायः १४८ पुष्पोद्येति पुष्पनन्तं त्रेहिग्राक्षिप्याः पौर्णमास्याऽपरिग्रष्टमांभवतिश्वेमपिसन्नमाह्विसाहूध्वंममा
तमातितिलाद्मग्राजंवंचसत्यव्रततवंस्कृतमप्रमादः भूतानुकंपाद्यनुशासनंचयुधिष्ठिराज
गुणाः समस्ताः १४ अराजपुत्रस्त्वमनार्यवृत्तोलुब्धः सदाबंधुषुपापबुद्धिः क्रमागतंराज्यमिदं
परेषांहर्तुंकथं शाम्यसिदुर्विनीत १५ प्रयच्छराज्यार्धमपेतमोहः सवाहनंत्वंसपरिच्छदंच त
तोवशेषंतवजीवितस्यसहानुजस्यैवभवेन्नरेंद्र १६ उद्योगेकृष्णवाक्येनामाध्यायः १४८ वा
सुदेवउ॰ एवमुक्तेतुभीष्मेणद्रोणेनविदुरेणच गांधार्याधृतराष्ट्रेणनचमंदोन्वबुध्यत १ अ
वधूयोत्थितोमंदः क्रोधसंरक्तलोचनः अन्वद्रवंततंपश्चाद्राजानस्त्यक्तजीविताः २ आ
ज्ञापयच्चराज्ञस्तान्पार्थिवान्नष्टचेतसः प्रयाध्वंवैकुरुक्षेत्रंपुष्योद्येतिपुनः पुनः ३ ततस्ते
पृथिवीपालाः प्रययुः सहसैनिकाः भीष्मंसेनापतिंकृत्वासंहृष्टाः कालचोदिताः ४ अतो
हिण्योदशैकाचकौरवाणांसमागताः तासांप्रमुखतोभीष्मस्तालकेतुर्व्यरोचत ५ यदत्र
युक्तंप्राप्तंचतद्विधत्स्वविशांपते उक्तंभीष्मेणयद्वाक्यंद्रोणेनविदुरेणच ६ गांधार्याधृतरा
ष्ट्रेणसमक्षंममभारत एततेकथितंराजन्यद्वृत्तंकुरुसंसदि ७ साम्यमादौप्रयुक्तंमेरा
जन्सौभ्रात्रमिच्छता अभेदायास्यवंशस्यप्रजानांचविवृद्धये ८ पुनर्भेदश्चमेयुक्तोयदासा
मनगृह्यते कर्मानुकीर्तनंचैवदेवमानुषसंहितं ९ यदानाद्रियतेवाक्यंसामपूर्वंसुयो
धनः तदामयासमानीयभेदिताः सर्वपार्थिवाः १० अद्भुतानिचघोराणिदारुणानिचभारत
अमानुषाणिकर्माणिदर्शितानिमयाविभो ११ विर्भत्सयित्वाराज्ञस्तांस्तृणीकृत्यसुयोधनं
राधेयंभीषयित्वाचसौबलंचपुनः पुनः १२ न्यूनतांधार्तराष्ट्राणांनिंदांकृत्वातथापुनः भेदयित्वा
नृपान्सर्वान्वाग्भिर्मंत्रेणचासकृत् १३ ॥ वास्याभविष्यति संग्रामेयोजयेत्तस्यामित्युक्त्वा २८७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

॥ १५ पंचग्राममात्रस्वीकारेणाकृत्स्नराज्यसमर्पणरूपं दानमपि प्रयुक्तं १७ दंडएवोपायस्त्वाहदंडमिति १८ २० उद्योगेकृत्स

पुनः सामाभिसंयुक्तं संप्रदानमथाब्रुवं अभेदात्कुरुवंशस्य कार्ययोगात्तथैवच १४ तेषूपायेष्वता

श्चस्य भीष्मस्य विदुरस्य च तिष्ठेयुः पांडवाः सर्वे हित्वा मानमधश्चराः १५ प्रयच्छंतु च ते राज्यम

नीशास्ते भवंतु च यथाह राजा गांगेयो विदुरश्च हितं तव १६ सर्वं भवतु ते राज्यं पंचग्रामान् वि

सर्जय अवश्यं भरणीया हि पितुस्ते राजसत्तम १७ एवमुक्तोपि दुष्टात्मा नैव भागं व्यमुंचत दंडं

चतुर्थं पश्यामि तेषु पापेषु नान्यथा १८ निर्याताश्च विनाशाय कुरुक्षेत्रं नराधिपाः एतत्ते कथि

तं राजन् यद्वृत्तं कुरुसंसदि १९ न ते राज्यं प्रयच्छंति विना युद्धेन पांडव विनाशहेतवः सर्वे प्रत्यु

पस्थितमृत्यवः २० इत्युद्योगेपर्वणि भगवत्कृष्णवाक्यं ४९ वैशंपायन उ० जनार्दनवचः

श्रुत्वा धर्मराजो युधिष्ठिरः भ्रातॄनुवाच धर्मात्मा समक्षं केशवस्य ह १ श्रुतं भवद्भिर्यद्वृत्तं स

भायां कुरुसंसदि केशवस्यापि यद्वाक्यं तत्सर्वमवधारितं २ तस्मात्सेनाविभागं मे कुरुध्वं नरस

त्तमाः अक्षौहिण्यश्च सप्तैताः समेता विजयाय वै ३ तासां ये पतयः सप्त विख्यातास्तान्निबोधत

द्रुपदश्च विराटश्च धृष्टद्युम्नशिखंडिनौ ४ सात्यकिश्चेकितानश्च भीमसेनश्च वीर्यवान् एते

सेनाप्रणेतारो वीराः सर्वे तनुत्यजः ५ सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ह्रीमंतो नीतिमंत

श्च सर्वे युद्धविशारदाः ६ इष्वस्त्रकुशलाः सर्वे तथा सर्वास्त्रयोधिनः सप्तानामपि यो नेता सेना

नां प्रविभागवित् ७ यः सहेत रणे भीष्मं शरार्चिःपावकोपमं तं तावत्सहदेवात्र प्रब्रूहि कुरुनंदन

स्वमतं पुरुषव्याघ्र को नः सेनापतिः क्षमः ८ सहदेव उ० संयुक्त एकदुःखश्च वीर्यवांश्च महीपतिः

यं समाश्रित्य धर्मज्ञं स्वमंशमनुयुंज्महे ९ मत्स्यो विराटो बलवान् कृतास्त्रो युद्धदुर्मदः प्रसहिष्यति

वाक्यं ४९ संयुक्तः संबंधी १ २ ३ ४ ५ ६ ७ ८ ९ १० ११

म०३
टी०
२८५

कुलेनवंशेनाभिजनेनस्वजनसम्मतेन १२ १५ अंगिरसोद्रोणस्य १० २८ २९ ॥

वयसाशास्त्रतोधैर्यात्कुलेनाभिजनेनच श्रीमान्बलान्वितःश्रीमान्सर्वशास्त्रविशारदः १२ वेद
शास्त्रंभरद्वाजाद्दुर्धर्षःसत्यसंगरः योनित्यस्पर्धतेद्रोणंभीष्मंचैवमहाबले १३ श्लाघ्यःपार्थिव
वंशस्यप्रमुखेवाहिनीपतिः पुत्रपौत्रैःपरिवृतःशतशाखइवद्रुमः यस्ततापतपोघोरंसदारः ॥
पृथिवीपतिः रोषाद्द्रोणविनाशायवीरःसमितिशोभनः १५ पितेवास्मान्समाधत्तेयःसदापा
र्थिवर्षभः श्वशुरोद्रुपदोस्माकंसेनाग्रेसप्रकर्षतु १६ सद्रोणभीष्मावायातोसहेदितिम
तिर्मम सहिदिव्यास्त्रविद्राजासखाचांगिरसोनृपः १७ माद्रीसुताभ्यामुक्तेतुस्वमतेकुरुनं
दनः वासविर्वासवसमःसव्यसाच्यब्रवीद्वचः १८ योयंतपःप्रभावेनऋषिसंतोषणेनच
दिव्यःपुरुषउत्पन्नोज्वालावर्णोमहाभुजः १९ धनुष्मान्कवचीखड्गीरथमारुह्यदंशितः
दिव्यैर्हयवरैर्युक्तैरग्निकुंडात्समुत्थितः २० गर्जन्निवमहामेघोरथघोषेणवीर्यवान्
सिंहसंहननोवीरःसिंहतुल्यपराक्रमः २१ सिंहोरस्कःसिंहभुजःसिंहवक्षामहाबलः
सिंहप्रगर्जनोवीरःसिंहस्कंधोमहाद्युतिः २२ सुभ्रूःसुदंष्ट्रःसुहनुःसुबाहुःसुमुखोऽकृ
शः सुजत्रुःसुविशालाक्षःसुपादःसुप्रतिष्ठितः २३ अभेद्यःसर्वशस्त्राणांप्रभिन्नइववा
रणः जज्ञेद्रोणविनाशायसत्यवादीजितेंद्रियः २४ धृष्टद्युम्नमहंमन्येसहेद्भीष्मसाय
कान् वज्राशनिसमस्पर्शान्दीप्तास्यानुरगानिव २५ यमदूतसमान्वेगेनिपातेपावकोपमा
न् रामेणाजौविषहितान्वज्रनिष्पेषदारुणान् २६ पुरुषंतेनपश्यामियःसहेतमहाव्रतं
धृष्टद्युम्नमृतेराजन्नितिमेधीयतेमतिः २७ क्षिप्रहस्तश्चित्रयोधीमतःसेनापतिर्मम अभे
द्यकवचःश्रीमान्मातंगइवयूथप २८ भीमसे वधार्थंयःसमुत्पन्नःशिखंडीद्रुपदात्मजः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शस्त्राणामधिवासनं गंधधूपैः पूजनं कौतुकं रत्नाबंधनं मंगलं स्वस्तिवाचनं १९ धनंजयमवेक्ष्यैतन्नेतार्जुनाभिमतो धृष्टद्युम्नः
यस्य संग्राममध्ये तु दिव्यमस्त्रं प्रकुर्वतः रूपं दृष्ट्वेति पुरुषाणामस्यैव महात्मनः १० नत्वेयुद्धं प्रपश्यामि
योभियात शिखंडिनं शस्त्राणां समरे राजन्नसमंतद्द्व्यदनेस्थितं ११ द्वैरथे समरे नान्यो भीष्मं हन्यान्म
हाव्रतं शिखंडिनमृते वीरं समे सेनापतिर्मतः १२ युधिष्ठिरउ० सर्वस्य जगतस्तात सारासारं ब
लाबलं सर्वं जानाति धर्मात्मा मतमेषां च केशवः १३ यमाह कृष्णो दाशार्हः सोस्तु सेनापति
र्मम कृतास्त्रोप्यकृतास्त्रो वा वृद्धो वा यदि वा युवा १४ एषनो विजये मूलमेषतात विपर्यये अ
त्रप्राणाश्च राज्यं च भावाभावौ सुखासुखे १५ एष धाता विधाता च सिद्धिरत्र प्रतिष्ठिता यमाह
कृष्णो दाशार्हः सोस्तु नो वाहिनीपतिः १६ ब्रवीतु वदतां श्रेष्ठो निशा समभिवर्तते ततः सेनापतिं
कृत्वा कृष्णस्य वशवर्तिनं १७ रात्रेः शेषे व्यतिक्रांते प्रयास्यामो रणाजिरं अधिवासितशस्त्रा
श्च कृतकौतुकमंगलाः १८ वैशंपायनउ० तस्य तद्वचनं श्रुत्वा धर्मराजस्य धीमतः अब्रवीत्पुं
डरीकाक्षो धनंजयमवेक्ष्य ह १९ ममाप्येते महाराज भवद्भिर्य उदाहृताः नेतारस्तव सेनाया मतावि
क्रांतयोधिनः २० सर्व एव समर्था हि तव शत्रून्प्रबाधितुं इंद्रस्यापि भयं ह्येते जनयेयुर्महाहवे २१
किं पुनर्धार्तराष्ट्राणां लुब्धानां पापचेतसां मयापि हि महाबाहो त्वत्प्रियार्थं महाहवे २२ कृ
तो यत्नो महांस्तत्र शमः स्यादिति भारत धर्मस्य गतमानृण्यं न स्म वाच्या विवक्षतां २३ कृतार्थं
मन्यते बालस्त्वात्मानमविचक्षणः धार्तराष्ट्रो बलस्थं च पश्यत्यात्मानमातुरः २४ युज्यतां
वाहिनी साधु वधसाध्या हि मे मताः न धार्तराष्ट्राः शक्ष्यंति स्थातुं दृष्ट्वा धनंजयं २५ भीमसेनं च
संक्रुद्धं यमौ चापि यमोपमौ युयुधानद्वितीयं च धृष्टद्युम्नममर्षणं २६ अभिमन्युं द्रौपदेयान्वि
राटद्रुपदावपि अक्षौहिणीपतीं श्चान्यान्नरेंद्रान्भीमविक्रमान् २७ ॥ सेनापतिरिति स्वाप्नायं प्रदर्श्य

॥ उ॰ प॰ ५५ ॥

म०उ०
टी०
२९६

अस्माकं वलं कर्तृ धार्तराष्ट्रबलं कर्म ४८ ४९ युगो युद्धाय सज्जीभवनं इत्योपायसंनहनेष्वपि योग इति विश्वः ५०-५१ शा
करानिशकटानां सिंघाणाः वणिग्वीथ्युपलक्षितविक्रयद्रव्यं वेशा वेश्याजनाश्रयः पटग्रहाणि यानयुग्ययानेषु यु

साधवद्बलमस्माकं दुष्प्रधर्षं दुरासदं धार्तराष्ट्रबलं संख्ये हनिष्यति न संशयः ४८ धृष्टद्यु
म्नमहं मन्ये सेनापतिमरिंदम वैशंपायन उ० एवमुक्ते तु कृष्णेन संप्रहृष्यन्नरोत्तमाः तेषां
प्रहृष्टमनसां नादः समभवन्महान् ४९ योग इत्यथ सैन्यानां त्वरतां संप्रधावतां हयवारण
शब्दाश्च नेमिघोषाश्च सर्वतः ५० शंखदुंदुभिघोषाश्च तुमुलाः सर्वतोऽभवन् तदुग्रं सागर
निभं क्षुब्धं बलसमागमे ५१ रथपत्तिगजोदग्रं महोर्मिभिरिवाकुलं धावतामाह्वयानानां
तनुत्राणि च बध्नतां ५२ प्रयास्यतां पांडवानां ससैन्यानां समंततः ५२ गंगेव पूर्णा दुर्धर्षा
समदृश्यत वाहिनी अग्रानीके भीमसेनो माद्रीपुत्रौ च दंशितौ ५३ सौभद्रो द्रौपदेयाश्च
धृष्टद्युम्नश्च पार्षतः प्रभद्रकाश्च पांचाला भीमसेनमुखा ययुः ५४ ततः शब्दः समभव
त्समुद्रस्येव पर्वणि हृष्टानां संप्रयातानां घोषो दिवमिवास्पृशत् ५५ प्रहृष्टा दंशिता यो
धाः परानीकविदारणाः तेषां मध्ये ययौ राजा कुंतीपुत्रो युधिष्ठिरः ५६ शाकटापणवेशा
श्च यानयुग्यं च सर्वशः कोशं यंत्रायुधं चैव ये च वैद्याश्चिकित्सकाः ५७ फल्गु यच्च बलं
किंचित्तथापि कृशदुर्बलं तत्संगृह्य ययौ राजा ये चापि परिचारकाः ५८ ॥

गांधुरमर्हतीति धुर्यादि शाकटं उपस्करादिभारवहं इदं तु केवलं प्रयाणार्थं युग्यं च पत्रे इति निपातनात् २९६
कोशं धनचयं यंत्रायुधं गोलकप्रक्षेपणनाल इत्युच्यते लोके चिकित्सकाः शास्त्रवैद्याः ५७ ५८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५५ मलप्रतीकारंधनदस्मरत्नगुल्मैःस्थावरैःशाकारत्रूपैःजंगमैःपरितःस्थानेस्थानेमृत्संचैःस्कंधावारेणसैन्येन ६९ गांभूमिं
उपस्नग्धेतंपांचालीद्रौपदीसत्यवादिनी सहस्त्रीभिर्निववृतेदासीदाससमावृता ५९ कृत्वामूलप्र
तीकारंगुल्मैःस्थावरजंगमैः स्कंधावारेणमहताप्रययुःपांडुनंदनाः ६० ददतोगांहिरण्यंचब्राह्म
णैरभिसंवृताः स्तूयमानाययूराजन्रथैर्मणिविभूषितैः ६१ केकयाधृष्टद्युम्नश्चपुत्रःकाश्यस्य
वाविभुः श्रेणिमान्वसुदानश्चशिखंडीचापराजितः ६२ हृष्टास्तुष्टाःकवचिनःसशस्त्राःसमलं
कृताः राजानमन्वयुःसर्वेपरिवार्ययुधिष्ठिरं ६३ जघनार्धेविराटश्चयाज्ञसेनिश्चसोमकिः सुध
र्माकुंतिभोजश्चधृष्टद्युम्नस्यचात्मजाः ६४ रथायुतानिचत्वारिहयाःपंचगुणास्तथा पत्तिसैन्यंद
शगुणंसादिनामयुतानिषट् ६५ अनाधृष्टिश्चेकितानोधृष्टकेतुश्चसात्यकिः परिवार्यययुःसर्वे
वासुदेवधनंजयौ ६६ पांचजन्यस्यनिर्घोषंविस्फूर्जितमिवाशनेः निशम्यसर्वसैन्यानिसमहृष्य
तसर्वशः ६८ इत्युद्योगेयात्रायां १५० वैशंपायनः पणवदुंदुभिसंसृष्टःसिंहनादस्वरस्विना पृथिवीं
चांतरिक्षंचसागरांश्चान्वनादयत् १ ततोदेशेसमेस्निग्धेप्रभूतयवसेंधने निवेशयामासतदासेनां
राजायुधिष्ठिरः २ परिहृत्यश्मशानानिदेवतायतनानिच आश्रमांश्चमहर्षीणांतीर्थान्यायतना
निच ३ मधुरानूषरेदेशेशुचौपुण्येमहामतिः निवेशंकारयामासकुंतीपुत्रोयुधिष्ठिरः ४ ततश्च
पुनरुत्थायसुखीविश्रांतवाहनः प्रययौपृथिवीपालैर्वृतःशतसहस्रशः ५ विद्राव्यशतशोगु
ल्मान्धार्तराष्ट्रस्यसैनिकान् पर्यक्रामत्समंताच्चपार्थेनसहकेशवः ६ शिबिरंमापयामासधृ
ष्टद्युम्नश्चपार्षतः सात्यकिश्चरथोदारोयुयुधानश्चवीर्यवान् ७ आसाद्यसरितंपुण्यांकुरुक्षेत्रेहि
रण्वतीं सूपतीर्थांशुचिजलांशर्करापंकवर्जितां खानयामासपरिखांकेशवस्तत्रभारत गुप्त्यर्थ
मपिचादिश्यबलेनत्रन्यवेशयत् ८ ॥ येनेवा ६१ ६२ जघनार्धेपश्चिमार्धे ६४ ६७ समहृष्यंतरोमांचिताः ६८ श्र

तद्विधानि शिबिराणि ९ १३ कंटकसन्नाहाः येषां स्पर्शमात्रादपि गजानां तुरगाणां कंटकवेधो भवति तादृशाः स

विधिवच्छिबिरस्थानं पांडवानां महात्मनां तद्विधानि नरेंद्राणां कारयामास केशवः ९ प्रभू
ततरकाष्ठानि दुराधर्षतराणि च भक्ष्यभोज्यान्नपानानि शतशोथ सहस्रशः १० शिबिरा
णि महार्हाणि राज्ञां तत्र पृथक् पृथक् विमानानीव राजेंद्र निविष्टानि महीतले ११ तत्रा
सन् शिल्पिनः प्राज्ञाः शतशो दत्तवेतनाः सर्वोपकरणैर्युक्ता वैद्याः शास्त्रविशारदाः
१२ ज्यायुधं वर्मशस्त्राणां तथैव मधुसर्पिषोः ससर्जरसपांसूनां राशयः पर्वतोपमाः १३
बहूदकं सुयवसं तुषांगारसमन्वितं शिबिरे शिबिरे राजा संचकार युधिष्ठिरः १४ महायं
त्राणि नाराचास्तोमराणि परश्वथाः धनूंषि कवचादीनि ऋष्टयस्तूणसंयुताः १५ गजाः कं
टकसन्नाहा लोहवर्मोत्तरच्छदाः दृश्यंते तत्र गिर्याभाः सहस्रशतयोधिनः १६ निविष्टा
न्पांडवांस्तत्र ज्ञात्वा मित्राणि भारत अभिसस्रुर्यथादेशं सबलाः सहवाहनाः १७ चरि
तब्रह्मचर्यास्ते सोमपा भूरिदक्षिणाः जयाय पांडुपुत्राणां समाजग्मुर्महीक्षितः १८

इत्युद्योगे अभिनिर्यात्रायां ॥१५१॥

कवचैः
न्नाहाः कवचानि कंकटे; सन्नाहः सन्नहनं येषामिति पांचः १९ अभिसस्रुः अभ्याजग्मुः १७ १८ अध्यायः २८०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५ अध्यायः १५२ प्रति १५ आसन्नजनाःकाष्टाकस्यायेषुतानितथा अच्छेद्यःशत्रुभिरनिवार्यआहारस्याहरणंवस्तूनांमार्गाश्च
जनमेजयउ॰ युधिष्ठिरंसहानीकमुपायांतंयुयुत्सया संनिविष्टंकुरुक्षेत्रेवासुदेवेनपालितं १ विरा
टद्रुपदाभ्यांचसपुत्राभ्यांसमन्वितं केकयैर्वृष्णिभिश्चैवपार्थिवैःशतशोवृतं २ महेंद्रमिवचादित्यै
रभिगुप्तंमहारथैः श्रुत्वादुर्योधनोराजाकिंकार्यंप्रत्यपद्यत ३ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहा
मते संभ्रमेतुमुलेतस्मिन्यदासीत्कुरुजांगले ४ व्यथयेयुरिमेदेवान्सेंद्रानपिसमागमे पांडवा
वासुदेवश्चविराटद्रुपदौतथा ५ धृष्टद्युम्नश्चपांचाल्यःशिखंडीचमहारथः युधामन्युश्चविक्रां
तोदेवैरपिदुरासदः ६ एतदिच्छाम्यहंश्रोतुंविस्तरेणतपोधन कुरूणांपांडवानांचयद्यदासीद्विचे
ष्टितं ७ उद्यो॰ १५२ वैशंपाय॰ प्रतियातेतुदाशार्हेराजादुर्योधनस्तदा कर्णंदुःशासनंचैवशकु
निंचाब्रवीदिदं १ अकृतेनैवकार्येणगतःपार्थानधोक्षजः सएतान्मन्युनाविष्टोध्रुवंधक्ष्यत्यसं
शयं २ इष्टोहिवासुदेवस्यपांडवैर्ममविग्रहः भीमसेनार्जुनौचैवदाशार्हस्यमतेस्थितौ ३ अजा
तशत्रुरत्यर्थंभीमसेनवशानुगः निकृतश्चमयापूर्वंसहसर्वैःसहोदरैः ४ विराटद्रुपदौचैव
कृतवैरौमयासह तौचसेनाप्रणेतारौवासुदेववशानुगौ ५ भविताविग्रहःसोयंतुमुलोलो
महर्षणः तस्मात्सांग्रामिकंसर्वंकारयध्वमतंद्रिताः ६ शिबिराणिकुरुक्षेत्रेक्रियंतांवसुधाधि
पाः सुपर्याप्तावकाशानिदुरादेयानिशत्रुभिः ७ आसन्नजलकाष्ठानिशतशोथसहस्रशः अच्छे
द्याहारमार्गाणिबध्नोच्छ्रयचितानिच ८ विविधायुधपूर्णानिपताकाध्वजवंतिच समाश्चतेषांपंथा
नः क्रियंतांनगराद्बहिः ९ प्रयाणंघुष्यतामद्यश्वोभूतइतिमाचिरं तेतथेतिप्रतिज्ञायश्वोभूतेचक्रिरेत
था १० हृष्टरूपामहात्मानोनिवासायमहीक्षितां ततस्तेपार्थिवाःसर्वेतच्छ्रुत्वाराजशासनं ११ आसने
भ्योमहार्हेभ्यउदतिष्ठन्नमर्षिताः बाहून्परिघसंकाशान्संस्पृशंतःशनैःशनैः १२ ॥ येषुतानिअच्छेद्याहारमार्गाणि

उ ६ १ ५ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अंतरीयं परिधानीयं उत्तरीयं प्रावरणं वस्त्रं १३ १४ उपासंगः परिधानं कृतवंतः २९ ३० उद्योगे यात्रायां अध्यायः १५१ ।

म० उ०
टी०
२८८

कौंचवं नागदंतीश्च चंदनागुरुभूषितान् उष्णीषाणि नियच्छंतः पुंडरीकनिभैः कृतैः अंतरीयो
त्तरीयाणि भूषणानि च सर्वशः २० ते रथान् रथिनः श्रेष्ठा हयांश्च हयकोविदाः सज्जयंति स्म ना
गांश्च नागशिक्षास्वनुष्ठिताः २१ अथ वर्माणि चित्राणि कांचनानि बहूनि च विधानि च शस्त्रा
णि चक्रुः सर्वाणि सर्वशः २२ पदातयश्च पुरुषाः शस्त्राणि विविधानि च उपासंगः शरीरेषु
हेमचित्राण्यनेकशः २३ तदुत्सव इवोदग्रं संप्रहृष्टनरावृतं नगरं धार्तराष्ट्रस्य भारतासीत्स
माकुलं २४ जनौघसलिलावर्तो रथनागाश्वमीनवान् शंखदुंदुभिनिर्घोषः कोषसंचय
रत्नवान् २५ चित्राभरणवर्मोर्मिः शस्त्रनिर्मलफेनवान् प्रासादमालाद्रिवृतो रथ्यापणम
हाह्रदः २६ योधचंद्रोदयोद्भूतः कुरुराजमहार्णवः अदृश्यत तदा राजंश्चंद्रोदय इवार्णवः २७
इत्युद्योगे अभिनिर्यात्रायां १५१ वैशं० वासुदेवस्य तद्वाक्यमनुस्मृत्य युधिष्ठिरः पुनः पप्रच्छ
वार्ष्णेयं कथं मंदोऽब्रवीदिदं १ अस्मिन्नभ्यागते काले किं च नः क्षमम च्युत कथं च वर्तमा
ना वै स्वधर्मान्न च्यवेमहि २ दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च वासुदेव मतज्ञोसि
मम सभ्रातृकस्य च ३ विदुरस्यापि तद्वाक्यं श्रुतं भीष्मस्य चोभयोः कुंत्याश्च विपुलप्रज्ञ प्र
ज्ञा कार्त्स्न्येन ते श्रुता ४ सर्वमेतदतिक्रम्य विचार्य च पुनः पुनः क्षमं यन्नो महाबाहो तद्ब्र
वीह्यविचारयन् ५ श्रुत्वैतद्धर्मराजस्य धर्मार्थसहितं वचः मेघदुंदुभिनिर्घोषः कृष्णो वाक्य
मथाब्रवीत् ६ कृष्ण उ० कृतवानस्मि यद्वाक्यं धर्मार्थसहितं वचः न तु तन्निकृतिप्रज्ञे कौरव्ये
प्रतितिष्ठति ॥ २८८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ युक्तं सम्यक् १३ न कल्याणं अकल्याणं च तद्दीयमविद्यमानं सर्वं तस्मिन् दुर्योधने प्रतिष्ठितं १४ परित्यागेन राज्यस्य उपेक्षया १५।१६
योगः युद्धोद्योगः १७।१९ यदर्थं यन्निमित्तमर्थं अनर्थः कलहः प्रयत्नतो बलात् २० तस्मिन्निति तस्मिन्ननर्थनिमित्ते सति यत्नस्त

न च भीष्मस्य दुर्मेधाः शृणोति विदुरस्य वा मम वा भाषितं किंचित्सर्वमेवातिवर्तते ८ नैष कामय
ते धर्मं नैष कामयते यशः जितं स मन्यते सर्वं दुरात्मा कर्णमाश्रितः ९ बंधमाज्ञापयामास मम चा
पि सुयोधनः न च तं लब्धवान्कामं दुरात्मा पापनिश्चयः १० न च भीष्मो न च द्रोणो युक्तं तत्राहतुर्वचः
सर्वं तमनुवर्तंते ऋते विदुरमच्युत ११ शकुनिः सौबलश्चैव कर्णदुःशासनावपि त्वय्ययुक्तान्यभाष
त मूढा मूढममर्षणाः १२ किं च तेन मयोक्तेन यान्यभाषत कौरवः संक्षेपेण दुरात्मासौ न युक्तं त्वयि
वर्तते १३ पार्थिवेषु न सर्वेषु य इमे तव सैनिकाः यत्पापं यदकल्याणं सर्वं तस्मिन्प्रतिष्ठितं १४ न
चापि वयमप्यर्थं परित्यागेन कर्हिचित् कौरवैः शममिच्छामस्तत्र युद्धमनंतरं १५ वैशंपायन उ० त
च्छ्रुत्वा पार्थिवाः सर्वे वासुदेवस्य भाषितं अब्रुवंतो मुखं राज्ञः समुदैक्षंत भारत १६ युधिष्ठिरस्त्वभि
प्रायमभिलक्ष्य महीक्षितां योगमाज्ञापयामास भीमार्जुनयमैः सह १७ ततः किलकिलाभूतमा
नीकं पांडवस्य ह आज्ञापिते तदा योगे समहृष्यंत सैनिकाः १८ अवध्यानां वधं पश्यन्धर्मराजो युधि
ष्ठिरः निःश्वसन्भीमसेनं च विजयं चेदमब्रवीत् १९ यदर्थं वनवासश्च प्राप्तं दुःखं च यन्मया सोयम
स्मानुपैत्येव परमोनर्थः प्रयत्नतः २० तस्मिन्यत्नः कृतोस्माभिः स नो हीनः प्रयत्नतः अकृते तु प्रयत्नेस्मा
नुपावृत्तः कलिर्महान् २१ कथमवध्यैः संग्रामः कार्यः सह भविष्यति कथं हत्वा गुरून्वृद्धान्वि
जयो नो भविष्यति २२ तच्छ्रुत्वा धर्मराजस्य सव्यसाची परंतपः यदुक्तं वासुदेवेन श्रावयामास तद्व
चः २३॥

परिहारार्थं उपायः स यः शत्रुवधरूपः भीमस्य द्यूतकाले संमतः स नोस्माभिः त्वमार्जवद्भिः प्रयत्नतो बलात् हीनो व्यर्थः
अकृते तु अकृतेपि प्रयत्ने युद्धार्थं उद्योगे तथापि अस्मान् कलिः उपावृत्त आगतः २१ २२ २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा॰उ॰
टी॰
२९९

२५ नोक्तं तौ विदुरो ग्रथर्ममिति च्छेदः अयुध्यतस्तव निवर्तितमपि न युक्तं २५ २६ उद्योगे ऽध्यायः १५४ व्युष्टायां व्यतीतायां १ सारं गुरोगामिमध्यमधमं फल्गु पाश्चात्यं २ सानुकर्षा इत्यादीनि चित्रानीकानां विचित्राणां सैन्यानां विशेषणानि चित्राश्चतेऽनीकाश्चेति समासः अनीकास्त्री रणे सैन्ये इति मेदिनी अनुकर्षः युद्ध विमर्दे यस्य कस्यचिद्रथावयवस्य नष्टप्रतिसमाधानार्थं यद्द्रव्यं रथाधो बध्यते तत्तदनुकर्षो रथाधस्था।

उक्तवान्देवकीपुत्रः कृत्वाश्च विदुरस्य च वचनं तत्त्वया राजन्निखिलेनावधारितं २४ न च तौ वस्तुतो धर्ममिति मे नैष्ठिकी मतिः नापि युक्तं च कौन्तेय निवर्तितमयुध्यतः २५ तच्छ्रुत्वा वासुदेवोपि सव्यसाचि वचस्तदा स्मयमानोऽब्रवीद्वाक्यं पार्थमेवमिति ब्रुवन् २६ ततस्ते ध्वन्तसंकल्पा युद्धाय सहसैनिकाः पांडवेयामहाराज तां रात्रिं सुखमावसन् २७ इत्युद्योगे ऽभिनिर्याणायां १५४ वैशंपायन उ॰ व्युष्टायां वै रजन्यां हि राजा दुर्योधनस्ततः व्यभजत्तान्यनीकानि दश चैकं च भारत १ नरहस्तिरथाश्वानां सारं मध्यं च फल्गु च सर्वेष्वतेष्वनीकेषु संदिदेश नराधिपः २ सानुकर्षाः सतूणीराः सवरूथाः सतोमराः सोपासंगाः सशक्तीकाः सनिषंगाः सहर्ष्टयः ३ ॥

प्राहणीति मेदिनी तूणीरो रथे वा धृतो बाणकोशः महानिषंग इति यावत् वरूथं रथगुप्तिः व्याघ्रादि चर्ममयी तोमराः हस्तक्षेप्याः सशल्या दंडाः उपासंगाः हयगजवाह्यास्तूणाः निषंगाः पतिवाह्याः सा एव शक्तिर्लोहदंडः ऋष्टिर्गुरुतरः काष्ठदंडः ३ ॥ ३ ॥ २९९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शरासनतोमराः धनुःश्रेतेष्वासास्तोमराश्च लवाणाः पाशाः समीपागतस्य गले प्रक्षेपार्थं परिच्छदा आस्तरणादीनि परिस्तराः इति पाठे आस्तरणमेव ४ कचग्रहविक्षेपः कचेषु गृहीत्वा येन शत्रुर्विक्षिप्यते तन्मार्गः कलविंकग्रहतल्पं चिह्नणाइव्यजिता ग्रादंडविशेषः कचग्रहेतिपाठे अंकुशविशेषः तैलादयः प्रतप्ताः शत्रूणामुपरि क्षिप्यन्ते साशी विषज्वराः समर्षपाः कुंभाः सर्जरसं राल इत्यप्रसिद्धं दीपक ५ सच्छिद्राणि फलानि शस्त्राग्राणि येषां ते सच्छिद्रफलकाः छिद्रसहितं चर्मनास्ये श्रंगांसि त्वक्रपहिशाक्तुरिकादीनि गुडजलतप्तउपलाः यंत्रक्षेप्याः गोलाः शालनेकस्यतेशादंकरोतीति शालः सचासौ भिंदिपालो गोफलकः सशूलेति गौडपाठः मधूच्छिष्टं मदनं तद्रवीकृत्य गुडजलवत्प्रक्षेप्यं मुद्गराः मुसलतल्पादयः ६ कांडवाणफलकं तद्युक्तो दंडः काण्डदंडः कंटकदंड इति यावत् दंतक इति पाठेपि स एवा

सध्वजाः सपताकाश्च सशरासनतोमराः रज्जुभिश्च विचित्राभिः सपाशाः सपरिच्छदाः ४ सकचग्रहविक्षेपाः सतैलगुडवालुकाः साशीविषघटाः सर्वे ससर्जरसपांसवः ५ सच्छिद्रफलकाः सर्वे सायोगुडजलोपलाः सशालभिंदिपालाश्च समधूच्छिष्टमुद्गराः ६ सकांडदंडकाः सर्वे सासारविषतोमराः सशूर्पपिटकाः सर्वे सदात्रांकुशतोमराः ७ सकालकवचाः सर्वे वाशीवृत्तादनान्विताः व्याघ्रचर्मपरीवारा द्वीपिचर्मावृताश्च ते ८ सहर्ष्टयः सशृंगाश्च सप्रासविविधायुधाः सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः ९ रुक्मजालप्रतिच्छन्ना नानामणिविभूषिताः चित्रानीकाः सवपुषो ज्वलिता इव पावकाः १० ॥ र्थः सारं लोगलं विषं प्रसिद्धं तेन युक्तास्तोमराः सारविषतोमराः शूर्पाणि तप्तगुडादिप्रक्षेपार्थानि पिटकाः संदाश्च यामंजूषाः अस्त्ररोपणार्थावा दात्रं परशुप्रभृति अंकुशतोमराः वदरीकंटकतुल्यलोहकंटकोपेतास्तोमराः येषामंतः प्रविष्टानां बहिर्निःसारणेपि त्रापिबहिर्निःसरंति ७ कालकवचवान् द्विपरेणमुष्टियुद्धजेतमश्चाकाः सकीलककचा इति पाठे संदंतकरपत्रैर्येनतता काष्ठं पाटयति वाशी काष्ठप्रच्छेदनं शस्त्रं वासीति पाठेपि स एवार्थः वृत्तादनः लोहकंटकः कीलादीनुपकरणानि व्याघ्रचर्मणा द्वीपी चित्रव्याघ्रः तच्चर्मणा च परिवृता रथाएव ८ ऋष्टिः इ विद्रुमसिद्धहस्तं तेषु चक्रकाष्ठफलकं शृंगमाहरवयीत शृंगगदा यातेन नष्टस्य रक्तस्य मासंणार्थं विमज्जो ज्ञनस्यानं वाशामाः भल्लाः तैलक्षौमानि तैलार्द्रा

वस्त्रविशेषाः येषां भस्म प्रहारस्थले दीयते सर्पिश्च प्रथानंतरं तदर्थमेव ॥ ९० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ टी॰ २६०

सानुकर्षा इत्यादीनि विज्ञाणाममनीकानां विशेषणानि विनिवेशिताः येषु रथेषु स्थितिशेषः ॥ वस्त्राणि स्रग्विष्टानि स्रग्भ्
भूषणानि यंत्रौषधादीनि येषु ते वस्त्राविष्टाः विष्टं हेमाशुभालाभ इति मेदिनी बृहत्कक्षाः वहुस्पर्धाः पदातिनः बन्धाद्दि
शिरसि हेमामालामौक्तिकगुच्छादीनि प्रतिश्रोर्यावयोनानि विरुद्धानि येषु वस्त्राणि आभरणानि त्वक्चर्टिकादि

तथा कवचिनः शूराः शस्त्रेषु कृतनिश्चयाः कुलीना हययोनिज्ञाः सारथ्ये विनिवेशिताः ॥
बद्धारिष्टा बहुकक्षा बहुध्वजपताकिनः बद्धाभरणनिर्यूहा बहुचर्मासिपट्टिशाः १२ च
तुर्युजो रथाः सर्वे सर्वे चोत्तमवाजिनः सप्रासऋष्टिकाः सर्वे सर्वे प्रातशरासनाः १३ धु
र्ययोर्हययोरेकस्तथान्यौ पार्ष्णिसारथी तौ चापि रथिनां श्रेष्ठौ रथी च हयवित्तथा १४
नगराणीव गुप्तानि दुराधर्षाणि शत्रुभिः आसन् रथसहस्राणि हेममालानि सर्वशः १५
यथा रथास्तथा नागा बद्धकक्षाः स्वलंकृताः बभूवुः सप्त पुरुषा रत्नवंत इवाद्रयः १६
द्वावंकुशधरौ तत्र द्वावुत्तमधनुर्धरौ द्वौ वरासिधरौ राजन्नेकः शक्तिपिनाकधृक् १७ ग
जैर्मत्तैः समाकीर्णं सर्वमायुधकोशकैः तद्बभूव बलं राजन् कौरव्यस्य महात्मनः १८
आमुक्तकवचैर्युक्तैः सपताकैः स्वलंकृतैः सादिभिश्चोपपन्नास्तु तथा चायुतशो हयाः १९

नि निर्यूहाः शिरस्त्राणि च येषु निर्यूहः शिखरे द्वारे इति मेदिनी १२ १३ चतुर्युजः इत्येतद्व्याचष्टे धुर्ययोरिति धु
र्ययोः धुरस्थयोः निहितयोः पार्ष्णिसारथी चक्ररक्षौ १४ १६ अंकुशधरौ गजनियंतारौ उत्तमधनुर्धरौ हस्त्यारूढौ
द्वौ असिधरौ समीपस्थौ शक्तिपिनाकधरो मध्यस्थः पिनाकस्त्रिशूले पिनाको स्त्री रुद्रचापे पांसुवर्षे त्रिशूले

॥ इति श्रीमहाभारते उद्योगपर्वणि [illegible] ॥

२७

म॰उ॰ टी॰ २५१ नराणामिति २८ अयुतस्त्वित्यनेन नराणामंततो नास्तीति दर्शितं २९ ३५ उद्योगेऽभिनिर्यात्रायां अध्यायः १५५

नराणां पंचपंचाशदेषा पत्तिर्विधीयते सेनामुखं च तिस्रस्ता गुल्म इत्यभिशब्दितं २८ त्रयो गुल्मा
गणस्त्वासीद्गणास्त्वयुतशो भवेत् दुर्योधनस्य सेनासु योत्स्यमानाः प्रहारिणः २९ तत्र दुर्योधनो
राजा शूरान्बुद्धिमतो नरान् प्रसमीक्ष्य महाबाहुश्चक्रे सेनापतींस्तदा ३० पृथगक्षौहिणीनां
च प्रणेतॄन्नरसत्तमान् विधिवत्सर्वमानीय पार्थिवानभ्यभाषत ३१ कृपं द्रोणं च शल्यं च सैंध
वं च जयद्रथं सुदक्षिणं च कांबोजं कृतवर्माणमेव च ३२ द्रोणपुत्रं च कर्णं च भूरिश्रवसमे
व च शकुनिं सौबलं चैव वाह्लीकं च महाबलं ३३ दिवसे दिवसे तेषां प्रतिवेलं च भारत
चक्रे स विविधाः पूजाः प्रत्यक्षं च पुनः पुनः ३४ तथा विनियताः सर्वे ये च तेषां पदानुगाः
वभूवुः सैनिका राज्ञः प्रियं राज्ञश्चिकीर्षवः ३५ उद्योगे॰ १५५ वैशं॰ ततः शांतनवं भीष्मं
प्रांजलिर्धृतराष्ट्रजः सह सर्वैर्महीपालैरिदं वचनमब्रवीत् १ ऋते सेनाप्रणेतारं पृत
नासु महत्यपि दीर्यते युद्धमासाद्य पिपीलकपुटं यथा २ नहि जातु द्वयोर्बुद्धिः समाभ
वति कर्हिचित् शौर्यं च बलनेतॄणां स्पर्द्धते च परस्परं ३ श्रूयते च महाप्राज्ञ हैहयानमि
तौजसः अभ्ययुर्ब्राह्मणाः सर्वे समुच्छ्रितकुशध्वजाः ४ तानभ्ययुस्तदा वैश्याः शूद्राश्चैव
पितामह एकतस्तु त्रयो वर्णा एकतः क्षत्रियर्षभाः ततो युद्धेष्वभज्यंत त्रयो वर्णाः पुनः पुनः
क्षत्रियास्तु जयंत्येव बहुलं चैकतो बलं ६ ततस्ते क्षत्रियानेव पप्रच्छुर्द्विजसत्तमाः तेभ्यः प्रोवा २५१
च धर्मज्ञो याथातथ्यं पितामह ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संग्राहः दृढदुर्गः कृषणपूर्वकमग्रपादाभ्यामुत्प्लवनमिति यावत् तद्रहिताः असंग्राहाः संग्राहो दृढदुर्ग इति विश्वः प
तः सुसंपन्नाः सम्यक् विशिक्षिताः भांडं अश्वाभरणं तेन परिच्छदः परिष्कारो येषां ते भांडं भूषाश्वभूषयोरिति विश्वः
२० नृपविकाराः रुक्मकृतहृदयमुखवादयः २१ रथस्येति एकस्य रथस्य यथोक्तविभागेन दश गजाः शतं अश्वाः स
हस्रं पदातयश्च परिवार इत्यर्थः २२ पंचाशत्तमाह रथस्येति एकस्य रथस्य पंचाशद्गजाः पंचसहस्राश्वाः पंचत्रि
शत्सहस्राणि पदातयः परिवार इत्यर्थः २३ अत्र रथादीनां प्राधान्याप्राधान्याभिप्रायेण परिवाराल्पत्वबहुत्वे ज्ञेये साधा
रणी तु संख्या आदिपर्वण्युक्ता एको रथो गजश्चैको नराः पंच पदातयः त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते इत्यादि
नानामेवानुसरति सेनेति तत्र गजानां रथानां च तत्स्पसंख्योक्तिः पूर्वोक्तसंख्योपलक्षणार्था तेन पंचविंशतिशतानि मनु

असंग्राहाः सुसंपन्ना हेमभांडपरिच्छदाः अनेकशतसाहस्राः सर्वे सादिविशेषिताः २० नाना
नृपविकाराश्च नानाकवचशस्त्रिणः पदातिनो नरास्तत्र बभूवुर्हेममालिनः २१ रथस्यासन्
दश गजा गजस्य दश वाजिनः नरा दश हयस्यासन् पादरक्षाः समंततः २२ रथस्य नागाः पं
चाशन्नागस्यासन् शतं हयाः हयस्य पुरुषाः सप्त भिन्नसंधानकारिणः २३ सेना पंचशतं नागा र
थास्तावंत एव च दशसेना च पृतना पृतना दश वाहिनी २४ सेना च वाहिनी चैव पृतना ध्वजिनी
चमूः अक्षौहिणीति पर्यायैर्निरुक्ताथ वरूथिनी २५ एवं व्यूढान्यनीकानि कौरवेयेण धीमता
अक्षौहिण्यो दशैका च संख्याताः सप्त चैव ह २६ अक्षौहिण्यस्तु सप्तैव पांडवानामभूद्बले अक्षौ

ष्याः पंचदश शतानि तुरंगा इत्यपि ज्ञेयं पृतनायां तु पंच सहस्राणि नागास्तावंतो रथाः पंचविंशति सहस्रं नराः पंचदश सहस्रं अ
श्वाः वाहिन्यां पंचाशत्सहस्राणि नागास्तावंतो गजाः सार्धलक्षं हयं नराः सार्धलक्षं अश्वा इति ज्ञेयं २७ एवमपि पूर्वोक्ताक्षौ
हिणी संख्यया विसंवाद एवेत्याशंक्याह सेनेति सेनादयः शब्दाः पर्यायाः न तु संख्येयानां संख्याभेदमात्रेण नानार्थाः
एकस्मिन्नपि भीमसेने दशनागसहस्रबलत्वस्मरणात् एवं च बलस्यैवेयमेकादश सप्तेति संख्या न संख्येयस्येति।
भावः पांडवानां हीनबलत्वेपि असंख्येयं वासुदेवबलं तत्र सहायीभूतमिति जयोऽभूदिति द्रष्टव्यम् २७ २८ २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उशानसा सुकृतेन असंहार्यः पितुर्वरदानात् कालेनापि संहर्तुमशक्यः ॥ कुमारः कार्त्तिकेयः ॥ पावकिः कार्त्तिकेय एव ५

वयमेकस्य सर्वेषां नाम महाबुद्धिमतो रणे भवंतस्तत्र शृयक सर्वे स्वबुद्धिवशवर्तिनः ८ ततस्ते ब्रा
ह्मणा ब्रह्म कुर्वंत्येकं सेनापतिं हि ते नयेषु कुशलं शूरमजयन्तत्र विग्रहास्ततः ९ एवं ये कुशलं शूरं
हिते स्थितमकल्मषं सेनापतिं प्रकुर्वंति ते जयंति रणे रिपून् १० भवानुशनसा तुल्यो हितैषी
च सदा मम असंहार्यः स्थितो धर्मे स नः सेनापतिर्भव ॥ रश्मिवतामिवादित्यो वीरुधामिव
चंद्रमाः कुबेर इव यक्षाणां देवानामिव वासवः १२ पर्वतानां यथा मेरुः सुपर्णः पततिणां
यथा कुमार इव देवानां वसूनामिव हव्यवाट् १३ भवता हि वयं गुप्ताः शक्रेणेव दिवौकसः
अनाधृष्या भविष्यामस्त्रिदशानामपि ध्रुवं १४ प्रयातु नो भवानग्रे देवानामिव पावकिः
वयं त्वामनुयास्यामः सौरभेया इवर्षभं १५ भीष्म उ० एवमेतन्महाबाहो यथा वदसि भा
रत यथैव च भवंतो मे तथैव मम पांडवाः १६ अपि चैव मया श्रेयो वाच्यं तेषां नराधिप संयोद्ध
व्यं तवार्थाय यथा मे समयः कृतः १७ न तु पश्यामि योद्धारमात्मनः सदृशं भुवि ऋते तस्मान्न
रव्याघ्रात् कुंतीपुत्राद्धनंजयात् १८ स हि वेद महाबुद्धिर्दिव्यान्यस्त्राण्यनेकशः न तु मां विवृ
तो युद्धे जातु युध्येत पांडवः १९ अहं चैव क्षणेनैव निर्मनुष्यमिदं जगत् कुर्यां शस्त्रबलेनैव
ससुरासुरराक्षसं २० न त्वेवोत्सादनीया मे पांडोः पुत्रा जनाधिप तस्माद्योधान् हनिष्यामि प्र
योगेनायुतं सदा २१ एवमेषां करिष्यामि निधनं कुरुनंदन न चेत्ते मां हनिष्यंति पूर्वमेव समाग
मे २२ सेनापतिर्भविष्यामि समयेनापरेण ते भविष्यामि यथाकामं तन्मे श्रोतुमिहार्हसि २३ कर्णो

१८ विवृतो विस्पष्टो भूत्वेत्यर्थः १९ २० न मे मया उत्सादनीयाः नाशयितुं शक्याः सदा प्रत्यहं २१ २४ ॥ वायुध्वस्ता एवं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उ॰ म॰
टी॰
२६२

२७ २८ पातयंतः स्म तिष्ठंति निकृंतंतः २९ ३० ३१ अध्यायः १५५ ॥ ॥

कर्णउ॰ नाहं जीवति गांगेये राजन्योत्स्ये कथंचन हते भीष्मे तु योत्स्यामि सह गांडीवधन्वना २४
वैशं॰ ततः सेनापतिं चक्रे विधिवद्भूरिदक्षिणं २५ धृतराष्ट्रात्मजो भीष्मं सोभिषिक्तो व्यरोचत २६
ततो भेरीश्च शंखांश्च शतशोथ सहस्रशः वादयामासुरव्यग्रा वादका राजशासनात् २७ सिं
हनादाश्च विविधा वाहनानां च निःस्वनाः प्रादुरासन्ननभ्रे च वर्षं रुधिरकर्दमं २८ निर्घाताः
पृथिवीकंपा गजबृंहितनिःस्वनाः आसंश्च सर्वयोधानां पातयंतो मनांस्युत २९ वाचश्चा
प्यशरीरिण्यो दिवश्चोल्काः प्रपेदिरे शिवाश्च भयवेदिन्यो नेदुर्दीप्तस्वरा भृशं ३० सेनापत्ये य
दा राजा गांगेयमभिषिक्तवान् तदैतान्युग्ररूपाणि अभूवुः शतशो नृप ३१ ततः सेनापतिं
कृत्वा भीष्मं परबलार्दनं वाचयित्वा द्विजश्रेष्ठान्गोभिर्निष्कैश्च भूरिशः ३२ वर्धमानो जया
शीर्भिर्निर्ययौ सैनिकैर्वृतः आपगेयं पुरस्कृत्य भ्रातृभिः सहितस्तदा ३३ स्कंधावारेण महता
कुरुक्षेत्रं जगाम ह ३४ परिक्रम्य कुरुक्षेत्रं कर्णेन सह कौरवः शिबिरं मापयामास समे देशे
जनाधिप मधुरानूषरे देशे प्रभूतयवसेंधने यथैव हास्तिनपुरं तद्वच्छिबिरमाबभौ ३५
उद्योगे अभिनिर्याणयात्रायां अध्यायः १५६ जनमेजय उ॰ आपगेयं महात्मानं भीष्मं शस्त्रभृ
तां वरं पितामहं भारतानां ध्वजं सर्वमहीक्षितां १ बृहस्पतिसमं बुद्ध्या क्षमया पृथिवीसमं सम
द्रमिव गांभीर्ये हिमवंतमिव स्थिरं २ प्रजापतिमिवोदार्ये तेजसा भास्करोपमं महेंद्रमिव शत्रू
णां ध्वंसनं शरवृष्टिभिः ३ रणयज्ञे प्रतिते सुभीमे लोमहर्षणे दीक्षितं चिररात्राय श्रुत्वा तत्र
युधिष्ठिरः ४ किमब्रवीन्महाबाहुः सर्वशस्त्रभृतां वरः भीमसेनार्जुनौ वापि कृष्णो वा प्रत्यभाषत

वेदं॰ आपद्धर्मार्थकुशलो महाबुद्धिर्युधिष्ठिरः सर्वान्भ्रातॄन्

२६२

७ ८ ९ १० ११ १२ १३ युद्धात्प्रदीप्तात् १४ १५ १६ रौहिणेयो बलरामः २४ २५ २६ ॥
उवाच वदतां श्रेष्ठः सांत्वपूर्वमिदं वचः पर्याक्रामत सैन्यानि यत्तास्तिष्ठत दंशिताः ७ पितामहेन वो युद्धं पूर्वमे
व भविष्यति तस्मात्सप्तसु सेनासु प्रणेतॄन्मम पश्यत ८ कृष्ण उ॰ यथार्हति भवान्वक्तुमस्मिन्काले ह्युपस्थिते
तथेदमर्थवद्वाक्यमुक्तं ते भरतर्षभ ९ रोचते मे महाबाहो क्रियतां यदनंतरं नायकास्तव सेनायां क्रियंता
मिह सप्त वै १० वैशंपा॰ ततो द्रुपदमानाय्य विराटं शिनिपुंगवं धृष्टद्युम्नं च पांचाल्यं धृष्टकेतुं च पार्थिवं
११ शिखंडिनं च पांचाल्यं सहदेवं च मागधं एतान्सप्त महाभागान्वीरान्युद्धाभिकांक्षिणः १२ सेनाप्रणे
तॄन्विधिवदभ्यषिंचद्युधिष्ठिरः सर्वसेनापतिं चात्र धृष्टद्युम्नं चकार ह १३ द्रोणांतहेतोरुत्पन्नो य इद्धाज्जा
तवेदसः सर्वेषामेव तेषां तु समस्तानां महात्मनां १४ सेनापतिपतिं चक्रे गुडाकेशं धनंजयं अर्जुनस्यापि
नेता च संयंता चैव वाजिनां १५ संकर्षणानुजः श्रीमान्महाबुद्धिर्जनार्दनः तद्दृष्ट्वोपस्थितं युद्धं समासन्नं
महात्ययं १६ प्राविशद्भवनं राजन्पांडवस्य हलायुधः सहाक्रूरप्रभृतिभिर्गदसांबोद्धवादिभिः १७ रौ
क्मिणेयाहुकसुतैश्चारुदेष्णपुरोगमैः वृष्णिमुख्यैरधिगतैर्व्याघ्रैरिव बलोत्कटैः १८ अभिगुप्तो महा
बाहुर्मरुद्भिरिव वासवः नीलकौशेयवसनः कैलासशिखरोपमः १९ सिंहखेलगतिः श्रीमान्मदरक्तांत
लोचनः तं दृष्ट्वा धर्मराजश्च केशवश्च महाद्युतिः २० उदतिष्ठत्ततः पार्थो भीमकर्मा वृकोदरः गांडीवध
न्वा ये चान्ये राजानस्तत्र केचन २१ पूजयांचक्रिरे ते वै समायांतं हलायुधं ततस्तं पांडवो राजा करे पस्पर्श
पाणिना २२ वासुदेवपुरोगास्तं सर्व एवाभ्यवादयन् विराटद्रुपदौ वृद्धावभिवाद्य हलायुधः २३ युधि
ष्ठिरेण सहित उपाविशदरिंदमः ततस्तेषूपविष्टेषु पार्थिवेषु समंततः २४ वासुदेवमभिप्रेक्ष्य रौहिणे
योऽभ्यभाषत २५ भवितायं महारौद्रो दारुणः पुरुषक्षयः दिष्टमेतद्ध्रुवं मन्ये न शक्यमतिवर्तितुम् २६
तस्माद्युद्धात्समुत्तीर्णानपि वः सुहृज्जनात् अरोगानक्षतैर्देहैर्द्रष्टास्मीति मतिर्मम २७ ॥

म०उ
टी०
२९३

२७ उपप्लव्ये ण कौन्तेय २८ २९ ३० अध्यायः १५८ एतस्मिन् १ आकृतीनां संकल्पानां सत्यसंकल्प इत्यर्थः साक्षात्प्रत्यक्ष
इतिसंबंधः २ ३ ४ ॥ ॥

समेतं पार्थिवं क्षत्रं कालपक्वमसंशयं विमर्दश्च महानभावी मांसशोणितकर्दमः २७ उक्तो
मया वासुदेवः पुनः पुनरुपह्वरे संबंधिषु समां वृत्तिं वर्तस्व मधुसूदन २८ पांडवा हि यथा
स्माकं तथा दुर्योधनो नृपः तस्यापि क्रियतां साह्यं स पर्येति पुनः पुनः २९ तच्च मे नाकरोद्वा
क्यं त्वदर्थं मधुसूदनः निर्विष्टः सर्वभावेन धनंजयमवेक्ष्य ह ३० ध्रुवो जयः पांडवानामिति
मे निश्चिता मतिः तथा ह्यभिनिवेशोयं वासुदेवस्य भारत ३१ न चाहमुत्सहे कृष्णमृते लोक
मुदीक्षितुं ततोहमनुवर्तामि केशवस्य चिकीर्षितं ३२ उभौ शिष्यौ हि मे वीरौ गदायुद्धवि
शारदौ तुल्यस्नेहोस्म्यतो भीमे तथा दुर्योधने नृपे ३३ तस्माद्यास्यामि तीर्थानि सरस्वत्या नि
षेवितुं न हि शक्ष्यामि कौरव्यान्नश्यमानानुपेक्षितुं ३४ एवमुक्त्वा महाबाहुरनुज्ञातश्च पा
ण्डवैः तीर्थयात्रां ययौ रामो निवर्त्य मधुसूदनं ३५ उद्योगाभिनिर्याणायात्रायां १५८ वैशंपायन
एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः हिरण्यरोम्णो नृपतेः साक्षादिंद्रसखस्य वै १ आ
कृतीनामधिपतेर्भोजस्यातियशस्विनः दाक्षिणात्यपतेः पुत्रो दिक्षु रुक्मीति विश्रुतः २ यः
किंपुरुषसिंहस्य गंधमादनवासिनः कृत्स्नं शिष्यो धनुर्वेदं चतुष्पादमवाप्तवान् ३ यो माहे
द्रं धनुर्लेभे तुल्यं गांडीवतेजसा शार्ङ्गेण च महाबाहुः संमितं दिव्यमक्षयं ४ त्रीण्येवैतानि दि

[illegible]

२९३

मौरवान्पांश्चतंतिमयान् यैरिदानीं शार्ङ्गं धनुर्विज्याक्रियते ७ ८ ९ १० ११ १२ १३ १४ १५ १६ ॥
वारुणं गांडिवं तत्र माहेंद्रं विजयं धनुः शार्ङ्गं तु वैष्णवं प्राहुर्दिव्यं तेजोमयं धनुः ५ धारयामास तत्कृष्णः
परसेनाभयावहं गांडीवं पावकाल्लेभे खांडवे पाकशासनिः ६ द्रुमाद्रुक्मी महातेजा विजयं प्रत्यपद्यत
संछिद्य मौरवान्पाशान्निहत्य मुरुमोजसा ७ निर्जित्य नरकं भौमम् आहृत्य मणिकुंडले षोडश स्त्रीसह
स्राणि रत्नानि विविधानि च ८ प्रतिपेदे हृषीकेशः शार्ङ्गं च धनुरुत्तमं रुक्मी तु विजयं लब्ध्वा धनुर्मे
घनिभस्वनं ९ विभीषयन्निव जगत्पांडवानभ्यवर्तत नामृष्यत पुरा योसौ स्वबाहुबलगर्वितः १०
रुक्मिण्या हरणं वीरो वासुदेवेन धीमता कृत्वा प्रतिज्ञां नाहत्वा निवर्तिष्ये जनार्दनं ११ ततोन्वधा
वत्पार्थं सर्वशस्त्रभृतां वरः सेनया चतुरंगिण्या महत्या दूरपातया १२ विचित्रायुधवर्मिण्या गंगा
येव प्रवृद्धया स समासाद्य वार्ष्णेयं योगिनामीश्वरं प्रभुं व्यंसितो व्रीडितो राजन्नाजगाम स कुंडिन
यत्र वृक्षसेन रणे निर्जितः परवीरहा १४ तत्र भोजकटं नाम कृतं नगरमुत्तमं सैन्येन महता ते
न प्रभूतगजवाजिना पुरं तद्भुवि विख्यातं नाम्ना भोजकटं नृप स भोजराजः सैन्येन महता परिवारि
तः १५ अक्षौहिण्या महावीर्यः पांडवान्क्षिप्रमागमत् ततः स कवची धन्वी तली खड्गी शरासनी
ध्वजेनादित्यवर्णेन प्रविवेश महाचमूं विदितः पांडवेयानां वासुदेवप्रियेप्सया १६ युधिष्ठिरस्तु तं
राजा प्रत्युद्गम्याभ्यपूजयत् स पूजितः पांडुपुत्रैर्यथान्यायं सुसंस्कृतः १७ प्रतिगृह्य तु तान्सर्वान्वि
श्रांतः सहसैनिकः उवाच मध्ये वीराणां कुंतीपुत्रं धनंजयं १८ साहाय्येस्मि स्थितो युद्धे यदि भीतो=
सि पांडव करिष्यामि रणे साह्यमसह्यं तव शत्रुभिः १९ न हि मे विक्रमे तुल्यः पुमानस्तीह कश्चन हनि
ष्यामि रणे भागं यन्मे दास्यसि पांडव २० अपि द्रोणकृपौ वीरौ भीष्मकर्णावथो पुनः अथवा सर्व एवै
ते तिष्ठंतु वसुधाधिपाः २१ निहत्य समरे शत्रूंस्तव दास्यामि मेदिनीं इत्युक्तो धर्मराजस्य केशवस्य च सं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ॰ उ॰ टी॰ २८४ १९ द्रोणाद्ग्रहं च मम गुरुरिति व्यपदिशन् कथयन् २० २१ उपजीव्य ग्राग्धनुर्लोके युद्धनिमित्तं २२ ५ः इति महाभारते उद्योगे

शृण्वतां पार्थिवेंद्राणामन्येषां चैव सर्वशः वासुदेवमभिप्रेक्ष्य धर्मराजं च पांडवं २५ उवाच धी
मान्कौंतेयः प्रहस्य सखिपूर्वकं कौरवाणां कुले जातः पांडोः पुत्रो विशेषतः २६ द्रोणं व्यपदिश
न् शिष्यो वासुदेवसहायवान् भीतोस्मीति कथं ब्रूयां दधानो गांडिवं धनुः २७ युध्यमानस्य
मे वीर गंधर्वैः सुमहाबलैः सहायो घोषयात्रायां कस्तदासीत्सखा मम २८ तथा प्रतिभये
तस्मिन् देवदानवसंकुले खांडवे युध्यमानस्य कः सहायस्तदाभवत् २९ निवातकवचै
र्युद्धे कालकेयैश्च दानवैः तत्र मे युध्यमानस्य कः सहायस्तदाभवत् ३० तथा विराटनगरे
कुरुभिः सह संगरे युध्यतो बहुभिस्तत्र कः सहायोभवन्मम ३१ उपजीव्य रणे रुद्रं शक्रं वैश्रव
णं यमं वरुणं पावकं चैव कृपं द्रोणं च माधव ३२ धारयन् गांडिवं दिव्यं धनुस्तेजोमयं दृढं
अक्षय्यशरसंयुक्तो दिव्यास्त्रपरिबृंहितः ३३ कथमस्मद्विधो ब्रूयाद्भीतोस्मीति यशोहरं वचनं
नरशार्दूल वज्रायुधमपि स्वयं ३४ नास्मि भीतो महाबाहो सहायार्थश्च नास्ति मे यथाकामं य
थायोगं गच्छ वान्यत्र तिष्ठ वा ३५ विनिवर्त्य ततो रुक्मी सेनां सागरसंनिभां दुर्योधनमुपागच्छ
त्तथैव भरतर्षभ ३६ तथैव चाभिगम्यैनमुवाच वसुधाधिपः प्रत्याख्यातश्च तेनापि स तदा शूर
मानिना ३७ द्वावेव तु महाराज तस्माद्युद्धाद्व्यपेयतुः रौहिणेयश्च वार्ष्णेयो रुक्मी च वसुधाधिपः ३८
गते रामे तीर्थयात्रां भीष्मकस्य सुते तथा उपाविशन् पांडवेया मंत्राय पुनरेव च ३९ समितिर्धर्मराजा २८४
स्य सा पार्थिवसमाकुला शुशुभे तारकैश्चित्रा द्यौश्चंद्रेणेव भारत ४० अध्यायः १५८ ॥ अध्यायः १५८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ क्षयस्यैवउदयोयेभ्यस्तान्क्षयोदयान् ३ ४ निकृतिप्रज्ञंकपटविषयेएवप्रज्ञायस्यतंअनर्थमेवविषयायसमर्ते ५८ एनसादोषेणदेवान्का
लंवागंतुंउपालब्धुंनार्हतिदृष्टेसंभवत्यदृष्टकल्पनायाअन्याय्यत्वात्दृष्टापराधाभावेदेवस्यकालस्यवाउपालंभः कर्तव्यइतिः।

जनमेजयउ॰ तथाव्यूढेष्वनीकेषुकुरुक्षेत्रेद्विजर्षभ किमकुर्वंस्तकुरवःकालेनाभिप्रचोदिताः १ वैशंपा॰
तथाव्यूढेष्वनीकेषुयत्तेषुभरतर्षभ धृतराष्ट्रोमहाराजसंजयंवाक्यमब्रवीत् एहिसंजयसर्वंमेआच
क्ष्वानवशेषतः सेनानिवेशेयद्वृत्तंकुरुपांडवसेनयोः ३ दिष्टमेवपरंमन्येपौरुषंचाप्यनर्थकं यदहंबुध्य
मानोपियुद्धदोषान्क्षयोदयान् ४ तथापिनिकृतिप्रज्ञंपुत्रंदुर्द्यूतदेविनं नशक्नोमिनियंतुंवाकर्तुं।
वाहितमात्मनः ५ भवत्येवहिमेसूतबुद्धिर्दोषानुदर्शिनी दुर्योधनंसमासाद्यपुनःसापरिवर्तते ६ ए
वंगतेवैयद्भावितद्भविष्यतिसंजय क्षत्रधर्मःकिलरणेतनुत्यागोहिपूजितः ७ संजयउ॰ त्वद्युक्तोयम
नुप्रश्नोमहाराजयथेच्छसि नतुदुर्योधनेदोषमिममाधातुमर्हसि ८ शृणुष्वानवशेषेणवदतोमम।
पार्थिव यआत्मनोदुश्चरितादशुभंप्राप्नुयान्नरः ९ नसकालंनवादेवंवक्तुमेतदिहार्हति महाराज
मनुष्येषुनिंद्यंयःसर्वमाचरेत् १० सवध्यःसर्वलोकस्यनिंदितानिसमाचरन् निकारामनुजश्रेष्ठपां।
डवैस्त्वत्प्रतीक्षया ११ अनुभूताःसहामात्यैर्निकृतैरधिदेवने हयानांचगजानांचराज्ञांचामिततेज
सां १२ वैशसंसमरेवृत्तंयतन्मेशृणुसर्वशः १३ स्थिरोभूत्वामहाप्राज्ञसर्वलोकक्षयोदयं यथाभूतं।
महायुद्धेश्रुत्वाचैकमनाभव १४ नह्येवकर्तापुरुषःकर्मणोःशुभपापयोः अस्वतंत्रोहिपुरुषःका
र्यतेदारुयंत्रवत् १५ केचिदीश्वरनिर्दिष्टाःकेचिदेवयदृच्छया पूर्वकर्मभिरप्यन्येत्रैधमेतदुपास्य
ते १६ उद्योगपर्वणिभीष्माभिनिर्याणयात्रासमाप्ता १९८ संजयउ॰ हिरण्वत्यांनिविष्टेषुपांडवेषुमहात्म
सु निविशंतमहाराजकौरवेयायथाविधि १ तत्रदुर्योधनोराजानिवेश्यबलमोजसा संमानयि
त्वान्नृपतीन्न्यस्यगुल्मांस्तथैवच २ ॥ नतुतस्मिन्सतीत्यर्थःनसकालंनवादेवंवक्तुमेतदिहार्हतीतिपाठेप्यय =
मेवार्थः १० निकाराःतिरस्काराः ११ वैशसंनाशंसमरेनिमित्ते १२ १३ अध्यायः १९८ हिरण्वत्यां १ गुल्मान्सेन्यान् ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आरब्धस्य रत्नाणीयस्य द्यादेः विधिं रत्नाविधानं आरब्धं रत्नाणीयेस्यादिति विग्रहः ३ ७ कथ्यनावाक्यं आत्मप्रशंसनं ८ संप्रति
म-उ. ज्ञानं दुःशासनरुधिरपानादि १० भ्रातृभिः सहितः कथमधर्मे मनः कृथा इति संबंधः ११ दाताटास्यसि पाविव्रज्यं करिष्यसि
टी.
२८५ आरब्धस्य विधिं कृत्वा योधानां तत्र भारत कर्णं दुःशासनं चैव शकुनिं चापि सौबलं ३ आनाय्य नृपति।
स्तत्र मंत्रयामास भारत तत्र दुर्योधनो राजा कर्णेन सह भारत ४ संभाषित्वा च कर्णेन भ्रात्रा दुःशास
नेन च सौबलेन च राजेंद्र मंत्रयित्वा नरर्षभ ५ आहूयोपह्वरे राजन्नुलूकमिदमब्रवीत् उलूक ग
च्छ कैतव्य पांडवान्सहसोमकान् ६ गत्वा मम वचो ब्रूहि वासुदेवस्य शृण्वतः इदं तत्समनुप्रा
प्तं वर्षपूगाभिचिंतितं ७ पांडवानां कुरूणां च युद्धं लोकभयंकरं यदेतत्कथ्यना वाक्यं संजयो म
हदब्रवीत् ८ वासुदेवसहायस्य गर्जतः सानुजस्य ते मध्ये कुरूणां कौंतेय तस्य कालोयमागतः
९ यच्चावः संप्रतिज्ञातं तत्सर्वं क्रियतामिति संष्टतथैव कौंतेय यद्ब्रूयास्त्वं वचनान्मम १० भ्रातृभिः
सहितः सर्वैः सोमकैश्च सकेकयैः कथं वा धार्मिको भूत्वा त्वमधर्मे मनः कृथाः ११ य इच्छसि ज
गत्सर्वं नश्यमानं नृशंसवत् अभयं सर्वभूतेभ्यो दाता त्वमिति मे मतिः १२ श्रूयते हि पुरा गीतः श्लो
कोयं भरतर्षभ प्रह्लादेनाथ भद्रं ते हृते राज्ये तु दैवतैः १३ यस्य धर्मध्वजो नित्यं सुराध्वज इवोच्छि
तः प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतं १४ अत्र ते वर्तयिष्यामि आख्यानमिदमुत्तमं क
थितं नारदेनेह पितुर्मम नराधिप मार्जारः किल दुष्टात्मा निश्चेष्टः सर्वकर्मसु १५ ऊर्ध्वबाहुः
स्थितो राजन् गंगातीरे कदाचन स वै कृत्वा मनःशुद्धिं प्रत्ययार्थं शरीरिणां १६ ॥

त्वर्थः १२ १३ भोसुरा इति देवान्प्रह्लादः संबोधयति यस्य व्रतस्य धर्मध्वजो धर्मचिह्नं दंभयवित्रपाणित्वादि उ
च्छितः सर्वलोकविदितः १४ १५ मनःशुद्धिं हिंसातो निवृत्तिं १६ ॥ १६ २८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विस्रंभं विश्वासं १७ १९ बहवश्च ते मित्राणि चेति बहुमित्राः बहूमित्रा इत्यपि पाठः वृद्धाश्च बालाश्च तेषां समाहारो वृद्धवालं ॥ ॥
करोमि धर्ममित्याह सर्वानेकाश्चारी विरणः तस्य कालेन महता विस्रंभं जग्मुरंडजाः समेत्य च प्रशंसं
ति मार्जारं ते विशांपते १७ पूज्यमानस्तु तैः सर्वैः पक्षिभिः पक्षिभोजनः आत्मकार्यं कृतं मेने चर्या
याश्च कृतं फलं १८ अथ दीर्घस्य कालस्य तं देशं मूषिका ययुः ददृशुस्तं च ते तत्र धार्मिकं व्रतचारि
णं १९ कार्येण महता युक्तं दंभयुक्तेन भारत तेषां मतिरियं राजन्नासीत्तत्र विनिश्चये २० बहुमि
त्रा वयं सर्वे तेषां नो मातुलो ह्ययं रक्षां करोतु सततं वृद्धवालस्य सर्वशः २१ उपगम्य तु ते सर्वे वि
डालमिदमब्रुवन् भवत्प्रसादादिच्छामश्चर्तुं चैव यथासुखं २२ भवान्नो गतिरव्यग्रा भवा
न्नः परमः सुहृत् ते वयं सहिताः सर्वे भवंतं शरणं गताः २३ भवान्धर्मपरो नित्यं भवान्धर्मे
व्यवस्थितः स नो रक्ष महाप्राज्ञ त्रिदशानिव वज्रभृत् २४ एवमुक्तस्तु तैः सर्वैर्मूषिकैः स वि
शांपते प्रत्युवाच ततः सर्वान्मूषिकान्मूषकांतकृत् २५ द्वयोर्योगं न पश्यामि तपसो रक्षणस्य
च अवश्यं तु मया कार्यं वचनं भवतां हितं २६ युष्माभिरपि कर्तव्यं वचनं मम नित्यशः तपसा
स्मि परिश्रांतो दृढं नियममास्थितः २७ न चापि गमने शक्तिं कांचित्पश्यामि चिंतयन् सोऽस्मि
नेयः सदा ताता नदीकूलमितः परं २८ तथेति तं प्रतिज्ञाय मूषिका भरतर्षभ वृद्धवालमथो
सर्वं मार्जाराय न्यवेदयन् २९ ततः स पापो दुष्टात्मा मूषिकानथ भक्षयन् पीवरश्च सुवर्णश्च
दृढबंधश्च जायते ३० मूषिकाणां गणश्चात्र भृशं संलीयतेऽथ सः मार्जारो वर्धते चापि तेजोबल
समन्वितः ३१ ततस्ते मूषिकाः सर्वे समेत्यान्योन्यमब्रुवन् मातुलो वर्धते नित्यं वयं क्षीयामहे भृ
शं ३२ ततः प्राज्ञतमः कश्चिद्डिंडिको नाम मूषिकः अब्रवीद्वचनं राजन्मूषिकाणां महागणं ३३ ग.
च्छतां वो नदीतीरं सहितानां विशेषतः पृष्ठतोऽहं गमिष्यामि सहैव मातुलेन तु ३४ साधु साध्विति ते सर्वे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰
टी॰
२५६

३७ अमित्रस्यापि मित्रभावरूपेण प्रसं तत्त्वं शिवाकृता सीकृताशिवापसं तत्रैवाहाविति मेदिनी ३८ गणाश्च मूषिकाणां ३९

अविज्ञाना ततः सोथ डिंडिकं समुपयुक्तवान् ततस्ते सहिताः सर्वे मंत्रयामासुरंजसा ३९ तत्र वृद्धत
मः कश्चित्कोकिलो नाम मूषिकः अब्रवीद्वचनं राजन् ज्ञातिमध्ये यथातथं ४० न माता लोभधर्मो
कामस्तु धर्मात्वं कृताशिवा ४१ न मूलफलभक्षस्य विष्ठा भवति लोमशा अस्य गात्राणि वर्धंते ग
णश्च परिहीयते ४२ अद्य सप्ताष्टदिवसान् डिंडिकोपि न दृश्यते एतच्छ्रुत्वा वचः सर्वे मूषिका
विप्रदुद्रुवुः ४३ विडालोपि स दुष्टात्मा जगामैव यथागतं तथा त्वमपि दुष्टात्मन् वैडालं व्रतमा
स्थितः ४४ चरसि ज्ञातिषु सदा विडालो मूषिकेष्विव अन्यथा किल ते वाक्यमन्यथा कर्म दृश्य
ते ४५ दंभनार्थाय लोकस्य वेदाश्चोपशमश्च ते त्यक्त्वा छद्म त्विदं राजन् क्षत्रधर्मं समाश्रितः
कुरु कार्याणि सर्वाणि धर्मिष्ठोसि नरर्षभ ४६ बाहुवीर्येण पृथिवीं लब्ध्वा भरतसत्तम देहि
दानं द्विजातिभ्यः पितृभ्यश्च यथोचितं ४७ क्लिष्टाया वर्षपूगांश्च मातुर्मातुर्हिते स्थितः प्रमा
र्जाश्रु रणे जित्वा सम्मानं परमावह ४८ पंचग्रामा वृता यत्नात् अस्माभिरपवर्जिताः युध्याम
हे कथं संख्ये कोपयेम च पांडवान् ४९ त्वत्कृते दुष्टभावस्य संत्यागो विदुरस्य च ज्ञातुषे च
गृहे दाहं स्मर तं त्वं पुरुषो भव ५० यच्च कृष्णमवोचस्त्वमायांतं कुरुसंसदि अयमस्मि स्थितो
राजन् शमाय समराय च ५१ तस्यायमागतः कालः समरस्य नराधिप एतदर्थं मया सर्वं कृत
मेतद्युधिष्ठिर ५२ किं नु युद्धात्परं लाभं क्षत्रियो बहु मन्यते किं च त्वं क्षत्रियकुले जातः संप्रथि
तो भुवि ५३ द्रोणादस्त्राणि संप्राप्य कृपाच्च भरतर्षभ तुल्ययोनौ समबले वासुदेवं समाश्रितः ५४ २५६

४२ इदं छद्म अप्रजातशत्रुत्वरूपं धर्मिष्ठोसीत्युपहासः ४३ ४४ प्रमार्जे प्रमार्जय ४५ ५१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५२ ५३ इंद्रजालं प्रसिद्धं मायाछलं कुहकाकृत्या प्रतिगर्जनं विपरीतं कोपं वहंति प्रापयंति ननु भयं जनयंतीत्यर्थः गर्जनं निनदे कोप इति
मेदिनी ५४ पर्यायतः पर्यायः भयप्रदर्शनादिरूपः प्रकारः तेन सिद्धिः स्वस्य न तु भवति तत्त्वापरोपिते न तु बुद्धिमानुषी भयात्मि
कां न प्राप्नोति यतो मनसैव इंद्रस्वरेणावधयं चक्र तस्याः तत्वादृशी विभीषिकयेति भावः नत्विति पाठे पर्यायतः क्रमतः भावस्तु
सएव पर्यायः प्रकारे वसरे क्रमे इति मेदिनी ५५ ५७ आचचक्षे आख्यातवान् ५८ ५९ सम्प्रगकाः संगेपुः स्वविद्रूपसंक्रुलवाद्दे

अयालं वासुदेवं च पांडवानां समीपतः आत्मार्थं पांडवार्थं च यत्नो मां विप्रतिबाधय ५२ सभामध्ये च य
द्रूपमायया कृतवानसि ततश्चैव पुनः कृत्वा सार्जुनो मामभिद्रव ५३ इंद्रजालं च मायां वै कुहकां वा
विभीषणा आतष्टास्त्वस्य संग्रामे वहंति प्रतिगर्जनम् ५४ वयमप्युत्सहेमह्यां खेचगच्छेम मायया र
सातलं विशामोपि ऐंद्रं वा पुरमेव तु दर्शयेम च रूपाणि स्वशरीरे बहून्यपि ५५ नतु पर्यायतः सिद्धि
र्बुद्धिमाप्नोति मानुषी मनसैव हि भूतानि धाता वकुरुते वशे ५६ यद्ब्रवीषि च वार्ष्णेय धार्तराष्ट्रानहं
रणे घातयित्वा प्रदास्यामि पार्थेभ्यो राज्यमुत्तमम् ५७ आचचक्षे च मे सर्वं संजयस्तव भाषितं मद्द्वितीये
येन पार्थेन वैरं वः सव्यसाचिना ५८ स सत्यसंगरो भूत्वा पांडवार्थे पराक्रमी युध्यस्वाद्य रणे यतः
पश्याम पुरुषो भव ५९ यस्तु शत्रुमभिज्ञाय शुद्धं पौरुषमास्थितः करोति द्विषतां शोकं स जीवति
स जीविते ६० अकस्माच्चैव ते कृष्ण ख्यातं लोके महद्यशः अद्येदानीं विजानीमः संति षंढाः सशृं
गकाः ६१ मद्विधो नापि नृपतिस्त्वयि युक्तः कथंचन संनाहं संयुगे कर्तुं कंसभृत्ये विशेषतः ६२
तं च तूवरकं बालं बह्वाशिनमविद्यकं उलूक मद्वचो ब्रूहि असकृद्भीमसेनकं ६३ विराटनगरे पार्थ
यस्त्वं सूदोऽभवः पुरा बल्लवो नाम विख्यातस्तन्ममैव हि पौरुषं ६४ प्रतिज्ञातं सभामध्ये न तन्मिथ्या
त्वया पुरा दुःशासनस्य रुधिरं पीयतां यदि शक्यते ६५ ॥

गवत्वादिकं तत्सहिताः षंढाः निर्वीर्याः संति ये पुनव
शौर्यं प्रख्यातवत् शौर्यं प्रख्यातमिति भावः ६१ ६२ तूवरकं तूवरः प्रौढश्रृंगो नट्यान् तत्तुल्यं तूपर इति पाठेपि स एवार्थः अश्मश्रु
पुरुषः [illegible] स्मे तूवरो प्रमश्रुः पुरुषे प्रौढश्रृंगा गव्यपीति मेदिनी तेषां भीमसेनो निःश्मश्रुक इति कल्पना भवति अस्य जेस्तु

पतो गोमृगः इति प्राजापत्या इति श्रुतौ अश्वादिसाहचर्यात् पतो पि पश्वेव
अविद्यकं मूढ ६३ ६४ ६५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
२५७

६६ ७१ नहृष्टेति भर्तारः राजानः ७२ अर्थपतिभिः राजभिः यतः कालात् नतत्प्राप्स्येत्यर्थः मृत्यः पूर्वमपि गुणवति स्वामि
नि नसंतुष्टा स्युस्तत् त्वं युधिष्ठिरोभवदादिषु निर्गुणोष्वपि तिष्ठतीति भावः ७३ तत्तस्माद्धेतोर्ममवधार्थं च प्रयुध्यध्व

यद्ब्रवीषि च कौंतेय धार्तराष्ट्रानहं रणे निहनिष्यामि तरसा तस्य कालोयमागतः ६६ त्वं हि भो
ज्ये पुरस्कार्यो भक्ष्ये पेये च भारत कृष्णुदेरं कच भोक्तुं युध्यस्व पुरुषो भव ६७ शयिष्यसि हतो
भूमौ गदामालिंग्य भारत तद्धृथा च सभामध्ये वल्गितं ते वृकोदर ६८ उलूक नकुलं ब्रूहि
वचनान्मम भारत युध्यस्वाद्य स्थिरो भूत्वा पश्यामस्तव पौरुषं ६९ युधिष्ठिरानुरागं च
द्वेषं च मयि भारत कृष्णायाश्च परिक्लेशं स्मरेदानीं यथातथ्यं ७० ब्रूयास्त्वं सहदेवं च राज
मध्ये वचो मम युध्येदानीं रणे यत्तः क्लेशान्स्मर च पांडव ७१ विराटद्रुपदौ चोभौ ब्रूयास्त्वं व
चनान्मम नदृष्टपूर्वा भर्तारो भृत्यैरपि महागुणैः ७२ तथार्थपतिभिर्भृत्या यतः सृष्टाः प्र
जास्ततः अश्लाघ्योयं नरपतिर्युवयोरितिचागते ७३ ते यूयं संहता भूत्वा तद्वधार्थं ममापि
च आत्मार्थं पांडवार्थं च प्रयुध्यध्वं मयासह ७४ धृष्टद्युम्नं च पांचाल्यं ब्रूयास्त्वं वचनान्म
म एष ते समयः प्राप्तो लब्धव्यश्च त्वया पि सः ७५ द्रोणमासाद्य समरे ज्ञास्यसे हितमुत्तमं
युध्यस्व ससुहृत्त्वार्थं कुरु कर्म सुदुष्करं ७६ शिखंडिनमथो ब्रूहि उलूक वचनान्मम स्त्रीति
मत्वा महाबाहुर्न हनिष्यति कौरवः ७७ गांगेयो धन्विनां श्रेष्ठो युध्येदानीं सुनिर्भयः कुरु कर्म
रणे यत्नः पश्यामः पौरुषं तव एवमुक्त्वा ततो राजा प्रहस्योलूकमब्रवीत् धनंजयं पुनर्ब्रूहि
वासुदेवस्य शृण्वतः ७८ अस्मान्वा त्वं पराजित्य प्रशाधि पृथिवीमिमां अथवा निर्जितोस्माभी रणे

॥ ८ उ ... ॥

मिति संबंधः ७४ ७५ पापं कर्म कुरु गुरुवधाख्यं स्वार्थमिति पाठे दुष्करपदादेवायमर्थोज्ञेयः ससुहृत्त्वार्थ
मिति पाठे तत्क्रियाविशेषणमिदं सुहृद्भिः पार्थैश्च सहितं यथा स्यात्तथा युध्यस्वेत्यर्थः अयमेव मूलपाठः ७८

२५७

१२ राज्यमाक्रम्यमाहृश इतिशेषः १५ अकर्मणा अयुद्धेन कथितेन स्वप्रशंसामात्रेण १६ स्थानं स्थितिं तत्स्थानराज्ययोरुद्धरणं
पौरुषं पुरुषकर्म मरुह १७ १८ पित्र्यात् गृहात् १९ २० अप्रियाणां शत्रूणां वक्ता ये योगं पंचवचनं गोगौः नसंतिपतयो भद्रे षंढति

राष्ट्रान्निर्वासनं क्लेशं वनवासं च पांडव कृष्णायाश्च परिक्लेशं संस्मरन् पुरुषो भव ११ यदर्थं त
त्रियास्तु ते सर्वं तदिदमागतं बलं वीर्यं च शौर्यं च परं चाप्यस्त्रलाघवं १२ पौरुषं दर्शनं युद्धे को
पस्य कुरु निष्कृतिं परिक्लिष्टस्य दीनस्य दीर्घकालोषितस्य च हृदयं न स्फुटेत्कस्य पेश्वर्याद्भ्रंशित
स्य च १३ कुले जातस्य शूरस्य परवित्तेषु गृध्यतः आच्छिन्नराज्यमाक्रम्य कोपं कस्य न दीपयेत् १४
यत्तदुक्तं महद्वाक्यं कर्मणा तन्न हि भाव्यते अकर्मणा कथितेन संतः कुपुरुषं विदुः १५ अमित्राणां
वशे स्थाने राज्यं च पुनरुद्धर द्वावर्थौ युद्धकामस्य तस्मात्कुरु तु पौरुषं १६ पराजितोसि द्यूते
न कृष्णा चानायिता सभां शक्यो मर्षो मनुष्येण कर्तुं पुरुषमानिना १७ द्वादशैव तु वर्षाणि
वने पित्र्याद्विवासितः संवत्सरं विराटस्य दास्यमास्थाय चोषितः १८ राष्ट्रान्निर्वासनं क्लेश
वनवासं च पांडव कृष्णायाश्च परिक्लेशं संस्मरन् पुरुषो भव १९ अप्रियाणां च वचनं प्रव्रजत्सु
पुनः पुनः अमर्षं दर्शय स्वत्वममर्षो ह्येव पौरुषं २० क्रोधो बलं तथा वीर्यं ज्ञानयोगोस्त्रलाघ
वं इह ते दृश्यतां पार्थ युध्यस्व पुरुषो भव २१ लोहाभिहारो निर्वृत्तः कुरुक्षेत्रमकर्दमं शुद्धास्ते
श्वाः सूतायोधाः श्वो युध्यस्व सकेशवः २२ असमागम्य भीष्मेण संयुगे किं विकत्थसे आरुरु
क्षुर्यथा मंदः पर्वतं गंधमादनं २३ एवं कत्थसि कौंतेय अकत्थन् पुरुषो भव सूतपुत्रं सुदुर्धर्षं
शल्यं च बलिनां वरं २४ द्रोणं च बलिनां श्रेष्ठं शचीपतिसमं युधि अजित्वा संयुगे पार्थ राज्यं
कथमिहेच्छसि २५ ब्राह्मे धनुषि चाचार्यं वेदयोरंतगं द्वयोः युधि धुर्यमविक्षोभ्यमनीकचरम

लाः पतेः स्मादिकं ब्रुवत्सु दुःशासनादिषु अमर्षं कोपं दर्शय २१ २२ लोहाभिहारः शस्त्राणां नीराजनादिकं तेषु मंत्रेण
देवता वाहनादिकं च अकर्दममिति युद्धयोग्यत्वमुक्तं २३ २४ वेदयोः ऋतिधनुर्वेदयोः अंतगं पारगं २७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ युगांतकालचक्रं १९ । १० आभ्यां द्रोणभीष्माभ्यां अभिध्यातो हंतव्यत्वेन निश्चितः दारुणेन भयानकेनास्त्रादिना प

म० उ०
टी०
२९८

द्रोणं महाद्युतिं पार्थं जेतुमिच्छसि तन्मृषा नहि शुश्रुम वातेन मेरुमुन्मथितं गिरिं १८
अनिलो वा वहेन्मेरुं द्यौर्वापि निपतेन्महीं युगं वा परिवर्तेत यद्येवं स्याद्यथात्थ मां १९ को
किंनरोरगराक्षसाः १८ नमेक्रुद्धस्यपर्याप्ताःसर्वेलोकाःशुचिस्मिते चक्षुषाप्य
प्रपश्यामितस्यतेजोहराम्यहं १९ तस्मात्त्वद्वचनंदेविकरिष्यामिनसंशयः सप्त
र्षयोमांवसंतिसर्वेब्रह्मर्षयस्तथा २० पश्यमाहात्म्ययोगंमेअद्यहिवरवर्णि।
नि शल्यउवाच एवमुक्त्वाततोदेवींविसृज्यचवरानना विमानेयोजयित्वाच।
ऋषीन्नियमसमास्थितान् २१ अब्रह्मण्योबलोपेतोमत्तोमदबलेनच कामवृ
त्तःस्वदुष्टात्मावाहयामासतानृषीन् २२ ॥

५६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अन्वेष्यतां अनुगच्छतु भवान् इषगतावित्यस्य दिवादेः रूपं २८ २९ ३० ॥ ३१ ॥

नहुषेणाविसृष्टश्च बृहस्पतिमथाब्रवीत् समयोल्पावशेषो मे नहुषेणेह यः कृतः
२३ शक्रं मृगय पौलोमी त्रातं भक्तायाः कुरु मे दया बाढमित्येव भगवान् बृहस्पतिरुवाच
तां २४ न भेतव्यं त्वया देवि नहुषाद्दुष्टचेतसः न ह्येष स्थास्यति चिरं गत एष नराधमः
२५ अधर्मज्ञो महर्षीणां वाहनाच्च हतः शुभे इष्टिं चाहं करिष्यामि विनाशायास्य
दुर्मतेः २६ शक्रं चाधिगमिष्यामि मा भैस्त्वं भद्रमस्तु ते ततः प्रज्वाल्य विधिवज्जु
हाव परमं हविः २७ बृहस्पतिर्महातेजा देवराजोपलब्धये हुत्वाग्निं सोब्रवीद्रा
जन् शक्रमन्वेष्यतामिति २८ तस्माच्च भगवान्देवः स्वयमेव हुताशनः स्त्रीवेष
मद्भुतं कृत्वा तत्रैवान्तरधीयत २९ स दिशः प्रदिशश्चैव पर्वतानि वनानि च पृ
थिव्यां चान्तरिक्षं च विचित्याशु मनोगतिः ३० निमेषान्तरमात्रेण बृहस्पतिमुपा
गमत् अग्निरुवाच बृहस्पते न पश्यामि देवराजमिह क्वचित् आपः शेषाः स
दा चापः प्रविशुं नोत्सहाम्यह ३१ ॥

म॰ उ॰
टी॰
३

१२ १४ उद्योगे॰ १५ १ एकंजाठरंत्रिविधंगार्हपत्यदक्षिणाग्न्याहवनीयरूपेणत्वयात्यक्तेन २ तुभ्यंत्रिवि\\धाय ३

नमेतत्रगतिर्ब्रह्मन्किमन्यत्करवाणिते तमब्रवीद्देवगुरुरग्नेत्वंविशमहाद्युते
१२ अग्निरु॰ नापःप्रवेष्टुंशक्ष्यामिक्षयोमेत्रभविष्यति शरणंत्वांप्रपन्नोस्मि।
स्वस्तितेस्तुमहाद्युते १३ अद्भ्योग्निर्ब्रह्मतःक्षत्रमश्मनोलोहमुत्थितं तेषांस
र्वत्रगंतेजःस्वासुयोनिषुशाम्यति १४ इतिश्रीउद्योगपर्वणिइंद्रविजये १५
बृहस्पतिरु॰ त्वमग्नेसर्वदेवानांमुखंत्वमसिहव्यवाट् त्वमंतःसर्वभूतानांगू
ढश्चरसिसाक्षिवत् त्वामाहुरेकंकवयस्त्वामाहुस्त्रिविधंपुनः त्वयात्यक्तंजग
च्चेदंसद्योनश्येद्धुताशन २ कृत्वातुभ्यंनमोविप्राःस्वकर्मविजितांगतिं गा
च्छंतिसहपत्नीभिःसुतैरपिचशाश्वतीं ३ ॥

३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४ प्रसूतिः उत्पत्तिस्थानं ५ हेतयः ज्वालाः ७ ८ ९ १० ११ ॥

त्वमेवाग्ने हव्यवाहस्त्वमेव परमं हविः यजंति सत्रैस्त्वामेव यज्ञैश्च परमाध्वरे ४
सृष्ट्वा लोकांस्त्रीनिमान् हव्यवाह प्राप्ते काले पचसि पुनः समिद्धः त्वं सर्वस्य भुवन
स्य प्रसूतिस्त्वमेवाग्ने भवसि पुनः प्रतिष्ठा ५ त्वामग्ने जलदानाहुर्विद्युतश्च मनी।
षिणः दहंति सर्वभूतानि त्वत्तो निष्क्रम्य हेतयः ६ त्वय्यापो निहिताः सर्वास्त्व।
यि सर्वमिदं जगत् न तेस्त्यविदितं किंचित् त्रिषु लोकेषु पावक ७ स्वयोनिं भ
जते सर्वो विशस्वापो विशंकितः अहं त्वां वर्धयिष्यामि ब्राह्मैर्मंत्रैः सनातनैः ८
एवं स्तुतो हव्यवाड् स भगवान् कविरुत्तमः बृहस्पतिमथोवाच प्रीतिमान् वाक्य।
मुत्तमं ९ दर्शयिष्यामि ते शक्रं सत्यमेतद् ब्रवीमि ते शल्य उवाच प्रविश्यापस्ततो।
वह्निः ससमुद्राः सपल्वलाः आससाद सरस्तच्च गूढो यत्र शतक्रतुः १० अथ तत्।
रापि पद्मानि विचिन्वन् भरतर्षभ अपश्यत् स तु देवेंद्रं बिसमध्यगतं तदा ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ १३ १४ १५ १६ १७ नहुषस्यांतरेण अंतरं भेदः बुद्धिभेदार्थमित्यर्थः १८ ॥

आगत्य च ततस्तूर्णं तमाचष्ट बृहस्पतेः आज्ञामात्रेण वृषापमत्तं त्वाश्रितं शुभं
१२ गत्वा देवर्षिगंधर्वैः सहितोथ बृहस्पतिः पुराणैः कर्मभिर्देवं तुष्टाव बल
सूदनं १३ महासुरो हतः शक्र नमुचिर्दारुणस्त्वया शंबरश्च बलश्चैव तथो
भौ घोरविक्रमौ १४ शतक्रतो विवर्धस्व सर्वान्शत्रून्निषूदय उत्तिष्ठ शक्र सं
पश्य देवर्षींश्च समागतान् १५ महेंद्र दानवान्हत्वा लोकास्त्रातास्त्वया विभो
अपांफेनं समासाद्य विष्णुतेजोतिबृंहितं १६ त्वया वृत्रो हतः पूर्वं देवराज जग
त्पते त्वं सर्वभूतेषु शरण्य ईड्यस्त्वया समं विद्यते नेह भूतं त्वया धार्यंते स
र्वभूतानि शक्र त्वं देवानां महिमानं चकर्थ १७ पाहि सर्वांश्च लोकांश्च म
हेंद्र बलमाश्रय हि एवं संस्तूयमानश्च सोवर्द्धत शनैः शनैः १८ ॥

१९ २० २१ २२ २३ २४ २५ २६ ॥

संचैववपुराप्यायबभूवसबलान्वितः अब्रवीच्चगुरुंदेवोबृहस्पतिमवस्थितं १९
किंकार्यमवशिष्टंवोहतस्त्वाष्ट्रोमहासुरः वृत्रश्चसुमहाकायोयोवैलोकान्।
नाशायत् २० बृहस्पतिरु॰ मानुषोनहुषोराजादेवर्षिगणतेजसा देवराज्यमनु
प्राप्तःसर्वान्नोबाधतेभृशं २१ इंद्रउवाच कथंचनहुषोराज्यंदेवानांप्रापदुर्लभं
तपसाकेनवायुक्तःकिंवीर्योवाबृहस्पते २२ बृहस्पतिरु॰ देवाभीताःशक्रम
कामयंतत्वयात्यक्तंमहदैंद्रंपदंततः तदादेवाःपितरोथर्षयश्चगंधर्वसंघाश्च
समेत्यसर्वे २३ गत्वाब्रुवन्नहुषंतत्रशक्रत्वंनोराजाभवभुवनस्यगोप्ता तानब्र
वीन्नहुषोनास्मिशक्तआप्यायध्वंतपसातेजसामां २४ एवमुक्तैर्वर्धितश्चापि
देवैराजाभवन्नहुषोघोरवीर्यः त्रैलोक्येचप्राप्यराज्यंमहर्षीन्कृत्वावाहान्पा
तिलोकान्दुरात्मा २५ तेजोहरंदृष्टिविषंसुघोरंमात्वंपश्येर्नहुषंवैकदाचित् दे
वाश्चसर्वेनहुषंभयार्तानपश्यंतेगूढरूपाश्चरंतः २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ २७ २८ २९ ३० ३१ ३२ ॥
टी॰
३२

शल्य उवाच एवंवदत्यंगिरसांवरिष्ठेबृहस्पतौलोकपालःकुबेरः वैवस्वतश्चै
वयमःपुराणोदेवश्चसोमोवरुणश्चाजगाम २७ तेवैसमागम्यमहेंद्रमूचु
र्दिष्ट्यात्वाष्ट्रोनिहतश्चैववृत्रः दिष्ट्याचत्वांकुशलिनमक्षतंचपश्यामवैनि
हतारिंचशक्र २८ सतान्यथावच्चहिलोकपालान्समेत्यवैप्रीतिमना
महेंद्रः उवाचचैतान्प्रतिभाष्यशक्रः संचोदयिष्यन्नहुषस्यांतरेण २९ रा
जादेवानांनहुषोघोररूपस्तत्रसाह्यंदीयतांमेभवद्भिः तेचाब्रुवन्नहुषोघोरर
पोदृष्टीविषस्तस्यबिभीमशक्र ३० त्वंचेद्राजानहुषंपराजयेस्ततोवयंभागम
र्हामशक्र इंद्रोब्रवीद्भवतुभवानपांपतिर्यमःकुबेरश्चमयाभिषिक्त ३१ संप्रा
भ्वंत्वयसहैवदेवतेरिपुंजयामनहुषंघोरदृष्टिं ततःशक्रंज्वलनोप्याहभा
गंप्रयच्छमह्यंभवतःसहायंकरिष्ये ३२ ॥

३२

१२ १३ १४ १५ इतिउद्योगपर्वणिषोडशोऽध्यायः १६ अथ १ अर्च्यअर्च्य २ २ ३ ४ ५ ६

तमाहशक्रोभविताग्रेनवापिवंशग्नेर्वैभागएकोमहाक्रतौ शल्यउवाच एवंसंवि
त्सभगवान्महेंद्रःपाकशासनः कुवेरंसर्वयक्षाणांधनानांचप्रभुंतथा १३ वैवस्वतं
पितृणांचवरुणंचाप्ययांतथा आधिपत्यंददौशक्रःसंविभ्यवरदस्तथा १४ इत्युद्यो
गपर्वणींद्रविजये १६ शल्यउ० अथसंचिंतयानस्यदेवराजस्यधीमतः नहुषस्यवधो
पायंलोकपालैःसदैवतैः १ तपस्वीतत्रभगवानगस्त्यःप्रत्यदृश्यत सोऽब्रवीदर्च्यदे
वेंद्रंदिष्ट्यावैवर्द्धतेभवान् २ विश्वरूपविनाशेनवृत्रासुरवधेनच दिष्ट्याचनहु
षोभ्रष्टोदेवराज्यात्पुरंदर ३ दिष्ट्याहतारिंपश्यामिभवंतंबलसूदन इंद्रउवाच स्वा
गतंतेमहर्षेस्तुप्रीतोहंदर्शनात्तव पाद्यमाचमनीयंचगामर्घ्यंचप्रतीच्छमे ४ शल्य
उ० पूजितंचोपविष्टंतमासनेमुनिसत्तमं पर्यपृच्छतदेवेशःप्रहृष्टोब्राह्मणर्षभं
५ एतदिच्छामिभगवन्कथ्यमानंद्विजोत्तम परिभ्रष्टःकथंस्वर्गान्नहुषःपाप
निश्चयः ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.३. ७ ८ गवांप्रोक्षणेप्रोक्ताणीयाकरणसाधारणादिसंस्कारेयेमंत्राःदेवांश्चयाभिर्यजन्तेददातिचगावःसोमस्य
टी.
३३

अगस्त्य उ० शृणुशक्रप्रियंवाक्यंयथाराजादुरात्मवान् स्वर्गाद्भ्रष्टोदुराचारोनहुषो
बलदर्पितः ७ श्रमार्त्तास्तुवहन्तस्तंनहुषंपापकारिणं देवर्षयोमहाभागास्तथा
ब्रह्मर्षयोमलाः ८ पप्रच्छुर्नहुषंदेवसंशयंजयतांवर यइमेब्रह्मणाप्रोक्तामंत्रा
वैप्रोक्षणेगवां ९ एतेप्रमाणंभवतउताहोनेतिवासव नहुषोनेतितानाहतमसा
मूढचेतनः १० ऋषयऊचुः अधर्मेसंप्रवृत्तस्त्वंधर्मंनप्रतिपद्यसे प्रमाणमेतद।
स्माकंपूर्वंप्रोक्तंमहर्षिभिः ११ अगस्त्य उ० ततोविवदमानःसमुनिभिःसहवास
व अथमामस्पृशन्मूर्ध्निपादेनाधर्मपीडितः १२ तेनाभूद्धततेजाश्चनिःश्रीक।
श्चमहीपतिः ततस्तमहमाविग्नमवोचं
भयपीडितं १३ ॥

प्रथमस्यभवतःइत्यादयःयाभिःपशुभूताभिर्गोभिःभवतःइतिभवताणतयायागउच्यते ९ १० ११ १३ ॥ ३२

१४ १९ नहुषस्तुब्राह्मणाश्चैवगावश्चकुलमेकंद्विधाकृतं एकत्रमंत्रास्तिष्ठंतिहविरेकत्रतिष्ठतीतिशास्त्रशासना
णात् ब्राह्मणवहुवामवध्यत्वंमत्वानोवेदमप्रमाणीचकारवेदस्यब्राह्मणानांचावमानाद्योगतिःश्रा

यस्मात्पूर्वैःकृतंराजन्ब्रह्मर्षिभिरनुष्ठितं ग्रुडस्थंदूषयसिमेयच्चमूर्ध्निस्पृशःपदा १५
यच्चापित्वमृषीन्मूढब्रह्मकल्पान्दुरासदान् वाहान्कृत्वावाहयसितेनस्वर्गाद्ध
तप्रभः ध्वंसपापपरिभ्रष्टःक्षीणपुण्योमहीतले १६ दशवर्षसहस्राणिसर्परूप
धरोमहान् विचरिष्यसिपूर्णेषुपुनःस्वर्गमवाप्स्यसि १७ एवंभ्रष्टोदुरात्मासदेव
राज्यादरिंदम दिष्ट्यावर्धामहेशक्रहतोब्राह्मणकंटकः १८ त्रिविष्टपंप्रपद्य।
स्वपाहिलोकाञ्छचीपते जितेंद्रियोजितामित्रःस्तूयमानोमहर्षिभिः १९ शल्य
उवाच ततोदेवाभृशंतुष्टामहर्षिगणसंवृताः पितरश्चैवयक्षाश्चभुजगाराक्ष।
सास्तथा २० गंधर्वादेवकन्याश्चसर्वेचाप्सरसांगणाः सरांसिसरितःशैलाःसा
गराश्चविशांपते २१ उपागम्याब्रुवन्सर्वेदिष्ट्यावर्धसिशत्रुहन् हतश्चनहुषःपापो
दिष्ट्यागस्त्येनधीमता २२ दिष्ट्यापापसमाचारःकृतःसर्पोमहीतले इत्युद्योगपर्वणि
इंद्रविजये १७ ॥ १ ॥

एतदुपाख्यायिकातात्पर्यं १७ १८ १९ २० २१ २२ उद्योगेनहुषभ्रंशः १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ हा॰
उ॰ टी॰
६४

ततः १ २ ३ ४ ५ ६ अथर्वांगिरसो नामेति यतोंगिरा अथर्ववेदमंत्रैरिंद्रं तुष्टाव ततोथर्वांगिरसो ना

शल्य उवाच ततः शक्रः स्तूयमानो गंधर्वाप्सरसां गणैः ऐरावतं समारुह्य द्विपेंद्रं
लक्षणैर्युतं १ पावकश्च महातेजा महर्षिश्च बृहस्पतिः यमश्च वरुणश्चैव कु
बेरश्च धनेश्वरः २ सर्वैर्देवैः परिवृतः शक्रो वृत्रनिषूदनः गंधर्वैरप्सरोभिश्च
यातस्त्रिभुवनं प्रभुः ३ स समेत्य महेंद्राण्या देवराजः शतक्रतुः मुदा परमया यु
क्तः पालयामास देवराट् ४ ततः स भगवांस्तत्र अंगिराः समदृश्यत अथर्ववेद
मंत्रैश्च देवेंद्रं समपूजयत् ५ ततस्तु भगवानिंद्रः संहृष्टः समपद्यत वरं च प्रददौ
तस्मै अथर्वांगिरसे तदा ६ अथर्वांगिरसो नाम वेदेस्मिन्वै भविष्यति उदाहर
णमेतद्धि यज्ञभागं च लप्स्यसे ७ एवं संपूज्य भगवानथर्वांगिरसं तदा व्यसर्ज
यन्महाराज देवराजः शतक्रतुः ८ ॥

माभवत् अस्मिन्वेदेथर्ववेदस्य ऋषिरित्यर्थः उदाहरणं वाक्यमेतत् अथर्ववेदरूपं यस्य वाक्यं।
स ऋषिरिति परिभाषावचनात् ७ ८ ॥ ६४

९ १० ११ १२ १३ १४ १५ १६ १७ ॥

संभृत्यसर्वांस्त्रिदशान्दधीच्यापितपोधनात् इंद्रःप्रभुरितोराजन्धर्मेणापालयत्प्र
जाः ९ एवंदुःखमनुप्राप्तमिंद्रेणासहभार्यया अज्ञातवासश्चकृतःशत्रूणांवधकां
क्षया १० नात्रमन्युस्त्वयाकार्योयत्क्लिष्टोसिमहावने द्रौपद्यासहराजेंद्रभ्रातृभि
श्चमहात्मभिः ११ एवंत्वमपिराजेंद्रराज्यंप्राप्स्यसिभारत वृत्रंहत्वायथाप्राप्तःश
क्रःकौरवनंदन १२ दुराचारश्चनहुषोब्रह्मद्विट्पापचेतनः अगस्त्यशापाभिह
तोविनष्टःशाश्वतीःसमाः १३ एवंत्वदुरात्मानःशत्रवःशत्रुसूदन क्षिप्रंनाशंग
मिष्यंतिकर्णदुर्योधनादयः १४ ततःसागरपर्यंतांभोक्ष्यसेमेदिनीमिमां भ्रातृभिः
सहितोवीरद्रौपद्याचसहानया १५ उपाख्यानमिदंशक्रविजयंवेदसम्मितं रा
ज्ञाव्यूढेष्वनीकेषुश्रोतव्यंजयमिच्छता १६ तस्मात्त्वंश्रावयामित्वांविजयंज
यतांवर संस्तूयमानावर्धंतेमहात्मानोयुधिष्ठिर १७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततः १ २ ३ ४ ५ ६ अथर्वांगिरसोनामेति यतोंगिराअथर्ववेदमंत्रैरिंद्रंतुष्टाव ततोथर्वांगिरसोना।

पाल उवाच ततःशक्रस्तूयमानोगंधर्वाप्सरसांगणैः ऐरावतंसमारुह्यद्विपेंद्रंलक्षणैर्युतं १ पावकःसुमहातेजामहर्षिश्चबृहस्पतिः यमश्चवरुणश्चैवकुबेरश्चधनेश्वरः २ सर्वदेवैःपरिवृतःशक्रोवृत्रनिषूदनः गंधर्वैरप्सरोभिश्चयातस्त्रिभुवनेप्रभुः ३ ससमेत्यमहेंद्राण्यादेवराजःशतक्रतुः मखापरमयायुक्तःपालयामासदेवराट् ४ ततःसभगवांस्तत्रअंगिराःसमदृश्यत अथर्ववेदमंत्रैश्चदेवेंद्रंसमपूजयत् ५ ततस्तुभगवानिंद्रःसंहृष्टःसमपद्यत वरंचप्रददौतस्मैअथर्वांगिरसेतदा ६ अथर्वांगिरसोनामअस्मिन्वेदेभविष्यति उदाहरणमेतद्धियज्ञभागंचलप्स्यसे ७ एवंसंपूज्यभगवानथर्वांगिरसंतदा व्यसर्जयन्महाराजदेवराजःशतक्रतुः ८ ॥

माभवत् अस्मिन्वेदेथर्ववेदस्यऋषिरित्यर्थः उदाहरणंवाक्यमेतत् अथर्ववेदऋग्यस्यवाक्यं। सऋषिरितिपरिभाषावचनात् ७ ८ ॥ ६४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९ १० ११ १२ १३ १४ १५ १६ १७ ॥

संहृत्यसर्वांस्त्रिदशान्दधीच्यापितपोधनात् इंद्रःप्रभुरितोराजन्धर्मेणापालयत्प्र
जाः ९ एवंदुःखमनुप्राप्तमिंद्रेणासहभार्यया अज्ञातवासश्चकृतःशत्रूणांवधकां
क्षया १० नात्रमन्युस्त्वयाकार्योयत्क्लिष्टोसिमहावने द्रौपद्यासहराजेंद्रभ्रातृभि
श्चमहात्मभिः ११ एवंत्वमपिराजेंद्रराज्यंप्राप्स्यसिभारत वृत्रंहत्वायथाप्राप्तःश
क्रःकौरवनंदन १२ दुराचारश्चनहुषोब्रह्मद्विट्पापचेतनः अगस्त्यशापाभिह
तोविनष्टःशाश्वतीःसमाः १३ एवंतवदुरात्मानःशत्रवःशत्रुसूदन क्षिप्रंनाशंग
मिष्यंतिकर्णदुर्योधनादयः १४ ततःसागरपर्यंतांभोक्ष्यसेमेदिनीमिमां भ्रातृभिः
सहितोवीरद्रौपद्याचसहानया १५ उपाख्यानमिदंशक्रविजयंवेदसंमितं रा
ज्ञाव्यूढेष्वनीकेषुश्रोतव्यंजयमिच्छता १६ तस्मात्संश्रावयामित्वांविजयंज
यतांवर संस्तूयमानावर्धंतेमहात्मानोयुधिष्ठिर १७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰
टी॰
३५

१८ १९ २० २१ २२ प्राप्तुतेजसोवधोयेननाहुशोऽर्जुनसंस्तवः २३ २४ २५ उद्योगेइंद्रविजयः १८ ॥

क्षत्रियाणामभावोयंयुधिष्ठिरमहात्मनां दुर्योधनापराधेनभीमार्जुनबलेनच
१८ आख्यानमिंद्रविजयंयःपठेन्नियतःपठेत धूतपाप्माजितस्वर्गःपरत्रेहचमो
दते १९ नचारिजंभयंतस्यनापुत्रोवाभवेन्नरः नापदंप्राप्नुयात्कांचिद्दीर्घमायुश्च
विंदति २० सर्वत्रजयमाप्नोतिनकदाचित्पराजयं वैशंपायनउ॰ एवमाश्वासि
तोराजाशल्येनभरतर्षभ पूजयामासविधिवच्छल्यंधर्मभृतांवरः २१ श्रुत्वात
शल्यवचनंकुंतीपुत्रोयुधिष्ठिरः प्रत्युवाचमहाबाहुर्मद्रराजमिदंवचः २२ भवान्
कर्णस्यसारथ्यंकरिष्यतिनसंशयः तत्रतेजोवधःकार्यःकर्णस्यार्जुनसंस्तवः
२३ शल्यउ॰ एवमेतत्करिष्यामियथामांसंप्रभाषसे यच्चान्यदपिशक्ष्यामितत्क
रिष्याम्यहंतव २४ वैशंपायनउ॰ ततस्त्वामंत्र्यकौंतेयाञ्छल्योमद्राधिपस्तदा
जगामसबलःश्रीमान्दुर्योधनमरिंदम २५ इत्युद्योगपर्वणिइंद्रविजयःसमाप्तः

१८ ॥

३५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

युयुधानःसात्यकिः १ २ ३ ४ ५ ६ ७ ८ ९ ॥

वैशंपायनउ॰ युयुधानस्ततोवीरःसात्वतानांमहारथः महताचतुरंगेणबलेनागाद्यु
धिष्ठिरं १ तस्ययोधामहावीर्यानानादेशसमागताः नानाप्रहरणावीराःशोभयांच
क्रिरेबलं २ परश्वधैर्भिंदिपालैःशूलतोमरमुद्गरैः परिघैर्यष्टिभिःपाशैःकरवालै
श्चनिर्मलैः ३ खड्गकार्मुकनिर्यूहैःशरैश्चविविधैरपि तैलधौतैःप्रकाशद्भिस्तद
शोभतवैबलं ४ तस्यमेघप्रकाशस्यसौवर्णैःशोभितस्यच बभूवरूपंसैन्यस्यमेघस्ये
वसविद्युतः ५ अक्षौहिणीतुसासेनातदायौधिष्ठिरंबलं प्रविश्यांतर्दधेराजन्सागा
रंकुनदीयथा ६ तथैवाक्षौहिणींगृह्यचेदीनामृषभोबली धृष्टकेतुरुपागच्छ
त्पांडवानमितौजसः ७ मागधश्चजयत्सेनोजारासंधिर्महाबलः अक्षौहिण्यैव
सैन्यस्यधर्मराजमुपागमत् ८ तथैवपांड्योराजेंद्रसागरानूपवासिभिः वृतोब
हुविधैर्योधैर्युधिष्ठिरमुपागमत् ९ तस्यसैन्यमतीवासीत्तस्मिन्बलसमागमे प्रेक्ष
णीयतरंराजन्सुवेषंबलवत्तदा १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भा
म.उ.
टी.
११

द्रुपदस्यात्मजस्तेनानानादेशसमागतैः शोभितापुरुषैः शूरैः पुत्रैश्चास्य महारथैः ११
तथैवराजामत्स्यानांविराटोवाहिनीपतिः पार्वतीयैर्महीपालैःसहितःपांडवान्प्रया
त् १२ इतश्चेतश्चपांडूनांसमाजग्मुर्महात्मनां अक्षौहिण्यस्तुसप्तैताविविधध्वज
संकुलाः १३ युयुत्समानाःकुरुभिःपांडवान्समहर्षयन् तथैवधार्तराष्ट्रस्यहर्षं
समभिवर्धयन् १४ भगदत्तोमहीपालःसेनामक्षौहिणींददौ तस्यचीनैःकिरा
तैश्चकांचनैरिवसंवृतं १५ बभौबलमनाधृष्यंकर्णिकारवनंयथा तथाभूरि
श्रवाःशूरःशल्यश्चकुरुनंदन १६ दुर्योधनमुपायातामक्षौहिण्यापृथक्पृथक्
कृतवर्माचहार्दिक्योभोजांधकुकुरैःसह

१७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वनमालाछायादलंविनीमाला १८ १९ २० २१ समावायःसमहः २२ २३ आवंत्यौविंदानुविंदौ २४ २५ २६

अक्षौहिण्यैवसेनायादुर्योधनमुपागमत् तस्यैतैःपुरुषव्याघ्रैर्वनमालाधरैर्बले
१८ अशोभततथामत्तैर्वनंप्रक्रीडितैर्गजैः जयद्रथमुखाश्चान्येसिंधुसौवीरवासि
नः १९ आजग्मुःपृथिवीपालाःकंपयंतइवाचलान् तेषामक्षौहिणीसेनाबहुला
विबभौतदा विधूयमानोवातेनबहुरूपइवांबुदः सुदक्षिणश्चकांबोजोयवनैश्चश
कैस्तथा २१ उपाजगामकौरव्यमक्षौहिण्याविशांपते तस्यसेनासमावायःशल
भानामिवाबभौ २२ सचसंप्राप्यकौरव्यंतत्रैवांतर्दधेतदा तथामाहिष्मतीवासी
नीलोनीलायुधैःसह २३ महीपालोमहावीर्यैर्दक्षिणापथवासिभिः आवंत्यौ
चमहीपालौमहाबलसुसंवृतौ २४ पृथगक्षौहिणीभ्यांतावभियातौसुयोध
नं केकयाश्चनरव्याघ्राःसोदर्याःपंचपार्थिवाः २५ संहर्षयंतःकौरव्यमक्षौ
हिण्यासमाद्रवन् ततस्ततस्तुसर्वेषांभूमिपानांमहात्मनां २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

टी.
२७

२७ २८ २९ अहिछत्रादयः प्रदेशा विशेषाः ३० ३१ इतिश्रीमहाभारतेउद्योगपर्वणि ५९ ॥

तिस्रोन्याः समवर्त्तंत वाहिन्यो भरतर्षभ एवमेकादशावृत्ताः सेनादुर्योधनस्य
ताः २० युयुत्समानाः कौंतेयान्नानाध्वजसमाकुलाः नहास्तिनपुरेराजन्नव
काशोभवत्तदा २८ राज्ञांस्वबलमुख्यानांप्राधान्येनापिभारत ततः पंचनदंचै
वकृत्स्नंचकुरुजांगलं २९ तथारोहितकारण्यंमरुभूमिंचकेवला अहि
छत्रंकालकूटंगंगाकूलंचभारत: ३० वारणंवाटधानंचयामुनश्चैवपर्व
तः एषदेशः सुविस्तीर्णः प्रभूतधनधान्यवान् ३१ वभूवकौरवेयाणांबले
नातीवसंवृतः तत्रसैन्यंतथायुक्तंददर्शसपुरोहितः ३२ यः सपांचाल
राजेनप्रेषितः कौरवान्प्रति इत्युद्योगपर्वणिपुरोहितयाने ५९ ॥

२७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११ उद्योगे ९ सच १२ वाक्येति भवद्भिः किंचिद्वक्तव्यमतो हेतोरित्यर्थः ३ ४ ५ ६ शेषंवंतःआयुःशे

वैशंपायन उ॰ सचकौरव्यमामात्यद्रुपदस्य पुरोहितः सत्कृतो धृतराष्ट्रेण भीष्मे
ण विदुरेण च १ सर्वं कौशलमुक्त्वादौ पृष्ट्वा चैवमनामयं सर्वसेनाप्रणेतॄणां मध्ये
वाक्यमुवाच ह २ सर्वैर्भवद्भिर्विदितो राजधर्मः सनातनः वाक्योपादानहेतोस्तु
वक्ष्यामि विदिते सति ३ धृतराष्ट्रश्च पांडुश्च सुतावेकस्य विश्रुतौ तयोः समानं द्र
विणं पैतृकं नात्र संशयः ४ धृतराष्ट्रस्य ये पुत्राः प्राप्तैः पैतृकं वसु पांडुपुत्राः क
थं नाम न प्राप्ताः पैतृकं वसु ५ एवं गते पांडवेयैर्विदितं वः पुरा यथा न प्राप्तं पै
तृकं द्रव्यं धार्तराष्ट्रेण संवृतं ६ प्राणांतिकैरप्युपायैः प्रयतद्भिरनेकशः शेषवं
तो न शकिता नेतुं वै यमसादनं ७ पुनश्च वर्द्धितं राज्यं स्वबलेन महात्मभिः छ
द्मनापहृतं क्षुद्रैर्धार्तराष्ट्रैः ससौबलैः ८ ॥

षयुक्ताः ७ ८ ॥ ९

९ ७ योन्यंतरगतैरिवेतितैर्दत्तानूक्लेशानूजन्मांतरव्यवहितानिवनस्मरंतीत्यर्थः १३ १४ १५ १६

तदप्यनुमतंकर्मयथायुक्तमनेनवै वासितास्ममहारण्येवर्षाणीहत्रयोदश ९
सभायांक्लेशितैर्वीरैःसहभार्यैस्तथाभृशं अरण्येविविधाःक्लेशाःसंप्राप्तास्तैः
सुदारुणाः १० तथाविराटनगरेयोन्यंतरगतैरिव प्राप्तःपरमसंक्लेशोयथा
पापैर्महात्मभिः ११ तेसर्वेपृष्ठतःकृत्वातत्सर्वंपूर्वकिल्बिषं सामैवकुरुभिः
सार्धमिच्छंतिकुरुपुंगवाः १२ तेषांचवृत्तमाज्ञायवृत्तंदुर्योधनस्यच अनुनेतु
मिहार्हसिधार्तराष्ट्रंसुहृज्जनाः १३ नहितेविग्रहंवीराःकुर्वंतिकुरुभिःसह अ
विनाशेनलोकस्यकांक्षंतेपांडवाःस्वकं १४ यश्चापिधार्तराष्ट्रस्यहेतुःस्याद्वि
ग्रहंप्रति सचहेतुर्नमंतव्योबलीयांसस्तथाहिते १५ अक्षौहिण्यश्चसप्तैव
धर्मपुत्रस्यसंगताः युयुत्समानाःकुरुभिःप्रतीक्षंतेस्यशासनं १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१७ १८ १९ २० २१ उद्योगेऽध्यायः २० तस्य १ २ ३ ॥ ४ ॥ ५ ॥

अपरे पुरुषव्याघ्राः सहस्राक्षौहिणीसमाः सात्यकिर्भीमसेनश्च यमौ च सुमहाब
लौ १७ एकादशैताः पृतनाएकतश्च समागताः एकतश्च महाबाहुर्बहुरूपी धनंज
यः १८ यथा किरीटी सर्वेभ्यः सेनाभ्यो व्यतिरिच्यते एवमेव महाबाहुर्वासुदेवो महा
द्युतिः १९ बहुलत्वं च सेनानां विक्रमं च किरीटिनः बुद्धिमत्त्वं च कृष्णस्य बुद्ध्वा युध्ये
त को नरः २० ते भवंतो यथाधर्मं यथासमयमेव च प्रयच्छंतु प्रदातव्यं मा वः का
लोऽत्यगादयं २१ इत्युद्योगपर्वणि पुरोहितयाने २० वैशंपायन उ० तस्य तद्वचनं श्रु
त्वा प्रज्ञावृद्धो महाद्युतिः संपूज्यैनं यथाकालं भीष्मो वचनमब्रवीत् १ दिष्ट्या कु
शलिनः सर्वे सह दामोदरेण ते दिष्ट्या सहायवंतश्च दिष्ट्या धर्मे च ते रताः २ दिष्ट्या
च संधिकामास्ते भ्रातरः कुरुनंदनाः दिष्ट्या न युद्धमनसः पांडवाः सहबांधवै ३
भवता सत्यमुक्तं तु सर्वमेतन्न संशयः अतितीक्ष्णं तु ते वाक्यं ब्राह्मण्यादिति मे मतिः
४ असंशयं क्लेशितास्ते वने चेह च पांडवाः प्राप्ताश्च धर्मतः सर्वं पितुर्धनमसंशयः ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

६ ७ धृष्टंधर्षणंपुरूंयथास्यात्तथाआतिथ्यंनिरस्कृत्य ८ तत्रपांडवपक्षे ९ तंसमयंकालंतत्रवाक्यं

किरीटीबलवान्पार्थःकृतास्त्रश्चमहारथः कोहिपांडुसुतंयुद्धेविषहेतधनंजयं
६ अपिवज्रधरःसाक्षात्किमुतान्येधनुर्भृतः त्रयाणामपिलोकानांसमर्थइ।
तिमेमतिः ७ भीष्मेब्रुवतितद्वाक्यंधृष्टमातिथ्यमन्युना दुर्योधनंसमालो।
क्यकर्णोवचनमब्रवीत् ८ नतत्रविदितंब्रह्मन्लोकेभूतेनकेनचित् पुन
रुक्तेनकिंतेनभाषितेनपुनःपुनः ९ दुर्योधनार्थेशकुनिर्द्यूतेनिर्जितवान्पुरा
सभयेनगतोरण्यंपांडुपुत्रोयुधिष्ठिरः १० सतंसमयमातिष्ठराज्यमिच्छतिपै
तृकं बलमाश्रित्यमत्स्यानांपंचालानांचमूर्खवत् ११ ॥

त्रयोदशवर्षांतेतःपुनर्वनेवस्तव्यमित्येवंरूपंआश्रित्यनिर्वाह्यपैतृकंराज्यांशंनइच्छतिकिं
तुतदतिक्रमेणैवपैतृकमिच्छतीत्यर्थः ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पादंचतत्रर्थौशामपिकिमुतार्थमित्यर्थः १२ १३ १४ १५ १६ १७ १८ ॥ उद्योगेपुरोहितयानेसप्त
मं २१

दुर्योधनोभयाद्विद्वन्नदद्यात्पादमंततः धर्मतस्तुमहींकृत्स्नांप्रदद्याच्छत्रवेपिच १२
यदिकांक्षंतितेराज्यंपितृपैतामहंपुनः यथाप्रतिज्ञंकालंतंचरंतुवनमाश्रिताः १३
ततोदुर्योधनस्यांकेवर्त्तंतामकुतोभयाः अधार्मिकींतुमाबुद्धिंमौर्ख्यात्कुर्वंतुकेव
लात् १४ अथतेधर्ममुत्सृज्ययुद्धमिच्छंतिपांडवाः आसाद्येमान्कुरुश्रेष्ठान्स्मरि
ष्यंतिवचोमम १५ भीष्मउवाच किंनुराधेयवाचातेकर्मतत्स्मर्तुमर्हसि एकएव
यदापार्थःषड्रथान्जितवान्युधि १६ बहुशोजीयमानस्यकर्मदृष्टंतदैवते
नचेदेवंकरिष्यामोयदयंब्राह्मणोब्रवीत् ध्रुवंयुधिहतास्तेनभक्षयिष्यामपांसु
कान् १७ वैशंपायनउ० धृतराष्ट्रस्ततोभीष्ममनुमान्यप्रसाद्यच अवभर्त्स्यचरा
धेयमिदंवचनमब्रवीत् १८ अस्मद्धितंवाक्यमिदंभीष्मःशांतनवोब्रवीत् पांड
वानांहितंचैवसर्वस्यजगतस्तथा १९ चिंतयित्वातुपार्थेभ्यःप्रेषयिष्यामिसंजयं स
भवान्प्रतियात्वद्यपांडवान्नेवमाचिरं २० सतंसत्कृत्यकौरव्यःप्रेषयामासपांडवान् स
भामध्येसमाहूयसंजयंवाक्यमब्रवीत् २१ इत्युद्योगपर्वणिपुरोहितयानेसमाप्तं २१॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. दिष्ट्या भाग्येनानघ स्थानं नष्टो भूत्वा स्थानं स्थितिमुपस्थितः प्राप्तः १ इति सभाजयेथाः पूजयेथाः १ स्वस्तिमं
टी. तो वयमिति सर्वान्वदेः कृच्छ्रं निरुष्यापि तेषां शान्तिरक्रोधः स्मासु विद्यते मिथ्योपेतानामनिष्कपटानां २
५८

धृतराष्ट्र उ॰ प्राप्तानाहुः संजय पांडुपुत्रानुपप्लव्ये तान्विजानीहि गत्वा अजातश
त्रुं च सभाजयेथा दिष्ट्यानघ स्थानमुपस्थितस्त्वं १ सर्वान्वदेः संजय स्वस्तिमंतः
कृच्छ्रं वासमतदर्हा निरुष्य तेषां शान्तिर्विद्यते स्मासु शीघ्रं मिथ्योपेतानामुपका
रिणां सतां २ नाहं क्वचित्संजय पांडवानां मिथ्यावृत्तिं कांचन जात्वपश्यं सर्वां श्रि
यं ह्यात्मवीर्येण लब्ध्वा पर्याकार्षुः पांडवा मह्यमेव ३ दोषं ह्येषां नाध्यगच्छं परी
क्षन्नित्यं कंचिद्येन गर्हेम पार्थान् धर्मार्थाभ्यां कर्म कुर्वंति नित्यं सुखप्रिया नानुरु
ध्यंति कामात् ४ घर्मं शीतं क्षुत्पिपासे तथैव निद्रां तन्द्रीं क्रोधहर्षौ प्रमादं धृत्या
चैव प्रज्ञया चाभिभूय धर्मार्थयोगात्प्रयतंति पार्थाः ५ त्यजंति मित्रेषु धनानि
काले न संवासाज्जीर्यति तेषु मैत्री यथार्हमानार्थकरा हि पार्थास्तेषां द्वेष्टा नास्त्यजमी
ढस्य पक्षे ६ ॥

मह्यं पर्याकार्षुः मदर्थं परितः आनीतवंतः ३ धर्मार्थाभ्यां धर्मार्थं अर्थार्थं च सुखं प्रीतिः प्रियं पुत्रादि
तदनुरोधेन कामात् धर्मं न त्यजंतीत्यर्थः ४ तन्द्री जाग्रत एव मोहः ५ यथार्हमानं अर्थं च कुर्वंतीति ते ५८

तेजःक्रोधं ७ उत्थानंआरंभकालेएववीर्येनप्रसंगोयस्यउत्थानवीर्यःयत्तेषांभागंहर्तुंशक्यंमन्यतेतत् स्वकृतं
युक्तमितिमन्यतेमोस्यादितिभावः ८ यस्यपदवींयातियस्यानुगाइत्यर्थः तस्यतस्मैप्रदानंभागप्रदानं ९ जिष्णु

अन्यत्रपापाद्विषमान्मंदबुद्धेर्दुर्योधनान्न्यूनतराच्चकर्णात् तेषांहीमोहीनसत्व
त्रियाणांमहात्मनांसंजनयतोहितेजः ७ उत्थानवीर्यःसुखमेधमानोदुर्योधनः
स्वकृतंमन्यतेतत् तेषांभागंयच्चमन्येतबालःशक्यंहर्तुंजीवतांपांडवानां ८ यस्या
र्जुनःपदवींकेशवश्चवृकोदरःसात्यकोजातशत्रुः माद्रीपुत्रौसृंजयाश्चापियांति।
पुरायुद्धात्साधुतस्यप्रदानम् ९ सचैवैकःपृथिवींसव्यसाचीगांडीवधन्वाप्रणुदे
द्रथस्थः तथाजिष्णुःकेशवोप्यप्रधृष्यस्त्रैलोक्यस्याधिपतिर्महात्मा १० तिष्ठेत
कस्तस्यमर्त्यःपुरस्ताद्यःसर्वलोकेषुवरेण्यएकः पर्जन्यघोषान्प्रवपञ्छरौघान्
पतंगसंघानिवशीघ्रवेगान् ११ दिशंह्युदीचीमपिचोत्तरान्कुरून्गांडीवधन्वैकर
थोजिगाय धनंचैषामाहरत्सव्यसाचीसेनानुगान्बलिदांश्चैवचक्रे १२ यश्चैव
देवान्खांडवेसव्यसाचीगांडीवधन्वाप्रजिगायसेंद्रान् उपाहरत्खांडवंजातवेदा
सेयशोमानंवर्धयन्पांडवानां १३ ॥

जेयशीलः १० वरेण्यः भोगमोक्षकामैर्वरणीयः ११ नकेवलंमध्यदेशमेवतयाउदीचींकिंतुउत्तरान्कुरू
न्हिमाचलादप्युदकदेशान्स्वर्गभूमिरूपान् १२ जातवेदसउपाहरत्खांडवमितिपरिणामेनानुषंगः १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म. उ. टी. ५१

१४ १५ एतत्परिरक्ष्यमाणंबलंभीष्मद्रोणादीनांसामर्थ्यंनतदपिसत्त्वंतथापितान्पांडवान्शाप्यनास्तीतिमन्ये
नतत्तुमित्यर्थः १७ प्रवर्हःश्रेष्ठःसंत्यक्तात्मात्यक्तदेहः १८ सहोषितोवर्षमात्रंचरितार्थःगोग्रहेस्थितः
मात्स्यानांमत्स्यदेशजानां १९ केकयेभ्योदेशेभ्यःप्रवरुद्धाःबहिर्निःसारिताःपंचभ्रातरःकेकयानां

गदाभृतांनास्तिसमोत्रभीमाद्धस्त्यारोहोनास्तिसमश्चतस्य रथेर्जुनाद्दारुहीनमेनं
बाह्वोर्बलेचायुतनागवीर्य १४ सुशिक्षितःकृतवैरस्तरस्वीदहेतदग्धांस्तरसाधा
र्तराष्ट्रान् सदात्यमर्षीनबलात्सशक्योयुद्धेजेतुंवासवेनापिसाक्षात १५ सुचेतसौ
बलिनौशीघ्रहस्तौसुशिक्षितौभ्रातरौफाल्गुनेन श्येनौयथापक्षिपूगान्रुजंतौ
माद्रीपुत्रौशोषयेतांनृशत्रून १६ एतद्बलंशर्मास्माकमेवंयत्सत्त्वंतान्प्राप्यनास्ती
तिमन्ये तेषांमध्येवर्तमानस्तरस्वीधृष्टद्युम्नःपांडवानामिहैकः १७ सहामात्यःसो
मकानांप्रवर्हःसंत्यक्तात्मापांडवार्थश्रुतोमे अजातशत्रुंप्रसहेतकोन्योयेषांस
स्यादग्रणीर्वृष्णिसिंहः १८ सहोषितश्चरितार्थोवयस्थोमात्स्येयानामधिपोवैवि
राटःसवैसपुत्रःपांडवार्थेचशश्वद्युधिष्ठिरेभक्तइतिश्रुतंमे १९ अवरुद्धारथि
नःकेकयेभ्योमहेष्वासाभ्रातरःपंचसंति केकयेभ्योराज्यमाकांक्षमाणायुद्धार्थिन
श्चानुवसंतिपार्थान् २० ॥ यतःकेकयेभ्यःराज्यंप्राप्तुमिच्छंतः पूर्वंअस्मदीयाः अपिसंश्र
तिपांडवानश्र[illegible]यंतितेनस्वपक्षहानिःपरपक्षपुष्टिश्चदर्शिता २० ॥

५१

२१ २२ समितिसंग्रामे समित्याजिसमितयुद्धंइतिकोषः अप्रतिवीर्यंतेजाः अनुल्यतेजाः २३ कालिंःप्रद्युम्न
सत्नल्पे २४ चेदिपतिंशिशुपालं २५ कृत्स्नोममर्देसमरेणान्वयः ज्यांधनुर्गुणंकर्षतांधनुर्भृतां २६ यम्

सर्वांश्चवीरान्पृथिवीपतीनांसमागतान्पांडवार्थेनिविष्टान् शृणानहंभक्तिमतःशृणो
मिश्रीत्यायुक्तान्संश्रितान्धर्मराजे २१ गिर्याश्रयाडुर्गनिवासिनश्चयोधाःपृथिव्यां
कुलजातिशुद्धाः म्लेच्छाश्चनानायुधवीर्यवंतःसमागताःपांडवार्थेनिविष्टाः २२
पांड्यश्चराजासमितींद्रकल्पोयुद्धेप्रवीरैर्बहुभिःसमेतः समागतःपांडवार्थेमहात्मा
लोकप्रवीरोऽप्रतिवीर्यतेजाः २३ अस्त्रंद्रोणादर्जुनाद्वासुदेवात्कृपाद्भीष्माद्येनकृतं
शृणोमि यंतंकालिंप्रतिममाहुरेकंससात्यकिःपांडवार्थेनिविष्टः २४ उपाश्रिता
श्चेदिकरूषकाश्चसर्वोद्योगैर्भूमिपालाःसमेताः तेषांमध्येसूर्यमिवातपंतंश्रिया
वृतंचेदिपतिंज्वलंतं २५ अस्तंभनीयंयुधिमन्यमानोज्याकर्षतांश्रेष्ठतमंपृथिव्यां
सर्वान्साहंक्षत्रियाणांनिहत्यप्रसह्यकृत्स्नस्तरसासममर्द २६ यशोमानौवर्धय
न्पांडवानांपुराभिनच्छिशुपालंसमीक्ष्य यस्यसर्वेवर्द्धयंतिस्ममानंकरूषराजप्र
मुखानरेंद्राः २७ ॥

मानंवर्द्धयंतितंशिशुपालंअभिनदितिसंबंधः २७ ॥ ५ ॥

म.उ.
टी.
४२

वेदिपतिंविहायअन्येतंकृष्णंकेशवइवनतनकेपिकिंतुसएवतेनसहस्पर्द्धांचकारेत्यर्थः २८ आशंसमा
नोजयमितिशेषः अशेतशयनंकृतवान्शिशुपालः २९ यत्यतः अवेदयंतत्तापितवंतःचार

तमसह्यंकेशवंतत्रमत्वासुग्रीवयुक्तेनरथेनकृष्णं संप्राद्रवंश्चेदिपतिंविहायसिंहं
दृष्ट्वात्क्षुद्रमृगाइवान्ये २८ यस्तंप्रतीपस्तरसाप्रत्युदीयादाशंसमानोद्वैरथेवासुदे
वं सोऽशेतकृष्णेनहतःपरासुर्वातेनेवोन्मथितःकर्णिकारः २९ पराक्रमंमेयद
वेदयंततेषामर्थेसंजयकेशवस्य अनुस्मरंस्तस्यकर्माणिविष्णोर्गावल्गणेनाधि
गच्छामिशान्ति ३० नजातुताञ्छत्रवोन्यःसहेतयेषांसस्यादग्रणीर्वृष्णिसिंहः
प्रवेपतेमेहृदयंभयेनश्रुत्वाकृष्णावेकरथेसमेतौ ३१ नचेद्गच्छेत्संगरंमंदबु
द्धिस्ताभ्यांसुतोमेविपरीतचेताः नोचेत्कुरून्संजयनिर्दहेतामिंद्राविष्णूदैत्य
सेनांयथैव ३२ ॥

इतिशेषः ३० कृष्णौवासुदेवार्जुनौ ३१ संगरंचेन्नगच्छेत्तदाशर्मलभेत्नोचेत् अन्यथाइंद्रो
विष्णुश्चताविवअर्जुनवासुदेवौनिर्दहेतामित्यन्वयः ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्राकृपुत्रत्वात् प्राकृसमः धर्मपुत्रत्वात् धर्मारामः ३३ निकृतोवंचितः मनस्वीजितमनाः ३४ मन्योः
क्रोधात् ३५ स्थानेज्ञानन्युक्तंपश्यन् ३६ महामात्रेमहाभागम् ३७ शान्तिमीप्सतीतिव

मतोहिमेप्राकृसमोधनंजयःसनातनोहृत्सखिवीरस्त्वविल्तुः धर्मारामोह्रीनिषेव
स्तरस्वीकौंतीपुत्रःपांडवोजातप्राकृः ३३ दुर्योधनेननिकृतोमनस्वीनोचेतकृद्धः
प्रदहेद्धार्तराष्ट्रान् नाहंतथाह्यर्जुनाद्वासुदेवाद्भीमाद्वाहंयमयोर्वाविभेमि ३४
यथाराजःक्रोधदीप्तस्यसूतमन्योरहंभीततरःसदैव महातपाब्रह्मचर्येणयु
क्तःसंकल्पोयोमानसस्तस्यसिध्येत् ३५ तस्यक्रोधंसंजयाहंसमीक्ष्यस्थाने
जानन्भृशमस्म्यद्यभीतः सगच्छशीघ्रंप्रहितोरथेनपांचालराजस्यचमूंनिवे
शनं ३६ अजातशत्रुंकुशलंस्मपृच्छेः पुनःपुनःप्रीतियुक्तंवदेस्त्वं जनार्दनंचा
पिसमेत्यतातमहामात्रेवीर्यवतामुदारं ३७ अनामयंमद्वचनेनपृच्छेर्धृतरा
ष्ट्रःपांडवैःशांतिमीप्सुः नतस्यकिंचिद्वचनंनकुर्यात्कौंतीपुत्रोवासुदेवस्यसूत ३८
प्रियश्चैषामात्मसमश्चकृष्णोविद्वांश्चैषांकर्मणिनित्ययुक्तः समानीतान्पांडवा
न्संजयांश्चजनार्दनंयुयुधानंविराटं ३९ ॥ इत्यध्याहारःसमानीतान् एकत्रस्थितान् ३९

म.उ.
टी.
४३

नमूर्छयेत्क्रोधमितिशेषः ५ अध्यायः २२ राज्ञः १२ प्रतीतोहृष्टः ३ ४ यत्रप्राप्तवर्गेत्वंस्वस्तिका

अनामयंमद्वचनेनपृच्छेःसर्वांस्तथाद्रौपदेयांश्चपंच यद्यत्तत्रप्राप्तकालंपरेभ्य
स्त्वंमन्येथाभारतानांहितंच ५ तद्भाषेथाःसंजयराजमध्येनमूर्छयेद्यन्नचयु
द्धहेतुः इत्युद्योगपर्वणिसंजययाने २२ वैशंपायनउ॰ राज्ञस्तुवचनंश्रुत्वाधृत
राष्ट्रस्यसंजयः उपप्लव्यंययौद्रष्टुंपांडवानमितौजसः १ सतुराजानमासाद्य
कुंतीपुत्रंयुधिष्ठिरं अभिवाद्यततःपूर्वंसूतपुत्रोभ्यभाषत २ गावल्गणिः
संजयःसूतसूनुरजातशत्रुमवदत्प्रतीतः दिष्ट्याराजंस्त्वामरोगंप्रपश्येसहा
यवंतंचमहेंद्रकल्पं ३ अनामयंपृच्छतित्वांबिकेयोवृद्धोराजाधृतराष्ट्रोम
नीषी कच्चिद्भीमःकुशलीपांडवाग्र्योधनंजयस्तौचमाद्रीतनूजौ ४ कच्चि
त्कृष्णाद्रौपदीराजपुत्रीसत्यव्रतावीरपत्नीसपुत्रा मनस्विनीयत्रचवांछसित्व
मिष्टान्कामान्भारतस्वस्तिकामः ५

मःकल्याणार्थीश्चइष्टान्कामान्भोग्यान्गजरथादीन्वांछसितेसर्वेकुशलिनःकच्चिदिति

उद्योग ४३

६ ७ ८ द्युतिरस्मासु स्नेहः ८ ९ कुरुभ्यः स्पृहयंतिकच्चिदित्यनुषंगः कुरूणांकल्याणं अपृष्ट्वैनवो

युधिष्ठिरउ॰ गावल्गणेसंजयस्वागतंतेप्रीयामहेतेवयंदर्शनेन अनामयंप्रति।
जानेतवाहंसहानुजैःकुशलीचास्मिविद्वन् ९ चिरादिदंकुशलंभारतस्यश्रुत्वा
राज्ञःकुरुवृद्धस्यसूत मन्येसाक्षाद्दृष्टमहंनरेंद्रंदृष्ट्वैवत्वांसंजयप्रीतियोगात्
७ पितामहोनःस्थविरोमनस्वीमहाप्राज्ञःसर्वधर्मोपपन्नः सकौरव्यःकुशली।
तातभीष्मोयथापूर्वंवृत्तिरस्त्यस्यकच्चित् ८ कच्चिद्राजाधृतराष्ट्रःसपुत्रोवैचित्र
वीर्यःकुशलीमहात्मा महाराजोबाह्लिकःप्रातिपेयःकच्चिद्विद्वान्कुशलीसूत
पुत्र ९ ससोमदत्तःकुशलीतातकच्चिद्भूरिश्रवाःसत्यसंधःशलश्च द्रोणःसपु
त्रश्चकृपश्चविप्रोमहेष्वासाःकच्चिदेतेप्यरोगाः १० सर्वेकुरुभ्यःस्पृहयंतिसंजय
धनुर्धरायेपृथिव्यांप्रधानाः महाप्राज्ञाःसर्वशास्त्रावदाताधनुर्भृतांमुख्यतमाः
धनुर्धरायेपृथिव्यांप्रधानाः महाप्राज्ञाःसर्वशास्त्रावदाताधनुर्भृतंःकच्चिदेतेप्यरोगाः येषांराष्ट्रेनि
पृथिव्यां ११ कच्चिन्मानंतातलभंतएतेधनुर्भृतःकच्चिदेतेप्यरोगाः येषांराष्ट्रेनि
वसतिदर्शनीयोमहेष्वासःशीलवान्द्रोणपुत्रः १२ ॥

घ्नंतिकच्चिदितिभावः ११ येषांराष्ट्रेवसतितेषांकुरूणांमध्येधनुर्भृतःकच्चिन्मानंलभंते १२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भं.उ.
टी.
४४

१३ महानस्योमहानसेपरिचारिकाः वध्वः स्नुषाः अव्यलीकाः निष्कपटाः १४ वृत्तिं जीविकां दातुमि
तिशेषः दायान्महतान् ग्रामादीन् १५ अतिक्रमात्त्वोपेततः स्तुताद्दीन्नोपकर्षेणयोज्य १६

वैश्यापुत्रः कृशालीतात कच्चिन्महाप्राज्ञो राजपुत्रो युयुत्सुः कर्णोमात्यः कृश।
लीतात कच्चित्त्वयोयनोयस्य मंदो विधेयः १२ स्त्रियो वृद्धा भारतानां जनन्यो।
महानसोदासभार्याश्च सूत वध्वः पुत्रा भागिनेया भगिन्यो दौहित्रा वा कच्चि।
दव्यलीकाः १४ कच्चिद्राजा ब्राह्मणानां यथावत् प्रवर्तते पूर्ववत्तात वृत्तिं
कच्चिद्दायान्मामकान् धार्तराष्ट्रो द्विजातीनां संजयनोपहंति १५ कच्चिद्राजा धृ
तराष्ट्रः सपुत्र उपेक्षते ब्राह्मणातिक्रमान्वै स्वर्गस्य कच्चित् यावर्त्मभूतामुपेक्षते
तेषु सदैव वृत्तिं १६ एतज्ज्योतिरुत्तमं जीवलोके शुक्लं प्रजानां विहितं विधा
त्रा तेचोद्दोषं ननियच्छंति मंदाः कृत्स्नो नाशो भविता कौर
वाणां १७ ॥

एतद्ब्राह्मणानां वृत्तेः पालनं ज्योतिः परलोकप्रकाशकं जीवलोके इह शुक्लं यशस्करं दोषं
लोभं ब्राह्मणवृत्त्यपहारे न नियच्छंति १७ ॥

बुभूषते शापयितुमिच्छति भेदेन जिजीविषं ति शत्रुभिर्भेदिताः संतस्तद्द्वारैवार्थं नैर्जीवितुमिच्छंति १८ १९ पार्थस्य
अर्जुनस्य कृत्यं स्मरंति युधां संग्रामाणां प्रणेतुः निर्वाहकस्य ग्राहुः राज्यं हीति घोषः धामेति पाठे धामधाम्य
ग्रांतिं गच्छेत्यर्थः २० मौर्व्याः भुजः कौटिल्यं तस्य अग्रमिवाग्रे शरसंधादेशः ततः प्रहितान प्रेषितान्

कच्चिद्राजा धृतराष्ट्रः सपुत्रो बुभूषते वृत्तिममात्यवर्गे कच्चिन्न भेदेन जिजीविषे
ति सुहृद्रूपा दुर्हृदश्चैकमत्यात् १८ कच्चिन्न पापं कथयंति तात ते पाण्डवानां कुर
वः सर्व एव द्रोणः सपुत्रश्च कृपश्च वीरो नास्मासु पापानि वदंति कच्चित् १९ कच्चि
द्राष्ट्रं धृतराष्ट्रः सपुत्रः समेत्याहुः कुरवः सर्व एव कच्चिद्दृष्ट्वा दस्युसंघान्समेतान्
स्मरंति पार्थस्य युधां प्रणेतुः २० मौर्वीभुजाग्रप्रहितान्समंतात् दोधूयमानेन धनु
र्धरेण गांडीवघोषान्स्तनयित्नुघोषान् जिह्मगान् कच्चिदनुस्मरंति २१ न चाप
श्यं कंचिदहं पृथिव्यां योधं समं वाधिकमर्जुनेन यस्यैकषष्टिर्निशितास्तीक्ष्णधा
राः सुवाससः संमतो हस्तवापः २२ गदापाणिर्भीमसेनस्तरस्वी प्रवेपयञ्छत्रु
संघाननीके नागः प्रभिन्न इव नड्वलेषु चंक्रम्यते कच्चिदेनं स्मरंति २३ ॥

२१ सुवाससः सुपुंखाः हस्तवापो हस्तक्षेपः वचनभेदेपि सामानाधिकरण्यं शातं स्त्रियोऽस्य परिग्रह इतिव
देकषष्टिर्बाणाः प्रस्यणकेन यत्नेन प्रक्षेप्या इत्यर्थः २२ नड्वलेषु सतृणेषु स्थलेषु २३ ॥ ४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ देवनकरेकांग्रग्नर्न्दंताः क्रोधावेशात् कुरवस्तत्र वर्त्स्यंति तस्मिन्निति दैवतक्रूरः संग्रामः तस्मिन् प्रसन्न त्विपन् ५४
टी॰ ५५ जयत्यर्जुनः ५६ अहं अर्जुनेन सह तदा राष्ट्रे द्वैरथकः प्रेरकोऽभवमित्यर्थः भीमसेनश्च माद्रीसुतयोः द्वै
५५ द्वैरथकोः भूतः पंचभिरप्यस्माभिस्सेमो चिताः इत्यर्थः ५७ नकर्मणेति सर्वात्मना सर्वोपायैः दानभे

माद्रीपुत्रः सहदेवः कलिंगान् समागतान् जयद्दंतकूरे वामेनास्यन् दक्षिणेनै
व यो वै महाबलं कच्चिद्देनं स्मरंति ५४ पुराजेतेन नकुलः प्रेषितो यः शिवीस्त्रिगर्तान्।
संजयपश्यतस्ते दिशं प्रतीचीं वशमानयन्मे माद्रीसुतं कच्चिद्देनं स्मरंति ५५ प
राभवो द्वैतवने य आसीत् दुर्मंत्रिते घोषयात्रागतानां यत्र मंदाञ्छत्रुवशं प्रयाता
नमोचयद्भीमसेनो जयश्च ५६ अहं पश्चादर्जुनमभ्यरक्षं माद्रीपुत्रौ भीमसेनो।
भ्यरक्षत् गांडीवधन्वा शत्रुसंघान् उदस्य स्वस्त्यागमत्कच्चिद्देनं स्मरंति ५७ नक
र्मणा साधुनैकेन नूनं स्वं वशाकं वै भवतीह संजय सर्वात्मना परिजेतुं वयं चेन्न
शक्नुमो धृतराष्ट्रस्य पुत्रं ५८ अध्यायः ॥

इदं द्वैध्येतत् धृतराष्ट्रस्य पुत्रं जेतुं न शक्नुमस्तर्हि एकेन साधुना कर्मणा सामाख्येनोपायेन स्ववंस ॥
त्वेन जेतुं नैव वशाकं भवति साम्नाः साध्ये हि दानादयः प्रयुज्यंते तैरप्यसाध्यः कथं साममात्रे ५५
ण साध्यः स्यात् अतो द्वैधैकसाध्यः स इति भावः पाठांतरे परिणेतुं स्थापयितुं कर्तुं ५८ अथो गो संजय उ॰ ५५

१२ यदिति अद्रुग्धेष्वनपकृतेषु धार्त्तराष्ट्रेषु यत् युष्माकं द्रुग्धवत् अपकृतस्येव सोनः कृतवान् हिंस्रः
तद्धर्मादनपेतं सोनधर्म्यः क्रोधोयद्वर्त्ततेतत्रसाधुद्रुग्धैरपिभवद्भिस्तेषुप्रव्राजनकालेपिद्रोहोनकृतइदा

संजयउवाच यथार्हसेपांडवतत्तथैवकुरून्कुरुश्रेष्ठजनंचपृच्छसि अनाम
यास्तातमनस्विनस्तेकुरुश्रेष्ठान्पृच्छसिपार्थयांस्त्वं १ संत्येववृद्धाःसाधवो
धार्त्तराष्ट्रेसंत्येवपापाःपांडवतस्यविद्धि दद्यादरिपुभ्योपिहिधार्त्तराष्ट्रःकुतोदा
यांल्लोपयेद्ब्राह्मणानां २ यद्युष्माकंवर्त्ततेसोनधर्म्यमद्रुग्धेषुद्रुग्धवत्तन्नसाधुः
मित्रध्रुक्स्याद्धृतराष्ट्रःसपुत्रोयुष्मान्द्विषन्साधुवृत्तानसाधुः ३ नचानु
जानातिभृशंचतप्यतेशोचत्यंतःस्थविरोजातशत्रो शृणोतिहिब्राह्मणानांस
मेत्यमित्रद्रोहःपातकेभ्योगरीयान् ४ स्मरंतितुभ्यंनरदेवसंयुगेयुद्धेचजिष्णो
श्चयुधांप्रणेतुः समुत्कृष्टेदुंदुभिशंखशब्देगदापाणिंभीमसेनंस्मरंति ५ माद्री
सुतौचापिरणाजिमध्येसर्वादिशःसंपतंतौस्मरंति सेनांवर्षंतौशरवर्षैरजस्रं
महारथौसमरेदुष्प्रकंप्यौ ६ ॥

नीतस्ततरांनकर्त्तव्यइत्याशयः तेनकृतंभोत्स्यंत्येवेत्या
ह मित्रध्रुगिति ३ नचानुजानातिसंधिनानुमोदते तप्यतेचपुत्रनाशभयात् गरीयानितिमृत्यो
तिचेतिसंबंधः ४ कच्चिदस्मान्स्मरंतीतिपृष्टंतत्राहस्मरंतीतितुभ्यंत्वा ५ ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
५६

अनागतं अज्ञातं अदृष्टमित्यर्थः १८ ९ १० संजययाने २४ समा १२३ रथंमेऽयोजयत् २ इहआगंतेवा

नत्वेवमन्येपुरुषस्यराजन्ननागतंज्ञायतेयद्भविष्यं त्वंचैवतथासर्वधर्मोपपन्नःश्राम्यः
क्लेशंपांडवकृत्स्नंनृप ७ त्वमेवैतत्कृत्स्नगतस्यभूयःशमीकुर्याःअजातशत्रो न
कामार्थंसंत्यजेयुर्हिधर्मंपांडोःसुताःसर्वएवेंद्रकल्पाः ८ त्वमेवैतत्स्वस्तयाजात
शत्रोशमीकुर्यायेनशर्माप्नुयुस्ते धार्तराष्ट्राःपांडवाःसृंजयाश्चयेचाप्यन्येमन्त्रिवि
ष्ठानरेंद्राः ९ यन्माब्रवीद्धृतराष्ट्रोनिशायां अजातशत्रोवचनंपिताते सहामा
त्यःसहपुत्रश्चराजन्समेत्यतांवाचमिमांनिबोध १० इत्युद्योगपर्वणि २४ यु
धिष्ठिरउ॰ समागताःपांडवाःसृंजयाश्चजनार्दनोयुयुधानोविराटः यत्तेवाक्यं
धृतराष्ट्रानुशिष्टंगावल्गणेब्रूहितत्सूतपुत्र १ संजयउ॰ अजातशत्रुंचवृकोद
रंचधनंजयंमाद्रवतीसुतौच आमंत्रयेवासुदेवंचशौरिंयुयुधानंचेकितानंवि
राटं २ पांचालानामधिपंचैववृद्धंधृष्टद्युम्नंपार्षतंयाज्ञसेनिं सर्वेवाचंशृणुते
मांमदीयांवक्ष्यामियांभूतिमिच्छन्कुरूणां ३ शमंराजाधृतराष्ट्रोभिनंदन्नयो
जयत्त्वरमाणोरथंमे सभ्रातृपुत्रस्वजनस्यराज्ञस्तद्रोचतांपांडवानांशमोस्तु ४ ॥

न्तोवचनंपांडवानांरोचतांततश्चशमोस्तु ४ ॥ ४ ॥ ३ ५६

संस्थानेनाकारेणमार्दवेनकृपयाआर्जवेनअकौटिल्येनअन्तःशंसाःअनृशंसाःह्रीनिषेवालज्जापरायणाः
५ हीनंहित्वंसत्त्वंबुद्धिंसत्त्वंसाधुत्वंवा भीमसेनाःभीषणसेन्याः ६ अभावसंस्थःस्वरूपेणवपरिसमाप्तः
तयःतत्रततप्रथमार्थेत्रल् जयोपिबंधुनाघ्रात्मराजयएव ७ ज्ञातीनांदुर्योधनादीनांकार्यंज्ञोष

सर्वैर्धर्मैःसमुपेतास्तुपार्थाःसंस्थानेनमार्दवेनार्जवेन जाताःकुलेष्वनृशंसाव
दान्याह्रीनिषेवाःकर्मणांनिश्चयज्ञाः ५ नयुज्यतेकर्मयुष्मासुहीनंसत्त्वंहिवस्ता
दृशंभीमसेनाः उद्भासतेह्यंजननबिंदुवच्छुभ्रेवस्त्रेयद्भवेत्किल्बिषंवः ६ सर्वक्ष
योदृश्यतेयत्रकृत्स्नःपापोदयोनिरयोभावसंस्थः कस्तत्कुर्याज्जातुकर्मप्रजान
न्पराजयोयत्रसमोजयश्च ७ तेवैधन्यायैःकृतंज्ञातिकार्यंतेवैपुत्राःसुहृदोबां
धवाश्च उपक्रुष्टंजीवितंसंत्यजेयुर्यतःकुरूणांनियतोवैभवःस्यात् ८ तेचेत्त
कुरूननुशिष्याथपार्थान्निर्णीयसर्वान्द्विषतोनिगृह्य समंवस्तज्जीवितंमृ
त्युनास्याद्यज्जीवध्वंज्ञातिवधेनसाधु ९ कोह्येवयुष्मान्सहकेशवेनसचेकितान
नान्पार्षतबाहुगुप्तान् समात्यकीन्विषहेतप्रजेतुंलब्ध्वापिदेवान्सचिवान्सहे
द्रान् १० ॥ यात्रायांगंधर्वेभ्योमोचनादिकं उपक्रुष्टंनिंदितं ८ निर्णीयनिश्चितंकृत्वानिगृ
ह्यहत्वेत्यर्थः ९ युद्धेजयपराजयावनित्यावित्याह कोहीतिद्वाभ्यां ११ ॥

म.उ. ११ १२ निर्धर्मार्थो धर्मार्थयोर्विरुद्धं कर्म कथं कुर्युः प्रणतोस्मीति शेषः १३ एवमेवं वचनमिति हि रूपाविकल्प
टी. वाक्यं न कुर्यात् १४ प्राणानिति पततभवता जयोपि पराजय एवेति दानवचनं कौरवान्कृत्स्नान् जयेनेति नीती।
५० सावचनं कथं स्वस्ति स्यादित्स्व भयनाशवचनं च साधनार्थं संधिकार्यस्य सिद्ध्यर्थं ब्रवीमि न तु युष्मान्

कौरवान्कृत्स्नान्द्रोणभीष्माभिगुप्तानश्वत्थाम्ना शल्यकृपादिभिश्च रणे विजेतुं विषहेत
राजन्राधेयगुप्तान्सह भूमिपालैः महद्बलं धार्तराष्ट्रस्य राज्ञः कौ वै शक्तो हन्तुम
लीयमाणः सोहं जये चैव पराजये च निःश्रेयसं नाधिगच्छामि किंचित् १२ कथं
हि नीचा इव दौष्कुलेया निर्धर्मार्थं कर्म कुर्युश्च पार्थाः सोहं प्रसाद्य प्रणतो वासुदे
वं पंचालानामधिपं चैव वृद्धं १३ कृतांजलिः शरणं वः प्रपद्ये कथं स्वस्ति स्यात्कु
रुसृंजयानां न ह्येवमेवं वचनं वासुदेवो धनंजयो वा जातु किंचिन्न कुर्यात् १४ प्राणा
न्दद्याद्याच्यमानः कुतोन्यदेतद्विद्वन्साधनार्थं ब्रवीमि एतद्राज्ञो भीष्मपुरोगमस्य
मतं यद्वः शांतिरिहोत्तमा स्यात् १५ उद्योगपर्वणि २५ युधिष्ठिर उ० कां नु वाचं संजय
मे शृणोषि युद्धैषिणीं येन युद्धाद्बिभेषि अयुद्धं वै तात युद्धाद्गरीयः कस्तल्लब्ध्वा जातु।
युध्येत सूत १ अकुर्वतश्चेत्पुरुषस्य संजय सिध्येत्संकल्पो मनसा यं यमिच्छेत् न
कर्म कुर्याद्विदितं ममैतदन्यत्र युद्धाद्बहु यल्लघीयः २ ॥

भीषयामीत्यर्थः १५ संजयवाक्ये २५ कां न्वित्यकुर्वतश्चेत्संकल्पः सिध्येत्तर्हि कर्म न कुर्यात् अस्मि
न्नावपि युद्धादन्यत्र अन्यत् अत्रापि प्रथमार्थं बल लघीयोपि कर्म कुर्यान्न तु युद्धम् २॥ २ ५०

ग्रहीनं ग्रनपगतं २ धर्मोदयं सुखं निदाघे गंगावगाहादिजं नत्वधर्मोदयं हिंसादि ततस्तो वस्तुतः सुखमेवं क
र्म दुःखमेव यतः कृच्छ्रोपायं क्लेशसाध्यं तद्धि कृतः कर्म कुर्वंतीत्याशंक्याह सुखमिति ४ कामाभि।
ध्याविषयध्यानं यथेति सर्वात्मना विषयविस्मरणे महत्सुखमस्तीति भावः भोगात्विच्छामतानां।
संभवतीत्याह यथेति ५ उक्तमर्थं प्रकृते योजयति संपश्येति अस्माभिर्वित्यक्तयार्तराष्ट्रान्नग्रेत।

कृतो युद्धं नाविनयो वगच्छेत्को देवशास्त्राद्धि गृणीत युद्धं सुखेषिणः कर्म कुर्वंति पा
र्थाधर्मोदर्हीनं यच्च लोकस्य पथ्यं २ धर्मोदयं सुखमाशंसमानः कृच्छ्रोपायं तत्त्व
तः कर्म दुःखं सुखं प्रेप्सुर्विजिघांसुस्तु दुःखं य इंद्रियाणां प्रीतिरसानुगामी ४ का
माभिध्या स्वशरीरं दुनोति यया प्रयुक्तो न करोति दुःखं यथेध्यमानस्य समिद्धते
जसो भूयो बलं वर्धते पावकस्य ५ कामार्थलाभेन तथैव भूयो न तृप्यते सर्पिषे
वाग्निरिद्धः संपश्यथैं भोगचयं महांतं सहास्माभिर्धृतराष्ट्रस्य राज्ञः ६ न चाश्रेया
नीश्वरो विग्रहाणां नाश्रेयान्वै गीतशब्दं शृणोति नाश्रेयान्वै सेवते माल्यगंधान्न वा ॥ १ ॥

भोग्याह पंचाधिकेन पुत्रशतेन सह धृतराष्ट्रस्य भोगं महांतं पश्य अथापि कृतं तं तस्यैव भवत्विति बुध्या
स्मान् राज्यात् दूरीकृतवान् ततो भोगानत्र स्मिन्नलभत इति भावः ६ पितृव्यनिंदा दोषाद्भीतः पुनरा
ह नाश्रेयानिति यः पुण्यवत्तरः स विग्रहाणामीश्वरो भवति परैः सह विरोधं कृत्वा स्वोत्कर्षं न करोति
अन्यस्तु तेनैव नश्यतीत्यतः स पुण्यवत्तर एव अस्मद्दोषात्वयं वने दुःखमनुभवामो न तु पापपरोधेनेति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰ ३॰
टी॰
५८

शावारान् हित्वावासांसि सिसे विवत्से परिधित्से अन्यथा श्रेयांश्चेद्राजा तर्हि अस्मान् कुरुभ्यः कथं संशृणादे
त हस्तीकुर्यात् शत्रूणां राज्याद्भ्रष्टान् हि पुण्यवतामेव कर्मना श्रेयस्तामितिभावः अत्रेति यद्यप्येवं तथा
पि अंतर्दाहकरोयंकामः अबुधस्य दुर्योधनादेरेव उचितो न बुधस्यास्मदादेरित्यर्थः शरीरे शरीरमध्ये
स्थितं हृदयं दहतीति खेदयति ८ अबुधत्वमेवाह स्वयमिति विषमस्थः संकटस्थः सन्परेषु करो

नाश्रेयान्वै शावारान्संविवत्से कथं त्वस्मान्संप्रणदेत्कुरुभ्यः अत्रैव स्मादबुध।
स्यैव कामः प्रायः शरीरे हृदयं दुनोति ८ स्वयं राजा विषमस्थः परेषु सामर्थ्य
मन्विच्छति तन्न साधु यथात्मनः पश्यति वृत्तमेवं तथा परेषामपि सोऽभ्युपैत ९
आसन्नमग्निं तु निदाघकाले गंभीरकक्षे गहने विसृज्य यथा विवृद्धे वायुवशेन शो
चेत् तेमं मम त्वः शिशिरव्यपाये १० प्राप्तैश्वर्यो धृतराष्ट्रस्य राजा लालप्यते संज
यकस्य हेतोः अनर्ह्य दुर्बुद्धिमनार्जवे रतं पुत्रं मंदं मूढं ममेति शृणोति ११ अनाप्तवचा
मृतमस्य वाचः सुयोधनो विदुरस्याप्तमन्य सुतस्य राजा धृतराष्ट्रः प्रियैषी संबुध्य
मानो विशते धर्ममेव १२ मेधाविनं ह्यर्थकामं कुरूणां बहुश्रुतं वाग्मिनं शीलवंतं ॥ ५६ ॥

रिपु आत्मनो वृत्तं अशक्तत्वं तथा परेषां कर्णादीनामपि सदुर्योधनोभ्युपैत ९ गंभीरकक्षे बहुतृणेग
हने वने तेमं शोचेत् मम सुखं नास्तीति शोकं कुर्यात् ममत्वः तस्मात् दाहात् आत्मानं मोचयितुमिच्छुः
शिशिरव्यपाये वसंते तत्रापि निदाघकाले दाहकाले मध्याह्ने १० लालप्यते दीनवत् भाषते मंदं
अभाग्यं ११ विदुरस्य वाचोऽवमन्य सुतस्य प्रियैषी अधर्ममेव संविशते आश्रयते १२ कुरुभ्यः कुरू ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

असौराजासुतस्यप्रियैषीधर्मकामोऽप्रजाहात्त्यक्त्वानितिहृद्योःसंबंधः ईर्ष्योःपरोत्कर्षासहिष्णोःसं
रंभिणःक्रोधिनःमन्युवशानुगस्यदैन्यभाजोकर्णादीनामनुगस्यदौर्हृदैःपापैःभावितस्यदूजित
स्य ४ अनेयस्यअश्रितानीयस्यअश्रेयसः अभ्यागमस्य अपश्यमानःपश्यन्नपि ५ अशंसोविदुरे

मानघ्नस्यासौमानकामस्यचेर्ष्योःसंरंभिणश्चार्थधर्मौतिरस्य दुर्भाषिणो।
मन्युवशानुगस्यकामात्मनोदौर्हृदैर्भावितस्य ४ अनेयस्याश्रेयसोदीर्घमन्यो
र्मित्रद्रुहःसंजयपापबुद्धेःसुतस्यराजाधृतराष्ट्रःप्रियैषीप्रपश्यमानःप्रजह्या
द्धर्मकामौ ५ तदैवमेसंजयदीव्यतोभून्मतिःकुरूणामागतःस्यादभावःका
व्यांवाचंविदुरोभाषमाणोनविंदतेयद्धृतराष्ट्रात्प्रशंसां ६ क्षत्तुर्यदानान्वव।
र्तंतबुद्धिंकृच्छ्रंकुरून्नतदाभ्याजगाम यावत्प्रज्ञामन्ववर्तंततस्यतावत्तेषां।
राष्ट्रवृद्धिर्बभूव ७ तदर्थलुब्धस्यनिबोधमेयेमंत्रिणोधार्तराष्ट्रस्यसूत
दुःशासनःशकुनिःसौबलश्चगावल्गणेपश्यसंमोहमस्य ८ सोहंनपश्य
मिपरीक्षमाणःकथंस्वस्तिस्यात्कुरुसंजयानां आत्तैश्वर्योधृतराष्ट्रःपरेभ्यःप्रव्रा
जितेविदुरेदीर्घदृष्टौ ९ ॥

णासमप्युक्तमितिस्तुतिंधृतराष्ट्राद्विदुरोनलेभे ६ ७ तस्मि
न्लुब्धेशमःनउपलभ्यःयःमंत्रेममवनप्रतिगमनेसतिसर्वस्वकमेवार्थमन्यतेइतियोजना ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
५९

२० पारणीयं जेतुं शक्यं युद्धानि गोग्रहादौ आसन् ह्रीपो ह्रीपवनपुङ्गवाहेणउह्यमानमुपाश्रयः २१
यथेति गंधर्वेनाबंधनमाप्तिं सूचयति २२ जानेनीति अविद्यमाने इतिच्छेदः २३ अनवधवज्ञाती
आशंसतेवैधृतराष्ट्रः सपुत्रो महाराज्यमसपत्नं पृथिव्यां तस्मिन्प्रशमः केवलं नो
पलभ्यः सर्वस्वकं मकृतं मन्यतेर्थं २० यत्र कर्णो मन्यते पारणीयं युद्धे गृहीतायु
धमर्जुनं वै आसंस्य युद्धानि पुरा महांति कथं कर्णो नाभवद्द्वीप एषां २१ कर्णश्च
जानाति सुयोधनश्च द्रोणश्च जानाति पितामहश्च अन्ये च ये कुरवस्तत्र संति य
थार्जुनान्नास्त्यपरो धनुर्द्धरः २२ जानंत्येते कुरवः सर्व एव ये चाप्यन्ये भूमि
पालाः समेताः दुर्योधने राज्यमिहाभवद्यथा अरिंदमे फाल्गुने विद्यमाने
२३ तेनानुबंधं मन्यते धार्तराष्ट्रः शक्यं हर्तुं पांडवानां ममत्वं किरीटिना तालमा
त्रायुधेन तत्र द्वेदिना संयुगं तत्र गत्वा २४ गांडीव विस्फारित शब्दमाजावशृण्वा
ना धार्तराष्ट्रा ध्रियंते क्रुद्धं न चेद्वीक्षते भीमसेनं सुयोधनो मन्यते सिद्धमर्थं २५
इंद्रोप्येतन्नोत्सहेद्भ्रातहर्तुं मैश्वर्यं नो जीवति भीमसेने धनंजये नकुले चैव
सूततथा वीरे सहदेवे महिम्नो २६ ॥ निबंधो राज्यादिः तमनुसन्न्यवर्तमाने।
पांडवानां ममत्वं धार्तराष्ट्रो हर्तुं शक्यं मन्यते किं कृत्वा नेत्र किरीटिना सह तत्र राज्ये निमि
ते सति संयुगं संग्रामं गत्वा प्राप्य तालो ह्रस्वश्च तत्र दृश्यं तद्द्वेदिना धनुर्विद्यावेदिना २४ ध्रियंते

॥ ५९ निबंधि

५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एतांबुद्धिंराज्यस्याप्रदानेनाशोप्स्यतीत्येवंनूनं २२ भूतपूर्वंभीमबंधनजतुगृहदाहादि २८ इंद्रप्रस्थेस्वमृप
राज्यंममभवतुभारताग्र्यइतिहस्तिनापुरेसुयोधनस्यभवत्वितिनिश्चितं २९ इत्युद्योगपर्वणियुधिष्ठि

सचेदेतांप्रतिपद्येतबुद्धिंवृद्धोराजासहपुत्रेणसूत एवंरणेपांडवकोपदग्धा
ननश्येयुःसंजयधार्तराष्ट्राः २७ जानासित्वंक्लेशमस्मासुवृत्तंत्वांपूजयन्सं
जयाहंक्षमेयं यच्चास्माकंकौरवैर्भूतपूर्वंयानोहतिर्धार्तराष्ट्रैस्तदासीत् २८ अ
द्यापितत्तत्रतथैववर्ततांशांतिंगमिष्यामियथात्वमात्थ इंद्रप्रस्थेभवतुममैव
राज्यंसुयोधनोयच्छतुभारताग्र्यः २९ इत्युद्योगेसंजययाने २९ संजयउ० धर्मे
नित्यापांडवतेविचेष्टालोकेश्रुतादृश्यतेचापिपार्थ महास्रावंजीवितंचाप्य
नित्यंसंपश्यत्वंपांडवमाव्यनीनशः १ नचेद्भागंकुरवोन्यत्रयुद्धात्प्रयच्छेरंस्त
भ्यमजातशत्रो भैक्षचर्यामंधकवृष्णिराज्येश्रेयोमन्येनतुयुद्धेनराज्यं २ अल्प
कालंजीवितंयन्मनुष्येमहास्रावंनित्यदुःखंचलंच भूयश्चतद्यशसोनानुरू
पंतस्मात्पापंपांडवमाकृथास्त्वं ३ कामामनुष्यंप्रसजंतएतेधर्मस्ययेविघ्नमूलं
नरेंद्र पूर्वंनरस्तान्मतिमान्प्रतिघ्नन्लोकेप्रशंसांलभतेनवद्यो ४ ॥

रवाकं २९ महानुश्रा
वःश्रवणंयस्यमहाकीर्तिरित्यर्थःपाठांतरेतुमहानुस्रावोगतिर्यस्य अतिचंचलमित्यर्थःमाव्यनीन

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ टी॰ ५

ग॰ भूः स्पृहावान् ५ कर्मणां अर्थकामादयर्थानां मध्ये ६ परं स्थानं परलोकं मन्यमानेन मानयता व र्षपूगं वर्षगणां तत्र समस्तु लोभ्य स दर्यितया आत्मापी तस्थौः ७ स्व एव प्रियं भोगान् पुत्रादींश्च सेवमा नाः योगाभ्यासे चिन्तनं इति निरोधमभ्यसितं कर्म आसनप्राणायामादिकं न करोति ८ ब्रह्मचर्ये ब्रह्मणि चर्या आत्मानं संधानं तत्र अप्रसक्तः प्रकर्षेण असक्तः योगाद्याहृत्तः धर्मे च यज्ञादि

निर्बंधनीयर्थं तस्मै हृषार्थं तामिच्छन् तां वा ध्यानं धर्म एव धर्मं तु यः अन्नानीते सबु द्धः कामेषु आहीयते अर्थानुरोधात् ५ धर्मं कृत्वा कर्मणां तात मुख्यो महाप्रतापः सवितेव भाति हीनो हि धर्मेण मही मपी मां लब्ध्वा नरः सीदति पापबुद्धिः ६ वेदोधीतश्चरितं ब्रह्मचर्यं यज्ञैरिष्टं ब्राह्मणेभ्यश्च दत्तं परं स्थानं मन्यमानेन भूय आत्मा दत्तो वर्षपूगं सुखेभ्यः ७ सुख प्रियं सेवमानो निवेले योगाभ्यासे यो न करोति कर्म वित्तं तयेहीन सुखो निवेलं दुःखं प्रते कामवेगाशगान्नः ८ एवं पु नरर्थचर्याप्रसक्तो हित्वा धर्मं यः प्रकरोत्यधर्मं अश्रद्दधत् परलोकाय मूढो हि त्वा देहं तप्यते प्रेत्य मंदः ९ न कर्मणां विप्रणाशोस्त्यमुत्र पुण्यानां वाप्यथवा पापकानां पूर्वं कर्तारं गच्छति पुण्यपापं पश्चात्त्वेनमनुयात्येव कर्ता १० ॥

नूपं हित्वा यः अधर्ममेव प्रकरोति संचिनोति ९ ननु धर्मेण पापमपनुदतीति श्रुतेः कालांतरेः धर्मस्य नाशाद्यधर्ममप्यनुष्टास्यामः किमुक्तयेन्त्यांश क्याह नकर्मणामिति कृतं कर्म भोगं विना आत्मज्ञा नं विना वा न नश्यति अस्यार्थः नाभुक्तं क्षीयते कर्म क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादि वा ५

अन्वाहार्यं पित्र्येनेन श्रौतमिष्टादिकं लभते तत्र हि अन्वाहार्यो दक्षिणात्वेन दीयते ॥ कार्यधर्मः श्रेयस्त्वा
॥२॥ परलोकधर्मेनास्तीत्याह जहातीति ॥३॥ एवंरूपमिति हृदयस्य प्रियेण कामेन ईहप्राप्तयिष्यं इंद्रिय
प्रीतिमात्रहेतुः कर्मफलं तत अत्र अस्मिन्लोके मावह नैव वहेयं अत्र कर्म कुर्वन्कामवशादस्मि
न्न फलेन प्रार्थयेतेत्यर्थः ततश्च को लाभः स्यात आह स इति सः त्वमेवं निष्कामकर्मकृत क्रोधजं लो
कं नरकं हर्षजं स्वर्गं चेत्युभौ लोकौ चिराय अपुनरावृत्तये मा प्रहासीः मा गच्छ ओहाङ् गतावित्यस्य

न्यायोपेतं ब्राह्मणेभ्यो यद्दत्तं श्रद्धापूतं गां परस्मोपपन्नं अन्वाहार्यं पूतमदक्षिणा
पूतं यथारूपं कर्म विख्यायते ते ॥१॥ इहलोके क्रियते पार्थ कार्येन वै किंचित्क्रियते श्र
त्रकार्यं कृतं त्वया परलोकं च कर्म पुण्यमहत्सङ्गिरतिप्रशस्तं ॥२॥ जहाति मृ
त्युं च जराभये च न क्षुत्पिपासे मनसः प्रियाणि न कर्तव्यं विद्यते तत्र किंचिद्विहस्य
त्रवै चेन्द्रियप्रीणनाद्धि ॥३॥ एवंरूपं कर्मफलं नरेन्द्र मात्रावहे हृदयस्य प्रियेण
सक्रोधजं पाण्डव हर्षजं च लोकावुभौ मा प्रहासीश्चिराय ॥४॥ अन्तं गत्वा कर्मणां या
प्रशंसा सत्यं दमश्चार्जवमानृशंस्यं अश्वमेधो राजसूयस्तथेष्टाः पापस्यान्तं कर्म

रूपं तत् भाव अर्थः कर्मजं फलं त्यक्त्वा परेण वैराग्येण संपन्नो मोक्षार्थं योगाभ्यासमेव कुरु एषु किं राज्ये
न बंधुना प्राप्तव्येनेत्यर्थः ॥५॥ एवं ज्ञानेन कर्मणामन्तं नाशं गत्वा प्राप्य ज्ञानाग्निः सर्वकर्माणि भस्मसा
त्कुरुते इति भगवद्वचनात् वृद्धतन्त्रोपि कृतं कृत्योपि सत्यादिकं मा त्यज अश्वमेधादीनि कर्माण्यपि
लोकसंग्रहार्थं कुरु परं तु पापस्य कर्मणो न समीपं पुनर्मा गाः ज्ञानोत्तरकालकृतमपि कर्म न ज्ञा
निनं स्पृशतीति भावः तद्यथा पुष्करपलाशमापो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तच्चेदिति भो पार्थाः भो पाण्डवाः तत्पापं कर्म गोत्रवधरूपं हतेषु रूपेण चिराय प्रागेव चेत्करिष्यध्वं तर्हि यद्
नेव वर्षपूगान् दुःखवासं निवत्स्यध्वं तद्धर्म एवेति यज्जत्यदाध्याहारेण योज्यं राज्यार्थं सर्वलोकनाशमि
च्छतां भवतां दुर्योधनेन नयो वनवासः कारितः स धर्म एवेत्यर्थः १६ ननु तदानीं सहायाभावात्स्वामि
वनवासोंगीकृतो न दुर्योधनात्तत्येत्याशंक्याह अप्रव्रज्येति इमाः इमानि राज्यादीनि स्वपांसुलगिति।

तच्चेदेवं हतरूपेण पार्थाः करिष्यध्वं कर्म पापं चिराय निवत्स्यध्वं वर्षपूगान्वनेषु
दुःखं वासं पाण्डवा धर्म एव १६ अप्रव्रज्ये मास्म हित्वा पुरस्तादात्माधीनं यद्बलं ह्येत
दासीत् नित्यं च वः पूणाः सचिवास्तवेमे जनार्दनो युयुधानश्च वीरः १७ मत्स्यो राजा।
रुक्मरथः सपुत्रः प्रहारिभिः सह पुत्रैर्विराटः राजानश्च ये विजिताः पुरस्तात्त्वामे
वते संश्रयेयुः समस्ताः १८ महासहायः प्रतपन्बलस्थः पुरस्कृतो वासुदेवार्जु
नाभ्यां वरान्हनिष्यन्द्विषतो रंगमध्ये व्यनेष्यथा धार्तराष्ट्रस्य दर्पं १९ बलेक।
स्मात्हर्षयित्वा परस्य निजान्कस्मात्कर्शयित्वा सहायान् निरुष्य कस्माद्वर्षपूगा।
न्वनेषु युयुत्ससे पाण्डव हीनकाले २० अप्राज्ञो वा पाण्डव युध्यमानो धर्मज्ञो वाभ्य।
तिमथोऽभ्युपैति प्रज्ञावान्वाबुध्यमानोपि धर्मं संरंभाद्वा सोपि भूतेरपैति २१ ॥

स्वपांसुदेशाः पुरस्तात्प्रव्रजनकाले एव हित्वा धार्तराष्ट्रेणपं बलेन धृत्वा अप्रव्रज्य वने प्रव्रजनमकृ
त्वैव आस्त भवेम वयं पाण्डवान् आत्मत्वं तु भीम अर्जुनमुख्य प्रयोगः पतयतः पुरस्तादपि एतद्बले
आत्माधीनमेवासीत् १७ १८ हीनकाले गतेकाले इत्यर्थः १९ २० एवं पूर्वं युद्धमकृत्वा इदानीमपि
तत्र कर्तव्यमित्युक्तं अथ सर्वथापि युद्धं न कर्तव्यं जयपराजययोरव्यवस्थितत्वादित्याह अथाचक्षइति ५१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ग्रंथतात्पर्यमाह नेति संरंभात्क्रोधात्पूर्वमपि पापभयादेव त्वया न कृतं तर्हि इदानीं प्रज्ञाविरुद्धं तत्किम
र्थं चिकीर्षसीति भावः २२ अव्याधिजं कटुकं पित्तादिकं विनाप्युत्पन्नं चक्षुषोश्च शोफरूपं यशोहरं पेयं गिल
नीयं मन्युं क्रोधं प्रशाम्य शान्तो भव २३ पापेन वधातिपापस्य मूलं तेन मन्युं यत्र भोगेषु निमित्तेषु एतेन

नाधर्मे ते धीयते पार्थ बुद्धिर्न संरंभात्कर्म चकर्थ पापं आन्य किं तत्कारणं यस्य
हेतोः प्रज्ञाविरुद्धं कर्म चिकीर्षसीदं २२ अव्याधिजं कटुकं शीर्षरोगि यशोमु
षं पापकलोदयं वा सतां पेयं यन्न पिबन्त्यसंतो मन्युं महाराज पिब प्रशाम्य २३
पापानुबंधं को नु तं कामयेत त्वमेव तेज्यायसी नोत भोगाः यत्र भीष्मः शान्तन
वो हतः स्याद्यत्र द्रोणः सहपुत्रो हतः स्यात् २४ कृपः शल्यः सोमदत्तिर्विकर्णो
विविंशतिः कर्णदुर्योधनौ च एतान् हत्वा कीदृशं तत्सुखं स्यात् यद्विंदेथास्तद
नुब्रूहि पार्थ २५ लब्ध्वापीमां पृथिवीं सागरांतां जरामृत्यू नैव हि त्वं प्रजह्याः प्रिया
प्रिये सुखदुःखे च राजन्नेवं विद्वान्नैव युद्धं कुरु त्वं २६ अमात्यानां यदि कामस्य
हेतोरेवं युद्धं कर्म चिकीर्षसि त्वं अपाक्रमेः संप्रदाय वर्त्म तेषां मा गास्त्वं देवयाना
त्पथोद्य २७ इति श्रीउद्योगपर्वणि संजययाने २८

भीष्मादीनां गुरूणामपि वधो राज्यार्थिनस्तव तेनाभविष्यतीति दर्शितं २४ २६ देवयानात्पथोर्चिरादि
मार्गात् पुनरावृत्तिफलात गोत्रद्रोहेण मा गा इत्यर्थः २ २७ इत्युद्योगपर्वणि संजयवाक्यं २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३. यदि धर्मं चरेयं यदि वाप्यधर्मं तदुभयं ज्ञात्वा पापी स्यां धर्माचरणं उपलभ्य गर्हयेः निंदस्व १ धर्माधर्मपरी
टी॰ क्षायां ते विप्रमाहेति यत्र गुरूपदेशे भावितमिति अधर्मः अभिचारार्थं मंत्रजपादिः धर्मइत्येवाम्नेना
५२ नेति तथाप्यक्षुद्रयोगिनि दत्तात्रेयादौ धर्मो रागद्वेषादिशून्यत्वेनानुपयोगादधर्मोपि उन्मत्तवदाच
रणाद्धर्मत्वेनावह्रियते यत्र वसिष्ठादौ धर्मः धर्मत्वेन एव यद्यपि चंडालादौ अधर्मोप्यधर्मत्वे
न एवास्ति तथापि तस्यानुपादेयत्वात् उभयमेव विचार्यते पाठांतरे धर्मेति छेदः एतच्च त्वया विद्वा
न्विचार्यमित्याशयः २ अत्र आद्ययोः अच्छत्वात् चिरकालेन तज्ज्ञनिश्चयः अंत्ये तु अस्पष्टलि

युधिष्ठिर उ॰ असंशयं संजय सत्यमेतद्धर्मो वरः कर्मणां यत्त्वमात्थ ज्ञात्वा तु मां सं
जय गर्हये त्वं यदि धर्मं यद्यधर्मं चरेयं १ यत्राधर्मो धर्मरूपाणि धत्ते धर्मः कृत्स्नो
दृश्यतेऽधर्मरूपः बिभ्रद्धर्मो धर्मरूपं तथा च विद्वांसस्तं संप्रपश्यंति बुद्ध्या २ ए
वं तथैवापदि लिंगमेतद्धर्माधर्मौ नित्यवृत्ती भजेतां आद्यं लिंगं यस्य तस्य प्रमा
णमापद्धर्मं संजय तन्निबोध ३ ॥

गेपि आपत्कालवशात् धर्माधर्मयोर्व्यत्यासो जायतइ
त्याह एवमिति एतदेवं रूपं लोकप्रत्यक्षं लिंगं ब्राह्मणस्य स्वाध्यायप्रवचनादि क्षत्रियस्य
शौर्यादि वैश्यस्य कृष्यादि तत्तथैव यथोक्तमेव तथापि निस्वत्वे नित्यं वर्तेते तौ नित्यवृत्ती
धर्माधर्मौ तल्लिंगं भजेतां अयं भावः तत्र लिंगं ब्राह्मणवेषप्रयोगादि धर्मः अनापद्यधर्मः त
थाचैकस्यैव लिंगस्य वर्णांतरे अवस्थाभेदाद्धर्मत्वमधर्मत्वं च नित्यमिति तन्नापि विशेषमाह
आद्यमिति आद्यं ब्राह्मणलिंगं याजनादि यस्यास्ति ब्राह्मणस्य तस्यैव तत्प्रमाणं अव्यभिचारिप्र ५२

यद्यपि द्विजेयाजनाध्यापनादिकं न कर्तव्यमित्यर्थः एवंविधं ते आपद्धर्मशास्त्रान्निबोधत्वमस्य ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ननुकथंतर्हिएकचक्रायांभिक्षाटनंब्राह्मणस्यैवासाधारणंतेनविहितंभवद्भिःकृतमित्याशंक्याह
लक्ष्मायामिति प्रकृतिःजीविकाहेतुभूतधनंतच्चत्त्रियस्यभूविशत्वादिकं वैश्यस्यधनपश्वादि
कंतस्मिन्सर्वात्मनानष्टेसतियेनकर्मसंध्योपासनादिकंनिष्पादयेततत्भिक्षाटनादिकमविप्री
प्सेतकर्तुमिच्छेत अन्यथाजीविकायाअभावात्कर्मलोपःप्राणनाशश्चस्यात्ततोन्यतापद्विशेष
र्मोप्यनुष्टेयएवप्रकृतिस्थश्चेति आपदिआपद्धर्मे प्रकृतिस्थोपियद्यापद्धर्ममनुसरेत्सलोभाकृ
ष्टःआपदिस्थोपियदिप्राकृतंधर्ममनुसरेत्सजीवनलोपात्कुटुंबहिंसयाचगर्ह्यइत्यर्थः ४ अ।

लक्ष्मायांतुप्रकृतौयेनकर्मनिष्पादयेन्नरःपीडाहिहीनः प्रकृतिस्थआपदिवर्त
मानउभौगर्ह्यौभवतःसंजयेतौ ४ अविनाशमिच्छन्तंब्राह्मणानांप्रायश्चित्तंवि
हितंयद्यद्धिधात्रा संपद्यथाकर्मसुवर्तमानान्विकर्मस्थान्संजयगर्हयेस्तु ५
मनीषिणांसत्त्वविच्छेदनायविधीयतेसत्सुवृत्तिःसदैव अब्राह्मणाःसंतितुयेन
वैद्याःसर्वोत्सेगंसाधुमन्येततेभ्यः ६ ॥ विनाशमितियत्प्रस्माद्धेतोःधात्राअविनाशोहत्तं

तेऽयजीवनेनब्राह्मणस्यनाशोविनाशस्तदभावमिच्छतांब्राह्मणानांआपद्वर्तिनांप्रायश्चित्तंवि
हितंतस्माद्धेतोरापदिअन्यस्यान्यधर्माश्रयणंप्रसक्तमेवेतितत्तायनेअतएकचक्रायामस्माभिःकृतंभि
क्षाटनंनानुचितमित्यर्थः एवमनापदिकर्मसुवर्तमानान्आपदिचविकर्मस्थान्संपश्येथाः।
सम्यगेवेदमितिपश्येथाः अन्यथातुआपदिकर्मस्थान्आत्मपरहिंसान्अनापदिविकर्मस्था
नतिलंघ्यान्विगर्हयेस्तु ५ किंचमनीषिणांमनसःनिग्रहंनाशंकर्तुमिच्छतां ईश्वरातिहिंसाद

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उ०
१०
५३

ग्नेऽग्निमस्य तुल्यं सन्नविच्छेदनाय सन्नस्य चिदात्मना समरूपकीभूतस्य विच्छेदनाय मुंजेषीकान्यायेन द
ग्धकरणाय सन्नस्य नागरदेषु हृतिजीविकाशास्त्रविधीयते वेदानिमं लोकमनुपरित्यज्यात्मानम्
निच्छेदिति कृत्वात्मान्वेषणाय सर्वसंन्यासपूर्वकं भिक्षाचर्यविधानात् नन्वास्तीह भिः कस्यापिनि
ष्ठायेनन्ब्राह्मणा अपि वेद्याः विद्यानिष्ठाः न भवंति तेषां भिक्षाचर्यस्याविधानात् तेभ्यस्तेषामर्थे
सर्वोत्सर्गं सर्वेषां उत्सर्गं गमसमीपं स्वधर्मसंयोगश्चापदनापद्येह चिंतं साधु मन्येत सर्वोच्छेदमितिपा

तदध्वानः पितरो ये च पूर्वे पितामहा ये च तेभ्यः परेऽस्मे यज्ञेषिणो ये च हि कर्म कुर्युर्नोऽस्मै
ततो नास्ति कोऽस्मीति मन्ये ७ यत्किंच नेदं वित्तमस्यां पृथिव्यां यद्देवानां त्रिदशानां परं
यत् प्राजापत्यं त्रिदिवं ब्रह्मलोकं नाथ मतः संजय कामयेयं ८ धर्मेश्वरः कुशलो नी
तिमांश्चाप्युपासिता ब्राह्मणानां मनीषी नानाविधांश्चैव महाबलांश्च राजन्यभोजान्।
ननुशास्ति कृत्स्नः ९ यदि ह्यहं विसृजन्स्यामगर्ह्यो नियुध्यमानो यदि जह्यां स्वधर्मं म
हायशाः केशवस्तद्ब्रवीतु वासुदेवस्तूभयोरर्थकामः १० शैनेया ये चेदयश्चांधका
श्च वार्ष्णेयभोजाः कुकुराः सृंजयाश्च उपासीना वासुदेवस्य बुद्धिं निगृह्य शत्रून्सुहृदो नयंदति ११ ॥

ष्ठे तेभ्यस्तेषामर्थे भिक्षाचरणं सर्वधर्मोच्छेदाय मन्येतेत्यर्थः ६ तदध्वान इति पित्रादयः यज्ञे
षिणो ये ते सर्वे तदध्वानः स एव मया उक्तः अध्वा मार्गो येषां ते तदध्वानः भूवन् हि प्रसिद्धं ये च
कर्म न कुर्युः संन्यासिन इत्यर्थः ते सर्वे तदध्वानः अहमपि आस्तिकोऽस्मीति नतोऽन्यत् अध्वानं
नु मन्ये ७ एवं स्वस्य नीतिज्ञत्वप्रकाशनप्रसंगात् धर्मान्यतिधर्मांश्चोक्त्वा प्रकृतमनुसरति य
त्किंचेति ८ धर्मेश्वरः धर्मफलस्य दाता ९ यदि स्यामविसृजनस्यां तर्हि गर्ह्यः स्यां यदि वा युध्य
मानः स्वधर्मं जह्यां तदा गर्ह्यः स्यां मम तद्धृदयमपीष्टमेवेति भावः १० ॥ ॥

५३

९ १० विरुद्धं वैरादिकं न प्रपश्यति ११ १४ अभीतः तिष्ठेदः १५ १६ सुहृदस्त्वदंतः श्राहूः २० २१॥

द्रौपदी च सभामध्ये पांचाली धर्मचारिणी पर्यक्लिष्टानवद्यांगी पत्नी नो गुरुसंनिधौ ८ अस्ति
देवा न मे कामः सुयोधनमुदीक्षितुं तत्राहं गंतुमिच्छामि यत्र ते भ्रातरो मम ९ नैवमित्यब्र
वीत्तं तु नारदः प्रहसन्निव स्वर्गे निवासे राजेंद्र विरुद्धं चापि न प्रपश्यति १० युधिष्ठिर महाबाहो मैवं
बोचः कथंचन दुर्योधनं प्रति नृपं शृणु चेदं वचो मम ११ एष दुर्योधनो राजा पूज्यते त्रिदशैः स
ह सद्भिश्च राजप्रवरैर्य इमे स्वर्गवासिनः १२ वीरलोकगतिं प्राप्तो युद्धे हुत्वात्मनस्तनुं यूयं सर्वे सु
रसमाः सद्देवा येन हिंसिताः १३ स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् भये महति यो भीतो
बभूव पृथिवीपतिः १४ न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितं द्रौपद्याश्च परिक्लेशं न चिंत
यितुमर्हसि १५ ये चान्येऽपि परिक्लेशा युष्माकं ज्ञातिकारिणः संग्रामेष्वथ वान्यत्र न तान्संस्म
र्तुमर्हसि १६ समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै स्वर्गोऽयं नेह वैराणि भवंति मनुजाधिप १७
नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः भ्रातॄन्पप्रच्छ मेधावी वाक्यमेतदुवाच ह १८ यदि दुर्यो
धनस्यैते वीरलोकाः सनातनाः अधर्मज्ञस्य पापस्य पृथिवीसुहृदद्रुहः १९ यत्कृते पृथिवी
नष्टा सहया सनरद्विपा वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः २० ॥

ह॰

२

येतेवीरामहात्मानोभ्रातरोमेमहाव्रताः सत्यप्रतिज्ञालोकस्यशूरावैसत्यवादिनः २२
तेषामिदानींकेलोकाद्रष्टुमिच्छामितानहं कर्णंचैवमहात्मानंकौंतेयंसत्यसंगरं २३
धृष्टद्युम्नंसात्यकिंचधृष्टद्युम्नस्यचात्मजान् येचशस्त्रैर्वधंप्राप्ताः क्षत्रधर्मेणपार्थिवाः
२४ क्वनुतेपार्थिवाब्रह्मन्नैतान्पश्यामिनारद विराटद्रुपदौचैवधृष्टकेतुमुखांश्चतान्
२५ शिखंडिनंचपांचाल्यंद्रौपदेयांश्चसर्वशः अभिमन्युंचदुर्धर्षंद्रष्टुमिच्छामिनारद २६ ॥
तिश्रीमहाभारतेस्वर्गारोहणपर्वणि युधिष्ठिरउवाच नेहपश्यामिविबुधाराधेयममि
तौजसं भ्रातरौचमहात्मानौयुधामन्यूत्तमौजसौ १ जुहुवुर्येशरीराणिरणवह्नौमहार
थाः राजानोराजपुत्राश्चयेमदर्थेहतारणे २ क्वतेमहारथाः सर्वेशार्दूलसमविक्रमाः
तैरप्ययंजितोलोकः कच्चित्पुरुषसत्तमैः ३ यदिलोकानिमान्प्राप्तास्तेचसर्वेमहारथाः
त्तं स्थितंविद्धिमांदेवाः सहितंतैर्महात्मभिः ४ कच्चिन्नतैरवाप्तोयंनृपैर्लोकोऽक्षयःशुभः
नतैरहंविनावत्स्येभ्रातृभिर्ज्ञातिभिस्तथा मातुर्हिवचनंश्रुत्वातदासलिलकर्मणि कर्णस्यकि
यतांतोयमितितप्यामितेनवै ५ इदंचपरितप्यामिपुनः पुनरहंसुराः यन्मातुःसदृशौपादौतस्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ॐ श्रीगणेशाय नमः पूर्वस्मिन्पर्वणि धर्मस्य फलम् तास्य गानरूपं स्माद्यो युधिष्ठिरे ... दृष्टं तेन दर्शिताः इदानीं तु
सम्यक्कर्मफलं दर्शयितुं स्वर्गारोहणपर्व आरभते स्वर्गं त्रिविष्टपमिति यथा भूयस्यां संख्यायामल्पसंख्यान्तर्भवति
एवं त्रीणि विष्टपानि भुवनानि फलोत्कर्षवशात् यत्रान्तर्भवन्ति तादृशमपि स्वर्गं प्राप्य विष्टपं भुवनं तत्र गादिममः

नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीरयेत् १ जनमेजय उवाच
स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः पांडवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे २ एतदि
च्छाम्यहं श्रोतुं सर्ववित्त्वासि मे मतः महर्षिणाभ्यनुज्ञातो व्यासेनाद्भुतकर्मणा २ वैशंपा॰ स्वर्गं
त्रिविष्टपं प्राप्य तव पूर्वपितामहाः युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ३ स्वर्गं त्रिविष्टपं प्रा
प्य धर्मराजो युधिष्ठिरः दुर्योधनं श्रिया जुष्टं ददर्शासीनमासने ४ भ्राजमानमिवादित्यं वीरलक्ष्म्या
भिसंवृतं देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः ५ ततो युधिष्ठिरो दृष्ट्वा दुर्योधनममर्षितः
सहसा संनिवृत्तोऽभूच्छ्रियं दृष्ट्वा सुयोधने ६ ब्रुवन्नुच्चैर्वचस्तान्वै नाहं दुर्योधनेन वै सहितः काम
ये लोकाल्लुब्धेनादीर्घदर्शिना ७ यत्कृते पृथिवी सर्वा सुहृदो बांधवास्तथा हतास्माभिः प्रसह्या
जौ क्लिष्टैः पूर्वं महावने ८॥

१ २ ३ ४ ५ ततः इति स्वर्ग्यममर्षोऽसूयजः इति संस्काराणां प्राव
ल्यके ६ ७ हताः अस्माभिः संधिरार्षः ८ ॥ छ ॥ छ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क्रूरस्यप्राणीताःक्रूरसेनैवनीतिपर्यंनीताः १२ १४ इतिअध्यायः ९८ अविना १ शाम्यतेतिवचनादन्यतानुप
तिनवृथापांडवानांसमतंराज्ञोयुधिष्ठिराच्चपततदेवश्रृणोमिअहंचएतन्मन्येमानयामि २ तत्रराज्ञो
निमित्तेगृद्धःलिप्सावान् एवंसति एषांकौरवाणांकस्माद्धेतोःकलहःनावमृच्छेतनहद्विगच्छेत ३

ब्रह्मस्यधकायुग्रसेनादयोवैक्रूरस्यप्राणीताःसर्वएवेंद्रकल्पाःमनस्विनःसत्यपराय
णाश्चमहाबलायादवाभोगवंतः १२ कापृणोवभ्रुःप्रियमुत्तमोगतोलब्ध्वाक्रूरसे
भ्रातरमीशितारं यस्मैकामानवर्षतिवासुदेवोग्रीष्मात्ययेमेघइवप्रजाभ्यः १३ हेद्
धार्यकेशवस्तातविद्वानविद्धियेनकर्मणांनिश्चयज्ञे प्रियश्चनःसाधुतमश्चक्रू
ष्णोनातिक्रामेवचनेकेशवस्य १४ इत्युद्योगेसंजययाने १९ वासुदेवउवाच अविना
शंसंजयपांडवानामिच्छाम्यहंभूतिमेषांप्रियंच तथाराज्ञोधृतराष्ट्रस्यसूतसमा
शंसेबहुपुत्रस्यवृद्धिं १ कामोहिमेसंजयनित्यमेवनान्यद्ब्रूयांतान्प्रतिशाम्यतेति
राज्ञश्चहिप्रियमेतच्छृणोमिमन्येचैतत्पांडवानांसमत्तं २ सुदुष्करस्तत्रशमोहि
नूनंप्रदर्शितःसंजयपांडवेन यस्मिन्गृद्धोधृतराष्ट्रःसपुत्रःकस्मादेषांकलहो
नावमृच्छेत ३ तत्वंधर्मंविचरंसंजयोहमतश्चजानासियुधिष्ठिराच्च अथोकस्मात्
संजयपांडवस्यउत्साहिनःपूरयतःस्वकर्म ४ यथाख्यातमावसतःकुटुंबंपुराकस्मा

विचरंविचलितंपूरयतःपालयतः ४ यथाख्यातंप्रसिद्धिमनतिक्रम्यआवसतःअधितिष्ठतःसाधुविलो
पंयुधिष्ठिरेकस्माद्धेतोः आत्थउक्तवानत्वअस्मिन्विधौशुचिरशोही अद्दुवेशुचोदेशोत्वापापमधीयानो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰भा॰
३॰टी॰
५४

तत्रहेतुमाह कर्मणेतिसिद्धिंमोक्षंएकेकर्मणेवहिसंसिद्धिमास्थिताजनकादयइत्येकआहुःनकर्म
णानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुरित्येकेआहुः यद्यपिएवंकर्तुर्वेयावस्थितिःसंन्या
सश्चद्वयमपितुल्यत्वात्शास्त्रेणविहितंतथापिकृत्स्नभावाद्गृहिणोपसंहारन्यायेनआश्र
मांतरसाध्यंज्ञानंगृहस्थेनसाधयितुंशक्यंनतुगृहस्थेनसाध्यंयज्ञादिकंआश्रमांतरेणशक्तो।
तिकृत्स्नोधर्मोगार्हस्थ्येएवप्राप्यतइत्याशयेनाह माभुंजानइति यतोविद्वानपिअभुंजानोन
तृप्यति यतश्चब्राह्मणानांसंन्यासिनामपिइहगृहस्थगृहेविहितंभोजनादिकं ६ तेनक
र्मणामनुकूलायाविद्यास्ताएवफलवत्योनतुतत्प्रतिकूलाइत्याह याइति तथाहिसर्वाणि

कर्मणाहुःसिद्धिमेकेपरत्रहित्वाकर्मविद्ययासिद्धिमेके नाभुंजानोभक्ष्यभोजस्यतृप्ये
द्विद्वानपीहविहितंब्राह्मणानां ६ यावैविद्याःसाधयंतीहकर्मतासांफलंविद्यते।
नेतरासां तत्रेहवैदृष्टफलंतुकर्मपीत्वोदकंशाम्यतितृष्णयार्त्तः ७ ॥

इवाइमानिभूतानिप्राणमेवाभिसंविशंतिप्राणमभ्युज्जिहतेसैषादेवताप्रस्तावमन्वायत्तेति।
छांदोग्येसर्वभूतसंवेशनोद्गमलिंगेनजगत्कारणतयानिश्चितस्यप्राणाख्यपरमात्मनोविद्या
याःप्रस्तावकर्मसाधकत्वंदृष्टंतासांकर्मसाधकानांविद्यानांफलमस्तिनेतरासांस्वतंत्राणां
अयंभावःगृहस्थःस्वात्मानमन्यांश्चपित्रादीन्तारयतियतींश्चपुष्णातियतिःस्वात्मानमेव।
तारयतिनपित्रादीन् पोषणंचस्वस्यापिनकरोतिभैक्ष्योपजीवित्वादतोगार्हस्थ्यमेवश्रेष्ठमिति
किंचनैष्कर्म्यंदृष्टिविरुद्धमपीत्याह तत्रेति तत्रकर्मतदभावतारतम्येविचारणीयेकर्मइहैवदृ शान्ति॰ ५४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सोयंज्ञानविधिःकर्मणेवसहविहितःतत्रचग्रनुष्टीयमानेकर्मउद्दर्ततेउच्छ्रयतेकर्मसमवेतज्ञानंसकल।
सोयंविधिर्विहितःकर्मणैवग्रुद्धर्ततेसंजयतत्रकर्म नत्रयोन्यत्कर्मणःसाधुमन्येत्
मोघंतस्यालपितंदुर्वलस्य ८ कर्मणामीभांतिदेवाःपरत्रकर्मणैवेहसवतेमात
रिश्वा अहोरात्रेविदधत्कर्मणैवअतंद्रितोनित्यमुदेतिसूर्यः ९ मासार्धमासान
थनक्षत्रयोगानतंद्रितश्चंद्रमाअभ्युपैति अतंद्रितोदहतेजातवेदाःसमिध्यमा
नःकर्मकुर्वन्प्रजाभ्यः १० अतंद्रिताभारमिमंमहांतंविभर्तिदेवीपृथिवीवले
न अतंद्रिताःशीघ्रमपोवहंतिसंतर्पयंत्यःसर्वभूतानिनद्यः ११ अतंद्रितोवर्ष
तिभूरितेजाःसन्नादयन्नंतरिक्षंदिशश्च अतंद्रितोब्रह्मचर्यंचचारश्रेष्ठत्वमि।
च्छन्वलभिद्देवतानां १२ हित्वासुखंमनसश्चप्रियाणितेनशक्रःकर्मणाश्रैष्ठ्य
माप सत्यंधर्मंपालयन्नप्रमत्तोदमंतितिक्षांसमतांप्रियंच १३ एतानिसर्वाण्यु
पसेवमानःसदेवराज्यंमघवान्प्रापमुख्यं बृहस्पतिर्ब्रह्मचर्यंचचारसमाहि
तःसंशितात्मायथावत् १४ हित्वासुखंप्रतिरुध्येंद्रियाणितेनदेवानामगमद्गु
रुत्वं नक्षत्राणिकर्मणामुत्रभांतिरुद्रादित्यावसवोथापिविश्वे १५ ॥
कर्मोच्छेदहेतुरित्यर्थः कर्मणोन्यत्संन्यासंमन्येतमन्यते ८ कर्मसमुच्चितंज्ञानंस्तौतिकर्मणा
मीभांतीत्यादिना ९ १० ११ १२ १३ १४ ब्रह्मविद्याब्रह्मचर्यक्रियांचनिषेवमाणाइत्युपसंहारः २३८

म॰उ॰ १६ आयच्छसेनिग्रहंकंकरोषि ७ आम्नायेष्विति विद्याधर्मःशौर्यंचयुधिष्ठिरेप्यस्कलमस्तीतिनायम।
टी॰ सेनशिलणीयोजेतव्याशक्यइत्यर्थः १८ कौरवाणांश्रवधेनउपायंराज्यप्राप्ताविति शेषः एषांतेः।
५५ भीमसेनेनआर्यवृत्ते अहिंसायांनिगृह्य पुण्यमेवकृतंस्यात् १९ पित्र्येकर्मणिस्वात्त्रधर्मेयुद्धेशूरयं।

धर्मोराजावैश्रवणःकुवेरोगंधर्वयक्षाप्सरसश्चसूत ब्रह्मविद्यांब्रह्मचर्यंक्रियां
चनिषेवमाणाऋषयोमुत्रभांति २० जानन्निमंसर्वलोकस्यधर्मंविप्रेंद्राणांक्ष
त्रियाणांविशांच सकस्मात्त्वंजानतांज्ञानवान्सन्व्यायच्छसेसंजयकौरवार्थे
२१ आम्नायेषुनित्यसंयोगमस्यतथाश्वमेधेराजसूयेचविद्धि संयुज्यतेधनुषा।
वर्मणाचहस्त्यश्वाद्यैरथशस्त्रैश्चभूयः २२ तेचेदिमेकौरवाणामुपायमवगच्छे
युरवधेनैवपार्थाः धर्मत्राणंपुण्यमेषांकृतंस्यादार्यवृत्ते भीमसेनेनिगृह्य २३
तेचेत्पित्र्येकर्मणिवर्तमानाआपद्येरन्दिष्टवशेनमृत्युं यथाशक्त्यापूरयंतः।
स्वकर्मतद्देवषांनिधनंस्यात्प्रशस्तं २४ उताहोत्वंमन्यसेशाम्यमेवराज्ञांयुद्धेव
र्ततेधर्मतंत्रं अयुद्धेवावर्ततेधर्मतंत्रंयथैवतेवाचमिमांशृणोमि २५ चातुर्वर्ण्य
स्यप्रथमंविभागमवेक्ष्यत्वंसंजयस्वंचकर्म निशम्याथोपांडवानांचकर्मप्रशंसवा

तःपालयंतः २४ शाम्यमेवशमःकार्यएवेतिमन्यसेतर्हिधर्मतंत्रंधर्मानुष्ठानंयुद्धएवेतिस्थितं
अयुद्धएवेतयोर्मध्येयदेववक्ष्यसितथैवतेवाचंशृणोमिकरिष्यामीत्यर्थः २५ ननुतत्रधर्मलो

५५

श्राद्यस्त्वस्तु हि पूर्वं जयचन्द्रं पश्चात् तेभ्यस्तेषां त्वनामयं पृष्टः व्यवहारेण वाणिज्यादिना पालयंतः स्थाना
धिकारिणः ॥ चतुष्पात् मंत्रउपचारः प्रयोगः संहारश्चेति चत्वारः पादा अस्येति अस्त्रं १२ गंधर्वे

श्राद्यस्त्वमां कुशलिनं स्मतेभ्यो ह्यनामयं तातपृष्टेर्जयचन्द्रं ये जीवंति व्यवहारेण राष्ट्रे
ये पालयंतो निवसंति राष्ट्रे ॥ आचार्यश्रेष्ठो नयगो विधेयो वेदानभीप्सन्ब्रह्मचर्यं च।
चार यो स्त्रं चतुष्पात् पुनरेव चक्रे द्रोणः प्रसन्नोभिवाद्यस्त्वया सौ १२ अधीतविद्यश्चरणो
पपन्नो यो स्त्रं चतुष्पात् पुनरेव चक्रे गंधर्वपुत्रप्रतिमं तरस्विनं तमश्वत्थामानं कुशलं
स्म पृष्टेः १३ शारद्वतस्यावसथं स्म गत्वा महारथस्यात्मविदां वरस्य त्वं मामभीक्ष्णं प
विकीर्तयन्वै कृपस्य पादौ संजय पाणिना स्पृशेः १४ यस्मिन्शौर्यमानृशंस्यं तपश्च
प्रज्ञा शीलं श्रुतिसत्त्वे धृतिश्च पादौ गृहीत्वा कुरुसत्तमस्य भीष्मस्य मां तत्र निवेदयेथाः
१५ प्रज्ञाचक्षुर्यः प्रणेता कुरूणां बहुश्रुतो वृद्धसेवी मनीषी तस्मै राज्ञे स्थविराया भि
वादयेथाः संजय मामरोगं १६ ॥

तिसौंदर्यसंगीतं च तस्मिन्द्योतितं १३ १४ १५ १६ ॥ १

अभिषंगात आवेषणात १ ४ उपक्रुतिंवार्त्तानृतांमर्मगांचनोवक्ष्यामि कटुकांनीरसां मुक्तांग्रशक्तांकार्य

संजयउ॰ आमंत्रयेत्वांनरदेवदेवगच्छाम्यहंपांडववस्वस्तितेस्त कच्चिन्नवाचावृजिनेहिकिं
विद्ध्वावितंमनसोभिषंगात १ जनार्दनंभीमसेनार्जुनौचमाद्रीसुतौसात्यकिंचेकितानं
आमंत्र्यगच्छामिशिवंसुखंवःसौम्येनमांपश्यतचक्षुषानृपाः २ युधिष्ठिरउ॰ अनुज्ञातः
संजयस्वस्तिगच्छनतःस्मरस्यप्रियंजातुविद्वन् विद्मश्चत्वांतेचवयंचसर्वेशुद्धात्मानंम
ध्यगतंसभास्थं ३ आप्तोदूतःसंजयसुप्रियोसिकल्याणवाक्शीलवांस्तृप्तिमांश्च न
मुह्येस्त्वंसंजयजातुमत्यानचक्रुध्येरुच्यमानोपिरूक्षैः ४ नमर्मगांजातुवक्तासिरूक्षां
नोपक्रुतिंकटुकांनोतमुक्तां धर्मारामामर्थवतीमहिंस्रामेतांवाचंतववजानीमसूत ५
त्वमेवनःप्रियतमोसिदूतइहागच्छेद्विदुरोवाद्वितीयः अभीक्ष्णदृष्टोसिपुराहिनस्त्वंध
नंजयस्यात्मसमःसखासि ६ इतोगत्वासंजयक्षिप्रमेवउपातिष्ठेथाब्राह्मणान्येतदर्हाः
विशुद्धवीर्यांश्चरणोपपन्नाःकुलेजाताःसर्वधर्मोपपन्नाः ७ स्वाध्यायिनोब्राह्मणाभि
तवश्चतपस्विनोयेचनित्यावनेषु अभिवाद्यावैमद्वचनेनवृद्धास्तथेतरेषांकुशल
वदेथाः ८ पुरोहितंधृतराष्ट्रस्यराज्ञस्तथाचार्यानृत्विजोयेचतस्य तैश्चत्वंतातसहितै
र्यथार्हंसंगच्छेथाःकुशलेनैवसूत ९ अश्रोत्रियायेचवसंतिवृद्धामनस्विनःशीलबलोपप
न्नाःआशंसतोस्माकमनुस्मरंतोयथाशक्त्याधर्ममात्रांचरंतः १०॥

हीनांवा ५ चरणंब्रह्मचर्यंणाध्ययनं ७ ८ अश्रोत्रियाःअत्रैवर्णिकाःशूद्रादयःवृद्धत्वाच्चधर्ममात्रांधर्मलेशं

उ॰ प॰

५२ अहं ईश्वरः ब्रह्म वेदाः ब्राह्मणाश्च धार्तराष्ट्रोच्छेदे एकोधृतराष्ट्र एव शोच्यो भवेत् पांडवोच्छेदे तु वयं त्र
योपि शोच्या भविष्याम इति श्लोकद्वयस्यार्थः बहूनामुच्छेदो न भविष्यतीति तात्पर्यं ५३ ५४ ५५ ल

दुर्योधनो मन्युमयो महाद्रुमः स्कंधः कर्णः शकुनिस्तस्य शाखा दुःशासनः पुष्पफ
ले समृद्धे मूलं राजा धृतराष्ट्रो मनीषी ५२ युधिष्ठिरो धर्ममयो महाद्रुमः स्कंधोर्जु
नो भीमसेनोस्य शाखा माद्रीपुत्रौ पुष्पफले समृद्धे मूलं त्वहं ब्रह्म च ब्राह्मणाश्च ५३
वनं राजा धृतराष्ट्रः सपुत्रो व्याघ्रास्ते वै संजय पांडुपुत्राः मा वनं छिंधि सव्याघ्रं मा
व्याघ्रान्नीनशन्वनात् ५४ निर्वनं वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनं तस्माद्व्या
घ्रो वनं रक्षेद्वनं व्याघ्रं च पालयेत् ५५ लताधर्मा धार्तराष्ट्राः शालाः संजय पांडवाः
न लता वर्धते जातु महाद्रुममनाश्रिता ५६ स्थिताः शुश्रूषितुं पार्थाः स्थिता यो
द्धुमरिंदमाः यत्कार्यं धृतराष्ट्रस्य तत्करोतु नराधिपः ५७ स्थिताः शमे महात्मा
नः पांडवा धर्मचारिणः योधाः समर्थास्तद्विद्वानाचरेत यथा तथा ५८ इत्यु
द्योगे २९ ॥

तेति पांडवाश्रयेणैव धार्तराष्ट्राणां जीवनं नान्यथेति भावः ५६ ५८ उद्योगपर्वणि वासुदेववाक्यं ग्रध्या
यः २९ ५८

४४ परिधित्समानानूपरिधातुमिच्छतः ४५ नंदनः आनंदयिता कनिष्ठभ्राता ४६ विपन्नं नष्टं समाधातुं
समीकर्तुं ४७ प्राकेयप्राक्कृतेस्या ४८ काव्यांप्रोक्तीनीतियुक्तामित्यर्थः ४९ परासिक्तान् निर्धूतान्सं

यो वै भस्मोऽर्द्ध हृदये शेते अश्रमीद्दिष्ट्याच्छिंदन्मर्मबाणैः सुघोरः कर्णाच्छूरो वाग्भयस्ति
ग्मतेजाः प्रतिष्ठितो हृदये फाल्गुनस्य ४४ कृष्णाजिनानि परिधित्समानान् दुः
शासनः कटुकान्यभ्यभाषत् एते सर्वे षंढतिला विनष्टाः तयंगता नरकं दीर्घका
लं ४५ गांधारराजः शकुनिर्निकृत्या यदब्रवीद्द्यूतकाले स पार्थं पराजितोऽनंदनः
कितवास्ति कृष्णया तेऽदीव्य वै याज्ञसेन्या ४६ जानासि त्वं संजय सर्वमेतद्द्यूते वाक्य
गर्ह्यमेनं यथोक्तं स्वयं तत्वहं प्रार्थये तत्र गंतुं समाधातुं कार्यमेतद्विपन्नं ४७ अहा
पयित्वा यदि पांडवार्थं प्रशमं कुरूणामपि चेच्छकेयं पुण्यं च मे स्याच्चरितं महोदय
मुच्येरंश्च कुरवो मृत्युपाशात् ४८ अपि मे वाचं भाषमाणस्य काव्यां धर्मारामामर्थव
तीमहिंस्रां अवेक्षेरन् कुरवः समक्षं मां च प्राप्तं धार्तराष्ट्राः प्रजयेयुः ४९ अतो मया
रथिना फाल्गुनेन भीमेन चैवाहवदंशितेन परासिक्तान् धार्तराष्ट्रांश्च विद्धि प्रदह्यमा
नान्कर्मणा स्वेन पापान् ५० पराजितान् पांडवेयांस्तु वाचो रौद्रा रूक्षा भाषते धार्तराष्ट्रः ग
दाहस्तो भीमसेनोऽप्रमत्तो दुर्योधनं स्मारयिता हि काले ५१ ॥

पराहीनान् ५० रौद्राः मर्मच्छिदः रूक्षाः निःस्नेहाः भाषते द्यूतावसाने भाषत ५१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० ३० टी० ८०

तंदुःशासनंयद्वारयिष्यत्तत्तदाममप्रियंअकरिष्यत्अस्यपुत्राणांचदुर्योधनादीनांप्रियंकृतमभविष्यत्
दुःशासनस्यानिवारणात्मत्प्रियाकरणाच्चतत्पुत्राणांनाशोभविष्यतीतितन्नेत्याक्तिः ४८ प्रातिलोम्यात्
अक्रमेणश्वशुराणांमध्येकृष्णांसभांआनीतेनाश्येतिसंबंधःकंचित्करुणंव्यपेक्ष्यदीनंयथास्यात्तथाकिं।

तंचेत्तदातेसकुमारवृद्धाआवारयिष्यन्कुरवःसमेताः ममप्रियंधृतराष्ट्रोऽकरिष्य
त्पुत्राणांचकृतमस्याभविष्यत् ४८ दुःशासनःप्रातिलोम्यान्निनायसभामध्ये।
श्वशुराणांचकृष्णां सातत्रनीताकरुणंव्यपेक्ष्यनान्यंतत्रनाथमवापकंचित् ४९
कार्पण्यादेवसहितास्तत्रभूपानाशक्नुवन्प्रतिवक्तुंसभायां एकःस्वयंधर्ममर्थं
ब्रुवाणोधर्मंबुध्यास्वतत्त्ववाचाल्पबुद्धिः ५० अबुध्वात्वंधर्ममेतंसभायामथेच्छसेपां
डवस्योपदेष्टुं कृष्णात्वेतत्कर्मचकारशुद्धंसुदुष्करंतत्रसभांसमेत्य ५१ येनकृच्छ्रा
त्पांडवानुज्जहारतथात्मानंनौरिवसागरौघात् यत्राब्रवीत्सूतपुत्रःसभायांकृष्णां।
स्थितांश्वशुराणांसमीपे ५२ नतेगतिर्विद्यतेयाज्ञसेनिप्रपद्यदासीधार्तराष्ट्रस्य
वेश्म पराजितास्तेपतयोनसंतिपतिंचान्यंभाविनित्वंवृणीष्व ५३ ॥

विदालोच्येत्यर्थः तत्ररन्ध्रंरतिंतारंनअवाप ४९ कार्पण्यात् दैन्यात् ५० पांडवस्यधर्मेउपदेष्टुंइच्छसे
हेसंजयेतिशेषः ५१ ५२ प्रपद्यगच्छ ५३ ॥ ८०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दुर्योधनेदस्युत्वंनिरूपयतितत्रेत्यादिना कुरुभिर्निमित्तभूतैरयंदोषःवंचनारूपः प्रादुर्भूतःपारदार्यदो
षश्चवंद्वयात्तुधर्म्यंधर्मादागतंपित्र्यंराज्यं ११ तदन्वयास्तदनुसारिणः १२ पृथक्त्वंस्तेनादयम्प्यसे १३ एतं।
छलेनराज्यापहारेनिविष्टःवनवासादूर्ध्वंराज्यंग्राह्यमितिकौरवेषुसंन्यासरूपेणस्थितःक्रमागतःग्र।

तत्रपुण्यंदस्युवधेनलभ्यतेसोयंदोषःकुरुभिस्तीव्ररूपः अधर्मज्ञैर्धर्ममबुध्यमा
नैःप्रादुर्भूतःसंजयसाधुतन्न ११ तत्रराजाधृतराष्ट्रःसपुत्रोधर्म्यंहरेत्पांडवानामक
स्मात् नावेक्षंतेराजधर्मंपुराणंतदन्वयःकुरवःसर्वएव १२ स्तेनोहरेद्यत्रधनं
ह्यदृष्टःप्रसह्यवायत्रहरेतदृष्टः उभौगर्ह्यौभवतःसंजयैतौकिंवैपृथक्त्वंधृतराष्ट्र
स्यपुत्रे १३ सोयंलोभान्मन्यतेधर्ममेतंयमिच्छतिक्रोधवशानुगामी भागःपुनः
पांडवानांनिविष्टस्तन्नःकस्मादाददीरन्परेवै १४ अस्मिन्पदेयुध्यतांनोवधोपि।
श्लाघ्यःपित्र्यंपरराज्याद्विशिष्टं एतान्धर्मान्कौरवाणांपुराणानाचक्षीथाःसंजय
राजमध्ये १५ एतेमंदामृत्युवशाभिपन्नाःसमानीताधार्तराष्ट्रेणमूढाः इदंपुनः।
कर्मपापीयएवसभामध्येपश्यवृत्तंकुरूणां १६ प्रियांभार्यांद्रौपदींपांडवानांयशस्वि
नींशीलवृत्तोपपन्नां यदुपेक्षंतकुरवोभीष्ममुख्याःकामानुगेनोपरुद्धांव्रजंती १७ ॥

स्याकंपरेकस्मात्आददीरननुगृहीतवंतः १४ पदेपदनीयेअवष्टंभग्राह्येभागेनिमित्ते १५ १६ कामा
नुगेनरजसाउपरुद्धांगृहकर्मतोनिरुद्धां पाठांतरेरजसाउपरुद्धंयथास्यात्तथाव्रजंतीम् १७ ॥

CC-0 Panjab University Chandigarh: An eGangotri-Vaidika Bharata Initiative

म॰उ॰ टी॰ ५९

सन्तंयुधिष्ठिरंप्रजानांकर्मणिषष्ठीप्रजाःइष्टुंराज्यमाप्तुमित्यर्थः अनुशिष्यन्अनुशासितुमिच्छन्एतन्मदुक्तं।
धर्मजातं युधिष्ठिरेऽस्तीतिबुध्येत नचतस्मिन्नसाधुःयुधिष्ठिरेऽस्तीतिबुध्येत यद्वा एवंसत्यपितस्मिन्ननुशा
स्तरिराजासाधुर्नइतिनोऽपितुसाधुरेवयदितेनइतोऽधिकंज्ञायतेउच्यतेचतर्हितस्यापिवचनंकर्तव्यमे
वेत्यर्थः अनुशिष्यात्प्रजानांनचेद्बुध्येदितितस्मिन्नसाध्वितिपाठेऽर्थोऽयंस्पष्टः इष्टुं धर्मंदर्शयितुमनुशि
ष्यात् नचेत्प्रजानांप्रजाःराज्यंनगच्छेदितिहेतोस्तस्मिन् युधिष्ठिरेसाध्वेववर्ततइतिशेषः २९ धर्मतस्त्वं

सन्तंइष्टुमनुशिष्यन्प्रजानांनचेद्बुध्येदितितस्मिन्नसाधु यदागच्छेत्परभूतोनृ।
शंसोविधिप्रकोपाद्बलमाददानः २९ ततोराज्ञामभवद्युद्धमेतत्तत्रजातंवर्म
शस्त्रंधनुश्च इन्द्रेणेदंदस्युवधायकर्मउत्पादितंवर्मशस्त्रंधनुश्च ३० ॥

शंसत्वात् दुर्योधनोधार्मिकेणराज्ञावध्यएव परभूतोपरैश्वर्येणनृशंसःघोरकर्मारजाविधिप्रकोपा
त्दैवप्रातिकूल्यात्गच्छेत् ततोहेतोःराज्ञांपरस्परंयुद्धंसमभवत् अनेनयुद्धात्मकस्यकर्मणउत्पत्ति।
रुक्ता २९ तत्रोत्पत्तिविशिष्टंगुणत्रयमाह वर्मकवचंशस्त्रंखड्गादिधनुश्चेति यतइन्द्रेणदस्युवधा।
येतत्त्रयंउत्पादितमतएतैरेवधर्मोदस्युंदुर्योधनंयदिहन्यात्सएवधर्मइतिभावः ३० ॥

५६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रतीच्छेत्प्रतिगृह्णीयात् २३ २४ स तत्रैयः अधीत्य प्राप्य यदिच्छया यायस्य धर्मस्य बलेन इच्छया ब्रह्मलोकं
गच्छति नो चेज्जनकादिवदिहैव कृतकृत्यो भवतीत्यर्थः भोगमोक्षकरः क्षात्रो धर्मोऽस्य जन इति भावः
२५ नाधीयीत वेदाध्ययनं न कुर्यात् यज्ञः श्रौतः स्मार्तश्च प्रतिषिद्धः तस्माच्छूद्रो यज्ञेन वर्ज्य इति श्रु।

अधीयीत ब्राह्मणो वै यजेत दद्यादियात्तीर्थमुख्यानि चैव अध्यापयेद्याजयेच्चापि या।
ज्यान्प्रतिग्रहान्वा विदितान्प्रतीच्छेत् २३ तथा राजन्यो रक्षणं वै प्रजानां कृत्वा धर्मेणाप्र।
मत्तोथ दत्वा यज्ञैरिष्ट्वा सर्ववेदानधीत्य दारान्कृत्वा पुण्यकृदावसेद्गृहान् २४ स धर्मा
त्मा धर्ममधीत्य पुण्यं यदिच्छया व्रजति ब्रह्मलोकं वैश्योधीत्य कृषिगोरक्षपण्यैर्वि
त्तं चिन्वन्पालयन्नप्रमत्तः २५ प्रियं कुर्वन्ब्राह्मणक्षत्रियाणां धर्मशीलः पुण्यकृदा
वसेद्गृहान् परिचर्या वंदनं ब्राह्मणानां नाधीयीत प्रतिषिद्धोस्य यज्ञः २६ नित्योत्थितो
भूतयेतंद्रितः स्यादेवं स्मृतः शूद्रधर्मः पुराणः एतान्राजा पालयन्नप्रमत्तो नियो
जयन्सर्ववर्णान्स्वधर्मे २७ अकामात्मा समवृत्तिः प्रजासु नाधार्मिकाननुरुध्येत।
कामान् श्रेयांस्तस्माद्यदि विद्येत कश्चिदभिज्ञातः सर्वधर्मोपपन्नः २८ ॥

तेः २६ एतानिति यथा सर्वाश्रमपालकत्वाद्गृहस्थस्य श्रैष्ठ्यं तथा सर्ववर्णपालकत्वात् धर्मेण
राज्यकरणमपि श्रेष्ठतममित्यर्थः २७ तस्मात् राज्ञः श्रेयान् प्रशास्ततरः अभिज्ञातः
ज्ञाततः धर्मतश्च यदि कश्चिदस्ति २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
६६

वृंदारकंश्रेष्टं २७ निकर्त्तनेसाधुःप्रथमांतपाठेऽर्थोपहर्त्ताछेत्ताउपधागुप्तछलं २८ मुह्यतांधार्त्तराष्ट्राणां २९

वृंदारकंकुरुमध्येष्वमूढंमहाप्रज्ञंसर्वधर्मोपपन्नं नतस्ययुद्धंरोचतेवैकदाचित्सवृ
द्धराजंकुशलंतातपृष्टेः २७ निकर्त्तनेदेवनेयोऽद्वितीयश्छन्नोपधःसाधुदेवी
मताक्षः योदुर्जयोदेवितव्येनसंख्येसचित्रसेनःकुशलंतातवाच्यः २८ गांधाररा
जःशकुनिःपार्वतीयोनिकर्त्तनेयोह्यद्वितीयोक्षदेवी मानंकुर्वन्धार्त्तराष्ट्रस्यसूत
मिथ्याबुद्धेःकुशलंतातपृष्टेः २९ यःपांडवानेकरथेनवीरःसमुत्सहत्यप्रधृ
ष्यान्विजेतुं योमुह्यतांमोहयिताद्वितीयोवैकर्त्तनंकुशलंतातपृष्टेः ३० सएवभ
क्तःसगुरुःसभर्त्तासवैपितासचमातासुहृच्च अगाधबुद्धिर्विदुरोदीर्घदर्शीसनोमं
त्रीकुशलंतातपृष्टेः ३१ वृद्धास्त्रियोयाश्चगुणोपपन्नाज्ञायंतेनःसंजयमातरस्ताः
ताभिःसर्वाभिःसहिताभिःसमेत्यस्त्रीभिर्वृद्धाभिरभिवादंवदेथाः ३२ कच्चित्पुत्राजी
वपुत्राःसुसम्यग्वर्त्तंतेवोवृत्तिमनृशंसरूपां इतिस्मोक्त्वासंजयब्रूहिपश्चादजातशत्रुः

३० नइतिधार्त्तराष्ट्रान्ग्रंतर्भाव्योक्तंतेषांभार्याइत्यर्थः सुसंगुप्ताःइतिकुशलप्रश्नप्रकारकथनं ३१ ३२ ६६

२१ पांडवायोधनाय पांडवैः सहयुद्धाय २३ २४ २५ सहभ्रात्रा संजयस सहायः ॥ ३६

ज्येष्ठः पुत्रो धृतराष्ट्रस्य मंदो मूर्खः शठः संजय पापशीलः प्रशास्ता वै पृथिवी येन सर्वा सुयो-
धनं कुशलं तात पृच्छेः १७ भ्राता कनीयानपि तस्य मंदस्तथाशीलः संजय सोपि शश्वत् म-
हेष्वासः शूरतमः कुरूणां दुःशासनं कुशलं तात वाच्यः १८ यस्य कामो वर्त्तते नित्यमेव ना-
न्यः शमाद्भारतानामिति स्म स बाह्लिकानामृषभो मनीषी त्वयाभिवाद्यः संजय साधुशी-
लः १९ गुणैरनेकैः प्रवरैश्च युक्तो विज्ञानवान्नैव च निष्ठुरो यः स्नेहादमर्षं सहते सदै-
व स सोमदत्तः पूजनीयो मतो मे २० अर्हत्तमः कुरुषु सौमदत्तिः स नो भ्राता संजय मत्स-
खा च महेष्वासो रथिनामुत्तमोर्हः सहामात्यः कुशलं तस्य पृच्छेः २१ ये चैवान्ये कुरुमु-
ख्या युवानः पुत्राः पौत्रा भ्रातरश्चैव ये नः यं यमेषां मन्यसे येन योग्यं तमभ्योच्यानामयं
मत्तवाच्याः २२ ये राजानः पांडवायोधनाय समानीता धार्त्तराष्ट्रेण केचित् वसातयः
शाल्वकाः केकयाश्च तथांबष्ठा ये त्रिगर्त्ताश्च मुख्याः २३ प्राच्योदीच्या दाक्षिणात्याश्च शू-
रास्तथा प्रतीच्याः पार्वतीयाश्च सर्वे अनृशंसाः शीलवृत्तोपपन्नास्तेषां सर्वेषां कुशलं
सूत पृच्छेः २४ हस्त्यारोहा रथिनः सादिनश्च पदातयश्चार्यसंघा महांतः आख्याय मां कुश-
लिनं स्म नित्यमनामयं परिपृच्छेः समग्रान् २५ तथा राज्ञो ह्यर्थयुक्तानमात्यान्दौवारि-
कान्ये च सेनां नयंति आयव्ययं ये गणयंति नित्यमर्थांश्च ये महतश्चिंतयंति २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ संतीतिमिममयाकृतानिप्रतिवत्सरंदेयानि नोवर्तयंतिनचालयंतिवात्वदीयाअधिकारिणःतान्पूर्ववद्यथाव
टी॰ त्स्थापयामितथैवतांसिद्धिंत्वद्दत्तंसम्यक्परिपालयामीतिहृतदारामाश्रावयेथाइतितेनप्रेषितंदुर्योधनंब्रूहीतिशे
६१

संत्येवमेवब्राह्मणेभ्यःकृतानिभावीन्ययोनोवतवर्तयंति तान्यर्पयामियुक्तरूपांस्त
थैवतामेवसिद्धिंश्रावयेथान्नृपेंते ४२ येचानाथाडुर्बलाःसर्वकालमात्मन्येव
प्रयतंतेथमूढाः तांश्चापित्वंकृपणान्सर्वथैवअस्मद्वाक्यात्कुशलंतातपृच्छेः ४३
येचाप्यन्येनाश्रितााधार्त्तराष्ट्रान्नानादिग्भ्योभ्यागताःसूतपुत्र दृष्ट्वातांश्चैवार्हत
श्चापिसर्वान्संपृच्छेथाःकुशलंचाव्ययंच ४४ एवंसर्वानागताभ्यागतांश्चरा
ज्ञोदूतान्सर्वदिग्भ्योभ्युपेतान् दृष्ट्वासर्वान्कुशलंतांश्चसूतपश्चादहंकुशलीतेषु
वाच्यः ४५ नहीदृशाःसंत्यपरेपृथिव्यांयेयोधकाधार्तराष्ट्रेणलब्धाः धर्मस्तुनित्यो
ममधर्मएवमहाबलःशत्रुनिबर्हणाय ४६

पं॰ एतेनब्राह्मणहृतिषुपक्षपातोदुर्योधनेचकनिष्टत्वाद्दात्ताप्रतिपालनोचितंसंचदर्शितं ४२ आत्मन्येवप्रय
तंतेनतुकर्तव्यंशक्नुवंति ४३ ४४ नहीतिधर्मबलेनैवजयोभविष्यतिनसहायैरित्यर्थः नित्यःअविनाशिफलः ६१
४६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३३ ३९ लघुधीग्रहणादिदेशास्त्रियोवेषणाः ४० ३८ आनृशंस्यं दयामर्हतीत्यानृशंस्यः ३९ ४० पृष्ठतो यातेति

यातोभार्याः संजयवेत्यत्र तन्नामांसर्वासां कुशलं तात पृच्छेः सुसंगुप्ताः स्वभयोनवद्याः
कच्चिद्गृहानावसथाप्रमत्ताः ३३ कच्चिद्वृत्तिर्विप्रस्वेषु भद्राः कल्याणी वर्तते धमनृशं
संनूपाः यथा च वः सुःपतयोनुकूलास्तथा प्रवृत्तिमात्मनः स्थापयध्वं ३४ यानःस्नु
षाः संजयवेत्यत्र शाम्नाः कुलेभ्यश्च गुणोपपन्नाः प्रजावत्यो ब्रूहि समेत्य ताश्च युधि
ष्ठिरो वो भवदुःखसत्त्वः ३५ कन्याः स्वजेष्याः सदनेषु संजय अनामयं मद्वचनेन पृष्ट्वा
कल्याणा वः संतु पतयोनुकूला यूयं पतीनां भवतानुकूलाः ३६ अलंकृतावस्त्रव
त्यः सुगंधाश्च वीभत्साः सुविताभोगवत्यः लघुयासां दर्शनेवाकवल्ल्वीवेशादि
यः कुशलं तात पृच्छेः ३७ दासाः स्युर्यो ये च दासाः कुतूणांत दाश्रया बहवः कुब्जखंजाः
आख्याय मां कुशलिनं स्मतेभ्यो प्यनामयं परिपृच्छेर्जघन्यं ३८ कच्चिद्वृत्तिर्वर्ततेवैप्र
णीक च्चिद्ग्रागान्धार्तराष्ट्रो ददाति अंगहीनान्कृपणान्वामनान्वा यानानृशंस्यो
धृतराष्ट्रो विभर्ति ३९ अंधांश्च सर्वान्स्थविरांस्तथैव हस्ताजीवा बहवो येत्र संति आख्या
यमां कुशलिनं स्मतेभ्यो प्यनामयं परिपृच्छेर्जघन्यं ४० माभैष्ट दुःखेन कुजीवितेन नूनं
कृतं परलोकेषु पापं निगृह्यश
त्रून्निगृह्य वः सुहृदान्भरिष्ये पोषयिष्ये इति ब्रूयाः इति शेषः ४१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्वंब्रह्मांडंसंहृत्यएकीभूय ७ ८ ९ १० ११ १२ १३ १४ ॥

सर्वमप्येतदेकस्यनालंसंजयकस्यचित् तातसंहृत्यजीवामोद्विषतांमावशंगमः
७ तथाभीष्मंशान्तनवंभारतानांपितामहं शिरसाभिवदेथास्त्वंममनामप्रकीर्त
यन् ८ अभिवाद्यश्चवक्तव्यस्ततोऽस्माकंपितामहः भवताशन्तनोर्वंशोनिमग्नः
पुनरुद्धृतः ९ सत्वंकुरुतथातातस्वमतेनपितामह यथाजीवन्तितेपौत्राःप्रीति
मन्तःपरस्परं १० तथैवविदुरंब्रूयाःकुरूणांमन्त्रधारिणं अयुद्धंसौम्यभाषस्वहि
तकामोयुधिष्ठिरे ११ अथदुर्योधनंब्रूयाराजपुत्रममर्षणं मध्येकुरूणामासीन
मनुनीयपुनःपुनः १२ अपापांयदुपैतस्त्वंकृष्णामेकांसभागतां तद्दुःखंवैवति
तितिक्षामोमावधीष्मकुरूनिति १३ एवंपूर्वापरान्क्लेशानतितिक्षन्तपाण्डवाः ब
लीयांसोऽपिसन्तोयत्तत्सर्वंकुरवोविदुः १४ ॥

९२

४७ युक्तिः संभावनाएतस्यार्थेनविद्यते शाक्रपुरींइंप्रस्थं ४८ युधिष्ठिरसंदेशाः १० संतंसाधुंअसंतंउ

इदंपुनर्वचनंधार्तराष्ट्रंसुयोधनंसंजयश्रावयेथाः यस्तेशरीरेहृदयंदुनोतिकामः
कुरूनसपत्नोनुशिष्याः ४७ नविद्यतेयुक्तिरेतस्यकाचिन्नैवंविधास्यामयथाप्रियं
ते ददस्ववाशक्रपुरींममैवयुध्यस्ववाभारतमुख्यवीर ४८ उद्योगेसंजययाने १०
युधिष्ठिरउ० उतसंतमसंतंवाबालंवृद्धंवसंजय उताबलंबलीयांसंधाताप्रकुरु
तेवशे १ उतवालायपांडित्यंपंडितायोतबालतां ददातिसर्वमीशानःपुरस्ताच्छु
क्रमुच्चरन् २ बलंजिज्ञासमानस्यआचक्षीथाययथातथं अथमंत्रंमंत्रयित्वायाथा
तथ्येनहृष्टवत् ३ गावल्गणेकुरून्गत्वाधृतराष्ट्रंमहाबलं अभिवाद्योपसंगृह्य
ततःपृच्छेरनामयं ४ ब्रूयाश्चैनमुपासीनंकुरुभिःपरिवारितं तवैवराजन्वी
र्येणसुखंजीवंतिपांडवाः ५ तवप्रसादाद्बालास्तेप्राप्ताराज्यमरिंदम राज्येतान्
स्थापयित्वाग्रेनोपेक्षस्वविनश्यतः ६ ॥

इत्यनाईश्वरः १ शुक्रंबीजभूतंप्राचीनंकर्मउच्चरन् २ ३ ४ ५ ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ ३ आत्ययिकं आवश्यकं कल्यं दृढं अकल्यः दर्शनेऽसमर्थः सक्तः निरुद्धः ६ प्राज्ञाः शूराः आचार्याः साधव

टी॰

६३ आचक्ष्व धृतराष्ट्राय द्वाःस्थ मां समुपागतं सकाशात्पांडुपुत्राणां संजयं मा चिरं कृथाः ३
जागर्ति चेदभिवदेस्त्वं हि द्वाःस्थ प्रविश्यैव विदितो भूमिपस्य निवेदयम्ह्यात्ययिकं हि मे
स्ति द्वाःस्थोऽथ श्रुत्वा नृपतिं जगाद ४ द्वाःस्थ उवाच संजयोयं भूमिपते नमस्ते दिदृक्ष
या द्वारमुपागतस्ते प्राप्तो दूतः पांडवानां सकाशात् प्रशाधि राजन् किमयं करोतु ५
धृतराष्ट्र उ॰ आचक्ष्व मां कुशलिनं कल्पमस्मै प्रवेश्यतां स्वागतं संजयाय न हि चाह
मेतस्य भवाम्यकल्यः स मे कस्माद्द्वारि तिष्ठेच्च सक्तः ६ वैशंपायन उ॰ ततः प्रवि
श्यानुमते नृपस्य महद्वेश्म प्राज्ञशूरार्यगुप्तं सिंहासनस्थं पार्थिवमाससाद वैचि
त्रवीर्यं प्रांजलिः सूतपुत्रः ७ संजय उ॰ संजयोहं भूमिपते नमस्ते प्राप्तोस्मि गत्वा
नरदेव पांडवान् अभिवाद्य त्वां पांडुपुत्रो मनस्वी युधिष्ठिरः कुशलं चान्वपृच्छत् ८
स ते पुत्रान्पृच्छति प्रीयमाणः कच्चित्पुत्रैः प्रीयसे नप्तृभिश्च तथा सुहृद्भिः सचिवैश्च राज
न्ये चापि त्वामुपजीवंति तैश्च ९ ॥

श्वेतैर्गुप्तं ७ ८ नरर्षभिः पुत्रस्य पौत्रैः ९ ॥ ९ ॥ ६३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतितितिक्षामहेतांनवंततोवयं तत्रहेतुःमावधीष्मेति १५ १६ गृद्धांलुब्धां १७ १८ अवसानंवसतिस्थानं १९

यत्नःप्रव्राजयेःसौम्यअजिनैःप्रतिवासितान् तद्दुःखमतितितिक्षाममावधीष्मकुरून्
निति १५ यत्तत्तीर्णमतिक्रम्यकृष्णाकेशेष्वधर्षयत् दुःशासनस्तेनुमतेतच्चास्माभिरुपे
क्षितं १६ अथोचितंस्वकंभागंलभेमहिपरंतप निवर्तयपरद्रव्याद्बुद्धिंगृद्धांनरर्षभ १७ शां
तिरेवंभवेद्राजन्प्रीतिश्चैवपरस्परं राज्यैकदेशमपिनःप्रयच्छशममिच्छतां १८ अवि
स्थलंवृकस्थलंमाकंदींवारणावतं अवसानंभवत्वत्रकिंचिदेकंचपंचमं १९ भ्रातृणां
देहिपंचानांपंचग्रामान्सुयोधन शांतिर्नोस्तुमहाप्राज्ञज्ञातिभिःसहसंजय २० भ्राता
भ्रातरमन्वेतुपितापुत्रेणयुज्यतां स्मयमानाःसमायांतुपांचालाःकुरुभिःसह २१ अक्ष
तान्कुरुपांचालान्पश्येयमितिकामये सर्वेसुमनसस्तातशाम्यामभरतर्षभ २२
अलमेवशमायास्मितथायुद्धायसंजय धर्मार्थयोरलंचाहंमृदवेदारुणायच २३ इत्यु
द्योगपर्वणिसंजययाने. ३१ वैशंपायनउ० अनुज्ञातःपांडवेनप्रययौसंजयस्तदा
शासनंधृतराष्ट्रस्यसर्वंकृत्वामहात्मनः १ संप्राप्यहास्तिनपुरंशीघ्रमेवप्रविश्यच
अंतःपुरंसमास्थायद्वाःस्थंवचनमब्रवीत् २॥

उद्योगेसंजययाने. ३१ अन १ २ ॥ १॥

म॰उ॰
टी॰
७१

८० पंडिताः पांडवाः मूर्खेषु त्वत्सुतेषु युष्मास्वंलसंपश्यंते वेत्यर्थः ८१ वृषलः शूद्रः पुत्रस्ते हा कष्टं तेन तया सख्यियाः न
वेदत्राणान्त्राशिता अन्यथा सम्यनजह्यादितिभावः ८२ ८३ आतुरा आरोग्यसती निर्घोषः तेन कृत्स्नला।

षडिमे षट्सु जीवंति सप्तमो नोपलभ्यते चौराः प्रमत्ते जीवंति व्याधितेषु चिकित्स-
काः ८० प्रमदाः कामयानेषु यजमानेषु याजकाः राजा विवदमानेषु नित्यं मू-
र्खेषु पंडिताः ८१ षडिमानि विनश्यंति मुहूर्तमनवेक्षणात् गावः सेवा कृषिर्भा-
र्या विद्या वृषलसंगतिः ८२ षडेते ह्यवमन्यंते नित्यं पूर्वोपकारिणं आचार्यं शिक्षि-
ताः शिष्याः कृतदाराश्च मातरं ८३ नारीं विगतकामास्तु कृतार्थाश्च प्रयोजकं ना-
वं निस्तीर्णकांतारा आतुराश्च चिकित्सकं ८४ आरोग्यमानृण्यमविप्रवासः सद्भि-
र्मनुष्यैः सह संप्रयोगः स्वप्रत्यया वृत्तिरभीतवासः षट् जीवलोकस्य सुखानि राज-
न् ८५ ईर्षुर्घृणी न संतुष्टः क्रोधनो नित्यशंकितः परभाग्योपजीवी च षडेते नित्य-
दुःखिताः ८६ ॥

भेन कृतकृत्यत्वात् पांडवान वमन्यसे ८४ स्वप्रत्यया स्वानुकूला वृत्तिर्जीविका तवसत्संगो नास्ती-
त्यर्थः ८५ ईर्षुरिति त्वयि तु ईर्षुत्वं घृणा दया ऽनवतवपुः पुत्रो नास्तीति भावः ८६ ॥ ७१

त्वातां उपजीव्या गुरवः इहलोके साधिताः मित्रादयः इह परलोके जन्मांतरे वा स्वस्वकार्यं कुर्वंतीत्यर्थः मित्रेषु पां
डवेषु मैत्रीमाचरेति भावः त्वंतु अंधत्वात् दुर्जनवचनप्रतारितः पांडवानां गुणान् न पश्यसीति भावः १२ हेत।
चर्ममयाज्जलपात्रात् १३ षडिति क्रोधः तन्मूलको द्वेषो ग्राह्यः १४ १५ पांडवानां अरक्षिता राजा त्वमेव।

पंचत्वानुगमिष्यंति यत्र यत्र गमिष्यसि मित्राण्यमित्रा मध्यस्था उपजीव्योपजीवि
नः १२ पंचेंद्रियस्य मर्त्यस्य छिद्रं चेदेकमिंद्रियं ततोस्य स्रवति प्रज्ञा दृतेः पादादिवो
दकं १३ षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता निद्रा तंद्री भयं क्रोध आलस्यं दी
र्घसूत्रता १४ षडिमान्पुरुषो जह्याद्भिन्नां नावमिवार्णवे अप्रवक्तारमाचार्यमनधी
यानमृत्विजं १५ अरक्षितारं राजानं भार्यां चाप्रियवादिनीं ग्रामकामं च गोपालं वन
कामं च नापितं १६ षडेव तु गुणाः पुंसा न हातव्याः कदाचन सत्यं दानमनालस्य
मनसूया क्षमा धृतिः १७ अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च
वश्यश्च पुत्रोर्थकरी च विद्या षड्जीवलोकस्य सुखानि राजन् १८ षण्णामात्मनि
नित्यानामैश्वर्यं योधिगच्छति न स पापैः कुतोनर्थैर्युज्यते विजितेंद्रियः १९ ॥

षामपि त्याज्यो भविष्यसीत्यर्थः १६ दुर्योधनत्यागार्थं तव धृतिर्धैर्यं नास्तीति भावः १७ १८ आत्मनि चि
त्ते नित्यानां षण्णां कामक्रोधलोभशोकमोहमदमानानां च षट्पदी सक्तानां ऐश्वर्यं वशित्वं ते तु राज्यकामः पापैः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म·उ·
टी·
७०

दीर्घसूत्रैः तिष्ठमाणेकार्यचिरंकुर्वद्भिः रभसैः हर्षतरलैः अलसैरितिपाठः चारणैःस्तावकैः अरणैरितिच्छेदः।
वारणाविरोधिभिः ताग्रामङ्कैरित्यर्थः अप्राज्ञैरितिपाठेबहुभोजिभिः ६६ वृद्धः कुलधर्मानुपदिशति कुली
नः श्रीमन् आचारंग्राहयतिसखावाहितंवदतितातःहृशाभीषद्गोणविदुरः भगिनीयनंवर्ततितवगृहेसर्वेपिमे
तिपर्युक्तपदेशंनगृह्णासीतिभावः ६७ साद्यस्कानि सद्यःफलानि ६८ देवाः स्वर्गभाजः स्वर्गपदार्थश्चयन्नदुः
खेनसंभिन्नंनचग्रस्तमनन्तरं अभिलाषोपनीतंचतत्स्वःसुखं पदास्पदमित्येवंरूपः अतस्तेसत्यसंक

चत्वारि राज्ञा तु महाबलेन वर्ज्यान्याहुः पंडितस्तानि विद्यात् अल्पप्रज्ञैः सह मंत्रं न कु
र्यान्न दीर्घसूत्रैरलसैश्चारणैश्च ६६ चत्वारि ते तात गृहे वसंतु श्रियाभिजुष्टस्य गृह
स्थधर्मे वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या ६७ चत्वार्याह म
हाराज साद्यस्कानि बृहस्पतिः पृच्छते त्रिदशेंद्राय तानीमानि निबोध मे ६८ देवतानां च
संकल्पमनुभावं च धीमतां विनयं कृतविद्यानां विनाशं पापकर्मणां ६९ पंचाग्नयो
मनुष्येण परिचर्याः प्रयत्नतः पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ७० पंचैव पूज
यन्लोके यशः प्राप्नोति केवलं देवान्पितॄन्मनुष्यांश्च भिक्षूनतिथिपंचमान् ७१ ॥

ल्पाः धीमतामगस्त्यादीनामनुभावंसमुद्रपानादिप्रभावंतेपिदेवतुल्याइत्यर्थः विनयोपिगुरुप्रसाद।
कत्वेनसद्यःफलः विनाशोविनाशहेतुः कर्मापिचौर्यादिकंतच्चतत्क्षणेवास्तितवतुसर्वकर्ममानार्थमे
वेतिभावः ६९ अग्निवत्पित्रादयोपिपूज्याएवनास्कंदनीयाः नवपुत्रस्त्वगुरुयुधिष्ठिरंनपूजयतीतिभावः ७०
पितॄन्अग्निष्वात्तादीन्गोत्रप्रवर्तकानृषींश्चमनुष्यान्पित्रादीन्ज्येष्ठभ्रातापितुःसमइतिपितृतुल्यस्त्वमत्रस

युधिष्ठिरइतिभावः ७१ ॥
७

पात्रेधर्मे ५७ अप्रदातारं त्वमत्र ५८ उपाया इति छेदः पुष्टं कनीयान् भेददानेमध्यमः साम उत्तमः अपाया इति
छेदे काम्ययोगः कनीयान् काम्यधर्मो मध्यमः इहलोके लोभो धर्मः त्रयोन्यायाइ निपाठः स्पष्टार्थः ५९ यथा
वन्नियोजयेत् त्वयात्वधमाः कर्णादय उत्तमे मंत्रकार्ये नियुज्यंत इति भावः ६० तपसि सति त्वमत्रोध्यनो

न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं ५७
द्वावंभसि निवेष्टव्यौ गले बद्ध्वा दृढां शिलां धनवंतमदातारं दरिद्रं चातपस्विनं ५८
त्रयोन्याया मनुष्याणां श्रूयंते भरतर्षभ कनीयान्मध्यमः श्रेष्ठ इति वेदविदो विदुः ५९
त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः नियोजयेद्यथावत्तांस्त्रिविधेष्वेव कर्मसु ६०
त्रय एवाधना राजन् भार्या दासस्तथा सुतः यत्ते समधिगच्छंति यस्य ते तस्य तद्धनं ६१
हरणं च परस्वानां परदाराभिमर्शनं सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ६२
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ६३
भक्तं च भजमानं च तवास्मीति च वादिनं त्रीनेतान् शरणं प्राप्तान् विषमेपि न संत्यजेत् ६४

स्तत्त्वमेव पांडवानां राज्यं दातुं प्रभुरसीत्यर्थः ६१ हरणादयस्त्रयोपि दोषाः कामादित्रयसहितास्त्वय्येव
संतीत्यर्थः ६२ ६३ भक्तादयः पांडवाः शरणं गृहं विषमेपि संकटेपि तव तत्त्यागो नास्तीत्यर्थः ६४
शत्रोः युधिष्ठिरस्य सकाशात् गोत्रवधात् ६५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म·उ·
टी·
५५

४९ अहिंसेति पुत्राणां विग्रहेण फलत्रयं मा कुर्वीति भावः ५० द्वावित्यादिषु किंचित्स्वकृतोपयोगमुच्यते
किंचित्प्रसंगात् दृष्टान्तार्थं वेति ज्ञेयं असतः प्राकृत्यादींस्त्वमर्चयसीति भावः ५१ पूजितेति पुत्रेण

सोऽस्य दोषो न मंतव्यः क्षमा हि परमं बलं अक्षमावान्परं दोषैरात्मानं चैव योजयेत्
४९ एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा विद्यैका परमा तृप्तिरहिंसैका सु
खावहा ५० द्वाविमौ ग्रसते भूमिः सर्पो बिलशयानिव राजानं चाविरोद्धारं ब्रा
ह्मणं चाप्रवासिनं ५१ द्वे कर्मणी नरः कुर्वन्नस्मिंल्लोके विरोचते अब्रुवन्परुषं कं
चिदसतो नार्चयंस्तथा ५२ द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ स्त्रियः कामि
तकामिन्यो लोकः पूजितपूजकः ५३ द्वाविमौ कंटकौ तीक्ष्णौ शरीरपरिशोषि।
णौ यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ५४ द्वावेव न विराजेते विपरीते
न कर्मणा गृहस्थश्च निरारंभः कार्यवांश्चैव भिक्षुकः ५५ द्वाविमौ पुरुषौ रा
जन्स्वर्गस्योपरि तिष्ठतः प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ५६ ॥

पूजितं कर्णं त्वमपि पूजयसीत्यर्थः ५३ अनीश्वरस्त्वं सपुत्रे ५४ निरंभ उदासीनस्त्वं पुत्रकलहनि।
वारणे ५५ प्रभुः पाण्डवः ५६ ॥

५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एकयेति बुद्धिर्बुद्धिमतेत्युपक्रमात् एकया बुद्ध्येति व्याख्या द्वे पि समानं हेनी तौ कार्याकार्ये अथवात्मेति त्वानिमे
विनिश्चित्य सम्यगवधार्य त्रीन् नीतौ मित्रोदासीनशत्रून् एते कामक्रोधलोभान् चतुर्भिः सामदानभेददंडैः
मित्रं साम्नैव दानभेदाभ्यामुदासीनं सर्वैः शत्रुं वशीकुरु एते शमदमोपरमश्रद्धाभिः पंच एतद्धेयेपींद्रि
याणि जित्वा षड्विदित्वा संधिविग्रहादीन् ज्ञात्वा एते अशनायापिपासाशोकमोहजरामृत्यूंश्च सप्त हि।

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता। बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराज
कं ४३ एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु। पंच जित्वा विदित्वा षट् सप्त हि।
त्वा सुखी भव ४४ एकं विषरसो हंति शस्त्रेणैकश्च वध्यते। सराष्ट्रं सप्रजं हंति रा
जानं मंत्रविप्लवः ४५ एकः स्वादु न भुंजीत एकश्चार्थान्न चिंतयेत्। एको न गच्छेदध्व।
ानं नैकः सुप्तेषु जागृयात् ४६ एकमेवाद्वितीयं तद्यद्राजन्नावबुध्यसे। सत्यं।
स्वर्गस्य सोपानं पारावारस्य नौरिव ४७ एकः क्षमावतां दोषो द्वितीयो नोपपद्यते। यदे

ताभ्यां स्त्रियो द्यूतमृगयापानं वाक्पारुष्यं च पंचमं महच्च दंडपारुष्यमर्थदूषणमेव चेति सप्त हेयानि एते
पंचेंद्रियाणि बुद्धिमनसी च सप्त ज्ञात्वा सुखी भव तथा च श्रुतिः यदा पंचावतिष्ठंते ज्ञानानि मनसा सह
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिमिति पूर्वं इंद्रियाणां प्रत्याहार उक्तः इदानीं तत्प्रविलापनमिति
भेदः ४४ ४६ सत्यं यथार्थभाषणं स्वर्गस्य सत्यलोकस्य सोमोक्षः पारावारस्य समुद्रस्य ४७ ४८॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मृ.३.
टी.
४८

नैष्कर्म्यात्प्रयतन्तः ४८ शून्यंराजादीन्अस्तातंयथास्यात्तथाउपास्तेकदर्यंअदातारं ४९ असमुन्नद्धः

श्राद्धंपितृभ्योनददातिदैवतानिनचार्चति सुहृन्मित्रंनलभतेतमाहुर्मूढलक्ष
णं ४५ अनाहूतःप्रविशतिअपृष्टोबहुभाषते अविश्वस्तेविश्वसितिमूढचेतानरा
धमः ४६ परंक्षिपतिदोषेणवर्तमानःस्वयंतथा यश्चक्रुध्यत्यनीशानःसचमूढ
तमोनरः ४७ आत्मनोबलमज्ञायधर्मार्थपरिवर्जितं अलभ्यमिच्छन्नैष्कर्म्या
न्मूढबुद्धिरिहोच्यते ४८ अशिष्यंशास्तियोराजन्यश्चशून्यमुपासते कदर्यंभजते
यश्चतमाहुर्मूढचेतसं ४९ अर्थंमहान्तमासाद्यविद्यामैश्वर्यमेववा विचरत्यसमु
न्नद्धोयःसपंडितउच्यते ५० एकःसंपन्नमश्नातिवस्तेवासश्चशोभनं योसंविभज्य
भृत्येभ्यःकोनृशंसतरस्ततः ५१ एकःपापानिकुरुतेफलंभुंक्तेमहाजनः भोक्तारो
विप्रमुच्यंतेकर्त्तादोषेणलिप्यते ५२ ॥

अनुद्धतः ५० ५१ ५२ ५२ ५२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तत्त्वं विनाशित्वं भूतानां जातानां नामैश्वर्यादीनां योगो रचनाप्रकारः उपायस्तदर्थसामग्री मनुष्याणां मध्ये स नरः पंडि
तः २७ प्रवृत्तवाक् अकुंठितवचनः चित्रकथो लोककथाभिज्ञः ऊहास्तर्कः प्रतिभानं तत्कालस्फूर्तिः २८ प्रज्ञानु
गं बुद्धिवशं श्रुतानुगा शास्त्रानुसारिणी २९ अकर्मणा हीनकर्मणा द्यूतादिनेत्यर्थः ताहृशो दुर्योधनः ३०

तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणां उपायज्ञो मनुष्याणां नरः पंडित उच्यते २७ प्र
वृत्तवाक् चित्रकथ ऊहावान् प्रतिभानवान् आशु ग्रंथस्य वक्ता च यः स पंडित उच्यते २८
श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा असंभिन्नार्यमर्यादः पंडिताख्यां लभेत सः २९
अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ३०
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ३१
अकामान्कामयति यः कामयानान्परित्यजेत् बलवंतं च यो द्वेष्टि तमाहुर्मूढचेतसं
३२ अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च कर्म चारभते दुष्टं तमाहुर्मूढचेतसं ३३ सं
सारयति कृत्यानि सर्वत्र विचिकित्सते चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ३४

स्वमर्थमिति ताहृशाः शकुनिः ३१ अकामान् त्वयि भक्तिहीनान् कर्णादीन् कामयानान् बलवंतं युधिष्ठिरं
३२ दुष्टं जतुगृहदाहादि ३३ संसारयति भृत्यादिद्वारा प्रवर्तयति ३४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यतः यदा प्राप्तः संजयस्तदारभ्येत्यर्थः अचिंता अप्रकृष्टचिन्ता २ अभियुक्तमित्यर्द्धोपाञ्चपकः त्रयोन्येच प्रजागरावेशभाजनानि ३ गृध्यन्लिप्सावान् ४ ५ अनास्तिकः परलोकोप्यस्तीति जानन् श्रद्दधानः श्रद्धा

यतः प्राप्तः संजयः पांडवेभ्यो न मे यथावन्मनसः प्रशांतिः सर्वेंद्रियाण्यप्रकृतिंगतानि किं वक्ष्यतीत्येव हि मेद्य चिंता २ विदुर उवाच अभियुक्तं बलवता दुर्बलं हीनसाधनं हृतस्वं कामिनं चोरमाविशंति प्रजागराः ३ कच्चिदेतैर्महादोषैर्न स्पृष्टोसि नराधिप कच्चिच्च परवित्तेषु गृध्यन्न परितप्यसे ४ धृतराष्ट्र उ० श्रोतुमिच्छामि ते धर्म्यं परं नैःश्रेयसं वचः अस्मिन्राजर्षिवंशे हि त्वमेकः प्राज्ञसंमतः ५ विदुर उ० निषेवते प्रशस्तानि निंदितानि न सेवते अनास्तिकः श्रद्दधान एतत्पंडितलक्षणं ६ क्रोधो हर्षश्च दर्पश्च ह्रीः स्तंभो मान्यमानिता यमर्थान्नापकर्षंति स वै पंडित उच्यते ७ यस्य कृत्यं न जानंति मंत्रं वा मंत्रितं परे कृतमेवास्य जानंति स वै पंडित उच्यते ८ यस्य कृत्यं न विघ्नंति शीतमुष्णं भयं रतिः समृद्धिरसमृद्धिर्वा स वै पंडित उच्यते ९ ॥

गुरुवेदवाक्यादिषु फलावश्यंभावनिश्चयस्तद्वान् ६ दर्पः परावज्ञानं स्तंभः असन्नतिः मान्यमानि मान्यं मानार्हं आत्मानं मन्यत इति मान्यमानी तस्य भावस्तत्ता ७ ८ ९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
६०

संसारिणी स्वभावतोऽनवस्थितापि कामात् ऐहिकसुखात् उभयलोकसुखावहमर्थं वृणीते सं पंडितः कामोथ
मोर्थापेतया तिकष्टः स्मर्थः कामादिनियस्तु कामं त्यक्त्वा अर्थं वृणीते स अर्थार्थी मोक्षादेव सर्वं अर्थं विंदति
ज्ञानफले मोक्षे कृत्स्नस्यार्थस्यांतर्भावात्स जनकादिवत्स्यः अत्यंतं पंडित उच्यते २० २१ चिरं शृणोतीति ज्ञा।

यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते कामादर्थं वृणीते यः स वै पंडित उच्यते २०
यथाशक्ति चिकीर्षंति यथाशक्ति च कुर्वते न किंचिदवमन्यंते नराः पंडितबुद्धयः २१
क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामान् नासंपृष्टो ह्युपयुंक्ते
परार्थे तत्प्रज्ञानं प्रथमं पंडितस्य २२ नाप्राप्यमभिवांछंति नष्टं नेच्छंति शोचितुं
आपत्सु च न मुह्यंति नराः पंडितबुद्धयः २३ निश्चित्य यः प्रक्रमते नांतर्वसति क
र्मणः अवंध्यकालो वश्यात्मा स वै पंडित उच्यते २४ आर्यकर्मणि रज्यंते भूतिक
र्माणि कुर्वते हितं च नाभ्यसूयंति पंडिता भरतर्षभ २५ न हृष्यत्यात्मसंमाने नाव
मानेन तप्यते गांगो ह्रद इवाक्षोभ्यो यः स पंडित उच्यते २६ ॥

नवानपि असंपृष्टः यथावद्
दृष्टः उपयुंक्ते वाग्व्ययं करोति परार्थे विषये प्रज्ञानं चिह्नं २२ २३ निश्चित्य स्वयत्नसाध्यं स्वकर्मणः अं
तर्मध्ये न वसति नोपरमते किं तु समापयत्येव अवंध्यकालः सर्वदा सप्रयोजनमेव कर्माचरन् २४
आर्याः शिष्टाः तद्योग्यकर्माणि भूतिरैश्वर्यं तत्साधनार्थं कर्माणि २५ २६ ॥ ७ ६०

४ ५ अकल्योनकिंतुकल्यःसमर्थएवसर्वदाविदुरसंदर्शनेममअप्रत्याख्येयमित्यर्थःजातुकदाचि

द्वास्थउ॰ विदुरोयमनुप्राप्तोराजेंद्रतवशासनात् द्रष्टुमिच्छतितेपादौकिंकरोतुप्र
शाधिमां ४ धृतराष्ट्रउ॰ प्रवेशयमहाप्राज्ञंविदुरंदीर्घदर्शिनं अहंहिविदुरस्यास्य
नाकल्योजातुदर्शने ५ द्वास्थउ॰ प्रविशांतःपुरंक्षत्तर्महाराजस्यधीमतः नहिते
दर्शनेकल्योजातुराजाब्रवीतिमां ६ वैशंपायनउ॰ ततःप्रविश्यविदुरोधृतरा
ष्ट्रनिवेशनं अब्रवीत्प्रांजलिर्वाक्यंचिंतयानंनराधिपं ७ विदुरोहंमहाप्राज्ञसं
प्राप्तस्तवशासनात् यदिकिंचनकर्तव्यमयमस्मिप्रशाधिमां ८ धृतराष्ट्रउ॰
संजयोविदुरप्राप्तोगर्हयित्वाचमांगतः अजातशत्रोःश्वोवाक्यंसभामध्येसवक्ष्य
ति ९ तस्याद्यकुरुवीरस्यनविज्ञातंवचोमया तन्मेदहतिगात्राणितदकार्षीत्प्र
जागरं १० जाग्रतोदह्यमानस्यश्रेयोयदनुपश्यसि तद्ब्रूहित्वंहिनस्तातधर्मार्थ
कुशलोह्यसि ११ ॥

तुअथवाकल्यःकल्पनासंशयच्छेदकइत्यर्थः ५ ६ ७ ८ ९ प्रजागरंनिद्रायाअभावं १० ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ह्यात्मनः आत्मानं कृतार्थं मन्वानः नागाः न गतवानसि २९ अनाप्तानां कर्णादीनां आप्तानां विदुरादीनां निग्रहा
नुग्रहीकरणात् ३० अवधूतस्तिरस्कृतः अत एव आर्तः प्रपद्ये प्राप्नुयां ३१ आवसथं गृहं परैर्हि गच्छ प्रपद्य

त्वमेवैको जातपुत्रस्य राजन्वशंगत्वा सर्वलोके नरेंद्र कामात्मनः श्लाघनो ह्यूतकाले ना
गाः शमं पश्य विपाकमस्य २९ अनाप्तानां संग्रहात्त्वं नरेंद्र तथाप्तानां निग्रहाच्चैव राजन्
भूमिं स्फीतां दुर्बलत्वादनंतां अशक्तस्त्वं रक्षितुं कौरवेय ३० अनुज्ञातो रथवेगावधूतः
श्रांतोभिपद्ये शयनं नरसिंह प्रातः श्रोतारः कुरवः सभायामजातशत्रोर्वचनं समेताः ३१
धृतराष्ट्र उ० अनुज्ञातोस्यावसथं परैहि प्रपद्यस्व शयनं सूतपुत्र प्रातः श्रोतारः कुरवः
सभायामजातशत्रोर्वचनं त्वयोक्तं ३२ इत्युद्योगे संजययाने ३२ वैशंपायन उ० द्वा
स्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः विदुरं द्रष्टुमिच्छामि तमिहानय मा चिरं १
प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत् ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति २
एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनं अब्रवीद्धृतराष्ट्राय द्वाःस्थ मां प्रतिवेदय ३ ॥

त्व ३२ इत्युद्योगे संजययाने ३२ द्वास्थमिति १ २ ३ ॥१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अतएवसत्यामपिसंपदित्वयामोहात्नृशंसंकृतमित्याहकथमिति मंत्रएवअग्र्यःश्रेष्टोयेषांतेमंत्राग्र्याःभी
ष्मादयःतेषांधरोधर्तातैरेवएवंउक्तःइत्याधृतमाकृविस्मृक्तःकथंनृशंसंकर्मपांडवश्राजनेकृयौन्त्वकथम
पीत्यर्थः २० अमीकर्णादयःतेषांकृरूतयेनिमित्तंत्रयंराज्यंनदेयमितितिन्श्चयःनियमेनउदपादिउत्पन्नः
२१ अकालिकंअस्मादेवकृत्रवोनाभविष्यन्नष्टाःस्युःवेतनतवपापेनकर्मणाश्रेरितोजातशत्रुःत्वयिपापं
कृतेतनहितमगोत्रवधदोषःस्यादित्याशंक्याहत्वयीति हनाशहेतंअधर्मंकृर्वतित्वयिचोरेइवपापेनिरं

कथंहिमंत्राग्र्यधरोमनीषीधर्मार्थयोरायदिसंप्रणेता एवंयुक्तःसर्वमंत्रैरहीनोनरो।
नृशंसंकर्मकृर्यादमूढः २० तवस्यामीमंत्रविदःसमेत्यसमासतेकर्मसुनित्ययुक्ताः
तेषामयंबलवान्निश्चयश्चकृरुक्षयेनियमेनोदपादि २१ अकालिकंकृरवोनाभवि
ष्यन्पापेनचेत्पापमजातशत्रुः इच्छेज्जातुत्वयिपापंविसृज्यनिंदाचेयंतवलोकेभवि
ष्यत् २२ किमन्यत्रविषयादीश्वराणांयत्रपार्थःपरलोकंस्मइष्टुं अन्यक्रामतसत।
यासंगतेस्याम्नसंशयोनास्तिमनुष्यकारः २३ एतान्गुणान्कर्मकृतानवेक्ष्यभा
वाभावौवर्तमानावनित्यौ बलिर्हिराजापारमविंदमानोनान्यत्कालात्कारणंतत्रमेने

चविसृज्यराजानिष्पापोनिंदश्वस्यादित्यर्थः २२ ईश्वराणांदेवानांविषयादन्यत्रकिंसर्वंदैवाधीनमित्यर्थः
यत्रयतःपार्थोर्जुनःपरलोकंइष्टुंअसक्रामत्इमंलोकंसशरीरएवत्यक्तवान् सताहशःनारदादिवइभय
लोकसंचारयोग्यत्वेनसाधुतोसमतोपियदितयावनवासेनक्लेशसहःस्यात्तदामनुष्यकारोनास्तीत
स्मिन्नर्थेसंशयोन २३ एतानिति एतानृशंसादीन्गुणान्कर्मकृतान्कर्मानुसारेणाहृहिरूासयुक्तानवे

म॰उ॰ अतः सर्वस्य देवायतनत्वात् तस्मात्तयेणैवं इंद्रियप्रीतिः संपादनीया न तु नानायत्नसाध्यत्वे तद्विषयस
टी॰ मर्पणेनेत्याह चक्षुरिति न तस्य स्वविषयालाभे तेषां कथं प्रीतिः स्यादित्याशंक्य तानि निरोध्यान्येवे
६५ त्याह तानीति अव्यग्रः लाभालाभादौ वैषम्यहीनः प्रणिध्यात् स्वस्वगोचरेभ्यो निवर्तयेत् २५ एतत्
दूषयति न तिष्ठति एवं प्राप्तमतिरन्ये प्राहुः तदेवाह पुरुषस्येति संवर्तते सम्यक्फलवत्वर्तते तदेवा

चक्षुः श्रोत्रं नासिकात्वक् च जिह्वा ज्ञानस्यैतान्यायतनानि जंतोः तानि प्रीतान्येव तु
स्यात्तथा तेतान्यव्यग्रोऽदुःखहीनः प्रणिध्यात् २५ न त्वेवमन्ये पुरुषस्य कर्म संवर्तते
सुप्रयुक्तं यथावत् मातुः पितुः कर्मणाभिप्रसूतः संवर्धते विधिवद्भोजनेन २६
प्रियाप्रिये सुखदुःखे च राजन् निंदाप्रशंसे च भजेत एवं परस्त्वेनं गर्हयते पराधे प्रशंसते
साधुवृत्तं तमेव २७ सर्वान् गर्हे भारतानां विरोधादन्तोन्नं भवितारं प्रजानां नोचेदिदं त
त्कर्मापराधात् कुत्र न दहेत्कुलं सर्वमेव कले २८ ॥

ह मातुरिति कर्माभावे जन्मवृद्धी न स्यातामित्यर्थः पाठांतरे तेनैव स्यातामित्यर्थः २६ किंच नोचे
दिति इदं मया उच्यमानं कर्म पांडवेभ्यो राज्यांशप्रदानात्मकं तु व नोचेत्तत्सम्मतमिति शेषः तर्हि त
वापराधात् कुलं सर्वमग्निः कक्षं यथा दहति एवं कुलं सर्वं कुलमेव मागः इव स्व स्वपापको य।
स्य सकुलं सर्वमर्जुनः कृष्णः न दहेदित्याहृत्यायोज्यं २८ ॥ ६५

म०उ० जीर्णत्वादेवदेहस्यातमसमर्थो ऽहार्येणस्वभाविकेनधृतेनयोहिस्वस्वत्रूपेतिष्टतितस्यपापंशत्रुरेवगच्छ
टी० ति तथाचश्रुतिःतस्यपुत्रादायमुपयंतिसुहृदःसाधुकृत्यांद्विषंतःपापकृत्यामिति १५ हंतआलोचनेसा
६४ नुग्रहसंबोधनेवा उपक्रोशंनिंदांअमुत्रपरलोकेपापंदुःखंनरकमित्यर्थः १६ तैर्विनाएकाकिनासंप्रा
यितुंदुर्लभमपिप्राप्तुंसमर्थोसि अस्मत्तवमहान्स्थविरस्यअथमेशत्रोःकीर्तिर्भवेत् १७ एवंधर्मान्दृष्ट्वा

अजातशत्रुस्तुविहायपापंजीर्णस्त्वंचेत्सर्पेःस्वामसमर्थो विशोचतेहार्यहृतेनवीरोयुधि
ष्ठिरस्त्वयिपापंविसृज्य १५ हंतात्मनःकर्मनिबोधराजन्धर्मार्थयुक्तादार्यवृत्तादपे
तं उपक्रोशंचेहगतोसिराजन्भूयश्चपापंप्रसजेदमुत्र १६ सत्वमर्थंसंशयितंवि
नातैराशंससेपुत्रवशानुगोद्य अधर्मशब्दश्चमहान्पृथिव्यांनेदंकर्मत्वत्समंभारता
ग्र्य १७ हीनप्रज्ञोदौष्कुलेयोनृशंसोदीर्घवैरीतत्रविद्यास्वधीरः एवंधर्मानापदःसं
त्रयेयुर्हीनवीर्योयश्चभवेदशिष्टः १८ कुलेजातोबलवान्योयशस्वीबहुश्रुतःसुख
जीवीयतात्मा धर्माधर्मौग्रथितौयोबिभर्तिसह्यस्यदिष्टस्यवशादुपैति १९ ॥

धर्मयुक्तात् १८ धर्माधर्मौसत्यानृतेग्रथितौसत्यंविनाऽनृतंनास्तिनिरधिष्ठानकभ्रमासंभवात् अनृ
तंदेहंविनाचसत्यंब्रह्मनप्राप्यतेअतःउभययोधत्तेकेवलंवासनिष्ठोभवतिसहिसएवदिष्टस्यव
शात् अस्यकुलेजातत्वादिगुणजातस्यकर्मणाषष्ठींगुणाष्टकमुपैतिप्राप्नोतीत्वंकुलेजा ६४
तोपिकेवलमनृतोपजीवित्वात्गुणांतरहीनोसीतिभावः १९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अजातशत्रुं सुखेन अभिनंद्य त्वां प्रतिवदामि कच्चिदिति १ तेतव अग्रे यत्मनः आत्मनः पूर्वंरूपमार्षं राज्यधनादिकं।
अभूत् बुभूषते प्राप्तुमिच्छति अग्रेमनोभूदितिपाठे अनुद्धृतात्शाक्यत्रयादन्तेतद्भूषने इति ज्ञेयं निर्णिक्तो दोषमल
हीनो धर्मार्थौ करोतीति स तथा मनस्वी उदारः दृष्टिमान् क्रांतदर्शी ११ परो मुख्यः आनृशंस्यं दया ततः परो मुख्यः
वित्तचयात् ज्ञानः इति शेषः वित्तसाध्यः यज्ञदानादिः किं च तस्य बुद्धिः अनपार्थे निष्प्रयोजने सुखप्रियेन निश्चि

धृतराष्ट्र उ० अभिनंद्य त्वां तात वदामि संजय अजातशत्रुं च सुखेन पार्थं कच्चिद्रा
जा कुशली सपुत्रः सहामात्यः सानुजः कौरवाणां १ संजय उ० सहामात्यः कुशली
पांडुपुत्रो बुभूषते यच्च तेग्रे मनो भूत् निर्णिक्तधर्मार्थकरो मनस्वी बहुश्रुतो दृष्टिमा
न् शीलवांश्च ११ परं धर्मात्पांडवस्यानृशंस्यं धर्मः परो वित्तचयान्मतोस्य सुखप्रिये
धर्महीनेनपार्थे नुरुध्यते भारत तस्य बुद्धिः १२ परप्रयुक्तः पुरुषो विचेष्टते सूत्रप्रोता दा
रुमयीव योषा इमं दृष्ट्वा नियमं पांडवस्य मन्ये परं कर्म दैवं मनुष्यात् १३ इमं च दृष्ट्वा
तव कर्मदोषं पापोदर्कं घोरमवर्णरूपं यावन्नरः कामयतेतिवेलं भवेन्नरोयं लभते प्र

तं रुध्यते अनुरुध्यते अन्नादिजं देहपुष्टिसुखं पुत्रादि प्रियं च परोपकारार्थमेवानुरुध्यते न कामकारेण
त्यर्थः १२ नियमं निग्रहं परेण ईश्वरेण प्रयुक्तः पार्थ इति पाठे तस्य बुद्धिरिति सूत्रेणान्वयः इति शेषः मनुष्यात्
मनुष्याकारात् दैवं ऐश्वर्यं कर्म परं श्रेष्ठं मन्ये १३ अवर्णरूपं अवर्णनीयरूपं अवाच्यमित्यर्थः याव
न्नरः उत्कृष्टः शत्रुः कामयते निष्टत्वयं कंचित्कालमिनीच्छति तावदपरां न परः प्रशंसां लभते १४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४७ वाक्पारुष्यंदंडपारुष्यंचपांडवेषुतस्तैः कृतं ४८ द्वेष्टिमनसानिष्टंचिंतयतिविरुध्यतेकर्मणा ४९
अष्टस्तुचरमंतत्तुतैर्मंत्रेयस्मावमाननतः भविष्यतीतिजानामीतिभावः ५० ५१ ५२ ५३ जनसंम

सप्तदोषाःसदाराज्ञाहातव्याव्यसनोदयाः प्रायशोयैर्विनश्यंतिकृतमूलाअपीश्व
राः ४७ स्त्रियोक्षामृगयापानंवाक्पारुष्यंचपंचमं महच्चदंडपारुष्यमर्थदूषणमे
वच ४८ अष्टौपूर्वंनिमित्तानिनरस्यविनशिष्यतः ब्राह्मणान्प्रथमंद्वेष्टिब्राह्मणैः
श्चविरुध्यते ४९ ब्राह्मणस्वानिचादत्तेब्राह्मणांश्चजिघांसति रमतेनिंदयाचैषां
प्रशंसांनाभिनंदति ५० नैनान्स्मरतिकृत्येषुयाचितश्चाभ्यसूयति एतान्दोषा
न्नरःप्राज्ञोबुध्येद्बुध्याविसर्जयेत् ५१ अष्टाविमानिहर्षस्यनवनीतानिभारत व
र्तमानानिदृश्यंतेतान्येवसुसुखान्यपि ५२ समागमश्चसखिभिर्महांश्चैवधनाग
मः पुत्रेणचपरिष्वंगःसंनिपातश्चमैथुने ५३ समयेचप्रियालापःस्वयूथ्येषुस
मुन्नतिः अभिप्रेतस्यलाभश्चपूजाचजनसंसदि ५४ अष्टौगुणाःपुरुषंदीपयंति
प्रज्ञाचकौल्यंचदमःश्रुतंच पराक्रमश्चाबहुभाषिताचदानंचयथाशक्तिकृतज्ञ
ताच ५५॥

दिसभार्यांद्रौपद्याश्चानयनेपूजापितवनष्टा ५४ ५५ ॥

म॰उ॰ टी॰ ७२

नवेतिश्रोत्रादिपंचकंमनोबुध्यहंकाराःस्थूलशरीरंचेतिनवद्वाराणिविषयग्रहणमार्गायस्मिन्ततत्रिस्थूस्थू
णाःसंभारववियारकायस्मतेचश्रविद्याकामःकर्मच वेश्मगृहंदेहदृयात्मकंपंचसाक्षिवडदासीनाःशब्दा
दयोग्राह्यायस्मिन्पंचभूमिकमितिपाठेपंचभूमयःश्चारस्थानानीतितत्पवपाचभौतिकमित्यर्वाचीनः
पाठउपेत्यः तेत्रज्ञेनचिदात्मनाअधिष्ठितमिदंतेत्रज्ञतत्वंत्वततयोविद्वान्वेदसःपरःसर्वोत्कृष्टःकविःब्रह्म

नवद्वारमिदंवेश्मत्रिस्थूणंपंचसाक्षिकं क्षेत्रज्ञाधिष्ठितंविद्वान्योवेदसपरःकविः
४९ दशधर्मंनजानंतिधृतराष्ट्रनिबोधतान् मत्तःप्रमत्तउन्मत्तःश्रांतःक्रुद्धोबुभुक्षि
तः ५० त्वरमानश्चलुब्धश्चभीतःकामीचतेदश तस्मादेतेषुसर्वेषुनप्रसज्जेतपं
डितः ५८ अत्रैवोदाहरंतीममितिहासंपुरातनं पुत्रार्थमसुरेंद्रेणगीतंचैवसुधन्वना
५९ यःकाममन्यूप्रजहातिराजापात्रेप्रतिष्ठापयतेधनंच विशेषविच्छ्रुतवान्क्षिप्र
कारीतंसर्वलोकःकुरुतेप्रमाणं ६० जानातिविश्वासयितुंमनुष्यान्विज्ञातदोषेषु
दधातिदंडं जानातिमात्रांचतथाक्षमांचतंतादृशंश्रीर्जुषतेसमग्रा १ सुदुर्बलंनाव
जानातिकंचिद्युक्तोरिपुंसेवतेबुद्धिपूर्वं नविग्रहंरोचयतेबलस्थैःकालेचयोविक्र
मतेसधीरः २ प्राप्यापदंनव्यथतेकदाचिदुद्योगमन्विच्छतिचाप्रमत्तः दुःखंचकालेसह
तेमहात्माधुरंधरस्तस्यजिताःसपत्नाः ६३ ॥ विदितार्थः ५६ मत्तोमद्यादिनाप्रमत्तोविषयांतरा
सक्त्यानवहितः अप्रमत्तोयातद्दोषानेतेषांमध्येत्वंलुब्धोसीतिभावः ५७ ५८ ५९ काममन्यूकामक्रोधौयोवि
शेषवित्तारतम्यज्ञः ६० मात्रांअपराधानुसारेणदंडप्रमाणं ब्राह्मणादेःअपराधस्यक्षमांचजानाति ६१ सु

[illegible] ४ ॥ ५४ ॥

७२

संरंभेणाक्रोधेन त्रिवर्गं धर्मकामार्थान् आकारितः आहूतः मात्रार्थे अल्पार्थे १५ प्रातिभाव्यं प्रतिकूलोभा
वः चित्ताभिप्रायः तस्य भावः प्रातिभाव्यं विरोधं अत्याह अतिक्रम्य ब्रवीति ९ ८ ९ समयान्

अनर्थकं विप्रवासं गृहेभ्यः पापैः संधिं परदाराभिमर्षं दंभं स्तैन्यं पैशुनं मद्यपानं न
सेवते यः स सुखी सदैव १४ न संरंभेणारभते त्रिवर्गमाकारितः शंसति तत्त्वमेव
न मात्रार्थे रोचयते विवादं नापूजितः कुप्यति चाप्यमूढः ५ न योभ्यसूयत्यनुकंप
ते च न दुर्बलः प्रातिभाव्यं करोति नात्याह किंचित् क्षमते विवादं सर्वत्र तादृग्लभ
ते प्रशंसां ६ यो नोद्धतं कुरुते जातु वेषं न पौरुषेणापि विकत्थतेन्यान् न मूर्छितः
कटुकान्याह किंचित् प्रियं सदा तं कुरुते जनो हि ७ न वैरमुद्दीपयति प्रशांतं न द
र्पमारोहति नास्तमेति न दुर्गतोस्मीति करोत्यकार्यं तमार्यशीलं परमाहुरार्याः ८
न स्वे सुखे वै कुरुते प्रहर्षं नान्यस्य दुःखे भवति प्रहृष्टः दत्वा न पश्चात्कुरुतेनुता
पं स कथ्यते सत्पुरुषार्यशीलः ९ देशाचारान् समयान् जातिधर्मान् बुभूषते यः
स परावरज्ञः स यत्र तत्राभिगतः सदैव महाजनस्याधिपत्यं करोति
॥१०

भाषाभेदान् बुभूषते ऐश्वर्यं प्राप्तुमिच्छति परावरज्ञः उत्तमाधमविवेकवान् १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
७३

दंभंपरवंचनेच्छयाधर्मानुष्ठानंमोहंअनात्मन्यात्मबुद्धिंमत्सरंद्वेषंपापकृत्यंपापक्रियांअभिचारादिरूपं

दंभंमोहंमत्सरंपापकृत्यंराजद्विष्टंपैशुनंपूगवैरं मत्तोन्मत्तैर्दुर्जनैश्चापिवादंयःप्रज्ञा
वान्वर्जयेत्सप्रधानः ११ दानंहोमंदैवतंमंगलानिप्रायश्चित्तान्विविधांल्लोकवादा
न् एतानियःकुरुतेनैत्यकानितस्योत्थानंदेवताराधयंति १२ समैर्विवाहंकुरुतेन
हीनैःसख्यंव्यवहारंकथाश्च गुणैर्विशिष्टांश्चपुरोदधातिविपश्चितस्तस्यन
याःसुनीताः १३ मितंभुंक्तेसंविभज्याश्रितेभ्योमितंस्वपित्यमितंकर्मकृत्वाददात्य
मित्रेष्वपियाचितःसंस्तमात्मवंतंप्रजहत्यनर्थाः १४ चिकीर्षितंविप्रकृतंचयस्य
नान्येजनाःकर्मजानंतिकिंचित् मंत्रेगुप्तेसम्यगनुष्ठितेचनाल्पोप्यस्यच्यवतेकश्चि
दर्थः १५ यःसर्वभूतप्रशमेनिविष्टःसत्योमृदुर्मानकृच्छुद्धभावः अतीवसंज्ञा
यतेज्ञातिमध्येमहामणिर्जात्यइवप्रसन्नः ११६ ॥

पूगवैरंबहुभिःसहवैरं ॥ १४ जात्यःअभिजातःउत्तमेआकरेजातः १५ ११६ ॥ ७३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मना अपत्रपते परैरज्ञातेपि स्वव्यलीके स्वयमेव लज्जते १७ नकर्णीयः शंक्यः १८ इत्युद्योगे विदुरवाक्ये ३३ ॥ ८
ह्यमानस्य चिंताग्निनेति शेषः धर्मार्थयोः कुशलः मोक्षे स्वतन्त्रमनधिकारात् द्वयोरेव ग्रहः १ अजातशत्रोः

य आत्मनापत्रपते भृशं नरः स सर्वलोकस्य गुरुर्भवत्युत अनंततेजाः सुमनाः समा
हितः स तेजसा सूर्य इवावभासते १७ वने जाताः शापदग्धस्य राज्ञः पांडोः पुत्राः पं
च पंचेंद्रकल्पाः त्वयैव बाला वर्द्धिताः शिक्षिताश्च तवादेशं पालयंत्याम्बिकेय १८
प्रदायैषामुचितं तात राज्यं सपुत्रस्त्वं मोदमानः न देवानां नापि च मानुषा
णां भविष्यसि त्वं तर्कणीयो नरेंद्र १९ इत्युद्योगपर्वणि प्रजागरे ३३ ॥ धृतराष्ट्र उवाच जाग्र
तो दह्यमानस्य यत्कार्यमनुपश्यसि तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि १
त्वं मां यथावद्विदुर प्रशाधि प्रज्ञापूर्वं सर्वमजातशत्रोः यन्मन्यसे पथ्यमदीनसत्त्व
श्रेयस्करं ब्रूहि तद्वै कुरूणां २ पापाशंकी पापमेवानुपश्यन् पृच्छामि त्वां व्याकुलेना
त्मनाहं कवे तन्मे ब्रूहि सर्वं यथावन्मनीषितं सर्वमजातशत्रोः ३ विदुर उवाच शुभं
वा यदि वा पापं द्वेष्यं वा यदि वा प्रियं अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवं ४ तस्मा
द्वक्ष्यामि ते राजन्हितं यत्स्यात्कुरून्प्रति वचः श्रेयस्करं धर्म्यं ब्रुवतस्तन्निबोध मे ५

पथ्यं कुरूणां च श्रेयस्करं २ पापाशंकी भाविदुःखोद्विजन् पापं स्वकृतं पूर्वापराधं पश्यन् कवे हे सर्वज्ञ ३ उ ५ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०उ० मिथ्योपेतानि कपटयुक्तादीनि अनुपायैः असदुपायैः प्रयुक्तानि दुःखफलानीत्यर्थः ६ ७ अनुबंधानप्रयोजनानि
टी० संप्रधार्य निश्चित्य ८ विपाकः फलसिद्धावपि परिपाकः उत्थानं उद्यमं वा न वेति सिद्धिपक्षे कुर्वीत नान्यथेत्यर्थः
७४ ९ प्रमाणानि स्वयद्वारं स्थानादीनि सर्वदा विचार्याणीत्यर्थः स्थानं दुर्गादि दंडे सेनायां १० एतानि स्थानादिज्ञा

मिथ्योपेतानि कर्माणि सिध्येयुर्यानि भारत अनुपाययुक्तानि मा स्म तेषु मनः कृथाः
६ तथैव योगविहितं यत्तु कर्म न सिध्यति उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः ७
अनुबंधानपेक्षेत सानुबंधेषु कर्मसु संप्रधार्य च कुर्वीत न वेगेन समाचरेत् ८ अ
नुबंधं च संप्रेक्ष्य विपाकं चैव कर्मणां उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ९
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये कोशे जनपदे दंडे न स राज्येऽवतिष्ठते
१० यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति युक्तो धर्मार्थयोर्ज्ञाने स राज्यमधि
गच्छति ११ न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतं श्रियं ह्यविनयो हंति जरा रू
पमिवोत्तमं १२ भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो वडिशमायसं लोभाभिपाती ग्रसते
नानुबंधमवेक्षते १३ यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् हितं च परिणा
मे यत्तदाद्यं भूतिमिच्छता १४ ॥

पकानि प्रमाणानि लेख्यादीनि ११ असांप्रतं अयुक्तं यथा स्यात्त
था न वर्तितव्यं १२ भक्ष्येति मत्स्य इवेमिष्टमंते मरणदं कर्म न कर्तव्यमित्यर्थः अनुबंधं पश्चाद्बंधनं १३ आ
द्यं भक्षणीयं १४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अंगारकारकोहिमूलतउत्कृत्यकाष्ठंदहति अंगारइंगालः १८ १९ अनारभ्याःप्रबलैःसहवैरादयःअगताःक
दाचिदप्यप्राप्ताः २० २१ लघुमूलान्अल्पोपायान् २२ वत्सघाप्रीतिमयेन २३ सपुष्पितःवाचावत्सघानुग

वनस्पतेरपक्वानिफलानिप्रचिनोतियः सनाप्नोतिरसंतेभ्योवीजंचास्यविनश्यति १५
यस्तुपक्वमुपादत्तेकालेपरिणतंफलं फलाद्रसंसलभतेवीजाच्चैवफलंपुनः १६ य
थामधुसमादत्तेरक्षन्पुष्पाणिषट्पदः तद्वदर्थान्मनुष्येभ्यआदद्यादविहिंसया
१७ पुष्पंपुष्पंविचिन्वीतमूलछेदंनकारयेत् मालाकारइवारामेनयथांगारका
कः १८ किंनुमेस्यादिदंकृत्वाकिंनमेस्यादकुर्वतः इतिकर्माणिसंचिन्त्यकुर्याद्वापु
रुषोनवा १९ अनारभ्याभवंत्यर्थाःकेचिन्नित्यंतथागताः कृतःपुरुषकारोहिभ
वेद्येषुनिरर्थकः २० प्रसादोनिष्फलोयस्यक्रोधश्चापिनिरर्थकः नतंभर्तारमिच्छं
तिषंढंपतिमिवस्त्रियः २१ कांश्चिदर्थान्नरःप्राज्ञोलघुमूलान्महाफलान् क्षि
प्रमारभतेकर्तुंनविघ्नयतितादृशान् २२ ऋजुपश्यतियःसर्वंचक्षुषानुपिबन्निव
आसीनमपितूष्णीकमनुरज्यंतितंप्रजाः २३ सुपुष्पितःस्यादफलःफलितःस्याद्दु
रारुहः अपक्वःपक्वसंकाशोनतुशीर्येतकर्हिचित् २४ चक्षुषामनसावाचाकर्म

हृदर्शयन्नपिअफलःस्यात्अस्यधनेननवर्धयेत् सफलोपिसन्दुरारुहःअस्यवशोनभवेत् अपक्वइति
अंतर्बलहीनोपिबलवत्त्वंबहिःप्रकाशयेदेवेत्यर्थः २४ कर्मणादानेनलोकंअस्यवर्गं २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२६ अनयेस्थितः अनीतिमान् २७ २८ प्रतिसंवेष्टते बहुफलं न प्रयच्छतीत्यर्थः २९ ३० न जहाति श्रियं
३१ ३२ सुव्याहृतानि पाण्डित्यवचनानि सूक्तानि शोभनतया उक्तानि मातृपितृगुर्वादीनि सुकृतानि त

यस्मात्त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव सागरान्तामपि महीं लब्ध्वा स परिहीयते
२६ पितृपैतामहं राज्यं प्राप्तवान्स्वेन कर्मणा वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थि
तः २७ धर्ममाचरतो राज्ञः सद्भिश्चरितमादितः वसुधा वसुसंपूर्णा वर्धते भूतिव
र्धिनी २८ अथ संत्यजतो धर्ममधर्मं चानुतिष्ठतः प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं
यथा २९ य एव यत्नः क्रियते परराष्ट्रविमर्दने स एव यत्नः कर्तव्यः स्वराष्ट्रपरि
पालने ३० धर्मेण राज्यं विन्देत धर्मेण परिपालयेत् धर्ममूलां श्रियं प्राप्य न जहा
ति न हीयते ३१ अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः सर्वतः सारमादद्यादश्म
भ्य इव काञ्चनं ३२ सुव्याहृतानि सूक्तानि ततस्ततः संचिन्वन्धीर आसीत शि
लाहारी शिलं यथा ३३ ॥ सुकृतानि ८१

उपदिष्टकर्माणि शिलं कणिशाद्यर्जनं उञ्छः कणशआदानं कणिशाद्यर्जनं शिलमिति यादवः त्वम
पि अस्मदादिवाक्यात्सारं गृह्णीष्वेति भावः ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गंधेनेति पांडवबलं ज्ञात्वा तं चारान्नियुंक्ष्वेति भावः ३४ भूयांसमिति श्लोकत्रयतात्पर्यं पांडवा अतितत्ययान स्त्रीभ
विनश्यते न बलाधिष्ठात्री देवता इंद्रश्च त्वामनुग्रहीष्यतीति ३५ ३७ एतच्च मंत्रिभिः सहालोचनीयमस्यंच।

गंधेन गावः पश्यंति वेदैः पश्यंति ब्राह्मणाः चारैः पश्यंति राजानश्चक्षुर्भ्यामितरे जनाः ३४ भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा अथ या सुदुहा राजन्नैव तां वितुदंत्यपि ३५ यदतप्तं प्रणमति न तत्संतापयंत्यपि यच्च स्वयं नतं दारु न तत्संनामयंत्यपि ३६ एतयोपमया धीरः संनमेत बलीयसे इंद्राय स प्रणमते नमते यो बलीयसे ३७ पर्जन्यनाथाः पशवो राजानो मंत्रिबांधवाः पतयो बांधवाः स्त्रीणां ब्राह्मणा वेदबांधवाः ३८ सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ३९ मानेन रक्ष्यते धान्यमश्वान्रक्षत्यनुक्रमः अभीक्ष्णदर्शनं गाश्च स्त्रियो रक्ष्याः कुचेलतः ४० न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः अंत्येष्वपि हि जातानां वृत्तमेव विशिष्यते ४१ य ईर्ष्युः परवित्तेषु रूपे वीर्ये कुलान्वये सुखसौभाग्यसत्कारे तस्य व्याधिरनंतकः ४२ अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् अकाले मंत्रभेदाच्च येन माद्येन्न तत्पिबेत् ४३ ॥ संनतमित्याह पर्जन्येति त्रिभिः ३८ योगेनाभ्यासेन मृजया उद्वर्तनेन ३९ अनुक्रमः आयामशिक्षादिः ४० प्रमाणं धर्मस्य कारणं ४१ न कुलमिति द्वयोर्वृत्तं ना माश्रयं ईर्ष्यां त्यजेति भावः ४२ अकाले दृष्टसिद्धेः प्राक् भीतः स्यात् येन माद्येत् लोभादिना तन्न पिबेत् नाश्र

॥
उ०
प०

म॰ उ॰ टी॰ ७६

अभिजनः सहायः तेवतभयं दमस्थानास्तीत्यर्थः ४४ असंतइतिसार्धश्लोको वाक्यं सद्भिरर्थिताः असंतस्त
त्कार्यमल्पमप्यकृत्वा असंतमिति ख्यातमप्यात्मानं संतं मन्यंतइतितदर्थः किंचिदपितस्यकार्यं यावत्स्व
ष्टुनकृतंतावदेवइति मन्यंतइतियोजना ४५ गतिरितिपांडवाएवतव उपकरिष्यंतिनत्वंतानिति

विद्यामदो धनमदस्तृतीयोभिजनोमदः मदाएतेवलिप्तानामेतएवसतांदमाः ४४
असंतोभ्यर्थिताःसद्भिः क्वचित्कार्येकदाचन मन्यंतेसंतमात्मानमसंतमपिविश्रु
तं ४५ गतिरात्मवतांसंतः संतएवसतांगतिः असतांचगतिःसंतोनत्वसंतःस
तांगतिः ४६ जितासभावस्त्रवताजिष्टाप्रागोमताजिता अध्याजितायानवता
सर्वंशीलवताजितं ४७ शीलंप्रधानंपुरुषेतद्यस्येहप्रणश्यति नतस्यजीविते
नार्थोनधनेननबंधुभिः ४८ आढ्यानांमांसपरमंमध्यानांगोरसोत्तरं तैलोत्तरं
दरिद्राणांभोजनंभरतर्षभ ४९ संपन्नतरमेवान्नंदरिद्राभुंजतेसदा क्षुत्स्वादुतां
जनयतिसाचाढ्येषुसुदुर्लभा ५० ॥

भावः ४६ जितेतिशीलंसंरक्षंतयेतिद्वयोर्भावः ४७ ४८ आढ्यानामितित्रयस्यशीलवंतस्तेदा
रिद्र्यप्राप्तिरपिश्रेयइतिभावः ४९ संपन्नमिष्टं ५० ॥ ५० ॥ ७६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५१ श्रीलाभावेसत्त्वमवमानोमहानक्लेशास्तमाह अनृजीति ५२ ऐश्वर्यमदःपापिष्ठोनिंदिततमोयेभ्यःतेपान
मदादयोमदान् ५३ इंद्रियार्थेषुशब्दादिषु ग्रहैःसूर्यादिभिःआक्रमोत्रतापनं ५४ पंचवर्गःश्रोत्रादिगणः

शायेणश्रीमतांलोकेभोक्तुंशक्तिर्नविद्यते जीर्यंत्यपिहिकाष्ठानिदरिद्राणांमहीप
ते ५१ अनृतिभयमेतन्नानामथानामरणाद्भयं उत्तमानांतुमर्त्यानामवमानात्परं
भयं ५२ ऐश्वर्यमदपापिष्ठामदाःपानमदादयः ऐश्वर्यमदमत्तोहिनापतित्वा
विबुध्यते ५३ इंद्रियैरिंद्रियार्थेषुवर्तमानैरनिग्रहैः तैरयंताप्यतेलोकोनक्षत्रा
णिग्रहैरिव ५४ योजितःपंचवर्गेणसहजेनात्मकर्षिणा आपदस्तस्यवर्धंते
शुक्लपक्षइवोडुराट् ५५ अविजित्ययथात्मानममात्यान्विजिगीषते अमि
त्रान्वाजितामात्यःसोवशःपरिहीयते ५६ आत्मानमेवप्रथमंद्वेष्यरूपेणयो
जयेत् ततोमात्यानमित्रांश्चनमोघंविजिगीषते ५७ ॥

५५ त्वैमैश्वर्यमत्तोःजितेंद्रियश्चावश्यं आपदंप्राप्स्यसीतित्रयस्वभावः ५६ आत्मानंमनःश्रमा
त्मानुद्वेष्यरूपेणशत्रुवत्मनएवप्रथमंजेतव्यंततोमात्यादीन् विजिगीषतेमोघंनिष्फलं ५७

म॰उ॰ तेत्वजितमनस्कतयापुत्रादिवशेनलक्ष्मीयोगः इति त्रयाणांभावः एतदेवरथिरथादिरूपकल्पनया आह र
टी॰ थः इति ५९ व्यापादयितुंनाशयितुंअविधेयाः अवश्याः ६० अर्थतः अर्थहेतोः अनर्थतः अन्यायतः ६१ इंद्रिया
७७ णांचवशः इच्छातदनुसारी इंद्रियवशानुगः ६१ ६२ कृत्स्नस्योपदेशस्यफलमाह आत्मनेत्यर्धेन

वश्येंद्रियंजितात्मानंधृतदंडंविकारिषु परीक्ष्यकारिणंधीरमत्यंतंश्रीर्निषेवते
५८ रथः शरीरंपुरुषस्यराजन्नात्मानियंतेंद्रियाण्यस्यचाश्वाः तैरप्रमत्तः कुशलैः
सदश्वैर्दांतैः सुखंयातिरथीवधीरः ५९ एतान्यनिगृहीतानिव्यापादयितुमप्यलं
अविधेयाइवादांताहयाः पथिकुसारथिं ६० अनर्थमर्थतः पश्यन्नर्थंचैवाप्य
नर्थतः इंद्रियैरजितैर्बालः सुदुःखंमन्यतेसुखं ६१ धर्मार्थौयः परित्यज्यस्यादिं
द्रियवशानुगः श्रीप्राणधनदारेभ्यः क्षिप्रंसपरिहीयते ६२ अर्थानामीश्वरोयः
स्यादिंद्रियाणामनीश्वरः इंद्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यतेहिसः ६३ आत्मना
त्मानमन्विच्छेन्मनोबुद्धींद्रियैर्यतैः आत्माह्येवात्मनोबंधुरात्मैवरिपुरात्मनः ६४ ॥

आत्मनाबुध्याआत्मानंप्रत्यक्चैतन्यंरूपंअन्विच्छेत् तत्रोपायमाह मनसः संकल्पात्मकस्यबुद्धेश्चतन् ७७
मूलभूतायाः इंद्रियाणांचनिग्रहे इत्यर्थः ६४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अज्ञानतमसा हार्यांतरा पेते त्याहा त्मेति धीजय एव पुरुषार्थ इत्यर्थः स एव जीवस्य बंधुः रिपुश्च हा वपि मोह
जालपिहितो रूषो मीनो उर्नु महातौ तत्र हितीयो न्यस्य जातिस्वभावा च्छत्रुरपि जाल च्छेदार्थे मित्रत्वमाप
न्नो बंधुरपि भवति एवं धी स्थिरात्मनः संसारप्रदत्वाच्छत्रुरपि मोहच्छेदनार्थे तस्य मित्रमपि भवतीति
भावः ६४ तद्वा तेणासूत्मच्छिड्डेण यद्वा अनरान्वयेवायमर्थः कामक्रोधयो रावरके अज्ञानेनेतो ना॥

बंधुरात्मात्मन स्तस्य येनै वात्मा त्मना जितः स एव नियतो बन्धुः स एवा नियतो
रिपुः ६५ तद्वाते णवजालेन रुद्धा वपिहिता वुरू कामश्च राजन् क्रोधश्चातो
ज्ञानं विलुंपतः ६६ समवेत्येह धर्मार्थौ संभारान् यो धिगच्छति स वै संभृत
संभारः सततं सुखमेधते ६७ यः पंचाभ्यंतरान् शत्रून विजित्य मनोमयान् जि
गीषति रिपूनन्यान् रिपवो भिभवंति तं ६८ दृश्यंते हि महात्मानो वध्यमानाः स्व
कर्मभिः इंद्रियाणामनीशित्वाद्राजानो राज्यविभ्रमैः ६९ असंत्यागात्पापकृता
मपापांस्तुल्यो दंडः स्पृशते मिश्रभावात् शुष्केणार्द्रं दह्यते मिश्रभावात्तस्मात्पा

शयतः जालमिव महामीनावित्यर्थः ६६ समवेत्य अनुरूप्य संभारान् जयसाधनानि ६७ आभ्यंतरा
न् श्रोत्रादीन मनोमयान् मनसो विकारभूतान् तथा च श्रुतिः मनसा ह्येव पश्यति मनसा शृणोतीति
६८ राजानो रावणादयः राज्यविभ्रमैः ऐश्वर्यविलासैः स्वकर्मभिः सीताहरणादिभिः ६९ ७०॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंचइंद्रियाणिपंचप्रयोजनानिश्रोत्रश्रवणादीनियेषांतान् अप्रततः अपथेनगच्छतः त्वंतुअजितचित्तत्वा
त्तदुःसंगात्त्वापदुस्तोसीतिभावः ११ १२ अनायासः अचांचल्यंतितिक्षाद्वंद्वसहनशीलतावाक् गु
माश्रुसंबद्धप्रालापाद्वर्जिता अन्येषुनीचेषुत्वमेवैषार्जवादिकंगुप्तवाक्त्वंचनास्तीतितेत्याज्याः

अमेत्यागात्ततःप्राकृत्न् पंचपंचप्रयोजनान् योमोहान्ननिगृह्णातितमापद्ग्रसतेनरं
११ अनसूयार्जवंशौचंसंतोषःप्रियवादिता दमःसत्यमनायासोनभवंतिदुरात्म
नां १२ आत्मज्ञानमनायासस्तितिक्षाधर्मनित्यता वाक्चैवगुप्तादानंचनैतान्य
न्येषुभारत १३ आक्रोशपरिवादाभ्यांविहिंसंत्यबुधाबुधान् वक्तापापमुपा
दत्तेक्षममाणोविमुच्यते १४ हिंसाबलमसाधूनांराज्ञांदंडविधिर्बलं शुश्रूषातु
बलंस्त्रीणांक्षमागुणवतांबलं १५ वाक्संयमोहिनृपतेसुदुष्करतमोमतः अ
र्थवच्चविचित्रंचनशक्यंबहुभाषितुं १६ अभ्यावहतिकल्याणंविविधंवाक्
सुभाषिता सैवदुर्भाषितासजन्ननर्थायोपपद्यते १७ रोहतेसायकैर्विद्धंवनं
परशुनाहतं वाचादुरुक्तंबीभत्संनसंरोहतिवाक्क्षतं १८ ॥

१३ आक्रोशोनृतभाषणंपरिवादोनिंदातयोर्वक्तात्वमत्रःहिंसन्नाप्नोतिनासौजयभाक् १४ १५ वाक्
संयमोनियतंवचनं विचित्रंचमत्कारयुक्तं १६ १७ वीभत्संनिंदितमतोनसंरोहति १८ ॥ ७८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कर्णीकर्णाकृतिफलको बाणः नालीकः नलिकया प्रतिप्यो बाणः निर्हरंति निःसारयंति ७९ नाममं
स्तु किंतु मर्मस्वेव सभायां द्रौपदीं प्रति दुर्वचनं वदतां त्वत्पुत्राणामपराधः तं तु मया गणोस्तीतिभावः ८०
अर्वाचीनानि नीचकर्माणि ८१ ८२ शिष्यस्तेत्वदाज्ञाकारो शासिताशृण्विंमाः ८४ भागधेयात्तुराज्ञो

कर्णिनालीकनाराचान्निर्हरंति शरीरतः वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदि
शयो हिसः ७९ वाक्सायका वदनान्निष्पतंति यैराहतः शोचति रात्र्यहानि पर
स्य नामर्मसु ते पतंति तान्पंडितो नावसृजेत्परेभ्यः ८० यस्मै देवाः प्रयच्छंति पु
रुषाय पराभवं बुद्धिं तस्यापकर्षंति सोर्वाचीनानि पश्यति ८१ बुद्धौ कलुषभू
तायां विनाशे प्रत्युपस्थिते अनयो नयसंकाशो हृदयान्नापसर्पति ८२ सेयं बु
द्धिः परीता ते पुत्राणां भरतर्षभ पांडवानां विरोधेन न चैतानवबुध्यसे ८३ राजल
क्षणसंपन्नस्त्रैलोक्यस्यापि यो भवेत् शिष्यस्ते शासिता सोस्तु धृतराष्ट्र युधिष्ठि
रः ८४ अतीव सर्वान्पुत्रांस्ते भागधेयपुरस्कृतः तेजसा प्रज्ञया चैव युक्तो धर्मार्थ
तत्ववित् ८५ अनुक्रोशादानृशंस्याद्योसौ धर्मभृतां वरः गौरवात्तव राजेंद्र बहून्
क्लेशांस्तितिक्षति ८६ इत्युद्योगे पर्वणि प्रजागरे ३४ ॥ सो पुरस्कृतः मूर्धाभिषिक्तः पांडोः
पुत्रत्वात् अतथाभूतस्यांधस्य तव पुत्रास्तेन राज्यार्हा इत्यर्थः ८५ अनुक्रोशात्तदयालुत्वात् आनृशंस्या

॥ श्री उद्योगप ... ३४ ... ९८

ब्रूहि १ आर्जवंअवैषम्यं २ सुधन्वाब्राह्मणःपर्यंकंअधिरोहत्ये वंतं नीचोदैत्यःसन्किमर्थंनत्वम्व्या

धृतराष्ट्रउवाच ब्रूहिभूयोमहाबुद्धेधर्मार्थसहितंवचः शृण्वतोनास्तिमेतृप्तिर्वि
चित्राणीहभाषसे १ विदुरउवाच सर्वतीर्थेषुवास्नानंसर्वभूतेषुचार्जवं उभे
त्वेतेसमेस्यातामार्जवंवाविशिष्यते २ आर्जवंप्रतिपद्यस्वपुत्रेषुसततंविभो इह
कीर्तिंपरांप्राप्यप्रेत्यस्वर्गमवाप्स्यसि ३ यावत्कीर्तिर्मनुष्यस्यपुण्यालोकेषुगी
यते तावत्सपुरुषव्याघ्रस्वर्गलोकेमहीयते ४ अत्राप्युदाहरंतीममितिहासं
पुरातनं विरोचनस्यसंवादंकेशिन्यर्थेसुधन्वना ५ स्वयंवरेस्थिताकन्याके
शिनीनामनामतः रूपेणाप्रतिमाराजन्विशिष्टपतिकाम्यया ६ विरोचनोथदै
तेयस्तदातत्राजगामह प्राप्तुमिच्छंस्ततस्तत्रदैत्येंद्रंप्राहकेशिनी ७ केशिन्युवाच
किंब्राह्मणाःस्विच्छ्रेयांसोदितिजाःस्विद्विरोचन अथकेनस्मपर्यंकंसुधन्वानाधि
रोहति ८ ॥

नंकरोषीतिभावः ८ ॥ ८ ॥ ८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ इहस्थाने उपस्थाने मामुपस्थातं वां दैत्यब्राह्मणौ अहं पश्येयं १ विरोचनेन सौवर्णपीठमयासह
उपवेष्टुमिति प्रार्थितः सुधन्वा उवाच अन्वालभे स्पृशाम्येव हे प्राह्लाद एकत्वं त्वया सह साम्यं उपस

विरोचन उ॰ प्राजापत्यास्तु वै श्रेष्ठा वयं केशिनि सत्तमाः अस्माकं खल्विमे लोकाः
के देवाः के द्विजातयः ८ केशिन्यु॰ इहैवावां प्रतीक्षाव उपस्थाने विरोचन सुध
न्वा प्रातरागन्ता पश्येयं वां समागतौ ९ विरोचन उ॰ तथा भद्रे करिष्यामि यथा त्वं
भीरु भाषसे सुधन्वानं च मां चैव प्रातर्द्रष्टासि संगतौ १० विदुर उ॰ अतीतायां च
शर्वर्यामुदिते सूर्यमण्डले अथाजगाम तं देशं सुधन्वा राजसत्तम ११ विरोचनो
यत्र विभो केशिन्या सहितः स्थितः समागतं द्विजं दृष्ट्वा केशिनी भरतर्षभ प्रत
स्थायासनं तस्मै पाद्यमर्घ्यं ददौ पुनः १२ सुधन्वा उ॰ अन्वालभे हिरण्मयं प्राह्ला
दे ते वरासनं एकत्वमुपसंपन्नो न त्वासेहं त्वया सह १३ विरोचन उ॰ तवार्हं तेव
फलकं कूर्चं वाप्यथ वा बृसी सुधन्वन्त्वमर्होसि मया सह समासनं १४ ॥

न अस्तु भवेदहं गच्छेयमिति शेषः न तु त्वया सह एकासने आसे उपविशामि १४ फलकं काष्ठपी
ठं कूर्चं वसी वर्तिं तदा भैमयं पीठं वा तव अर्हं ते योग्यं भवति १५ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

उपासीनस्सवतेऽस्मधःस्थित्वेतिप्रोचः १६ प्रश्नं ग्रावयोः कः श्रेष्ठ इति मयं ये विदुस्तान्पृच्छाव ७ २१ मह

सुधन्वो० पिताहित्तेममासीनमुपासीतैवमामधः बालःसुखैषितोगेहे नत्वंकिंच
नबुध्यसे १६ विरोचन उ० हिरण्यंचगवाश्वंचयद्वित्तमसुरेषुनः सुधन्वन्विपणो
तेनप्रश्नंपृच्छावयेविदुः १७ सुधन्वो० हिरण्यंचगवाश्वंचतवैवास्तुविरोचन
प्राणयोस्तुपणंकृत्वाप्रश्नंपृच्छावयेविदुः १८ विरोच० आवांकुत्रगमिष्यावःप्रा
णयोर्विपणेकृते नतुदेवेष्वहंस्थातानमनुष्येषुकर्हिचित् १९ सुधन्वोवाच
पितरंतेगमिष्यावःप्राणयोर्विपणेकृते पुत्रस्यापिसहेतोर्हिप्रह्लादोनानृतंव
देत् २० विदुर उ० एवंकृतपणौक्रुद्धौतत्राभिजग्मतुस्तदा विरोचनसुधन्वानौ
प्रह्लादोयत्रतिष्ठति २१ प्रह्लाद उ० इमौतौसंप्रदृश्येतेयाभ्यांनचरितंसह आशी
विषाविवक्रुद्धावेकमार्गाविहागतौ २२ किंवैसहैवचरथोनपुराचरथःसह
विरोचनैतत्पृच्छामिकिंतेसख्यंसुधन्वना २३ ॥

नचरितंवैरात् २२ २३ ॥८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२२ पीवरी पुष्टीकृता मधुपर्कार्थं उपकल्पिता २५ पथि ब्रवीति प्रश्ननिर्णये नैव तस्मात्समितिभावः २६ २७ २८ उ
विवक्ता दुष्टविवेककर्ता अन्याय्यवक्तेत्यर्थः किं वसेत् किं दुःखं प्राप्नुयात् २९ अधिविन्ना कृतसपत्नीका।

विरोचन उ॰ न मे सुधन्वना साम्यं प्राणयोर्विपणावहे प्रह्लाद तत्त्वं पृच्छामि मा प्रश्न
मनृतं वदीः २४ प्रह्लाद उ॰ उदकं मधुपर्कं वाप्यानयन्तं सुधन्वने ब्रह्मन्नाभ्यर्चनी
योसि श्वेतां गोः पीवरीं कृता २५ सुधन्वोवाच उदकं मधुपर्कं च पथि एवार्पितं
मम प्रह्लाद त्वं तु मे तथ्यं प्रश्नं प्रब्रूहि पृच्छतः २६ किं ब्राह्मणाः स्विच्छ्रेयांस उताहो
स्विद्विरोचनः प्रह्लाद उ॰ पुत्र एको मम ब्रह्मंस्त्वं च साक्षादिहास्थितः २७ तयोर्वि
वदतोः प्रश्नं कथमस्मद्विधो वदेत् २८ सुधन्वोवाच गां प्रदद्यास्त्वौरसाय यद्वान्य
त्प्रियं धनं द्वयोर्विवदतोस्तथ्यं वाच्यं च मतिमंस्त्वया २९ प्रह्लाद उ॰ अथ यो
नैव प्रब्रूयात् सत्यं वा यदि वानृतं एतत्सुधन्वन्पृच्छामि दुर्विवक्ता स्म किं वसेत्
३० सुधन्वो॰ यां रात्रिमधिविन्ना स्त्री यां चैवाक्षपराजितः यां च भाराभितप्ताङ्गो दुर्वि
वक्ता स्म तां वसेत् ३१ नगरे प्रतिरुद्धः सन्बहिर्द्वारे बुभुक्षितः अमित्रान्भूयसः पश्ये
द्यः साक्ष्यमनृतं वदेत् ३२ ॥ स्त्रीणां रात्रिं वसेत् तद्वत् दुःखं प्राप्नुयात् ३१ नगरे इति प्राणमल
भमानः क्षुधार्तः शत्रुभिर्वेष्टितश्च यत् दुःखं लभते सः अनृतसाक्ष्यवक्तापि लभते इत्यर्थः ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंचपूर्वजानपश्यन्तेप्रजादिपश्चार्थमन्तेउक्तेमतिहंतिनाशयतिपरलोकात्च्यावयति एवमन्तरत्र १२
भूमितल्पाकेशिनीजदर्थेऽपन्तेभूम्यन्तं ११ अंगिराःसुधन्वनःपितात्वतत्वनः १४ १६ पादप्रक्षालनेह

पंचपश्यन्तेहंतिदश्याहंतिगावान्ते शान्तमश्वान्तेहंतिसहस्रंपुरुषान्ते १२ हंति
जातानजातांश्चहिरण्यार्थेनृतंवदन् सर्वंभूम्यनृतेहंतिमास्मभूम्यनृतंवदी ११
प्रह्लादउ॰ मन्नः श्रेयानंगिरावैसुधन्वात्वहिरोचन मातासुधन्वश्रेयसीमातुस्तस्मात्त्वं
तेनवैजितः विरोचनसुधन्वायंप्राणानामीश्वरस्तव सुधन्वनपुनर्दिच्छामित्वयाद
त्तंविरोचनं १५ सुधन्वोः यद्धर्मंप्रज्ञासीथास्त्वंनकामादनृतंवदीः पुनर्ददामिमेपु
त्रंतस्मात्प्रह्लाददुर्लभम् १६ तस्मात्प्रह्लादपुत्रस्तेमयादत्तोविरोचनः पादप्रक्षा
लनंकुर्यात्कुमार्याःसन्निधौमम १७ विदुरउ॰ तस्माद्राजेंद्रभूम्यर्थेनानृतंवक्तुम
र्हसि मागमःसपुत्रामात्योनाशंपुत्रार्थमब्रुवन् १८ ॥

रिडयापादधावनंकुमार्याःकेशि
न्याःविवाहेहिदंपत्योःपरस्परंहरिडयापादधावनंकुर्वंतीतिप्रसिद्धं अस्यैवभार्याकेशिनीभवति
त्यर्थः १७ प्रकृतेआख्यायिकोपयोगमाह तस्मादिति अब्रुवन्सत्यमितिशेषः १८ ॥

४२ सामुद्रिकं हस्तरेखादिपरीक्षकं वाणिजं चोरपूर्वं पूर्वं चोरः पश्चाद्वणिग्भूतः तं कूटतुलावंतं शलाकया
तं शलाकया पाशादिना वा शकुनादिकमुक्तायोन्यान् वंचयति तं अरिं विपरीतं सास्यभयात् मित्रपक्षीय
काणामविश्वासात् कुशीलवं कुत्सितशीलं वा तिग्रं न सरतीति तं नर्तकीदासं विटोन्मत्तादिकं वा तत्वत
कूटद्यूतकारी शाकुनिः कुशीलवपरमाणां ४२ सत्कर्मद्वारापितस्य साधुत्वेन मंतव्यमित्याह मानेति

नदेवाटंइमादायरत्वेतिपशुपालवत् यंतरतितमिच्छंति वुस्यासं विभजेतितं
४१ यथा यथा हि पुरुषः कल्याणं कुरुते मनः तथा तथास्य सर्वार्थाः सिध्यंते ना
त्र संशयः ४० नैनं छेदासि ज्ञजिनाज्ञारयंति मायाविनं मायया वर्तमानं नीडेषा
कृताकृवजातपत्ताङ्कुरोसेनुप्रजहत्यंतकाले ४० मद्यपानं कलहं पूगावैरं भार्या
पत्योरंतरं ज्ञातिभेदं राजद्विष्टं स्त्रीपुंसयोर्विवादं वर्ज्यान्याहुर्ये च पंथाः प्रदुष्टः
४२ सामुद्रिकं वाणिजं चोरपूर्वं शलाकधूर्तं च चिकित्सकं च अरिं च मित्रं च कु
शीलवं च नैतान् सास्पेत्वथिकुर्वीत सप्त ४३ मानाग्निहोत्रमुत मानमौनेमाने
नाधीतमुत मानयज्ञः एतानि चत्वार्यभयंकराणि भयं प्रयुक्तान्ययथाकृतानि
४४ अगारदाही गरदः कुंडाशी सोमविक्रयी पर्वकारश्च सूची च मित्रध्रुक् पारदा

मानः लोकेषु उत्कर्षः तदर्थान्यग्निहोत्रादीनि पदानीत्यर्थः मौनं ध्यानं ४४ कुंडाशी भगभक्तः जीवति
भर्तरि जाराज्जातः कुंडः तेन सोमविक्रयी प्रसिद्धः पर्वकारः शारकृतत्रायुधमात्रकर्तेत्यर्थः सूचीसूच
कोनतत्रादीनां परदोषाणां च ज्योतिषिकः पिशुनो वा ४५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म·३·
टी·
८२

काकः काकवत्तत्तो हर्त्तेनेनद्रः वितस्यापि द्रःखप्रदः नास्तिकः परलोकादिद्वेषी ४९ स्रुवभग्रहणः आ
जकीयवृत्तिवलेन सर्वेभ्यो वणिग्भ्यः स्रुवेणाधान्यादिकमादत्ते खोचीग्राहक इति भाषायां प्रसिद्ध्या
मघ्नो गोहितस्तत्सम्बन्धे ग्रामः प्रतीतो पानयनकालः पतितस्य विचीकोवा कीनाशः कर्षकः आत्मवान्स
मर्थोपि परेस्तःको हिंस्यात् एतेषां यं हव्यं तत्सत्रेषु हव्यं ५० तृणोल्कया तृणज्वालया जातरूपेण

भ्रूणहा गुरुतल्पी च यश्च स्यात्पानपो द्विजः अतितीदत्तश्च काकश्च नास्तिको वे
दनिंदकः ४९ स्रुवभग्रहणो ग्रामः कीनाशश्चात्मवानपि रद्धेस्तःकश्चयो।
हिंस्यात्सर्वेषाम्महद्भिः समाः ५० तृणोल्कया ज्ञायते जातरूपं व्रतेन भद्रो व्यव
हारेण साधुः शूरो भयेष्वर्थकृच्छ्रेषु धीरः कृच्छ्रास्वापत्सु सुहृदश्चारयश्च ५१
जरा रूपं हरति हि धैर्यमाशा मृत्युः प्राणान्धर्मचर्यामसूया क्रोधः श्रियं शीलम
नार्यसेवा ह्रियं कामः सर्वमेवाभिमानः ५२ श्रीर्मंगलात्प्रभवति प्रागल्भ्यात्सं।
प्रवर्द्धते दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति ५३ ॥

एवं हृत्स्वाज्ञायते अंधकारे सति भद्रो वृषः धर्म इति यावत् व्रतेन शीलेन सोस्ति नास्तीति ज्ञायते व्यवहारे
ण अहिंसादिप्रधानेन कृच्छ्रेषु दुर्भिक्षादिसंकटेषु तत्सत्रेषु धर्मः साधुत्वं च नास्तीत्यर्थः ५१ जरेति
तत्सत्रे अभिमानदोषोस्ति ५२ श्रीरिति दाक्ष्यं शीघ्रकारित्वं तत्र यदि संयमाभावान्नश्रीः स्यादित्यति ५३ ॥ ८२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अष्टाविति राजापुरस्कृतंपुरुषंप्रज्ञादयोहठादनुसरंतीति श्लोकद्वयार्थः ५१ एषगुणोराजसत्कारः वि
भातिभासयतिकर्णादिषुसत्कृतेषुआगंतुकाएतेगुणाःसंतिनस्वाभाविकाः अतोनोपयोज्यंतइ

अष्टौगुणाःपुरुषंदीपयंतिप्रज्ञाचकौल्यंचदमःश्रुतंच पराक्रमश्चाबहुभाषि
ताचदानंयथाशक्तिकृतज्ञताच ५१ एतान्गुणांस्तातमहानुभावानेकोगुणः
संश्रयतेप्रसह्य राजायदासत्कुरुतेमनुष्यंसर्वान्गुणानेषगुणोविभाति ५२ अष्टौ
नृपेमानिमनुष्यलोकेस्वर्गस्यलोकस्यनिदर्शनानि चत्वार्येषामन्ववेतानिसद्भि
श्चत्वारिचैषामनुयांतिसंतः ५३ यज्ञोदानमध्ययनंतपश्चचत्वार्येतान्यन्ववेतानि
सद्भिः दमःसत्यमार्जवमानृशंस्यंचत्वार्येतान्यनुयांतिसंतः ५४ इज्याध्यय
नदानानितपःसत्यंक्षमादमः अलोभइतिमार्गोयंधर्मस्याष्टविधःस्मृतः ५५
तत्रपूर्वश्चतुर्वर्गोदंभार्थमपिसेव्यते उत्तरश्चचतुर्वर्गोनामहात्मसुतिष्ठति
५६ नसासभायत्रनसंतिवृद्धानतेवृद्धायेनवदंतिधर्मं नासौधर्मोयत्रनस
त्यमस्तिनतत्सत्यंयच्छलेनाभ्युपेते ५७ ॥

तिभावः ५२ इमानिवक्ष्यमाणानि अन्ववेतानिनित्यसंबद्धानि अनुयांतिकालेनभजंति ५३ ५५
तत्रेति असत्यपिदमादौदंभार्थयज्ञादिसंभवात् ५६ ॥ ५७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
८३

रूपंविनयमुद्राःश्रुतंअध्ययनं विद्यादेवताद्युपासनंचित्रभाष्यंयुक्तियुक्तंवचनं दशामंसर्गजागुणाःइति
पाठेतद्युक्तैः सहसंगेकृतेएतेजायंतेतेनसत्संगःकर्तव्यइतिभावः ५८ पापकीर्तिःकलंकित्वेनअ

सत्यंरूपंश्रुतंविद्याकौल्यंशीलंबलंधनं शौर्यंचचित्रभाष्यंचदशेमेस्वर्गयोनयः
५८ पापंकुर्वन्पापकीर्तिःपापमेवाश्नुतेफलं पुण्यंकुर्वन्पुण्यकीर्तिःपुण्यमत्यंत
मश्नुते ५९ तस्मात्पापंनकुर्वीतपुरुषःसंशितव्रतः पापंप्रज्ञांनाशयतिक्रिय
माणंपुनःपुनः ६० नष्टप्रज्ञःपापमेवनित्यमारभतेनरः पुण्यंप्रज्ञांवर्धयतिक्रि
यमाणंपुनःपुनः ६१ वृद्धप्रज्ञःपुण्यमेवनित्यमारभतेनरः पुण्यंकुर्वन्पुण्य
कीर्तिःपुण्यंस्थानंस्मगच्छति ६२ तस्मात्पुण्यंनिषेवेतपुरुषःसुसमाहितः अ
सूयकोदंदशूकोनिष्ठुरोवैरकृच्छठः ६३ सकृच्छ्रंमहदाप्नोतिनचिरात्पापमाच
रन् अनसूयःकृतप्रज्ञःशोभनान्याचरन्सदा ६४ ॥

सिद्धः ५९ ६० ६१ दंदशूकोमर्मच्छेत्ता निष्ठुरःअप्रियवाक् नचिरातशीघ्रं ६३ ६४ ॥

८३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नकुलं समसंपदं स्वावेवाचीआगमयति आनयति ६५ ६६ वर्षाद्यस्तत्त्वसंयोगे द्वितीया ६७ गत।
पारंप्राप्तं तत्त्वपरिपाकस्तं स्वकर्मतत्त्वज्ञानं कुर्वंति अन्यायेनच सत्त्वलिप्संति तत्तु विपरीतमेवेत्याह

नकुलं महत्प्राप्नोति सर्वत्रैव विरोचते सत्तामेवागमयतियः प्राज्ञेभ्यः सपंडितः ६५
प्राज्ञोह्यवाप्यधर्मार्थौ शक्नोति सुखमेधितुं दिवसेनैव तत्कुर्याद्येन रात्रौ सुखं वसे
त् ६६ अष्टमासेन तत्कुर्याद्येन वर्षाः सुखं वसेत् पूर्वे वयसि तत्कुर्याद्येन वृद्धः सु
खं वसेत् ६७ यावज्जीवेन तत्कुर्याद्येन प्रेत्य सुखं वसेत् जीर्णमन्नं प्रशंसंति भार्यां
च गतयौवनां ६८ शूरं विजितसंग्रामं गतपारं तपस्विनं धनेनाधर्मलब्धेन य
च्छिद्रमपिधीयते असंवृतं तद्भवति ततोन्यदवदीर्यते ६९ गुरुरात्मवतां शास्ता
शास्ता राजा दुरात्मनां ७० अथ प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ऋषीणां
च नदीनां च कुलानां च महात्मनां ७१ प्रभवो नाधिगंतव्यः स्त्रीणां दुश्चरितस्य च
द्विजातिपूजाभिरतो दाता ज्ञातिषु चार्जवी ७२ क्षत्रियः शीलभाग्राजंश्चिरं पाल
यते महीं सुवर्णपुष्पां पृथिवीं चिन्वंति पुरुषास्त्रयः ७३ ॥

धनेति ६९ आत्मवतां जितचित्तानां ७० प्रच्छन्नपापो दुर्योधनः ७१ प्रभवः माहात्म्यं नाधिगंतव्यः
नाधिगंतुं शक्यो अनंतत्वात् ज्ञातिषु अनार्जवी दुर्योधनः ७२ ७३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. शूराः पांडवाः सर्वत्र स्ववर्णभाज इति भावः बुद्धिरेवैषां फलसिद्धौ साधनं तानि बुद्धिश्रेष्ठानि प्रशस्तत
टी. माविकर्माणि बाहुमध्यानि बाहुबलसाध्यानि मध्यानि ३४ जैह्मेति गोपनीयत्वं लक्ष्यते तेन का
८४ परसाध्यानि जघन्यानि नीचानि येषां सिद्धौ स्वशिरस्सि भारः संकटं पतति तानि नीचतराणि

अस्मत्कृत विप्रियश्चप्रियश्च जानानि सेवितं बुद्धिश्रेष्ठानि कर्माणि बाहुम
ध्यानि भारत ३४ तानि जंघाजघन्यानि भारप्रत्यवराणि च दुर्योध
नेष्य शकुनौ मूढे दुःशासने तथा ३५ कर्णे चैश्वर्यमाधाय कथं त्वं भूमि
मिच्छसि सर्वैर्गुणैरुपेतास्तु पांडवा भरतर्षभ ३६ पितृवत्त्वयि वर्तंते ते
षु वर्तस्व पुत्रवत् इत्युद्योगपर्वणि प्रजागरे विदुरवाक्ये ३५ विदुर उ.
अत्रैवोदाहरंतीममितिहासं पुरातनं आत्रेयस्य च संवादं साध्यानां चे
ति नः श्रुतं १ चरंतं हंसरूपेण महर्षिं संशितव्रतं साध्या देवा महा
प्राज्ञं पर्यपृच्छंत वै पुरा २ ॥

३५ तत्रांत्यद्वयवंतो दुर्योधनादय इति मत्वा प्राह दुर्योधन इति ३६ इति विदुरवाक्ये ३५ ॥
अत्रैवेति हंसरूपेण परिव्राजकरूपेण २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative.

अनुमातुं लिंगेनज्ञातुं काव्यांविद्वज्जनाभिध्यायिनीं ३ एतदमराः संश्रुतंमेगुरुभ्यइतिशेषः तदेवाह धृतिरिति
धृतिः दुःखैरभिभूतत्वेपिअवैकल्यं दमः सर्वेंद्रियजयः सत्यधर्मोब्रह्मप्रापकोधर्मः धारणाध्यानसमाधयः
तेषामनुवृत्तिरविच्छेदः तेनग्रंथिंचिज्जडयोरात्मांतःकरणयोरेकलोलीभावंविनीयतयोः पृथक्क
रणेनशिथिलीकृत्यप्रियाप्रियेसुखदुःखेआत्मसमंआत्मसाम्यंनयीतप्रापयेत्प्रियाप्रियधर्मिणौ।

साध्याऊचुः साध्यादेवावयमेतेमहर्षेदृष्ट्वाभवंतंनशक्नुमोनुमातुं श्रुतेनधीरो
बुद्धिमांस्त्वंमतोनःकाव्यांवाचंवक्तुमर्हस्युदारां ३ हंसउवाच एतत्कार्यममराः
संश्रुतंमेधृतिःशमःसत्यधर्मानुवृत्तिः ग्रंथिंविनीयहृदयस्यसर्वंप्रियाप्रिये।
चात्मसमंनयीत ४ आक्रुश्यमानोनाक्रोशेन्मन्युरेवतितिक्षतः आक्रोष्टारंनि
र्दहतिसुकृतंचास्यविंदति ५ नाक्रोशीस्यान्नावमानीपरस्यमित्रद्रोहीनोतनी
चोपसेवी नचाभिमानीनचहीनवृत्तोरूक्षांवाचंरुषतींवर्जयीत ६ ॥

तःकरणस्यात्मन्यध्यस्तस्यस्वाधिष्ठानेप्रलयेसतितयोरपितत्रैवलयइत्यर्थः यथारज्ज्वांरज्जुसर्पे
लीनेसतिभीषणत्वादयोपितत्रैवलीयंते ४ नाक्रोशेत् नशापयेत् एतत्सितितिक्षतोमन्युःक्रो
धएवआक्रोष्टारंदहति ५ रुषतींरोषवतींपाठांतरेउषतींदाहिकांवा ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० ३० टी० ८५

७ निर्ऋतिमलक्ष्मीं मृत्युं वा ८ वाणैः वाग्बाणैः दधाति पुष्णाति ९ त्वमुग्राः नृतवाचस्त्वमपि तत्सं
गात्त्वष्टोभविष्यसीत्याह यदीति रंगस्य नीलादेर्वर्णस्य नीलं नाम १० अतिवादोऽपि न वदेत्तथा

मर्माणि पस्पृशी निहृदयं तथा सूनृता वाचो निर्दहंतीह पुंसः तस्माद्वाचं रुषतीं नृत
रूपां धर्मारामो नित्यशो वर्जयीत ७ अरुंतुदं परुषं रूक्षवाचं वाक्कंटकैर्वितुदं
तं मनुष्यान् विद्यादलक्ष्मीकतमं जनानां मुखे निबद्धां निर्ऋतिं वै वहंतं ८ पर
श्चेदेनमभिविध्येत बाणैर्भृशं सुतीक्ष्णैरनलार्कदीप्तैः स विध्यमानोऽप्यतिदह्य
मानो विद्यात्कविः सुकृतं मे दधाति ९ यदि संतं सेवति यद्यसंतं तपस्विनं यदि
वा स्तेनमेव वासो यथा रंगवशं प्रयाति तथा स तेषां वशमभ्युपैति १० अतिवा
दं न प्रवदेन्न वादयेद्यो नाहतः प्रतिहन्यान्न घातयेत् हंतुं च यो नेच्छति पापकं
वै तस्मै देवाः स्पृहयंत्यागताय ११ ॥

दयेत् अनाहतो नैव प्रतिहन्यात् आसहतोऽपि पापकं हंतारं यदि हंतुं नेच्छेत् स देवानामपि स्पृ ८५
हणीयो भवतीत्यर्थः ११ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अव्याहृतंमौनंततोपिश्रेयःसत्यवचनंसत्यमपिप्रियंचेत्ततोपिश्रेयःतदपिधर्मादनपेतंचेत्तत्श्रेष्ठतम
मित्यर्थः १२ तस्मात्तत्स्थगएवतत्त्वयापिकर्तव्यमुक्तंस्वाशयेनाहयादृशैरिति १३ यतोयततइति यथास्वप्ने
वास्याहितविषयान्निवृत्तस्तज्जेनदुःखेनमुच्यतेएवंजाग्रतिस्वाप्नविषयजेनसुखमोसमाधौचसर्वतोनि

अव्याहृतंव्याहृताच्छ्रेयआहुःसत्यंवदेद्व्याहृतंतद्द्वितीयं प्रियंवदेद्व्याहृतंतत्तृती
यंधर्म्यंवदेद्व्याहृतंतच्चतुर्थं १२ यादृशैःसंनिविशतेयादृशांश्चोपसेवते या
दृगिच्छेच्चभवितुंतादृग्भवतिपूरुषः १३ यतोयतोनिवर्ततेततस्ततोविमुच्य
ते निवर्तनाद्धिसर्वतोनवेत्तिदुःखमण्वपि १४ नजीयतेनोतजिगीषतेन्यान्न
वैरकृच्चाप्रतिघातकश्च निंदाप्रशंसासुसमस्वभावोनशोचतेहृष्यतिनैवचा
यं १५ भावमिच्छतिसर्वस्यनाभावेकुरुतेमनः सत्यवादीमृदुर्दांतोयःसउत्त
मपूरुषः १६ नानर्थकंसांत्वयतिप्रतिज्ञायददातिच राद्धापराधेजानातियः
समध्यमपूरुषः १७ ॥

वृत्तोदुःखलेशमपिनभजते॰तोनिवृत्तिरेवत्वयाकार्येतिभावः १४ अस्यामवस्थायांपुरुषस्य
नकिंचिद्दुःखादिकमस्तीत्याह नजीयतेनेति नानजिगीषतेइतिपाठेनापुरुषः १५ भावंक
ल्याणंअभावेअकल्याणे १६ अनर्थकंमिथ्यानसांत्वयति १७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ०
टी०
९६

उपहतो गर्दयाद्योषयाज्ञायां गंधर्वैस्ताडितः अभिशस्तः अभितः शास्त्रे विदीर्णः मन्युवशात् क्रोधवशात्।
न्नावर्तते न नम्रो भवति यतः कृतज्ञः पांडवैस्तदा मोचितो पि तदुपकारं हंत्येव एताः कलाः चितस्य
तयः अधमस्यैव १८ अधमलक्षणमाह नेति परेभ्यः गुरुभ्यः आत्मन्येव शंकितः विश्वासहीनः १९

दुःशासनस्तूपहतोभिशस्तो नावर्त्तते मन्युवशात् कृतज्ञः न कस्यचिन्मित्रम
थो दुरात्मा कला श्चैता अधमस्येह पूरुषः १८ न श्रद्दधाति कल्याणं परेभ्योप्यात्म
शंकितः निराकरोति मित्राणि यो वै सोधमपूरुषः १९ उत्तमानेव सेवेत प्राप्ते
काले तु मध्यमान् अधमांस्तु न सेवेत य इच्छेद्भूतिमात्मनः २० प्राप्नोति वै वि
त्तमसद्बलेन नित्योत्थानात्प्रज्ञया पौरुषेण न त्वेव सम्यग्लभते प्रशंसां न वृत्तमा
प्नोति महाकुलानां २१ धृतराष्ट्र उ० महाकुलेभ्यः स्पृहयंति देवा अथ मोर्थनित्याश्च
वहुश्रुताश्च पृच्छामि त्वां विदुर प्रश्नमेतं भवंति वै कानि महाकुलानि २२ वि
दुर उ० तपो दमो ब्रह्मवित्त्वं वितानाः पुण्या विवाहाः सततान्नदानं येष्वेवैते सप्तगु
णा वसन्ति सम्यग्वृत्तास्तानि महाकुलानि २३ ॥

२० २१ कुलेभ्य इति स्पृहेरीप्सित इति
कर्मणि चतुर्थी २२ तपः कृच्छ्रचांद्रायणादि दमः इंद्रियजयः ब्रह्मवित्त्वं ब्राह्मणस्य धनं वेदाध्ययनं ९६
वितानाः यज्ञकर्माणि सम्यग्वृत्ताः स्वयेतानि क्लीवत्वं विधेयापेक्षया महाकुलानि विद्धि २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नव्यथतेनचलति नयोनिःमित्रादयोपियेषांदोषेणनभ्रंशंतेकिंतगुणैरेवतद्धंति २४ २५ परिभवा
त्ताडनात्परिवादात्निंदातः २६ गोभिर्वाग्भिःविघयेत्यर्थः पुरुषतः मनुष्यैः अर्थतः धनेश्वसमृ।

येषांनवृत्तंव्यथतेनयोनिर्हंत्रप्रमादेनचरंतिधर्मं येकीर्तिमिच्छंतिकुलेविशि
ष्टांत्यक्तान्रतान्यानिमहाकुलानि २४ अनिज्ययाकुविवाहैर्वेदस्योत्सादनेनच
कुलान्यकुलतांयांतिब्राह्मणातिक्रमेणच २५ ब्राह्मणानांपरिभवात्परिवादा
च्चभारत कुलान्यकुलतांयांतिन्यासापहरणेनच २६ कुलानिसमुपेतानिगो
भिःपुरुषतोर्थतः कुलसंख्यांचगच्छंतियानिहीनानिवृत्ततः २७ वृत्ततस्त्व
विहीनानिकुलान्यल्पधनान्यपि कुलसंख्यांचगच्छंतिकर्षंतिचमहद्यशः २८
वृत्तंयत्नेनसंरक्षेद्वित्तमेतिचयातिच अक्षीणोवृत्ततःक्षीणोवृत्ततस्तुहतोहतः
२९ गोभिःपशुभिरश्वैश्चकृष्याचसुसमृद्धया कुलानिनप्ररोहंतियानिहीना
निवृत्ततः ३० मानःकुलेवैरकृत्कश्चिदस्तुराजामात्योमापरस्वापहारीमित्र
द्रोहीनैकृतिकोनृतीवापूर्वाशीवापितृदेवातिथिभ्यः ३१ ॥

पेतानिकुलसंख्यांकुलेषुसंगणनां २७ वृत्ततःधर्मेणकर्षंतिआहरंति २८ २९ गोभिर्विद्याभिः ३
नैकृतिकःकपटी वैरकृदादयःकुलप्राप्त्यर्थः ३१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म. उ.
टी.
८०

प्रसंगादुत्तमलक्षणमाह यस्येति न इति अस्मच्छत्रुरस्यादेशाच्चतुष्टयं ततः स इति पाठे तत्त्रयमेव निर्वपेत्
कुर्यात् पितॄनिति पाठे नो निषेधार्थः ३२ नोच्छिद्यंते किंत्वतिथीनुपगच्छंत्येव ३३ सत्कृतिः सत्कारं
कर्तुं प्रवृत्तानि तृणादीनि ३४ युक्ताः स्यंदनवद्विकलाः ३५ प्रकृतमाह न तदिति तत्त्वतः शंकाकुलस्य

यस्य नो ब्राह्मणानुद्धन्या यस्य नो ब्राह्मणानुद्विषेत् ततः सममिति गच्छेत् यस्य नो निर्वपे
त्कृषिं ३२ तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता सतामेतानि गेहेषु नोच्छिद्यंते क
दाचन ३३ श्रद्धया परया राजन्नुपनीतानि सत्कृतिं प्रवृत्तानि महाप्राज्ञ धर्मिणां पुण्यक
र्मिणां ३४ सूक्ष्मोपि भारं नृपते स्यंदनो वै शक्तो वोढुं न तथान्ये महीजाः एवं युक्ता भारस
हा भवंति महाकुलीना न तथान्ये मनुष्याः ३५ न तन्मित्रं यस्य कोपाद्बिभेति यद्वा मित्रं
शंकितेनोपचर्यं यस्मिन्मित्रे पितरीवाश्वसीत तद्वै मित्रं संगतानीतराणि ३६ यः कश्चि
दप्यसंबद्धो मित्रभावेन वर्तते स एव बंधुस्तन्मित्रं सा गतिस्तत्परायणं ३७ चलचि
त्तस्य वै पुंसो वृद्धाननुपसेवतः पारिप्लवमतेर्नित्यमध्रुवो मित्रसंग्रहः ३८ ॥

मय्यपि मित्रत्वबुद्धिर्नास्तीति भावः संगतानि संबंधमात्राणि ३६ मूर्खस्य तद्दुर्योधनादेः कुलशीला
दिभिरसंबद्धोपि कर्णादिर्मित्रभावेनास्तीत्याशयेनाह य इति बंधुः संबंधी मित्रं उपकारकृत् ३७ ८०
पारिप्लवमतेः स्थूलबुद्धेः ३८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समभिवर्त्ततेसम्यगाभिमुख्येनवर्त्ततेनतुस्पृशंति समंनिवर्त्ततइत्यपिपठंति ३९ अभ्रंमेघः ४० मित्राणांहितायेतिशेषः ४१ अनर्थयन्प्रार्थनामकुर्वन्लब्धस्तुमित्राणांसारफल्गुत्वेजानातीत्यतः सकार्यार्थीवणिक्तु

बलंचित्तमनात्मानमिंद्रियाणांवशानुगं अर्थाःसमभिवर्त्ततेहंसाःशुष्कंसरोयथा ३९ अकस्मादेवकुप्यंतिप्रसीदंत्यनिमित्ततः शीलमेतदसाधूनामभ्रंपारिप्लवंयथा ४० सत्कृताश्चकृतार्थाश्चमित्राणांनभवंतिये तान्मृतानपिक्रव्यादाःकृतघ्नान्नोपभुंजते ४१ अर्थयेदेवमित्राणिसतिवाऽसतिवाधने नानर्थयन्प्रजानातिमित्राणांसारफल्गुतां ४२ संतापाद्भ्रश्यतेरूपंसंतापाद्भ्रश्यतेबलं संतापाद्भ्रश्यतेज्ञानंसंतापाद्व्याधिमर्हति ४३ अनवाप्यंचशोकेनशरीरंचोपतप्यते अमित्राश्चप्रहृष्यंतिमास्मशोकेमनःकृथाः ४४ पुनर्नरोम्रियतेजायतेचपुनर्नरोहीयतेवर्धतेच पुनर्नरोयाचतियाच्यतेचपुनर्नरःशोचतिशोच्यतेच ४५ सुखंचदुःखंचभवाभवौचलाभालाभौमरणंजीवितंच पर्यायशःसर्वमेतेस्पृशंतितस्माद्धीरोनचहृष्येन्नशोचेत् ४६ ॥

त्योनतुमित्रं ४२ संतापात्इष्टवियोगजात्शोकात् ४३ अनवाप्यंनप्राप्यंशोकेनशोकमात्रेणइष्टमितिशेषः ४४ दुःखादेरागमापायित्वादपिनशोकादिकंकर्त्तव्यमित्याह

पुनरिति ५५ सर्वपुरुषमात्रं ५६ ॥

म॰उ॰ षट् मनसा सह श्रोत्रादीनि पंच स्रवते स्वार्थात् भ्रश्यति ततो विषयसेवनात् ४७ तनुः शरीरमभिव्यक्ति

टी॰ स्थानं काष्ठं तत्र रुद्धो नुभिव्यक्तः क्षितौ अग्निस्तथायं राजा धर्मेण रुद्धः तत्र नास्त्र लेण धर्मेण वा रुद्धः

९८ ४८ उद्विग्नं भीतं चलितं च अनुद्विग्नं अभयमचलं पदं पदनीयं प्राप्य ब्रह्म ४९ तस्मात् सिसाधयिषा नान्यत्रेवा

हृ नान्यत्रेति विद्याध्ययनजा तपःस्वधर्माचरणात् तल्लोभी तत्पदं प्राप्तुमनर्ह इति भावः प्रांतिकला

चलानि ह्रीमानि षडिंद्रियाणि तेषां यद्यद्रुद्धं तेयत्र यत्र ततस्ततः स्रवते बुद्धिः स्रवत्छि

द्रे यदकुंभादिव नित्यमेभः ४७ ध्यानात्रुरुः तनुरुद्धः क्षितौ राजा मिथ्योपचरितो

मया मंदानां मम पुत्राणां युद्धेनांतं करिष्यति ४८ नित्योद्विग्नमिदं सर्वं नित्योद्वि

ग्नमिदं मनः यत्तत्पदमनुद्विग्नं तन्मे वद महामते ४९ विदुरउ॰ नान्यत्र विद्यात

पसो नान्यत्रेंद्रियनिग्रहात् नान्यत्र लोभसंत्यागाच्छांतिं पश्यामि तेनघ ५० बुद्ध्या

भयं प्रणुदति तपसा विंदते महत् गुरुशुश्रूषया ज्ञानं शांतिं योगेन विंदति ५१ अ

नाश्रिता दानपुण्यं वेदपुण्यमनाश्रिताः रागद्वेषविनिर्मुक्ता विचरंतीह मोक्षिणः

५२ ॥

णे ५० बुद्ध्या आत्मज्ञानेन भयं संसारं विंदते महत् सत्कुलप्रसूत्यादिकं लभते ततो गुरुशुश्रूषया ॰

ज्ञानं ग्रंथजं योगेन सर्ववित् वृत्तिनिरोधेन शांति ५१ शांतिप्राप्तौ सर्वत्र च्छमित्याह नाश्रिता इ

ति दानजं पुण्यं तत्फलं स्वर्गादीत्यर्थः अनाश्रिताः नाश्रयंते तच्छत्वात् तस्य ५२ ॥ ९८

तस्यांते स्वधीतादीनां कर्मणामंते तेनाशेषसुखं परमानंदं विंदते जगत्कारणदर्शनादेव सकलकर्मनाशे सति अका
रणसुखं प्राप्नोतीत्यर्थः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे परो हिरण्यगर्भादिः वरो नीचो यस्मात्कार
णात्तस्मिन् दृष्टे च सति ५२ तदन्यत् दुःखरूपमेव स्वाह स्वास्तीर्णानीति भिन्नाः भेददृष्टिमंतः द्वितीयाद्वै
भयं भवतीति श्रुतेरद्वैततत्त्वात्प्रच्युता इत्यर्थः यद्वा भिन्नाः ज्ञातिभेदवंतः ५४ प्रशमम् अक्रोधं ५५ योगः अ

स्वधीतस्य सुयुद्धस्य सुकृतस्य च कर्मणः तपसश्च सुतप्तस्य तस्यांते सुखमेधते ५२
स्वास्तीर्णानि शयनानि प्रपन्ना न वै भिन्ना जातु निद्रां लभंते न स्त्रीषु राजन् रतिमाप्नु
वंति न मागधैः स्तूयमाना न सूतैः ५४ न वै भिन्ना जातु चरंति धर्मं न वै सुखं प्राप्नुवंतीह
भिन्नाः न वै भिन्ना गौरवं प्राप्नुवंति न वै भिन्नाः प्रशमं रोचयंति ५५ न वै तेषां स्वदते प
थ्यमुक्तं योगक्षेमं कल्पते नैव तेषां भिन्नानां वै मनुजेंद्र परायणं न विद्यते किंचिदन्य
द्विनाशात् ५६ संपन्नं गोषु संभाव्यं संभाव्यं ब्राह्मणे तपः संभाव्यं चापलं स्त्रीषु संभा
व्यं ज्ञातितो भयं ५७ तंतवोप्यायिता नित्यं तनवो बहुलाः समाः बहून् बहुत्वादायासा
न् सहंतीत्युपमा सतां ५८ ॥ लब्धलाभः क्षेमं लब्धपरिपालनं तद्भयं न कल्पते न युज्यते ५६

तद्वाह संपन्नमिति संपन्नं क्षीरादिसंपत्तिः ५७ तंतवः कलत्रं तव पांडवाः आप्यायिताः त्वयैव संवर्द्धिताः
सूत्रवदुपमार्थं तनवः सूक्ष्मा बाला इत्यर्थः बहुलाः समा बहून् संवत्सरान् बहुत्वात्तंतूनामन्येषां च ऋ
षीणां बहुत्वात् वने आयासान् सहंतीत्यतः सतां उपमा भवंति पांडवा इव संत इति लोके वदंति अतः स
न्नमाः पांडवास्त्वया न वर्जनीया इति भावः ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अन्येत्वज्ञातयोनपांडवृत्तल्याद्यत्स्माहधूमायंतीति अपेतानिपृथग्भूतानि ५९ ब्राह्मणादिसाहचर्यात्
ज्ञातयोप्यत्रयुद्धार्थिनएवग्राह्याः ताहृशांश्चपांडवान् जित्वासंततः पतिष्यंत्येवेत्यर्थः ६० एककः

धूमायंतेव्यपेतानिज्वलंतिसहितानिच धृतराष्ट्रोल्मुकानीवज्ञातयोभरतर्षभ ५९
ब्राह्मणेषुचयेशूराःस्त्रीषुज्ञातिषुगोषुच वृंतादिवफलंपक्वंधृतराष्ट्रपतंतितेति ६०
महानप्येककोवृक्षोबलवान्सुप्रतिष्ठितः प्रसह्यएववातेनसस्कंधोमर्दितुं
क्षणात् ६१ अथयेसहितावृक्षाःसंघशःसुप्रतिष्ठिताः तेहिशीघ्रतमान्वातान्सहं
तेन्योन्यसंश्रयात् ६२ एवंमनुष्यमप्येकंगुणैरपिसमन्वितं शक्यंद्विषंतोमन्यं
तेवायुर्द्रुममिवैककं ६३ अन्योन्यसमुपष्टंभादन्योन्यापाश्रयेणच ज्ञातयःसंप्रव
र्धंतेसरसीवोत्पलान्युत ६४ अवध्याब्राह्मणागावोज्ञातयःशिशवःस्त्रियः येषां
चान्नानिभुंजीतयेचस्युःशरणागताः ६५ नमनुष्येगुणःकश्चिद्राजन्सधनता
मृते अनातुरत्वाद्भद्रंतेमृतकल्पाहिरोगिणः ६६ ॥

एकाकीप्रसह्यःप्राकृतः ६१ ६५ सधनतांऋतेविना अनातुरत्वात् ऋतेचभद्रंतेस्तु इत्याशीर्वचनमात्रं सूचनार्थं ६६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धनवाननातरश्चातंगुणीसन्श्रमंशाम्रहीत्याह अव्याधिजमिति कटुकंअरोचकं परुषंरूतंतीक्ष्णंछेद
कं उष्णंदुःसहस्पर्शंयेयंरीलनीयंमन्युंदैन्यंमन्युदैन्येकतोकुधीतिकोपशात् प्रशाम्यशांतिंत्वमाप्नुहि
६७ संतापायाधिमृच्छतीमृजंक्रमतलौहावपिनिंदतिफलानिपुत्रपश्वादीनि तत्त्वमिष्टानिष्टविवेकं

अव्याधिजंकटुकंशीर्षरोगिपापानुबंधंपरुषंतीक्ष्णमुष्णं सतांपेयंयंनपिबंत्यसं।
तोमन्युंमहाराजपिबप्रशाम्य ६७ रोगार्दितानफलान्याद्रियंतेनवैलभंतेविष
येतत्त्वं दुःखोपेतारोगिणोनित्यमेवनबुध्यंतेधनभोगान्नसौख्यं ६८ पुराह्युक्तं
नाकरोस्त्वंवचोमेद्यूतेजितांद्रौपदींप्रेक्ष्यराजन् दुर्योधनंवारयेत्यक्षवत्यांकित
वत्वंपंडितावर्जयंति ६९ नतद्बलंयन्मृदुनाविरुध्यतेसूक्ष्मोधर्मस्तरसासेवित।
व्यः प्रध्वंसिनीक्रूरसमाहिताश्रीर्मृदुप्रौढागच्छतिपुत्रपौत्रान् ७० धार्तराष्ट्राः।
पांडवान्पालयंतुपांडोःसुतास्तवपुत्रांश्चपांतु एकारिमित्राःकुरवोह्येककार्याजी
वंतुराजन्सुखिनःसमृद्धाः ७१ ॥

पित्तोपहतरसनत्वात् एवंसर्वत्रभोगपःस्याद्विसंगःधनादिजंसुखंलब्धमपिनबुध्यंतेअतःसं
तापंजागरादिद्वारारोगोत्पादकंत्यजेत्यर्थः ६८ कितवत्वंद्यूतप्रियत्वं ६९ मृदुनासहिंसना धर्मः
दायविभागाख्यःक्रूरेणसुत्रेसमाहिता मृदुनायुधिष्ठिरेणप्रौढासती ७१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ मेढीभूतः स्वयं निर्व्यापारोऽपि पवितः संचारमाणानां वलीवर्दानामिव पुत्राणां पथेऽष्टप्रचारनिरोधकः ६२
टी॰ अनु त्वं भेदं स्थापय पुत्रान्निवर्तय स्व ६३ विदुर उवाच ६४ सम्प्रदानं नाम ऐन्द्रं नाम समूहो दानवं इन्द्रस्य धनं
९० वर्षाख्यं दृश्यमाने अनाम्बुधूमज्योतिषां संनिपातरूपत्वात् नाम पित्र्यम् योगयेन मतः नाम यतः
मरीचिनः मरीचिमतः सूर्यं च इत्यादेः क्रीडादित्वात् मत्वर्थीय इनिः पादान् रश्मीन् आकाशहननादि

मेढीभूतः कौरवाणां त्वमद्य त्वय्यधीनं कुरुकुलमाजमीढ । पार्थान् बालान् वनवा
सप्रतप्तान् गोपायस्व स्वं यशस्तात रक्षन् ६२ संधत्स्व त्वं कौरवान् पाण्डुपुत्रैर्मा तेऽन्तरं
रिपवः प्रार्थयन्तु सत्ये स्थितास्ते नरदेव सर्वे दुर्योधनं स्थापय त्वं नरेन्द्र ६३ इत्युद्यो
गपर्वणि प्रजागरे ३६ विदुर उवाच सप्तदशेमान् राजेन्द्र मनुः स्वायंभुवोऽब्रवीत्
वैचित्रवीर्य पुरुषानाकाशं मुष्टिभिर्घ्नतः १ दानवेन्द्रस्य हि धनुरनाम्यं नमतोऽब्रवी
त् अथो मरीचिनः पादानग्राह्यान् गृह्णतस्तथा २ यश्चाशिष्यं शास्ति वै यश्च तुष्ये
द्यश्चातिवेलं भजते द्विषन्तं स्त्रियश्च यो रक्षति भद्रमस्तु ते यश्चायाच्यं याचते कत्थ

कं कार्यं कुर्वतोऽतीति मूढानित्यर्थः अशिष्यं शासनानर्हं दुर्योधनादिं यः शास्ति शिष्यैस्तु स्वल्पलाभेनेति
शेषः द्विषन्तं भजते स्वकार्यार्थमिति शेषः कार्यमेवाह भद्रमस्तु ते इति शत्रुसेवया स्त्रीरक्षया च यो
भद्रमस्तु ते नो हो मूर्खा वित्यर्थः यः कत्थते किंचित् कृत्वा श्लाघते स षष्ठो मूर्खः ३ ॥ ९०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अभिजातः कुलीनः ४ श्वशुरः सन्योवध्वापुत्रभार्ययासहअवहासंपरिहासंततपित्रादिभिरिवमन्यते तएकादशः वध्वास्नुषयाभृतयाअवसन्नभयोनष्टभयः वधूपित्रादिभिरापदि त्रातोपितत्रैवमानंकामयते यः सद्वादशोमूर्खः अन्येनवध्वासहवर्तितुंकुर्वन्नपिअभयोमानकामश्चेतिव्याचख्युः तद्धि

यश्चाभिजातः प्रकरोत्यकार्यंयश्चाबलोबलिनांनित्यवैरी अश्रद्दधानायच योब्रवीतियश्चाकाम्यंकामयतेनरेंद्र ४ वध्वावहासंश्वशुरोमन्यतेयोवध्वावसन्नभयोमानकामः परक्षेत्रेनिर्वपतियश्चबीजंस्त्रियंचयः परिवदतेतिवेल ५ यश्चापिलब्ध्वानस्मरामीतिवादीदत्वाचयः कत्थतियाच्यमानः यश्चासतः सत्वमुपानयीतएतान्नयंतिनिरयंपाशहस्ताः ६ यस्मिन्यथावर्ततेयोमनुष्यस्तस्मिंस्तथावर्तितव्यंसधर्मः मायाचारोमाययावर्तितव्यः साध्वाचारः साधुनाप्रत्युपेयः ७ जरारूपंहरतिहिधैर्यमाशामृत्युः प्राणान्धर्मचर्यामसूया कामोह्रियंवृत्तमनार्यसेवाक्रोधः श्रियंसर्वमेवाभिमानः ८ ॥

गीतत्वादुपेक्ष्यंपरक्षेत्रइत्यनेनसंगृहीतेच ५ दत्वातीर्थेवाचादानंकृत्वागृहेयाच्यमानः सन्कत्थतेदानमकृत्वैवश्लाघतेअसतोदुष्टस्यसत्वंसाधुत्वंअथवाअसतः मृषार्थस्यसत्वंसत्यत्वंउपानयीतसमर्थयतेसत्रयोदशोमूर्खः ६ यस्मिन्नितिसाधुषुपांडवेषुत्वयापिसाधुनाभवितव्यंइत्याशयः ७ जरेति

उद्योगपर्वणिनीलकंठीये ३७ ॥

म॰उ॰
टी॰
६१

अभिमानः सर्वहरः इत्युक्ते अभिमानवतां मनुष्याणां यदि स्वल्पमेवायुरस्ति तर्हि त्यक्तेप्यभिमाने न जीविष्यति
यदि बहु तर्हि स्वल्पेपि तस्मिन्न मरिष्यतीत्याशयेनाह शतायुरिति ९ अत्यागः अक्रुष्टोपराधश्चौर्यादिदोषा
नादिर्वा अत्याशा इति पाठे बहुभोजित्वे आत्मविवित्सेति पोषणार्थस्य धाञः सन्निरूपं आत्मपोषणेच्छा
दरपरायणतेत्यर्थः १० आयसाः खड्गाः भद्रमस्तु ते एतेषां परित्यागेन नरवृद्धाः शतायुषो भवन्तीत्य

धृतराष्ट्रउ॰ शतायुरुक्तः पुरुषः सर्ववेदेषु वै यदा नाप्नोत्यथ च तत्सर्वमायुः केनेह
हेतुना ९ विदुरउ॰ अतिमानोतिवादश्च तथात्यागो नराधिप क्रोधश्चात्मविवि
त्सा च मित्रद्रोहश्च तानि षट् १० एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनां एता
नि मानवान्घ्नन्ति न मृत्युर्भद्रमस्तु ते ११ विश्वस्तस्यैति यो दारान्यश्चापि गुरुत
ल्पगः वृषलीपतिर्द्विजो यश्च पानपश्चैव भारत १२ आदेशकृद्वृत्तिहन्ता द्विजाना
प्रेषकश्च यः शरणागतहा चैव सर्वे ब्रह्महणः समाः एतैः समेत्य कर्तव्यं प्राय
श्चित्तमिति श्रुतिः १३ गृहीतवाक्यो नयविद्वदान्यः शेषान्नभोक्ताप्यविहिंसकश्च
नानर्थकृत्त्यक्तकलिः कृतज्ञः सत्यो मृदुः स्वर्गमुपैति विद्वान् १४

र्थः ११ वृषली शूद्रा द्विजस्त्रैवर्णिकः पानपः मद्यपः १२ आदेशकृत् ग्रामणीः प्रेषकः द्विजान्दा
स्ये नियोजयन् समेत्य संसृज्य यदि वस्तुतोऽतिमानादीन्न त्यजेत्तर्हि तेषां षड्वर्गहन्तृणां
संगमस्त्वया न कार्य इति भावः १३ गृहीतवाक्यः विद्यावान् नयवित् नीतिज्ञः वदान्यो दाता गृही
तवाग्योनयविद्वदान्य इति पाठे मितभाषी अनिरस्तगुरुवचनः १४ ॥ १४ ६१

इदं द्यूतं न युक्तमिति वचनं मया उक्तमिति संबंधः २१ भक्तस्य सेवां कुर्वतः २२ अपूर्वं परकीयं स्निग्धा हि स्नेहवं

सुलभाः पुरुषा राजन् सततं प्रियवादिनः अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः
१५ यो हि धर्मं समाश्रित्य हित्वा भर्तुः प्रियाप्रिये अप्रियाण्याह पथ्यानि तेन राजा स
हायवान् १६ त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ग्रामं जनपदस्यार्थे आ
त्मार्थे पृथिवीं त्यजेत् १७ आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि आत्मानं सततं र
क्षेद्दारैरपि धनैरपि १८ द्यूतमेतत् पुराकल्पे दृष्टं वैरकरं नृणाम् तस्माद् द्यूतं न सेवे
त हास्यार्थमपि बुद्धिमान् १९ उक्तं मया द्यूतकालेपि राजन् नेदं युक्तं वचनं प्रातिपीय
तदौषधं पथ्यमिवातुरस्य न रोचते तव वैचित्रवीर्य २० काकैरिमांश्चित्रबर्हान् म
यूरान् पराजयेथाः पाण्डवान् धार्तराष्ट्रैः हित्वा सिंहान् क्रोष्टुकान् गूहमानः प्राप्ते का
ले शोचिता त्वं नरेन्द्र २१ यस्तात न क्रुध्यति सर्वकालं भृत्यस्य भक्तस्य हिते रतस्य तस्मि
न् भृत्या भर्तरि विश्वसंति न चैनमापत्सु परित्यजंति २२ न भृत्यानां वृत्तिसंरोधनेन
बाह्यं धनं संजिघृक्षेदपूर्वं त्यजंति ह्येनं वंचिता वै विरुद्धाः स्निग्धा ह्यमात्याः परिही
नभोगाः २३ ॥

तोपि २३ ॥

म॰ उ॰ कृत्यानि परिसंख्याय साध्यासाध्यनिश्चयं कृत्वा तथा वृत्तिं भृत्यजीविकां आयव्ययानुरूपां कृत्वेत्यर्थः दु
टी॰ ष्कराणि परराष्ट्रग्रहणादीनि २४ अनुकंप्यो मा हृष्णो वचनस्वीकारेणानुग्राह्य इति प्रार्थ्यते २५ प्रत्याह
९२ प्रत्याख्यानं करोति प्रतिकूलं आज्ञाविरुद्धं वदतीति प्रतिकूलवादी २६ अस्तब्धं दर्पशून्यं अक्लीबं सा।

कृत्यानि पूर्वं परिसंख्याय सर्वाण्यायव्ययेचानुरूपां च वृत्तिं संगृह्णीयादनुरूपान्
सहायान् सहायसाध्यानि हि दुष्कराणि २४ अभिप्रायं यो विदित्वा तु भर्तुः सर्वाणि
कार्याणि करोत्यतंद्रीः वक्ता हितानामनुरक्त आर्यः शक्तिज्ञ आत्मेव हि सोनुकंप्यः
२५ वाक्यं तु यो नाद्रियतेनुशिष्टः प्रत्याह यश्चापि नियुज्यमानः प्रज्ञाभिमानी प्रति
कूलवादी त्याज्यः स ताहृक् त्वरयैव भृत्यः २६ अस्तब्धमक्लीबमदीर्घसूत्रं सानु
क्रोशं श्लक्ष्णमहार्यमन्यैः अरोगजातीयमुदारवाक्यं भृत्यं वदंत्यष्टगुणोपपन्नं
२७ न विश्वासाज्जातु परस्य गेहे गच्छेन्नरश्चेतयानो विकाले न चत्वरे निशि ति
ष्ठेन्निगूढो न राजकाम्यां योषितं प्रार्थयीत २८ ॥

मर्षवंतं अदीर्घसूत्रं क्षिप्रकारिणं सानुक्रोशं सदयं श्लक्ष्णं मंजुलं अहार्यं अभेद्यं अरोगजा
तीयं रोगलेशशून्यं उदारं युक्तियुक्तं महार्थं च वाक्यं यस्य तं भृतं प्रेष्यं २७ विकाले सायंकाले
परस्य अविश्वस्तस्य गेहे न गच्छेत् प्रार्थयीत भोक्तुमिति शेषः २८ ॥ ९२

संस्पृष्टः स्वद्भक्तृत्वेन मिश्रो मंत्रो यस्य तत्त्वात् दृष्टा मम कर्णादि महापवृत्तो राज्ञा निह्नवं मंत्रस्य अपहारं न गच्छेत्
तत्वात् दृष्टाः तं मंत्रं न दूषयेत ततः सर्वैः सह विरोधापत्तेरिति भावः त्वयि बहूनां शास्येऽहं नास्य सामीति न ब्रू
यात् किं तु मम किंचित् कार्यमस्तीति व्यपदेशं व्याजं कृत्वा तादृशात् मंत्राद् अपसरेद् एवेत्यर्थः २९ लूणी
लज्जावान् सहियथा उक्तं दंडं अर्थमेषु पातयितुं न शक्नुः क्रूरो यमिति लोकापवादभयात् अद्भुतभृतिः

न निह्नवं मंत्रगतस्य गच्छेत् संसृष्टमंत्रस्य कुसंगतस्य न च ब्रूयान्नास्य सामि त्वयी
ति सकारणं व्यपदेशं तु कुर्यात् २९ लूणी राजा पुंश्चली राजभृत्यः पुत्रो भ्राता विध
वा बालपुत्रा सेनाजीवी चोद्धृतभृतिरेव व्यवहारेषु वर्जनीयाः स्युरेते ३० अष्टौ गुणाः
पुरुषं दीपयंति प्रज्ञा च कौल्यं च श्रुतं दमश्च पराक्रमश्चाबहुभाषिता च दानं य
थाशक्ति कृतज्ञता च ३१ एतान् गुणांस्तात महानुभावान् एको गुणः संश्रयते प्रस
ह्य राजा यदा सत्कुरुते मनुष्यं सर्वान् गुणानेष गुणो बिभर्ति ३२ गुणा दश स्ना
नशीलं भजंते बलं रूपं स्वरवर्णप्रशुद्धिः स्पर्शश्च गंधश्च विशुद्धता च श्रीः सौकुमार्यं

हृष्टीकृताधिकारः एते व्यवहारे धनदानादौ वर्जनीयाः दत्तनाशभयात् एतेभ्यो न ग्राह्यं च अधमर्णो
लूणी लज्जावान् ब्रूयाद् इति निर्बंधेन याच्यमानः प्राणानेव जह्यात् एवमन्यत्रापि ऊह्यं त्वमपि नाशभयात्
पुत्रादयस्तु मा देहीति भावः ३० स्वरो ध्वनिः तस्य प्रशुद्धिः मंजुलता वर्णाः कादयः तेषां प्रशुद्धिः यथा
॥ स्थानकरणं विस्पष्टमुच्चारणं स्पर्शः मृदुता सौकुमार्यं लावण्यं ३२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मितंभुक्तंमितभोजिनं आद्यूनोबहुभोजीतिक्षिपंतिनिंदंति ३४ अनिष्टवेषंक्षपणकादिवेषधरं ३५ कदर्यं
अदातारंआक्रोशकंगालयितारं अश्रुतंमूर्खंवनौकसंकैवर्तकं धूर्तंकितवंनिष्ठूरिणंनिर्दयंहिं
स्रंकृतवैरमन्येनस्वेनवा ३६ संक्लिष्टकर्माणं आततायिनंसचषड्विधः अग्निदोगरदश्चैवशस्त्रपा

गुणाश्चषण्मितभुक्तंभजंतेआरोग्यमायुश्चबलंसुखंच अनाविलंचास्यभवत्यप
त्यंनचैनमाद्यूनइतिक्षिपंति ३४ अकर्मशीलंचमहाशनंचलोकद्विष्टंबहुमा
यंनृशंसं अदेशकालज्ञमनिष्टवेषमेतान्गृहेनप्रतिवासयीत ३५ कदर्यमाक्रो
शकमश्रुतंचवनौकसंधूर्तममान्यमानिनं निष्ठूरिणंकृतवैरंकृतघ्नमेतान्भृ
शार्तोपिनजातुयाचेत् ३६ संक्लिष्टकर्माणमतिप्रमादंनित्यानृतंचादृढभ
क्तिकंच विसृष्टरागंपटुमानिनंचाप्येतान्नसेवेतनराधमान्षट् ३७ सहायबं
धनाह्यर्थाःसहायाश्चार्थबंधनाः अन्योन्यबंधनावेतौविनान्योन्यंनसिध्यतः ३८
उत्पाद्यपुत्राननृणांश्चकृत्वावृत्तिंचतेभ्योनुविधायकांचित् स्थानेकुमारीःप्रति
पाद्यसर्वाअरण्यसंस्थोथमुनिर्बुभूषेत् ३९ ॥

णिर्धनापहः क्षेत्रदारहश्चैवषडेतेआततायिनइतिप्रसिद्धः अतिप्रमादंसदाव्यग्रं विसृष्टरागंस
क्तस्नेहंपटुमानिनंकुशलंमन्यं ३७ एवंनिर्गुणानांस्वपुत्राणांपक्षपातेनसगुणान्परपुत्रान्
मात्यजेत्युक्तंसंप्रतिसर्वेषामेकमत्येनाभ्युदयःसाध्यःस्वहितमेवंकर्त्तव्यमाहसहायेत्यादिना ३८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ईश्वरेकालांतरीयफलप्रतिभूःभूते एतत्तद्धि एतदेवस्वपरहिताचरणंमूलंहेतुभूतं एतद्धिनाईश्वरोपिफ
लंदातुंनसमर्थइत्यर्थः ५० ननुपरईहितकरणेस्वहितंकथंस्यादित्यतआह बुद्धिरिति बुद्धिःसहाय।
मेलनेनधनादीनांप्रचयः बुद्धिरितिपाठेमित्रसंग्रहधीः प्रभावःशत्रूणांपराजयतेजः तद्धेतुभूतंशौ

हितंयत्सर्वभूतानामात्मनश्चसुखावहं तत्कुर्यादीश्वरोह्येतन्मूलंसर्वार्थसिद्धये
५० बुद्धिःप्रभावस्तेजश्चसत्त्वमुत्थानमेवच व्यवसायश्चयस्यस्यात्तस्यावृत्ति।
भयंकुतः ५१ पश्यदोषान्पांडवैर्विग्रहेत्वंयत्रव्यथेयुरपिदेवाःसशक्राःपुत्रैर्वै
नित्यमुद्विग्नवासोयशःप्रणाशोद्विषतांचहर्षः ५२ भीष्मस्यकोपस्तवचैवेंद्रक
ल्पद्रोणस्यराज्ञश्चयुधिष्ठिरस्य उत्सादयेल्लोकमिमंप्रवृद्धःश्वेतोग्रहस्तिर्यगिवा
पतन्खे ५३ तवपुत्रशतंचैवकर्णःपंचचपांडवाः पृथिवीमनुशासेयुरखिलां
सागरांबरां ५४ धार्तराष्ट्रावनंराजन्व्याघ्राःपांडुसुतामताः मावनंछिंधिसव्या।
घ्रंमाव्याघ्रान्नीनशन्वनात् ५५ नस्याद्वनमृतेव्याघ्रान्व्याघ्रानस्युर्ऋतेवनं व
नंहिरक्ष्यतेव्याघ्रान्रक्षतिकाननं ५६ ॥

र्यं सत्त्वंधर्मे ज्ञानैश्वर्यरूपं उत्थानंउद्यमः व्यवसायःनिश्चयः अवृत्तिर्जीविकायाअभावः ५१ ५२
श्वेतोग्रहः धूमकेतुः ५३ ५४ नीनशन्नाशंप्राप्नुयुः ५५ ५६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ टी॰ ६४

परेषांपांडवानां पापचेतसोदुर्योधनादयः ४७ आत्माविरक्तंपापात्इदंमेस्यादित्येवंरूपात्संकल्पा
त् कल्याणेभूमानंदेब्रह्मणिप्रकृतिस्त्रिगुणात्मिकामायाविकृतिःमहदादिःआत्मज्ञाना।

नतथेच्छतिकल्याणान्परेषांवेदितुंगुणान् यथैषांज्ञातुमिच्छतिनैर्गुण्यंपाप
चेतसः ४७ अर्थसिद्धिंपरामिच्छन्धर्ममेवादितश्चरेत् नहिधर्मादपैत्यर्थःस्वर्ग
लोकादिवामृतं ४८ यस्यात्माविरतःपापात्कल्याणेचनिवेशितः तेनसर्वमि
दंबुद्धंप्रकृतिर्विकृतिश्चया ४९ योधर्ममर्थंकामंचयथाकालंनिषेवते धर्मा
र्थकामसंयोगंसोमुत्रेहचविंदति ५० संनियच्छतियोवेगमुत्थितंक्रोधहर्ष
योः सश्रियोभाजनंराजन्यश्चापत्सुनमुह्यति ५१ बलंपंचविधंनित्यंपुरुषा
णांनिबोधमे यत्तुबाहुबलंनामकनिष्ठंबलमुच्यते ५२ अमात्यलाभोभद्रंतेद्वि
तीयंबलमुच्यते तृतीयंधनलाभंतुबलमाहुर्मनीषिणः ५३ यत्त्वस्यसहजंरा
जन्पितृपैतामहंबलं अभिजातबलंनामतच्चतुर्थंबलंस्मृतं ५४ ॥

त्सर्वविज्ञानप्रसिद्धः ४९ मोत्तानधिकारिणंप्रत्याहरयइति ५० ५३ अभिजातबलंकुलबलं ५४ ॥ ६४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५५ ५६ ५७ औषधयोयोग्निकित्सकाः नसंतितैश्चिकित्स्यइत्यर्थः आथर्वणावेदमंत्राअपिकिंपुनर्भीषा
मंत्रादयःप्रसिद्धाःअगदाःपारदादयः ५८ कुलपुत्रोत्तातिः ५९ ६० ६१ कुलेजाताःपांडवाः ६२ शाला

उ॰प॰ ४६ ॥ येनत्वेतानिसर्वाणिसंगृहीतानिभारत यद्बलानांबलंश्रेष्ठंतत्प्रज्ञाबलमुच्यते
५५ महतोप्युपकारायनरस्यप्रभवेन्नरः तेनवैरंसमासज्यदूरस्थोस्मीतिनाश्व
सेत् ५६ स्त्रीषुराजसुसर्पेषुस्वाध्यायप्रभुशत्रुषु भोगेष्वायुषिविश्वासंकःप्राज्ञः
कर्तुमर्हति ५७ प्रज्ञाशरेणाभिहतस्यजंतोश्चिकित्सकाःसंतिनचौषधानि नहो
ममंत्रानचमंगलानिनाथर्वणानाप्यगदाःप्रसिद्धाः ५८ सर्पश्चाग्निश्चसिंहश्चकु
लपुत्रश्चभारत नावज्ञेयामनुष्येणसर्वेह्येतेतितेजसः ५९ अग्निस्तेजोमहल्लो
केगूढस्तिष्ठतिदारुषु नचोपयुंक्तेतद्दारुयावन्नोदीप्यतेपरैः ६० सएवखलुदा
रुभ्योयदानिर्मथ्यदीप्यते तदारुचवनंचान्यन्निर्दहत्याशुतेजसा ६१ एवमेवकु
लेजाताःपावकोपमतेजसः क्षमावंतोनिराकाराःकाष्टेग्निरिवशेरते ६२ लताध
र्मःसपुत्रस्त्वंशालाःपांडुसुतामताः नलतावर्द्धतेजातुमहाद्रुममनाश्रिताः ६३ व
नंराजंस्त्वंसपुत्रोंविकेयसिंहान्वनेपांडवास्तातविद्धि सिंहैर्विहीनंहिवनंविनश्येत्सिंहा

महाद्रुत्ताःपांडवानआश्रित्यसपुत्रोवर्द्धस्वेत्यर्थः ६३ त्वत्सुताविहत्यपांडवाअपित्वेहात्रप्रायेपुरैवेतिभावः ६४

॥ ४८ ॥

आयतिश्रागच्छति १ निर्गुणिज्यप्रत्वाल्पश्चात्मसंस्थांस्वस्थितिंप्रतिवेद्यनिवेद्य २ यस्यकदर्यस्यभायातरा
स्यादिषुधनिकत्वप्रथाभयात् अदीयमानत्वादेवनप्रतिगृह्णातितस्यजीवितेअनर्थेस्वर्थे ३ शल्यक
र्त्तोक्ताऽस्कृत्अवकीर्णीनष्टब्रह्मचर्यःनोदकार्हउदकमात्रानर्होपिअतिथिःभ्रष्टोपियःप्रियवज्जा

विद्वत्‌ऊर्ध्वंप्राणाह्युत्क्रामंतियूनःस्थविरआयति प्रत्युत्थानाभिवादाभ्यांपुन।
स्तान्प्रतिपद्यते १ पीठंदत्वासाधवेभ्यागतायआनीयापःपरिनिर्णिज्यपादौस्वं वे
दृष्ट्वाप्रतिवेद्यात्मसंस्थांततोदद्यादन्नमवेक्ष्यधीरः २ यस्योदकंमधुपर्कंचगां।
वनमंत्रेविस्यतिगृह्णातिगेहे लोभाद्भयाद्दश्चकार्पण्यतोवातस्यानर्थंजीवित।
माहुरार्याः ३ चिकित्सकःशल्यकर्त्तावकीर्णीस्तेनःक्रूरोमद्यपोभ्रूणहाच से
नाजीवीश्रुतिविक्रायकश्चभ्रष्टोपिप्रियोप्यतिथिर्नोदकार्हः ४ अविक्रेयंलवणं
पक्वमन्नंदधिक्षीरंमधुतैलंघृतंच तिलामांसंफलमूलानिशाकंरक्तंवासःसर्व
गंधागुडश्च ५ अरोषणोयःसमलोष्टकांचनःप्रहीनशोकोगतसंधिविग्रहः नि
दाप्रशंसोपरतःप्रियाप्रियेत्यजन्नुदासीनवदेषभिक्षुकः ६ ॥

मात्रारिवद्वंचनीयएवेत्यर्थः ४ श्रुतिविक्रायकप्रसंगादन्यदप्यविक्रेयंयोविक्रीणातिसोप्यमान्य
एवेतिविवक्षयाःविक्रेयान्याह अविक्रेयमिति ५ दोषवानप्यतिथिःपूज्यःकिंपुनर्गुणवानितिवक्त
तद्गुणानाह अरोषणइतिगतसंधिविग्रहःस्नेहवैररहितःउदासीनवत्रागद्वेषराहित्यात् ६ ॥ ५५

वोढ्यः विधेयः सावधान इत्यर्थः नापमोदरिद्रोऽप्यतिथिषु प्रमत्तो भवेत्किं पुनर्भाग्यवानितिभावः ७ दीर्घौ बाहू बुध्याहूरस्थमपि आदातुं शक्यत इत्यर्थः हिंसतिहिनस्ति अतिथिभक्ता दूरस्था अपि पांडवानहेलनीया इतिभावः ९ अनीर्षुरित्यादिसार्धश्लोकत्रयस्य पुत्रदाराः पांडवाः तेषां स्त्री श्रीत्वल्पा अपरीसा।

नीवारमूलेंगुदफलाकर्त्तृभिः समं यतात्माग्निकार्येषु चोद्यः वनेवसन्नतिथिषु अ
मत्तो धुरंधरः पुण्यकृद्देवतापसः ७ अपकृस्तु हिमतो दूरस्थोस्मीति नाश्वसेत्
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ८ न विश्वसेदविश्वस्ते विश्वस्ते नाति
विश्वसेत् विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृंतति ९ अनीर्षुर्गुप्तदारश्च संवि
भागी प्रियंवदः श्लक्ष्णो मधुरवाक्स्त्रीणां न चासां वशगो भवेत् १० पूजनीया महा
भागाः पुण्याश्च गृहदीप्तयः स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः ११ पितु
रंतः पुरं दद्यान्मातुर्दद्यान्महानसं गोषु चात्मसमं दद्यात्स्वयमेव कृषिं व्रजेत् १२
भृत्यैर्वाणिज्यचारं च पुत्रैः सेवेत च द्विजान् अद्भ्योग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थि
तं १३ तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति नित्यं संतः कुले जाताः पावकोपमतेजसः

पित्रावयारत्वगीयैवातस्तदतिक्रमात्तव भयमस्तीतितात्पर्यं १० ११ प्रसंगात्प्रकृतेनुपयुक्तानपि धर्मानाह अद्भ्य इति एतेषां च यथालाभं प्रकृतोपयोगित्वमप्यूह्यं अद्भ्य इति तेन मैत्रेयादीनां ब्राह्मणानामवज्ञान

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
९९

सर्वतश्चक्षुस्तस्याह्रैः परमंत्रंजानन् १६ निःशलाके तृणैरनावृते तत्रापि कश्चिल्लीनस्तेन मंत्रभेदः संभवेदि
तिभावः १८ अनात्मवान् चपलवाक् १९ पार्षदाः सभासदः कृतान्येव विदुः किमुतान्ये २० अप्रश

त्समावृतोनिराकाराः काष्ठेग्निरिवयोरते यस्यमंत्रंनजानंतिबाह्याश्चाभ्यंतराश्चये
१५ सराजासर्वतश्चक्षुश्चिरमैश्वर्यमश्नुते करिष्यन्नप्रभाषेतकृतान्येवतुदर्शयेत्
१६ धर्मकामार्थकार्याणितथामंत्रोनभिद्यते गिरिपृष्ठमुपारुह्यप्रासादंवारहोग
तः १७ अरण्येनिःशलाकेवातत्रमंत्रोविधीयते नासुहृत्परमंमंत्रंभारतार्हतिवे
दितुं १८ अपंडितोवापिसुहृत्पंडितोवाप्यनात्मवान् नापरीक्ष्यमहीपालःकु
र्यात्सचिवमात्मनः १९ अमात्येह्यर्थलिप्साचमंत्ररक्षणमेवच कृतानिसर्वकार्याणि
यस्यपारिषदाविदुः २० धर्मेचार्थेचकामेचसराजाराजसत्तमः गूढमंत्रस्यनृपते
स्तस्यसिद्धिरसंशयं २१ अप्रशस्तानिकर्माणियोमोहादनुतिष्ठति सतेषांविपरि
भ्रंशाद्भ्रश्यतेजीवितादपि २२ ॥

स्तानिनिंद्यानि विपरिभ्रंशात् विपरीतत्वेनभ्रंशात् २२ ॥ २२ ॥ ९९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२३ षाड्गुण्यं संधिविग्रहयानासनद्वैधीभावसमाश्रयाणां समूहः न कृतो येन सः २४ षाड्गुण्याभिज्ञत्वेन
विदित आत्मा स्वरूपं यस्य तस्य स्थानं यथास्थितत्वावस्था अनवज्ञातं सत्कृतं शीलमस्य २५ नवेदिणः इति।
पाठेन वमिवादरेणेर्दितं शीलस्य आत्मनैव प्रत्ययोत्थानं यस्य स्वयमेवज्ञातकोपस्य २६ नाममात्रेणैव

कर्मणां तु प्रशस्तानामनुष्ठानं सुखावहं तेषामेवाननुष्ठानं पश्चात्तापकरं मतं २३
अनधीत्य यथावेदान्विप्रः श्राद्धमर्हति एवमकृतषाड्गुण्यो न मंत्रश्रोतुमर्हति
२४ स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मनः अनवज्ञातशीलस्य स्वाधीना पृथि
वी नृप २५ अमोघक्रोधहर्षस्य स्वयंकृत्यान्ववेक्षिणः आत्मप्रत्ययकोशस्य स्वा
धीनैयं वसुंधरा २६ नाममात्रेण तुष्येत छत्रेण च महीपतिः भृत्येभ्यो विसृजेद
र्थान्नैकः सर्वहरो भवेत् २७ ब्राह्मणं ब्राह्मणो वेद भर्ता वेद स्त्रियं तथा अमात्यं
नृपतिर्वेद राजा राजानमेव च २८ न शत्रुर्वशमापन्नो मोक्तव्यो वध्यतां गतः न्य
ग्भूत्वा पर्युपासीत वध्यं हन्याद्बले सति २९ अहताद्धि भयं तस्माज्जायते न चिरादि
व दैवतेषु प्रयत्नेन राजसु ब्राह्मणेषु च नियंतव्यः सदा क्रोधो वृद्धबालातुरेषु च ३०

राजा भवेत् भोगांस्तु भृत्यैः समानानेव भुंजीत २७ २८ २९ ३० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ ११ १२ लोकस्य पर्यायः इहलोकपरलोकवत्त्वं तेन तद्विषयवृत्तान्तं कर्मफलाधीनत्वरूपं प्राज्ञो जा।
टी॰ नाति न त्वत्युत्थापनं जाड्येन वादादिर्यल्लभते सर्वत्र व्यभिचारदर्शनादिति भावः १३ अभिजातः कु।
९०

निरर्थकं कलहं प्राज्ञो वर्जयेन्मूढसेवितं कीर्तिं च लभते लोके न चानर्थेन युज्यते ११
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः न तं भर्तारमिच्छन्ति षण्ढं पतिमिव
स्त्रियः १२ न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये लोकपर्यायवृत्तान्तं प्राज्ञो जा
नाति नेतरः १३ विद्याशीलवयोवृद्धान् बुद्धिवृद्धांश्च भारत धनाभिजातवृद्धांश्च
नित्यं मूढोवमन्यते १४ अनार्यवृत्तमप्राज्ञमसूयकमधार्मिकं अनर्थाः क्षि
प्रमायान्ति वाग्दुष्टं क्रोधनं तथा १५ अविसंवादनं दानं समयस्याव्यतिक्रमः आ
वर्तयन्ति भूतानि सम्यक्प्रणिहिता च वाक् १६ अविसंवादको दक्षः कृतज्ञो म
तिमानृजुः अपि संक्षीणकोशोपि लभते परिवारणं १७ धृतिः शमो दमः शौ
चं कारुण्यं वागनिष्ठुरा मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः १८ ॥

लीनः अविसंवादनं वंचनाभावं समयस्य स्वपरकृतमर्यादायाः आवर्तयन्ति शत्रूनपि स्वीयान्
कुर्वन्ति प्रणिहिता प्रयुक्ता १६ परिवारणं परिवारान् भृत्यमित्रान् १७ समिधः उद्दीपकाः १८ ९०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

असंविभागीयोभ्यो दत्वास्वयंभुंजानः ३९ ४० इष्टेषु दूषितेषु चेतनायतिक्रमात् ४१ समासक्ताः निहिताः
संशयं गताः कदाचित्प्राप्यापि त्यर्थः ४२ ४३ ये भ्रष्टाः विशेषाः आधिक्यानि तेषु हि प्रदश्यमानेषु परस्परं स्रोया

असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः तादृङ्नराधिपो लोके वर्जनीयो नराधिप ३९
न च रात्रौ सुखं शेते ससर्प इव वेश्मनि यः कोपयति निर्दोषं सदोषोभ्यंतरं जनं ४० ये
षु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत सदा प्रसादनं तेषां देवतानामिवाचरेत् ४१ येर्थाः
स्त्रीषु समायुक्ताः प्रमत्तपतितेषु च ये चानार्ये समासक्ताः सर्वे ते संशयं गताः ४२ य
त्र स्त्री यत्र कितवो बालो यत्रानुशासिता मज्जंति तेऽवशा राजन्नद्यामश्मप्लवा इव ४३
प्रयोजनेषु ये सक्ता न विशेषेषु भारत तानहं पंडितान्मन्ये विशेषा हि प्रसंगिनः ४४
यं प्रशंसंति कितवा यं प्रशंसंति चारणाः यं प्रशंसंति बंधक्यो न स जीवति मानवः हित्वा
तान्परमेष्वासान्पांडवानमितौजसः ४५ आहितं भारतैश्वर्यं त्वया दुर्योधने महत्
४६ तद्रक्ष्यसि परिभ्रष्टं तस्मात्त्वं नचिरादिव ऐश्वर्यमदसंमूढं बलिं लोकत्रयादि
व ४७ इतिश्रीमहाभारते उद्योगपर्वणि धृतराष्ट्रप्रजागरे ३८ ॥ ॥

नामेव कलहप्रसंगात्स्वप्रयोजनं तेन श्यतीति भावः प्रसंगिनः प्रसंगः संघर्षः तत्कारिणः ४४
४५ ४६ ४७ इतिश्री विदुरवाक्ये ३८ ॥

म॰उ॰ भवाभवेऐश्वर्यानैश्वर्येदिष्टस्यदेवस्यनतमोहं इयेतिभावः धृतं उ तिमान् १ बुध्यवज्ञातंअवज्ञातबु
टी॰ द्धित्व २ मंत्रवलेनमूलवलेनचप्रियकृत्प्रियोभवति सचदानाद्यभावेपुनरप्रियोपिभवतिअहं
९८ वननतथातत्वयाप्राप्तकालेमदुक्तंःनादरोनकर्तव्यइतिभावः ३ द्वेष्यइतियोयस्यद्वेष्यःतस्मि

धृतराष्ट्रउ॰ अनीश्वरोयंपुरुषोभवाभवे सूत्रप्रोतादारुमयीवयोषा धात्रातुदिष्ट
स्यवशेकृतोयंतस्माद्वदत्वंश्रवणेधृतोहं १ विदुरउ॰ अप्राप्तकालेवचनंबृहस्
पतिरपिब्रुवन् लभतेबुध्यवज्ञानमवमानंचभारत २ प्रियोभवतिदानेनप्रि
यवादेनचापरः मंत्रमूलबलेनान्योयःप्रियःप्रियएवसः ३ द्वेष्योनसाधुर्भवति
नमेधावीनपंडितः प्रियेशुभानिकार्याणिद्वेष्येपापानिचैवह ४ उक्तंमयाजात
मात्रेपिराजन्दुर्योधनंत्यजपुत्रंत्वमेकं तस्यत्यागात्पुत्रशतस्यवृद्धिरस्यात्यागा
त्पुत्रशतस्यनाशः ५ नवृद्धिर्बहुमंतव्यायावृद्धिःक्षयमावहेत् क्षयोपिबहुम
तव्योयःक्षयोवृद्धिमावहेत् नसक्षयोमहाराजयःक्षयोवृद्धिमावहेत् क्षयःस
त्विहमंतव्योयंलब्ध्वाबहुनाशयेत् ७ ॥

न्तद्वेष्यास्साधुत्वादिकंसदपिनास्तिप्रियेत्वस ९८
दपिनतत्तनदृष्टमस्तीतिभावः ४ ५ ६ ७ ॥ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ आयतीयुक्तं उदर्के हितं ९ पुत्रं त्यक्तुमशक्तेन दुष्टाः शकुन्यादयो वा त्याज्या इत्याशयेनाह अतीवेति
फलविनाशनो येत्नाणीय इति भावः १० ११ १२ १३ सौहार्द्दे मैत्री हेतौ निवर्त्तमाने सति प्रीतिः फलेन

समस्थागुणतः केचिद्भवन्ति धनतोपरे धनवृद्धान्गुणैर्हीनान्धृतराष्ट्र विवर्जय
८ धृतराष्ट्र उ॰ सर्वं त्वमायतीयुक्तं भाषसे प्राज्ञसंमतं न चोत्सहे सुतं त्यक्तुं यतो ध
र्म्मस्ततो जयः ९ विदुर उ॰ अतीव गुणसंपन्नो न जातु विनयान्वितः सुसूक्ष्ममपि भू
तानामुपमर्दमुपेक्षते १० परापवादनिरताः परदुःखोदयेषु च परस्परविरोधे च
यतन्ते सततोत्थिताः ११ सदोषं दर्शनं येषां संवासे सुमहद्भयं अर्थादाने महान्
दोषः प्रदाने च महद्भयं १२ ये वै भेदनशीलास्तु सकामा निस्त्रपाः शठाः ये पापा
इति विख्याताः संवासे परिगर्हिताः १३ युक्तांश्चान्यैर्महादोषैर्ये नरास्तान्विवर्जयेत्
विवर्त्तमाने सौहार्द्दे प्रीतिर्नीचे प्रणश्यति १४ या चैव फलनिर्वृत्तिः सौहार्द्दे चैव
यत्सुखं यतते चापवादाय यत्नमारभते क्षयं १५ ॥

र्वृतिः सुखं च प्रणश्यति नीचोप
वादाय यतते क्षये च यत्नमारभते शांतिं च न गच्छतीति द्वयोः संबंधः १४ १५ ॥

म॰ उ॰
टी॰
४४

संगतंसंवदं १६ निषेवमाणविचार्य १७ १८ १९ २० २१ २२ शुभार्थिनापेश्वर्यलिप्सुना २३ ॥

श्लेष्मपक्वेतमोहान्नपशंतिमधिगछति तादृशैःसंगतंनीचैर्नृशंसैरकृतात्म
भिः १६ निषेवमानिपुणोवुध्यावित्हान्नदूराद्विवर्जयेत् योज्ञातिमनुगृह्णातिदरिद्रंदी
नमातुरं १७ सपुत्रपशुभिर्वृद्धिंश्रेयश्चानंत्यमश्नुते ज्ञातयोवर्धनीयास्तैर्यइच्छंत्या
त्मनःशुभं १८ कुलवृद्धिंचराजेंद्रतस्मात्साधुसमाचर श्रेयसायोक्ष्यतेराजन्कुर्वा
णोज्ञातिसत्क्रियां १९ विगुणाह्यपिसंरक्ष्याज्ञातयोभरतर्षभ किंपुनर्गुणवंतस्ते
त्वत्प्रसादाभिकांक्षिणः २० प्रसादंकुरुवीराणांपांडवानांविशांपते दीयंतांग्रामा
काःकेचित्तेषांवृत्यर्थमीश्वर २१ एवंलोकेयशःप्राप्तंभविष्यतिनराधिप वृद्धेनहि
त्वयाकार्यंपुत्राणांतातशासनं २२ मयाचापिहितंवाच्यंविद्धिमांत्वद्धितैषिणं
ज्ञातिभिर्विग्रहस्तातनकर्तव्यःशुभार्थिना २३ ॥

४४

२४ २५ २६ २७ दिग्धहस्तं विषाक्तं बाणं हस्ते यस्य स्त्रीमानूपनस्य ज्ञातेरेवमात्द्विजं पापं विंदति मृगवधजं पा
पं व्याधस्येवेत्यर्थः २८ एवं द्विजं समारूढश्चिताग्निरगारं प्रविष्टः लोके आगतं लज्जमानः इत्यर्थः २९ नकश्चिद्
ति भार्गवात् शुक्रादन्यत्र नीतिशास्त्रकर्तारं शुक्रं विहाय अन्यः कश्चिदपि न अपनयते इति न अपित्त

सखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ संभोजनं संकथनं संप्रीतिश्च परस्परं
२४ ज्ञातिभिः सह कार्याणि न विरोधः कदाचन ज्ञातयस्तारयंतीह ज्ञातयो मज्ज
यंति च २५ सुवृत्तास्तारयंतीह दुर्वृत्ता मज्जयंति च सुवृत्तो भव राजेंद्र पांडवान्प्र
ति मानद २६ अधर्षणीयः शत्रूणां तैर्वृतस्त्वं भविष्यसि श्रीमंतं ज्ञातिमासाद्य
यो ज्ञातिरवसीदति २७ दिग्धहस्तं मृग इव स एनः प्राप्य विंदति पश्चादपि नरश्रे
ष्ठ तव तापो भविष्यति २८ तान्वा हतान्हतान्वापि श्रुत्वा तदनुचिंतया येन खड्गं
समारूढः परित्यजेत कर्मणा २९ आदावेव न तत्कुर्यादध्रुवे जीविते सति नक
श्चिन्नापनयते पुमानन्यत्र भार्गवात् शेषसंप्रतिपत्तिस्तु बुद्धिमत्स्वेव तिष्ठति ३०
दुर्योधनेन यद्येतत्पापं तेषु पुराकृतं त्वया तत्कुलवृद्धेन प्रत्यानेयं नरेश्वर ३१ ॥

सर्वोऽप्यपनयते अनीतिं करोतीति अतः यत् अतीतं तत् अतीतमेव शेषस्य तत्कालोचितस्य अर्थस्य
प्रतिपत्तिः विचारः कर्तव्य इत्यर्थः ३० न देवाह दुर्योधनेनेति प्रत्यानेयं प्रतिकर्तव्यं ३१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ० प्रतिकारमेवाहृतानिति प्रतिष्ठाप्य राज्यांशप्रदानेन स्थिरीकृत्य १२ वीराणां उपदेष्टॄणां सुव्याहृतानि
टी० वचनानि अध्यवस्यति निश्चयं करोति उत्तमफलं कर्मारभत इत्यर्थः १३ कुशलैरप्युपयुक्तं उपदिष्टं
१०० तत् ज्ञानं असम्यगेव यतः उपलभ्यं ज्ञेयं तेन अविदितं ज्ञातं ज्ञातं वा तत् नानुष्ठितं मदुक्तं त्वयेति।

तांस्त्वं पदे प्रतिष्ठाप्य लोके विगतकल्मषः भविष्यसि नरश्रेष्ठ पूज
नीयो मनीषिणां १२ सुव्याहृतानि वीराणां फलतः परिचिन्त्य यः
अध्यवस्यति कार्येषु चिरं यशसि तिष्ठति १३ असम्यगुपयुक्तं हि।
ज्ञानं सुकुशलैरपि उपलभ्यमविदितं विदितं वाननुष्ठितं १४ पा
पोदयफलं विद्वान् यो नारभति वर्धते यस्तु पूर्वं कृतं पापमविमृश्या
नुवर्तते १५ अगाधपंके दुर्मेधा विषमे विनिपात्यते मंत्रभेदस्य षट्
प्राज्ञो द्वाराणीमानि लक्षयेत् १६ ॥

ष्फलमेवेति भावः १४ यस्य पापेनादेः फलं ब्रह्मवधादिपापोदयः पापहेतुः तत्फलं फलहेतु।
भूतं कर्म यो नारभते स वर्धते १५ अविमृश्य अविचार्य पापमेवानुवर्तते सततं करोति पंके नरके १६ १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अर्थसंततिः अर्थानाम् विच्छेदेन वृद्धिः तत्कामः मदं स्वरापानजं चित्तवैकल्यं स्वप्नं निद्रां अविज्ञानं परा
कीयगुप्तचारादेरज्ञानं आत्मसंभवं आकारं नेत्रवक्त्रविकारादिकं ४७ तावतैव परहृताः मंत्रमव
यंति मंत्रभेदरूपद्वाराणि संवृणोति पिदधाति ४८ कृतं शास्त्रं ५० मत्यामननेन युक्तिभिरन्वि

अर्थसंततिकामस्य रक्षेदेतानि नित्यशः मदं स्वप्नमविज्ञानमाकारं चात्मसंभवं ४७
दुष्टामात्येषु विश्रंभं दूतात्काकशालादपि द्वाराण्येतानि यो ज्ञात्वा संवृणोति सदा नृपः
४८ त्रिवर्गचरणे युक्तः सशत्रूनधिगच्छति नचैकांतमविज्ञाय दृष्टांतानुपसेव्यता ४९
धर्मार्थौ वेदितुं शक्यौ बृहस्पतिसमैरपि नष्टं समुद्रे पतितं नष्टं वा कामस्य एवति ५०
अनात्मनि कृतं नष्टं नष्टं हुतमनग्निकं मत्या परीक्ष्य मेधावी बुध्या संपाद्य चासकृत् ५१
कृत्वा दृष्टान्तविज्ञाय शास्त्रे मैत्रीं समाचरेत् अकीर्तिं विनयो हंति हंत्यनर्थं पराक्र
मः ५२ हंति नित्यं क्षमा क्रोधमाचारो हंत्यलक्षणं परिच्छेदनतेजेण वेश्मनापरि
चर्यया ५३ ॥

तनेन नान्येति पाठे कुलीनत्वेन बुध्यास्वानुभावेन संपाद्य कार्ययोग्यतां निश्चित्य ५१ कृत्वा परतः
दृष्टान्स्वयं आप्तकृत्याज्ज्ञात्वा विज्ञाय पुनः पुनर्विशेषेण ज्ञात्वा ५२ परिच्छदः भोगपवस्तुसामग्री
तेजेण जन्मस्थानेन कुग्रामवासिप्रायेण विवेकाभावात् परिचर्यया आचारेण ५३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰
टी॰
१०१

४४ वैद्यं विद्यावंतं ४६ निभृतं गूढाचारप्रवृत्तं मंत्रयंत्रादि चिंतं ज्ञानमात्रं प्रज्ञाविप्रोषितोर्थोन्वयत
तमता ४८ रौद्राः कोपनाः साहसिकाः अविमृश्यकारिणस्तेषु ४९ ५१ इंद्रियाणामुत्सर्गो विषये

परीतेतकृतं राजन्भोजनाच्छादनेनच उपस्थितस्य कामस्य प्रतिवादो न विद्यते
४४ अपि निर्मुक्तदेहस्य कामरक्तस्य किं पुनः राजोपसेवितं वैद्यं धार्मिकं प्रियदर्शी
नं ४५ मित्रवंतं सुवाक्यं च सुहृदं परिपालयेत् दुष्कुलीनः कुलीनो वा मर्यादां यो
न लंघयेत् ४६ धर्मापेक्षी मृदुर्ह्रीमान् स कुलीनशताद्वरः ययोश्चित्तेन वा चित्तं नि
भृतं निभृतेन वा ४७ समेति प्रज्ञया प्रज्ञा तयोर्मैत्री न जीर्यति दुर्बुद्धिमकृतप्रज्ञं छ
न्नं कूपं तृणैरिव ४८ विवर्जयीत मेधावी तस्मिन्मैत्री प्रणश्यति अवलिप्तेषु मूर्खे
षु रौद्रसाहसिकेषु च ४९ तथैवापेतधर्मेषु न मैत्रीमाचरेद्बुधः कृतज्ञं धार्मिकं
सत्यमक्षुद्रं दृढभक्तिकं ५० जितेंद्रियं स्थितं स्थित्यां मित्रमत्यागि चेष्यते इंद्रि
याणामनुत्सर्गो मृत्युनापि विशिष्यते ५१ अत्यर्थं पुनरुत्सर्गः सादयेद्दैवतान्यपि
मार्दवं सर्वभूतानामनसूया क्षमा धृतिः ५२ ॥

षु प्रवृत्तिः अनुत्सर्गो विषयेभ्यो निवृत्तिः सा मृत्युतुल्या दुरनुष्ठेयेत्यर्थः ५२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आघृष्टानि आघृष्टाणिअपनीतंअस्यायेननाशितं ५३ आयत्यांआगामिनिकालेदुःखस्यप्रतीका
रज्ञःतदात्वेवर्तमानेदृष्टेनिश्चयःभोगंविनाशात्मस्यदुःखस्यनाशोनास्तीतिज्ञात्वातत्सेवयेपिनोत्प
यति ५४ ५५ मंगलानांदधिदूर्वागवादीनांअलभनेस्पर्शःयोगः सहायसंपत् अस्थानेउद्यमः

आघृष्टाणिवृथाःप्राङ्मिंज्ञाणांवाविमानना अपनीतंसुनीतेनयोर्थश्रस्यानिनीयते
५३ प्रीतिमास्थायस्वदृष्टांतहे कुपुरुषव्रतंआयत्यांप्रतिकारज्ञस्तदात्वेदृष्टनिश्च
यः ५४ अतीतेकार्यशेषज्ञोनरोर्थैर्नप्रहीयते कर्मणामनसावाचायदभीक्ष्णंनि
षेवते ५५ तदेवापहरत्येनंतस्मात्कल्याणमाचरेत् मंगलालंभनंयोगःश्रुतस्यु
त्थानमार्जवं ५६ भूतिमेतानिकुर्वंतिसतांवाभीक्ष्णदर्शनं अनिर्वेदःश्रियोमूलंला
भस्यचशुभस्यच ५७ महान्भवत्यनिर्विण्णःसुखंचानंत्यमश्नुते नातःश्रीमत्तरंकिं
चिदन्यत्पथ्यतमंमतं ५८ प्रभविष्णोर्यथातातक्षमासर्वत्रसर्वदा क्षमेदशक्तःसर्व
स्यशक्तिमान्धर्मकारणात् ५९ अर्थानर्थौसमौयस्य तस्यनित्यंक्षमाहिता ६० यत्
सुखंसेवमानोपिधर्मार्थाभ्यांनहीयते कामंतदुपसेवेतनमूढव्रतमाचरेत् ६१ ॥

५६ अनिर्वेदःउद्योगात्अनुपरमः ५७ ५९ तस्यमध्यमस्ययोनशक्तःनाप्यशक्तस्तस्येत्यर्थःस
र्वेषांक्षमाश्रेयस्करीत्यर्थः ६० मूढव्रतमाहारादौअतितिर्वर्यं ६२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०उ० टी० १०२

अदांतेषुलिप्साहीनेषु ९२ सव्यपत्रपंसलज्जं ९३ अत्यार्यंअत्यंतमकुटिले ९४ और्ध्वदेहिकंपरलोक

दुःखार्तेषुप्रमत्तेषुनास्तिकेष्वलसेषुच नश्रीर्वसत्यदांतेषुयेचोत्साहविवर्जिताः
९२ आर्जवेननरंयुक्तमार्जवात्सव्यपत्रपं अशक्तंमन्यमानास्तुधर्षयंतिकुबुद्धयः
९३ अत्यार्यमतिदातारमतिशूरमतिव्रतं प्रज्ञाभिमानिनंचैवश्रीर्भयान्नोपसर्पं
ति ९४ नचातिगुणवत्स्वेषानात्यंतंनिर्गुणेषुच नैषागुणान्कामयतेनैर्गुण्या
न्नानुरज्यते ९५ उन्मत्तागौरिवांधाश्रीःक्वचिदेवावतिष्ठते अग्निहोत्रफलावेदाः
शीलवृत्तफलंश्रुतं ९६ रतिपुत्रफलानारीदत्तभुक्तफलंधनं अधर्मोपार्जितैरर्थैर्यः
करोत्यौर्ध्वदैहिकं ९७ नसतस्यफलंप्रेत्यभुंक्तेर्थस्यदुरागमात् कांतारेवनदुर्गेषु
कृच्छ्रास्वापत्सुसंभ्रमे ९८ उद्यतेषुचशस्त्रेषुनास्तिसत्ववतांभयं उत्थानंसंयमो
दाक्ष्यमप्रमादोधृतिःस्मृतिः ९९ समीक्ष्यचसमारंभोविद्धिमूलंभवस्यतु तपोब
लंतापसानांब्रह्मब्रह्मविदांबलं ७० ॥

साधनंयज्ञदानादि ९७ संयमइंद्रियाणांनिग्रहः ९८ ९९ भवस्यैश्वर्यस्य ७० ॥ ९ १०२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ टी॰ ९२ वाक्पारुष्यंदुर्वचनं अनाम्नायःअनाभ्यासएवमलंयेषां वाह्लीकाःपंचानांसिंधुषष्ठानांनदीनां।
यत्रसंगमः वाह्लीकानामेतेदेशाःविप्रवासःप्रवासः ८१ ८३ ८५ यदितेस्वेषुपुत्रेषुपांडवेषुचसम

मलंपृथिव्यावाह्लीकाःपुरुषस्यानृतंमलं कौतूहलमलासाध्वीविप्रवासमलाः
स्त्रियः ८० सुवर्णस्यमलंरूप्यंरूप्यस्यापिमलंत्रपु। ज्ञेयंत्रपुमलंसीसंसीसस्या
पिमलंमलं ८१ नस्वप्नेनजयेन्निद्रांनकामेनजयेत्स्त्रियः नेंधनेनजयेदग्निंनपा
नेनसुरांजयेत् ८२ यस्यदानजितंमित्रंशत्रवोयुधिनिर्जिताः अन्नपानजितादा
राःसफलंतस्यजीवितं ८३ सहस्रिणोपिजीवंतिजीवंतिशतिनस्तथा धृतराष्ट्र
विमुंचेच्छांनकथंचिन्नजीव्यते ८४ यत्पृथिव्यांव्रीहियवंहिरण्यंपशवःस्त्रियः
नालमेकस्यतत्सर्वमितिपश्यन्नमुह्यति ८५ राजन्भूयोब्रवीमित्वांपुत्रेषुसम
माचर समतायदितेराजन्स्वेषुपांडुसुतेषुवा ८६ इतिश्रीमहाभारतेउद्यो
गपर्वणिप्रजागरे ३९ ॥

मतास्तितर्हिसर्वेषुसममेवाचर यथाभागंराज्यंतेभ्योदेहीत्यर्थः ८६ इत्युद्योगेप्रजागरेविदुर ९२

११ ब्राह्मणकाम्याब्राह्मणस्यइच्छातदाज्ञेयेऽर्थ्याः संदध्यात्कुर्यात् १२ अन्योधर्मःकामात्इच्छ

हिंसाबलमसाधूनांक्षमागुणवतांबलं अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः
११ हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधं नतत्परस्यसंदध्यात्प्रतिकूलंयदात्मनः
१२ संग्रहेणैषधर्मःस्यात्कामादन्यःप्रवर्तते अक्रोधेनजयेत्क्रोधमसाधुंसाधुना।
जयेत् १३ जयेत्कदर्यंदानेनजयेत्सत्येनचानृतं स्त्रीधूर्तकेलसेभीरौचंडेपुरुष
मानिनि १४ चौरेकृतघ्नेविश्वासोनकार्योनचनास्तिके अभिवादनशीलस्यनि
त्यंवृद्धोपसेविनः १५ चत्वारिसंप्रवर्धंतेकीर्तिरायुर्यशोबलं अतिक्लेशेनयेऽर्थाः
स्युर्धर्मस्यातिक्रमेणवा १६ अरेर्वाप्रणिपातेनमास्मतेषुमनःकृथाः अविद्यःपु
रुषःशोच्यःशोच्यंमैथुनमप्रजं १७ निराहाराःप्रजाःशोच्याःशोच्यंराष्ट्रमराजकं
अध्वाजरादेहवतांपर्वतानांजलंजरा १८ असंभोगोजरास्त्रीणांवाक्शल्यंमनसो
जरा अनाम्नायमलावेदाब्राह्मणस्याव्रतंमले १९ ॥

पासाधुनाकर्मणा १३ स्त्रीधूर्तकेजारेस्त्रियांधूर्तेचस्येकवञ्चकाः १४ १५ १६ १९

असज्जमानः अभिमानशून्यः शक्तिं अहापयित्वा अनतिक्रम्य यथाशक्ति अर्थः संतं साधुं उपैति लभते
यतः प्रसन्नाः संतः साधवः सुखाय अलं सुखं ददातीति पर्यायाः १ अनपाकृष्टः परैरपकर्षं अप्रापितः

विदुर उवाच योऽभ्यर्चितः सद्भिरसज्जमानः करोत्यर्थं शक्तिमहापयित्वा क्षिप्रं य
शस्तं समुपैति संतमलं प्रसन्ना हि सुखाय संतः १ महान्तमप्यर्थमधर्मयुक्तं
यः संत्यजत्यनपाकृष्ट एव सुखं स दुःखान्यवमुच्य शेते जीर्णां त्वचं सर्प इवाव
मुच्य २ अनृते च समुत्कर्षो राजगामि च पैशुनं गुरोश्चालीकनिर्बंधः समा
नि ब्रह्महत्यया ३ असूयैकपदं मृत्युरतिवादः श्रियो वधः अशुश्रूषा त्वरा श्लाघा
विद्यायाः शत्रवस्त्रयः ४ आलस्यं मदमोहौ च चापलं गोष्ठिरेव च स्तब्धता
चाभिमानित्वं तथात्यागित्वमेव च ५ एते वै सप्त दोषाः स्युः सदा विद्यार्थिनां म
ताः सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखं सुखार्थी वा त्यजेद्विद्यां वि
द्यार्थी वा त्यजेत्सुखं नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ७ ॥

तोपि २ समुत्कर्षः अनृतेन जयः ३ मृत्युः ३ एकपदं सर्वात्मना ४ स्तब्धता औद्धत्यं अभि
मानः दर्पः तद्वत्त्वं अत्यागित्वं स्तब्धता मदमोहौ एकीकृत्य सप्त ५ ६ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०३०
टी०
१०९

८९ अजेनसहिताःउस्राःअजोक्षाःऔदुंबरंताम्रमयंपात्रजातंउदुंबरंस्मृतंताम्रेइतिविश्वःविषंलोह
मितिसर्वज्ञःस्वर्णनाभःशालग्रामःदक्षिणावर्तप्रावर्तइतिनारायणाः १० धन्यानिमंगलावहा।
नि ॥ सर्वेभ्यःपुण्यहेतुभ्यःउत्कृष्टमहाविशिष्टंमहेनउत्सवेनअविशिष्टंसमानंमांगलिक

नांतकःसर्वभूतानांनपुंसांवामलोचनाः आशापाश्चतिंहंतिसमृद्धिमंतकःक्रो
धःश्रियंहंतियशःकदर्यता अपालनंहंतिपशूंश्चराजन्नेकःक्रुद्धोब्राह्मणो
हंतिराष्ट्रं ८ अजाश्चकांस्यंरजतंचनित्यंमध्वाकर्षःशकुनिःश्रोत्रियश्च वृ
द्धोज्ञातिरवसन्नःकुलीनएतानितेसंतुगृहेसदैव ९ अजोक्षाचंदनंवीणाआ
दर्शोमधुसर्पिषी विषमौदुंबरंशंखःस्वर्णनाभोथरोचना १० गृहेस्थापयि
तव्यानिधन्यानिमनुरब्रवीत् देवब्राह्मणपूजार्थमतिथीनांचभारत ॥ इदं
वचःसर्वपरंब्रवीमिपुण्यंपदंतातमहाविशिष्टं नजातुकामान्नभयान्नलोभाद्ध
र्मंजह्याज्जीवितस्यापिहेतोः १२ नित्योधर्मःसुखदुःखेत्वनित्येजीवोनित्योहेतु
रस्यत्वनित्यः त्यक्त्वानित्यंप्रतितिष्ठस्वनित्येसंतुष्यत्वंतोषपरोहिलाभः १३ ॥

मित्यर्थः १२ अस्यजीवत्वस्यहेतुरविद्या अनित्यंसुखदुःखेअविद्याचनित्येधर्मेनिरावेश्येआत्म
निचप्रतितिष्ठस्वनिष्ठांकुरुसंतुष्यसंतोषंप्राप्नुहि तोषःपरउत्कृष्टःयस्मिन्लाभे १३ ॥ ९४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ गृहान्निर्हरंति दूरीकुर्वंति १५ १६ उत्सृज्य मृतस्य देहं त्यक्त्वा १७ १८ अस्माल्लोकादूर्ध्वं स्वर्गे अमुष्मा
त्स्वर्गात् चाधः अस्माच्च अधः पाताले महत्तमः तमोगुणप्रधानैः पुरुषैः प्राप्यं स्थानं अंधकारं अप्रका

महाबलान्पश्य महानुभावान्प्रशास्य भूमिं धनधान्यपूर्णां राज्यानि हित्वा विपु
लांश्च भोगान्गतान्नरेंद्रान्वशमंतकस्य १४ मृतं पुत्रं दुःखपुष्टं मनुष्या उत्क्षिप्य रा
जन्स्वगृहान्निर्हरंति तं मुक्तकेशाः करुणं रुदंतिश्चितामध्ये काष्ठमिव क्षिपंति १५
अन्यो धनं प्रेतगतस्य भुंक्ते वयांसि चाग्निश्च शरीरधातून् द्वाभ्यामयं सह गच्छत्य
मुत्र पुण्येन पापेन च वेष्ट्यमानः १६ उत्सृज्य विनिवर्त्तंते ज्ञातयः सुहृदः सुताः
अपुष्पानफलान्वृक्षान्यथा तात पतत्रिणः १७ अग्नौ प्रास्तं तु पुरुषं कर्मा
न्वेति स्वयंकृतं तस्मात्तु पुरुषो यत्नाद्धर्मं संचिनुयाच्छनैः १८ अस्माल्लोकादूर्ध्वम
मुत्र चाधो महत्तमस्तिष्ठति ह्यंधकारं तद्वै महामोहनमिंद्रियाणां बुध्यस्व मा त्वां प्र
लभेत राजन् १९ इदं वचः शक्ष्यसि चेद्यथावन्निशम्य सर्वं प्रतिपत्तुमेवं यशः परं
प्राप्स्यसि जीवलोके भयं न चामुत्र न चेह तेऽस्ति २० ॥

शं तत् अंधं तमः अंधतामिस्राख्यं न
रकं बुध्यस्व मा त्वा रागादिः प्रलभेत स्पृशेत् १९ प्रतिपत्तुं ज्ञातुं शक्ष्यसि चेदिति संबंधः २० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म. ३.
टी.
१०५

आत्माजीवोनदीपुण्यंधर्मएवतीर्थंयस्यां सत्यंब्रह्मतस्मादुदयोस्याः तस्यांस्नातःनिस्नातःअत्रयुपेक्षग्र
हणमर्थःपूयतेशुध्यतिकः पुण्यकर्मापुण्यमपिकिंनित्यमलोभएववैराग्यान्नपरंपुण्यमित्यर्थः २१
नदींसंसारनदींजन्मदुर्गाणिसंतरमोक्षंप्राप्नुयतस्वस्त्यर्थः २२ धृत्येतिकामंअशनायांचधैर्येणजि
त्वाशिश्नोदरंरक्षेन्नरःतेन सम्यक्दृष्ट्वावस्त्रनामादानेनहस्तिपृतेस्थलेपादन्यासेनचपाणिपाद

आत्मानदीभारतपुण्यतीर्थासत्योदयाधृतिकूलादयोर्मिः तस्यांस्नातःपूयतेपुण्य
कर्मापुण्योह्यात्मानित्यमलोभएव २१ कामक्रोधग्राहवतींपंचेंद्रियजलांनदींना
वंधृतिमयींकृत्वाजन्मदुर्गाणिसंतर २२ प्रज्ञावृद्धंधर्मवृद्धंस्वबंधुंविद्यावृद्धंवयसा
चापिवृद्धं कार्याकार्येपूजयित्वाप्रसाद्यपः संपृच्छेन्नसमुह्येत्कदाचित् २३ धृत्याशि
श्नोदरंरक्षेत्पाणिपादंचचक्षुषा चक्षुःश्रोत्रेचमनसामनोवाचंचकर्मणा २४ नित्यो
दकीनित्ययज्ञोपवीतीनित्यस्वाध्यायीपतितान्नवर्जीऋतंब्रुवन् गुरवेकर्मकुर्वन्न
ब्राह्मणश्च्यवतेब्रह्मलोकात् २५ अधीत्यवेदान्परिसंस्तीर्यचाग्नीनिष्ट्वायज्ञैःपालयि
त्वाप्रजाश्च गोब्राह्मणार्थेशस्त्रपूतांतरात्माहतःसंग्रामेक्षत्रियःस्वर्गमेति २६ ॥

चक्षुषारक्षेत् चक्षुःश्रोत्रेमनसैवपरस्त्र्यादिभ्यःकुशब्देभ्यश्चव्यावर्तनेनरक्षेत् मनोवाचंचकर्मणासंय
मनेनरक्षेत् २४ नित्योदकीनित्यंयथाकालंस्नानाचमनपरः २५ परिसंस्तीर्याग्नीन्परिस्तरणैःएतेना
ग्निहोत्रमुपलक्षयतीतिनारायणः परिसंस्तीर्येतिसप्तहौत्रस्थानेत्राधायेत्यर्थः ततोयज्ञैरिष्ट्वाशस्त्रैः १०५
पूतःअंतरात्माचित्तंयस्यगोब्राह्मणार्थेमरतइत्यर्थः संग्रामेहतोवाक्षत्रियः २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अधीत्यवेदशास्त्रमितिशेषः त्रेताअग्निश्रयंतस्याः पूतंधूमंआघ्रायपुण्यंपावनंप्रेत्यमृत्वाः ४७ ४८ क्षा
त्राद्धर्मात्पृथ्वीपालनरूपात्राज्यादितियावत्राजधर्मेराज्ये ४९ मांअनुशाससि १ २ इतिवि

वैश्योऽधीत्यब्राह्मणान्क्षत्रियांश्चधनैःकालेसंविभज्याश्रितांश्च त्रेतापूतंधूम।
माघ्रायपुण्यंप्रेत्यस्वर्गेदिव्यसुखानिभुंक्ते ४६ ब्रह्मक्षत्रंवैश्यवर्णंचशूद्रःक्रमे
णैतान्न्यायतःपूजयानः तुष्टेष्वेतेष्वव्यथोदग्धपापस्त्यक्त्वादेहंस्वर्गसुखानि।
भुंक्ते। ४७ चातुर्वर्ण्यस्यैषधर्मस्तवोक्तोहेतुंचात्रब्रुवतोमेनिबोध क्षात्राद्धर्मा।
द्धीयतेपांडुपुत्रस्त्वंराजन्राजधर्मेनियुक्त ४९ धृतराष्ट्रउ० एवमेतद्यथात्वं।
मामनुशाससिनित्यदा ममापिचमतिःसौम्यभवत्येवंयथात्थमा। १ सात
बुद्धिःकृताप्येवंपांडवान्प्रतिमेसदा दुर्योधनंसमासाद्यपुनर्विपरिवर्त्तते २
नदिष्टमभ्यतिक्रांतुंशक्यंभूतेनकेनचित् दिष्टमेवध्रुवंमन्येपौरुषंतुनिरर्थ
कं ३ इत्युद्योगप्रजागरे ४० धृतराष्ट्रउ० अनुक्तंयदितेकिंचिद्वाचाविदुरविद्य
ते तन्मेशुश्रूषतोब्रूहिविचित्राणिहिभाषसे १॥

दुरवाक्ये ५० एवंब्रह्मविद्याधिकारिविशेषणीभूतासाधनसंपत्तिःसम्यगुपपादितातत्रब्रह्मा।
वित्प्रसंगात्यतोयतोनिवर्ततइत्यादिनासंक्षेपेणब्रह्मविद्यासूचितातांविस्तरेणश्रोतुका

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
९८

मृत्युर्जन्ममरणप्रवाहात्मकः संसारः २ तेनभयं गुह्यान्गोप्यान्योगकलादीन्प्रकाशान्प्राणादी
न्हृदयसंश्रयान्धर्मान्प्रवक्ष्यति ३ वर्णाश्रमक्रममसलंघ्यब्रह्मविद्यानोपदिशेदित्याख्यायि

विदुरउ॰ धृतराष्ट्रकुमारोवेदयः पुराणः सनातनः सनत्सुजातःप्रोवाचमृत्युर्नास्ती
तिभारत १ सतेगुह्यान्प्रकाशांश्चसर्वान्हृदयसंश्रयान् प्रवक्ष्यतिमहाराजस
र्वबुद्धिमतांवरः ३ धृतराष्ट्रउ॰ किंत्वंनवेदतद्भूयोयन्मेब्रूयात्सनातनः त्वमे
वविदुरब्रूहिप्रज्ञाशेषोस्तिचेत्तव ४ विदुरउ॰ शूद्रयोनावहंजातोनातोन्यद्व
क्तुमुत्सहे कुमारस्यतुयाबुद्धिर्वेदतांशाश्वतीमहं ५ ब्राह्मींहियोनिमापन्नः
सुगुह्यमपियोवदेत् नतेनगर्ह्योदेवानांतस्मादेतद्ब्रवीमिते ६ धृतराष्ट्रउ॰
ब्रवीहिविदुरत्वंमेपुराणंतंसनातनं कथमेतेनदेहेनस्यादिहैवसमागमः ७
वैशंपायनउ॰ चिंतयामासविदुरस्तमृषिंसंशितव्रतं सचतच्चिंतितंज्ञात्वाद
र्शयामासभारत ८ सचैनंप्रतिजग्राहविधिदृष्टेनकर्मणा सुखोपविष्टंवि
श्रांतमथैनंविदुरोब्रवीत् ९ ॥

कामस्त्वेनाहंकिंत्वमित्यादिना सनातनापरनामासनत्सुजातः ४८ विधिदृष्टेनशास्त्रादवगते

॥ ८ ॥ ९८

१९ विद्याप्राप्तिफलमाह यंश्रुत्वेति ॥ विषहेरन्नेवापेरन्प्रमर्षः प्रसहिष्णुता उद्भवउत्कृष्टैश्वर्यं त
योरद्यौतयोरीहितंभूतेपापपुण्येच १२ इतिनैलकंठीयेभारतभावदीपेउद्यो॰ प्रजागरार्थप्रकाशः समा
प्तः ४० उद्योगपर्वणिसनत्सुजातीयेभाष्यकारादिभिर्व्याख्यातान्संप्रतितनपुस्तकेपुस्थितानन्पा
ठान्श्लोकांश्चगुणायसंहारन्यायेनैकीकृत्यव्याख्यायते ततोराजेति मनीषीशास्त्रसंस्कृतमनो
धावान्रहितेएकांतेपरमांबुद्धिंपरविद्यांग्रथपरायपानदत्त्वामधिगम्यतइतिश्रुतिप्रसिद्धांप

भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसः योनशक्योमयावक्तुंतमस्मैवक्तुम
र्हसि १९ यंश्रुत्वायंमनुष्येंद्रः सर्वदुःखातिगोभवेत् लाभालाभौप्रियद्वेष्यौ यथै
नंनजरांतकौ ॥ विषहेरन्भयामर्षौक्षुत्पिपासेमदोद्भवौ अरतिश्चैवतंद्रीचका
मक्रोधौक्षयोदयौ १२ इत्युद्योगेप्रजागरेनवमोध्यायः विदुरवाक्यानिसमाप्तानि धृ॰
वैशंपायनउ॰ ततोराजाधृतराष्ट्रोमनीषीसंपूज्यवाक्यंविदुरेरितंतत् सनत्सुजातंर
हितेमहात्मापप्रच्छबुद्धिंपरमांबुभूषन् १ ॥ ७ एतेनविषयोदर्शितः प्रयोजनंदर्शयतिम
हात्माबुभूषन्निति परंब्रह्मभवितुमिच्छन्ब्रह्मवेदब्रह्मैवभवतीतिब्रह्मज्ञानस्यब्रह्मभावफलक
त्वश्रवणात् विदुरेरितंवाक्यंसनत्सुजातः प्रोवाचमृत्युर्नास्तीतिभारतेतिमृत्युप्राप्तिरस्यबंधस्या
भावंश्रुत्वाप्रतिसृज्याः संगत्वात्कपटवतोपिममपापात् भयंनास्तीतिसंतोषंप्राप्यतेनज्ञानं।
स्यसर्वकर्मोन्मूलहेतुत्वंयथोक्तंहत्वापिसइमांल्लोकान्नहंतिननिबध्यतइति १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अमृत्युमेवाह सनत्सुजातेति मृत्युरिति ध्रुवं जन्म मृतस्य चेति साहचर्याज्जन्ममरणप्रवाहरूपो बंधउच्यते
स नास्तीति तव प्रकर्षेण वादं पूर्वोक्तं विदुरादीनां मुखात् शृणोमि हे सनत्सुजात सर्वदा सत्सुजाते
जनायस्य नित्यकुमारत्वेन जरामरणविवर्जितेत्यर्थः श्रुतिश्च न तदा हर्ननिरोधो न चोत्पत्तिर्न
बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थतेति तथा अमृत्यवे मृत्योरभावाय एक
शतं वर्षाणि मघवा प्रजापतौ ब्रह्मचर्यमुवासेति बंधनिवृत्त्यर्थं यत्नश्च श्रूयते न ह्यसतो निरस्य
निवृत्तस्य निवृत्त्यर्थं यत्नो युज्यते तत् अनयोः पक्षयोः कतरत् मतं सत्यं तद्ब्रूहीति शेषः २ यत्कर्म
णा ब्रह्मचर्येण मृत्युर्नास्तीति तेन सत्यस्य साधनेन नाश इति अमृत्युः इष्टवानसि यच्चापरं मृत्युः स्व

धृतराष्ट्र उ॰ सनत्सुजात यदिदं शृणोमि न मृत्युरस्तीति तव प्रवादं देवासुरा।
ह्याचरन् ब्रह्मचर्यममृत्यवे तत्कतरन्नु सत्यं २ सनत्सुजात उ॰ अमृत्युः कर्म
णा यच्च मृत्युर्नास्तीति चापरे शृणु मे ब्रुवतो राजन्यथैतन्मा विशंकिथाः ३
उभे सत्ये क्षत्रियैतस्य विद्धि मोहान्मृत्युः संमतोयं कवीनां प्रमादं वै मृत्युमहं ब्रवी।
मि तथाऽप्रमादममृतत्वं ब्रवीमि ४ ॥ रूपत एव नास्तीत्यमृत्युः एतत् एतयोः पक्षयोः प
रस्परविरुद्धत्वं मा विशंकिथा मा मंस्थाः अमृत्युः कर्मणा केचिदिति पाठे कर्मसाध्यममृतत्वं उक्तं।
ज्ञानसाध्यमिति पक्षद्वयोपन्यासः तयोश्च कर्मसमुच्चयपक्षाश्रयेणाविरोधाभावं मन्वानो मा वि
शंकिथा इति ब्रवीतीत्यर्थः ३ विरोधमेवाह उभे इति एतस्य एकस्यैव पुंसोऽवस्थाभेदेन उभे अपि स
त्ये एव हे क्षत्रिय विद्धि अविद्यावस्थायां बंधः सत्यः कर्मनाश्यश्च विद्यावतो हि रज्ज्वुरगवत्कालत्र
येपि नास्ति मोहाज्ज्ञानसमानसत्ताज्ञानमात्रेण निवृत्तिर्भवतीति भावः आद्यप्रवृत्ते इति पाठे उभे अपि स
ते अनादिनी नित्ये इत्यर्थः सिद्धांतमाह मोहादिति निर्मोहानां तु नास्त्येव मृत्युरित्यर्थः मोह विद्वेण

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रमादात्अज्ञानात् असुराः असुरस्वभावाः कामक्रोधाद्यसुरवृत्तिभिराक्रांताः पराभवन्मृत्युवशा अ
भवन् तथा अप्रमादात् ज्ञानात् ब्रह्मभूताः पूर्वं ब्रह्मैव संतः अविद्यया अब्रह्मत्वमात्मनो मन्यमानाः
विद्यया पुनर्ब्रह्मैव भवंति ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः सुराश्चेति पाठे सुराः अप्रमादमादिमंतः
ब्रह्मभूताः ब्रह्मभावं गता इत्यर्थः मृत्युरज्ञानं जंतून् प्राति संसारसंकटे पातयति न तु व्याघ्र इव हृदय
नेकार्यमेवास्य रूपेण न स्वरूपमित्यर्थः हि यतः अस्य रूपं निरीक्ष्यमाणमपि न उपलभ्यते नहि र
ज्जुरगोपादानमज्ञानं उरगवद्दृष्टुं शक्यमित्यर्थः ५ ननु यदि मृत्योः रूपं नोपलभ्यते तर्हि तस्य
त्वे किं प्रमाणमत आह यममिति अतः अज्ञानात् अन्यं तं मृत्योरन्यं यमसंज्ञं एके मूढाः मृत्युमा

प्रमादाद्वै असुराः पराभवन्नप्रमादाद्ब्रह्मभूता भवंति नैव मृत्युर्व्याघ्र इवात्ति जं
तून् ह्यस्य रूपमुपलभ्यते हि ५ यमं त्वेके मृत्युमतोन्यमाहुरात्मावसन्नममृतं ब्र
ह्मचर्यं पितृलोके राज्यमनुशास्ति देवः शिवः शिवानामशिवोशिवानां ६ ॥

हुः अस्य सत्यवतः कायात्पाशबद्धं वशं गतं अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति आ
स्य व्यतिरेकमृत्युत्वेन आत्मनि कल्पितत्वमाह आत्मावसन्नमिति आत्मनि प्रतीच्येव अवसन्नं
लीनं तेन रज्जूरगादिवत् यमादिकमपि आत्मनि कल्पितमेवेत्यर्थः आत्मावासमिति पाठे आ
त्माश्रयमित्यर्थः यमप्रशमोपायमाह अमृतमिति ब्रह्मचर्यं ब्रह्मणि चर्या आत्मानुसंधानं
निरस्ताखिलकल्पनाजाले अमृतत्वमोक्षहेतुः योगिनां यमभयं नास्तीत्यर्थः न तस्य रोगो न जरा
न मृत्युरिति श्रुतेः ननु कल्पितस्य यमस्य मृगजलादेरिवार्थक्रियाकारित्वं न युक्तमत आह पि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰
टी॰
९८

रलोक इति याहृष्ठोयतस्तादृष्ठो बलिरितिन्यायेन आत्मनिकल्पितगारुडभावस्य विषनिवर्त
कत्ववत् तत्राप्यर्थक्रियाकारित्वमस्तीतिभावः अत्रयुक्तिमाह शिवइति शीतोष्णादिवदेक ।
स्मिन्सत्यस्य विरुद्धधर्मद्वयस्यासंभवात् तस्मिन्नेव शिवत्वाशिवत्वेरज्ज्वां सर्पदंडादिवत्क
ल्पितेइत्यर्थः ४ अस्येति अस्य यमस्य आदेशादाज्ञातः क्रोधादिरूपोमृत्युर्मरणहेतुर्निस्सरत्ते
उद्भवति अत्रयथाऽज्ञानाभिमानिनीदेवतायमः एवंक्रोधाद्यभिमानिन्योधिदेवताः यम
स्यदासभूताः संतीत्यधिदैवमित्यर्थः अध्यात्मंतु अज्ञानादेव क्रोधादयउद्भवंतितत्तोम्रिय
तइत्यर्थः ननुयद्यात्मावासमज्ञानं तर्हि तत् आत्मनः पृथक्सिद्धमपृथक्सिद्धंवा अ
त्येमुक्तानामपिपुनर्वंधापत्तिः आद्ये सांख्यप्रकृतिवदनापत्तिरित्याशंक्याहअस्येति

अस्मादेषात्त्रिःसृतेनराणांक्रोधःप्रमादोलोभरूपश्चमृत्युः अहंगतेनैवच
रन्विमार्गान्नचात्मनोयोगमुपैतिकश्चित् ५ ॥

नहि नराणां अहंगतेनैव विमार्गान्चरन्निति जीवानां योऽहंकारस्तेन सहगतं गमनं अहंका
रसाहित्यं तेन विमार्गान् अनात्मगान् मार्गान् विषयान् भुंजानइत्यर्थः मुक्तौ अज्ञानाश्रय ।
स्य अहमर्थस्य चिदाभासस्य नष्टत्वात् नशुद्धादात्मनः सकाशादज्ञानं पुनरुद्भवेति नापिष्ट
थगवतिष्ठतीतिभावः ननुसुषुप्तावहंकारलयेपिदृश्यतेइत्यत आहनचेति तदानीम
पिसूक्ष्मस्याहमर्थस्य सत्त्वान्नकश्चित् ज्ञानं विना आत्मयोगं उपैति स्वरूपं प्राप्नोतीत्यर्थः अतोऽहं
कारनाशात्मा आत्मनः क्रोधादिरूपस्यमृत्योरुद्धयोयुज्यतएवेत्यर्थः अस्मादेवइतिपाठेअस्मे

स्मिन्विनाश्यमज्ञानस्याधिष्ठानंअहंकारस्तस्मात्त्रिःस रत्तइतिपूर्वेणवन ५ ॥ ९८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मयोगाभावे दोषमाह तेइति तेनराः मोहिताः क्रोधादिभिरिति शेषः तद्वशो क्रोधादिरूपस्सन्मृत्योर्व
शे वर्तमानाः संतः इतोऽस्माल्लोकात् प्रेताः गताः संतः तत्र यमलोके पुनरिमसकृद्भूमनस्त्वनार्थपत
निगच्छंति न कदाचिदिति शेषः ततस्तान् तत्रगतान् अनु देवा इंद्रियाणि विप्लवं नेतनैव गच्छंति
तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीति श्रुतेः स्वः प्राणस्ता
ग इत्यनुशासनाच्च मत्स्वरज्ञानं मरणसंज्ञामपि लभते अयं भावः मत्स्वरूपेण विस्मृतिरिति स्वज्ञे
रज्ञानं प्रत्यगानंदविस्मारकत्वेन यमस्य प्रत्यक्त्वेन गृहीतदेहस्य च विस्मारकत्वेन साम्यात्तद्य
मपि मत्स्वरूपाज्ञानेति तथाच मृत्योर्मत्स्वरज्ञानं गौणोयम इति ८ ननु प्राक् मरणात् मत्स्वभयम्

ते मोहितास्तद्वशे वर्तमाना इतः प्रेतास्तत्र पुनः पतंति ततस्तान्देवा अनु विप्लवं
ते प्रेतो मत्स्वमरणात्व्यामुपैति ८ कर्मोदये कर्मफलानुरागास्तत्रानु ते यांति न तरंति
मृत्युं सदर्थयोगानवगमात्समंतात्प्रवर्तते भोगयोगेन देही ९ ॥

तस्मात्तत्कृतकृत्यतैवास्ती
त्याशंक्याह कर्मोदय इति भोगप्रदस्य कर्मणः उदये सति कर्मफलभोगे अनुरागो येषां ते तथा
भूताः तत्र स्वर्गादौ अनुयांति भोगवासनया पूर्वदेहस्य त्यागं गच्छंति अतो मृत्युं न तरंति देही
देहनाशमात्रेण न मुच्यते इत्यर्थः तथाच श्रुतिः येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नाय
मस्तीति चैके इति मृतस्यास्तित्वनास्तित्व उपलब्धियोनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः स्था
णुमन्येनुसंयांति यथाकर्म यथाश्रुतमिति अस्तीत्येवोपलब्धव्य इति चास्तित्वं देहांतरप्रा
प्तिं चाह अत्र हेतुः सदर्थेति सतब्रह्मनतत्प्राप्त्यर्थो योगः सदर्थयोगः यमाद्यष्टांगोपेतः तस्मान्नव

गमादत्राभात्समंतात्कर्ध्वोपलिर्यग्योनिषु भोगयोगेन भोगलि
प्सया देही देहाभिमानी प्रवर्तते ९॥

भोगयोगमेवनिंदति तद्यथा इति यत्त्वस्य पुंसः मिथ्याभूतेषु अर्थेषु शब्दादिविषयेषु योगो रागस्त
दर्थं गतिः प्रवृत्तिः नित्या स्वाभाविकी न देव इंद्रियाणां महामोहनं अर्थानां मिथ्यात्वसंकल्पक
र्तृत्वात् यदाहाक्षपादः दोषनिमित्तं रूपादयो विषयाः संकल्पकृता इति दोषा रागादिः मिथ्या
र्थयोगेन विषयसंगेन अभिहतांतरात्मा व्यथितचित्तः सन् विषयान् स्मरणपूर्वकं उपास्ते है
तोरात्मप्रत्ययः स्मरणमेव विषयोपासनाहेतुरतस्तेषां विस्मरणमेव कर्तव्यमित्यर्थः ८ तस्म
रणे दोषमाह अभिध्येति अभिध्या विषयस्मरणं प्रथमं ततः कामः तस्याभिलाषः केनचि

तद्धेतुमहामोहनमिंद्रियाणां मिथ्यार्थयोगेऽस्य गतिर्हि नित्या मिथ्यार्थयोगाभि
हतांतरात्मा स्मरन्नुपास्ते विषयान्समंतात् ९ अभिध्या वै प्रथमं हंति लोकान्का
मक्रोधावनुगृह्याशु पश्चात् एते बालान्मृत्यवे प्रापयंति धीरास्तु धैर्येण तरंति मृ
त्युं ११ सोऽभिध्यायन्नुत्पतितान्निहन्यादनादरेणाप्रतिबुध्यमानः नैनं मृत्युर्मृत्युरि
वात्ति भूत्वा एवं विद्वान्यो विनिहंति कामान् १२ ॥ त्तन्निमित्तेन तत्प्रतिहतो क्रोधः एते अभि
ध्यादयः एवं क्रमेण बालान् अजितचित्तान् मृत्यवे मोहाय प्रापयंति ये तु धीराः निर्जितचित्ताः
निष्कामास्ते मृत्युं तरंति पाठांतरे धर्मयोगाभ्यासं चरंति ११ स इति सः मृत्युतरणकामः योगी वा ॥ ५ ॥
अभिध्यायन् आत्मानं चिंतयन् उत्पतितान् कामानेव निहन्यात् हननोपायमाह अनादरेण तु।
च्छत्वबुध्या पथि पतिततृणवत् स्त्र्यादीन् प्राप्तानपि अबुध्यमानः अचेतयन् यः एवं विद्वान्भूत्वा
कामान्निहंति एनं पुरुषं मृत्युः रक्तान् मृत्युरिव यमः इव नात्ति न ग्रसते निष्कामस्य मृत्युभयं नास्ती

स्यकामंनिंदतिकामानुसारीति विषयार्थीविषयमनुविनश्यति यथोक्तं कुरंगमातंगपतंगभृंगामी
नाहताःपंचभिरेवपंचेति फलितमाह कामानिति विषयांस्त्यक्त्वारजोदुःखरूपंयत्किंचित्सर्वंधुनु
तेनाप्यायति १४ विपक्षेदोषमाह तमइति अयंकामःभूतानांतमःअज्ञानंतत्कार्यकरत्वात् यतः
अप्रकाशोनास्तिप्रकाशोविषयविवेकोयस्मिंस्तथा अतएवनरकवत्दुःखदःएतदेवाह
मुह्यंतइति यथामुह्यंतोमदिरामत्ताःगच्छंतइतिपाठेग्रहगृहीताःपथिगच्छंतःश्वभ्रवत्गर्ते
गुरुंदेशंधावंति तथाकामिनःसंसारेवर्तमानाःसुखंसुखप्रदंभार्यादिंप्रतिधावंतीत्यर्थः १५

कामानुसारीपुरुषःकामाननुविनश्यति कामान्व्युदस्यधुनुतेयत्किंचित्पुरु
षोरजः १४ तमोऽप्रकाशोभूतानांनरकोऽयंप्रदृश्यते मुह्यंतइवधावंतिगच्छं
तःश्वभ्रवत्सुखं १५ अमूढवृत्तेःपुरुषस्येहकुर्यात्किंवैमृत्युस्तार्णइवास्यव्याघ्रः
अमन्यमानःक्षत्रियकिंचिदन्यन्नाधीयीतनिर्णुदन्निवास्यचायुः १६ ॥

अमूढवृत्तेःकामेनानभिभूतचित्तस्यपुंसस्तृणमयव्याघ्रवत्मृत्युर्यमःकिंकुर्यान्नकिमपी
त्यर्थः यस्मादेवंतस्मात्अस्यकामस्यआयुःजीवनंमूलाज्ज्ञानेनिर्णुदन्अपनेष्यन्अन्यत्किं
चित्काम्यमानस्रगादिकंअमन्यमानःअगणयन्नाधीयीतनस्मरेत् तदुक्तंवृत्त्याविषयविस्म
रणामेवकाममूलोच्छेदहेतुरित्यर्थः यदाहवसिष्ठः भ्रमस्यजागतस्यास्यजातस्याकाशवर्ण
वत् अपुनःस्मरणंमन्येसाधोविस्मरणंवरं तथापितवनस्यास्यसर्वविस्मरणाहृतेइतिच १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स॰भा॰
३॰टी॰
१९

यमंत्वेके इत्यत्र आत्मावसन्नमितियमोऽध्यात्मनिकल्पितः समुक्तं तद्व्याचष्टे सक्रोधलोभाविति य
त्वच्छरीरे एषः अहंप्रत्ययविषयः अंतरात्मा बाह्यात्मानं शरीरमपेक्ष्यान्तरः चिदचिद्ग्रंथिरूपो
जीवः समोहवान् अतस्मिंस्तद्बुद्धिर्मोहः अनात्मनि देहादावात्मबुद्धिः विपर्ययरूपं ज्ञानं तद्वा
न् क्रोधलोभमृत्युरूपो भवति शुकनलिकान्यायेन स्वयं बंधहीनोऽपि अज्ञानात्स्वात्मानं बद्धं म
न्यते तेन कामादिवशो भवतीत्यर्थः उपसंहरति एवमिति जायमानं मोहादिति शेषः मोहवि
तेयिनिज्ञाने तिष्ठन्निष्ठावान् यमान्न बिभेति तत्र दृष्टांतः विषयेगोचरे तस्य ज्ञानस्य मृत्युबंधः विन

सक्रोधलोभो मोहवानंतरात्मा स वै मृत्युस्त्वच्छरीरे य एषः एवं मृत्युं जायमानं वि
दित्वा ज्ञाने तिष्ठन्न बिभेतीह मृत्योः विनश्यते विषये तस्य मृत्युर्मृत्योर्यथा विषयं प्रा
प्य मर्त्यः ९ धृतराष्ट्र उ॰ यानेवाहुरिज्यया साधुलोकान् द्विजातीनां पुण्यकृतां सना
तनान् तेषां परार्थं कथयंतीह वेदा एतद्विद्वान्नैति कथं नु कर्म १ ॥

श्यते मृत्योर्यमस्य मर्त्यः देहः अज्ञानकृतो बंधो ज्ञानेनैव नश्यति न कर्मणेति प्रच्छकार्थः ९
अत्र शंकते यानिति साधु इज्ययासोपासनेन अश्वमेधादिना कर्मणा पुण्यकृतमान् इह लोका
द्यपेतया सह पुण्यान् सनातनान् व्यवहारापेतान् यानित्यान् लोकान् सत्यलोकाद्यान् इह वे
दे आहुः वेदविदः तेषां लोकानां परार्थं परार्थत्वं मोक्षप्रापकत्वं वेदाः कथयंति एतत्कर्मणा
क्रमसक्तिहेतुत्वं विद्वान् जानन् कर्म कथं नु न एति उपैति न शरणीकरोति कर्मभिरेव
मोक्षसिद्धौ किं ज्ञानेनेति भावः १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समायतेएतमिति अविद्वान्एवंतदुक्तक्रमेणतत्रमोक्षापदेशंयाति तथैवअर्थजातंभोग।
मोक्षाख्यप्रयोजनसामान्यवेदाःवदंति तथाअनीहोनिष्कामःपरात्मापरंअनात्मानंदेहादि
कंअविद्ययाआत्मत्वेनगृह्णन्जीवःपरंनिर्गुणात्मानंआयातिआभिमुख्येनप्राप्नोतिनिष्का
मःतदुपाध्याकारतांमुक्त्वानिष्कलेनरूपेणावतिष्ठतइत्यर्थः अन्यथात्वसएवजीवःमार्गे
णसुषुम्नानाड्यामार्गान्तत्तल्लोकप्रापकान्निहत्यनिरस्यब्रह्मलोकद्वारापरंप्रयाति
तयोर्ध्वमायन्नमृतत्वमेतीतिश्रुतेः तथाचबृहदारण्यके तद्यथापेशस्कारीपेशसोमात्रा

सनत्सुजातउ॰ एवंह्यविद्वानुपयातितत्रतथार्थजातंचवदंति
वेदाः अनीहआयातिपरंपरात्माप्रयातिमार्गेणनिहत्यमार्गान् ९

मुपादायान्यन्नवतरंकल्याणतरंरूपंकुरुतेएवमेवेदंशरीरंनिहत्याविद्यांगमयित्वान्यन्न
वतरंकल्याणतरंरूपंकुरुतेपित्र्यंवागांधर्वंवादैवंवाप्राजापत्यंवाब्राह्मंवेतितुकामयमा
नःयोऽकामोनिष्कामआप्तकामोनतस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंतइति काम।
यमानस्यअस्माद्देहादुत्क्रांतस्यदेहांतरेयोनामस्वरूपत्वेनयतःस्वर्गादिकारहृष्टांतेनपित्र्यगां
धर्वादिरूपांतरकर्तृत्वमुक्त्वानिष्कामस्यपूर्णब्रह्मभावंगतस्यउत्क्रांतिर्निषिध्यते ९॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
१११

ननुजीवः परंप्राप्नोति चेदस्यस्यात्मनः योगात्मएवजीवत्वंप्राप्नोतीत्युक्तं भवति तच्चायुक्तं यतियो
स्यवस्यात्मत्वात्स्यस्यत्याशंकते कोसाविति तपरमात्मानेश्रजंजन्मादिहीनंपुराणंपुराणंपिनवमित्य
नेनपरिणामित्वेनिरस्तंताहृशंपरंकोसौनियुंक्तेयत्रियोगाद्दयंदुःखादिभाग्भवति नियोजकांतरं
सत्वेतस्याप्यन्य इतिपरानवस्थेतिभावः ननुपरएवनियोजकांतरंविनाइदंसर्वचेतनाचेतनंविश्वं
तत्सृष्ट्वातदेवानुप्राविशदितिश्रुतेःक्रमेणभवतीतिशंकतेसचेदिति एतद्दूषयति किंवेति अस्य
परस्यावाप्तकामतयानिष्कामस्यकिंवाकार्यंकर्तव्यमस्तिनकिमपीत्यर्थः प्रयोजनमनुद्दिश्य
नमंदोपिप्रवर्ततइतिन्यायेनप्रयोजनंविनापरेप्रवृत्तिर्नसंभवतीत्यर्थः ननुलोकवत्तुलीलाकै
वल्यमितिन्यायेनलोकेनिष्प्रयोजनापिचतुरंगादिक्रीडादृश्यतेतद्वत्परस्यापिलीलैवजगत्स्र
ष्टिप्रवेशादिकमित्याशंक्याहाथवेति चतुरंगादिक्रीडापिमुखार्थमेवक्रियतेनचपरस्यसुख
  ५८ ततराष्ट्रउ॰ कोसौनियुंक्तेतमजंपुराणंसचेदिदंसर्वमनुक्रमेण किंवास्यका
  र्यमथवासुखंवचतन्मेविद्वन्ब्रूहिसर्वंयथावत् ५९ सनत्सुजातउ॰ दोषोमहानः
  त्रविभेदयोगेह्यनादियोगेनभवंतिनित्याः ॥ लिप्यात्रिनचस्वात्मानंस्वयमेवसंकटे
पातयतःसुखंदुःखाभावोवास्तीतिनपरस्यस्वतःसृष्टौप्रवृत्तिःसंभवति नापितेनसहजीवस्या
भेदःसंभवति जीवपरयोर्भेदेतज्जीवादृष्टानुरोधेनराजवत्परोजीवभोगार्थंसृष्ट्यादौप्रवर्तते
स्वकृतमर्यादापरिपालनार्थंवेतियुज्यतेऽतः ननयोरभेदः संभवतीत्यर्थः ५९ उत्तरमाह दोषइति वि
भेदयोगेविशेषेणाभेदोययोस्तौविभेदौविभिन्नौतयोर्योगेअभेदेनएकोमहान्दोषः अन्यस्यान्यात्म
त्वासंभवात् अतोजीवपरयोस्तात्विकोभेदोनयुक्तइत्यर्थः किंतर्हि अनादियोगेनतत्अनंतशीलम
स्येत्यनादीभोगापवर्गैःस्थूलसूक्ष्मदेहद्वयात्मकानिलिंगानिसहयोगेनसंबंधेन पुंसःपरस्मात्स
काशात्नित्याःजीवाघटाकाशजलचंद्रादिन्यायेनभवंतितथातेनगेपाधिकेनभेदेनास्यपाधिक्य १११

तथाच श्रुतयः एक एव तु भूतात्मा भूते भूते प्रतिष्ठितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् यथा ह्ययं ज्यो।
तिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मा
घटसंवृतमाकाशं नीयमाने यथा घटे घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः इत्याद्याः औपाधिकं
जीवपरयोर्भेदं दर्शयंति एकधेति ईश्वररूपेण बहुधेति जीवरूपेण एक एव सूर्यः जलाशयतर
गवंदन्यायेन प्रकाशत इत्याद्यश्रुतेरर्थः एवं च जीवेशभेदप्रयुक्तः सर्वोपि व्यवहारः संसारिणश्च
परांतरकल्पनावतरतीति सिद्धं कथंभूतेन अनादियोगाख्येन तेन संबंधेन अनादियोगेन अना
दिना प्राप्तिरूपेणाज्ञानेन हेतुना योगः संबंधो यस्य सोऽनादियोगस्तेन भवंति जन्मादिभाज इति शेषः
पुंसः पुमांसः अज्ञानयोगोऽस्य तेन योगा इत्यर्थः २९ जीवेशयोर्भेदं निरस्य प्रपंचस्यापि परमेश्वरा

तथात्वनाविकृतमपैति किंचिदनादियोगेन भवंति पुंसः २९ यएतदात्मा भगवानस
नित्यो विकारयोगेन करोति विश्वं तथाच तच्छक्तिरिति स्मतेतथार्थयोगे च भवे

न्तश्शक्तसत्ववारयुति यएतदेति वाग्वाङ्मयपरमार्थत्रयं तत्पुंस्त्वं विपेयापेत्या ॥ निवेशः ३०॥
ननु परिदृश्यमानं जगत् यज्जगदिव भाति स नित्योऽविकारी भगवान् सर्वैश्वर्यसंपन्नः परमात्मैव वा
इवशब्दो मिथ्यात्वद्योतकः तथाहि यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति अहमयं स्वप्ने गजमिवा
द्राक्षमिति वेदे लोके च मिथ्यार्थानुवादे इवशब्दः प्रयुज्यते श्रुतिश्च इदं सर्वं यदयमात्मा ब्रह्मैवेदं।
विश्वं सर्वं खल्विदं ब्रह्मेत्याद्या प्रपंचस्य ब्रह्मानन्यत्वमाह विकारोऽनंतमायायात योगेन विश्वं करोति
स्वप्नेंद्रजालवन्नु कनककुंडलवज्जगद्ब्रह्मणोः परमार्थतो विकारविकारिभावोस्ति ब्रह्मणो व्यति
रेकाद्यनेरित्यर्थः ननु नित्यपरिणामि च प्रधानं स्वतंत्रमेव जडं जगतो जडमेव कारणमस्तु साह
प्रधानं न तच्चेतनं वैलक्षण्यादिन्मार्गो वाह तथाच तच्छक्तिरिति तथाच तेनैव प्रकारेणास्वामप्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
११२

परस्य शक्तिर्विविधैव श्रूयत इति च न तु भोग्यत्वात् शक्तिः आत्मनः स्वं भोक्तृत्वात् आत्मा तत्स्वामी तथा च तयो
र्भेद इत्याशंक्याह तदर्थमिति शक्तिर्हि न शक्तिमतः पृथग्दृष्टा वह्नेरिव दहनप्रकाशनशक्तिः वेदाश्चापि
बहु स्यां प्रजायेयेति सच्च त्यच्चाभवदित्यादयः चकाराल्लोकः शक्तिग्रहोऽपि तादृशार्थयोगे शक्तिश
क्तिमतोरभेदेन संबंधे प्रमाणं भवन्तीत्यर्थः ॥ एवं जीवेशयोरभेदात् जगतो मिथ्यात्वात् जगज्जन्मा
दिनिमित्तभूतायाः प्रकृतेः ब्रह्मानन्यत्वाच्च ब्रह्माद्वैतं सिद्धं तेन मृत्युर्नास्तीति पृष्टः स्थितः यद्ये
षां च मते कर्मणां मृत्युनाशकत्वं तेषामपि क्रममुक्तिप्रणाड्या कर्मणां मोक्षहेतुत्वं च स्थितं येके
चित्तु अस्मिन्मोक्षनिमित्तं धर्मान् अग्निहोत्रादीनि कर्माणि नाचरन्ति किंतु मोक्षार्थं संन्यासमेव कुर्व
न्ति येके चित्तु क्रममुक्त्यर्थं कर्माणि उपासनासहितानि कुर्वन्ति येषां तु नाहं पृच्छामि महान्तु धर्मो नास्ति

धृतराष्ट्र उ॰ यस्मिन्धर्मानाचरन्तीह केचित्तथाधर्मान्केचिदिहाचरन्ति धर्मः पापेन
प्रतिहन्यते स्विदुताहो धर्मः प्रतिहन्ति पापं ॥ सनत्सुजात उ॰ उभयमेव तत्रोपभुज्य
ते फलं धर्मस्यैवेतरस्य च तस्मिन्स्थितो वाप्युभयं हि नित्यं ज्ञानेन विद्वान्प्रतिहन्ति ॥

किंतु अल्प एवाग्निहोत्रादिर्नित्यानुष्ठानात्मकोऽस्ति तेषामपि स धर्मः पापेन रागादिदोषेण हन्यते
उत धर्म एव पापं हन्तीति प्रश्नार्थः ॥ उत्तरमाह उभयमिति तत्र मोक्षे उभयं संन्यासः सोपासनक
र्म च उपयुज्यते तथा धर्मस्य फलं स्वर्गः चित्तशुद्धिर्वा इतरस्य अधर्मस्य पापस्य नित्यकर्मत्या
गस्य वा फलं नरकः उपभुज्यत इति इदमेव संग्रहवाक्यं विवृणोति तस्मिन्स्थितो वा इति द्वाभ्यां उभ
यं संन्यासः सोपासनं कर्म च तस्मिन्मोक्षे स्वस्वरूपे स्थितो स्थितिनिमित्तं नित्यं अविचलं वा प्रा
र एवाप्यः तयोर्विशेषमाह ज्ञानेनेति संन्यासपूर्वकेण ज्ञानेन ब्रह्मविद्यया सिद्ध इति स्वनि
र्द्वैतं ब्रह्म प्रतिहन्ति अनृतजडदुःखादिप्रातिकूल्येन सच्चिदानन्दात्मकं गच्छति प्राप्नोति हन्तेर

११२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तथा सोपासनेन कर्मणा अन्यथा सिद्धाद्विपरीतं साध्यं पुण्यं प्रशस्तं देवतादिभावं उपैति यतः देही देहाभि
मानी भवति तथा गतं तेन प्रकारेण स्थितं सिद्धं नरदेहाभिमानजं पापमपि कदाचित् उपैति देवभावे
प्राप्तोपि कदाचिन्मुच्यते ऽन्यथा जयविजयादिवत् ततो अपूर्वमपीति ज्ञानमेव श्रेष्ठमिति भावः २४ फलं
धर्मस्यैवेतरस्य चेत्सुतरां विवृणोति गत्वेति उभयं पुण्यस्य पापस्य च फलं स्वर्गनरकाख्यं तत्र प्राप्य
रंतयित्वा गत्वा प्राप्य पुनरस्मिंल्लोके कर्मणा पूर्वसंस्कारानुगुणेन तत्तद्योग्यचिते न युज्यते योगं प्रा
प्नोति कर्म कृत्वा तत्फलं भुक्त्वा पुनः कर्मैव कुरुते तेन कर्मपाशान्न मुच्यत इत्यर्थः यद्यप्येवं तथापि
सचापि कर्मयोगी कर्मणा धर्मरूपेण पापं प्रणुदति दूरीकरोति विद्वान् मूढस्तु कर्मणः फलं स्वर्गं

तथा ऽन्यथा पुण्यमुपैति देही तथागतं पापमुपैति सिद्धं २४ गत्वोभयं कर्मणा
भुज्यते स्थिरं शुभस्य पापस्य स चापि कर्मणा धर्मेण पापं प्रणुदतीह विद्वान्धर्मो ब
लीयानिति तस्य सिद्धिः २५ [illegible] यानिहाहुः स्वस्य धर्मस्य लोकान्द्विजातीनां
पुण्यकृतां सनातनात् तेषां क्रमात्कथय ततोपि वान्यान्नेतद्धि त्वेतुमिच्छामि कर्म २६

पश्चादिकमेवेच्छतीति भावः अतो हेतोः धर्मो बलीयान् न त्वधर्मः इति हेतोः तस्य धर्मं कुर्वतः सिद्धिः काले
न रागादिदोषनाशद्वारा मोक्षोप्यस्तीत्यर्थः विद्धीति पाठे सिद्धिमिति शेषः २५ काम्यो धर्मः पापं च बंधहे
तुः नित्यधर्मजं पुण्यं मोक्षहेतुरिति मन्वानः पृच्छति यानिहाहुरिति अपाम सोमममृता अभूम अक्ष
य्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति यस्यैते ऽष्टाचत्वारिंशत्संस्काराः स ब्रह्मणः सायुज्यं सलो
कतां गच्छतीत्याद्याः श्रुतयः स्मृतयश्च पुण्यकृतां द्विजातीनां स्वस्य धर्मस्य फलभूतान् सनातनान्
नित्यान् लोकान् आहुः तेषां क्रमात् धर्मतारतम्येन उच्चनीचभावं कथय ततोपि वान्यान् निरतिशया

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नत्वसमानंदतृप्तान्बद्धत्वेप्रजायां मोदमानंश्चकश्यप एतत्स्वधर्मोदृप्यत् स्वाभाविकप्रकृतिवि
षयभूतंनिषिद्धंकाम्यंचकर्मवेदितंनश्छामि एतेनस्वस्यवैराग्यप्रदर्शितंप्रकृतेनतदुपयोगो
स्तीतिज्ञेयं २६ उक्तरमाह येषामिति व्रतेयमनियमादिरूपेविस्पष्टाअहमन्येभ्योऽधिकंयमादि
साधयिष्यामिअहमन्येभ्यइतिमत्सराः विश्वामित्रादिवत्तयस्याभिनिवेशइतियावत् बलव
तांमल्लादीनामिवतेयोगिनःब्राह्मणाःसगुणब्रह्मविदःइतःदेहात्प्रेत्यगत्वाब्रह्मलोकेतेज
स्विनःपूज्याभवंतिततोमुक्तिंचब्रह्मणासहप्राप्नुवंति तथाचस्मर्यते ब्रह्मणासहतेसर्वेसंप्रा
प्तेप्रतिसंचरेपरस्यांतेकृतात्मानःप्रविशंतिपरंपदमिति २७ सर्वधर्मश्रेष्ठस्ययोगधर्मस्य।

सनत्सुजात उ॰ येषांव्रतेथविस्पर्द्धाबलेबलवतामिव तेब्राह्मणाइतःप्रेत्यब्रह्म
लोकप्रकाशकाः २७ एषांधर्मेचविस्पर्द्धातेषांतज्ज्ञानसाधनं तेब्राह्मणाइतो
मुक्ताःस्वर्गंयांतित्रिविष्टपं २८ ॥

फलमुक्त्वाइज्यादिधर्मस्यफलमाह येषामिति अहमेवयज्ञादीन्सर्वोत्कर्षेणानुतिष्ठेयमि
तियेषामाग्रहः तेषांतत्यज्ञादिकंज्ञानस्यसाधनंविविदिषोत्पादनद्वाराभवति तथाच
श्रुतिःतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसानाशकेनेति त्रिविष्ट
पंदेवलोकंनतुसत्यलोकं विविदिषायर्थमपिकर्मानुतिष्ठतामानुषंगिकंस्वर्गफलम
पिभवतीत्यर्थः यदाहापस्तंबःतद्यथाम्रेफलार्थेनिमितेछायागंधइत्यनूत्पद्येतेएवं
धर्मंचर्यमाणमर्थाअनूत्पद्यंतइति २८ ॥

येतत्प्रकरणोक्तस्वार्थमत्वा धर्मार्थमेव धर्ममनुतिष्ठति न तु लाभार्थं नापि स्वर्गार्थं तत्रानाह तस्येति तस्य धर्म
स्य समाचारं सम्यगनुष्ठानं वेदविदो वैदिकत्वाभिमानिनो जनाः सम्यगित्याहुः न तु ततः किंचिदैहिकमा
मुष्मिकं वा फलं कामयंते एनं जनं एतानूजनान् भूयिष्ठं अत्यंतं नमस्येत नमानयेत् किंचित् मानये
देवेत्यर्थः तमेव विशिनष्टि बाह्यं आत्मनि वर्णाश्रमवयोवस्थाभिमानित्वात् बहिर्मुखं वैदिकत्वा
न्निष्कामत्वाच्च आभ्यंतरं यतः अकामहतस्य श्रोत्रियस्य कामो यं मे दत्तात् तस्मै न हिरण्यगर्भादेवा
दीनामानंदगणनायामुत्तरोत्तरं शतगुणितत्वेन सर्वोत्कृष्टस्यानंदः स एकः प्रजाप
तेरानंद इति प्रतिपर्यायं श्रोत्रियस्य चाकामहतस्य चेति आनंदोत्कर्षः श्रूयते २८ एवं योगिनामात्म

तस्य सम्यक् समाचारमाहुर्वेदविदो जनाः नैनं मन्येत भूयिष्ठं बाह्यमाभ्यंतरं जनं
२८ यत्र मन्येत भूयिष्ठं प्राहृषीव तृणोलपं अन्नं पानं ब्राह्मणस्य तं जीवन्नानुसं
ज्वरेत् ३० यत्राकथयमानस्य प्रयच्छत्यशिवं भयं अतिरिक्तमिवाकुर्वन् स श्रेयान्नेत

विविदिषूणां निष्कामवर्णाश्रमाभिमानिनां च धर्मः उत्तममध्यमाधमभावेन प्रोक्तः संप्रति श्रहिंसा यथा
विविदिषूणां निष्कामवर्णाश्रमाभिमानिनां च धर्मः ... यत्र मन्येतेति यत्र गृहे अन्नं पानं च ब्राह्मणस्य संन्यासिनः भूयिष्ठं मन्येतेति मन्येत जा
नानुयोगिधर्मानाह यत्र मन्येतेति यत्र गृहे अन्नपानं च ब्राह्मणस्य संन्यासिनः भूयिष्ठं मन्येतेति मन्येत जा
नीयात् तं तत् गृहं प्राप्य जीवेत प्राणयात्रां कुर्यात् न तु ... गृहस्थं पीडयेदिति भावः प्राहृषि वर्षा
कालेत्र णं च उल पाउ छिंनत तं तृणं तृणोदकमिति पाठांतरं नानुसंज्वरेत् तत्तत्त्र ... यात्रात्मानं न पीड
येदित्यर्थः ३० यत्र देशे अकथयमानस्य स्वमाहात्म्यं अप्रकाशयतः अशिवमसंगलं भयं प्रयच्छति
सत्र संतमिदं भय प्रदे पिदेशो ... त्वात् स तपि सामर्थ्ये तत्र स्वजनमध्ये आत्मानं स्वविद्यादिना प्रतिपा
क्रमधिकमिवाकुर्वन् स्वोत्कर्षमप्रकाशयन्योजनो भवति सः श्रेयान् प्रशस्ततरः परपीड्यमाने चत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ टी॰

ईदृशेन कस्मात्त्वं भोक्तव्यं तमाह यदिति यः पुमान् आत्मानं कथयमानस्य स्वश्रौढिं दर्शयतो नरस्योपरि
नानुसंज्वरेत् परोत्कर्षं दृष्ट्वा न संतप्येत् तथा ब्रह्मस्वयति श्व ब्रह्मचारी च पक्वान्नस्वामिना वुभा
वितिस्त्ततेर्यस्मादिभ्यो श्रदत्वाय ज्ञोजनं तद्ब्रह्मस्वभोजनं श्रक्रर्वश्वयो भवति तदन्नं तस्मात्तेसना
संमतं श्रस्त्यारहितस्य श्रद्धापूर्वकं प्रयच्छतएवान्नं भोज्यमित्यर्थः १२ साम्प्रतं कः तेसंन्यासिनः
स्ववीर्यस्य स्वपाण्डित्यस्य उपजीवनात् पाण्डित्यादिकं प्रकाश्य भिक्षां रक्षन् यतिर्वान्ताशी भव
तीत्यर्थः १३ यः ब्राह्मणः ब्रह्मवित् ज्ञातीनां मध्ये वसन्नपि ज्ञात यो मे मम नित्यं श्रज्ञाता च र्यथा
भिक्षा श्रज्ञात चर्या संवत इति मन्येत् ज्ञात यो मे योग गातिं मां ज्ञासिषु रिति यस्य प्रच्छन्नतेजसोम

योवा कथ्यमानस्य ह्यात्मानं नानुसंज्वरेत् ब्रह्मस्वेनोपभुञ्जीत दत्तं संमतं सतां
१२ यथा स्ववान्तमश्नाति श्वा वै नित्यमभूतये एवं ते वान्तमश्नन्ति स्ववीर्यस्योपजीव
नात् १३ नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ज्ञातीनां तु वसन्मध्ये नैव विद्वांश्च
ल्मणं बुधाः १४ कोऽयं नेत रमात्मानं ब्राह्मणो हन्तुमर्हति निर्लिंगमचलं शुद्धं स
र्वद्वैतविवर्जितं १५ तस्माद्धि त्रियस्यापि ब्रह्मावसति पश्यति १६ योऽन्यथा स
न्तमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं चोरेणात्मापहारिणा १७

तिः तं ब्राह्मणं ब्रह्मिष्ठं बुधाः तत्त्वज्ञाः विदुः १४ ईदृशीं चर्यां विनाश्र नंतरं उपाधिकृतव्यवथानं स्व
रूपं आत्मानं प्रत्यंचं निर्लिंगं अनुमानाद्यगम्यं अचलं व्यापकं शुद्धं असंग सर्वद्वैतविवर्जितं सजातीयवि
जातीयस्वगतभेदशून्यं हन्तुं हननेगत्यर्थत्वमत्र ज्ञेयं ज्ञातुमित्यर्थः को हीति न कोपीत्यर्थः १५ तस्मात्
ब्राह्मणस्यापि क्षत्रियादेरीदृक्चर्यावतः कर्मणा षष्ठी क्षत्रियमपि ब्रह्मस्वप्रकाशेन श्रावसतिप्रयिर्

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आत्मतत्वप्रतिपत्त्युपायमाह अक्रांतइति अक्रांतः अमहीनः यतः अनादानात् आदानमूल्यः निष्परिग्रहः स्म
र्थः अतएव संमतः शिष्टानां निरुपद्रवश्च स्वयं भवति तथापि शिष्टोपि शिष्टवन्नस्यात् शिष्टत्वं न प्रकाशयेत्
पांडित्ये अशिष्टवत् यथेष्टाचरणकृन्न स्यात् किं तु शिष्ट एव वैदिकमर्यादापरिपालनपर एव स्यात् क
विः क्रांतदर्शी ४८ मानुषे वित्ते च वसुग्रीष्ये धनदारादिरूपे विषये अनाढ्याः दरिद्राः सर्वसंगत्यागिन इ
त्यर्थः दैवे वित्ते श्रोत्रग्राह्ये पारलौकिके धर्मादौ आढ्याः संपन्नाः तथा क्रतौ ईश्वरोपासनायां सुकृत
कुर्वीते स्तुपासनायामपि कृतशास्त्रप्रयोगादर्शनात् वैराग्यपूर्वककर्मोपासनानुष्ठानपरा निर्भया
भवंतीत्यर्थः तत्तनुस्वरूपं ४९ सर्वक्रतुभ्यो ब्रह्मज्ञानमेव श्रेष्ठमित्याह सर्वेति स्विष्टशोभनं इष्टं हि

अक्रांतः स्यादनादानात् संमतो निरुपद्रवः शिष्टो न शिष्टवत्स स्याद् ब्राह्मणो ब्रह्मवि
त्कविः ४८ अनाढ्या मानुषे वित्ते आढ्या दैवे तथा क्रतौ ते दुर्धर्षा दुष्प्रकंप्यास्तान्
विद्याद् ब्राह्मणस्तनुं ४९ सर्वान् स्विष्टकृतो देवान् विद्याद्य इह कश्चन न समानो ब्राह्म
णस्य तस्मिन् प्रयतते स्वयं ५० यमः प्रयतमानं तु मानयंति स मानितः न मान्यमानो
मन्येत न मान्यमभिसंज्वरेत् ५१ ॥ स्वस्त्ययनादिकं ये यागेन प्रीताः संतो यजमानाय कुर्वंतीति ते

स्विष्टकृतो देवाः तान् सर्वान् यो अश्वमेधादिसकलक्रतुकर्मणा वेद साक्षात्कुर्यात् सोपि ब्राह्मणस्य ब्रह्मवि
दः समानो न भवति तत्र हेतुः तस्मिन्निति यतः तस्मिन् स्विष्टनिमित्ते स्वयं प्रयतते यत्नवान् भवति अयं भा
वः स्विष्टक्रियासाध्यत्वाद् अनित्यफलं ब्रह्म तु स्वतःसिद्धमेवाभिव्यज्यत इति तज्ज्ञानफलभूतो मोक्षो नित्य इति
सिद्धत्वान्नित्य इति स्विष्टं न ब्रह्मज्ञानसममिति ५० यमिति यं प्रयतमानं निरारंभं याज्ञिकमानयंति देवाद
यः स एव ब्रह्मात्मवित् मानितो भवति यं तु यज्ञादिकर्तारमिति मानयंति स देवानां पशुरमानित एव तथा च

नमस्यैर्मान्यमानोपि मान्यं न मन्येत नापि अभिसंज्वरेत् अवमाने सतीति शेषः नकारो भिन्नक्रमः ५१ ॥

श्रुतिः अथ योऽन्यां देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा
पशुरेवं स देवानामिति उपास्ते यज्ञादिना तर्पयति तत्तो हेतोः आत्मा

म॰उ॰ टी॰ ११५

सकःस्वभावादेवमान्यंमानयतिनतुमपिमानयोग्यतास्तीतिमत्वादर्पेणप्राप्नुयादित्याहलोकइति ४२
येवमानयंतितेपिपशुवन्निर्विवेकत्वादुपेक्ष्याएवनतुदंडनीयाइत्याह अधर्मेति ४३ नवाइतिमा
नेक्लीबवत्तमार्षमुनेःकर्ममौनयोगाचर्यामानार्थिनापरलोकोदुःसंपादःपरलोकार्थिनोमौनिनां
चइहलोकोदुःसंपादइतिभावः ४४ श्रीरिति यज्ञाभिजननैस्वर्येनृपालक्ष्मीःसुखस्यमानतृपस्यसं
वासोपिष्टानंतथापिसापरिपंथिनीचोरतुल्यापरलोकस्यनाशिनीयोगिनांसुतरामनिष्टकरी
त्यर्थः ब्राह्मीब्राह्मणस्ययोग्याश्रीःऋग्यजुःसामात्मिका ऋचःसामानियजूंषिसाहिश्रीरम

लोकःस्वभाववृत्तिर्हिनिमेषोन्मेषवत्सदा विद्वांसोमानयंतीहइतिमन्येतमानि
तः ४२ अधर्मनिपुणामूढालोकेमायाविशारदाः नमान्यंमानयिष्यंतिमान्या
नामवमानिनः ४३ नवैमानंचमौनंचसहितौवसतःसदाः अयंहिलोकोमान
स्यअसौमौनस्यतद्विदुः ४४ श्रीःसुखस्येहसंवासःसाचापिपरिपंथिनी ब्राह्मीसु
दुर्लभाश्रीर्हिप्रज्ञाहीनेनक्षत्रिय ४५ द्वाराणितस्याहवदंतिसंतोबहुप्रकाराणि
दुराधराणि सत्यार्जवेह्रीर्दमःशौचविद्याषण्मानमोहप्रतिबोधनानि ४६ इतिस
नत्सुजातेप्रथमोध्यायः ॥१॥ तासत्तामितिश्रुतेःप्रज्ञाहीनेनञ्रागादीनांरहस्यंनप्राप्तुं
शक्यमित्यर्थः ४५ तस्याब्राह्मश्रियःद्वाराणिप्राप्तिसाधनानिदुराधराणिदुःसंरक्ष्याणि सत्यं
यथार्थभाषणं आर्जवंअवक्रताह्रीःलोकापवादभयंदमइंद्रियनिग्रहः शौचंमृज्जलाभ्यां
बाह्यं आंतरंतुमनःशुद्धिःविद्यावेदशास्त्राधिगमःषडेतानिएतेषुसत्सुअनादिवासनयाआग
तोपिमोहोयथावन्नप्रभवति षण्मानमोहप्रतिबंधकानीतिपाठस्यार्थः ४६ इतिभा ११५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ह्वर्षा ध्यायंते मौनं ब्राह्मीश्रीः सत्यादिषट्कं च मोहात्मकस्य मत्स्योः प्रतिरोधकानीत्युक्तं तान्येव प्रश्नपूर्वकं वि
वरीतुमध्यायांतरमारभते कस्यैष मौन इत्यादि संन्यासपूर्वकं स्वीक्रियमाणो मुनेर्धर्मः मौनसंज्ञः कस्य
प्रयोजनस्यार्थे इत्येकः प्रश्नः लोकप्रसिद्धं वाङ्नियमो वा अमौनं च मौनं च निर्विद्याथ ब्राह्मण इति श्रौत
प्रसिद्धं मौनशब्दितात् पांडित्यं बाल्यापरपर्यायात् श्रवणमननाख्यात् इत्यादन्यतस्य मुनियत्ने निदि।
ध्यासनं वा मौनशब्दितं तयोर्मध्येऽन्यतरत्तमौनप्रज्ञाभिधेयमिति द्वितीयः तस्य च भावं स्वलक्षणं ब्रू
हीति तृतीयः तेन मौनेन विद्वान् मौनेन मनःप्राणेंद्रियक्रियाणां निरवशेषेणोपरमं निर्विकल्पं परमि
तियावत् तत् उत प्रापयातीति चतुर्थः कथं वा केन प्रकारेण मौनमाचरतीति पंचमः प्रश्नः पंचानाम

धृतराष्ट्र उ॰ कस्यैष मौनः कतरन्नु मौनं प्रब्रूहि विद्वन्निह मौनभावं मौनेन वि।
द्वान् उत याति मौनं कथं मुने मौनमिहाचरंति १ सनत्सुजात उ॰ यतो न वेदा मन
सा सहैनमनुप्रविशंति ततोथ मौनं ॥

यत इति यस्माद्धेतोः एनं प्रश्न
पि प्रश्नानां क्रमेणोत्तरमाह
गात्मानं मनसा सह वेदाः न अनुप्रविशंति यतो वाचो निवर्तंते अप्राप्य मनसा सहेति वाङ्मनसाती
तत्वस्कृतेः ततो हेतोः मौनमिति एतन्नामेत्यर्थः एतेन वाङ्मनसातीतपदप्राप्तिर्मौनस्य प्रयोजनं त
त्ववागादिबाह्येंद्रियनिग्रहरूपमनोनिग्रहरूपं च तेन च क्रमात् बाह्याभ्यंतरप्रपंचयोरभानं तेन चा
भानेन प्राप्यं वाङ्मनसातीतं पदमिति प्रश्नचतुष्टयस्योत्तरमुक्तं भवति
पंचमप्रश्नस्योत्तरमाह ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ टी॰ ११६

यत्रोत्थितइति यत्र अधिष्ठाने भूतब्रह्मात्मनि वेदशास्त्रं तथा अयमिति लौकिकशास्त्रं अत्र उत्थितः वेदे
ऽङ्कुर इव समुद्भूतं गंगा इव चाविर्भूतः स भूमात्मा तन्मयत्वेन शास्त्रमयत्वेन विभाति प्रकाशते हे राजन्
अयं भावः वेदशास्त्रे न वेदस्य सारतः प्रणवः भूरित्येव ऋग्वेदादजायत भुव इति यजुर्वेदात्स्वरिति।
सामवेदात्तानि शुक्राण्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति ता
न्येकधा समभरत्तदेतदोमिति बह्वृचब्राह्मणात् तस्य च प्रणवस्य ओमित्येतदक्षरमिदं सर्वमिति श्रु
तेस्स्यक्षतेलन्मात्राणां चाकारोकारमकाराणां क्रमात् स्थूलसूक्ष्मकारणप्रपंचवाचका
नां वाच्यवाचकयोरभेदात् पूर्वपूर्वस्योत्तरोत्तरे प्रविलापनेन युक्तया क्रियमाणे स्थूलस्य ज।

यत्रोत्थितो वेदशास्त्रं तथायं सतन्मयत्वेन विभाति राजन् २ धृतराष्ट्र उवाच य
ज्ञे ब्रियो वेदसामवेदं च वेद यः पापानि कुर्वन्पापेन लिप्यते किं न लिप्यते ३
सनत्सुजात उ॰ नैनं सामान्यृचो वापि न यजूंष्यविचक्षणं त्रायन्ते कर्मणः पापान्न
ते मिथ्या ब्रवीम्यहं ४ ॥ गतः सलिले लवणोदकन्यायेन प्रविलयो भवति तथा सूक्ष्म
स्य कारणे कारणस्य तुरीये ईमात्रा वाच्ये ऽमात्रात्मके शिवमद्वैतं चतुर्थं मन्यन्त इति श्रुतेः।
लिता विलक्षितभावे वाच्ये ऽनसातीते प्रविलयो भवति अतः प्रणवाख्यशास्त्रमयत्वेन तद
द्वारा वाच्ये ऽन्नसातीतं वस्तु भातीति युक्तमिति २ ननु यदि वेदशास्त्रमयत्वेन तद्द्वारा वाच्यं त
सातीतं पदं भाति तत्र ज्ञानाच्च यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूय
न्त इति श्रुतेः सर्वपापनाशश्च भवति तर्हि मोक्षहीनस्यापि ऋग्यजुःसामाभ्यासेन तद्भयं भविष्य ११६
तीत्याशंकते ऋच इति ३ अविचक्षणं वाच्यं ऽन्नसन्निग्रहासमर्थं ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

छंदांसि वेदाः वृजिनात् पापात् ननु प्रयाणसमये यां देवतां निगृह्णतस्तस्यास्तस्या ज्ञानमनुभवतीति
वचनात् यं यं वापि स्मरन्भावमिति स्मृतेश्च नित्याभ्यासात् अंतकाले यद्देवतामंत्रं स्मरति तद्देवता
ज्ञानमस्य भविष्यतीति किं वाङ्मनसनिग्रहरूपेण मौनेनेत्याशंक्याह नीडमिति मौनाभावः
तकाले छंदांस्येव न स्फुरंतीत्यर्थः ५ धर्मस्वाभाविकं शमो दमस्तपः शौचं क्षांतिरार्जवमेव च ज्ञानं
विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजमिति गीतासु क्रतुविना प्रलापः ऋग्यजुःसामभिः पूतो ब्रह्मलो
के महीयते यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति ब्राह्मणानां माहात्म्यप्रख्यापको

न छंदांसि वृजिनात्तारयंति मायाविनं मायया वर्तमानं नीडं शकुंता इव जा
तपक्षाश्छंदांस्येनं प्रजहत्यंतकाले ५ अनेनाष्टा३ न वेदेहा विना धर्मं ज्ञातं
शक्या विचक्षणा अथ कस्मात्प्रलापोयं ब्राह्मणानां सनातनः ६ सनातन
३ तस्यैव नामादिविशेषरूपैरिदं जगद्भाति महानुभाव ॥

नर्थको वाक्यसंदर्भः प्रवृत्त इति शेषः सनातनोऽनादिः ६ उत्तरमाह तस्येति अस्य महतो
भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद इत्यादि श्रुते येयं प्रलापोयं वेदशास्त्रादिः
प्रपंचः तस्यैव परमात्मनः स्वयं अव्याकृतस्य नामरूपात्मना व्याकृतस्य स्वरूपमिदं जगद्भाति ना
मादिविशेषरूपैरितीत्यभावे तृतीया नामरूपात्मको यो विशेषस्तदात्मकस्वरूपस्येत्यर्थः त
थाच श्रुतिः तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरूप इति ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

हे महानुभाव निर्दिष्टं यद्वेदवाक्यं ब्रह्मणो रूपम् मूर्तं चैवामूर्तं चेत्यादिना कृत्स्नं दृश्यमदृश्यं च विश्वं ब्रह्मरू
पत्वेन निर्दिष्टं यद्ब्रह्मैवेदमिति सम्यक् प्रवदंति अथात आदेशो नेति नेतीत्यादि श्रुत्याध्यारोपापवाद संग्रहात् ब्रह्म विश्वस्मात् मूर्तात् विरु
पमेव वैरूप्यं विलक्षणं उदाहरंति वेदा एव अथात आदेशो नेति नेति न ह्येतस्मादन्यत्परमस्ती
ति नेतीत्यादयः अत्र नेति नेतीति नञ्द्वयेन प्रकृतं मूर्तामूर्तं निषिध्य शून्यशेषत्वप्रसक्तेः एतस्मा
त्मनोऽन्यत्परं कार्यं कारणं वा इति विकृतं नास्तीति हेतोर्नेति नेति मुच्यते तेन शून्यमवशेष्यते इति श्रु
त्यैव ब्रह्मणो विश्ववैरूप्यमुक्तं तत्र अयुपपन्नं भवत्वेन वेदो मान्यस्तं वेदोक्तमार्गाननुष्ठानेनावज्ञा
नतो वेदाध्ययनमपि निष्फलं भवति भगवदाज्ञाभंगदोषादिति भावः अपि च नतस्ववाच्य

निर्दिष्टं यत्सम्यक् प्रवदंति वेदास्तद्धि विश्ववैरूप्यमुदाहरंति ७ तदर्थमुक्तं तपएत
त्तदिज्याताभ्यामसौ पुण्यमुपैति विद्वान् पुण्येन पापं विनिहत्य पश्चाज्ज्ञा
यते ज्ञानविदीपितात्मा ८ ॥

विभागोऽस्तीति देहात्मबुद्ध्या परमात्मा नास्तीति
मत्वा तं त्यजतः वेदोच्चारणमात्रं संभवोऽपि फलाय नो नास्तीति श्रुत्यर्थः ७ तदर्थमिति
यत्तु विश्वस्माद्विलक्षणं ब्रह्म प्रोक्तं तदर्थं तत्प्राप्त्यर्थं एतत् प्रसिद्धं तपः कृच्छ्रचान्द्रायणादि
उक्तं तपसा ब्रह्म विजिज्ञासस्वेति श्रुत्या प्रोक्तं तथा एषा इज्या यागादिरपि तदर्थमेव तदुक्तं
समाह ताभ्यामिति इज्यातपोभ्यां पुण्योत्पत्तिः पुण्येन पापनाशः निष्पापस्य ज्ञानेन ब्रह्माक
रा चेतो वृत्त्या विदीपितात्मा प्रकाशितात्मतत्त्वो भवति एतेन इज्यातपसोः सात्त्वात्मोत्पत्तिहेतु

त्वनिरसनेन ज्ञानकर्मसमुच्चयपक्षो निर्मूलो वे[illegible]
नयः ८ ॥

११८

किमात्मतत्वप्रकाशेनेत्यतआह ज्ञानेनचात्मानमुपैतीति आत्मलाभान्नपरंविद्यते आत्मानंचेद्विजानीयाद
यमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत् इत्यादिशास्त्रादात्मप्राप्तिरेवपरमपुरुषार्थ
इतिभावः विपक्षेदोषमाह अथेति अथेतिपक्षांतरे अन्यथात्मज्ञानाभावेनअनात्मनिपुरुषार्थत्वबु
ध्यावर्गफलानुकांक्षीभवति भुंक्तेआत्मानंस्वस्वविषयोपहारमुखेनआप्नोतीतिवर्गः इंद्रिय
गणस्तस्यप्रियंफलंविषयसुखंतदाकांक्षीसन् अस्मिन्लोकेकृतंयत्पुण्यंपापंवातत्सर्वंपरि
गृह्यतेविद्याकर्मणीसमन्वारभेतेपूर्वप्रज्ञाचेतिश्रुतेः तदुक्तंमतमितिश्रुतिपदस्यार्थः अमु
त्रस्वर्गेनरकेवातत्फलंसुखंदुःखंवाभुंक्ते ततःपुनरिमंमार्गंलोकंकर्मशेषेणउपैति तस्मिन् यावत्स

ज्ञानेनचाऽऽत्मानमुपैतिविद्वांस्तथान्यथावर्गफलानुकांक्षी अस्मिन्कृतंतत्परि।
गृह्यसर्वममुत्रभुंक्तेपुनरेतिमार्गं ९ अस्मिन्लोकेतपस्तप्तंफलमन्यत्रभुज्यते ब्रा
ह्मणानामिमेलोकाधात्वेतपसितिष्ठतां १० धृतराष्ट्रउ० कथंसमृद्धमसमृद्धंत।
पोभवतिकेवलं सनत्सुजाततद्ब्रूहियथाविद्यामतद्वयं ११ सनत्सुजातउ० निष्क
ल्मषंतपस्त्वेतत्केवलंपरिचक्षते ॥पातमुषित्वार्थेतमेवाध्वानंपुनर्निवर्तंते तस्माल्लोका
त्पुनरेत्यस्मैलोकायकर्मणइत्यादिश्रुतिभ्यः संपतत्यनेनेतिसंपातःकर्म ९ नत्वेवंतर्हिस्वाध्यायप्रवच
ने एवेति नाकोमौद्गल्यःतद्धितपस्तद्धितपइत्यादरेणाध्ययनाध्यापनयोर्मुख्यंतपस्त्वश्रवणात् अ।
स्तितयोरपिमोक्षहेतुत्वंतत्कथमुच्यतेनछंदांसिवृजिनात्तारयंतीतिसत्यंविद्वदविद्वत्तपसोर्भेदमा
ह अस्मिन्निति अविदुषांतपसःफलंआमुष्मिकं विदुषांब्राह्मणानांतुइमेएवलोकाःफलदाः ज्ञान
दृष्टफलमित्यर्थःकीदृशानांधात्वेतपसितिष्ठतांधातस्थैक्षत्यार्थेनवेतवेन्केन्यत्वनइतिधाजःत्वन्व

म॰ उ॰ टी॰ ११८

उत्तरमाह निष्कल्मषमिति कल्मषं कामः श्रद्धादिराहित्यं च तद्रहितं तपः केवलं कैवल्यसाधन
त्वात्केवलमित्युच्यते तदेव श्रद्धाद्युपेतमपि सकामं चेत्समृद्धमित्युच्यते यत्तु केवलं दंभार्थ
मेव क्रियते तदसमृद्धं तथा च श्रुतिः यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं
भवतीति तत्र प्रत्ययश्रुते विद्यादिहीनस्यापि तपसो वीर्यवत्त्वावगमादृद्धत्वं गम्यते १२ तप एव
प्रशंसति तप इति इदं सर्वयोगं तपोमूलं तपः प्राप्य परमश्नुते मुक्तिं १३ ननु निष्कल्मषं त

एतत्समृद्धमसमृद्धं तपो भवति केवलं १२ तपोमूलमिदं सर्वं यन्मां पृच्छसि क्ष
त्रिय तपसा वेदविद्वांसः परं त्वमृतमाप्नुयुः १३ धृतराष्ट्र उ॰ कल्मषं तपसो ब्रू
हि श्रुतं निष्कल्मषं तपः सनत्सुजात येनेदं विद्यां गुह्यं सनातनं १४ सनत्सु
जात उ॰ क्रोधादयो द्वादश यस्य दोषास्तथा नृशंसानि दश त्रिराजन् धर्मादयो द्वा
दश ते पितॄणां शास्त्रे गुणा ये विदिता द्विजानां १५ ॥

यः श्रुतं तत्र किं तत्किल्बिषं यद्रहितेन तपसा सनातनं गुह्यं ब्रह्मविद्यां जानीयामिति पृच्छति क
ल्मषमिति १४ तदेवाह क्रोधादय इति क्रोधादिगणो द्वादशकः दश त्रिरयो दशेत्यर्थः तावा
न्नृशंसवर्गश्च तपसः कल्मषं धर्मादिगणविरुद्धत्वात् तद्रहितं धर्माद्युपेतं च तपो निष्कल्मषं
मोक्षहेतुरित्यर्थः पितॄणां वंशकर्तॄणां मन्वादीनां श्रातततानामित्यपि पाठः १५ ॥ ११८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

क्रोधः इच्छाप्रतीघातोत्थ आक्रोशताडनादिहेतुर्मनस्तापः १ कामः स्त्र्यभिलाषः २ लोभः धनव्ययभीरुत्वं ३ मोहः
कृत्याकृत्याविवेकराहित्यं ४ विधित्सा सत्स्यपुत्ररोत्रलाभे पिपासा व्याख्यातृभिः पेइयाने इत्यस्यरूपं ५ अ
कृपा निर्दयत्वं ६ असूया परगुणेषु दोषदर्शनं ७ मानः आत्मनि पूज्यताबुद्धिः ८ शोकः इष्टार्थनाशे सति
मनोवैकल्यं ९ स्पृहा भोगपदार्थेष्वादरः १० ईर्ष्या परोत्कर्षासहिष्णुत्वं ११ जुगुप्सा परनिंदा वीभत्सता वा १२
मनुष्याणां योगिनामयोगिनां चैते दोषाः सर्वेषामपि वर्ज्या इत्यर्थः १६ एतेषामध्ये एकैकोपि मनुष्यं ता
पयितुं समर्थः किं नु कतिपयसमुदायः सर्वसमुदायो वेत्याह एकैक इति अंतरं छिद्रं १७ त्रयोदशान्दशा

क्रोधः कामो लोभमोहौ विधित्साऽकृपाऽसूये मानशोकौ स्पृहा च ईर्ष्या जुगुप्सा
च मनुष्यदोषा वर्ज्याः सदा द्वादशैते नराणां १६ एकैकः पर्युपास्ते यो मनुष्यान्म
नुजर्षभ लिप्समानोंतरं तेषां मृगाणामिव लुब्धकः १७ विकत्थनः स्पृहयालुर्मन
स्वी बिभ्रत्कोपं चपलोरक्षणश्च एतान्पापाः षण्नराः पापधर्मान्प्रकुर्वते नोत्रसंतः सु
दुर्गे १८ ॥

सानि हिंस्राण्याह द्वाभ्यां विकत्थन इति विकत्थनः परगुणाक्षेपेण स्वगुणोत्कर्षा
भिधानशीलः १ स्पृहयालुः अतियत्नपूर्वकं परस्मादभोगेच्छावान् २ मनस्वी गर्वाधिक्यात्पराव
माननशीलः ३ बिभ्रत्कोपं निमित्तं विनापि सदा कोपपरः ४ चपलः मित्रभावादिष्वस्थिरः ५ अरक्ष
णः शरणागतं स्वीकृतमप्यस्मादेः पालनमकुर्वन् ६ एतान् षट् पापधर्मान् पापाः पापिनः नराः
कुर्वते के ते ये सुदुर्गे महासंकटे इह परत्र वा उपस्थिते नोत्रसंतः त्रासं अकुर्वतः एकमिदं पदं स्वरूपो
पि समासः एते षट् अत्यंतहिंस्रा इत्यर्थः १८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
११५

संभोगः स्त्रीसंगादिः तद्विषयां संवित् संमतिः तदेव पुरुषार्थ इति या बुद्धिस्तया विषमोऽव्यवस्थितः १ अ
तिमानी अत्यंतं दर्पवान् २ पाठांतरे संभोगसंवित् संभोगे बुद्धिमान् द्विषं द्वेषं एधमानः वर्द्धयन् १
दत्तानुतापी दानं कृत्वापि लोभवशात् मम धनं नष्टमिति संतापवान् ३ कृपणः आपणे विविक्ते वा ध
नमहमानः ४ बलीयान् अतिशयेन बलिमान् पूर्वं राजभ्योऽध्यधिकं प्रजानां सकाशात् बलिं गृह्णन्नि
त्यर्थः ५ वर्गप्रशंसी वर्गो ज्ञातिजनपराभिभवः तत्प्रशंसनशीलः अन्येषां दुःखेन सुखीत्यर्थः ६ वनितासु
सुपरिणीतासु द्वेष्टा ७ एते सप्त नृशंसाः पूर्वे च षट् एवं त्रयोदश ९ गुणानाह धर्मश्चेति धर्मो वर्णा
श्रमनियतः संध्योपासनादिः १ सत्यं हिंसावर्ज्जयथार्थभाषणं २ दमः जिह्वोपस्थादिनिग्रहः ३

संभोगसंविद्विषमोऽतिमानी दत्तानुतापी कृपणो बलीयान् वर्गप्रशंसी वनितासु द्वे
ष्टा एते परे सप्त नृशंसवर्गाः ९ धर्मश्च सत्यं च दमस्तपश्च अमात्सर्यं ह्रीस्तितिक्षानसू
या यज्ञश्च दानं च धृतिः श्रुतं च व्रतानि वै द्वादश ब्राह्मणस्य १० यस्त्वेतेभ्यः प्रभवे
द्द्वादशभ्यः सर्वामपीमां पृथिवीं स शिष्यात् त्रिभिर्द्वाभ्यामेकतो वार्थितो यस्तस्य
स्वमस्तीति स वेदितव्यः ११ ॥ तपः कृच्छ्रचांद्रायणादि ४ अमात्सर्यं मत्सरः परगुणासहिष्णु
त्वं तदभावः ५ ह्रीर्लज्जा ६ तितिक्षा सत्यपि क्रोधनिमित्ते तदनुत्पादः ७ अनसूया परगुणेषु दोषावि
ष्करणमसूया तदभावः ८ यज्ञो ज्योतिष्टोमादिः ९ दानं बहिर्वेदि संविभागः १० धृतिः अन्यतापद्य
पित्रादेरत्यागः ११ श्रुतं अर्थग्रहणसहितं वेदाध्ययनं १२ ब्राह्मणस्य ब्रह्मप्राप्तुमिच्छोः १० यस्त्विति
सर्वगुणाढ्यो ब्रह्मवित् सत्यकामादिगुणभाक् भवति यतः स आत्मानमनंतविधं विजानाति स सर्वांश्च
लोकानाप्नोति सर्वांश्च कामानिति श्रुतेः एतेषां मध्ये त्रिभिर्द्वाभ्यामेकतो वा अर्थितः अर्थैर्वित्तैः संता

११५

दमः जितेंद्रियत्वं त्यागः कर्मणामीश्वरेऽर्पणं अप्रमादः तत्त्वानुसंधाने अमृतं मुक्तिः सत्यमुखानि सत्यप्रधानान्येव
एतानि फलाय भवंतीत्यर्थः २२ अष्टादशदोषत्यागादष्टादशगुणत्वं दमस्याह दम इति कृते कर्मणि वैदिके
प्रतिकूलं अश्रद्धा आलस्यादि च अकृते उपवासव्रतादौ प्रतिकूलं तथा जिह्वालौल्यादि इदं द्वयमेको दोषः १
अनृतं अभ्यसूये प्रसिद्धे ३ कामः स्त्र्यभिलाषः ४ अर्थो धनार्जनार्थो नियत्नः ५ स्पृहा धनाद्यभिलाषः ६ २३
पैशुन्यं परदोषसूचकत्वं परितापः अतिदुःखित्वं अरतिः सत्क्रियानभिलाषः २४ अपस्मारः कर्तव्यविस्म

दमस्त्यागोऽप्रमादश्च एतेष्वमृतमाहितं तानि सत्यमुखान्याहुर्ब्राह्मणा ये मनीषि
णः २२ दमोऽष्टादशगुणः प्रतिकूलं कृताकृते अनृतं चाभ्यसूया च कामार्थौ
च तथा स्पृहा २३ क्रोधः शोकस्तथा तृष्णा लोभः पैशुन्यमेव च मत्सरश्च विहिं
सा च परितापस्तथारतिः २४ अपस्मारश्चातिवादस्तथा संभावनात्मनि ए
तैर्विमुक्तो दोषैर्यः स दांतः सद्भिरुच्यते २५ मदोऽष्टादशदोषः स्यात्त्यागो भव
ति षड्विधः विपर्ययाः स्मृता एते मददोषा उदाहृताः २६ ॥

रणं अतिवादः परक्रोशः संभावना महत्त्वबुद्धिः २५ मद इति येषां विपर्ययाः दमगुणत्वेन उक्तास्त ए
व कृताकृते प्रतिकूलाद्यष्टादश तथा व समाप्तस्य षड्विधत्यागस्य च विपर्ययाः षड् ते च लक्ष्मीप्राप्तौ ह
र्षः अप्रिये जाते व्यथा सीयपुत्राज्ञा पात्रेषु प्रधानेषु स्वाधिकारे इष्टापूर्तयोः करणं कामसत्या
गः प्रमादश्च एते च चतुर्विंशतिर्मददोषाः २६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ॰ ३॰ टी॰ १९

श्रेयानभ्यासात्ततः तृतीयो वक्ष्यमाणः कामत्यागः तस्मिन्कामत्यागे कृते सति भिन्नं भेदः भावे निष्ठा इ
तमितियावत् स एव दुःखं हि तीयाद्वै भयं भवति यत्रान्यत्पश्यत्यन्यच्छृणोति तदल्पं अथ परत्वा
तत दुःखमित्यादिश्रुतिभ्यः कामत्यागादेव सर्वदुःखनिवृत्तिरूपो मोक्षः सिद्धः तथा च श्रुतिः य
दा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति ५ त्यागमे
वाह श्रेयानिति श्रियं लक्ष्मीं विद्यां च न हृष्यति न हृष्यति इष्टयागहोमादि आपूर्तं तडागारामादि
६ कामत्यागस्य परां काष्ठामाह अपीति अवाच्यनिर्वृत्तिकत्वात् तथा चोदाहृतं यदा सर्वे प्रमु

श्रेयांस्तु षड्विधस्त्यागस्तृतीयोऽङ्कुरो भवेत् तेन दुःखं तत्त्वेनैव भिन्नं तस्मिन्नजि
तेकृते ७ श्रेयांस्तु षड्विधस्त्यागः श्रियं प्राप्य न हृष्यति इष्टापूर्ते द्वितीये स्यात्त्रि
त्ववैराग्ययोगतः ८ कामत्यागश्चतुर्थोऽसत्तृतीय इति स्मृतः अप्यवाच्यवद्व
त्वेतसत्तृतीयो गुणः स्मृतः ९ त्यक्तैर्दुःखैर्यद्भवति नोपभुक्तैश्च कामतः न च दुःख
त्वद्भवति नोपभुक्तैश्च कामतः १० न च कर्मस्वसिद्धेषु दुःखं तेन च न ग्लायेत् सर्वे
देवगुणोपेतो ह्यव्ययवानपि यो भवेत् ११ अप्रिये च समुत्पन्ने व्यथां जातु न गच्छे
ति इष्टान्पुत्रांश्च दारांश्च न याचेत कदाचन १२ ॥ व्यथेत इति ७ त्यक्तैरिति दुःखैः स्वादि
भिस्त्यक्तैरेव यत् निष्कामत्वं भवति तत्कामपूर्वकं उपभुक्तैर्न भवति यथोक्तं न जातु कामः कामा
नामुपभोगेन शाम्यतीति निष्कामत्वं बहुभिर्लब्धैरपि दुःखैर्न भवति नाप्युपयुक्तैः कामसाधना
प्रयीकृतैरित्यर्थः १० न दुःखं कुर्यादिति शेषः तेन च दुःखेन न ग्लायेत् ग्लानिं न प्राप्नुयात् गु
णैः कौत्स्यादिभिः ११ अप्रिये कीर्तिविन्नाशादिप्रभवे समुत्पन्ने प्रियो व्यथां न गच्छेति स च १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

षष्ठमाह अर्हतइति अर्हतेयोग्यायबुद्धिर्धत्यागफलमाह अप्रमादीति सचअप्रमादश्चसत्यंयथार्थवचनं।
ध्यानंमूर्तेरीश्वरस्यआत्मनोवाऽनुसंधानंसमाधानंसमाधिः संप्रज्ञातासंप्रज्ञातभेदेनद्विविधःसमाधिः
चोद्यंतर्कः येनसमाधिफलेसार्वकाम्यादौदोषमुन्नयतितत् वैराग्यंपरं ५ अस्तेयंपरस्वापहरणाभावः ६
ब्रह्मचर्यंस्त्रीसंगराहित्यं ७ असंग्रहोनिष्परिग्रहता ८ १४ उक्तमनुवदतिअप्रमादप्रतियोगिप्रमादंवक्ते

अर्हतेयाचमानायप्रदेयंतच्छुभंभवेत् अप्रमादीभवेदेतैःसचाप्यष्टगुणोभवे
त् १३ सत्यंध्यानंसमाधानंचोद्यंवैराग्यमेवच अस्तेयंब्रह्मचर्यंचतथासंग्रहमे।
वच १४ एवंदोषामदस्योक्तास्तान्दोषान्परिवर्जयेत् तथात्यागोऽप्रमादश्चस
चाप्यष्टगुणोमतः १५ अष्टौदोषाःप्रमादस्यतान्दोषान्परिवर्जयेत् इंद्रियेभ्यश्च
पंचभ्योमनसश्चैवभारत १६ अतीतानागतेभ्यश्चमुक्त्युपेतःसुखीभवेत् १६ सत्या
त्माभवराजेंद्रसत्येलोकाःप्रतिष्ठिताः तांस्तुसत्यमुखानाहुःसत्येह्यमृतमाहितं
१७ निवृत्तेनैवदोषेणतपोव्रतमिहाचरेत् एतद्धात्राकृतंवृत्तंसत्यमेवसतांव्रतं १८

एवमिति १५ पंचभ्यइंद्रियेभ्यःषष्ठान्मनसश्चस्वस्वविषयेरागद्वेषोत्थाःषट्प्रमादाःअतीतेनष्टपुत्रशो
कादिजःसप्तमः अनागतेपुत्रकामस्यतदभावेयःक्लेशःसोऽष्टमःप्रमादःएतेभ्यःप्रमादेभ्योमुक्त्युपेतःमु
क्तिंप्राप्तःसुखीभवेत् १६ दमत्यागाप्रमादानुक्त्वातेषांसत्यमुखत्वंप्रागुक्तंविवृणोति सत्यात्मेति सत्ये
आत्माचित्तंयस्यसतथातान्दमत्यागाप्रमादान् १७ दोषनिवृत्त्यैवतपःसिद्धिर्धात्राकृतेत्याह निवृत्तेनैव

उ॰ ४३ ८

म॰ उ॰
टी॰
१२१

अथ व्याख्यानमुपसंहरति दोषैरिति ४९ ५॰ एवं विद्यासाधनान्यधिगम्य ग्रन्थपठनगृहीताद्वेदादधि
गतं वेद्यानामनेकत्वमन्वानः किं तद्वेद्यं श्रेष्ठमिति पृच्छति आख्यानेति आख्यानं इतिहासपुराणा
दि पंचमं येषु ते वेदैः सर्वं खल्विदं ब्रह्म ब्रह्मैवेदं विश्वं पुरुष एवेदं सर्वमित्यादिभिः भूयिष्ठं नामा
दि प्रपंचादधिकतमं भूमाख्यं परं ब्रह्म तद्वेदवजनः स्थावरजंगमरूपं जगदिति कथ्यते अन्ये शा
खिनः पुनश्चतुर्वेदाः चत्वारि वेदयंतीति ते तथा चत्वारः पुरुषा इति वाध्वः शारीरपुरुषश्छंदः पु

दोषैरेतैर्विमुक्तस्तु गुणैरेतैः समन्वितः एतत्समृद्धमत्यर्थं तपो भवति केवलं
४९ यन्मां पृच्छसि राजेंद्र संक्षेपात्तद्ब्रवीमि ते एतत्पापहरं पुण्यं जन्ममृत्युजरा
पहं ५॰ धृतराष्ट्र उ॰ आख्यानपंचमैर्वेदैर्भूयिष्ठं कथ्यते जनः तथा चान्ये चतु
र्वेदास्त्रिवेदाश्च तथापरे ५१ ॥

रुषो वेदपुरुषो महापुरुष इतीति छंदो गायत्र्यादि नियताक्षरपादं तच्च यजुः साम्नोरप्युपलक्ष
णं वेदः कर्मचोदनात्मकं ब्राह्मणं तथा त्रिवेदाः त्रीन् क्षरमक्षरमुत्तमं चेति पुरुषं वेदयंतीति त्रि
वेदाः क्षरं प्रधानं अमृताक्षरं हरः क्षरात्मानावीशते देव एक इति अमृतो जीवः कूटस्थः सोऽक्ष
रं स्वलोपश्चार्षः ईशते ईष्टे क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्यः पर १२१
मात्मेति गीयत इति ५१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तथा द्विवेदाः द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यदिति वाच्यवाचकयोरभेदेन ब्रह्मशब्देनात्र कृत्स्नो ना
मरूपात्मकः प्रपंच उच्यते परं तु तदतीतमिति द्वयमपि वेद्यत्वेन वदंति एकवेदाः एकधैवानुद्रष्ट
व्यं नेह नानास्ति किंचनेत्यादय एकमेव वेद्यं वेदयंति अन्ये च अ श्रूयते स्नूयते इति अकर्ईश्वरः सृ
यत्केन नास्ति येषां ते ऽन्ये च अद्वैतवादिनः एकवेदानां तु सृष्ट्युत्थानकाले द्वैतमस्ति समाधौ तु वा
यितत्त्व इवेति अन्ये चा तु अव्यस्था द्वये पि द्वैताभावस्तु अल्प इति भेदः एतेषां बहूनां मध्ये सकतरः क
तमः यमहं वेद ज्ञानी यो द्विज ब्राह्मणो ब्रह्मविदित्यर्थः अत्र भूयिष्ठजन इति प्रथमः सविशेषा
द्वैतपक्षः द्वितीयो निरीश्वरपक्षः सांख्यानां मीमांसकानां च त्रिवेदास्तु पातंजलाः जीवेश्वरजगतां
भेदं वदंतः द्विवेदास्तौडुलोमाः कार्यात्मना भेदं कारणात्मना अभेदं च सत्यमेव वदंतः यथा क

द्विवेदाश्चैकवेदाश्चाप्यन्ये चात्र तथापरे तेषां तु कतरः सम्यग्यमहं वेद वै द्विज ॥ जं ५२

टकमुकुटाद्यात्मना भेदोपि सत्यः कनकात्मना अभेदोपि सत्य एवेति एकवेदा
नामपि किंचिद्द्वाध्ययोः सदसद्भ्याम निर्वचनीयं द्वैतमस्त्येव व्यावहारिकं प्रातिभासिका
स्वयो वाध्यात्मरज्जुरगादेर्विलक्षणो यावन्मोक्षमवाध्यं अन्ये चा तु दृष्टिसृष्टिवादिनो यथा रज्जावु
रगः स्वकल्पिता एवमात्मनि जाग्रत्स्वप्नौ समसत्ताकाविति भेदः तत्राध्यारोपापवादाभ्यां निष्प्र
पंचं प्रपंच्यत इति न्यायेन अध्यारोपदशायां च तत्र व्यवहारस्य पारमार्थिकत्वपरमध्यारोपदृष्ट्यो पा
मस्ते अन्ये पत्ताः पवादट्ट्यो व्यवहारापलापेन एकवेदपक्षस्तु व्यामिश्रदृष्ट्याः निर्वचनीया
त्वया एवमेव दृष्टित्रयमाश्रित्य शास्त्रमपि प्रवृत्तं आत्मकृतेः परिणामादिति अध्यारोपकालेप

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ रिणामदृष्टिः सवितावह्नेवकनककुंडलन्यायेनांगदाकारेणपरिणतं तथाचश्रुतिः तदात्मानंस
टी॰ यमकुरुतमत्सत्यंचानृतंचसत्यमभवत् सत्यंव्यावहारिकं जाग्रदज्जगदादि अनृतंप्रातिभासिकं
१२२ स्वप्नरज्जुसर्पादि एतदुभयात्मकंतत्सत्यंकालत्रयाबाध्यंब्रह्मैवनान्यमितिश्रुत्यर्थः तथाचात्म
निचैवंविचित्राश्चहीतिस्वप्नकालेआत्मनिजाग्रत्कालेमायेंद्रजालमरीचिकोटकादयोहि
सिद्धताः सृष्टयोभवंतिविचित्राश्चताः नचताः नसंतीतिवक्तुंशक्यअनुभूयमानत्वात् ना
पिसंतीतिज्ञानेनसद्योबाधात् एवंब्रह्मण्यपिविचित्राः निर्वचनीयासृष्टिरस्तीतिसूत्रार्थः
तथाचास्यजगतोः निर्वचनीयत्वंश्रुतिराह कोअद्धावेदकइहप्रवोचत्कुतआजाताकुत
इयंविसृष्टिरिति नकोपिनवेदनकोपिप्रावोचदितिश्रुत्यर्थः सेयंव्यामिश्रदृष्टिःअपवाद
दृष्टिस्तुआहचतत्तन्मात्रमितिसवित्रा सयथासैंधवखिल्यउदकेप्रास्तउदकमेवानुवि
लीयेत सयथासैंधवघनोऽनंतरोऽबाह्यः कृत्स्नोरसघनएवंवाअरेयमात्माकृत्स्नःप्र
ज्ञानघनइतिश्रुत्याचदर्शिता यथाजलेप्रास्तः सैंधवखिल्यः स्वोपादानेउदकेजलेली
नमनुस्वयमपिलीयतेऽन्यथाकरकालयेइवजलेपरिमाणाधिक्यंस्यात् अतः सःअ
नंतरंकारणंबाह्यंघनीभावः तदुभयवर्जितः केवलरसतन्मात्रात्मनाजलेऽभिव्यक्तो
दृश्यतेएवमयंप्रपंचः कार्यकारणोभयस्वरूपहीनः समाधौकेवलप्रज्ञानघनोभिव्यज्य
तेइतिश्रुत्यर्थः अनेनदृष्टित्रयेणजनुर्बोधार्थप्राप्तंप्रभृते यथोक्तसत्वेपशारीरके आरोप
दृष्टिरपवादकदृष्टिरेवंव्यामिश्रदृष्टिरितिदृष्टिविगमेन संग्रहसूत्रकृदयंपुरुषमनुमनुतेस
म्यक्प्रबोधयितुमुत्सहतेक्रमेणेत्यादिना श्रुतिवचांसिमुनिस्मरणानिचहृदयविशारदो
ऽपिसर्वज्ञः त्रयमपेक्ष्यदृष्टांत्रितयंविनानहिचराम्प्रयातिकदाचनेमंतेन ४९ १२२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवमनेकेषुपदेषुप्रस्थापितेषुसिद्धांतमाह एकस्येति ब्रह्मैवएकंवेद्यंतच्चसत्यंकालत्रयेप्यबाध्यंतस्याज्ञा
नात्बहूनिवेद्यानिउपास्यानिअब्रह्मभूतानिकृत्तानिकल्पितानिवेदसत्यप्रतिपत्यर्थे तेषामब्रह्मत्वे।
वेदएवाह तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइति तस्मिंश्चसत्येब्रह्मणिकश्चिदेवस्थितः ब्रह्मला
भोःतिदुर्लभइत्यर्थः अनिरप्यज्ञानकार्यत्वंजगतआह तच्छेनाप्यपिहितंयदासीत मसस्तन्महिना
जायतैकमिति तच्छेनरज्जूरगादिवदध्यस्तेनमिथ्याभूतेनतमसाआभुसर्वव्यापकंब्रह्मअपिहित
आच्छादितंयत्आसीत्एकमेवसत्तत्तमसः अज्ञानस्यतपसइतिपाठेआलोचनस्यसंकल्पमात्र

सनत्सुजातउ॰ एकस्यवेदस्याज्ञानाद्वेदास्तेबहवःकृताः सत्यस्यैकस्यराजेंद्र।
सत्येकश्चिदवस्थितः ५३ एवंवेदमविज्ञायप्राज्ञोहमितिमन्यते दानमध्य
यनंयज्ञोलोभादेतत्प्रवर्तते ५४ सत्यात्प्रच्यवमानानांसंकल्पश्चतथाभवे
त् ततोयज्ञःप्रतायेतसत्यस्यैवावधारणात् ५५ ॥

महिनामाहात्म्येनअजायतप्रपंचाकारेणआविर्बभूव यथारज्जुरज्ञानावृतासर्पाकारेणाविर्भवति
तद्वदितिश्लोकार्थः ५३ एवमितिसत्यप्रत्यगात्मानंवेद्यंअज्ञात्वावाह्यसुखलोभात्एतद्दानादि।
कंकर्मप्रवर्ततइत्यर्थः ५४ सत्यादिति तथाभवेत् सत्यात् परमानंदात्प्रच्युतस्यज्ञानंदवि।
षयाभिलाषोभवेत् ततश्चासौयज्ञःज्योतिष्टोमादिःप्रतायेतसंतन्यते सत्यस्यवेदवचनस्यज्योति।
ष्टोमेनस्वर्गकामोयजेतेत्यादेः अवधारणात्प्रामाण्यनिश्चयात् संकल्पाविततथाभवेदितिपाठे
सत्यसंकल्पत्वेअन्यस्यतुसंकल्पोविध्यइत्यर्थः सनत्पाठेयज्ञोपिसत्यस्यानवधारणादपरोक्षेणअनि।

अयादेवप्रवर्ततेज्ञानेनसत्येएतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभा
रतेतिकृतकृत्यत्वमेवसमर्थ्यते ४५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० ३० मनसेति यज्ञश्चानुक्रम्यते अन्यस्यैकस्य यज्ञो मनसा देवताध्यानादिरूपो भवति वाचा ब्रह्मयज्ञज
टी० पादिरूपो यज्ञो भवति कर्मणा शस्त्रसिद्धो ज्योतिष्टोमादिः एतेषां पूर्वः पूर्वो ज्यायान् संकल्पसिद्धः
१२३ सत्यसंकल्पानां कल्पनीयपदार्थानां ब्रह्मलोकादीनामधिष्ठाता भवति ब्रह्मवित् तथा च श्रु
तिः आप्नोति स्वाराज्यं आप्नोति मनसस्पतिं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिरिति
स्वराजो भावः स्वाराज्यं ब्राह्मैश्वर्यं ४६ तस्य संकल्पस्यानैर्भृत्येन कदार्थेन आत्मा ज्ञानाद्धै
र्य संकल्पत्वे सतीत्यर्थः दीक्षितव्रतं मौनीकरणं वाग्यमनादिकं कुर्यात् एतन्नामदीक्षितं त
त् दीक्षव्रतादेशोऽस्यनेनयात्वनानिष्ठाप्रत्ययो तेन निष्पन्नं कर्मतः संस्कारआगतको विनाशी

मनसान्यस्य भवति वाचान्यस्याथ कर्मणा संकल्पसिद्धः पुरुषः संकल्पान
धितिष्ठति ४६ अनैर्भृत्येन वैतस्य दीक्षितव्रतमाचरेत् नामैतद्धातुनिर्वृत्तं
सत्यमेव सतां परं ४७ ज्ञानं वै नाम प्रत्यक्षं परोक्षं जायते तपः विद्याद्बहुपठं
तं तु द्विजं वै बहुपाठिनं ४८ तस्मात् क्षत्रिय मा मंस्था जल्पितेनैव वै द्विजं य
एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ४९ ॥ चेत्यर्थः सतां तु सत्यमेव परं ब्रह्मैव श्रे
ष्ठं अकृतकत्वेनाविनाशित्वात् ४७ एतदेव स्पष्टयति ज्ञानमिति प्रत्यक्षं शोकमोहनिवृत्ति
रूपं ज्ञानफलं प्रत्यक्षमित्यर्थः तपः कायिकं वाचिकं मानसिकं च तत्तु परोक्षं आमुष्मिकफल
प्रदमित्यर्थः विद्यादित्यर्द्धेन परोक्तज्ञानस्य व्याख्यानं निविहतुच्यते ४८ उक्तमेवोपसंहरति तस्मादिति
जल्पितेनैव केवलाध्ययनेनैव सत्यात्सत्याद्यानदानात् तथा च श्रुतिः यो वा एतदक्षरं गार्गि विदि
त्वास्माल्लोकात्प्रैति स ब्राह्मण इति अपरोक्षज्ञानिनां ब्राह्मणत्वमुक्त्वार्थादितरस्याब्राह्मणत्वदर्शय १२३

नन्वेवमध्ययनस्यानादेर्वेदार्थस्यादित्यापेक्षेत्याह छंदांसीति एष उपनिषत्सु सिद्धः अथर्वाणमहान्
निर्महर्षिसंज्ञेयाति पुराजगौ तान्येव छंदांसि उपनिषद्रूपाणि नाम निश्चितः छादयंति ह वा एनं छंदांसि
पापात्कर्मण इति श्रुत्या छंदःशब्दनिर्वचनात् सर्वाण्येतेऽग्रहणपक्षरूपाः इति आथर्वणोपनिषदियत्ता
नां पापादिति तमसामर्थ्यदर्शनात् ब्रह्मविद्यार्थिनां छंदसां मुख्यं छंदस्त्वं कुमार्थिनां तु गौणमिति भावः
किंच उतत्वः पिपि पि अधीत वेदाः सोपनिषत्कं वेदं पाठतोऽर्थतश्चाधीतवंतस्तेऽपि न छंदोविदः यतः वे
दवेद्यस्यौपनिषदस्य पुरुषस्य तत्त्वयाथात्म्यं न विदुः न जानंति अथ येनाचरति मायया एष वाचं शुश्रु
वान् अफलामपुष्पामिति पुष्पं हि फलं वाच्यः सत्यमिति श्रुतिश्चैतदाह सत्यं परं ब्रह्म ५ छंदांसि नाम

छंदांसि नाम त्रिपदान्यथर्वा पुरा जगौ महर्षिसंज्ञ एषः छंदोविदस्ते य उत नाधी
तवेदा न वेदवेद्यस्य विदुर्हि तत्त्वं ५ छंदांसि नाम द्विपदां वरिष्ठ स्वच्छंदयोगेन भवं
ति तत्र छंदोविदस्तेन च तानधीत्य गता न वेदस्य न वेद्यमार्याः ५१॥

ति हि परं मनुष्याणां मध्ये वरिष्ठ तत्र सत्ये ब्रह्मणि विषये छंदांसि वेदाः स्वच्छंदयोगेन स्वातंत्र्येण संब
ध्नेनैव भवंति कर्मकांडार्थज्ञानवत् ब्रह्मकांडार्थज्ञानेन मध्येऽनुष्ठानांतरमपेक्षते तथा हि
तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति श्रुत्या दर्शनसाधनात्मयोर्मध्ये तिष्ठन्न गाय।
ती स्वादोऽलिष्टं तिगायत्योर्मध्ये स्वकार्यातिरवार्यते तेन च ज्ञानेन सत्येन चकार एवकारार्थे तेनैव सर्वे
छंदोविदो भवंति न कर्ममात्रज्ञानेन तान् छंदोज्ञानं अधीत्य प्राप्य आर्याः वेदस्य वेद्यं वेदनीयं ब्रह्म न।
गता इति न अपितु गताः प्राप्ता एवेत्यर्थः एतेन तद्धि ज्ञानार्थं स गुरुमेवाभिगच्छेदित्यस्याः श्रुतेः।
र्थो दर्शितः ५ ॥ ६६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म·उ·
टी·
१२४

तथापि ब्रह्मणोऽद्वैतत्वमाह नेति वेदानां रहस्यस्य वेदिता ज्ञाता कश्चिन्नास्ति कश्चिन्न एतान्वेदान्रह
स्यप्रतिपादकान् वित्तं गृह्णाति श्रायात् बुध्यते यो व्युत्थितः तत्त्वमसिवाक्यार्थानुसंधाता तावावेदा
वेदस्य सविकल्पकः निर्विकल्पकं वेद्यं संवेद्यतिप्रलये प्रकाशमानं ब्रह्म न वेद किं तु सत्ये सर्ववृत्ति
बाधावधिभूते प्रत्यक्चैतन्ये स्थित एव वेद्यं निर्विकल्पकं स्वं वेद ५२ इममेवार्थं भंग्यंतरेणाह ने
ति वेदानां वेद्यानामहंकारादीनामचेतनानां मध्ये कश्चिद्वेदिता नास्ति अतो हेतोः वेद्यं न चेत
सा वेदं वेदबोध्यमात्मानं न विदुः नापि वेद्यं अनात्मानमपि न विदुः आत्माऽनात्मा च न जडस्य

न वेदानां वेदिता कश्चिदस्ति कश्चित्त्वेतान्बुध्यते चापि राजन् यो वेदवेदान्न स वे
द वेद्यं सत्ये स्थितो यस्तु स वेद वेद्यं ५२ न वेदानां वेदिता कश्चिदस्ति वेद्येन वेदं न
विदुर्न वेद्यं यो वेद वेदं स च वेद वेद्यं यो वेद वेद्यं न स वेद सत्यं ५३ ॥

विषयावित्यर्थः ननु जडया धीवृत्त्या आत्मा ज्ञायत एव दृश्यते त्वग्र्यया बुद्ध्येति श्रुतेरित्याशंक्या
ह वेदं आत्मानं यो वेद स एव वेद्यमनात्मानं सर्वं वेद आत्मप्रभवत्वात्सर्वस्य यस्तु बहिर्मुखः
वेद्यं अनात्मानं वेद सत्यं ब्रह्म न वेद तथा च श्रुतिर्भवति आत्मनो वा अरे दर्शनेन श्रवणेन म
त्या विज्ञानेनेदं सर्वं विदितं पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्नि
ति पराञ्चि बहिर्मुखानि खानि इंद्रियाणि व्यतृणत् हिंसितवान् ५३ ॥ १२४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

किंचयःविदात्मासर्वेषांप्रत्यक्त्वेनप्रसिद्धःवेदान्वेदयतितेवेदाःतान्प्रमाणानिवेदसएववेद्यंश्रमे
यमपिवेदनत्वतानिवेद्यंविदुःजडत्वात् तेचप्राणस्यप्राणमनचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रंमनसो
येमनोविदुरितिप्राणादीनांप्रवर्तकत्वेनप्रसिद्धंवेदाःप्रमाणानिवेदविदःप्रमातारश्चनविदुःय।
तोवाचोनिवर्ततेअप्राप्यमनसासहेतितस्यवाङ्मनसातीतत्वश्रुतेः यद्यप्येवंतथापिवेदवे।
दिताऽहमात्मानंवेदनेनवप्रमाणेनअहंब्रह्मास्मीत्यादिनाविदंतिनानेति केतेयेब्राह्मणाःवेदविदोवेद
पाठतोर्थतोऽनुष्ठानतश्चविदंति जानंति तेवेदविदःअध्ययनयज्ञादिनासंस्कृतचित्ताएववाक्यादि

योवेदवेदान्सचवेदवेद्यंनतंविदुर्वेदविदोनवेदाः तथापिवेदेनविदं
तिवेदंयेब्राह्मणावेदविदोभवंति ५४ धामांशभागास्यतथाहिवेदाययथा
चपाखाहिमहीरुहस्य संवेदनेचैवयथाममैतितस्मिन्हिसत्येपरमात्म
नोर्थे ५५ ॥

दात्मानंलक्षणयाजानंतीतिनत्वन्येइत्यर्थः ५४ इदमेवदृष्टांतेनप्रतिपादयति धामतेजःतन्मयाः।
अंशायस्यसतेजोमयोऽर्थोंऽशः तस्यभागाःकलाप्रतिपत्तौ तस्यसंवेदनेज्ञायते यथाचयथैवहिश
सिद्धंमहीरुहस्यशाखाउपादीयते तथाहि तथैववेदाःपरमात्मनःसंवेदनेऽर्थेपरमपुरुषार्थेनृपेस
सेसर्वथाप्यवाप्येवेदाःउपादीयंतइतिश्रामनेति तंत्वौपनिषदंपुरुषंपृच्छामीत्यौपनिषदत्वविशे
षणात् वाचामगोचरत्वश्रुतेश्चसोयंदेवदत्तइत्यादिवाक्यवत् तत्त्वमस्यादिवाक्यमपिलक्षणया।
स्वार्थंप्रमापयत्येवेत्यर्थः ५५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.भा. उ.टी. १२५

एवं गुरूपसदनपूर्वकं वाक्यार्थप्रतिपत्त्युपायमुक्त्वा गुरुलक्षणमाह अभीति ब्राह्मणं ब्रह्मविदं लक्ष
णतोऽभिजानामि लक्षणमेवाह व्याख्यातारं उपक्रमोपसंहारैकरूप्यादिषड्विधतात्पर्यलिंगा
नुसारेण वाक्यार्थवर्णनकुशलं विचक्षणं श्रुतार्थस्य युक्तिभिरनुचिंतने समर्थं निदिध्यासन
परिपाकेन अपरोक्षसाक्षात्कारबलात् यः छिन्नविचिकित्सः निःसंशयः सन् परस्यापि सर्वसं
शयान् व्याचष्टे विवृणोति अत्र स्वरूपव्याक्रियैव पराक्रियेति न्यायेन संशयान् दूरीकरोतीत्य
र्थः ५६ पर्येष्यतेऽस्मिन्निति पर्येषणं अन्वेषणम् अस्यात्मनः प्राचीनं प्राग्दिशि स्थेनापि दक्षिणादिदि
क्स्थेनापि अदिशि दिग्विहीने अन्तर्हृदये इत्यर्थः ५७ एतदेवाह तस्येति प्रत्यर्थिषु आत्मत्वेन प्र

अभिजानामि ब्राह्मणं व्याख्यातारं विचक्षणं यश्छिन्नविचिकित्सः स व्याचष्टे सर्व
संशयान् ५६ नास्य पर्येषणं गच्छेत् प्राचीनं नोत दक्षिणं नार्वाचीनं कुतस्तिर्यं
ङ्नादिशं तु कथंचन ५७ तस्य पर्येषणं गच्छेत् प्रत्यर्थिषु कथंचन अविचिन्वन्नि
मं वेदे तपः पश्यति तं प्रभुं ५८ तूष्णीभूत उपासीत न चेष्टेन्मनसापि च उपावर्त
स्व तद्ब्रह्म अन्तरात्मनि विश्रुतं ५९ ॥ अस्मान्नेषणात्मस्य पंचसु कोशेषु पर्येषणमन्वेषणं
गच्छेत् कुर्यादित्यर्थः कथंचनेत्यप्युक्रमालंबनं क्लेशसाध्यमिति सूचयति अव्यक्ता हि गतिर्दुःखं
देहवद्भिरवाप्यत इति स्मृतेः वेदे इमं आत्मानं अविचिन्वन् वेदांतन्यायान् अविचिंतयन्नित्यर्थः त
पः तपस्वी आलोचनवान् ध्यायी तं प्रभुं पश्यति तं पश्यति निष्कलं ध्यायमान इति श्रुते ५८ तूष्णीं
भूत इत्यनेन वागादिबाह्येंद्रियव्यापारोपरम उक्तः मनसापि न चेष्टेतेत्यनेन मानसव्यापारोपर
म उक्तः अंतरात्मनि हार्दाकाशे विश्रुतं वेदेषु व्याख्यातं तत् वाचामगोचरं ब्रह्म उपावर्तस्व उपागच्छ ५९ १२५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौनात् ध्यानमात्रान्न मुनिर्भवति नापि अरण्यवासात् सन्न्यासमात्रात् किं तर्हि यः स्वलक्षणं स्वस्यापरस्यागाम
नोलक्षणं जगज्जन्मादिहेतुत्वं सच्चिदानन्दात्मकत्वं च यो वेद जानाति स श्रेष्ठः संन्यासिभ्यो योगिभ्यश्चान्य
नीश्रेष्ठ इत्यर्थः ॥४४॥ सर्वार्थानां व्याकरणात् स्पष्टीकरणात् सर्वज्ञत्वादयं ज्ञानी वैयाकरण इत्युच्यते तच्च व्या
करणं केचिद्येन धर्मप्रत्यासत्त्या वदन्ति तन्निराचष्टे मूलत इति आत्मज्ञानाद्धि सर्वविज्ञानं श्रूयते तेन प्रधान
ज्ञानात् अन्यतो वा मूलत इति ल्यब्लोपे पंचमी मूलकारणं ब्रह्म प्राप्येत्यर्थः तत्र व्याकर्ता परमात्मैव तन्ना
मरूपाभ्यामेव व्याक्रियते नामरूपे व्याकरवाणीति श्रुतिभ्यामित्याह व्याकरोतीति श्रौतश्रुतिप्रदर्श
नमेतत् ॥४५॥ सार्वज्ञ्यमपि ब्रह्मविदामनौपचारिकमित्याह प्रत्यक्षेति सत्ये तिष्ठन्ननन्तरं स्मृतेर्देहाद्याका

मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः स्वलक्षणं तु यो वेद स मुनिः श्रेष्ठ
उच्यते ॥४४॥ सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते तन्मूलतो व्याकरणं व्याक
रोतीति तत्तथा ॥४५॥ प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः सत्ये वै ब्राह्मणस्तिष्ठ
न्तद्विद्वान्सर्वविद्भवेत् ॥४६॥ धर्मादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति वेदानां चानु
पूर्व्येण एतद्बुद्ध्या ब्रवीमि ते ॥४७॥ रे ब्राह्मणः ब्रह्मवित् तद्विद्वान् ब्रह्मविद्वानिति ब्राह्मणपदस्य

त्यतिप्रदर्शनं ॥४६॥ अध्यायार्थमुपसंहरति धर्मादिष्विति धर्मश्च सत्यं च दमस्तपश्च इत्यादिषु द्वादशसु स्थितः
तथा सत्यादिरूपे अष्टविधे अप्रमादे च स्थितः एवं साधनवान् वेदेषु पूर्वोक्तेषु आरोपदृष्ट्या मिथ्यारूप
वाददृष्टिरूपेषु आनुपूर्व्येण सोपानारोहणन्यायेन परमपदे स्थितो हे पतत्स्वानुभवसिद्धं बुद्ध्वा स्वतः
सिद्धवत्यात तुभ्यं प्रब्रवीमि सोपानक्रमस्तु नृसिंहतापनीये श्रूयते ओतानुज्ञात्रनुज्ञाविकल्पैरिति अ
स्यार्थः ओतत्वं कारणव्याप्तिः कार्यं यदस्ति तत्सर्वं ब्रह्मेति तन्निष्ठा जानते परिणामतः २ कार्यस्यासमसत्व

दिवत्मत्वं १ एवं सोपानरीत्येव भूमिविजयं तं चनात् प्रविकल्पंच
पंचमटं देवशास्त्रमिति निर्भयमिति ८३ ॥

वक्तारोऽसमद्दीति तं नदृश्यात्स्वसूत्रौ मारोऽमितिविकल्पं २ एतद्यति
ब्रह्मैवोऽस्मीति जानाति अस्वज्ञानाज्जायते

म०उ
टी०
१२९

इति नैलकंठीये भारतभावदीपे उद्योगपर्वणि सनत्सुजातीये द्वितीयोऽध्यायः ४२ एवं प्राप्तज्ञानमार्गं श्रुत्वा तत्प्राप्तेरंगसाधनं योगं श्रोतुं इच्छतीति सनत्सुजातेति परां उत्कृष्टादपि अप्रत्यक्षां ब्राह्मीं ब्रह्मप्रापिकां वाचं उपनिषद्रूपां वदसे जानीषे भाससे वा संभाषाज्ञाने इति नः विश्वरूपां यतः प्रकाशते तस्यां ज्ञातायां ततोऽन्यत् ज्ञातव्यं नावशिष्यत इत्यर्थः कामेन काम्यमानेन विषयेण परां दूरीभूतां विषयवातां हीनामित्यर्थः अत एव सुदुर्लभां कथां कथनीयां प्रब्रूहि हे कुमार इदं मे मम वाक्यं त्वां प्रति प्रार्थनारूपं वचनं श्रवणे हीति शेषः १ ब्रह्मविद्यायाः दुर्लभत्वं दर्शयन् सनत्सुजात उवाच नैतदिति ह

इति सनत्सुजातीये द्वितीयः २४२ धृतराष्ट्र उ० सनत्सुजात यामिमां परां त्वं ब्राह्मीं वाचं वदसे विश्वरूपां परां हि कामेन सुदुर्लभां कथां तद्ब्रूहि मे वाक्यमेतत्कुमार १ सनत्सुजात उ० नैतद्ब्रह्म त्वरमाणेन लभ्यं यन्मां पृच्छस्यतिहृष्यसीव बुद्धौ विलीने मनसि प्रचिंत्या विद्या हि सा ब्रह्मचर्येण लभ्या २ धृतराष्ट्र उ० अत्यंतविद्यामिति यत्सनातनीं ब्रवीषि त्वं ब्रह्मचर्येण सिद्धां ॥

अस्मि अहं ब्रह्मविद्याधिकार्यस्मीति हृष्यसि पाठांतरे अभिषंगेण निर्बंधेन विद्यालक्षणमाह बुद्धाविति सर्वेषामिंद्रियाणां निरोधेन मनोमात्रमनुपरतं संकल्पात्मकं तिष्ठति तस्मिन्नपि अहं ब्रह्मास्मीति निश्चयस्वभावायां बुद्धौ विलीने सति प्रचिंत्या प्रगतचिंत्यं यस्यां सा निरुद्धसर्ववृत्तिका काचिदवस्था विद्येत्युच्यते सा च ब्रह्मचर्येण गुरुकुलवासेन लभ्या २ अत्यंतेति अंतस्त्रिविधपरिच्छेदः तमतिक्रांतं अत्यंतं ब्रह्म तद्विषयां विद्यां सनातनीं नित्यसिद्धां प्रत्यगात्मनो नित्यापरोक्षत्वात् यत्साक्षादपरोक्षाद्ब्रह्मेति श्रुतेः सिद्धां अभिव्यज्यमानां न तु हेतु ॥ १२९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अनारभ्यां कर्मवदारंभायोग्यां यावत्कार्यकाले इह आत्मन्येव वसति नित्यसिद्धत्वात् एवं सति ब्राह्मण्यं ब्राह्म
णस्य योग्यं अमृतत्वं कथं लभेत न हि लब्धलाभार्थं लभेत न हि लब्धलाभार्थं यत्नोपेक्ष्यतः इति ब्रह्मचर्या
नुष्ठानाक्षेपः ३ अत्रोत्तरमाह अव्यक्तेति बुद्ध्याद्युपाधिसंबंधजनितकालुष्यात् अविविक्ततया न
व्यक्तमव्यक्तं ब्रह्म तस्य विद्यां अयं भावः यद्यपि ब्रह्म नित्यापरोक्षं आत्मत्वात् तथापि अज्ञानावृती
नस्य तस्य विविक्तस्य परोक्षत्वात् तदापरोक्ष्याय यत्नो युक्तः इति ४ अन्तस्या आर्जवेन ५ आचार्येति यो

अनारभ्यां वसतीह कार्यकाले कथं ब्राह्मण्यममृतत्वं लभेत ३ सनत्सुजात
उ॰ अव्यक्तविद्यामभिधास्ये पुराणां बुद्ध्या च तेषां ब्रह्मचर्येण सिद्धां यां प्राप्यैनं म
र्त्यलोकं त्यजंति या वै विद्या गुरुवृद्धेषु नित्या ४ धृतराष्ट्र उ॰ ब्रह्मचर्येण या विद्या
शक्या वेदितमंजसा तत्कथं ब्रह्मचर्यं स्यादेतद्ब्रह्मन्ब्रवीहि मे ५ सनत्सुजात उ॰ आ
चार्ययोनिमिह ये प्रविश्य भूत्वा गर्भं ब्रह्मचर्यं चरंति इहैव ते शास्त्रकारा भवंति प्र
हाय देहं परमं यांति योगं ६ अस्मिँल्लोके वै जयंतीह कामान्ब्राह्मीं स्थितिं ह्यनुति
तिक्षमाणाः त आत्मानं निर्हरंतीह देहान्मुंजादिषीकामिव सत्वसंस्थाः ७ ॥

निःस्थानं यो निष्टं इदं निषद्य अकारि सेवयानो निषदंतं समुपास्यादो दर्शनात् गर्भभूत्वा तस्य निष्कपट
सेवया अंतरंगत्वं प्राप्येत्यर्थः शास्त्रकाराः शास्त्रकर्तृत्वं ब्रह्मण एव अस्य महतो भूतस्य निश्वसितमेतद्य
दृग्वेद इत्यादिना गुरोरनुग्रहादिहैव ब्रह्मभावं प्राप्नुवंतीत्यर्थः परमं अपुनरावृत्तियोगं ब्रह्मणा सह ऐक्यं
यांति ६ अस्मिन्निति ये जितकामाः ब्राह्मीं स्थितिं प्राप्नुयेच हि हि सहाः ते देहादात्मानं निर्हरंति इत्थं कुर्वंति

सत्वसंस्थाः सत्वगुणभाजः श्रुतिस्मृतं स्वाचारी रात्रवृहेन्मुंजादिवद्वेषीकां यैर्येण तिष्ठहेतु इत्थं कुर्यात् ८ ॥ ९ ॥

म० ३० टी० १२

आचार्यः शास्त्रोपदेष्टा यस्यां सा जातिर्जन्म यथा ब्राह्मणस्य सावित्री श्रेष्ठा सा चित्रं द्वितीयं जन्म एवं आ
चार्यात्परब्रह्मविद्याप्राप्त्या पितस्य जन्मांतरं भवति तच्च मोक्षहेतुत्वात् गणपत्यादिगुणयुक्तं ८ आचा
र्यमाहात्म्यप्रख्यापकं मंत्रं पठति यः प्रावृणोतीति यः आचार्यः वर्णान् ब्राह्मणादीन् अवितथेन
वितथय त्नमनारतमनालस्य जडतदन्येन सम्येन विद्यात्मना प्रकर्षेण आवृणोति स वा प्राप्य भ्यंतरं वा स यति
हेतोस्य भयनिवारणेन पालयतीत्यर्थः ऋतं ब्रह्म कुर्वन् वाचा आविष्कुर्वन् तस्य फलमाह अमृतं
संप्रयच्छन्निति अमृतं मोक्षं कृतं तत्कृतमुपकारं ९ शुचिः स्नानादिना भावशुद्ध्या च अप्रम

शरीरमेतौ कुरुतः पिता माता च भारत आचार्यशास्त्या या जातिः सा पुण्या साज
रामरा ८ यः आवृणोत्यवितथेन वर्णान् ऋतं कुर्वन्नमृतं संप्रयच्छन् तं मन्येत पि
तरं मातरं च तस्मै न द्रुह्येत्कृतमस्य जानन् ९ गुरुं शिष्यो नित्यमभिवादयीत स्वा
ध्यायमिच्छेच्छुचिरप्रमत्तः मानं न कुर्यान्नादधीत रोषं एष प्रथमो नित्यमभिमन्य
मानः १० शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः ब्रह्मचर्यव्रतस्यास्य प्रथ
मः पाद उच्यते ११ आचार्यस्य प्रियं कुर्यात्प्राणैरपि धनैरपि कर्मणा मनसा वा
चा द्वितीयः पाद उच्यते १२ ॥ त्तः गुरुशुश्रूषणायां सावधानः मानं न कुर्यात् तुच्छमपि कार्यं
शिष्यं नां श्नोचादिकं तदपि कर्तव्यमेवेत्यर्थः अस्येत आमेपि रोषं नादधीत न विदध्यात् १० शिष्यवृ
त्तिः सायंप्रातर्भिक्षणेन जीवनं तेन व क्रमेण न तु गुर्वन्नोपजीवनेनेत्यर्थः ११ द्वाभ्यां श्लोकाभ्यां ब्र
ह्मचर्यस्य प्रथमं पादमुक्त्वा द्वाभ्यां द्वितीयं पादमाह आचार्यस्येति १२ ॥ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१३ आत्मविद्यास्तवेनेहच्छन् आचार्ययत्तत्त्वंतंमानयति सब्रह्मचर्यस्य तृतीयःपादः इत्याह आचार्येणे
ति आत्मकृतेनस्वस्मैउपकृतंविद्यादानेन तस्यचअर्थप्रयोजनंदुःखनिवृत्तिमानंदावाप्तिंचज्ञात्वाऽ
नुभूयअनेनाचार्येणभावितोवर्द्धितोस्मीति तंयत्नमयते १४ अनपाकृत्यविद्यायानिष्क्रयार्थमृण
मर्थदानेनअपरिहृत्यप्रवासंगुरुगृहाद्गमनात्राश्रमांतरेस्थितिंनकुर्वीत एतत्गुरवेअर्थप्रदानं।

समागुरौयथावृत्तिर्गुरुपत्न्यांतथाचरेत् तत्पुत्रेचतथाकुर्वन्द्वितीयःपादउ
च्यते १३ आचार्येणात्मकृतेविज्ञानन्तज्ञात्वाचार्थंभावितोस्मीत्यनेन यत्न
मयतेतंप्रतिहृष्टबुद्धिः सर्वैस्तृतीयोब्रह्मचर्यस्यपादः १४ नाचार्यस्यानपाकृ
त्यप्रवासंप्रयात्तःकुर्वीतनैतदहंकरोमि इत्येवमन्येतनभाषयेतसर्वैचतुर्थोब्र
ह्मचर्यस्यपादः १५ कालेनपादंलभतेतथार्थंततश्चपादंगुरुयोगतश्च उत्साह
योगेनचपादमृच्छेतशास्त्रेणपादंचततोभियाति १६ ॥

अहंकरोमीतिनैवमन्येतमनसानभाषयेतनचभाषेतस्वार्थेणिचवदेतवाचा १५ चतुष्पाद्ब्रह्म
चर्येणलभ्यांचतुष्पदींविद्यामाह कालेनेति कालेनबुद्धिपरिपाकेनउत्साहयोगेनबुद्धिवैभ
वेन शास्त्रेणसहाध्यायिभिर्विचारेण क्रमस्तुनविवक्षितः उक्तंच आचार्यात्पादमादत्तेपाद
शिष्यःस्वमेधया कालेनपादमाह तेयादंसब्रह्मचारिभिरिति १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

धर्मोदय इति यस्य ब्रह्मचर्यस्य रूपं मित्यर्थः अन्यानि चांगानि आसनप्राणजयादीनि बलं योगे निष्पु
म॰ उ॰ कृता ब्रह्मार्थो वेदार्थः कर्मब्रह्मणी तयोर्योगेन अधिगमेन ब्राह्मचर्यं फलतीत्यर्थः १७ एवमिति
टी॰ अहंकारो मौत्याभिमानं विना तस्य कायिकं वचनं विना गुर्वर्थार्थं प्रयतः सः आचार्यः वृत्तिं जीविकाम्
१२८ निष्प्राप्नोति नित्यं निर्वर्तनं शिष्यस्येति शेषः १८ वसन् ब्रह्मचर्ये इति शेषः सर्वतः सर्वैः प्रकारैः वर्द्धति

धर्मोदयो ह्यादृशो यस्य रूपमन्यानि चांगानि तथा बलं च आचार्ययोगे फलतीति
वाङ्ब्रह्मार्थयोगेन च ब्रह्मचर्यं १७ एवं प्रवृत्तो यदुपालभेत वै धनमाचार्याय तत्
दद्यात् प्रयच्छेत् सतां वृत्तिं बहुगुणमेवमेति गुरोः पुत्रे भवति न च वृत्तिरेषा १८
एवं वसन् सर्वतो वर्द्धतीह बहून् पुत्रांल्लभते च प्रतिष्ठां वर्षंति चास्मै प्रदिशो दिशश्च
वसंत्यः स्मिन्ब्रह्मचर्ये जनाश्च १९ एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ऋषयः
अमहाभागा ब्रह्मलोकं मनीषिणः २० गंधर्वाणामनेनैव रूपमप्सरसामभूत्
एतेन ब्रह्मचर्येण सूर्यो ह्यह्नाय जायते २१ आकांक्ष्यार्थस्य संयोगाद्रसभेदार्थिना
मिव एवं ह्येते समाज्ञाय तादृग्भावं गता इमे २२ ॥ वर्द्धते वर्षति धनैरिति शेषः १९
२० २१ आकांक्षेति रसभेदः पारदगुटिकाविशेषः चिंतामणिसंज्ञः तं चिंतितवस्तुप्रदं प्रार्थयं
तेते षां रसभेदार्थिनां यथा आकांक्ष्यस्य लिप्सितस्यार्थस्य संयोगः प्राप्तिस्ततो ह्याह्निकः भावो भवति
एवमेव एते देवादयः समाज्ञाय ब्रह्मचर्यमुपेत्य तादृग्भावं सत्यसंकल्पाः चिंतितवस्तुप्रदत्व १२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यइति सर्वं चतस्माद्ब्रह्मचर्यं यत्नादाश्रयेत् शरीरं च पालयेत् बाल्यं रागद्वेषराहित्यं वेदान्तार्थानां युक्तिपूर्वकमनु
चिंतनेन तत्त्वनिश्चयं वा अंतकाले इत्यनेन यावज्जीवं उक्तप्रकारेण बाल्येति सूचितमिति दर्शितं यथोक्तं शक्नोतीहै
व यः सोढुं प्राक्शरीरविमोक्षणात् कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः इति २२ अंतेति अविद्वांसः अंत
वतः अनित्यान् लोकान् कर्मणा जयंति विद्वांस्तु ब्रह्मैव प्राप्नोति तस्मात् सर्वं तेन ज्ञातेन ब्रह्मणा अभ्येति अ
तस्तस्य कर्मप्राप्यं किंचित्फलं नावतिष्ठते इत्यर्थः अतः ज्ञानादन्यः अयनाय मोक्षाय न विद्यते ज्ञानादेव
तु कैवल्यमित्यवधारणात् २४ नान्यः पंथा अयनाय विद्यत इति श्रुतत्वात् स्त्रीभूतउपासीत नचेष्टमन

यत्राश्रयेत्त्यावयेच्चापि राजन् सर्वं शरीरं तपसा तप्यमानः एतेन वै बाल्यमभ्ये
ति विद्वान् अंते तथा स जयत्यंतकाले २३ अंतवतः क्षियते जयंति लोकान् जनाः
कर्मणा निर्मलेन ब्रह्मैव विद्वांस्तेन चाभ्येति सर्वं नान्यः पंथा अयनाय विद्यते २४ पु
नराष्टु३ आभाति शुक्लमिव लोहितमिवाथो कृष्णमथांजनं काद्रवं वा स ब्रह्मणः
पश्यति योऽत्र विद्वान् कथं रूपं तदमृतमक्षरं यत् २५ ॥

सापिच अभ्यावर्तस्व तद्ब्रह्म अंतरात्मनि विश्रुतमिति प्रागुक्तप्रकारेण आत्मानमनुसंदधानस्तत्र मनवा
प्यनानावर्णान्नाडीमार्गान् अंतर्हृदये पश्यन् दृष्ट्वा इति आभातीति स ब्रह्मणो रूपं यो विद्वान् तत्र हृदये प
श्यति स शुक्लादि रूपमिव अनवस्थित रूपं ब्रह्म पश्यति अतः कथं रूपं कीदृक् रूपं तदत्यंतं व्यापकम
मृतमविनाशि पदं प्रदत्तीयं तद्गृहीतिर्विशेषः काद्रवं कुत्सितः परपीडकः द्रवो गतिर्यस्य स काद्रवो भुजः
तद्वर्णः काद्रवं कद्रु पिंगलं तद्वर्णः श्रूयंते च ब्रह्ममार्गे रूपाणि तस्मिन् शुक्लमुत नीलमाहुः पिंगलं हरि
तं लोहितं च एष पंथा ब्रह्मणाहानु वित्तस्तेनेति ब्रह्मवित्पुण्यकृत्तेजसश्चेति २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ०
टी०
१२९

उत्तरमाह आभातीति ब्रह्ममार्गे यद्यपि शुक्लादिरूपाणि भांति तथापि यत् ब्रह्मणो रूपं तत् पृथिव्या
दिषु नास्ति अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यदिति तत्र शब्दादीनां निषेधा
त् तेषां च शब्दादिमत्वात् रूपांतराणि तत्र ब्रह्मप्राप्तिचिह्नानि न तु ब्रह्मरूपाणि तथा च श्रुतिः नीहा
रधूमार्कानिलानलानां खद्योतविद्युत्स्फटिकशशीनां एतानि रूपाणि पुरःसराणि ब्रह्मण्यभि
व्यक्तिकराणि योगे इति समुद्रे संसारसागरे एनं परमात्मानं सलिले सलिलोपलक्षिते पंचभू
तात्मको देहः न बिभर्ति जीवानामिव ब्रह्मण उपाधिजं दुःखं नास्तीत्यर्थः यद्वा समुद्रे जलेऽणु रूपं

सनत्सुजात उ० आभाति शुक्लमिव लोहितमिवाथो कृष्णमथायसमर्कवर्णं न पृ
थिव्यां तिष्ठति नांतरिक्षे नैतत्समुद्रे सलिले बिभर्ति २९ न तारकासु न च विद्यु
दाश्रितं न चाभ्रेषु दृश्यते रूपमस्य न चापि वायौ न च देवतासु नैतच्चंद्रे दृश्यते नो
त सूर्ये ३० नैव ऋक्षु न यजुःषु नाथर्वसु न दृश्यते वै विमलेषु सामसु रथं
तरे बार्हद्रथे वापि राजन्महाव्रते नैव दृश्येत् ध्रुवं तत् ३१ ॥

नास्तीत्यर्थः २९ न तारकास्विति रूपादिराहित्यमेव प्रपंचः ३० नामरूपात्मके प्रपंचे सत्ति तद्रा
हित्यं ब्रह्मणो वक्तुं रूपप्रपंचादन्यत्वमुक्त्वा नामप्रपंचादप्यन्यत्वमाह नैव ऋक्ष्वित्यादिना तदि
त्यनेन प्रत्यक्त्वं ब्रह्मणो नाम निर्दिश्यते विमलेषु वैश्वानरसामादिषु रथंतरे बार्हद्रथे च पृष्ठ
सामनि महाव्रते यज्ञविशेषेपि नैव तद्दृश्येत पश्येत कर्मभिराप्तिदर्शनेन प्राप्यमित्यर्थः नास्त्य
कृतः कृतेनेति श्रुतेः अकृतः मोक्षः कृतेन कर्मणा नास्तीति श्रुत्यर्थः यतः यत् ध्रुवं नित्यं ३१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अपाणिपादं अनतिक्रमणीयं अग्राह्यत्वात् तमसः अज्ञानरूपादुपाधेः परस्तात् पराचीनं अंतकः कालः तत्
ब्रह्म अप्येति गच्छति प्रलयकाले कालोपि तत्र लीयत इत्यर्थः अणीय इति दुर्लक्ष्यत्वात् क्षुरधारया सममिति
अत्यंतावहितेन ग्राह्यं महच्च पर्वतेभ्य इति उपलक्षणं सर्वस्य सर्वस्मादपि महदित्यर्थः २९ प्रतिष्ठा
अधिष्ठानं अमृतं निर्विकारं विकृतौ सति हि विकारांतरमापद्यमानो मृत इत्युच्यते लोकं तत् इति लो
कादृश्यमात्रं ब्रह्म बृहत् यशो रमणीयमपि तदेव तद्यन्नाम महद्यश इति हि श्रुतेः तस्मादुपादानात्
कनकात् कुंडलादीनीव भूतानि जातानि यतः तत्रैव प्रलयं मृदि घटादय इव यांति एतेन ब्रह्मणो जगत्कारण

अपाणिपादं तमसः परस्तात्तदंतकोप्येति विनाशकाले अणीयो रूपं क्षुरधा
रया समं महच्च रूपं तद्धे पर्वतेभ्यः २९ सा प्रतिष्ठा तदमृतं ते लोकास्तद्ब्रह्म तद्य
शः भूतानि जज्ञिरे तस्माल्लयं यांति तत्र हि ३० अनामयं तन्महदुद्यतं यशो
वाचो विकारं कवयो वदंति यस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं ये तद्विदुरमृता
स्ते भवंति ३१ सनत्सुजातीये तृतीयः ४४ ॥ त्वमुक्तं तथा च श्रुतिः यतो वा इमानि भू
तानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति ३० अनामयं निर्दु
तं उद्यतं जगदाकारेणोद्भूतं महद्यशः परं व्यापकं आकाशादिभ्योपि महदित्यर्थः वाच इति षष्ठी
तृतीयार्थे कवयः विकारं वाचास्तीति वदंति न वस्तुरूपेणास्तीत्यर्थः तथा च श्रुतिः वाचारंभणं
विकारो नामधेयमिति वाग्जालं तु न तु विकारस्साह यस्मिन्निदं जगत् प्रतिष्ठितं तं ज्ञात्वा मुमुक्षवो ब्रह्मली
नतयविदुस्ते अमृताः मुक्ता भवंति ३१ इति नैलकंठीये भारतभावदीपे उद्योगपर्वणि सनत्सुजाती

॥ २२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰३॰
टी॰
१३

समाप्ता ज्ञानप्रधानायोगोपसर्जनात्रह्मविद्याऽइदानींयोगप्रधानांज्ञानोपसर्जनांतांवक्तुमध्यायद्वयमा
रभ्यते यत्रपूर्वंचित्तवृत्तिनिरोधेनतत्त्वंपदार्थंज्ञात्वायथ्याहेदांतश्रवणादिनातत्त्वमसत्वेनिश्चीय
तेसाप्राग्या यत्रतुश्रवणादिनापूर्वंपारोक्ष्येणप्रतीचोब्रह्मभावंनिश्चित्यपश्चान्निदिध्यासनेनप्रत्य
क्षीक्रियतेसाद्वितीया क्रमद्वयेपिफलेक्यात्साधनजातमप्येकरूपमेवेतिदर्शयितुं प्रागुक्ता
नेवहेयान्दोषानुपादेयान्गुणांश्चदर्शयति श्लोकःक्रोधश्चेत्यादिना तत्रक्रोधादयःप्राग्व्याख्या

सनत्सुजात उ॰ श्लोकःक्रोधश्चलोभश्चकामोमानःपरासुता ईर्ष्यामोहोवि
धित्साचकृपासूयाजुगुप्सता १ द्वादशैतेमहादोषामनुष्यप्राणनाशनाः
एकैकमेतेराजेंद्रमनुष्यान्पर्युपासते येराविष्टोनरःपापंमूढसंज्ञोव्यव
स्यति २ स्पृहयालुरुग्रःपरुषोवदान्यःक्रोधंबिभ्रन्मनसावैविकत्थी नृशं
सधर्माःषडिमेजनावैप्राप्याप्यर्थंनोतसभाजयंते ३ संभोगसंविद्विषमोतिमा
नीदत्वाविकत्थीकृपणोदुर्बलश्च बहुप्रशंसीवनिताद्विट्सदैवसप्तैवान्येन
पापशीलानृशंसाः ४ धर्मश्चसत्यंचतपोदमश्चअमात्सर्यंह्रीस्तितिक्षान
नि च १४ एष भ्रांते रथे तिष्ठन्भल्लेनापाहरच्छिरः जंभस्य ग्रसमानस्य तदा ह्यग्नि
नमाहवे १५ एष पारे समुद्रस्य हिरण्यपुरमारुजत् जित्वा षष्टिसहस्राणि निवा
तकवचान्रणे १६ एष देवान्सहेंद्रेण जित्वा परपुरंजयः अतर्पयन्महाबाहुरर्जुनो
जातवेदसं १७ नारायणस्तथैवात्र भूयसोन्यान्जघान एवमेतौ महावीर्यौ तौ प
श्यत समागतौ १८ वासुदेवार्जुनौ वीरौ समवेतौ महारथौ नरनारायणौ देवौ पूर्व
देवाविति श्रुतिः १९ अजेयौ मानुषे लोके सेंद्रैरपि सुरासुरैः एष नारायणः कृष्णः
फाल्गुनश्च नरः स्मृतः २० नारायणो नरश्चैव सत्वमेकं द्विधाकृतं एतौ हि कर्मणा लो
कानश्नुवाते क्षयान्ध्रुवान् तत्र तत्रैव जायेते युद्धकाले पुनः पुनः २१ तस्मात्कर्मैव
कर्तव्यमिति होवाच नारदः एतद्धि सर्वमाचष्ट वृष्णिचक्रस्य वेदवित् २२ शंखचक्र
गदाहस्तं यदा द्रक्ष्यसि केशवं पर्याददानं चास्त्राणि भीमधन्वानमर्जुनं २३ सनातनौ
महात्मानौ कृष्णावेकरथे स्थितौ दुर्योधन तदा तात स्मर्तासि वचनं मम २४ नो चेदय
मभावः स्यात्कुरूणां प्रत्युपस्थितः अर्थाच्च तात धर्माच्च तव बुद्धिरुपप्लुता २५ ॥

आचष्ट आख्यातवान्नारद एव २२ २३ २४ २५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१० ११ कलापविघोऽप्यांप्योपि २४ २२ २४ २५ २६ २० ॥

म॰ उ॰
टी॰
१५८

नचेत्कुर्हीष्यसेवाक्यंश्रोतासिसबहून्हतान् तथैवहिमतंसर्वेकुरवःपर्युपासते
२६ त्रयाणामेवचमतंतन्नमेकोनुमन्यसे रामेणाचैवशप्तस्यकर्णस्यभरतर्षभ
२७ दुर्जातेःसूतपुत्रस्यशकुनेःसौबलस्यच तथाचत्वद्रपापस्यभ्रातुर्दुःशासन
स्यच २८ कर्णउवाच नैवमायुष्मतावाच्यंयन्मामात्थपितामह क्षत्रधर्मेस्थि
तोह्यस्मिस्वधर्मादनपेयिवान् २९ किंचान्यन्मयिदुर्वृत्तंयेनमांपरिगर्हसे नहि
मेवृजिनंकिंचिद्धार्तराष्ट्राविदुःक्वचित् ३० नाचरंवृजिनंकिंचिद्धार्तराष्ट्रस्यनित्य
शः अहंहिपांडवान्सर्वान्हनिष्यामिरणेस्थितान् ३१ प्राग्विरुद्धैःसमंसद्भिः
कथंवाक्रियतेपुनः राज्ञोहिधृतराष्ट्रस्यसर्वंकार्यंप्रियंमया तथादुर्योधनस्य
विसहिराज्येसमाहितः ३२ वैशंपायनउ॰ कर्णस्यतुवचःश्रुत्वाभीष्मःशांतनवः
पुनः धृतराष्ट्रंमहाराजसंभाष्येदंवचोब्रवीत् ३३ यदयंकत्थतेनित्यंहंताहं
पांडवानिति नायंकलापिसंपूर्णापांडवानांमहात्मनां ३४ अनयोयोयमागं
तापुत्राणांतेदुरात्मनः तदस्यकर्मजानीहिसूतपुत्रस्यदुर्मतेः ३५ एतमाश्रित्यपु
त्रस्तेमंदबुद्धिःसुयोधनः अवमन्यततान्वीरान्देवपुत्रानरिंदमान् ३६ किंचाप्येते
नतत्कर्मकृतंपूर्वंसुदुष्करं तैर्यथापांडवैःसर्वैरेकैकेनकृतंपुरा ३७ दृष्ट्वाविराटन

१५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३८ क्रियतेयत्‌यदाहृषायतेवृषवन्नर्दति ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ अध्यायः ४९ २२३ ॥

सहितान्‌हिकुरून्सर्वानभियातोधनंजयः प्रमथ्यचाच्छिनद्वासः किमयंप्रोषितस्त
दा ३८ गंधर्वैर्घोषयात्रायांह्रियतेयत्सुतस्तव क्वतदासूतपुत्रोभूद्यइदानींवृषाय।
ते ३९ ननुतत्रापिभीमेनपार्थेनचमहात्मना यमाभ्यामेवसंगम्यगंधर्वास्तेपराजि
ताः ४० एतान्यस्यमृषोक्तानिबहूनिभरतर्षभ विकत्थनस्यभद्रंतेसदाधर्मार्थलो
पिनः ४१ भीष्मस्यतुवचःश्रुत्वाभारद्वाजोमहामनाः धृतराष्ट्रमुवाचेदंराजमध्येभि
पूजयन्‌ ४२ यदाहभरतश्रेष्ठोभीष्मस्तत्क्रियतांनृप नकाममर्थलिप्सूनांवचनं।
कर्तुमर्हसि ४३ पुरायुद्धात्साधुमन्येपांडवैःसहसंगतं यद्वाक्यमर्जुनेनोक्तंसंजय
ननिवेदितं ४४ सर्वंतदपिजानामिकरिष्यतिचपांडवः नह्यस्यत्रिषुलोकेषुसदृशो।
स्तिधनुर्द्धरः अनादृत्यततद्वाक्यमर्थवद्द्रोणभीष्मयोः ततःससंजयंराजापर्यपृ
च्छतपांडवान्‌ ४६ तदैवकुरवःसर्वेनिराशाजीवितेभवन्‌ भीष्मद्रोणौयदाराजानसम्य
गनुभाषते ४७ इत्युद्योगेसंजययाने ४८ धृतराष्ट्रउ० किमसौपांडवोराजाधर्मपुत्रो।
भ्यभाषत श्रुत्वेहबहुलाःसेनाःप्रीत्यर्थंनःसमागताः १ किमसौचेष्टतेसूतयोत्स्यमा
नोयुधिष्ठिरः केवास्यभ्रातृपुत्राणांपश्यंत्याज्ञेप्सवोमुखं २ केस्विदेनंवारयंतियुध्यस्व
त्येतिवापुनः निकृत्याकोपितंमंदैर्धर्मज्ञंधर्मचारिणम्‌ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ० टी० १४८

८ येनमहायेनअस्मान्बालस्यअभ्ययुंजतसंनद्धाअभवन् ९ कुरवःसंसीदंत्यस्यांसभायां १० १४ १५

संजयउ० राज्ञोमुखमुदीक्षंतेपांचालाःपांडवैःसह युधिष्ठिरस्यभद्रंतेसमवीनत।
शास्तिच ४ हृष्टाअभ्यभूताःपांडवानांपांचालानांरथव्रजाः आयांतमभिनंदंतिकुंती
पुत्रंयुधिष्ठिरं ५ नभःसूर्यमिवोद्यंतंकौंतेयंदीप्ततेजसं पांचालाःप्रतिनंदंतितेते।
जोराशिमिवोदितं ६ आगोपालाविपालाश्चनंदमानायुधिष्ठिरं पांचालाःकेक
यामत्स्याःप्रतिनंदंतिपांडवं ७ ब्राह्मण्योराजपुत्र्यश्चविशांदुहितरश्चयाः क्रीडं
त्योभिसमायांतिपार्थंसंनद्धमीक्षितं ८ धृतराष्ट्रउ० संजयाचक्ष्वयेनास्मान्पां।
डवाअभ्ययुंजत धृष्टद्युम्नस्यसैन्येनसोमकानांबलेनच ९ वैशंपायनउ० गाव
ल्गणिस्ततस्तत्रसभायांकुरुसंसदि निश्वस्यसभृशंदीर्घंमुहुःसंचिंतयन्निव
१० तत्रानिमित्ततोदैवात्सूतंकश्मलमाविशत् तदाचचक्षेविदुरःसभायांराजसं
सदि ११ संजयोयंमहाराजमूर्छितःपतितोभुवि वाचंनसृजतेकांचिद्धीनप्रज्ञो
ल्पचेतनः १२ धृतराष्ट्रउ० अपश्यत्संजयोनूनंकुंतीपुत्रान्महारथान् तैरस्यपुरु
षव्याघ्रैर्भृशमुद्वेजितंमनः १३ वैशंपायनउ० संजयश्चेतनांलब्ध्वाप्रत्याश्वस्येदमब्र
वीत् धृतराष्ट्रंमहाराजंसभायांकुरुसंसदि १४ संजयउ० दृष्टवानस्मिराजेंद्रकुंतीपु
त्रान्महारथान् मत्स्यराजगृहावासनिरोधेनावकर्षितान् १५ ॥ १४८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वसेवःयुष्मान्तेपांडवाः १६ १७ १८ १९ २० २१ सिंधुराज्ञोजयद्रथः २२ २३ २४ २५ २६ ॥

शृणुयैर्हिमहाराजपांडवाश्रभ्ययुंजत धृष्टद्युम्नेनवीरेणयुद्धेवस्तेभ्ययुंजत १६ योनै
वरोषान्नभयान्नलोभान्नार्थकारणात् नहेतुवादाद्धर्मात्मासत्यंजह्यात्कदाचन १७
यःप्रमाणंमहाराजधर्मेधर्मभृतांवरः अजातशत्रुणातेनपांडवाश्रभ्ययुंजत १८ यस्य
बाहुबलेतुल्यःपृथिव्यांनास्तिकश्चन योवैसर्वान्महीपालान्वशेचक्रेधनुर्धरः १९
यःकाशीनंगमगधान्कलिंगांश्चयुधाजयत् तेनवोभीमसेनेनपांडवाश्रभ्ययुंज
त यस्यवीर्येणसहसाचत्वारोभुविमानवाः २० निःसृताजतुगेहाद्वैहिडिंबात्पुरु
षादकात् यश्चैषामभवद्द्वीपःकुंतीपुत्रोवृकोदरः २१ याज्ञसेनीमथोयत्रसिंधुराजो
पकृष्टवान् तत्रैषामभवद्द्वीपःकुंतीपुत्रोवृकोदरः २२ यश्चतान्संगतान्सर्वान्पांडवा
न्वारणावते दह्यतोमोचयामासतेनवस्तेभ्ययुंजत २३ कृष्णायांचरताप्रीतिंयेन
क्रोधवशाहताः प्रविश्यविषमंघोरंपर्वतंगंधमादनं २४ यस्यनागायुतैर्वीर्यं
भुजयोःसारमर्पितं तेनवोभीमसेनेनपांडवाश्रभ्ययुंजत २५ कृष्णद्वितीयोविक्र
म्यतुष्ट्यर्थंजातवेदसः अजयद्यःपुरावीरोयुध्यमानंपुरंदरं २६ ॥

विजयेनअर्जुनेन २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ॥

यःसमस्तान्महादेवंगिरिशंशूलपाणिनं तोषयामासयुद्धेनदेवदेवमुमापतिं २७
यश्चसर्वान्वशेचक्रेलोकपालान्धनंजयः तेनवोविजयेनाजौपांडवाअभ्ययुंजत
२८ यःप्रतीचींदिशंचक्रेवशेम्लेच्छगणायुतां सतत्रनकुलोयोद्धाचित्रयोधीव्य
वस्थितः २९ तेनवोदर्शनीयेनवीरेणातिधनुर्भृता माद्रीपुत्रेणकौरव्यपांड।
वाअभ्ययुंजत ३० यःकाशीनंगमगधान्कलिंगांश्चयुधाजयत् तेनवःसहदे
वेनपांडवाअभ्ययुंजत ३१ यस्यवीर्येणसदृशाश्चत्वारोभुविमानवाः अश्वत्था।
माधृष्टकेतुरुक्मीप्रद्युम्नएवच ३ तेनवःसहदेवेनयुद्धंराजन्महात्ययं ३२
यवीयसान्वीरेणमाद्रीनंदिकरेणच तपश्चचारयाघोरंकाशिकन्यापुरासती
३३ भीष्मस्यवधमिच्छंतीप्रेत्यापिभरतर्षभ पांचालस्यसुताजज्ञेदैवाच्चसपुनःपु।
मान् ३४ स्त्रीपुंसोःपुरुषव्याघ्रयःसवेदगुणागुणान् यःकलिंगान्समापेदेपां।
चाल्यायुद्धदुर्मदः ३५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ टी॰ १५१

५५ अध्यायः ५५ सर्वे महारथाः महारसंगमस्य २५ अनर्महासी नर्महास्यो योपहासः तदन्यो हासः सत्यमेवक्रूरता
एते चान्ये च बहवः प्राच्योदीच्या महीक्षितः शतशो यानपाश्रित्य धर्मराजो व्यवस्थितः
५६ इत्युद्योगपर्वणि संजययाने ५५ धृतराष्ट्र॰ सर्व एते महोत्साहा ये त्वया परिकीर्ति
ताः एकतस्त्वेव ते सर्वे समेता भीम एकतः १ भीमसेनाद्धि मे भूयो भयं संजायते महत्
क्रुद्धादमर्षणात्तात व्याघ्रादिव महारुरोः २ जागर्मि रात्रयः सर्वा दीर्घमुष्णं च निःश्वसन्
भीतो वृकोदरात्तात सिंहात्पशुरिवापरः ३ नहि तस्य महाबाहोः शक्रप्रतिमतेजसः से
न्येस्मिन् प्रतिपश्यामि य एनं विषहेद्युधि ४ अमर्षणश्च कौन्तेयो दृढवैरश्च पाण्डवः अ
नर्महासी सोन्मादस्तिर्यक्प्रेक्षी महास्वनः ५ महावेगो महोत्साहो महाबाहुर्महा
बलः मंदानां मम पुत्राणां युद्धेनान्तं करिष्यति ६ उरुग्राहगृहीतानां गदां बिभ्रद्वृ
कोदरः कुरूणामृषभो युद्धे दंडपाणिरिवान्तकः ७ अष्टाश्रिमायसीं घोरां गदां
कांचनभूषणां मनसाहं प्रपश्यामि ब्रह्मदंडमिवोद्यतं ८ यथा रुरूणां यूथेषु
सिंहो जातबलश्चरेत् मामकेषु तथा भीमो बलेषु विचरिष्यति ९ सर्वेषां मम पुत्रा
णामेकः क्रूरविक्रमः बह्वाशी विप्रतीपश्च बाल्येपि रभसः सदा १० उद्वेपते मे हृदयं
ये मे दुर्योधनादयः बाल्येपि तेन युध्यन्तो वारणेनेव मर्दिताः ११ तस्य वीर्येण संक्लिष्टा नि
त्यमेव सुता मम स एव हेतुर्भेदस्य भीमो भीमपराक्रमः ग्रसमानमनीकानि नरवारण
वाजिनां पश्यामीवाग्रतो भीमं क्रोधमूर्छितमाहवे १२ ॥ शृङ्गारपदसतीत्यर्थः ५६ उरुग्राहः

[illegible] १ ॥

१५१

४५ कस्तकर्षेणकरकर्षसंज्ञेतेनभ्रात्रा ४६ ४७ ४८ ॥

शिखंडिनावः कुरवः कृतास्त्रेणाभ्ययुंजत यं यज्ञः पुरुषं चक्रे भीष्मस्य निधनेच्छया ३६
महेष्वासेन रौद्रेणपांडवाअभ्ययुंजत महेष्वासाराजपुत्राभ्रातरः पंचकेकयाः ३७ आ
मुक्तकवचाः शूरास्तैश्चवस्तेभ्ययुंजत योदीर्घबाहुः क्षिप्रास्त्रोधृतिमान्सत्यविक्रमः ३८
तेनवोवृष्णिवीरेणयुयुधानेनसंगरः यआसीच्छरणंकालेपांडवानांमहात्मनां ३९ द्र
णोतेनविराटेनभवितावःसमागमः यःसकाशिपतीराजावाराणस्यांमहारथः ४०
सतेषामभवद्योद्धातेनवस्तेभ्ययुंजत शिशुभिर्दुर्जयैःसंख्येद्रौपदेयैर्महात्मभिः ४१
आशीविषसमस्पर्शैःपांडवाअभ्ययुंजत यःकृष्णसदृशोवीर्येयुधिष्ठिरसमोदमे ४२
तेनाभिमन्युनासंख्येपांडवाअभ्ययुंजत यश्चैवाप्रतिमोवीर्येधृष्टकेतुर्महायशाः
४३ दुःसहःसमरेक्रुद्धःशैशुपालिर्महारथः तेनवश्चेदिराजेनपांडवाअभ्ययुंजत
४४ अक्षौहिण्यापरिवृतःपांडवान्योभिसंश्रितः यःसंश्रयःपांडवानांदेवानामिव
वासवः ४५ तेनवोवासुदेवेनपांडवाअभ्ययुंजत तथाचेदिपतेर्भ्राताशरभोभरत
र्षभ करकर्षेणसहितस्ताभ्यांवस्तेभ्ययुंजत ४६ जारासंधिःसहदेवोजयत्सेनश्चतावु
भौ युद्धेप्रतिरथौवीरौपांडवार्थेव्यवस्थितौ ४७ द्रुपदश्चमहातेजावलेनमहतावृतः
त्यक्तात्मापांडवार्थाययोत्स्यमानोव्यवस्थितः ४८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰भा॰
उ॰टी॰
१५२

२० शोकांशिकास्यां अधःपतनेन भूमिविदारणाश्शोकयाशिकोस्थापिता ॥ २८ २९ ३१ वीथ्यौ रथमार्गे ३२ ३४ आन

क्रोशतो मे न शृण्वंति बालाः पंडितमानिनः विषमे नावमन्यंते प्रपाते मधुदर्शिनः २६
संग्रामे ये गमिष्यंति नरव्याघ्रेण मन्युना नियंते चोदिता धात्रा सिंहेनेव महामृगाः २७
शैक्यां तात चरन् शिक्षिकृपश्चास्त्रविमर्मभिन्नोजसं सहिता दुःखसंस्पर्शा कथं शक्ष्यंति मे सुताः
२८ गदां भ्रामयतस्तस्य भिंदतो हस्तिमस्तकान् सृक्किणी लेलिहानस्य बाष्पमुत्सृ
जतो मुहुः २९ उद्दिश्य नागान् पततः कुर्वतो भैरवान् रवान् प्रतीपं पततो मत्तान् कुंजरान् प्र
तिगर्जतः ३० विगाह्य रथमार्गेषु वरान् उद्दिश्य निघ्नतः अग्नेः प्रज्वलितस्येव अपि मु
च्येत मे प्रजा ३१ वीथीं कुर्वन्महाबाहुर्द्रावयन्मम वाहिनीं नृत्यन्निव गदापाणिर्यु
गांतं दर्शयिष्यति ३२ प्रभिन्न इव मातंगः प्रभंजन् पुष्पितान् द्रुमान् प्रवेक्ष्यति रणे से
नां पुत्राणां मे वृकोदरः ३३ कुर्वन् रथान् विपुरुषान् विसारथिहयध्वजान् आरुजन् पु
रुषव्याघ्रो रथिनः सादिनस्तथा ३४ गंगावेग इवानूपांस्तीरजान् विविधान् द्रुमा
न् प्रभंक्ष्यति रणे सेनां पुत्राणां मम संजय ३५ दिशो नूनं गमिष्यंति भीमसेनभया
र्दिताः मम पुत्राश्च भृत्याश्च राजानश्चैव संजय ३६ येन राजा महावीर्यः प्रविश्यां
तःपुरं पुरा वासुदेवसहायेन जरासंधो निपातितः ३७ कृत्स्नेयं पृथिवी देवी जरा
संधेन धीमता मागधेंद्रेण बलिना वशे कृत्वा प्रतापिता ३८ ॥

पान् सजले देशे स्थितान् ३५ ३६ ३७ ३८ ॥ ३९

१५२

संहतेक्रोधेनग्रथितेभ्रुवौयस्यसंहतभ्रूः १९ २० इतीतिप्रगानिकटेगतिदृढमितिवार्यःप्रराप्रराणेतिदृढेइतिमे

अस्त्रेद्रोणार्जुनसमंवायुवेगसमंजवे महेश्वरसमंक्रोधेकोहन्याद्भीममाहवे १४ संज
यावत्त्वमेशूरंभीमसेनममर्षणं अतिलाभंतमन्येहंयत्तेनरिपुघातिना १५ तद्दैवन
हताःसर्वेपुत्रामममनस्विना येनभीमबलायत्तारागास्तसाश्चपुराहताः १६ कथंतस्य
रणेवेगंमानुषःप्रसहिष्यति नसजातुवशंतस्थौममबाल्येपिसंजय १७ किंपुनर्म
मदुष्पुत्रैःक्लिष्टःसंप्रतिपांडवः निष्ठुरोरोषणोत्यर्थंभज्येतापिनसंनमेत् तिर्यक्प्रेक्षी
संहतभ्रूःकथंशाम्येद्वृकोदरः १८ शूरस्तथाप्रतिबलोगौरस्तालइवोन्नतः प्रमाणतो
भीमसेनःप्रादेशेनाधिकोर्जुनात् १९ जवेनवाजिनोत्येतिबलेनात्येतिकुंजरान् अव्य
क्तजल्पीमध्वक्षोमध्यमःपांडवोबली २० इतिबाल्येश्रुतःपूर्वंमयाव्याससमुखान्मुरा
रूपतोवीर्यतश्चैवयाथातथ्येनपांडवः २१ आयसेनसदंडेनरथान्नागान्नरान्हयान्
हनिष्यतिरणेक्रुद्धोरौद्रःक्रूरपराक्रमः २२ अमर्षीनित्यसंरब्धोभीमःप्रहरतांवरः म
यातातप्रतीपानिकुर्वन्पूर्वंविमानितः २३ विस्तीर्णामायसींस्थूलांसुपार्श्वांकांचनीं
गदांशतघ्नींशातनिर्ह्रादांकथंशक्ष्यंतिमेसुताः २४ अपारमप्लवागाधंसमुद्रंशरवेगिनं
भीमसेनमयंदुर्गंतातमंदाःतितीर्षवः २५ ॥

दिनीप्रराभाविप्रराणयोःप्रबंधेनिकटेतीतइतिविश्वलोचनः २१ २२ विस्तीर्णांअवक्रांतिर्यग्भावहीनांशातनिर्ह्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४९ ५३ अगादस्य गदाहीनस्य ५४ ५५ संग्रामे ग्रेतं त्वस्य नाशं स्यात् स्यंति भीष्मादयः ५६ ५७ येडं मार्गे स्वर्गमार्गं ५८ ५९ अ

भीष्मप्रसादात्कुरवो न येनां थकृत्स्नशः यत्नतस्य वधे जग्मुः केवलं दैवमेव तत् ४९ स
गत्वा पांडुपुत्रेण तरसा बाहुशालिना अनायुधेन वीरेण निहतः किं ततोधिकं ५० दीर्घं
कालं समासक्तं विषमाशीविषोपमा समोस्त्वितिरणे तेजः पुत्रेषु मम संजय ५१ महेंद्र
इव वज्रेण दानवान्देवसत्तमः भीमसेनो गदापाणिः सूदयिष्यति मे सुतान् ५२ अ
विषह्यमनावार्यं तीव्रवेगपराक्रमं पश्यामीवातितात्राक्तमापतं तं वृकोदरं ५३
अगदस्याप्ययज्ञेषा विरथस्य विवर्मणः बाहुभ्यां युध्यमानस्य कस्तिष्ठेदग्रतः पु
मान् ५४ भीष्मो द्रोणश्च विप्रोयं कृपः शारद्वतस्तथा जानंत्येते तथैवाहं वीर्यं ज
स्य धीमतः ५५ आर्यव्रतं तु जानंतः संगरांते विधित्सवः सेनामुखेषु स्थास्यंति
मामकानां नरर्षभाः ५६ बलीयः सर्वतो दिष्टं पुरुषस्य विशेषतः पश्यन्नपि जयं
तेषां न नियच्छामि यत्सुतान् ५७ ते पुराणं महेष्वासा मार्गं मैंद्रं समास्थिताः त्य
क्ष्यंति तुमुले प्राणान्वृत्तः पार्थिवं यशः ५८ यथैषां मामकास्तात तथैषां पांड
वा अपि पौत्रा भीष्मस्य शिष्याश्च द्रोणस्य च कृपस्य च ५९ यत्त्वस्मदाश्रयं किंचिद्दत्त
मिष्टं च संजय तस्यापचितिमार्यत्वात्कर्तारः स्युर्विराश्रयः ६० अदददानस्य शस्त्राणि हि
तत्र धर्मः परीक्षितः निधनं तत्रियस्याजौ वरमेवाहुरुत्तमं ६१ सवै शोचामि सर्वान्वै ये युयु
त्संति पांडवैः विक्रुष्टं विदुरेणादौ तदेतद्भयमागतं ६२ न तु मन्ये विघाताय ज्ञानं दुःखस्य
संजय भवत्यतिबलं ह्येतज्ज्ञानस्याप्युपघातकं ६३ ॥

पवितिं निष्कृतिं ६४ ६५ एतत्भाविडः वं अतिबलं ज्ञानेन अतिवा
यं ६३ ॥

म० ३०
टी०
१५३

निर्मुक्ताः जीवन्मुक्ताः ५४ ५५ त्वमेव शाकं उत्तरं कार्यं प्रतिकारः ५६ ५७ पर्यायधर्मः विपरीतधर्मः अर्थिनैर्भिः

ऋषयोह्यपि निर्मुक्ताः पश्यन्तो लोकसंग्रहात् सर्वैर्भवंति संयुक्ता जनस्तथाऽऽ:खेनऽः

खिताः ५४ किं पुनर्मोहमासक्तस्तत्र तत्र सहस्रधा पुत्रेषु राज्ये दारेषु पौत्रेष्वपि च

बंधुषु ५५ संशयेत महत्यस्मिन् किं नु मे तेमसुत्तरं विनाशं ह्येव पश्यामि कुरूणां

मनुचिंतयन् ५६ द्यूतप्रमुखमाभाति कुरूणां व्यसनं महत् मंदेनैश्वर्यकामेन

लोभात्पापमिदं कृतं ५७ मन्ये पर्यायधर्मोयं कालस्यात्यंतगामिनः चक्रे प्र

धिरिवासक्तो नास्य शाक्यं पलायितं ५८ किं नु कुर्यां क्व कुर्यां क्व नु गच्छामि संज

य एते नश्यंति कुरवो मंदाः कालवशंगताः ५९ अवशोहं तदा तात पुत्राणां नि

हते शते श्रोष्यामि निनदं स्त्रीणां कथं मां मरणं स्पृशेत् ६० यथा निदाघे ज्वलनः

समिद्धो दहेत् कक्षं वायुना चोद्यमानः गदाहस्तः पांडवो वै तथैव हंता मदीयान्स

हितोऽर्जुनेन ६१ इत्युद्योगपर्वणि संजययाने ५९ धृतराष्ट्र उ° यस्य वै नानृता वा

चः कदाचिदनुशुश्रुम त्रैलोक्यमपि तस्य स्याद्योद्धा यस्य धनंजयः १ तस्यैवं

च न पश्यामि युधि गांडीवधन्वनः अनिशं चिंतयानोपि यः प्रतीयाद्रथेन तं २ अ

स्यतः कर्णिनालीकान्मार्गणान् हृदयच्छिदः प्रत्येता न समः कश्चिद्युधि गांडीव

धन्वनः ३ द्रोणकर्णौ प्रतीयातां यदि वीरौ नरर्षभौ कृतास्त्रौ बलिनां श्रेष्ठौ समरेष्व

अस्य कालवशस्यत्ती यार्थेषष्टी ५८ ६० अध्यायः ५९ स धनंजयः यस्य योद्धेति तच्छ्रुत्वा व्याहारेणाष्टरूणी

पराजितौ ४ ॥

यं १ तस्य तं प्रतियोद्धारं न पश्यामि धनंजय प्रतीयादित्यथ्या
हृत्ययोज्य २३४ ॥

१५३

४ तृणीकृपावानभीमादिषुप्रमादीअंतेविघांनस्मरिष्यतीतिभावः ५ अपराजयोममेतिशेषः ६ ७ तयोः

महान्स्यात्संपरायोलोकेनत्वस्तिविजयोमम तृणीकर्णःप्रमादीचआचार्यःस्थवि
रोगुरुः ५ समर्थोबलवान्पार्थोदृढधन्वाजितक्लमः भवेत्सुतुमुलंयुद्धंसर्वशो
ऽप्यपराजयः ६ सर्वेह्यस्त्रविदःशूराःसर्वेसंभावितायशः अपिसर्वामरैश्वर्यंत्यजे
युर्नपुनर्जयं ७ वधेनूनंभवेच्छांतिस्तयोर्वाफाल्गुनस्यच नतुहंतार्जुनस्यास्ति
जेताचास्यनविद्यते ८ मन्युस्तस्यकथंशाम्येन्मंदान्प्रतियउत्थितः अन्येप्यस्त्राणि
जानंतिजीयंतेचजयंतिच ९ एकांतविजयस्त्वेवश्रूयतेफाल्गुनस्यह त्रय
स्त्रिंशत्समाहूयखांडवेग्निमतर्पयत् १० जिगायचसुरान्सर्वान्नास्यविद्मःपरा
जयं यस्ययंताहृषीकेशःशीलवृत्तसमोयुधि ११ ध्रुवस्तस्यजयस्तातयथेंद्रस्य
जयस्तथा कृष्णावेकरथेयत्तावधिज्यंगांडिवंधनुः १२ युगपत्त्रीणितेजांसिसमे
तान्यनुशुश्रुम नैवास्तिनोधनुस्ताहृक्नयोद्धानचसारथिः १३ तच्चमंदानजा
नंतिदुर्योधनवशानुगाः शेषयेद्दशनिर्दीप्तोनिपतन्मूर्ध्निसंजय १४ नतुशेषं
शराःस्तातकुर्युरस्ताःकिरीटिना अपिचास्यन्निवाभातिनिघ्नन्निवधनंजयः १५
उद्धरन्निवकायेभ्यःशिरांसिशरवृष्टिभिः अपिबाणमयंतेजःप्रदीप्तमिवसर्वतः १६

कर्णद्रोणयोर्वधेअस्मदीयानांशांतिःफाल्गुनस्यवधेवापरेषामित्यर्थः ८ ९ त्रयस्त्रिंशत्समाःवर्षाणिअतीतानि

[illegible] ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ०
टी०
१५३
२

१९ कृत्स्नांश्च प्रकारानछेदभेदप्लावनादीनावसथेषु गृहेषु श्रोतास्मि श्रोष्यामि २० अध्यायः ५२ अभिसराः ३

गांडीवोऽस्य दहेत्तेजो पुत्राणां मम वाहिनीं अपि सारथ्यघोषेण भयार्ता सव्यसाचि
नः १८ वित्रस्ता बहुधा सेना भारती प्रतिभाति मे यथा कक्षं महानग्निः प्रदहेत्सर्व
तश्चरन् १८ महार्चिरनिलोद्धूतस्तद्वद्धक्ष्यति मामकान् यदोद्वमन्निशितान्बा
णासंघानाततायी समरे किरीटी सृष्टोंतकेः सर्वहरो विधात्रा यथा भवेत्तद्
दवारणीयः १९ यदा ह्यभीक्ष्णं सुबहून्प्रकारान् श्रोतास्मि तानावसथेषु कृत्स्नान्
तेषां समंतात् च तत्र रणाग्रे तत्क्षयः किलायं भरतान्नुपैति २० इत्युद्योगपर्वणि संज
ययाने ५२ धृतराष्ट्र उ० यथैव पांडवाः सर्वे पराक्रांता जिगीषवः तथैवाभिसरा
स्तेषां त्यक्तात्मानो जये धृताः १ त्वमेव हि पराक्रांतानाचक्षीथाः परान्मम पं
चालान्केकयान्मत्स्यान् मागधान्वत्सभूमिपान् २ यश्च सेंद्रानिमाल्लोकानि
च्छन्कुर्याद्वशे बली स श्रेष्ठो जगतः कृष्णः पांडवानां जये धृतः ३ समस्तामर्
जुनाद्विद्यां सात्यकिः क्षिप्रमाप्तवान् शैनेयः समरे स्थाता बीजवत्प्रवपन्श
रान् ४ धृष्टद्युम्नश्च पांचाल्यः क्रूरकर्मा महारथः मामकेषु रणं कर्ता बलेषु प
रमास्त्रवित् ५ युधिष्ठिरस्य च क्रोधादर्जुनस्य च विक्रमात् यमाभ्यां भीमसेनाच्च भ
यं मे तात जायते ६ अमानुषं मनुष्येन्द्रै

योगाः १२ जगतःस्रष्टाकृष्णः २१ जालंप्रसं प्रेतरासैन्यमर्थे ॥ १५३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ युद्धयोजकैः युद्धोद्योगिभिः ९ नैर्भृत्येन मंत्रगुप्त्या १० ११ तं अभिमुखः पतिष्यति १२ तनुरुच्चः इति पाठे पितनुःराज्य

दर्शनीयो मनस्वी च लक्ष्मीवान्ब्रह्मवर्चसी मेधावी सुकृतप्रज्ञो धर्मात्मा पांडुनंदनः ८
मित्रामात्यैः सुसंपन्नः संपन्नो युद्धयोजकैः भ्रातृभिः श्वशुरैर्वीरैरुपपन्नो महारथैः ९
धृत्या च पुरुषव्याघ्रो नैर्भृत्येन च पांडवः अनृशंसो वदान्यश्च ह्रीमान्सत्यपराक्रमः १०
बहुश्रुतः कृतात्मा च वृद्धसेवी जितेंद्रियः तं सर्वगुणसंपन्नं समिद्धमिव पावकं ११
तपंतमिव को मंदः पतिष्यति पतंगवत् पांडवाग्निमनावार्यं मुमूर्षुर्नष्टचेतनः
१२ तनुरुच्चः शिखी राजा मिथ्योपचरितो मया मंदानां मम पुत्राणां युद्धेनांतं करिष्यति
१३ तैरयुद्धं साधु मन्ये कुरवस्तन्निबोधत युद्धे विनाशः कृत्स्नस्य कुलस्य भविता ध्रुवं
१४ एषा मे परमा बुद्धिर्यया शाम्यति मे मनः यदि त्वयुद्धमिष्टं वो वयं शांत्यै यतामहे १५
न तु नः क्लिश्यमानानामुपेक्षेत युधिष्ठिरः जुगुप्सति ह्यधर्मेण मामेवोद्दिश्य कारणं
१६ इत्युद्योगपर्वणि संजययाने ५२ संजय उ॰ एवमेतन्महाराज यथा वदसि भारत
युद्धे विनाशः क्षत्रस्य गांडीवेन प्रदृश्यते १ इदं तु नाभिजानामि तव धीरस्य नित्यशः
यत्पुत्रवशमागच्छेः सत्त्वज्ञः सव्यसाचिनः २ ॥

स्य हारादल्पः स्वतस्तु उच्च एव शिखी वह्निरिव वह्निः १३ १४ १५ क्लिश्यमानानां कर्मणि षष्ठी अस्मान्न उपे
क्षेत मामेव अधर्मेण कलहस्य कारणं उद्दिश्य जुगुप्सति निंदति स कथं प्रार्थितः सन्कलहं करिष्यतीति भा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
१५४

एषकालः एषाकलनाबुद्धिस्तवनैवस्यास्यति ३ प्रणिहितात्मवान्सावधानचित्तः ४ समयेसत्यमसे ५
नैषकालोमहाराजतवशस्युपूक्तागमः त्वयायेवादितःपार्थोनिकृताभरतर्षभ ३
पिताश्रेष्ठःसुहृदश्चसम्यक्प्रणिहितात्मवान् आस्थेयंहिहितंतेननत्वयोग्याणुरुरु
अते ४ इदंजितमिदंलब्धमितिमूत्वापराजितान् एतकालेमहाराजसमयसेस
कुमारवत् ५ पदृषाणपुच्छमानांश्चपुरापार्थान्नुपेदसे कृतत्वंराज्यंजयंतीतिश्रु
पातेनानुपश्यसि ६ पित्र्यंराज्यंमहाराजकुरवस्तेसजांगलाः अष्टवीरैर्जितामुर्वी
मखिलांप्रत्यपद्यथाः ७ बाहुवीर्यार्जिताभूमिस्तवपार्थैर्निवेदिता मयेदंकृतमि
त्येवमन्यसेराज्यसत्तम ८ ग्रस्तानांधर्वराजेनमज्जतोह्यप्लवेंभसि आनिनायपुनः
पार्थःपुत्रांस्तेराजसत्तम ९ कुमारवच्चसमयसेयूतेविनिकृतेषुयत् पांडवेषुवने
राजन्प्रव्रजत्सुपुनःपुनः १० प्रवर्षतःशरव्रातानर्जुनस्यशितान्बहून् अप्यर्णवाविशु
ष्येयुःकिंपुनर्मांसयोनयः ११ अस्यतांफाल्गुनःश्रेष्ठोगांडीवंधनुषांवरं केश
वःसर्वभूतानामायुधानांसुदर्शनः १२ वानरोरोचमानश्चकेतुःकेतुमतांवरः
एवमेतानिसरथोवहन्श्वेतहयोरणे १३ क्षपयिष्यतिनोराजन्कालचक्रमिवो
द्यतं तस्याद्यवसुधाराजन्निखिलाभरतर्षभ १४ यस्यभीमार्जुनोयोधौसराजाराज
सत्तम तथाभीमहतप्रायांमज्जंतींतववाहिनीं १५ दुर्योधनमुखान्दृष्ट्वाक्षयंयास्यंतिकौ
रवाः नभीमार्जुनयोर्भीतालप्स्यंतिविजयंविभो १६ तवपुत्रामहाराजराजानश्चानुसारि

९ ८ अस्यताबाणाननुक्षिपतांमध्ये १२ भीमसेनेनहतप्रायां १५ १६ १७ ॥

१८ १९ २२ अध्यायः ५४ नभे १ यदाऽस्यात् आगतः तदाभीष्मद्रोणकृपाः मयाउक्ता इतिषष्ठेनान्वयः २ ८ ममम

शाल्वेयाः शूरसेनाश्च सर्वे त्वामवजानते पार्थं ह्येते गताः सर्वे वीर्यज्ञास्तस्य धीमतः १८
भक्त्या ह्यस्य विरुध्यंते तव पुत्रैः सदैव ते अनर्हानेव तु वधे धर्मयुक्तान्विकर्मणा १९ यो
क्लेशयत्पांडुपुत्रान् यो विद्वेष्यधुनापि वै सर्वोपायैर्नियंतव्यः सानुगः पापपूरुषः २० त
व पुत्रो महाराज नानुशोचितुमर्हसि द्यूतकाले मया चोक्तं विदुरेण च धीमता २१ यदि
दं ते विलपितं पांडवान्प्रतिभारत अनीशेनेव राजेंद्र सर्वमेतन्निरर्थकं २२ इत्युद्योगप ॥
र्वणि संजययाने ५४ दुर्योधन उ॰ नभेतव्यं महाराज नशोच्या भवता वयं समर्थाः स्म २
परान् जेतुं बलिनः समरे विभो १ वने प्रव्राजितान्पार्थान् यदाऽऽयान्मधुसूदनः मह
ता बलचक्रेण परराष्ट्रावमर्दिना २ केकया धृष्टकेतुश्च धृष्टद्युम्नश्च पार्षतः राजान
श्चान्वयुः पार्थान् बहवोऽन्येऽनुयायिनः ३ इंद्रप्रस्थस्य चादूरात्समाजग्मुर्महारथाः अग
र्हयंश्च संगम्य भवंतं कुरुभिः सह ४ ते युधिष्ठिरमासीनमजिनैः प्रतिवासितं कृष्ण
प्रधानाः संहत्य पर्युपासत भारत ५ प्रत्यादानं च राज्यस्य कार्यमूचुर्नराधिपाः भवतः
सानुबंधस्य समुच्छेदं चिकीर्षवः ६ श्रुत्वा चैवं मयोक्तास्तु भीष्मद्रोणकृपास्तदा ज्ञा
तिक्षयभयाद्राजन् भीतेन भरतर्षभ ७ ततः स्थास्यंति समये पांडवा इति मे मतिः स
मुच्छेदं हि नः कृत्स्नं वासुदेवश्चिकीर्षति ८ ऋते च विदुरात्सर्वे यूयं वध्या मता मम धृतराष्ट्र

॥ २ ॥ उ॰

म०उ०
टी०
१५५

१० प्रणिपातो वा संग्रामः पलायनं वा लज्जया ॥ ११ प्रणिपाते दोषो वंशस्य यत्कृतो नास्ति किं तु संधिरेव भवति

ममच्छेदं च नः कृत्स्नं कृत्वा तात जनार्दनः एकराज्यं कुरूणां स्म चिकीर्षति युधिष्ठिरे १०
तत्र किं प्राप्तकालं नः प्रणिपातः पलायनं प्राणान्वा संपरित्यज्य प्रतियुध्यामहे परान् ११
प्रतियुद्धे तु नियतः स्यादस्माकं पराजयः युधिष्ठिरस्य सर्वे हि पार्थिवा वशवर्तिनः १२ वि
रक्तराष्ट्राश्च वयं मित्राणि कुपितानि नः धिक्कृताः पार्थिवैः सर्वैः स्वजनेन च सर्वशः १३
प्रणिपाते न दोषोस्ति संधिर्नः शाश्वतीः समाः पितरं त्वेव शोचामि प्रज्ञानेत्रं जनाधिपं १४
मत्कृते दुःखमापन्नं क्लेशं प्राप्तमनंतकं कृतं हि तव पुत्रैश्च परेषामवरोधनं १५ मत्प्रि
यार्थं पुरैवैतद्विदितं ते नरोत्तम ते राजानो धृतराष्ट्रस्य सामात्यस्य महारथाः वैरं प्रतिक
रिष्यंति कुलोच्छेदेन पांडवाः १६ ततो द्रोणोऽब्रवीद्भीष्मः कृपो द्रौणिश्च भारत मत्वा मामम
हतीं चिंतामास्थितं व्यथितेंद्रियं १७ अभिद्रुग्धाः परे चेन्नो न भेतव्यं परंतप असमर्थाः
परे जेतुमस्मान्युधि समास्थितान् १८ एकैकशः समर्थाः स्मो विजेतुं सर्वपार्थिवान् आ
गच्छंतु विनेष्यामो दर्पमेषां शितैः शरैः १९ पुरैकेन हि भीष्मेण विजिताः सर्वपार्थिवाः
मृते पितर्यतिक्रुद्धो रथेनैकेन भारत २० जघान सुबहूंस्तेषां संरब्धः कुरुसत्तमः त
तस्ते शरणं जग्मुर्देवव्रतमिमं भयात् २१ स भीष्मः सुसमर्थोयमस्माभिः सहितो रणे प
रान्विजेतुं तस्मात्ते व्येतु भीर्भरतर्षभ २२॥ तथापि मम युद्धमेव रोचते इत्याशयेनाह पितरमिति १४
हे नरोत्तम धृतराष्ट्र तव पुत्रैः अस्माभिः १५ प्रतिकरिष्यंति प्रतिपातयिष्यंति १६ ततः इति पूर्वेणान्वयः

थनं १७ नः अस्माभिः परैश्चेत् यद्यपि अभिद्रुग्धाः द्रोहविषयं नीताः तथापि न भेतव्यं १८ २२॥

१५५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२२ २४ समानीताः मयेतिशेषः २५ २६ परविकत्थने परेषां गुणाख्याने २७ २८ ब्रह्मणोपि स्रतयन्नूपाहं तमशाक्या ४

इत्येषां निश्चयोह्यासीत तत्काले मिततेजसां पुरा परेषां पृथिवी कृत्स्नासीद्दशवर्तिनी २२
अस्मान् पुनरमी नाद्य समर्था जेतुमाहवे छिन्नपक्षाः परे ह्यस्य वीर्यहीनाश्च पांडवाः २४
अस्मत्संस्था च पृथिवी वर्तते भरतर्षभ एकार्थाः सुखदुःखेषु समानीताश्च पार्थिवाः
२५ अप्यग्निं प्रविशेयुस्ते समुद्रं वा परंतप मदर्थं पार्थिवाः सर्वे तद्विद्धि कुरुसत्तम २६
उन्मत्तमिव चापि त्वां प्रहसंतीह दुःखितं विलपंतं बहुविधं भीतं परविकत्थने २७
एषां ह्येकैकशो राज्ञां समर्थः पांडवान् प्रति आत्मानं मन्यते सर्वो व्येतु ते भयमागतं
२८ जेतुं समग्रां सेनां मे वासवोपि न शक्नुयात् हंतुमक्षय्यरूपेयं ब्रह्मणापि स्वयंभु
वः २९ युधिष्ठिरः पुरं हित्वा पंचग्रामान् स याचति भीतो हि मामकात् सैन्यात् प्रभावाच्चै
व मे विभो ३० समर्थं मन्यसे यच्च कुंतीपुत्रं वृकोदरं तन्मिथ्या न हि मे कृत्स्नं प्रभावं वे
त्सि भारत ३१ मत्समो हि गदायुद्धे पृथिव्यां नास्ति कश्चन नासीत् कश्चिदतिक्रांतो भ
विता न च कश्चन ३२ युक्तो दुःखोषितश्चाहं विद्यापारगतस्तथा तस्मान्न भीमादन्ये
भ्यो भयं मे विद्यते क्वचित् ३३ दुर्योधनसमो नास्ति गदायामिति निश्चयः संकर्षणस्य
भद्रं ते यत्तदैनमुपावसं ३४ युद्धे संकर्षणसमो बलेनाभ्यधिको भुवि गदाप्रहारं भीमो मे
न जातु विषहेद्युधि ३५ एकं प्रहारं यं दद्यां भीमाय रुषितो नृप स एवैनं नयेद् घोरं क्षिप्रं वै
वस्वतक्षयं ३६ इच्छेयं च गदाहस्तं राजन् द्रष्टुं वृकोदरं सुचिरं प्रार्थितो ह्येष मम नित्यं मनोरथः

वीं परासुः प्रपतिष्यति ३८ ॥

१° गदया निहतो ह्यात्मा मायया पार्थो वृकोदरः विशीर्णगात्रः पृथि

१° ३२ युक्तोभियोगवान् दुःखोषितः गुरुकुले ३३ उपावसं शिष्यत्वे नपर्यचरं ३४ ३८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ टी॰ १५६

३९ ४२ पार्थिवी पृथ्वीसंबंधिनी पार्थिवानां राज्ञां वा ४४ ४५ शक्त्या मोल्पभूतया तेज्रंडलेयाचितः ४६ ५५

गदाप्रहाराभिहतो हिमवानपि पर्वतः सकृन्मया विदीर्येत गिरिः शतसहस्रशः ३९
स चाप्येतद्विजानाति वासुदेवार्जुनौ तथा दुर्योधनसमो नास्ति गदायामिति निश्चयः
४० तन्नेन्द्र कोदरमयं भयं व्येतु महाहवे व्यपनेष्याम्यहं ह्येनं मा राजन्विमना भव ४१
तस्मिन्मया हते क्षिप्रमर्जुनं बहवो रथाः तुल्यरूपा विशिष्टाश्च क्षेप्स्यन्ति भरतर्षभ
४२ भीष्मो द्रोणः कृपो द्रौणिः कर्णो भूरिश्रवास्तथा प्राग्ज्योतिषाधिपः शल्यः सिंधुराजो
जयद्रथः ४३ एकैक एषां शक्तस्तु हन्तुं भारत पाण्डवान् समेतास्तु क्षणेनैतान्नेष्यन्ति य
मसादनं ४४ समग्रा पार्थिवी सेना पार्थमेकं धनंजयं कस्मादशक्ता निर्जेतुमिति हेतुर्न
विद्यते शरव्रातैस्तु भीष्मेण शतशोथ सहस्रशः ४५ द्रोणद्रौणिकृपैश्चैव गन्ता पार्थो य
मक्षयं पितामहोपि गांगेयः शंतनोरपि भारत ४६ ब्रह्मर्षिसदृशो जज्ञे देवैरपि दुःसह
न हन्ता विद्यते चापि राजन्भीष्मस्य कश्चन ४७ पित्रा ह्युक्तः प्रसन्नेन नाकामस्त्वं मरिष्यसि
ब्रह्मर्षेश्च भरद्वाजाद् द्रोण्यां द्रोणोप्यजायत ४८ द्रोणाज्जज्ञे महाराज द्रौणिश्च परमास्त्र
वित् कृपश्चाचार्यमुख्योयं महर्षेर्गौतमादपि ४९ शरस्तंबोद्भवः श्रीमानवध्य इति मे
मतिः अयोनिजास्त्रयो ह्येते पिता माता च मातुलः ५० अश्वत्थाम्नो महाराज स च शूरः
स्थितो मम सर्व एते महाराज देवकल्पा महारथाः ५१ शक्रस्यापि व्यथां कुर्युः संयुगे भर
तर्षभ नैतेषामर्जुनः शक्त एकैकं प्रतिवीक्षितुं ५२ सहितास्तु नरव्याघ्रा हनिष्यन्ति धनं
जयं भीष्मद्रोणकृपाणां च तुल्यः कर्णो मतो मम ५३ अनुज्ञातश्च रामेण मत्समोसीति भा

१५६

तस्यपुरतःइतिघोषः ५६ ५८ तंयर्जुनं ५९ तेभ्यःपांडवेभ्यः ६० ६५ त्रिगुणतःअंशेनहीनंत्रिगुणाअंशेनाधिका ६६ ६८ विवि

तस्यशान्तोयरगूढस्यकस्माज्जीवेद्धनंजयः विजयोमेध्रुवंराजन्फलेपाणाविवाहितं ५६
अभिव्यक्तःपरेषांचकृतस्तोभुविपराजयः अद्याप्येकेनभीष्मोयंप्रयुतंहंतिभारत ५७
तस्मान्माद्यमेहेष्वासाद्रोणद्रौणिकृपाअपि संसप्तकानांवृंदानितत्रियाणांपरंतप
अर्जुनंवधमस्मान्वानिहन्यात्कपिकेतनः तंवालमितिमन्येतेसव्यसाचिवधेध्रुव
ताः ५९ पार्थिवाःसमवायास्तेभ्योयकस्माच्चथतेकथं भीमसेनेचनिहतेकोन्योयु
ध्येतभारत ६० परेषांतेममाचत्वयहिवेत्यपरंतप पंचतेभ्रातरःसर्वेधृष्टद्युम्ना
शुसात्यकिः ६१ परेषांसमयेराजन्योधाःसारंवलंमतं अस्माकंतुविशिष्टायेभी
ष्मद्रोणकृपादयः ६२ द्रौणिर्वैकर्तनःकर्णःसोमदत्तोथवाह्लिकः प्राग्ज्योतिषा
धिपःशल्यआवंत्यौजयद्रथः ६३ दुःशासनोदुर्मुखश्चदुःसहश्चविशांपते श्रु
तायुश्चित्रसेनश्चपुरुमित्रोविविंशतिः ६४ शलोभूरिश्रवाश्चैवविकर्णश्चतवा
त्मजः अक्षौहिण्योहिमेराजन्दशैकाचसमाहृताः ६५ न्यूनाःपरेषांसप्तैवकस्मा
न्मेस्यात्पराजयः वलंत्रिगुणतोहीनंयोध्यंप्राहबृहस्पतिः ६६ परेभ्यस्त्रिगुणाचो
यंममराजन्ननीकिनी गुणहीनंपरेषांचबहूपश्यामिभारत गुणोदयंवहुगुणमा
त्मनश्चविशांपते ६७ एतत्सर्वसमाज्ञायवलाग्र्यममभारत न्यूनतांपांडवानांच।
नमोहंगंतुमर्हसि ६८ इत्युक्त्वासंजयंभूयःपर्यपृच्छतभारत विविक्तःप्राप्तकालं।

इतिश्रीमहाभारतेउद्योगपर्वणि...ध्यायः ॥ ५६ ॥

...सैन्य...कथनं ५६ अध्यायः ॥

म०उ०
टी०
५८

अक्षौ० १ २ मंत्रं अस्त्रप्रयोजकं जिज्ञासमानः परीक्षितुमिच्छन् ३ ४ तथावैमीतिच्छेदः ५ ६ भौमनो वि

दुर्योधन उ० अक्षौहिणीः सप्त लब्ध्वा राजभिः सह संजय किंस्विदिच्छति कौंतेयो युद्ध
प्रेप्सुर्युधिष्ठिरः १ संजय उ० अतीव मुदितो राजन्युद्धप्रेप्सुर्युधिष्ठिरः भीमसेनार्जुनौ
चोभौ यमावपि न बिभ्यतः २ रथं तु दिव्यं कौंतेयः सर्वा विभ्राजयन्दिशः मंत्रं जिज्ञा
समानः सन्बीभत्सुः समयोजयत् ३ तमपश्याम संनद्धं मेघं विद्युत्प्रभं यथा स
मंत्रान्समभिध्याय हृष्यमाणोऽभ्यभाषत ४ पूर्वरूपमिदं पश्य वयं जेष्याम संजय
बीभत्सुर्मां यथोवाच तथावैम्यहमप्युत ५ दुर्योधन उ० प्रशंसस्यभिनंदंस्तान्पार्था
नक्षपराजितान् अर्जुनस्य रथे ब्रूहि कथमश्वाः कथं ध्वजाः ६ संजय उ० भौमनः
सह शक्रेण बहुचित्रं विशांपते रूपाणि कल्पयामास त्वष्टा धात्रा सह विभो ७
ध्वजे हि तस्मिन्रूपाणि चक्रुस्ते देवमायया महाधनानि दिव्यानि महांति च लघूनि
च ८ भीमसेनानुरोधाय हनूमान्मारुतात्मजः आत्मप्रतिकृतिं तस्मिन् ध्वज आरो
पयिष्यति ९ सर्वा दिशो योजनमात्रमंतरं स तिर्यगूर्ध्वं च रुरोध वै ध्वजः न संस
ज्जेत तरुभिः संवृतोऽपि तथा हि माया विहिता भौमनेन १० यथाकाशे शक्रध
नुः प्रकाशते न चैकवर्णं न च विद्म किं नु तत् तथा ध्वजो विहितो भौमनेन बह्वा
कारं दृश्यते रूपमस्य ११ ॥

श्वकर्मा धाता प्रजापतिः ७ त्वष्टा शक्र धातारः रूपाणि चक्रुः ८ रुरोध स्वतेजसेति शेषः १० ११ ॥ ५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भागोरथेरोधः ह्रादोदयमपिनभवेत् १२ १३ यत्तत् अश्वानांप्रातंहतंहतंपुनः पुनः कतिपयायहर्नेनेपिदिव्यप्रभावात्
शतंदूर्यतेयतः पुरस्तात्तवरथस्याग्रमरालाख्यामश्वाः दंतवर्णाः श्वेताः रथेयुक्ताअश्वाः भांति १४ अत्रप्रख्याः सप्तर्षितु

यथाग्निधूमोदिवमेतिरुंधानावर्णान्विभ्रत्तेजसांश्चित्ररूपान् तथाध्वजोविहितोभौ।
मनेननचेत्काराभवितानोतरोधः १२ श्वेतास्तस्मिन्वातवेगाः सदश्वादिव्यारथाश्चित्र
रथेनदत्ताः भुवंतरिक्षेदिविवानरेंद्रएषांगतिर्हीयतेनात्रसर्वा १३ प्रातेयत्तत्स्तूयते
नित्यकालंहतंहतंदत्तवरंपुरस्तात् तथाराज्ञोदंतवर्णाबृहंतोरथेयुक्ताभांतितद्वी
र्यतुल्याः १४ ऋक्षप्रख्याभीमसेनस्यवाहारथेवायोस्तुल्यवेगावभूवुः १४ कल्माषा
गास्तित्तिरचित्रपृष्ठाभ्रात्रादत्ताः प्रीयता फाल्गुनेन भ्रातुर्वीरस्यैवतस्तैरंगोविशिष्टा।
मुदायुक्ताः सहदेवंवहंति १५ माद्रीपुत्रंनकुलंवाजमीढमहेंद्रदत्ताहरयोवाजिमु
ख्याः समावायोर्बलवंतस्तरस्विनोवहंतिवीरंवृत्रशत्रुंयथेंद्रं १६ तुल्याश्चैभिर्वयसा
विक्रमेणमहाजवाश्चित्ररूपाः सदश्वाः सौभद्रादीन्द्रौपदेयान्कुमारान्वहंत्यश्वादेव
दत्ताबृहंतः १७ इत्युद्योगेसंजययाने ५६ धृतराष्ट्रउ० कांस्तत्रसंजयापश्यः प्रीत्यर्थेनस
मागतान् येयोत्स्यंतेपांडवार्थेपुत्रस्यममवाहिनीं १ संजयउ० मुख्यमंधकवृष्णीना
मपश्यंकृष्णमागतं चेकितानंचतत्रैवयुयुधानंचसात्यकिं २ ॥

स्यतेजसः अत्राश्चतिहस्यवैपुरासत्रप्रभृषीनावहन्निति प्रातपाठस्कृतेःपाठांतरेअश्वोष्ट्रगभेदः १५
१६ देवदत्ताःचित्ररथेनदत्ताः १७ अध्यायः ५६ कांस्तत्र १ २ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰३॰ पृथगक्षौहिणीभ्यां तु पांडवानभिसंश्रितौ महारथौ समाख्यातावुभौ पुरुषमानिनौ ३ अक्षौ
द्रो॰ हिण्याथ पांचाल्यो दशभिस्तनयैर्वृतः सत्यजित्प्रमुखैर्वीरैर्धृष्टद्युम्नपुरोगमैः ४ द्रुपदो व
१५८ र्धयन्मानं शिखंडिपरिपालितः अपायात्सर्वसैन्यानां प्रतिच्छाद्यतदा वपुः ५ विराटः सह
पुत्राभ्यां शंखेनैवोत्तरेण च सूर्यदत्तादिभिर्वीरैर्मदिराश्वपुरोगमैः ६ सहितः पृथिवीपालो
भ्रातृभिस्तनयैस्तथा अक्षौहिण्यैव सैन्यानां वृतः पार्थं समाश्रितः ७ जरासंधिर्मागधश्च
धृष्टकेतुश्च चेदिराट् पृथक्पृथगनुप्राप्तौ पृथगक्षौहिणीवृतौ ८ केकया भ्रातरः पंच
सर्वे लोहितकध्वजाः अक्षौहिणीपरिवृताः पांडवानभिसंश्रिताः ९ एतानेतावतस्तत्र
तानपश्यं समागतान् ये पांडवार्थे योत्स्यंति धार्तराष्ट्रस्य वाहिनीं १० यो वेद मानुषं व्यू
हं दैवं गांधर्वमासुरं स तत्र सेनाप्रमुखे धृष्टद्युम्नो महारथः ११ भीष्मः शांतनवो राजन्
भागः क्लृप्तः शिखंडिनः तं विराटोनुसंयाता सार्धं मत्स्यैः प्रहारिभिः १२ ज्येष्ठस्य पांडुपुत्र
स्य भागो मद्राधिपो बली तौ तु तत्राब्रुवन् केचिद्विषमौ नो मतौ इति १३ दुर्योधनः सह
सुतैः सार्धं भ्रातृशतेन च प्राच्याश्च दाक्षिणात्याश्च भीमसेनस्य भागतः १४ अर्जुनस्य तु
भागेन कर्णो वैकर्तनो मतः अश्वत्थामा विकर्णश्च सैंधवश्च जयद्रथः १५ अशक्याश्चैव
ये केचित्पृथिव्यां शूरमानिनः सर्वांस्तानर्जुनः पार्थः कल्पयामास भागतः १६ महेष्वा
सा राजपुत्रा भ्रातरः पंच केकयाः केकयानेव भागेन कृत्वा योत्स्यंति संयुगे १७ ॥ १५८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

समाह्वानेनतत्तन्नामाख्यानेन २४ अकालिकंकालंविना २५ २६ प्रोतिताःपशुवत्तूवथार्थसंस्कृताःकाल

तेषामेवकृतोभागोमाल्लवाःशाल्वकास्तथा त्रिगर्तानांचवैमुख्यौयौतौसंसप्तका

विति १८ दुर्योधनसुताःसर्वेतथादुःशासनस्यच सौभद्रेणकृतोभागोराजाचैवबृ

हद्बलः १९ द्रौपदेयामहेष्वासाःसुवर्णविकृतध्वजाः धृष्टद्युम्नमुखाद्रोणमभि

यास्यंतिभारत २० चेकितानःसोमदत्तंद्वैरथेयोद्धुमिच्छति भोजंतुकृतवर्माणंयुयु

धानोयुयुत्सति २१ सहदेवस्तुमाद्रेयःशूरःसंक्रंदनोयुधि स्वयंसंकल्पयामास।

स्यालंतेसुवलात्मजं २२ उलूकंचैवकैतव्यंयेचसारस्वतागणाः नकुलःकल्प

यामासभागंमाद्रवतीसुतः २३ येचान्येपार्थिवाराजन्प्रत्युद्यास्यंतिसंगरे समा

ह्वानेनतांश्चापिपांडुपुत्राअकल्पयन् २४ एवमेषामनीकानिप्रविभक्तानिभारत

यःतेकार्यंसपुत्रस्यक्रियतांतदकालिकं २५ धृतः नसंतिसर्वेपुत्रामेमूढाद्यू

तदेविनः येषांयुद्धंबलवताभीमेनरणमूर्द्धनि २६ राजानःपार्थिवाःसर्वेप्रोक्षि

ताःकालधर्मणा गांडीवाग्निंप्रवेक्ष्यंतिपतंगाइवपावकं २७ विद्रुतांवाहिनींमन्ये

कृतवैरैर्महात्मभिः तांरणेकेनुयास्यंतिप्रभग्नांपांडवैर्युधि २८ सर्वेह्यतिरथाःशूराः

कीर्तिमंतःप्रतापिनः सूर्यपावकयोस्तुल्यास्तेजसासमितिंजयाः २९ येषांयुधिष्ठि

रोनेतागोप्ताचमधुसूदनः योधौचपांडवौवीरौसव्यसाचिवृकोदरौ ३० नकुलःसह

देवश्चधृष्टद्युम्नश्चपार्षतःसात्यकिर्द्रुपदश्चैवधृष्टद्युम्नश्चसात्मजः ३१ ॥ धर्मणायजमानेने

॥ ५८ ॥ २७०

३२ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० येणेयान्हरिणाश्वावान्तेननापाशेन ४१ ४२ ४३ ४४ ॥

म.उ. टी. १५९

उत्तमौजाश्च पांचाल्यो युधामन्युश्च दुर्जयः शिखंडी क्षत्रदेवश्च तथा वैराटिरुत्तमः
काश्यपश्चेदयश्चैव मत्स्याः सर्वे च संजयाः विराटपुत्रो बभ्रुश्च पांचालाश्च प्रभद्रकाः
३३ येषामिंद्रोप्यकामानां न हरेत्पृथिवीमिमां वीराणां रणधीराणां ये भिंद्युः पर्वता
नपि ३४ तान्सर्वगुणसंपन्नानमनुष्यप्रतापिनः क्रोशतो मम दुष्पुत्रो योद्धुमिच्छ
ति संजय ३५ दुर्योधन उ० उभौ स्व एककुजातीयौ तथोभौ भूमिगोचरौ अथ कस्मात्पांडवा
नामेकतो मन्यसे जयं ३६ पितामहं च द्रोणं च कृपं कर्णं च दुर्जयं जयद्रथं सोमदत्त
मश्वत्थामानमेव च ३७ सुतेजसो महेष्वासानिंद्रोपि सहितोमरैः अशक्तः समरे
जेतुं किं पुनस्तात पांडवाः ३८ सर्वा च पृथिवीपाला मदर्थे तात पांडवान् आर्याः
शस्त्रभृतः शूराः समर्थाः प्रतिबाधितुं ३९ न मामकान्पांडवास्ते समर्थाः प्रतिवी
क्षितुं पराक्रांतो ह्यहं पांडून् सपुत्रान्योद्धुमाहवे ४० मत्प्रियं पार्थिवाः सर्वे ये चिकी
र्षंति भारत ते तान्वारयिष्यंति एणेयानिव तंतुना ४१ महता रथवंशेन शरजा
लैश्च मामकैः अभिद्रुता भविष्यंति पांचालाः पांडवैः सह ४२ धृतराष्ट्र उ० उन्मत्त इव
मे पुत्रो विलपत्येष संजय न हि शक्तो रणे जेतुं धर्मराजं युधिष्ठिरं ४३ जानाति हि
यथा भीष्मः पांडवानां यशस्विनां बलवत्तां सपुत्राणां धर्मज्ञानां महात्मनां ४४ ॥ १५९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४४ ५१ प्रारद्धतः आप्लुषातः विरुद्धलक्षणयायातानायुधइत्यर्थः ५० ५८ दध्नंददत ५९ ६० ॥

यत्तोनारोचयद्युद्धं विग्रहं तैर्महात्मभिः किंनुसंजयमेब्रूहिपुनस्तेषांविचेष्टितं ४५ क
स्तांस्तुवृष्णिनोभयः संदीपयतिपांडवान् अर्चिष्मतोमहेष्वासान्हविषापावकानि
व ४६ संजयउ० धृष्टद्युम्नःसदैवैतान्संदीपयतिभारत युध्यध्वमितिमाभैष्टयुद्धाद्भ
रतसत्तमाः ४७ येकेचित्पार्थिवास्तत्रधार्त्तराष्ट्रेणसंवृताः युद्धेसमागमिष्यंतितुमुले
शस्त्रसंकुले ४८ तान्सर्वानाहवेक्रुद्धान्सानुबंधान्समागतान् अहमेकःसमादास्या
मितिमिर्मत्स्यानिवोदकात् ४९ भीष्मंद्रोणंकृपंकर्णंद्रोणिंशल्यंसुयोधनं एतांश्चापिनि
रोत्स्यामिवेलेवमकरालयं ५० तथाब्रुवतंधर्मात्माप्राहराजायुधिष्ठिरः तवधैर्यंच
वीर्यंचपांचालाःपांडवैःसह ५१ सर्वेसमधिरूढाःस्मःसंग्रामान्नःसमुद्धर जानामि
त्वांमहाबाहोक्षत्रधर्मेव्यवस्थितं ५२ समर्थमेकंपर्याप्तंकौरवाणांविनिग्रहे पुरस्ता
दुपयातानांकौरवाणांयुयुत्सतां ५३ भवतायद्विधातव्यंतन्नःश्रेयःपरंतप संग्रामा
दपयातानांभग्नानांशरणैषिणां ५४ पौरुषंदर्शयन्शूरोयस्तिष्ठेदग्रतःपुमान्क्री
णीयात्तंसहस्रेणइतिनीतिमतांमतं ५५ सत्वंशूरश्चवीरश्चविक्रांतश्चनरर्षभ भया
र्तानांपरित्राताऽसंयुगेषुनसंशयः ५६ एवंब्रुवतिकौंतेयेधर्मात्मनियुधिष्ठिरे धृष्टद्यु
म्नउवाचेदंमांवचोगतसाध्वसं ५७ सर्वाञ्जनपदान्सूतयोधादुर्योधनस्य ये सबाह्लिका
न्कुरून्ब्रूयाःप्रातिपेयान्शारद्वतं ५८ सूतपुत्रंतथाद्रोणंसहपुत्रंजयद्रथं दुःशासनं। ५९

९१ क्रुद्धैः क्रुद्धं ९२ प्रध्यायः ५२ जातपक्षतवास्माव इत्यत्र प्रामपक्षमहन्क्रुपेह इत्याधुनिकः पाठः तदाभ्यावइति

नैतादृशोहियोयोस्तिद्दृथिव्यामिहकश्चन यथाविधः सव्यसाचीपांडवः सत्यविक्र
मः ९३ देवैर्हिसंभृतोदिव्योरथोगांडीवधन्वनः नसज्जेयोमनुष्येणमास्मकृद्ध्वमनो
वृथि ९४ इत्युद्योगे संजययाने ५२ धृतराष्ट्र उ॰ तत्रतेजाब्रह्मचारी कौमारादपिपां
डवः तेनसंयुगमेष्यंतिमंदाविलपतोमम १ दुर्योधननिवर्तस्वयुद्धाद्भरतसत्तम
नहियुद्धंप्रशंसंतिसर्वावस्थमरिंदम २ अलमर्धं पृथिव्यास्तेसहामात्यस्यजीवि
तं प्रयच्छपांडुपुत्राणांयथोचितमरिंदम ३ एतद्धिकुरवः सर्वेमन्यंतेधर्मसंहि
तं यत्त्वंप्रशांतिमन्विच्छाः पांडुपुत्रैर्महात्मभिः ४ अंगेमांसमवेक्षस्वपुत्रस्वामे
ववाहिनीं जातएषतवास्माव स्त्वंतमोहान्नबुध्यसे ५ नत्वहंयुद्धमिच्छामिनैतदिच्छ
तिवाह्लिकः नचभीष्मोनचद्रोणोनाश्वत्थामानसंजयः ६ नसोमदत्तोनशल्योन
कृपोयुद्धमिच्छति सत्यव्रतः पुरुमित्रोजयोभूरिश्रवास्तथा ७ येषुसंप्रतितिष्ठे
युः कुरवः पांडवाः परैः तेयुद्धंनाभिनंदंतितत्तुभ्यंतातरोचतां ८ नत्वंकरोषि कामा
मेनकर्णःकारयितातव दुःशासनश्चपापात्माशकुनिश्चापिसौबलः ९ दुर्योधन
उ॰ नाहंभवतिनद्रोणेनाश्वत्थाम्निनसंजये नभीष्मेनचकांबोजेकृपेनचनबाह्लिके
१० सत्यव्रतेपुरुमित्रेभूरिश्रवसिवापुनः अन्येषुवातावकेषुभारंकृत्वासमाह्वये ११ ॥

पाठेतत्राणामश्वादीनांवेगवत्तांवाहनानामभावःसर्वतःखादनं कंदूरोगाद्युपद्रवइतियावत् अवरत्वाणकौ

९९

१२ चातुर्होत्रं चतुर्णां होतॄणामृत्विजां कर्म ११ १४ १९ रुन्नूणामिवेत्यत्र कुरूणां लाटभाषयाश्वत्थामानामिति पाठो

अहं च तात कर्णश्च रणयज्ञं वितत्य वै युधिष्ठिरं पशुं कृत्वा दीक्षितौ पुरुषर्षभौ १२ रथो
वेदी स्रुवः खड्गो गदा स्रुक् कवचं सदः चातुर्होत्रं च धुर्या मे शरा दर्भा हविर्यशः १३ आ
त्मयज्ञेन नरपते इष्ट्वा वैवस्वतं रणे विजित्य च समेष्यावो हतामित्रौ श्रियावृतौ १४ अ
हं च तात कर्णश्च भ्राता दुःशासनश्च मे एते वयं हनिष्यामः पांडवान्समरे त्रयः १५ अ
हं हि पांडवान् हत्वा प्रशास्ता पृथिवीमिमां मां वा हत्वा पांडुपुत्रा भोक्तारः पृथिवीमिमां
१६ त्यक्तं मे जीवितं राज्यं धनं सर्वं च पार्थिव न जातु पांडवैः सार्द्धं वसेयमहमच्युत १७
यावद्धि सूच्यास्तीक्ष्णाया विध्येदग्रेण मारिष तावदप्यपरित्याज्यं भूमेर्नः पांडवान्प्रति
१८ धृतराष्ट्र उ० सर्वान्वस्तात शोचामि त्यक्तो दुर्योधनो मया ये मंदमनुयास्यध्वं यांतं वै
वस्वतक्षयं १९ रुन्नूणामिव यूथेषु व्याघ्राः प्रहरतां वराः वरान्वरान् हनिष्यंति समेता
युधि पांडवाः २० प्रतीपमिव मे भाति युयुधानेन भारत व्यस्ता सीमंतिनी ग्रस्ता प्रसृष्टा
दीर्घबाहुना २१ संपूर्णं पूरयन् भूयो बलं पार्थस्य माधवः शैनेयः समरे स्थाता बीजव
त्प्रवपन् शरान् २२ सेनामुखे प्रयोद्धा नो भीमसेनो भविष्यति तं सर्वे संश्रयिष्यंति प्रा
कारमकुतोभयं २३ ॥ पुष्टः प्रतेरुन्नूणां मध्ये वरान् व्याघ्रा इवेति योजना १९ २० भारती सेना
स्त्रीरूपकेण निर्दिष्टा पाठांतरे आदस्रावत्तते २१ बलं बलं २२ प्राकारमिव भीमं संश्रयिष्यति २३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ २५ २६ २७ २८ २९ अध्यायः ५८ पद १ २ ३ ४ ५ आसनांतोऽपविष्टौ ६ ७ ८ ॥

यदाद्रक्ष्यसि भीमेन कुंजरान् विनिपातितान् विशीर्णदंतान् गिर्याभान् भिन्नकुंभान् स
शोणितान् २४ तानभिप्रेक्ष्य संग्रामे विशीर्णानिव पर्वतान् भीतो भीमस्य संस्पर्शात् स्म
र्तासि वचनस्य मे २५ निरीक्ष्य भीमसेनेन सैन्यं हतरथद्विपं गतिमग्नेरिव प्रेक्ष्य स्मर्ता
सि वचनस्य मे २६ महद्वो भयमागामि न चेच्छाम्यथ पांडवैः गदया भीमसेनेन हताः
शममुपेष्यथ २७ महावनमिव छिन्नं यदा द्रक्ष्यसि पातितं बलं कुरूणां भीमेन तदा
स्मर्तासि मे वचः २८ वैशंपायन उ॰ एतावदुक्त्वा राजा तु सर्वांस्तान् पृथिवीपतीन् अ
नुभाष्य महाराज पुनः पप्रच्छ संजयं २९ इत्युद्योगपर्वणि संजययाने ५८ धृतराष्ट्र
उ॰ यदब्रूतां महात्मानौ वासुदेवधनंजयौ तन्मे ब्रूहि महाप्राज्ञ शुश्रूषे वचनं तव १
संजय उ॰ शृणु राजन् यथा दृष्टौ मया कृष्णधनंजयौ ऊचतुश्चापि यद्वीरौ तत्ते वक्ष्यामि
भारत २ पादांगुलीरभिप्रेक्षन् प्रयतोहं कृतांजलिः शुद्धांतं प्राविशं राजन्नाख्यातुं न
रदेवयोः ३ नैवाभिमन्युर्न यमौ तं देशमभियांति वै यत्र कृष्णौ च कृष्णा च सत्यभामा च
भामिनी ४ उभौ मध्वासवक्षीवावुभौ चंदनरूषितौ स्रग्विणौ वरवस्त्रौ तौ दिव्याभरणभूषि
तौ ५ नैकरत्नविचित्रं तु कांचनं महदासनं विविधास्तरणास्तीर्णं यत्रासातामरिंदमौ ६
अर्जुनोत्संगगौ पादौ केशवस्योपलक्षये अर्जुनस्य च कृष्णायां सत्यायां च महात्मनः ७

१० द्रोणभीष्माभ्यां द्रोणभीष्मयोः ॥ मानसः संकल्पः सेत्स्यते १२ ॥ ऋणमिति वस्त्रापहरणकाले गो
कुर्ध्वेवत्तलोपार्दौ पार्थस्य शुभलक्षणौ पादपीठादपहृतौ मत्तापपूपमहंशुभौ १४ ष्णा
मौवृहंतौ नक्षणोश्शाल स्कंधविवोकृतौ एकासनगतौ दृष्ट्वा भयं मामहदाविशत् ॥
इंद्रविष्णुसमावेतौ मंदात्मा नाववुध्यते संश्रयाद्द्रोणभीष्माभ्यां कर्णस्य च विकत्थ
नात् ॥ निदेशस्थाविमौ यस्य मानसस्तस्य सेत्स्यते संकल्पो धर्मराजस्य निश्चयो मे
तदाभवत् ॥ सत्कृतश्चान्नपानाभ्यामासीनो लब्धसत्क्रियः अंजलिं मूर्ध्नि संधाय
तौ संदेशमचोदयं ॥ धनुर्गुणकिणांकेन पाणिना शुभलक्षणं पादमानमयन्
पार्थः केशवं समचोदयत् ॥ इंद्रकेतुरिवोत्थाय सर्वाभरणभूषितः इंद्रवीर्योपमः
कृष्णः संविष्टो माभ्यभाषत ॥ वाचं स वदतां श्रेष्ठो ह्लादिनीं वचनक्षमां त्रासनीं धार्त
राष्ट्राणां मृदुपूर्वां सुदारुणां १९ वाचं तां वचनार्हस्य शिक्षाक्षरसमन्वितां अश्रौषम
हमिष्टार्थां पश्चाद्धृदयहारिणीं २० वासुदेव उ० संजयेदं वचो ब्रूया धृतराष्ट्रं मनीषिणं
कुरुमुख्यस्य भीष्मस्य द्रोणस्यापि च शृण्वतः २१ आवयोर्वचनात् सूत ज्येष्ठानप्यभि
वादयन् यवीयसश्च कुशलं पश्चात् पृष्टैवमन्तरं २२ यजध्वं विविधैर्यज्ञैर्विप्रेभ्यो द
त्त दक्षिणाः पुत्रैर्दारैश्च मोदध्वं महद्वो भयमागतं २३ अर्थास्त्यजत पात्रेभ्यः सुतान्प्रा
प्नुत कामजान् प्रियं प्रियेभ्यश्चरत राजा हि त्वरते जये ॥ ऋणमेतत् प्रवृद्धं मे हृदयान्ना
विदेति चुक्रोशत द्वस्त्रप्रदानमात्रेण तस्मात् क्रोशस्य ऋणेन परिहृतं किंतु कौरवाणां मुच्छेदं विना त

पसर्पति यद्गोविंदेति चुक्रोश कृष्णा मां दूरवासिनं २२

त हृदयान्नापसर्पतीत्यर्थः २२ ॥

म॰ उ॰ टी॰ १६२

२८ बलं शारीरं वीर्यं मानसो उत्साहः तेजः शौर्यं शीघ्रता शीघ्रं कार्यावबोधः लघुहस्तता वेगेन बाणप्रक्षेपकता २९
३१ अध्यायः ५९ संजयस्य १२३ वचस एव गुणान्दोषांश्च निश्चित्य सर्वेषां परेषां च बलाबलं निश्चित्याह दै

तेजोमयं दुराधर्षं गांडीवं यस्य कार्मुकं महितीयेन तेन देवेंद्रः सव्यसाचिना २३ महितीति
यपुत्रः पार्थकः प्रार्थयितुमिच्छति यो न कालपरीतो वाप्यपि स्यात्तान्सुरेश्वरः २४ बाहु
भ्यामुद्धरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः पातयेत्त्रिदिवाद्देवान्योऽर्जुनं समरे जयेत् २५
देवासुरमनुष्येषु यक्षगंधर्वभोगिषु न तं पश्याम्यहं युद्धे पांडवं योऽभ्ययाद्रणे २६
यत्तद्विराटनगरे श्रूयते महदद्भुतं एकस्य च बहूनां च पर्याप्तं तन्निदर्शनं २७ एके
न पांडुपुत्रेण विराटनगरे यदा भग्नाः पलायन्त दिशः पर्याप्तं तन्निदर्शनं २८ बलं
वीर्यं च तेजश्च शीघ्रता लघुहस्तता अविषादश्च धैर्यं च पार्थान्नान्यत्र विद्यते २९
इत्यब्रवीद्धृषीकेशः पार्थमुद्धर्षयन्गिरा गर्जन्समये वर्षन्वासवः पाकशासनः
३० केशवस्य वचः श्रुत्वा किरीटी श्वेतवाहनः अर्जुनस्तन्महद्वाक्यमब्रवीत्परमहर्षणं
३१ इत्युद्योगे संजययाने ५९ वैशंपायन उ॰ संजयस्य वचः श्रुत्वा प्रज्ञाचक्षुर्जनेश्वरः
ततः संख्यातुमारेभे तद्वचो गुणदोषतः १ प्रसंख्याय च सौक्ष्म्येण गुणदोषान्वि
चक्षणः यथावन्मतितत्त्वेन जयकामः सुतान्प्रति २ बलाबलं विनिश्चित्य याथा
तथ्येन बुद्धिमान् शक्तिं संख्यातुमारेभे तदा वै मनुजाधिपः ३ दैवमानुषयोः शी
घ्रात्तेजसा चैव पांडवान् कुरून्शक्त्या स्वल्पतरया दुर्योधनमथाब्रवीत् ४ ॥

दैवेति पांडवेषु दैवं मानुषं च बलमिति अस्माकं तु केवलं मानुषमेवास्तीत्यर्थः शक्त्यापरिच्छेद्येति १६२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५ २ दैवंबलाधिकंपांडवेषुदर्शयति अग्निरिति भीमेभयंकरे ८ जातिगृध्याजन्मग्रहणाद्धेतोर्युधिष्ठिरादीनांपितृ

दुर्योधनेयंचिंतामेष्वाश्वत्थपशाम्यति सत्यंह्येतदहंमन्येप्रत्यक्षेणानुमानतः ५ आत्म
जेषुपरंस्नेहंसर्वभूतानिकुर्वते प्रियाणिचैषांकुर्वंतियथाशक्तिहितानिच ६ एवमे
वोपकर्तृणांप्रायशोलक्षयामहे इच्छंतिबहुलंसंतःप्रतिकर्तुंमहत्प्रियं ७ अग्निःसा
विष्ककर्तास्मात्खांडवेतत्स्मरन् अर्जुनस्यापिभीमेस्मिन्कुरुपांडुसमागमे ८
जातिगृध्याभिपन्नाश्चपांडवानामनेकशः धर्मादयःसमेष्यंतिसमाहूतादिवौकसः
९ भीष्मद्रोणकृपादीनांभयादशनिसंमितं रिरक्षिषंतःसंरंभंगमिष्यंतीतिमेमतिः १०
तेदेवैःसहिताःपार्थानशक्याःप्रतिवीक्षितुं मानुषेणनरव्याघ्रावीर्यवंतोस्त्रपारगाः
११ दुरासदंयस्यदिव्यंगांडीवंधनुरुत्तमं वारुणौचाक्षयौदिव्यौशरपूर्णौमहेषुधी १२
वानरश्चध्वजोदिव्योनिःसंगोधूमवद्गतिः रथश्चचतुरंतायांयस्यनास्तिसमःक्षितौ
१३ महामेघनिभश्चापिनिर्घोषःश्रूयतेजनैः महाशनिसमःशब्दःशात्रवाणांभयं
करः १४ यंचातिमानुषंवीर्येकृत्स्नोलोकोव्यवस्यति देवानामपिजेतारंयंविदुःपा
र्थिवारणे १५ शतानिपंचचैवेषून्गृण्हन्नेवहृश्यते निमेषांतरमात्रेणमुंचन्दूरंच
पातयन् १६ यमाहभीष्मोद्रोणश्चकृपोद्रौणिस्तथैवच मद्रराजस्तथाशल्योमध्य
स्थायेचमानवाः १७ ॥

रोधर्मादयोपितेषांसहायाःसंति ९ रिरक्षिषंतःरक्षितुमिच्छंतःसंरंभंक्रोधं १० २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ १९ २० २१ २२ २३ अध्यायः ६० पितः अकामेतिकामद्वेषयोरसंयोगात् १ २ ३ ४ ॥

युद्धायावस्थितंपार्थंपार्थिवैरतिमानुषैः अशक्यंरथशार्दूलंपराजेतुमरिंदमं १८
तिपत्येकेनवेगेनपंचबाणशतानियः १९ सदृशोबाहुवीर्येणकार्तवीर्यस्यपांडवं
तमर्जुनंमहेष्वासंमहेंद्रोपेंद्रविक्रमं २० निघ्नंतमिवपश्यामिविमर्देस्मिन्महाहवे इ
त्येवंचिंतयन्कृत्स्नमहोरात्राणिभारत २१ अनिद्रोनिःसुखश्चास्मिकुरूणांशमचिंत
या। २१ क्षयोदयोयंसुमहान्कुरूणामुपस्थितः अस्यचेत्कलहस्यातःशमादन्यो
नविद्यते २२ शमोमेरोचतेनित्यंपार्थैस्तातनविग्रहः कुरुभ्योहिसदामन्येपांडवा
न्शक्तिमत्तरान् २३ इत्युद्योगेसंजययाने ६ वैशंपायनउ॰ पितुरेतद्वचःश्रुत्वाधा
र्तराष्ट्रस्त्वमर्षणः आधायविपुलंक्रोधंपुनरेवेदमब्रवीत् १ अशक्यादेवसचिवाः
पार्थाःस्युरितियद्भवान् मन्यतेतद्वयंश्रेतभवतोराजसत्तम २ अकामद्वेषसंयो
गल्लोभद्रोहाच्चभारत उपेक्षयाचभावानांदेवादेवत्वमाप्नुवन् ३ इतिद्वैपायनोव्या
सोनारदश्चमहातपाः जामदग्न्यश्चरामोनःकथामकथयत्पुरा ४

॥ ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५ ६ देवेष्विति पत्ते देवादयः देवेषु भावेषु शमदमादिषु शाश्वत् अपेतकाना अशास्त्रेषु भावेषु कामक्रोधा
दिषु ते देवाः पांडवानां सहाय्यं न करिष्यंतीति भावः ७ अथेति देवप्रामाण्यात् वेदप्रामाण्यात् कामादि

नैवमानुषवद्देवाः प्रवर्त्तंते कदाचन कामात्क्रोधात्तथा लोभाद्द्वेषाच्च भरतर्षभ ५
यदा ह्यग्निश्च वायुश्च धर्मइंद्रोश्विनावपि कामयोगात्प्रवर्त्तेरन्न पार्था दुःखमाप्नु
युः ६ तस्मान्न भवता चिंता कार्या ह्येषां कथंचन देवेष्वपेतकामेषु ते शाश्वतेषु भावेषु
भारत ७ अथ चेत्कामसंयोगाद्द्वेषो लोभश्च लक्ष्यते देवेषु देवप्रामाण्यान्नैषां तद्वि
क्रमिष्यति ८ मयाभिमंत्रितः शश्वज्जातवेदाः प्रशाम्यति दिधक्षुः सकलाल्लोकान्प
रिक्षिप्य समंततः ९ यद्वा परमकं तेजो येन युक्ता दिवौकसः ममाप्यनुपमं भू
यो देवेभ्यो विद्धि भारत १० विदीर्यमाणान्वसुधां गिरीणां शिखराणि च लोकस्य प
श्यतो राजन्स्थापयाम्यभिमंत्रणात् ११ चेतनाचेतनस्यास्य जंगमस्थावरस्य च ।
विनाशाय समुत्पन्नं महाघोरं महास्वनं १२ अश्मवर्षं च वायुं च शमयामीह नि
त्यशः जगतः पश्यतो भीतो भूतानामनुकंपया १३ स्तंभितास्वप्सु गच्छंति मया
रथपदातयः देवासुराणां भावानामहमेकः प्रवर्त्तिता १४ ॥

मत्ताक्रांतमपि निष्फलं भविष्यतीत्यर्थः ८ दैवं बलं मय्यस्तीत्याह मयाभीति ९ १० १४

१५ १६ १७ १८ मद्विषःमकृच्छ्रन् १९ २० अभिध्यामिचिंतयामि २१ २२ २३ ॥

अलौहिणीभिर्यान्देशान्यामिकार्येणकेनचित् तत्रास्यामेप्रवर्त्ततेयत्रयत्रा
भिकामये १५ भयानकानिविषयेव्यालादीनिनसंतिमे मंत्रगुप्तानिगुप्तानिनाहि
संतिभयंकराः १६ निकामवर्षीपर्जन्योराजन्विषयवासिनो धर्मिष्ठाश्चप्रजाःस
र्वाईतयश्चनसंतिमे १७ अश्विनावथवाय्वग्नीमरुद्भिःसहवृत्रहा धर्मश्चैवमयादि
ष्टान्नेतोत्सहंतेभिरक्षितं १८ यदिह्येतेसमर्थाःस्युर्मद्विषस्तातमंजसा नस्मत्रयोद।
शसमाःपार्थादुःखमवाप्नुयुः १९ नैवदेवानगंधर्वानासुरानचराक्षसाः शक्ता।
स्त्रातुंमयादिष्टंसत्यमेतद्ब्रवीमिते २० यदभिध्याम्यहंशश्वच्छुभंवायदिवाशुभं
नैतद्विपन्नपूर्वंमेमित्रेष्वरिषुचोभयोः २१ भविष्यतीदमितिवायद्ब्रवीमिपरंत
प नान्यथाभूतपूर्वंचसत्यवागितिमांविदुः २२ लोकसाक्षिकमेतन्मेमाहात्म्यं।
दित्तविस्मृतं आश्वासनार्थंभवतःप्रोक्तंनश्लाघयात्नृप २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ २८ इतीति इतिएवं दुर्योधनोक्तेः धृतराष्ट्रः संजयं प्रति उक्ता प्राप्तकाले पूर्वं प्रशस्तं तं अर्जुनमाहात्म्यमे
व अपृच्छत इदं मत्पुत्रस्य बलं ज्ञात्वा पांडवबलं च त्वं ब्रूहीत्यर्थः युयुत्सोः वैश्यापुत्रस्य पांडवेषु नुरक्तस्य

न ह्यहं शासने राजन् भूतपूर्वः कदाचन असदाचरितं ह्येतद्यदात्मानं प्रशंसति २४
पांडवाश्चैव मत्स्याश्च पंचालान्केकयैः सह सात्यकिं वासुदेवं च श्रोतास्मि विजितान्मया
२५ सरितः सागरं प्राप्य यथा नश्यंति सर्वशः तथैव ते विनंक्ष्यंति मामासाद्य सहान्वयाः
२६ परा बुद्धिः परं तेजो वीर्यं च परमं मम परा विद्या परो योगो मम तेभ्यो विशिष्यते २७
पितामहश्च द्रोणश्च कृपः शल्यः शलस्तथा अस्त्रेषु यत्प्रजानंति सर्वं तन्मयि विद्यते २८
इत्युक्त्वा संजयं भूयः पर्यपृच्छत भारत ज्ञात्वा युयुत्सोः कार्याणि प्राप्तकालमरिंदम
२९ इत्युद्योगे संजययाने ६१ वैशंपायन उ॰ तथा तु पृच्छंतमतीव पार्थान्वैचित्रवीर्यं तम
चिंतयित्वा उवाच कर्णो धृतराष्ट्रपुत्रे प्रहर्षयन्संसदि कौरवाणां १ मिथ्या प्रतिज्ञाय म
यायदस्त्रं रामात् वृतं ब्रह्ममयं पुरस्तात् विज्ञायते नाभिमतस्त्वमेवं वक्तस्तेनांतकाले प्रति
भास्यतीति २ महापराधे ह्यपि यत्र तेन महर्षिणाहं गुरुणा च शप्तः शक्तः प्रदग्धुं ह्यपि
तिग्मतेजाः ससागरामप्यवनिं महर्षिः ३ ॥

कार्याणि ज्ञात्वा एतेषां सर्वेषां विनाशेन तस्यैव
राज्यलाभं नृपाणि कार्याणि भविष्यंतीति ज्ञात्वेत्यर्थः २९ अध्यायः ६१ पार्थं पृच्छंतं वैचित्रवीर्यं अचिंता
यित्वेति संबंधः १ हेलेन अंतकाले प्रतिभा अस्त्रस्मृतिः अस्यति क्षिपति त्वां त्यक्ष्यतीत्यर्थः २ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सावशेषंममह्यायुरस्तिअतोनकालस्यानुपस्थितत्वात्तदस्त्रंममास्तीति अहंसमर्थोस्मिअर्जुनंजेतुमित्यर्थः

प्रसादितंयत्त्वमयामनोभक्त्याप्रयासेनचपौरुषेण तदस्तिचास्त्रंममसावशेषं
तस्मात्समर्थोस्मिममैषभारः ४ निमेषमात्रात्तमृषेःप्रसादमवाप्यपंचालकरूष
मत्स्यान् निहत्यपार्थान्सहपुत्रपौत्रैर्लोकानहंशस्त्रजितान्प्रपत्स्ये ५ पितामहस्त्वि
ष्टत्वतेसमीपेद्रोणश्चसर्वेचनरेंद्रमुख्याः यथाप्रधानेनबलेनगत्वापार्थान्हनि
ष्यामिममैषभारः ६ एवंब्रुवन्तंतमुवाचभीष्मःकिंकत्थसेकालपरीतबुद्धे न
कर्णजानासियथाप्रधानेहतेहताःस्युर्धृतराष्ट्रपुत्राः ७ यत्खाण्डवंदाहयताकृतंहि
कृष्णद्वितीयेनधनंजयेन श्रुत्वैवतत्कर्मनियन्तुमात्मायुक्तस्त्वयावैसहबान्धवेन
८ यांचापिशक्तिंत्रिदशाधिपस्तेददौमहात्माभगवान्महेन्द्रः भस्मीकृतांतांसमरे
विशीर्णांचक्राहतांद्रक्ष्यसिकेशवेन ९ यस्तेशरःसर्पमुखोविभातिसदाग्र्यमाल्यै
र्महितःप्रयत्नात् सपाण्डुपुत्राभिहतःशरौघैःसहत्वयायास्यतिकर्मनाशं १० बा
णस्यभौमस्यचकर्णहन्ताकिरीटिनंरक्षतिवासुदेवः यस्त्वादृशानांचवरीयसांच
हन्तारिपूणांतुमुलेप्रगाढे ११ कर्णउ॰ असंशयंवृष्णिपतिर्यथोक्तस्तथाचभूयोच
ततोमहात्मा अहंयदुक्तःपरुषंतुकिंचित्पितामहस्तस्यफलंशृणोतु १२ ॥

४ प्रपत्स्ये प्राप्स्यामि ५ ६ प्रधानेतस्मिन्हतेसर्वेहताःस्युरतआत्मानंगोपायेरुपहासः ७ आत्मामनो
नियन्तुंयुक्तः अर्जुनंहेषाद्उपरमःकर्तव्यस्तस्यजयंत्वंनेतिभावः ८ ९ १० १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मांकृतविजयंसभार्यानद्रक्ष्यति अयंभावः यद्यहंयोत्स्यामितर्हि एतस्यजीवनंभविष्यतितन्माभूदतोऽयंनिः
सारोम्रियतामिति १३ १४ सत्यप्रतिज्ञः पूर्वंआदावेवयोत्स्यइत्युक्त्वाइदानीमयिसतिनयोत्स्यइतिवद
न्सत्यामिषुशस्त्राणिनजातुसंख्येपितामहोद्रक्ष्यति मांसभार्यो त्वयिप्रणष्टेतेतममञ्जभा
वेद्रक्ष्यंतिसर्वंभुविभूमिपालाः १३ वैशंपायनउ० इत्येवमुक्त्वासमहाधनुष्मान्हि।
त्वासभांस्वंभवनंजगाम भीष्मस्तुदुर्योधनमेवराजन्मध्येकुरूणांप्रहसन्नुवाच १४
सत्यप्रतिज्ञः किलसूतपुत्रस्तथासभारंविषहेतकस्मात् व्यूहंप्रतिव्यूहशिरांसिभि
त्वालोकेत्वयंपश्यतभीमसेनात् १५ आवंत्यकालिंगजयद्रथेषुचेदिध्वजेतिष्ठ
तिवाह्लिकेच अहंहनिष्यामिसदापरेषांसहस्रशश्चायुतशश्चयोधान् १६ यदै
वरामेभगवत्यनिंद्येब्रह्मब्रुवाणः कृतवांस्तदस्त्रं तदैवधर्मश्चतपश्चनष्टंवैकर्तन
स्याधमपूरुषस्य १७ यथोक्तवाक्येनृपतौ च भीष्मेनिक्षिप्यशस्त्राणिगतेचकर्णे वै
चित्रवीर्यस्यसुतोल्पबुद्धिर्दुर्योधनः शांतनवंवभाषे १८ इत्युद्योगेसंजययाने
दुर्योधनउ० सदृशानांमनुष्येषुसर्वेषांतुल्यजन्मनां कथमेकांततस्तेषांपार्थानां
मन्यसेजयं १ वयंचतेपितुल्यावैवीर्येणचपराक्रमैः समेनवयसाचैवप्रातिभेन
श्रुतेनच २ अस्त्रेणयोधमुख्याश्चशीघ्रत्वेकौशलेनतथा सर्वेस्मसमजातीयाः सर्वेमा
तिमजीवनपर्यंतंत्वत्तयमुपेत्ततेसकथंमित्रमितिभावः १७ १६ ब्रह्मब्रुवाणः ब्राह्मणोहमितिवदन्
१७ १८ अध्यायः ६२ प्रातिभेनसमयस्फूर्त्या १ २ योधमुख्याश्चरसमर्था युजेरोणादिकः किंज्ञत्वमार्ष

म॰उ॰ नदीद्वाः नौस्थतकाः कर्णधारादयः तद्रहितान् जलं यथा परिहरति ग्रावणेषु पातयति अनरित्रानिति पाठे अरि
टी॰ त्रकेनिपातनं नौचालनदंडस्तद्रहितानित्यर्थः नहृतमामकान्नानुरणे वाक्भ्यः परिहरिष्यति ७ ८ अ
१६६ दांतोयं अलसयं करिष्यतीति वसनन्दममेव प्रशंसन् विदुरउवाच इहेति किंतन्निश्रेयसंकल्याणं।

पितामह विजानीषे पार्थेषु विजयं कथं नाहं भवति न द्रोणेन कृपेन च बाह्लिके ४
अन्येषु च नरेंद्रेषु पराक्रम्य समारभे अहं वैकर्तनः कर्णो भ्राता दुःशासनश्च मे ५
पांडवान्समरे पंच हनिष्यामः शितैः शरैः ततो राजन्महायज्ञैर्विविधैर्भूरिदक्षिणैः
६ ब्राह्मणांस्तर्पयिष्यामि गोभिरश्वैर्धनेन च यदा परिहरिष्यंति एणा यानि वर्तंतनौ अ
तरिक्त निव जलं वाड्भिर्मामकाः रणे ७ पश्यंतस्ते परांस्तत्र रथनागसमाकुलान्
तदा दर्पं विमोक्ष्यंति पांडवाः स च केशवः ८ विदुर उ॰ इह निःश्रेयसं वृद्धानां
शिन दर्शिनः ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ९ तस्य दानं तमा सिद्धि
र्यथावदुपपद्यते दमो दानं तपो ज्ञानमधीतं चानुवर्तते १० दमस्तेजो वर्धयति
पवित्रं दम उत्तमं विपाप्मा वर्धितेजास्तु पुरुषो विंदते महत् ११ क्रव्याद्भ्य इव भूता
नामदांतेभ्यः सभयं येषां च प्रतिषेधार्थं तत्र सृष्टः स्वयंभुवा १२ ॥

ब्राह्मणस्य ब्रह्मजिज्ञासोर्दम एव सनातनोऽनादिर्मुख्यो धर्मः ९ तस्य पुंसः दानं तमा सिद्धिर्मोक्षश्च
उपपद्यते कस्य यस्य दमः दानादीननुवर्तते दांतः सन्यो दानादिकं करोति स दानफलं मोक्षसिद्धिं
च प्राप्नोतीत्यर्थः १० विंदते लभते दमेन महत् ब्रह्म ११ १२ ॥ १६६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

येषां समुदयः उदयहेतवः १३ तान्येवाह क्षमा परेभ्यस्ताडनादिप्राप्तावपि संतापानुदयः धृतिः कामादिभिरनु
त्पन्नचित्तता अहिंसा वाङ्मनःशारीरैः परस्यापीडायाः अकरणं समता शत्रुमित्रादौ तुल्यत्वं सत्यं यथार्थभाष
णं आर्जवमकौटिल्यं इंद्रियाणां जयः धैर्यं अत्यंतापद्यपि मनसो ऽवैक्लव्यं मार्दवं प्रियवादिता ह्रीः कार्या
न्निवृत्तिः अचापलं स्थैर्यं वाङ्मनःकायानां एते दान्तानां गुणाः १४ काम इति कामादि मत्वादयम दान्तस्य

आश्रमेषु चतुर्ष्वाहुर्दममेवोत्तमं व्रतं तस्य लिंगं प्रवक्ष्यामि येषां समुदयो दमः १३ क्ष
मा धृतिरहिंसा च समता सत्यमार्जवं इंद्रियाभिजयो धैर्यं मार्दवं ह्रीरचापलं १४ अका
र्पण्यमसंरंभः संतोषः श्रद्दधानता एतानि यस्य राजेंद्र स दांतः पुरुषः स्मृतः १५ कामो
लोभश्च दर्पश्च मन्युर्निद्रा विकत्थनं मानमीर्ष्या च शोकश्च नैतद्दांतो निषेवते अजि
ह्ममशठं शुद्धमेतद्दांतस्य लक्षणं १६ अलोलुपस्तथाल्पेप्सुः कामानामविचिंति
ता समुद्रकल्पः पुरुषः स दांतः परिकीर्तितः १७ सुवृत्तः शीलसंपन्नः प्रसन्नात्मा
त्मविद्बुधः प्राप्येह लोके संमानं सुगतिं प्रेत्य गच्छति १८ अभयं यस्य भूतेभ्यः सर्वे
षामभयं यतः स वै परिणतप्रज्ञः प्रख्यातो मनुजोत्तमः १९ सर्वभूतहितो मैत्रस्त
स्मान्नोद्विजते जनः समुद्र इव गंभीरः प्रज्ञातृप्तः प्रशाम्यति २० कर्मणाचरितं पूर्वं
सद्भिराचरितं च यत् तदेवास्थाय मोदंते दांताः शमपरायणाः २१ ॥

र्थः १५ अजिह्मं अकुटिलं अशठं सुशीलं शुद्धं मनसा १६ अलोलुपः आशाहीनः कामानां स्त्र्यादीनां अवि
चिंतिता ध्यानमकुर्वन् समुद्रकल्पः गंभीराशयः १७ प्रसन्नात्मा शुद्धचित्तः अत एवात्मवित् बुधः ज्ञात
ज्ञेयः प्रेत्य मृत्वा १८ २० कर्मणेति दैवदत्तैर्भोगैः सदाचारेण च ये युक्तास्ते दांतास्त एव च मोदंते २१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० ३०
टी०
९६०

नैष्कर्म्यं वा स्वजनः शरीराणां सर्वात्मना अप्रवृत्तिः निर्विकल्पकावस्था तत्र हेतुः ज्ञानत्वम् अवणमननजेन पा
रोक्षज्ञानेन तृप्तः रागद्वेषशून्यः तत्रापि हेतुः जितेंद्रियः कालाकांती सर्वत्र ममताशून्यः ब्रह्मभूयाय ब्रह्म
भावाय कल्पते योग्यो भवति २२ ब्रह्मभूयफलमाह शाकुनीनामिति न तस्य पारा ३ क्रामं तत्रैव सम
वनीयं ते ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः ब्रह्मविदः नपात्यं रूपं तस्य गगनवद्धि सर्वव्यापिनो गत्यभा

नैष्कर्म्यं वा समास्थाय ज्ञानतृप्तो जितेंद्रियः कालाकांती च वै लोके ब्रह्मभूयाय क
ल्पते २२ शाकुनीनामिवाकाशे पदं नैवोपलभ्यते एवं प्रज्ञानतृप्तस्य मुनेर्वर्त्म न दृ
श्यते २३ उत्सृज्य वा गृहान् यस्तु मोक्षमेवाभिमन्यते लोकास्तेजोमयास्तस्य क
ल्पंते शाश्वता दिवि २४ इत्यनुगीतासु ८३ विदुरउ० शाकुनीनामिहार्थाय
पाशं भूमावयोजयत् कश्चिच्छाकुनिकस्तात पूर्वेषामपि शुश्रुम १ तस्मिंस्तौ शकु
नौ बद्धौ युगपत्सहचारिणौ तावुपादाय तं पाशं जग्मतुः खचरावुभौ २ तौ विहाय
समाक्रांतौ दृष्ट्वा शाकुनिकस्तदा अन्वधावदनिर्विण्णो येन येन स्म गच्छतः ३ तथा
तमनुधावंतं मृगयुं शकुनार्थिनं आश्रमस्थो मुनिः कश्चिद्ददर्शाथ कृताह्निकः ४
तावंतरिक्षगौ शीघ्रमनुयांतं महीचरं श्लोकेनानेन कौरव्य पप्रच्छ स मुनिस्तदा ५ वि
चित्रमिदमाश्चर्यं मृगहन् प्रतिभाति मे प्लवमानौ हि खचरौ पदातिरनुधावसि ६ ॥
वात् सर्गिणामिव तस्य मार्गो न दृश्यते २३ केवलसंन्यासात् क्रममुक्तिस्थानमाह उत्सृज्येति मोक्ष
मोक्षाश्रमं प्राप्य स्वतः पुनरावृत्तिशून्याः २४ अध्यायः ८३ दृमस्य प्रश्नं प्रतिपाद्य यदांतयोः कलहक
वैतोर्द्वयोरपि नाशः इति प्रतिपादयन्नाख्यायिकामुखेनाह शाकुनीनामिति पूर्वेषामनुखान् १२ विहा

॥ भ ॥ मुक्तिस्थान

९६०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९ भ्रमिवेतिच्छेदः १०.१५ विद्याजंभकवार्त्तिकाः विद्यामंत्रयंत्रादिरूपा जंभकओषधीसाधनानितद्वार्त्ति

शाकुनिक उ॰ पाशमेकमभावयत्तौ सहितौ हरतो मम यत्रवैविवदिष्येते तत्रमेव।
शमेष्यतः ७ विदुर उवाच तौ विवादमनुप्राप्तौ शाकुनौ मृत्युसंधितौ विवाद्य च सु
दुर्बुद्धी पृथिव्यां संनिपेततुः ८ तौ युध्यमानौ संरब्धौ मृत्युपाशवशानुगौ उपसृत्या
परिज्ञातौ जग्राह मृगहा तदा ९ एवं ये ज्ञातयोर्थेषु मिथो गच्छंति विग्रहं तेमित्रव
शमायांति शकुनाविव विग्रहात् १० संभोजनं संकल्पनं संप्रश्नोथ समागमः एता
नि ज्ञातिकार्याणि न विरोधः कदाचन ११ ये स्म काले सुमनसः सर्वे वृद्धानुपासते
सिंहगुप्तमिवारण्यमप्रधृष्या भवंति ते १२ येर्थं संततमासाद्य दीना इव समासते श्रि
यं ते संप्रयच्छंति द्विषद्भ्यो भरतर्षभ १३ धूमायंते व्यपेतानि ज्वलंति सहितानि च धृत
राष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ १४ इदमन्यत्प्रवक्ष्यामि यथा दृष्टं गिरौ मया श्रुत्वा
तदपि कौरव्य यथा श्रेयस्तथा कुरु १५ वयं किरातैः सहिता गच्छामो गिरिमुत्तरं ब्रा
ह्मणैर्देवकल्पैश्च विद्याजंभकवार्त्तिकैः १६ कुंजभूतं गिरिं सर्वमभितो गंधमादनं दी
प्यमानौषधिगणं सिद्धगंधर्वसेवितं १७ तत्रापश्याम वै सर्वे मधु पीतकमाक्षिकं मरु ॥ २८ ॥
प्रपाते विषमे निविष्टं कुंभसंमितं १८ ॥ उद्यो

याः विद्याजंभकवार्त्तिकाः १६ कुंजभूतं सर्वतो लताभिः परिवृतं १७ पीतकमाक्षिकं सुवर्णमाक्षिकं धातुवि

म॰ उ॰
टी॰
१९८

१९ २० २१ तवदृष्टपूर्वं तादृशं बलमिति शेषः योवीरः कर्णादिः २५ २६ युद्धे द्वयोरन्यतरस्य नाशोपि तत्रा

प्राप्ती विशेषरसमाणं कुबेरदयितं भृशं यस्मात्पुरुषो मर्त्योप्यमरत्वं नियच्छति १९
अवत्तल्लभते च तत्र वृद्धो भवति वै पुमान् इति ते कथयंतिस्म ब्राह्मणा जनमसाधका २०
ततः किरातास्तद्दृष्ट्वा प्रार्थयंतो महीपते विनेशुर्विषमे तस्मिन्ससमे गिरिगह्वरे २१
तथैव तव पुत्रोयं पृथिवीमेकइच्छति मधुपश्यति संमोहात्प्रपातं नानुपश्यति २२
दुर्योधनो योद्धुमनाः समरे सव्यसाचिना न च पश्यामि तेजोस्य विक्रमं वा तथावि
धं २३ एकेन रथमास्थाय पृथिवी येन निर्जिता भीष्मद्रोणप्रभृतयः संत्रस्ताः।
साधुयायिनः २४ विराटनगरे भग्नाः किं तत्र तव दृष्टपतां प्रतीक्षमाणो यो वीरः।
क्षमते वीक्षितं तव २५ द्रुपदो मत्स्यराजश्च संक्रुद्धश्च धनंजयः न शेषयेयुः स
मरे वायुयुक्ता इवाग्नयः २६ अंके कुरुष्व राजानं धृतराष्ट्र युधिष्ठिरं युध्यतो र्हि द्व
योर्युद्धे नैकांतेन भवेज्जयः २७ इत्युद्योगपर्वणि जयायाने १९४ धृतराष्ट्र॰ दुर्योध
न विजानीहि यत्त्वां वक्ष्यामि पुत्रक उत्पथं मन्यसे मार्गमनभिज्ञ इवाध्वगः १
पंचानां पांडुपुत्राणां यत्तेजः प्रजिहीर्षसि पंचानामिव भूतानां महतां लोकधारि
णां २ ॥ प्राणेवेति भावः २७ अध्यायः १९४ उत्पथं अमार्गमेव मार्गं मन्यते १ २ ॥

१९८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परांगतिं मरणं प्रसंप्रेत्य प्रप्राप्य मरिष्यसे वेत्यर्थः ३ ४ ५ नप्रातयेत न छिंद्यात ६ प्रतिमानेन तुल्यत्वेन

युधिष्ठिरं हि कौंतेयं परं धर्ममिहास्थितं परांगतिमभिप्रेत्य न त्वं जेतुमिहार्हसि ३ भी
मसेनं च कौंतेयं यस्य नास्ति समो बले रणांतकं तर्जयसे महावातमिव द्रुमः ४ स
र्वशस्त्रभृतां श्रेष्ठं मेरुं शिखरिणामिव युधि गांडीवधन्वानं को नु युध्येत बुद्धिमा
न् ५ धृष्टद्युम्नश्च पांचाल्यः कमिवाद्य न प्रातयेत् शत्रुमध्ये शरान्मुंचन् देवरा
डशनीमिव ६ सात्यकिश्चापि दुर्धर्षः संमतोंधकवृष्णिषु ध्वंसयिष्यति ते सेनां पां
डवेयहिते रतः ७ यः पुनः प्रतिमानेन त्रीं लोकानतिरिच्यते तं कृष्णं पुंडरीकाक्षं को
नु युध्येत बुद्धिमान् ८ एकतो ह्यस्य दाराश्च ज्ञातयश्च सबांधवाः आत्मा च पृथिवी
चेयमेकतश्च धनंजयः ९ वासुदेवोपि दुर्धर्षो यतात्मा यत्र पांडवाः अविषह्यं पृथि
व्यापि तद्बलं यत्र केशवः १० तिष्ठतां तात सतां वाक्ये सुहृदामर्थवादिनां वृद्धं शांतन
वं भीष्मं तितिक्षस्व पितामहं मां च ब्रुवाणां शुश्रूष कुरूणामर्थदर्शिनं द्रोणं कृ
पं विकर्णं च महाराजं च बाह्लिकं १२ एते ह्यपि यथैवाहं मंतुमर्हसि तांस्तथा सर्वध
र्मविदो ह्येते तुल्यस्नेहाश्च भारत १३ ॥

तुल्यत्वेन ९ १० ११ १२ भीष्मं तितिक्षस्व तद्वाक्यं गृहाणेत्यर्थः १३ ॥ १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ १५ त्वत्साराज्यार्थदानेनप्रतिपादयसंभावय अध्यायः २५ एवमुक्त्वा १ २ ३ ४ ७ ८

यत्तद्विराटनगरेसहभ्रातृभिरग्रतः १४ उत्सृज्यगाःसुसंत्रस्तंबलंतेसमशीर्यत १५
यच्चैवनगरेतस्मिन्श्रूयतेमहदद्भुतं एकस्यचबहूनांचपर्याप्तंतन्निदर्शनं अ
र्जुनेनस्तुतथाकार्षीत्किंपुनःसर्वएवते सभ्रातृनभिजानीहिभरतात्मस्वपरिपाल
य १६ इत्युद्योगेसंजययाने २५ वैशंपायनउ॰ एवमुक्त्वामहाप्राज्ञोधृतराष्ट्रःसु
योधनं पुनरेवमहाभागःसंजयंपर्यपृच्छत १ ब्रूहिसंजययच्छेषंवासुदेवा
दनंतरं यदर्जुनउवाचत्वांपरंकौतूहलंहिमे २ संजयउ॰ वासुदेववचःश्रुत्वाकुं
तीपुत्रोधनंजयः उवाचकालेदुर्धर्षोवासुदेवस्यशृण्वतः ३ पितामहंशांतनवं
धृतराष्ट्रंचसंजय द्रोणंकृपंचकर्णंचमहाराजंचबाह्लिकं ४ द्रौणिंचसोमद
त्तंचशकुनिंचापिसौबलं दुःशासनंशलंचैवपुरुमित्रंविविंशतिं ५ विकर्णंचि
त्रसेनंचजयत्सेनंचपार्थिवं विंदानुविंदावावंत्यौदुर्मुखंचापिकौरवं ६ सैंधवंदुः
सहंचैवभूरिश्रवसमेवच भगदत्तंचराजानंजलसंधंचपार्थिवं ७ येचाप्यन्येपार्थिवा
स्तत्रयोद्धुंसमागताःकौरवाणांप्रियार्थं मुमूर्षवःपांडवाग्नौसमिद्धेसमानीताधार्तराष्ट्रे

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१० लोहितांतेआयतेचप्रांतेयस्यसलोहितांतायताक्षः ११ १२ शराणांमिथःसंनिपाततोग्निसम
ध्मोयस्मिन्यज्ञेइतिशेषः रथध्वनिरेवमंत्रस्थानेधनुःस्रुवेण अस्त्रबलेनअस्त्रसंस्तिशास्त्रबलेनेवया।

यथात्मीयंकौशलंवदनेचसमागतामहद्वचनेनवाच्याः इदंब्रूयाःसंजयराजमध्ये
सुयोधनंपापकृतांनिधानं ८ अमर्षणंदुर्मतिंराजपुत्रंपापात्मानंधार्तराष्ट्रंसबाल
म् सर्वंममैतद्वचनंसमग्रंसहामात्यंसंजयश्रावयेथाः ९ एवंप्रतिष्ठाप्यधनंजयो
मांततोर्थवद्धर्मवच्चापिवाक्यं प्रोवाचेदंवासुदेवंसमीक्ष्यपार्थोधीमांल्लोहितांताय
ताक्षः ११ यथाश्रुतंतेवदतोमहात्मनोमधुप्रवीरस्यवचःसमाहितं तथैववाच्यंभ
वताहिमद्वचःसमागतेषुक्षितिपेषुसर्वशः १२ महाशराग्नौरथवायुनोद्धतेधनुः
स्रुवेणास्त्रबलापहारिणा यथानहोमःक्रियतेमहामृधेसमेत्यसर्वेप्रयतध्वमादृ
ताः १३ नचेदयंयच्छथमित्रघातिनोयुधिष्ठिरस्यांशमभीप्सितंस्वकं नयामिवःसा
श्वपमहातिकुंजरान्दिशंपितॄणामशिवांशितैःशरैः १४ ततोहमामंत्र्यतदाधनंज
यंचतुर्भुजंचैवनमस्यसत्वरः जवेनसंप्राप्तइहामरद्युतेतवांतिकंप्रापयितुंवचोम
हत् १५ इत्युद्योगपर्वणिसंजययानेसमासः ४८ ॥

ताः १३ १४ चतुर्भुजंसंजयस्यापियोगिदृश्यंभगवतश्चतुर्भुजंरूपंसदादृष्टिगोचरमासीदित्यनुमी
यते १५ इतिनैलकंठीयेभारतभावदीपेउद्योगपर्वणिसंजययानार्थप्रकाशोध्यायः ४८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
८०

परेषांतदस्याते २ युध्यमानानसंतिउदासीनाःस्वार्थैः ५ अत्रत्यामयिदोषदृष्टिःपितरंव्यासं ६ ९ अनुयुंक्ष्व

वैशंपायनउ॰ दुर्योधनेधार्तराष्ट्रेतद्वचोनाभिनंदति तूष्णींभूतेषुसर्वेषुसमुत्तस्थुर्नर
र्षभाः १ उत्थितेषुमहाराजपृथिव्यांसर्वराजसु रहितेसंजयंराजापरिप्रष्टुंप्रचक्रमे २
आशंसमानोविजयंतेषांपुत्रवशानुगः आत्मनश्चपरेषांचपांडवानांचनिश्चयं ३ धृत
राष्ट्रउ॰ गावल्गणेब्रूहिनःसारफल्गुस्वसेनयोः यथावदिहास्तिकिंचित्‌ त्वंपांडवानां
निपुणंवेत्थसर्वंकिमेषांज्यायःकिमुतेषांकनीयः ४ त्वमेतयोःसारवित्सर्वदर्शी
धर्मार्थयोर्निपुणोनिश्चयज्ञः समेपृष्टःसंजयब्रूहिसर्वंयुध्यमानाःकतरेस्मिन्नस
ति ५ संजयउ॰ नत्वांब्रूयांरहितेजातुकिंचिदसूयाहित्वांप्रविशेतराजन्‌ आनय
स्वपितरंमहाव्रतंगांधारींचमहिषीमाजमीढ ६ तौतेसूयांविनयेतांनरेंद्रधर्मज्ञौ
तौनिपुणौनिश्चयज्ञौ तयोस्तुत्वांसंनिधौतद्वदेयंकृत्स्नंमतंकेशवपार्थयोर्यत्‌ ७
वैशंपायनउ॰ इत्युक्तेनचगांधारीव्यासश्चात्राजगाममह आनीतौविदुरेणेहसभां
शीघ्रंप्रवेशितौ ८ ततस्तन्मतमाज्ञायसंजयस्यात्मजस्यच अभ्युपेत्यमहाप्राज्ञःकृ
ष्णद्वैपायनोब्रवीत्‌ ९ व्यासउ॰ संपृच्छतेधृतराष्ट्रायसंजयआचक्ष्वसर्वंयावदेषोन
युंक्ते सर्वंयावद्वेत्थतस्मिन्यथावद्याथातथ्यंवासुदेवेर्जुनेच १० इतिउद्योगेयान
संधौ ६७ ॥ ॥ ॥ श्लो १० इत्युद्योगेयानसंधावध्यायः ६७ ॥ ८०

कामादिति कामपूर्वकं कर्मोच्यते अकर्मजं तयोर्जन्म लोकानुग्रहार्थं स्वयं वदाविर्भावमात्रमित्यर्थः सर्वभा
वाय सर्वस्याभावाय संमितौ नस्योऽभावपि सामर्थ्यवन्तौ तद्रूपाविन्यर्थः १ द्यामांतरं प्रसारितं योर्ई स्तयोर्यो वा।
विस्तारः पंचहस्तमितः तावत् अंतरं मध्यप्रमाणं यस्त तद्यामांतरं यथायुक्तं यथारूपं यावत्प्रमाणं।

संजय उ॰ अर्जुनो वासुदेवश्च धन्विनौ परमार्चितौ कामादन्यत्र संभूतौ सर्वभावाय सं
मितौ १ द्यामांतरं समास्थाय यथायुक्तं मनस्विनः चक्रं तद्वासुदेवस्य मायया वर्तते वि
भो २ सापह्नवं कौरवेषु पांडवानां सुसंमतं सारासारबलं ज्ञातुं तेजःपुंजावभासितं ३
नरकं शंबरं चैव कंसं चैद्यं च माधवः जितवान्घोरसंकाशान्क्रीडन्निव महाबलः ४
पृथिवीं चांतरिक्षं च द्यां चैव पुरुषोत्तमः मनसैव विशिष्टात्मा नयत्यात्मवशं वशी ५
भूयो भूयो हि यद्राजन्पृच्छसे पांडवान्प्रति सारासारबलं ज्ञातुं तत्समासेन मे शृणु ६
एकतो वा जगत्कृत्स्नमेकतो वा जनार्दनः सारतो जगतः कृत्स्नादतिरिक्तो जनार्दनः ७
न तु कृत्स्नं जगच्छक्तं भस्म कर्तुं जनार्दनं भस्मीकुर्याज्जगदिदं मनसैव जनार्दनः यतः
सत्यं यतो धर्मो यतो ह्रीरार्जवं यतः ८ ततो भवति गोविंदो यतः कृष्णस्ततो जयः पृथि
वीं चांतरिक्षं च दिवं च पुरुषोत्तमः ९ विचेष्टयति भूतात्मा क्रीडन्निव जनार्दनः १० ॥

चिंतितं तावत्प्रमाणं भूत्वा यत्प्रयुक्तं भवति मायया पाडुर्लक्ष्यरूपेणेत्यर्थः २ सापह्नवं ससंहारं अत एव
पांडवानां सुसंमतं ३ ४ मनसैव संकल्पमात्रेण विशिष्टात्मा श्रेष्ठरूपः वशी ऐश्वर्यवान् ५ ६
७ ८ ९ विचेष्टयति चालयति यतो भूतात्मा सर्वेषां भूतानामंतरात्मा १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰
टी॰
९९

सर्वविषं सर्वमाच्छादनेनयत्तेमदाद्यानेचकेतवइतिविश्वःसंमोहयन् आत्मनोजगत्कर्तृत्वेपिअकर्तृत्वंदर्शी।
यन् ॥ कालचक्रंसंवत्सरात्मकंजगच्चक्रंजगतोजन्मस्थितिलयप्रवाहं युगचक्रंकर्मचक्रंक्रमेणयत्र।
धर्मश्चतुष्पात् त्रेतायांत्रिपाद्धर्मःएकपादधर्मः द्वापरेऽर्धधर्मोऽर्धमधर्मः कलिस्त्रिपात्पापएकपा।
द्धर्मइति तदिदंकर्मचक्रंपुनःपुनर्जन्ममरणयोर्हेतुभूतंपुनःकर्मपुनःसंस्कारःपुनःकर्मेत्येवंरूपं
आत्मयोगेनचैतन्यसंबंधेननहिसंवत्सरादिकंकेवलंजडग्रंथभवितुमर्हति सर्वस्यचिदेकप्रका

सकृत्वापाण्डवान्सर्वंलोकंसंमोहयन्निव अधर्मनिरतान्मूढान्दग्धुमिच्छतितेसुता
न् ॥११ कालचक्रंजगच्चक्रंयुगचक्रंचकेशवः आत्मयोगेनभगवान्परिवर्तयतेनि
शं ॥१२ कालस्यचहिमृत्योश्चजंगमस्थावरस्यच ईशतेभगवानेकःसत्यमेतद्ब्र
वीमिते ॥१३ ईशन्नपिमहायोगीसर्वस्यजगतोहरिः कर्माण्यारभतेकर्तुंकीनाश
इवदुर्बलः ॥१४ तेनवंचयतेलोकान्मायायोगेनकेशवः यतमेवप्रपद्यंतेनतेमुह्य
न्तिमानवाः ॥१५ इत्युद्योगपर्वणियानसंधौ ६८ धृतराष्ट्रउ॰ कथंत्वमाधवंवेत्थसर्व
लोकमहेश्वरं कथमेनंनवेदाहंतन्ममाचक्ष्वसंजय १ ॥

रूपत्वात् ॥१२ कालःआयुःपरिच्छेदकर्त्तादेवतान्मृत्युर्देहप्राणयोर्वियोगकर्त्ता ईशतेईष्टे ॥१३ ईशन्नपि
ईशानोपिप्राप्याऽलुक्परस्मैपदंचार्षं कीनाशःकर्षकः वर्द्धनःधान्यादिवृद्धिकृत् कीनाशोयमः
वर्धनःदेहादिच्छेत्ता ॥१४ तेनदानमुह्यन्तीति ॥१५ अध्यायः ६८ कथंकेनप्रकारेण कानिज्ञानसाधना ९९
निकानिवात्तानप्रतिबंधकानीतिप्रश्नार्थः १ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विद्या तत्त्वमस्यादिवाक्यजं ज्ञानं तेन हीनो यः स तमोध्वस्तस्तमसा स्वस्वरूपात् निर्विषयानंदमात्रात् च्युतः १ वि
द्यया तमोविरोधिन्या त्रियुगं त्रीणि स्थूलसूक्ष्मकारणशरीराणि युज्यंते रज्जणावत् संबध्यंते यस्मिन्न् अधि
ष्ठानभूते तं त्रियुगं अज्ञानकल्पितस्यावस्थात्रयस्य विषयाबाधे सति निरुपाधिस्वरूपेणात्मरूपं ज्ञायत इ
त्यर्थः कर्तारं विश्वस्य निमित्तकारणं अकृतं कर्मभिरसाध्यं नित्यसिद्धत्वात् भूतानां वियदादीनां प्रभवं उ
त्पत्तिस्थानं अप्ययो लयस्थानं ३ भक्तिः आराध्यत्वेन ज्ञानं तच्च कीदृशं किं भेदेन राजवत् तटस्थतया भग
वान् ध्येयः उत प्रत्यगात्मत्वेनेति भावः ४ मायां पुत्रकलत्राद्याकारेण परिणामिनीमविद्यां न से

संजय उ॰ शृणु राजन्न ते विद्या मम विद्या न हीयते विद्याहीनस्तमोध्वस्तो नाभिजाना
ति केशवं २ विद्यया तात जानामि त्रियुगं मधुसूदनं कर्तारमकृतं देवं भूतानां प्रभ
वाप्ययं ३ धृतराष्ट्र उ॰ गावल्गणेऽत्र का भक्तिर्या ते नित्या जनार्दने यया त्वमभिजा
नासि त्रियुगं मधुसूदनं ४ संजय उ॰ मायां न सेवे भद्रं ते न वृथा धर्ममाचरे शुद्धभावं
गतो भक्त्या शास्त्राद्वेद्मि जनार्दनं ५ धृतराष्ट्र उ॰ दुर्योधन हृषीकेशं प्रपद्यस्व जनार्द
नं आप्तो नः संजयस्तात शरणं गच्छ केशवं ६ ॥

वे वृथा धर्मं भगवदर्पणं विना नाचरामि शुद्धभावं मनसः कामक्रोधादिराहित्येन नैर्मल्यं गतः आप्तः
भक्त्या ध्यानेन शास्त्रात् तत्त्वमसीत्यागमात् जनार्दनं जगत्लयाधिष्ठानं अज्ञानमात्रव्यवहितं ब्रह्म
नास्ति संसारी ब्रह्मैवास्तीति तत्त्वालोचनात्मकेन ज्ञानेनैव प्राप्यते तापं सर्पो रज्जुरेवेयमिति वत् न
त्वकीटभृंगन्यायेन भावनात इत्यर्थः ५ ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ अर्जुनेविशुद्धेकामक्रोधादिमलशून्येमत्संवदनभगवाननस्ति अयंकामाक्रान्ततात् दृष्टायांनाहंगच्छेनश्रा
टी॰ शुयाश्रासुरोभावोनमयायत्केशाक्योःताननमेततस्मिन्संभावनापीत्यर्थः ७ अवाकुअथोनरकमित्यर्थः
१०२ श्रेयसांसाधनवचनातिगः उपदेशावमानी ८ एकाग्रंशुश्रूषमाणंसेवमानंत्वांमोक्ष्यतेमोचयिष्या
ति १२ सिताःबद्धाःपाशैःकामादिभिः १३ ग्रथानेतायेषांतेग्रथनेत्राः १४ एषःज्ञानमार्गःएका

दुर्योधन उ॰ भगवान्देवकीपुत्रोलोकांश्चेतिहनिष्यति प्रवदन्नर्जुनेसत्वेनाहंगच्छे
यकेशव ७ धृतराष्ट्र उ॰ अवाग्गान्धारिपुत्रस्तेगच्छत्येषसदुर्मतिः दुर्दुरात्मामानीच
श्रेयसांवचनातिगः ८ गान्धार्युवाच ऐश्वर्यकामदुष्टात्मन्वृद्धानांशासनातिग ऐ
श्वर्यजीवितेहित्वापितरंमांचबालिश ९ वर्धयन्दुर्हृदांप्रीतिंमांचशोकेनवर्धयन्
निहतोभीमसेनेनस्मर्तासिवचनंपितुः १० व्यास उ॰ प्रियोसिराजन्कृष्णस्यधृतराष्ट्रनि
बोधमे यस्यतेसंजयोदूतोयस्त्वांश्रेयसियोक्ष्यते ११ जानात्येषहृषीकेशंपुराणंय
च्चवैपरं शुश्रूषमाणमेकाग्रंमोक्ष्यतेमहतोभयात् १२ वैचित्रवीर्यपुरुषाःक्रोधह
र्षसमावृताः सिताबहुविधैःपाशैर्येनतुष्टाःस्वकैर्धनैः १३ यमस्यवशमायान्ति
काममूढाःपुनःपुनः ग्रथनेत्रायथान्धानीयमानाःस्वकर्मभिः १४ एषएकाय
नःपन्थायेनयान्तिमनीषिणः तंदृष्ट्वामृत्युमत्येतिमहांस्तत्रनसज्जति १५ ॥

यनःएकस्यब्रह्मणःप्रापकः तंदृष्ट्वातंमार्गंज्ञात्वामृत्युंसंसारंअत्येति आक्रम्यगच्छतिअभ्येतीतिपा
ठेआत्मत्वेनमृत्युरप्येवंप्रविशतीत्यर्थः तथाचश्रुतिः नतस्यहनदेवाश्चनाभूत्याईशातआत्माह्येषां १०२
सभवतीतिदेवाश्चनदेवाअपि तत्रसंसारेमहान्नसज्जतिसक्तोभवति १५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सिद्धिं मोक्षं १६ अकृतात्मा अजितमनाः कृतात्मानं नित्यसिद्धं अत्यगात्मानं आत्मनः स्वस्य इंद्रियनिग्रहा
दन्यत्र इंद्रियनिग्रहं विना क्रियायागादिरूप उपायः आप्त्युपायो नास्ति १७ इंद्रियाणां अप्रमादतः अवहि
ततया कामत्यागः अप्रमादः अविहिंसेति ज्ञेयं ज्ञानस्य योनिः कारणं १८ च्यवतु न त्यजतु अप्रशांता मा
भूत् यतस्ततः सर्वेभ्य इंद्रियेभ्यो बाह्येभ्यश्च विषयेभ्यो नियच्छ निगृह्णीष्व १९ इंद्रियाणां समनस्का

धृतराष्ट्र उ॰ अंग संजय मे शंस पंथानमकुतोभयं येन गत्वा हृषीकेशं प्राप्नुयां सिद्धिमु
त्तमां १६ संजय उ॰ नाकृतात्मा कृतात्मानं जातु विद्याज्जनार्दनं आत्मनस्तु क्रियोपायो
नान्यत्रेंद्रियनिग्रहात् १७ इंद्रियाणामुदीर्णानां कामत्यागोप्रमादतः अप्रमादोवि
हिंसा च ज्ञानयोनिरसंशयं १८ इंद्रियाणां यमे यत्तो भव राजन्नतंद्रितः बुद्धिश्च ते
मा च्यवतु नियच्छैनां यतस्ततः १९ एतज्ज्ञानं विदुर्विप्रा ध्रुवमिंद्रियधारणं एतज्ज्ञा
नं च पंथाश्च येन यांति मनीषिणः २० अप्राप्यः केशवो राजन्निंद्रियैरजितैर्नृभिः आ
गमाधिगमाद्योगाद्वशी तत्त्वे प्रसीदति २१ इति योगोपानसंधौ ६९ धृतराष्ट्र उ॰ भूयो
मे पुंडरीकाक्षं संजयाचक्ष्व पृच्छतः नामकर्मार्थवित्तात प्राप्नुयां पुरुषोत्तमं १ संजय उ॰
श्रुतं मे वासुदेवस्य नामनिर्वचनं शुभं यावत्तत्राभिजानेहमप्रमेयो हि केशवः २॥

नां धारणं निग्रहेण २० आगमाधिगमात् शास्त्रयुक्तेर्लाभात् योगात् चित्तवृत्तिनिरोधात् वशी।
ईश्वरः तत्त्वे स्वयाथात्म्यविषये प्रसीदति ज्ञानदानेनानुगृह्णाति २१ अध्यायः नाम्नां कर्मणां च
अर्थवित् भूत्वा १ यावदभिजाने तावत् वदामीति शेषः वस्तुतस्तु स अप्रमेयो वाचामगोचरः २॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ० वस्तेआच्छादयतिमाययाआवृणोतीतिवावसुःतिष्ठतीतिभुवनमितिवावासुःसचासौदेवोद्योतमानश्च
टी० वासुदेवःवसंतिदेवाअस्मिन्निति वाकरणाग्रामस्योद्भवप्रलयस्थानमित्यर्थः बृहत्वाद्व्यापकत्वात्वे।
१२३ वेष्टिव्याप्नोतिसर्वमितिविष्णुः ३ मौनाद्ध्यानाद्योगाच्चेति माधीवृत्तिस्तास्वरूपविभूतामौनादि
भिःधवयति हृदीकरोतीतिमाधवः मौनंमुनेःकर्ममननंशास्त्रतोयुक्तितश्चतत्वालोचनं ध्यानंनि
दिध्यासनंचेतसःप्रणिधानंयोगस्तस्यैवचेतसोनिरोधः मधुसूदनामधोर्दैत्यस्यनाशकःश्रीकृष्णः
सर्वाणिचतुर्विंशतिसंख्यानितत्वानितन्मयत्वात् तत्प्रधानत्वात् मधुहा मधूनिपृथिव्यादीनि।
हंतिसंहरति गच्छतिवाप्रनमितिमधुहा ४ यंपृथिवीसर्वेषांभूतानांमध्वस्येपृथिव्यैसर्वाणिभू।

वसनात्सर्वभूतानांवसुत्वाद्देवयोनितः वासुदेवस्ततोवेद्योबृहत्वाद्विष्णुरुच्यते
३ मौनाद्ध्यानाच्चयोगाच्चविद्धिभारतमाधवं सर्वतत्वमयत्वाच्चमधुहामधुसू
दनः ४ कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः विष्णुस्तद्भावयोगाच्चकृष्णो
भवतिसात्वतः ५ पुंडरीकंपरंधाममनित्यमक्षयमव्ययं तद्भावात्पुंडरीकाक्षोदस्यु
त्रासाज्जनार्दनः ६ ॥ तानिमध्विति श्रुत्यापृथिव्यादितत्वजातस्यमधुशब्देनैवनिर्देशात् ४
कृषिःकर्षत्यात्मनिसर्वंसंहरतीतिकृषिःसर्वप्रपंचबाधावधिभूतासत्तामात्रंभूवाचकःभवतीतिभूः
सत्तातद्वाचकःकृषिरितिशब्दःणश्चनिर्वृतिःसुखंविष्णुस्तद्भावयोर्धीत्वर्थयोर्योगात् कृष्णःसत्ता
नंदरूपोभवतीत्यर्थः ५ पुंडरीकस्येतपदंतत्सदृशंपुंडरीकमिवपुंडरीकंहृदयकमलंधामवा
सस्थानंतत्रसन्नपिअक्षतोनक्षीयतेनव्ययतेवेतिपुंडरीकाक्षः तथाच श्रुतिर्नास्यजरयैतज्जीर्यति।
नवधेनास्यहन्यतइतिदस्यून्दोषैर्जन्मनाशादिभिःपरमात्मनोःस्पृष्टत्वमाह दस्युत्रासात् ज १२३
नंदस्यजनंअर्दयतिपीडयतीति जनार्दनइत्यर्थः ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सत्वमवाधितत्वमस्यास्तीति सत्वतः तं पर्वमरुद्ध्यामिति स्मृतो सत्वथो पः तत्र त्रयो बाहुलकात्सत्वशब्दा
दपि वोध्यः अत्र सत्वेन अत्यांतः सत्वं च यस्य अस्त्यादित्यं स सत्वतः सत्वत एव सात्वतः सात्वसवायसा
दिवत्स्वार्थे तद्धितः आर्षं वेदस्तेन भातीत्यार्षभ औपनिषदः पुरुषः उपनिषदेषु तत्वाक्षेरागात वृषभे
क्षणः तथा चार्यपोगः वृषधर्मं भासयतीति वृषभो वेदस्तदेव ईक्षणं चक्षुर्वित्तापकं यस्य सः वृ
षभेक्षण इति ७ नजायत इत्यजः अनीकजित् कस्मात् देवानां इंद्रियाणां मध्ये स्वप्रकाशत्वात् अ
गतावित्यस्माड्डन्रूपात् अतउत्कर्षेण अश्नुतेति प्रकाशात इति उदरः दमो स्यास्तीति दामः दाम आसौ

यतः सत्वान्न च्यवते यच्च सत्वान्न हीयते सत्वतः सात्वतस्तस्मादार्षभाद्वृषभेक्षणः
७ न जायते जनित्रायमजस्तस्मादनीकजित् देवानां स्वप्रकाशत्वाद्दमाद्दामो
दरो विभुः ८ हर्षात्सुखात्सुखैश्वर्याद्धृषीकेशत्वमश्नुते बाहुभ्यां रोदसी।
बिभ्रन्महाबाहुरिति स्मृतः ९ अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः नराणा
मयनाच्चापि ततो नारायणः स्मृतः १० पूरणात्सदनाच्चापि ततोऽसौ पुरुषोत्तमः अ
सतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् ११ ॥

उदरश्चेति दामोदरः दामादिति पाठे दम एव दाम तस्मात् ८ हर्षादिति हृष्यत्यनेनेति हृषी
कं हृतिसुखं स्वरूपानंदः ईशा ईशानावान् अतो हृषीकेशः ९ अधो न क्षीयते जातु इति विग्र
हवाक्ये उत्तरपदावयववलोपेन अधोक्षजः सततोर्ध्वरूपः संसारधर्मेणास्पृष्ट इत्यर्थः १०
स्वयतीति पुरुः सीदत्यस्मिन्निति सः तस्मात्पुरुषः स चासावुत्तमश्च पुरुषोत्तमः असतः कार

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ॰ ३॰ टी॰ १७४ सत्येधर्मे ११ तस्मात् धर्मात् तत्फलात् ब्रह्मलोकादपि सत्यं प्रबाधितं अतः सत्योपि नामतः विशेषेण स्तौतिअस्त्वगतोगच्छतीति विस्तृरित्यर्थः एवं जयतीति जिस्नुः १२ शाश्वतत्वात् प्राप्तद्रवत्वात् गवां इंद्रियाणां वेदनात् लाभात् प्रकाशात् गोविंदः अतत्वं मिथ्याभूतं जगतत्वं सत्यमिव स्वीयसत्तास्फूर्तिप्रधानेन करोति तेन हेतुना लोकान्मोहयति १४ धर्मे नित्यसन्निधानात् धर्मनित्यः आगंता आगमिष्यति आनृशंस्यार्थं कुरूणां तयोनाभत् इति कृपाकर्त्ते १५ अध्यायः ७० चतुष्मतोभा

सर्वस्य च सदा ज्ञानात्सर्वमेतं/तत् प्रचक्षते सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितं १२
सत्यात्सत्यं च गोविन्दस्तस्मात्सत्योपि नामतः विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरु
च्यते १३ शाश्वतत्वादनन्तश्च गोविन्दो वेदनाद्गवां अतत्वं कुरुते तत्वं तेन मोहयते प्र
जाः १४ एवंविधो धर्मनित्यो भगवान्मधुसूदनः आगंता हि महाबाहुरानृशंस्या
र्थमच्युतः १५ इत्युद्योगे यानसंधौ ७० धृतराष्ट्र उ॰ चतुष्मतां वरिष्ठ हयाभिसंजयपृ
ष्ठतिपे वासुदेवं समीपे विभ्राजमानं वपुषा परेण प्रकाशयंतं प्रदिशो दिशश्च १ इय
र्ति भारती भारतानामभ्यर्चनीया शंकरी संजयानां बुभूषद्भिर्ग्रहणीयामनिंद्यां परा
सूनामग्रहणीयरूपां २ समुद्यतं सात्वतमेकवीरं प्रणेतारमृषभं यादवानां निहं
तारं क्षोभणं शात्रवाणां मुष्णंतं च द्विषतां वै यशांसि ३ ॥

यायस्पृहयामि धन्याः पश्यंतु ईत्यर्थः चतुष्मतां ज्ञानवतां परेण चिन्मात्रेण वपुषा स्वरूपेण १
भारतानां पांडवानां भारतीं वाच ईरयंते प्रसन्नभाषा कथयंते शंकरीं कल्याणकरीं बुभूषद्भिः
ऐश्वर्यमिच्छद्भिः परासूनां मृतानां २ उद्यतं प्रकटीभवंतं देहि रूपेण स्पर्धांत शाश्वतनिमं ३ । १७४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वरेण्यं वरणीयं ४ ऋषिं मुख्यं नारायणं विपश्चितं आत्मज्ञं यतीनां संन्यासिनां कलुषम् इव कलंकं करणं।
हेममुद्रयोगाम्बुद्रयोपेते अरिष्टः अहिंसितः नेमिः पादो यस्य अरिष्टनेमिः अहिंसितमर्यादः नेमिरि।
नेमिर्मर्यादा गरुडं जानीतः सुपर्णं शोभनपत्रं हरिं हर्तारं ५ आदिः कारणं शुक्रस्य कर्मजन्यस्य वो

इष्टोसिहि कुरवस्त्वं समेतां महात्मानं इष्टाच्युतहणं वरेण्यं ब्रुवंतं वाचमन्वशासत्कृपांजलि
श्रेष्ठमोहयंतं मदीयान् ४ ऋषिं सनातनं तमेव विपश्चितं वाचः समुद्रं कलशायतीनां
अरिष्टनेमिं गरुडं सुपर्णं हरिं प्रजानां भुवनस्य धाम ५ सहस्रशीर्षं पुरुषं पुराणम
नादिमध्यांतमनंतकीर्तिं शुक्रस्य धातारमजं च नित्यं परं परेषां शरणं प्रपद्ये ६ त्रै
लोक्यनिर्माणकरं जनित्रं देवासुराणामथ नागरक्षसां नराधिपानां विदुषां प्रधा
नमिंद्रानुजं तं शरणं प्रपद्ये ७ इत्युद्योगे यानसंधिः ७१ वैशंपायन उ॰ संजये प्रति।
याते तु धर्मराजो युधिष्ठिरः अभ्यभाषत दाशार्हमृषभं सर्वसात्वतां १ अयं स का
लः संप्राप्तो मित्राणां मित्रवत्सल न च त्वदन्यं पश्यामि यो न आपत्सु तारयेत् २
त्वां हि माधव माश्रित्य निर्भया मोहदर्पितं धार्तराष्ट्रं सहामात्यं स्वयमनुयुंक्ष्महे ३
यथा हि सर्वास्वापत्सु पासि वृष्णीन् अरिंदम तथा ते पांडवा रक्ष्याः पाह्यस्मान्महतो भया
त् ४ श्रीभगवानु॰ अयमस्मि महाबाहो ब्रूहि यत्ते विवक्षितं करिष्यामि हि तत्सर्वं यत्त्वं

जन्मतस्य पुण्यादेः धातारं प्रतिभर्तारं परं परेषां विराडादीनां परं श्रेष्ठं ६ निर्माणं रचना जनित्रं जनयिता
र ७ अध्यायः ७१ संजये १ २ मोहदर्पितं यस्य अनुयुंक्ष्महे प्रार्थयामहे ३ ४ ५॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. टी. १२५

६ विहृतांतरः प्रकाशितभावः ७ ८ कृपणाश्रतात्तवर्यया ९ स्याताम्यामस्पतिनः अस्माकं तस्मिन्व
त्वद्दृष्टोवर्षसंराज्यंगृहीतेनयस्मिन् नेयहास्मनन्यकृवंतोवयं १० ॥ मातरंसंविधातुंसम्यक्पोष

युधिष्ठिर उ॰ कृतंतेधृतराष्ट्रस्यसपुत्रस्यचिकीर्षितं एतद्धिसकलंकृष्णसंजयो
मांयदब्रवीत् ६ तन्मतंधृतराष्ट्रस्यसोस्यात्माविवृतांतरः यथोक्तंदूतआचष्टेव
ध्यःस्यादन्यथाब्रुवन् ७ अप्रदानेनराज्यस्यशांतिमस्मासुमार्गति लुब्धःपापे
नमनसाचरन्नसममात्मनः ८ यत्तद्द्वादशवर्षाणिवनेष्वयुषितावयं छद्म
नाशरदंचैकांधृतराष्ट्रस्यशासनात् ९ स्थातानःसमयेतस्मिन्धृतराष्ट्रइतिप्र
भो नाहास्मसमयंकृष्णतद्धिनोब्राह्मणाविदुः १० गृद्धोराजाधृतराष्ट्रःस्वधर्मंना
नुपश्यति वश्यत्वात्पुत्रगृद्धित्वात्मदस्यान्वेतिशासनं ११ सुयोधनमतेतिष्ठन्
राजास्मासुजनार्दन मिथ्याचरतिलुब्धःसन्चरन्हितंप्रियमात्मनः १२ इतोदुः
खतरंकिंनुयदहंमातरंततः संविधातुंनशक्नोमिमित्राणांवाजनार्दन १३ ॥

यितुं ततःतत्रस्यामित्यर्थः मित्राणांकर्मणिषष्ठी मातुरितिपाठेऽपिततोऽन्येषांवणिक्प्रभृतीनांना
गरिकाणांपरित्यागेपिमातरंमित्राणिचविदुरादीनिसंविधातुमितिप्राग्वत् १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

काशिभिः राजभिः नाथेन नाथवता भवदनुग्रहात् शक्रेणापीत्यर्थः १४ अवसीयते संस्थीयते अस्मिन्निति अवसा
नं यावज्जीविकं वा मस्थानं १५ नः अस्माकं कृते भारता भरतवंश्याः भीष्मादयः मानं सन्मानं प्रापित १६ ता

काशिभिश्चेदिपांचालैर्मत्स्यैश्च मधुसूदन भवता चैव नाथेन पंच ग्रामा वृता मया १४
अविस्थलं वृकस्थलं माकंदी वारणावतं अवसानं च गोविंद किंचिदेवात्र पंचमं १५
पंच नस्तात दीयंतां ग्रामा वा नगराणि च वसेम सहिता येषु मा च नो भारता नशन् १६
न च तानपि दुष्टात्मा धार्तराष्ट्रोऽनुमन्यते स्वाम्यमात्मनि मत्वासावतो दुःखतरं नु किं
१७ कुले जातस्य वृद्धस्य परवित्तेषु गृध्यतः लोभः प्रज्ञानमाहंति प्रज्ञा हंति हता ह्रियं
१८ ह्रीर्हता बाधते धर्मं धर्मो हंति हतः श्रियं श्रीर्हता पुरुषं हंति पुरुषस्याधनं वधः
१९ अधनाद्धि निवर्तंते ज्ञातयः सुहृदो द्विजाः अपुष्पादफलाद्वृक्षाद्यथा तात पतत्रि
णः २० एतच्च मरणं तात यदस्मात्पतितादिव ज्ञातयो विनिवर्तंते प्रेतसत्वादिवा
सवः २१ नातः पापीयसीं कांचिदवस्थां शंबरोऽब्रवीत् यत्र नैवाद्य न प्रातर्भोजनं प्र
तिदृश्यते २२ धनमाहुः परं धर्मं धने सर्वं प्रतिष्ठितं जीवंति धनिनो लोके मृता ये
त्वधना नराः ये धनादपकर्षंति नरं स्वबलमास्थिताः ते धर्ममर्थं कामं च प्रमथ्नंति नरं

नपि भारतानपि १७ कुले इति द्वाभ्यां गर्वजादोषसंततिरुक्ता १८ १९ द्विजा अर्थिनः २० प्रेतसत्वात् प्रग
तबुद्धेर्मृतादित्यर्थः २१ २२ धर्मं धर्मकारणं सर्वयज्ञदानादि येऽधनास्ते मृता एव २३ ॥

म०३०
टी०
१०६

एतेनिर्धनतायांएकेनागरिकाः ग्रामायकेग्राममवासार्थंवनायास्मदादयः नाशायमरणाय १७ आपत्स्वदा
थमाह श्रियोविनाशइतितद्विश्रीर्हि १८ धर्म्मदेहस्यभावात्तस्मिन्नतदारिद्र्यायपरायजेमरणे तच्छा
स्वांतेग्रविनीतमित्यर्थः समंतात्सर्वत्रअपरिहार्यमितिशेषः नास्त्येतिनातिक्रामति १९ २९ ततासंप

एतामवस्थांप्राप्यकेमरणंवव्रिरेजनाः ग्रामायैकेवनायैकेनाशायैकेप्रवव्रजुः उन्मा
दमेकेपुष्यंतियांत्यन्येद्विषतांवशं दास्यमेकेचगच्छंतिपरेषामर्थहेतवे २६ आपदेवा
स्यमरणात्पुरुषस्यगरीयसी श्रियोविनाशस्तद्धस्यनिमित्तंधर्मकामयोः २७ यदस्यधर्म्यं
मरणंशाश्वतंलोकवर्त्मवत् समंतात्सर्वभूतानांनतदत्येतिकश्चन २८ नतथाबा
ध्यतेकृष्णप्रकृत्यानिर्धनोजनः यथाभद्रांश्रियंप्राप्यतयाहीनः सुखैधितः २९ स
तदात्मापराधेनसंप्राप्तोव्यसनंमहत् सेंद्रान्गर्हयतेदेवान्नात्मानंचकथंचन ३०
नचास्यसर्वशास्त्राणिप्रभवंतिनिवर्हणे सोभिक्रुध्यतिभृत्यानांसुहृदश्चाभ्यसूयति
३१ तंतदामन्युरेवैतिसभूयः संप्रमुह्यति समोहवशमापन्नः क्रूरंकर्मनिषेवते ३२ पा
पकर्मतयाचैवसंकरंतेनपुष्यति संकरोनरकायैवसाकाष्ठापापकर्मणां ३३ नचे
त्प्रबुध्यतेकृष्णनरकायैवगच्छति तस्यप्रबोधः प्रज्ञैवप्रज्ञाचक्षुस्तरिष्यति ३४ ॥

कालेआत्मापराधेनचित्तदोषेणरागादिना नात्मानंचेत्यस्यतन्नात्मानमित्यर्थः ३० अस्यव्यसनस्यनिवर्ह
णेनाशनिमित्तं ३१ ततदासर्वदेत्यर्थः मन्युः क्रोधः तद्धानेवेत्यर्थः मुह्यतिकार्याकार्यंनजानाति ३२ एवं
श्रियापुरुषाणांनरकप्राप्तिमुक्त्वातेषांउद्धारोपायमाह तस्येति तस्यश्रीमतः अविद्ययानिद्राणस्यप्रज्ञावि

वेकः स एव प्रबोधो जागरणं यतः उमान्तरिष्यति अविद्यामितिशेषः ३४ ॥

तत्र लोकक्रममाह अह्रीकेति धर्मे करोतीति शेषः तस्य धर्मस्य ह्रीः कार्यकारणान्निवृत्तिहेतुः चेतोवृत्तिविशे
षः ह्रीहीनेन कृतो धर्मोऽप्यधर्म एवेति भावः ३५।३६ अह्रीकः तिर्यक् तिर्यक् स्थावरतुल्यो न मनुष्य इ
त्यर्थः ३८।३९ इदं ह्रीमत्त्वं तेन त्वया मयि दृष्टं ४० अत्र श्रीनिमित्तं नः अस्माकं ४१ प्रथमः कल्पः मुख्यः प

प्रज्ञालाभे हि पुरुषः शास्त्राण्येवान्ववेक्षते शास्त्रनिष्ठः पुनर्धर्मं तस्य ह्रीरंगमुत्तमं ३५
ह्रीमान्हि पापं प्रद्वेष्टि तस्य श्रीरभिवर्धते श्रीमान्स यावद्भवति तावद्भवति पूरुषः
३६ धर्मनित्यः प्रशान्तात्मा कार्ययोगवहः सदा नाधर्मे कुरुते बुद्धिं न च पापे प्रवर्तते
३७ अह्रीको वा विमूढो वा नैव स्त्री न पुनः पुमान् नास्याधिकारो धर्मेऽस्ति यथा शूद्र
स्तथैव सः ३८ ह्रीमानवति देवांश्च पितॄनात्मानमेव च तेनामृतत्वं व्रजति सा का।
ष्ठा पुण्यकर्मणां ३९ तदिदं मयि ते दृष्टं प्रत्यक्षं मधुसूदन यथा राज्यात्परिभ्रष्टा वसा
मि वसतीरिमाः ४० ते वयं न श्रियं हातुमलं न्यायेन केनचित् अत्र नो यतमानानां व
धश्चेदपि साधु तत् ४१ यथा राज्यात्परिभ्रष्टा वसामि वसतीरिमाः प्रशान्ताः समभूता
श्रियं तामश्नवामहि ४२ तत्रैषा परमा काष्ठा रौद्रकर्मक्षयोदया यद्वयं कौरवान्
हत्वा तानि राष्ट्राण्यवाप्नुमः ४३ ये पुनः स्युरसंबद्धा अनार्याः कुरुशत्रवः तेषामप्यव

वध्या
तः समभूताः निर्वैरत्वं गताः ४२ रौद्रकर्म रौद्रकर्मणामल्पं स्वल्पमिति संमत्याश्चुल्लकं क्षयोदया
त्ययपूर्वक उदयो यस्यां सा रौद्रकर्मणां परमा काष्ठेति संबंधः ४३ असंबद्धाः अबांधवाः अवध्यः व
धविरुद्धं पालनं ते ईदृशा इति बांधवा आर्या अपूज्य च वध्ययेते तेषामवधः कार्य इति किमाश्चर्यमित्यर्थः ४४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰
टी॰
१२८

तदेवाह ज्ञातयइति भूयिष्टाः अतिमहान्तः ४५ ४६ कपालं भिक्षापात्रं ४७ यथा येन प्रकारेण आगतः
फलपरंपरया प्राप्तः तं पश्येति योजना ४८ बलमिति नीतिमेव बलं कृत्वा युध्यतोस्य जयपराजयौ च
आत्मच्छंदेन न स्वेच्छया न भवतः तथा तद्वत् भूतानां जीवितं मरणं च स्वेच्छया न स्तः ४९ ५०-५१ परा

ज्ञातयश्चैव भूयिष्ठाः सहाया गुरवश्च नः तेषां वधोतिपापीयान् किं नु युद्धेस्ति शोभ
नं ४५ पापः क्षत्रियधर्मोयं वयं च क्षत्रबंधवः स नः स्वधर्मोऽधर्मो वा वृत्तिरन्या विगर्हि
ता ४६ शूद्रः करोति शुश्रूषां वैश्या वै पण्यजीविकां वयं वधेन जीवामः कपालं ब्राह्म
णैर्वृतं ४७ क्षत्रियान् क्षत्रियो हंति मत्स्यो मत्स्येन जीवति श्वा श्वानं हंति दाशार्ह पश्य
धर्मो यथागतः ४८ युद्धे कृष्ण कलिर्नित्यं प्राणाः सीदंति संयुगे बलं तु नीतिमाधाय यु
ध्ये जयपराजयौ ४९ नात्मच्छंदेन भूतानां जीवितं मरणं तथा नाप्यकाले सुखं प्राप्यं
दुःखं वापि यदूत्तम ५० एकोह्यपि बहून् हंति घ्नंत्येकं बहवोप्युत शूरं कापुरुषो हं
ति अयशस्वी यशस्विनं ५१ जयो नैवोभयोर्दृष्टो नोभयोश्च पराजयः तथैवापचयो
दृष्टो व्यपयाने क्षयव्ययौ ५२ सर्वथा वृजिनं युद्धं को घ्नन्न प्रतिहन्यते हतस्य च हृषी
केश समौ जयपराजयौ ५३ पराजयश्च मरणान्मन्ये नैव विशिष्यते यस्य स्याद्विजयः
कृष्ण तस्याप्यपचयो ध्रुवं ५४ अंततो दयितं घ्नंति केचिदप्यपरे जनाः तस्यांगबलही

जयभयात् व्यपयाने पलायनेपि अपचयः क्षयव्ययौ च दृष्टौ भवत एव अपचयो दीनता क्षयो मर
णं तत्र हेतुः व्ययः द्रव्यादेर्नाशः ५२ ५३ विजयोप्यपचयः पराजय एव इष्टजननाशादिमात् यस्ये

नस्यैवज्ञान्मात्रनपश्यतः ५५ ॥

ति ५४ दृष्यितेवज्ञादिहेयंगबलहीनस्यजातिबलहीनस्य ५५ ॥

१८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४६ यवीयान् कनिष्ठः अनुशयः पश्चात्तापः ५७ अनुबंधो दोषोन्यः सचापापः कष्टतरः शोषः शोषोः शो
षस्तस्य ५८ ६० अनिर्वृतेन स्वप्तव्यं न ६१ अतएव ते यतः अंतरे छिद्रे नित्यं अपरिहार्यं अतो हेतोः अंत
नः अंततोऽन्यथा स्वस्य परस्य वा नाशं विना शांतिर्नास्ति अयं दोषः नाशाख्यः ६४ अंततः कृत्स्नेनसा

निर्वेदो जीविते कस्य सर्वतश्चोपजायते येप्येवधीरा ह्रीमंत आर्याः करुणवेदिनः
५६ तएव युद्धं हत्वंते यवीयान्मुच्यते जनः हत्वाप्यनुशयो नित्यं परानपि जनार्दन
न ५७ अनुबंधश्च पापोत्र शेषश्चाप्यवशिष्यते शेषो हि बलमासाद्य न शेषमनुशे
षयेत् ५८ सर्वोच्छेदे च यतते वैरस्यांतविधित्सया तयोर्वैरं प्रसृजति दुःखमास्ते
पराजितः ५९ सुखं प्रशांतः स्वपिति हित्वा जयपराजयौ जातवैरश्च पुरुषो दुःखं
स्वपिति नित्यदा ६० अनिर्वृतेन मनसा ससर्प इव वेश्मनि उत्सादयति यः सर्वं य
शसा स विमुच्यते ६१ अकीर्तिं सर्वभूतेषु शाश्वतीं स नियच्छति न हि वैराणि शा
म्यंति दीर्घकालेधृतान्यपि ६२ आख्यातारश्च विद्यंते पुमांश्चेद्विद्यते कुले न चापि
वैरं वैरेण केशव व्युपशाम्यति ६३ हविषाग्निर्यथा कृष्ण भूय एवाभिवर्द्धते अतो
न्यथा नास्ति शांतिर्नित्यमंतरमंततः अंतरं लिप्समानानामयं दोषो निरंतरः ६४ पौरुषे
यो हि बलवानाधिर्हृदयबाधनः तस्य त्यागेन वा शांतिर्मरणेनापि वा भवेत् ६५ अथवा मू

चष्टपौरुषेय इति सार्द्धेन द्विषतां मूलघातेन फलनिर्वृतिः निष्कंटकराज्यप्राप्तिः इत्यादीनां स्यात् तावा
ताचन्यपासनंतरं न भवेत्तत्र शं स तत भवेदेवेत्यर्थः अतः शम एव श्रेयानिति भावः ५६ ६६ ॥

म॰ उ॰ त्यागेनराज्यस्येतिशेषः तद्धतेराज्यंविनाहिद्विषतांसंश्रयात् शत्रवःछिद्रंप्रहरिष्यंतिउतउपेतांकरिष्यंतीत्येवंर
टी॰ पात् आत्मनः भ्रष्टश्रीकस्यसमयः समुच्छेदात् नाशसंभवात् अतोराज्यत्यागोनयुक्त इतिभावः ६६ सिद्धा
१२८ तमाह नचेति ६७ सर्वथासामदानभेदैः राज्यार्थंयतमानानां युद्धंप्रसिद्धंअवश्यकर्तव्यमित्यर्थः नत
अपराक्रमःक्लीवत्वंयुक्तमितिशेषः ६८ दारुणंयुद्धंतच्छुनामिवनिंद्यमित्यर्थः ६९ दृष्टांतविवृणो

यात्त्यागेननृपशांतिःस्यात्हत्वैवयदुत्तमः संश्रयाच्चसमुच्छेदाद्द्विषतामात्मनस्तथा ६६
नचत्यक्तुंनेच्छामोनचेच्छामःकुलक्षयं अत्रयाप्रणिपातेनशांतिःसैवगरीयसी
६७ सर्वथायतमानानामयुद्धमभिकांक्षतां सांत्वेप्रतिहतेयुद्धंप्रसिद्धंनापराक्रमः
६८ प्रतिघातेनसांत्वस्यदारुणंसंप्रवर्तते तच्छुनामिवसंपातेपंडितैरुपलक्षितं
६९ लांगूलचालनंक्ष्वेडःप्रतिवाचोविवर्तनं दंतदर्शनमारावस्ततोयुद्धंप्रवर्तते ७०
तत्रयोबलवान्कृष्णजित्वासोत्तितदामिषं एवमेवमनुष्येषुविशेषोनास्तिकश्च
न ७१ सर्वथात्वेतदुचितंदुर्बलेषुबलीयसां अनादरोविरोधश्चप्रणिपातीहिदुर्बलः
७२ पितावराजाचवृद्धश्चसर्वथामानमर्हति तस्मान्मान्यश्चपूज्यश्चधृतराष्ट्रोजनार्द
न ७३ ॥

तिलांगूलेति अत्रलांगूलेनध्वजउपमीयते क्ष्वेडःध्वनिःकौटिल्यंपरस्परछि
द्रान्वेषणंच प्रतिवाचःपरस्परनिंदास्वप्रशंसाच विवर्तनंभूमौलुठनं दंतदर्शनंमुखव्या
दानेनआरावःभषणंपलेसिंहनादः ७१ ७२ सर्वथेति अनादरोराज्यभ्रंशः युद्धेकुलक्षयः
प्रणिपातेतदौर्बल्यप्रसिद्धिः ७२ अंत्यःपतोपिनमस्यतीत्याह पितेतिद्वाभ्यां ७३ ॥ १२८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रहास्यति न स्वीकरिष्यति ७४ ८५ तेन वत्सं वंधयति निममयि चेत् कुरु कृतं ते प्रसांप्रतं प्रयुक्तं वधयं वा दिस्व वर्तेतन्

पुत्रस्नेहस्य बलवान् धृतराष्ट्रस्य माधव स पुत्रवशमापन्नः प्रणिपातं प्रहास्यति ७४
तत्र किं मन्यसे कृष्ण प्राप्तकालमनंतरं कथमर्थाच्च धर्माच्च न हीयेमहि माधव ७५
ईदृशेत्यर्थकृच्छ्रेस्मिन् कमन्यं मधुसूदन उपसंप्रष्टुमर्हामि त्वामृते पुरुषोत्तम ७६
प्रियश्च प्रियकामश्च गतिज्ञः सर्वकर्मणां को हि कृष्णास्ति नस्त्वादृक् सर्वनिश्चयवि
त्सुहृत् ७७ वैशंपायन उ० एवमुक्तः प्रत्युवाच धर्मराजं जनार्दनः उभयोरेव वाम
र्थाय यास्यामि कुरुसंसदं ७८ शमं तत्र लभेयं चेद्युष्मदर्थमहापयन् पुण्यमेस्य
महद्राजंश्चरितं स्यान्महाफलं ७९ मोचयेयं मृत्युपाशात्संरब्धान् कुरुसंजयान्
पांडवान् धार्तराष्ट्रांश्च सर्वां च पृथिवीमिमां ८० युधिष्ठिर उ० न ममैतन्मतं कृष्ण
यत्त्वं यायाः कुरून्प्रति सुयोधनः सूक्तमपि न करिष्यति ते वचः ८१ समेतं पार्थिवं
तत्रेडुर्योधनवशानुगं तेषां मध्यावतरणं तव कृष्ण न रोचये ८२ न हि नः प्रीण
येद्द्रव्यं न देवत्वं कुतः सर्वं न च सर्वामरैश्वर्यं तव द्रोहेण माधव ८३ श्रीभगवानुवाच जा
नाम्येतां महाराज धार्तराष्ट्रस्य पापतां अवाच्यास्तु भविष्यामः सर्वलोके महीक्षितां ८४
न चापि मम पर्याप्ताः सहिताः सर्वपार्थिवाः क्रुद्धस्य संयुगे स्थातुं सिंहस्येवेतरे मृगाः ८५
अथ चेत्ते प्रवर्तेरन् मयि किंचिदसांप्रतं निर्द

॥ ७६ [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰
टी॰
१२९

१० ११ कृष्णनगत्वातथावृद्धेतिशेषः १९ २० २१ यदीति अधर्मेणसांत्वेनः राज्यार्थीहीणांपुंचयामरा
नेनअधर्मेण इतरत् एतेनैवराज्यप्रसादानेष्वहृदस्यादत्तहृदयस्यप्रशमत्वात् यद्यद्धर्मेणेति स

नजातुगमनंपार्थभवेत्तत्रनिरर्थकं अर्थप्राप्तिःकदाचित्स्यादंततोवाप्यवाच्यता
१० युधिष्ठिरउ॰ यत्त्वंरोचयतेकृष्णस्वस्तिप्राप्नुहिकौरवान् कृतार्थस्वस्तिमंतंत्वा
द्रक्ष्यामिपुनरागतं ११ विष्वक्सेनकृष्णगत्वाभारतान्प्रशमयेःप्रभो यथासर्वे
सुमनसःसहस्यामसचेतसः १९ भ्राताचासिसखाचासिवीभत्सोर्ममचप्रि
यः सौहृदेनोविशंकोसिस्वस्तिप्राप्नुहिभूतये २० अस्मान्वेत्थपरान्वेत्थवेत्था
र्थान्वेत्थभाषितुं यद्यदस्मद्धितंकृष्णतत्तद्वाच्यःसुयोधनः २१ यद्यधर्मेणसंयुक्त
मुपपद्येद्धितंवचः तत्तत्केशवभाषेथाःसांत्वंवायदिवेतरत् २२ इत्युद्योगेभग
वद्याने॰ ७२ श्रीभगवान्॰ संजयस्यश्रुतंवाक्यंभवतश्चश्रुतंमया सर्वंजाना
म्यभिप्रायंतेषांचभवतश्चयः १ नवधर्मोश्रितावुद्धिस्तेषांवैराश्रयामतिः य
द्युद्धेनलभ्येततत्तेबहुमतंभवेत् २ नचैवंनैष्ठिकंकर्मक्षत्रियस्यविशांपते आ
श्रमाश्रमिणःसर्वेनभैक्षंक्षत्रियश्चरेत् ३ ॥ संवेतिचपाठेत्वन्तस्यधर्मसंयुक्तत्वमहिंसा १२९
प्राधान्येनवोध्यं १२ अध्यायः ७२ नैष्ठिकंकर्मयावज्जीवब्रह्मचर्यंपारिव्राज्यंचविहितमितिशेषः ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

कार्पण्यं ग्रामपंचकं देहीति दीनवचनं ४ वृत्तिः जीविका कर्त्तुमिति शेषः ५ अतिगर्द्धाः अत्यंतलुब्धाः ६
पर्यायः उपायः यत् येन बलवत्तां स्वस्येति शेषः ७ अनुक्रोशात् भवत्सु कृपातः कार्पण्यात् स्वस्य दैन्यात्
अलं कर्तुं न समर्थाः ९ निमित्तं अशामे कारणं हे पांडव त्वयि कौपीनं धारयति सति ते कौरवाः नान्वतप्यंत

जयो वधो वा संग्रामे धात्राद्दिष्टः सनातनः स्वधर्मः क्षत्रियस्यैष कार्पण्यं न प्रशस्यते ४
नहि कार्पण्यमास्थाय शक्या वृत्तिर्युधिष्ठिर विक्रमस्व महाबाहो जहि शत्रून् परं
तप ५ अतिगर्द्धाः कृतस्नेहा दीर्घकालं सहोषिताः कृतमित्राः कृतबला धार्त्तराष्ट्राः
परंतप ६ न पर्यायोस्ति यत्साम्यं त्वयि कुर्युर्विशांपते बलवत्तां हि मन्यंते भीष्मद्रो।
णकृपादिभिः ७ यावच्च मार्दवेनैतान् राजन्नुपचरिष्यसि तावदेते हरिष्यंति तव रा
ज्यमरिंदम ८ नानुक्रोशान्न कार्पण्यान्न च धर्मार्थकारणात् अलं कर्तुं धार्त्तराष्ट्रा।
स्तव काममरिंदम ९ एतदेव निमित्तं ते पांडवास्तु यथा त्वयि नान्वतप्यंत कौपीनं
तावत्कृत्वापि दुष्कर १० पितामहस्य द्रोणस्य विदुरस्य च धीमतः ब्राह्मणानां च साधू
नां राज्ञश्च नगरस्य च ११ पश्यतां कुरुमुख्यानां सर्वेषामेव तत्त्वतः दानशीलं मृदुं दा
न्तं धर्मशीलमनुव्रतं १२ यत्त्वां सुपधिना राजन् द्यूते वंचितवांस्तदा न चापत्रपते तेन
नृशंसः स्वेन कर्मणा १३ ॥ पश्चात्तापं न कृतवंतः तावत् वनवासादि १० पितामहादी
न् अनादृत्य उपधिना छलेन त्वां द्यूते वंचितवानिति सार्द्धद्वयसंबंधः २१ २२ २३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ १५ १६ प्रकृतिंपंचतांमयिमत्समीपेनष्टाप्रकृतिःशौर्यादिरूपःस्वभावोयेषां १७ १८ गौरिवसर्वे।

तथाशीलसमाचारोराजन्माप्रणयंकृष्णाः वध्यास्तेसर्वलोकस्यकिंपुनस्तस्वभा
वत १४ वाग्भिस्त्वप्रतिरूपाभिरतुदत्त्वांसहानुज श्लाघमानःप्रहृष्टःसन्भ्रातृभिः
सहभाषते १५ एतावत्पाण्डवानांहिनास्तिकिंचिदिहस्वकं नामधेयंचगोत्रंचत
दप्येषांनशिष्यते १६ कालेनमहताचैषांभविष्यतिपराभवः प्रकृतिंतेभजि
ष्यंतिनष्टप्रकृतयोमयि १७ दुःशासनेनपापेनतदाद्यूतेप्रवर्तिते अनाथवत्त
दादेवीद्रौपदीसुदुरात्मना १८ आकृष्यकेशेरुदतीसभायांराजसंसदि भीष्मद्रो
णप्रमुखानांगौरितिव्याहृतामुहुः १९ भवतावारिताःसर्वेभ्रातरोभीमविक्रमाः
धर्मपाशनिबद्धाश्चनकिंचित्प्रतिपेदिरे २० एताश्चान्याश्चपरुषावाचःसमम
दीरयन् श्लाघसेज्ञातिमध्येस्मत्वयिप्रव्रजितेवने २१ येतत्रासन्समानीतास्तेदृ
ष्ट्वामामनागसं अश्रुकंठारुदंतश्चसभायामासतेसदा २२ नचैनमभ्यनंदंस्तेरा
जानोब्राह्मणैःसह सर्वेदुर्योधनंतत्रनिंदंतिस्मसभासदः २३ ॥

भाज्येत्युपहासोगौर्गौरिति १९ २० २१ २२ २३ ॥ ~

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२४ २५ ईषत्कार्यः अनायासेनसाध्यः प्रस्कंदेनचक्राकारयावेदिकयाऽङ्गदस्थक्रमे मेमेचाइति विस्मयाप
स्कंदादिनाम्नः प्रस्कंदेनेतिपाठेमध्यमशिष्ययेतिशंवः २६ २७ २८ द्विधाभावःअयंसाधुरसाधुर्वे

कुलीनस्यचयानिंदावधोवामित्रकर्षण महागुणोवधोराजन्ननतुनिंदाकुजीवि
का २४ तदैवनिहतोराजायदैवनिरपत्रपः निंदितश्चमहाराजपृथिव्यांसर्व
राजभिः २५ ईषत्कार्योवधस्तस्ययस्यचारित्रमीदृशं प्रस्कंदेनप्रतीतस्यच्छिन्नम
लइवद्रुमः २६ वध्यःसर्पइवानार्यःसर्वलोकस्यदुर्मतिः नह्येनंत्वममित्रघ्नमाराज
न्नुविचिकित्सथाः २७ सर्वथात्वत्क्षमंचैतद्रोचतेचममानघ यत्त्वंपितरिभीष्मेचप्रणि
पातंसमाचरेः २८ अहंतुसर्वलोकस्यगत्वाछेत्स्यामिसंशयं येषामस्तिद्विधाभा
वोराजन्दुर्योधनेप्रति २९ मध्येराज्ञामहंतत्रप्रातिपौरुषिकान्गुणान् तवसं
कीर्तयिष्यामियेचतस्यव्यतिक्रमाः ३० ब्रुवतस्तत्रमेवाक्यंधर्मार्थसहितंहितं नि
शम्यपार्थिवाःसर्वेनानाजनपदेश्वराः ३१ त्वयिसंप्रतिपत्स्यंतेधर्मात्मासत्यवा
गिति तस्मिंश्चाधिगमिष्यंतियथालोभादवर्तत ३२ गर्हयिष्यामिचैवैनंपौरजा
नपदेष्वपि वृद्धबालानुपादायचातुर्वर्ण्यंसमागते ३३ ॥

तिसंशयः २९ प्रातिपौरुषिकान्सर्वपुरुषसाधारणान् ३१ ३२ ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.३.
टी.
१८१

हतेनिंद्यतयानष्टप्राये ३४ यात्वागत्वा ३६ निशम्यआलोच्य ३० ३१ नोचेदिहांतकोनुशमःस्यादिहैव।
तत्स्मादितिशेषः यंत्रंगोलकोन्त्वेपणकवचानिवर्माणिमुपास्त्रलगिरिन्त्वपोऽग्रदेशाःनोनपाठे

शमंवैयाचमानस्त्वंनाथर्मंतत्वलप्स्यते कुरून्विगर्हयिष्यंतिधृतराष्ट्रंचपा।
र्थिवाः ३४ तस्मिँल्लोकपरित्यक्तेकिंकार्यमवशिष्यते हतेदुर्योधनेराजन्मद्
न्यात्क्रियतामिति ३५ यात्वाचाहंकुरून्सर्वान्युष्मदर्थमहापयन् यतिष्येप्रशम
कर्तुंलब्ध्यिष्येचवेष्टितं ३६ कौरवाणांप्रवृत्तिंचगत्वायुष्मास्विकारिका निशम्य
वितिवर्तिष्येजयायतवभारत ३७ सर्वथायुद्धमेवाहमाशंसामिपरैःसह निमि
त्तानिहिसर्वाणितथाप्रादुर्भवंतिमे ३८ मृगाःशकुंताश्चवदंतिघोरंहस्त्यश्वमु।
ख्येषुनिशामुखेषु घोराणिरूपाणितथैववाग्निर्वर्णान्बहून्पुष्यतिघोररूपान्
३९ मनुष्यलोकक्षयकृत्सुघोरोनोचेदनुप्रामःहांतकःस्यात् शस्त्राणियंत्रंक
वचारथांश्चनागान्हयांश्चप्रतिपादयित्वा ४० योधाश्चसर्वेकृतनिश्चयास्ते
भवंतहस्त्यश्वरथेषुयत्ताः सांग्रामिकंतेयदुपार्जनीयंसर्वंसमग्रंकुरुतन्नरेंद्र ४१
दुर्योधनोनस्थलमप्यदातुंजीवन्स्तवैतन्नृपतेकथंचित् यत्तेपुरस्तादभवत्समृद्धं
द्यूतेहृतंपांडवमुख्यराज्यं ४२ इतिउद्योगपर्वणिभगवद्याने ७२ ॥

पुंस्त्वमार्षंप्रतिपादयित्वासज्जीकृत्य ४० ४१ ४२ इतिअध्यायः ७२ ॥ २८ १८१

म॰उ॰
टी॰
१८२

ज्ञातीन्सगोत्रान्सुहृदः मित्राणि बांधवान् स्यालश्वशुरादीन् ११ पर्यायकालेधर्मान्तकाले १२ १३ १४ १५

अष्टादशेमेराजानः प्रख्याता मधुसूदन येसमुच्छिच्छिदुर्ज्ञातीन्सुहृदश्च सबांधवा
न् ११ असुराणांसमृद्धानांज्वलतामिवतेजसा पर्यायकालेधर्मस्यप्राप्तेकलि
रजायत १२ हैहयानामुदावर्तोनीपानांजनमेजयः बहुलस्तालजंघानांकृमी
णामुद्धतोवसुः १३ अजविंदुःसुवीराणांसुराष्ट्राणांरुषर्द्धिकः अर्कजश्चबली
हानांचीनानांधौतमूलकः १४ हयग्रीवोविदेहानांवरयुश्चमहौजसां बाहुःसुं
दरवंशानांदीप्ताक्षाणांपुरूरवाः १५ सहजश्चेतिमत्स्यानांप्रवीराणांवृषध्वजः
धारणश्चंद्रवत्सानांमुकुटानांविगाहनः १६ समश्चनंदिवेगानामित्येतेकुलपां
सनाः युगांतेकृष्णसंभूताःकुलेकापुरुषाधमाः १७ अप्ययंनःकुरूणांस्याद्युगांते
कालसंभृतः दुर्योधनःकुलांगारोजघन्यःपापपूरुषः १८ तस्मान्मृदुशनैर्ब्रूयाध
र्मार्थसहितंहितं कामानुबंधबहुलंनोग्रमुग्रपराक्रमं १९ अपिदुर्योधनंकृष्णसर्वे
वैवयमधश्चराः नीचैर्भूत्वानुयास्यामोमास्मनोभरतानशन् २० ॥

१६ कामानुबंधबहुलंबाहुल्येनतस्यचित्तानुसारी १९ २० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अशांतिबाधकंभयंतेषांमाकृथाइत्याह यथेति १ महामनास्तब्धःसमाचरेःप्रागपिसमाहितवानसि २

भीमउ॰ यथायथैवशांतिःस्यात्कुरूणांमधुसूदन तथातथैवभाषेथामास्मयुद्धेन
भीषयेः १ अमर्षीजातसंरंभःश्रेयोद्वेषीमहामनाः नोग्रंदुर्योधनोवाच्यःसाम्नैवैनं
समाचरेः २ प्रकृत्यापापसत्वश्चतुल्यचेतास्तुदस्युभिः ऐश्वर्यमदमत्तश्चकृतवैरश्च
पांडवैः ३ अदीर्घदर्शीनिष्ठुरीक्षेप्ताक्रूरपराक्रमः दीर्घमन्युरनेयश्चपापात्मानिकृ
तिप्रियः ४ म्रियेतापिनभज्येतनैवजह्यात्स्वकंमतं तादृशेनशमःकृष्णमन्येपरम
दुष्करः ५ सुहृदामप्यवाचीनस्त्यक्तधर्माप्रियानृतः प्रतिहंत्येवसुहृदांवाचश्चैवम
नांसिच ६ समन्युवशमापन्नःस्वभावंदुष्टमास्थितः स्वभावात्पापमभ्येतितृणैश्छन्न
इवोरगः ७ दुर्योधनोहियच्छीलःसर्वथाविदितस्तव यच्छीलोयत्स्वभावश्चय
द्बलोयत्पराक्रमः ८ पुराप्रसन्नाःकुरवःसहपुत्रास्तथावयं इंद्रज्येष्ठाइवाभूममो
दमानाःसबांधवाः ९ दुर्योधनस्यक्रोधेनभारतामधुसूदन धक्ष्यंतेशिशिरापायेव
नानीवहुताशनैः १० ॥

निष्ठुरीनिष्ठुरवाक्क्षेप्तानिंदकःअनेयःशिक्षयितुमयोग्यः ४ ५ अवाचीनोविपरीतः ६ ७ ८९१०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म. उ.
टी.
१८३

छिन्नयः फलतयक्ततोदोषः ११ १२ प्रशंमतिशमममेवेतिशेषः १२ २ प्रथमायुः ७४ एतत् १ २ ३ ४ द्वा
अस्मिन्वते जनेनब्राह्मणासम हेनतिपसिनयस्मिकालमितिशेषः १ १० ११ शुक्रतेजः निर्मुक्तोसंगतः धुवं

नाःस्मिन्नजनेनरममसेरहः तिपसिपांडव नान्यत्रिशिरिवाचापिकदाविदभिनंदसि ९
अस्माकंस्मयमानश्चारहस्यासेरुदन्निव जात्वामूर्धानमाधायचिरमासेप्रमीलितः १०
ध्रुकुटिंचपुनःकुर्वन्नोष्टोचविदशन्निव अभीतयाहृष्यसेभीमसर्वंतन्मनुकारितं
११ यथापुरस्तात्सविताहृश्यतेशुक्रमुच्चरन् यथाचपश्चान्निर्मुक्तोध्रुवंपर्येतिरश्मिवा
न् १२ तथासर्वंसंप्रवीम्येतन्नास्तितस्यव्यतिक्रमः हेतारहंगदयाभ्येत्यदुर्योधनममर्ष
णं १३ इतिस्ममध्येभ्रातॄणांसत्येनालभसेगदां तस्यतेप्रशमेबुद्धिर्धीयतेद्यपरंतप
१४ अहोयुद्धाभिकांक्षाणांयुद्धकालउपस्थिते चेतांसिविप्रतीपानियत्वांभीर्भीमविं
दति १५ अहोपार्थनिमित्तानिविपरीतानिपश्यसि स्वप्नांतेजागरांतेचतस्मात्प्रशम
मिच्छसि १६ अहोनाशंससेकिंचित्पुंस्त्वंक्लीबवदात्मनि कश्मलेनाभिपन्नोसितेन
तेविकृतंमनः १७ उद्वेपतेतेहृदयंमनस्तेप्रतिसीदति उरुस्तंभगृहीतोसि
तस्मात्प्रशममिच्छसि १८ ॥

निश्चयंपुनःपर्येतिमेरुंपुनःप्रदक्षिणीकरोति १२ नियमेनहंतास्मीतिशेषः १३ १४ १५ निमि
त्तानिमहिषारोहणवामनेत्रस्फुरणादीनिस्वप्नांतेस्वप्नेजागरांतेजागरे १६ १७ १८ ॥ १८३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अनयःफलतयकृतोदोषः २१ २२ प्रशंसतिशममेवेतिशेषः २२ २ अध्यायः ७४ एतत् १ २ ४ फ

अप्युदासीनवृत्तिःस्यायथानःकुरुभिःसह वासुदेवतथाकार्यनकुरूननयःस्पृशेत्
२१ वाच्यःपितामहोवृद्धोयेचकृष्णसभासदः भ्रातृणामस्तुसौभ्रात्रंधार्तराष्ट्रःप्रशा
म्यतां २२ अहमेतद्ब्रवीम्येवंराजाचैवप्रशंसति अर्जुनोनैवयुद्धार्थीभूयसीहिदया
र्जुने २२ इत्युद्योगेभगवद्याने ७४ वैशंपायनउ० एतच्छ्रुत्वामहाबाहुःकेशवःप्रहस
न्निव अभूतपूर्वंभीमस्यमार्दवोपहितंवचः १ गिरेरिवलघुत्वंतच्छीतत्वमिवपाव
के मत्वारामानुजःशौरिःशार्ङ्गधन्वावृकोदरं २ सतेजयंस्तदावाग्भिर्मातरिश्वेव
पावकं उवाचभीमम्मासीनंकृपयाभिपरिप्लुतं ३ श्रीभगवान्‌० त्वमन्यदाभीमसेन
युद्धमेवप्रशंससि वधाभिनंदिनःक्रूरान्धार्तराष्ट्रान्निमर्दिषुः ४ नचस्वपिषिजा
गर्षिनुब्जःशेषेपरंतप घोरामशांतारुषतींसदावाचंप्रभाषसे ५ निश्वसन्नग्निव
त्तेनसंतप्तःस्वेनमन्युना अप्रशांतमनाभीमसधूमइवपावकः ६ एकांतेनिश्वस
न्शेषेभारार्तइवदुर्बलः अपित्वांकेविदुर्न्मत्तंमन्यंतेतद्विदोजनाः ७ आरुह्यवृक्षान्नि
र्मूलान्‌राजःपरिरुजन्निव निघ्नन्पद्भिःक्षितिंभीमतिष्ठन्परिधीवसि ८ ॥

तींरोषवतीं ५ अग्निवत्अग्निनेव ६ ७ आरुज्यभंक्त्वा ८ ॥

म॰उ॰
टी॰
१८९

रोदसीद्यावाभूमी ७ ८ ९ १० ११ १२ १३ संबाधेसंकीर्णे १४ वैशसेविशसनवति १५ १६ ॥

प्रतिवादायविद्धस्तवत्स्यामिबलमात्मनः पश्यपश्यमेरोदसीकुलयपोरामत्रिमाःप्रजाः
७ अचलेचाप्रतिष्ठेचाप्यनंतेसर्वमातरो यदीमेसहसाक्रुद्धेसमेयातांशिलेइव
८ अहमेतेविगृह्णीयांबाहुभ्यांसचराचरे पश्यैतदंतरंबाह्वोर्महापरिघयोरिव
९ यएतन्माप्नुयात्तेनतंपश्यामिपूरुषं हिमवांश्चसमुद्रश्चवज्रीचाबलभि
त्स्वयं १० मयाभिपन्नंत्रायेरन्बलमास्थायनत्रयः युद्धाढ्यान्क्षत्रियान्सर्वान्सा
इवेष्वाततायिनः ११ अधःपादतलेनैतानधिष्ठास्यामिभूतले नहित्वंनाभि
जानासिममविक्रममच्युत १२ यथामयाविनिर्जित्यराजानोवशगाःकृताः
अथचेन्मांनजानासिसूर्यस्येवोद्यतःप्रभो १३ विगाढेयुधिसंबाधेवेत्स्यसेमां
जनार्दन परुषोवाक्क्षिपस्येवव्रणाँश्चमितिवोन्नयन् १४ यथामतिब्रवीम्ये
तद्धिहिमामधिकंततः द्रष्टास्तियुधिसंबाधेप्रवृत्तेवैशसेहति १५ मयाप्रणु
न्नान्मातंगान्रथिनःसादिनस्तथा तथावरानभिक्रुद्धोनिघ्नंतंतत्रियर्षभान्
१६ ॥ १८९

अष्ठीलाफलानांग्रंथीःसाचशाल्मलेःकेवलतूलमयीभवति १९ २० २१ २२ २३ अध्यायः ७५ समाधावत

अनित्यंकिलमर्त्यस्यपार्थिवंतंचलाचलं वातवेगप्रचलिताअष्ठीलाशाल्मलेरि
व १९ तवैषाविकृतावुद्धिर्गोवांवागिवमानुषी मनोसिपाण्डुपुत्राणांमज्जयत्मह
वानिव २० इदंमेमहदाश्चर्यंपर्वतस्येवसर्पणं यदीदृशंप्रभाषेथाभीमसेनास
मंवचः २१ सहदृष्ट्वास्त्वानिकर्माणिकुलेजन्मचभारत उत्तिष्ठस्वविषादंमाकृथावी
रस्थिरोभव २२ नचैतदनुरूपंतेयत्तेग्लानिररिंदम यदोजसानलभतेक्षत्रियोनतद
श्नुते २३ इत्युद्योगेभगवद्याने ७५ वैशंपायनउ॰ तथोक्तोवासुदेवेननित्यमन्यु
मर्षणः सदश्ववत्समाधावद्बभाषेतदनंतरं १ भीमसेनउ॰ अन्यथामांचिकीर्षंतं
मन्यथामन्यसेच्युत प्रणीतभावमत्यर्थंयुधिसत्यपराक्रमः २ वेत्सिदाशार्हसम
मेदीर्घकालंसहोषितः उतवामांनजानासिप्लवन्हृदइवालवे ३ तस्मादनभि
रूपाभिर्वाग्भिर्मांत्वंसमच्छसि कथंहिभीमसेनंमांजानन्कश्चनमाधव ४ ब्रूयाद
प्रतिरूपाणियथामांवक्तुमर्हसि तस्मादिदंप्रवक्ष्यामिवचनंवृष्णिनंदन ५ आत्म
नःपौरुषंचैवबलंचनसमंपरैः सर्वथानार्यकर्मैतत्प्रशंसास्वयमात्मनः ६ ॥

तीक्ष्णांययास्मान्नया १ २ ३ ४ ५ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ.
टी.
१८५

परिदृष्टानिकर्तव्यत्वेनुनिश्चितानिकार्याणि ७ सुनीतंसम्यगनुष्ठितं विरुध्यते निष्फलंक्रियते ८
अकृतंभोगायानारब्धकर्मशापादिकंग्रागामिदुःखंदैवज्ञादिभिरुपदिष्टंतयानिश्चितंसम्ज्ञावपौरु
षेणविहन्यते तेनकाम्यकर्मणामपिफलवत्वमस्येवतिसिद्धं यद्वाअकृतंकालस्वभावजंकर्मग्र
नभूयमानंशीतोत्स्मादितत्पौरुषेणप्रावरणादिसंपादनेननिवार्यतइत्यर्थः ९ यदन्यदिति दि
ष्टःफलभोगायप्राज्जन्मःभावःसत्तायस्यतत् दिष्टभावप्रारब्धकर्मपंचम्यर्थेषष्ठीप्रारब्धादन्यदि
त्यर्थः पुरुषस्यपुरुषेणसंचितंयत्स्वयंकृतंकर्मतस्मादनुपरोधोजन्मांतरेनिरोधोनास्तितज्ज्ञा
नेनप्रायश्चित्तेनवासंचितपापानांनाशोलक्षणंज्ञापकश्रुतिस्मृतिजातंविद्यते क्षीयंतेचास्यक

अन्यथापरिदृष्टानिकविभिर्दोषदर्शिभिः अन्यथापरिवर्तंतेवेगाद्वनभस्वतः ७
सुमंत्रितंसुनीतंचन्यायतश्चोपपादितं कृतंमानुष्यकंकर्मदैवेनापिविरुध्यते
८ दैवमप्यकृतंकर्मपौरुषेणविहन्यते शीतमुष्णंतथावर्षंक्षुत्पिपासेचभारत ९
यदन्यद्दिष्टभावस्यपुरुषस्यस्वयंकृतं तस्मादनुपरोधश्चविद्यतेतत्रलक्षणं १०
लोकस्यनान्यतोवृत्तिःपाण्डवान्यत्रकर्मणः एवंबुद्धिःप्रवर्तेतफलंस्यादुभयान्वये ११

र्माणितस्मिन्दृष्टेपरावरे धर्मेणपापमपनुदति ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथेतिभावः यद्वा
अकृतात्दैवानधीनात्देरन्यत्स्वयंकृतंदैवदेहांतःकरणसंतापहेतुः तस्मादपिउपरोधोदैवेनास्ति
यतस्तत्रापिलक्षणंचिकित्साविवेकहेतुःशास्त्रंप्रवर्तते सर्वंत्वपिपौरुषंकर्तव्यमितिभावः १० एत
देवाहलोकस्येति कर्मणोन्यत्रपौरुषंविनाअन्यतएकस्मात्दैवाद्दैवन्यतिर्जीविकानास्तिएवंबुद्धिः
इहकृतानवान्प्रवर्तेतपुरुषकारंकुर्यात् तथासतिउभयान्वयेदैवपुरुषयोःसंबंधेफलंभवतिना

= ८
ॐ शिवरामरामरामराम
१८५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

७ १८ १९ अध्यायः ७४ विवक्षयानुयासं रूपं वक्तुमितीच्छया प्रागेव तस्य ज्ञातत्वात् १ वेद वेद्मि २ ३ ४
ज्ञातस्तर्हि मां निंदितवानसीत्याशंक्याह जिज्ञासंत इति द्वे वमानुषयोर्धर्मस्य पर्यायमिति संबंधः देव
धर्मस्य भाविनः पुण्यपापफलस्य पर्यायं पर्यंते दैवज्ञादेः सकाशात् जिज्ञासंतो ज्ञातुमिच्छंतोपि न।

दृष्ट्वा मां त्वं च लोकश्च विकर्षंतं चराचरान् न मे सीदंति मज्जानो न ममोद्विपते मनः
१७ सर्वलोकादभिक्रुद्धान्न भयं विद्यते मम १८ किंतु सौहृदमेवैतत्कृपया मधु
सूदन सर्वांस्तितिक्षे संक्लेशान्मास्म नो भरतानशत् १९ इत्युद्योगे भगवद्याने ७३
श्रीभगवानुवाच भावं जिज्ञासमानोहं प्रणयादिदमब्रुवं न चाक्षेपान्न पांडित्यान्न क्रो
धान्न विवक्षया १ वेदाहं तव माहात्म्यमुत ते वेद यद्बलं उत ते वेद कर्माणि न त्वां
परिभवाम्यहं २ यथा चात्मनि कल्याणं संभावयसि पांडव सहस्रगुणमप्येतत्त्वयि
संभावयाम्यहं ३ यादृशे च कुले जन्म सर्वराजाभिपूजिते बंधुभिश्च सुहृद्भिश्च भीम
त्वमसि तादृशः ४ जिज्ञासंतो हि धर्मस्य संदिग्धस्य वृकोदर पर्यायं नाध्यवस्यंति दे
वमानुषयोर्जनाः ५ स एव हेतुर्भूत्वा हि पुरुषस्यार्थसिद्धिषु विनाशेपि स एवास्य
संदिग्धं कर्म पौरुषं ६ ॥ नाध्यवस्यंति न निश्चिन्वंति कदाचिद्दैवज्ञाद्युक्तावपि विसंवाददर्श
नात् तथा मानुषधर्मस्य पुरुषकारस्य पर्यायं बलाबलनिर्णयमिति शेषः वत्स ग्रस्यापि कदाचित्
क्लीवत्वदृष्टेरिति भावः ५ स एव धर्म एव संदिग्धं संदिग्धफलं ६ ॥ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०३ युक्तम् १ दैन्याद्वा अस्मदीयात् २ पराक्रमे सर्वेषां रतो गोपतं कर्माणि जीवन बीजानि शक्नुमाति तदभा
टी० वादलहृदयहितार्थं कृतोपि यत्नो निष्फल इति मत्वा नाशमेवेच्छसीत्यर्थः ३ मंत्रकारणमाह तदिदमि
१९६ ति नहि युद्धेन कामये इति यत्त्वया भाषितं तथा चेन तथापि वनचशक्तोः ऽप्यर्थः यद्यपि ममैतदनिष्टं ता
थापि त्वयाय द्भाषितं न तत्तथैव भविष्यतीत्यर्थः परंतप शमोपि तवनासाध्योस्तीत्याह नचेति ४ एत
त्तच्च युद्धसंकटं मन्यसे गीकरोषि अस्माकं कुरुपाण्डवानां शमासंभवाद्युद्धमिच्छसीत्याह कुर्वंती
ति येषां पुंसां फलोदयो नास्ति तेषां कर्माणि क्रियमाणान्यपि साम्यादीनि कुर्वंति कुएवंति हिंसेति

अर्जुन उ० युक्तं युधिष्ठिरेणाय यावद्वाच्यं जनार्दन नववाक्यं तमे श्रुत्वा शतिभाति प
रंतप १ नैव शमं मम त्वं मन्यसे सत्कर्ते प्रभो लोभाद्वा यत्तरां श्रमदैन्याद्वा समुपस्थि
तात् २ अफलं मन्यसे वापि पुरुषस्य पराक्रमं न चांतरेण कर्माणि पौरुषेणाबलोद
यः ३ तदिदं भाषितं वाक्यं तथा च न तथैव तत् न चैतदेवं द्रष्टव्यमसाध्यमपि किंच
न ४ किं चैतन्मन्यसे कृच्छ्रमस्माकमवसादकं कुर्वंति तेषां कर्माणि येषां नास्ति फलो
दयः ५ संपाद्यमाने सम्यक्च स्यात्कर्म सफलं प्रभो स तथा कृत्स्नं वर्तस्व यथा शर्म भवेद्ध

कुहिंसायामित्यस्य स्वादिगणस्थस्य रूपं तनादित्वमस्यार्षं लेवेकप्रमादजं वा चतुर्थोपायसाध्ये तदि
पोसां त्वमय क्रियेत्यभियुक्तोक्ते जीवनाहृष्टाभावाद् इहैकसाध्येषु कुरुषु सांत्व प्रयोगी इष्कर इत्यर्थः
५ एवं जानन्नपि सामैव चेन्मन्यसे तत्राह संपेति यत्कर्म सम्यक् संपाद्यमानं भवेत् तत्फलं स्या
दिति संबधः प्रभो इत्यनेन असाध्यसाधनसामर्थ्यमस्य दर्शयति फलितमाह सइति ६ ॥ १९६

॥ श्री ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

यइति यथाकर्षकःकर्मकृत्वादैवानुकूल्यात्फलंलब्ध्वापिनहृष्यति अनाकस्मिकत्वात्फलस्यदैवप्रा
तिकूल्याद्दलब्ध्वापिनव्यथते अनुचितस्याकरणात् तद्वद्वयापित्वेयमित्याशयः १२ तत्रेकृते योजय
ति तत्रेति अनुमात्राःवधारणंनिश्चयइत्यर्थः मात्रंकार्त्स्न्येवधारणे इतिकोशः लिंगव्यत्ययआर्षः

यएवंकृतबुद्धिःसन्कर्मस्वेवप्रवर्तते नासिद्धौव्यथतेतस्यनसिद्धौहर्षमश्नुते १२
तत्रेयमनुमात्रामेभीमसेनविवक्षिता नैकांतसिद्धिर्वक्तव्याशत्रुभिःसहसंयुगे
१३ नातिप्रहीणरश्मिःस्यात्तथाभावविपर्यये विषादमर्छेद्ग्लानिंवाएतदर्थंब्रवी
मिते १४ श्वोभूतेधृतराष्ट्रस्यसमीपंप्राप्यपांडव यतिष्येप्रशमंकर्तुंयुष्मदर्थमहा
पयन् शमंचेत्तेकरिष्यंतिततोनंतंयशोमम भवतांचकृतःकामस्तेषांचश्रेयउ
त्तमं १६ तेचेदभिनिवेक्ष्यंतोनाभ्युपैष्यंतिमेवचः कुरवोयुद्धमेवात्रघोरंकर्मभविष्य
ति १७ अस्मिन्युद्धेभीमसेनत्वयिभारःसमाहितः धूरर्जुनेनधार्यास्याद्वोढव्यइतरो
जनः १८ अहंहियंताबीभत्सोर्भवितासंयुगेसति धनंजयस्यैषकामोनहियुद्धंनका
मये १९ तस्मादाशंकमानोहंवृकोदरमतितव गदतःक्लीबयावाचातेजस्तेसमदीप
यं २० इत्युद्योगेभागवद्याने ७५ ॥

१३ प्रहीणरश्मिःनिष्प्रभःअर्छेत्प्राप्नुयात् १४ १५
तेकुरवइतिसंबंधः १७ अस्मिन्निति रथोपमोभीमःअश्वोपमोर्जुनःअहमिति युद्धकामोप्यहं
अर्जुनप्रीत्यैसारथ्यंकरिष्यामीत्यर्थः १९ २० इत्युद्योगेवासुदेववाक्ये अध्यायः ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰
टी॰
१८७

नामनिश्चितंसपांडवेष्वसमध्यवर्तितेतिबुद्धिर्मेनसंजायतेनोत्पद्यते १८ १९ अध्यायः ३८ एव १ द्वयोःकर्मणोः
श्रामयुद्धयोर्मध्येऽस्य अनामयंसर्वंकृत्स्नंममहत्समापन्नंअधीनंततथापिदेवानुकूलमन्नायेदितमि
त्याह क्षेत्रमिति कर्मणाकर्षणेनवाप्यादिजलदानेनचसुष्ठुभूदोषहीनेरसवदाईचउपपादितं

जानातिह्रियथ्येतेनद्रौपदीपापबुद्धिना परिक्लिष्टासभामध्येतच्चतस्योपमर्षितं
१७ सनामसमध्यवर्ततपांडवेष्विति माधव नमेसंजायतेबुद्धिर्बीजमुप्तमिवोषरे १८
तस्माद्यन्मन्यसेयुक्तंपांडवानांहितंचयत् तदाशुकुरुवार्ष्णेययन्नःकार्यमनंतरं १९
इतिउद्योगेभगवद्याने॰ ३८ श्रीभगवान्॰ एवमेतन्महाबाहोयथावदसिपांडव
पांडवानांकुरूणांचप्रतिपत्स्येनिरामय १ सर्वंत्विदंसमापन्नंबीभत्सोकर्मणो
र्द्वयोः क्षेत्रेहिरसवत्कृष्टंकर्मणैवोपपादितं २ ऋतेवर्षान्नकौंतेयजातुनिर्व
र्तयेत्फलं तत्रवैपौरुषंकुर्युरासेकंयत्नकारितं ३ तत्रचापिध्रुवंपश्येच्छोष
णंदैवकारितं तदिदंनिश्चितंबुध्यापूर्वैरपिमहात्मभिः ४ दैवेचमानुषेचैव
संयुक्तंलोककारणं अहंहितत्करिष्यामिपरंपुरुषकारतः ५ ॥

कृतंतत्रकदाचिद्वर्षंविनापिफलप्रदंभवेत् २ अत्रकेवलंपौरुषेयस्यैवश्रेयस्त्वंदृष्टमित्याह
तत्रेति ३ एतदपिदैवाधीनमेवेत्याह तत्रचापीति शोषणंवाप्यादेःसर्वथावृष्ट्यभावेयथा
नफलनिष्पत्तिस्तद्वद्दैवाभावेपीत्यर्थः ४ संयुक्तंग्राहितंलोककारणंलोकहितसाधनं ५ १८७

निरामयं कपाले ८ कार्यतां श्रोविशेषं कार्यं कर्मशर्वेति ९ कस्मात्सत्सवहारतोभेदात्मनभेदमुक्तातन्त्रमाह।
विचार्यमाणाइतिगुरुः उपदेष्टाप्राणस्यप्राणमुतचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रंमनसोयेमनोविदुरिति
निविकर्त्वंब्रह्मपुराणमग्र्यमितिश्रुतेरस्मन्मनसोपिमनस्त्वंश्रुतस्त्वयःकामःसएवास्मत्कामस्य

पांडवानां कुरूणां च भवान्नः प्रथमः सुहृत् सर्वाणामस्माणां च यथावीरप्रजापतिः
७ कुरूणांपांडवानांचप्रतियत्त्वंनिरामयं अस्महितमनुष्ठानेमन्येतवनंदुष्कर ८
एवंचकार्यतामेतिकार्यंतवजनार्दन गमनादेवमेतत्वंकरिष्यसिजनार्दन विकी
र्षितमथान्येतेतस्मिन्वीरदुरात्मनि भविष्यतिचतत्सर्वंयथातवचिकीर्षितं धर्म
तैःसहपांडवानोस्त्वंतववाप्यच्चिकीर्षितं ९ विचार्यमाणोयःकामस्तवकृष्णसनीगुरुः
नमन्नाहेतिदुष्टात्मावधमस्तुतबांधवः १० येनधर्मसुतेदृष्टानसाश्रीरुपमर्षिता य
ज्ञाप्यपश्चपतेपायंधर्मिष्टंमधुसूदन ११ उपायेनन्नृशंसेनहृताद्यूतदेविना कथं
हिपुरुषोजातःक्षत्रियेषुधनुर्धरः १२ समाहूतोनिवर्तेतप्राणत्यागेप्युपस्थिते अ
धर्मेणजितान्दृष्ट्वावनेप्रव्रजितांस्तथा १३ वध्यतांममवार्ष्णेयनिर्गतोसौसुयोधनः
नचैतदद्भुतंकृष्णमित्रार्थेयच्चिकीर्षसि १४ क्रियाकथंचमुख्यास्यात्मृदुनावेतरेण
वा अथवामन्यसेज्यायान्वधस्तेषामनंतरं तदेवक्रियतामाशुनविचार्यमतस्त्वया

प्रवर्तकइतिभावः वस्तुतस्तुतवैवकामोयुक्तइत्याह मसत्यादिना १० ॥ धर्मिष्टंयुद्धादिकंहृताश्रीः १२
समाहूतोद्यूतार्थे १३ निर्गतःनिश्चयेनप्राप्तः १४ कथंचकथमपिमुख्याफलवतीमृदुनासाम्नाइत

स्त्रीपर्व पत्रं २१

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰ टी॰ श्रीगणेशायनमः गतेभगवतिव्यासेइत्यादिस्त्रीपर्वतत्रप्रथमोध्यायोव्याख्यातप्रायःगते २२ विगताश्च।
१ नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ जनमेजयउवाच
गतेभगवतिव्यासेधृतराष्ट्रोमहीपतिः किमचेष्टतविप्रर्षेतन्मेव्याख्यातुमर्हसि १ तथैवकौर
वोराजाधर्मपुत्रोमहामनाः कृपप्रभृतयश्चैवकिमकुर्वततेत्रयः २ अश्वत्थाम्नःश्रुतंकर्मशा।
पश्चान्योन्यकारितः वृत्तांतमुत्तरंब्रूहियदभाषतसंजयः ३ वैशंपायनउ॰ हतेदुर्योधनेचैवहतेसै
न्येचसर्वशः संजयोविगतप्रज्ञोधृतराष्ट्रमुपस्थितः ४ संजयउ॰ आगम्यनानादेशेभ्योनानाजनप
देश्वराः पितृलोकंगताराजन्सर्वेतवसुतैःसह ५ याच्यमानेनसततंतेनवपुत्रेणभारत घातिता
पृथिवीसर्वावैरस्यांतंविधित्सता ६ पुत्राणामथपौत्राणांपितृणांचमहीपते आनुपूर्व्येणसर्वेषांप्रेत।
कार्याणिकारय ७ वैशंपा॰ तच्छ्रुत्वावचनंघोरंसंजयस्यमहीपतिः गतासुरिवनिश्चेष्टोन्यपतत्पृथिवीत
ले ८ तंशयानमुपागम्यपृथिव्यांपृथिवीपतिं विदुरःसर्वधर्मज्ञइदंवचनमब्रवीत् ९ उत्तिष्ठराजन्किंशेषे
माशुचोभरतर्षभ एषावैसर्वसत्वानांनरेश्वरपरागतिः अभावादीनिभूतानिभावमध्यानिभारत
अभावनिधनान्येवतत्रकापरिदेवना ११ नशोचन्मृतमन्वेतिनशोचन्म्रियतेनरः एवंसांसिद्धिकेलो
केकिमर्थमनुशोचसि १२ अयुध्यमानोम्रियतेयुध्यमानश्चजीवति कालंप्राप्यमहाराजनकश्चिद
तिवर्तते १३ कालःकर्षतिभूतानिसर्वाणिविविधान्युत नकालस्यप्रियःकश्चिन्नद्वेष्यःकुरुसत्तम १४
यथावायुस्तृणाग्राणिसंवर्तयतिसर्वतः तथाकालवशंयांतिभूतानिभरतर्षभ १५ ॥ शाखामदत्तेरि॰

१० आचक्षे कथयामि २१ २२ कार्येष्ववश्यंपकर्तव्यंउदकदानादि २३ प्रथमोध्यायः ॥
एकसार्थप्रयातानां सर्वेषां तत्रगामिनां यस्य कालः प्रयात्यग्रे तत्र का परिदेवना १९ यो अपि निहता यु
द्धे राजेंस्त्वमनुशोचसि अशोच्याहि महात्मानः सर्वे ते त्रिदिवं गताः २० न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न
विद्यया तथा स्वर्गमुपायान्ति यथा शूरास्तनुत्यजः २१ सर्वे वेदविदः शूराः सर्वे च चरितव्रताः सर्वे चा
भिमुखाः क्षीणास्तत्र का परिदेवना २२ शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः हूयमानान् शरांश्चै
व सेहुरुत्तमपूरुषाः २३ एवं राजेंस्तवाचक्षे स्वर्ग्यं पंथानमुत्तमं न युद्धादधिकं किंचित् क्षत्रियाणां
च विद्यते २४ क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः आशिषं परमां प्राप्ता न शोच्याः सर्वए
व हि २५ आत्मनात्मानमाश्वास्य मा शुचः पुरुषर्षभ नाद्य शोकाभिभूतस्त्वं कार्यमुत्स्रष्टुमर्हसि
२६ इति महाभारते स्त्रीपर्वणि वैशं॰ विदुरस्य तु तद्वाक्यं श्रुत्वा तु पुरुषर्षभः युज्यतां यानमित्युक्त्वा पुनर्व
चनमब्रवीत् १ शीघ्रमानय गांधारीं सर्वाश्च भरतस्त्रियः वधूं कुंतीमुपादाय याश्चान्यास्तत्र योषितः
२ एवमुक्त्वा स धर्मात्मा विदुरं धर्मवित्तमं शोकविप्रहतज्ञानो यानमेवान्वपद्यत ३ गांधारी पुत्रशो
कार्त्ता भर्तुर्वचनचोदिता सह कुंत्या यतो राजा सह स्त्रीभिरुपाद्रवत् ४ ताः समासाद्य राजानं भृशं शोक
समन्विताः आमंत्र्यान्योन्यमीयुः स्म भृशमुच्चुक्रुशुस्ततः ५ ताः समाश्वासयत् क्षत्ता ताभ्य आर्ततरः स्व
यं अश्रुकंठीः समारोप्य ततो सौ निर्ययौ पुरात् ६ ततः प्रणादः संजज्ञे सर्वेषु कुरुवेश्मसु आकुमारं
वनत्सर्वमभवच्छोककर्षितं ७ अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि पृथक्जनेन दृश्यंते तास्तदा नि

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री·१०· ९ किशोरीणांमृगशावकानां किशोरीमृगशावक इति मेदिनीसङ्गणोनस्यशिलाभृमो ॥ ॥
२ प्रकीर्णकेशान्सुशुभान्भूषणान्यवमुच्य च एकवस्त्रधरा नार्यः परिपेतुरनाथवत् ९ श्वेतपर्वतरू
पेभ्यो गृहेभ्यस्तास्त्वपाक्रमन् गुहाभ्य इव शैलानां पृषत्यो हतयूथपाः १० तान्युदीर्णानि नारीणां तदा
वृन्दान्यनेकशः शोकार्तान्यद्रवन्राजन्किशोरीणामिवाङ्गणे ११ प्रगृह्य बाहून्क्रोशन्त्यः पुत्रान्भ्रा
तॄन्पितॄनपि दर्शयन्तीव ता ह स्म युगान्ते लोकसंक्षयं १२ विलपन्त्यो रुदन्त्यश्च धावमानास्ततस्ततः
शोकेनाभ्याहतज्ञानाः कर्तव्यं न प्रजज्ञिरे १३ व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः एकव
स्त्रा निर्लज्जाः श्वश्रूणां पुरतोऽभवन् १४ परस्परं सुसूक्ष्मेषु शोकेष्वाश्वासयंस्तदा ताः शोकविह्व
ला राजन्नन्ववेक्षन्त परस्परं १५ ताभिः परिवृतो राजा रुदतीभिः सहस्रशः निर्ययौ नगराद्दीनस्तू
र्णमायोधनं प्रति १६ शिल्पिनो वणिजो वैश्याः सर्वकर्मोपजीविनः ते पार्थिवं पुरस्कृत्य निर्ययुर्न
गराद्बहिः १७ तासां विक्रोशमानानामार्तानां कुरुसंक्षये प्रादुरासीन्महाञ्छब्दो व्यथयन्भुवनान्यु
त १८ युगान्तकाले संप्राप्ते भूतानां दह्यतामिव अभावः स्यादयं प्राप्त इति भूतानि मेनिरे १९ भृशमुद्वि
ग्नमनसस्ते पौराः कुरुसंक्षये प्राक्रोशन्त महाराज स्वनुरक्तास्तदा भृशं २० इति स्त्रीपर्वणि ९ वैशं० क्रो
शमात्रं ततो गत्वा ददृशुस्तान्महारथान् शारद्वतं कृपं द्रौणिं कृतवर्माणमेव च १ ते तु दृष्ट्वैव राजानं प्रज्ञा
चक्षुषमीश्वरं अश्रुकण्ठा विनिःश्वस्य रुदन्तमिदमब्रुवन् २ पुत्रस्तव महाराज कृत्वा कर्म सुदुष्करं
गतः सानुचरो राजन्शक्रलोकं महीपते ३ दुर्योधनबलान्मुक्ता वयमेव त्रयो रथाः सर्वमन्यत् २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विदितां ते समं ते भरतर्षभ ४ इत्येवमुक्त्वा राजानं कृपः शारद्वतस्ततः गांधारीं पुत्रशोकार्तामिदं वचनमब्रवीत् ५
अभीता युध्यमानास्ते घ्नतः शत्रुगणान् बहून् वीरकर्माणि कुर्वाणाः पुत्रास्ते निधनं गताः ६ ध्रुवं संप्राप्य लो-
कांस्ते निर्मलान् शस्त्रनिर्जितान् भास्वरं देहमास्थाय विचरंत्यमरा इव ७ नहि कश्चिद्धि शूराणां युध्यमानः
पराङ्मुखः शस्त्रेण निधनं प्राप्तो नच कश्चित् कृतांजलिः ८ एवं तां क्षत्रियस्याहुः पुराणाः परमां गतिं शस्त्रेण
निधनं संख्ये तन्न शोचितुमर्हसि ९ नचापि शत्रवस्तेषां मृध्यंते राज्ञि पांडवाः शृणु यत् कृतमस्माभिरश्व-
त्थामपुरोगमैः १० अधर्मेण हतं श्रुत्वा भीमसेनेन ते सुतं सुप्तं शिबिरमाविश्य पांडूनां कदनं कृतं ११ पां-
चालाः निहताः सर्वे धृष्टद्युम्नपुरोगमाः द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः १२ तथा विशस-
नं कृत्वा पुत्रशत्रुगणस्य ते प्राद्रवाम रणे स्थातुं नहि शक्यामहे त्रयः १३ तेहि शूरा महेष्वासाः क्षिप्रमे-
ष्यंति पांडवाः अमर्षवशमापन्ना वैरं प्रतिजिहीर्षवः १४ ते हतानात्मजान् श्रुत्वा प्रमत्तान् पुरुषर्षभाः ।
निरीक्षंतः पदं शूराः क्षिप्रमेव यशस्विनि १५ तेषां तु कदनं कृत्वा संस्थातुं नोत्सहामहे अनुजानीहि नो
राज्ञि मा च शोके मनः कृथाः १६ राजंस्त्वमनुजानीहि धैर्यमातिष्ठ चोत्तमं दिष्टांतं पश्य चापि त्वं क्षात्रं धर्मं
च केवलं १७ इत्येवमुक्त्वा राजानं कृत्वा चाभिप्रदक्षिणं कृपश्च कृतवर्मा च द्रोणपुत्रश्च भारत १८ अवे-
क्षमाणा राजानं धृतराष्ट्रं मनीषिणं गंगामनु महात्मानस्तूर्णमश्वानचोदयन् १९ अपक्रम्य तु ते रा-
जन् सर्व एव महारथाः आमंत्र्यान्योन्यमुद्विग्नास्त्रिधा ते प्रययुस्तदा २० जगाम हास्तिनपुरं कृपः शारद्व-
तस्तदा स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्व्यासाश्रमं ययौ २१ एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परं भयार्त्ताः पां-
डुपुत्राणामागस्कृत्वा महात्मनां २२ समेत्य वीरा राजानं तदा त्वनुदिते रवौ विप्रजग्मुर्महाराज यथेच्छकमरिंदमाः २३

॥ ३९ ॥ [illegible] ९ ३९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰ टी॰ ३

तदनंतरं २४ अध्यायः हतेषु १५ कृपाचार्यकृतवर्मभ्यां वियोगानंतरं प्रियाप्रियैः पांडवानां प्रियाः अभिमन्युप्रभृतयः अप्रियाः दुर्योध

समासाद्याथ वै द्रौणिं पांडुपुत्रा महारथाः अजयंस्ते रणे राजन् विक्रम्य तदनंतरं २४ इति स्त्रीपर्वणि ॥ वैशं॰ हते
षु सर्वसैन्येषु धर्मराजो युधिष्ठिरः शुश्रुवे पितरं वृद्धं निर्यातं नागसाह्वयात् १ सोभ्ययात्पुत्रशोकार्त्तः पुत्रशोकप
रिप्लुतं शोचमानं महाराजं भ्रातृभिः सहितस्तदा २ अन्वीयमानो वीरेण दाशार्हेण महात्मना युयुधा
नेन च तथा तथैव च युयुत्सुना ३ तमन्वयात्सुदुःखार्त्ता द्रौपदी शोककर्षिता सह पांचालयोषिद्भि
र्यास्तत्रासन्समागताः ४ स गंगामनु वृंदानि स्त्रीणां भरतसत्तम कुररीणामिवार्त्तानां क्रोशंतीनां द
दर्श च ५ ताभिः परिवृतो राजा क्रोशंतीभिः सहस्रशः ऊर्ध्वबाहुभिरार्त्ताभी रुदंतीभिः प्रियाप्रियैः ६
क्व नु धर्मज्ञता राज्ञः क्व नु साद्यानृशंसता यच्चावधीत्पितॄन्भ्रातॄन्गुरून्पुत्रान्सखीनपि ७ घातयित्वा
कथं द्रोणं भीष्मं चापि पितामहं मनस्तेभून्महाराज हत्वा चापि जयद्रथं ८ किं नु राज्येन ते कार्यं पितॄ
न्भ्रातॄनपश्यतः अभिमन्युं च दुर्धर्षं द्रौपदेयांश्च भारत ९ अतीत्य ता महाबाहुः क्रोशंतीः कुररीरिव व
वंदे पितरं ज्येष्ठं धर्मराजो युधिष्ठिरः १० ततोभिवाद्य पितरं धर्मेणामित्रकर्षणाः न्यवेदयंत नामानि पां
डवास्तेपि सर्वशः ११ तमात्मजांतकरणं पिता पुत्रवधार्दितः अप्रीयमाणः शोकार्त्तः पांडवं परिषस्व
जे १२ धर्मराजं परिष्वज्य सांत्वयित्वा च भारत दुष्टात्मा भीममन्विच्छन् दिधक्षुरिव पावकः १३ स कोपपा
वकस्तस्य शोकवायुसमीरितः भीमसेनमयं दावं दिधक्षुरिव दृश्यते १४ तस्य संकल्पमाज्ञाय भीमं प्रत्य
शुभं हरिः भीममाक्षिप्य पाणिभ्यां प्रददौ भीममायसं १५ प्रागेव तु महाबुद्धिर्बुद्ध्वा तस्येंगितं हरिः संविधानं
महाप्राज्ञस्तत्र चक्रे जनार्दनः १६ तं तु गृहीत्वा च पाणिभ्यां भीमसेनमयस्मयं बभंज बलवान्राजा मन्यमानो

नादयः तैर्हतैः ताभिः क्रोशंतीभिरिति संबंधः ६ १४ आक्षिप्य निवार्य आयसं लोहमयं १५ संविधाने आयसस्य भीमस्य निर्माणं १६, २० ॥ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१६ प्रवेति धर्मादपकृष्टं तमालिंगनच्छलेन भीमवधः कर्तव्य इत्याशयः १७ स्नेकादेशाग्रहताग्रपिनजी
नागायुतबलप्राणः स राजा भीममायसं भंक्त्वा विमथितोरस्कः सुस्राव रुधिरं मुखात् १८ ततः पपात
मेदिन्यां तथैव रुधिरोक्षितः प्रपुष्पिताग्रशिखरः पारिजात इव द्रुमः १९ प्रत्यगृह्णाच्च तं विद्वान् सूतो
गावल्गणिस्तदा मैवमित्यब्रवीच्चैनं शमयन्सान्त्वयन्निव २० स तु कोपं समुत्सृज्य गतमन्युर्महाम
नाः हाहा भीमेति चुक्रोश नृपः शोकसमन्वितः २१ तं विदित्वा गतक्रोधं भीमसेनवधार्दितं वासुदे
वो वरः पुंसामिदं वचनमब्रवीत् २२ मा शुचो धृतराष्ट्र त्वं नैष भीमस्त्वया हतः आयसी प्रतिमा ह्ये
षा त्वया राजन्निपातिता २३ त्वां क्रोधवशमापन्नं विदित्वा भरतर्षभ मयापकृष्टः कौंतेयो मृत्यो
र्दंष्ट्रांतरं गतः २४ न हि ते राजशार्दूल बले तुल्योस्ति कश्चन कः सहेत महाबाहो बाह्वोर्विग्रहणं न
रः २५ यथांतकमनुप्राप्य जीवन्कश्चिन्न मुच्यते एवं बाह्वंतरं प्राप्य तव जीवेन्न कश्चन २६ तस्मात्पु
त्रेण या ते सौ प्रतिमा कारितायसी भीमस्य सेयं कौरव्य तवैवोपहृता मया २७ पुत्रशोकाभिसंत
प्तं धर्मादपकृतं मनः तव राजेंद्र तेन त्वं भीमसेनं जिघांससि २८ न त्वेतत्ते क्षमं राजन् हन्यास्त्वं य
द्वृकोदरं न हि पुत्रा महाराज जीवेयुस्ते कथंचन २९ तस्माद्यत्कृतमस्माभिर्मन्यमानैः क्षमं प्रति अनु
मन्यस्व तत्सर्वं मा च शोके मनः कृथाः ३० इति श्रीमहाभारते स्त्रीपर्वणि वैशंपायन उवाच तत
वेषुः गतासुषां तेषां निमित्तं तेषामपि नाशावश्यंभावादिति भावः २९ १२ अध्यायः ततः १२३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नतत्कृथाः तन्नकृतवानसि ग्रद्भावआर्षः ४ ९ श्रेयोहिताहितेचउच्यमानोनगृह्णीतस्त्वनघः १०

एनमुपातिष्ठन्शौचार्थंपरिचारकाः कृतशौचंपुनश्चैनंप्रोवाचमधुसूदनः १ राजन्नधीतावेदा
स्तेशास्त्राणिविविधानिच श्रुतानिचपुराणानिराजधर्माश्चकेवलाः २ एवंविद्वान्महाप्राज्ञःस
मर्थःसन्बलाबले आत्मापराधात्कस्मात्त्वंकुरुषेकोपमीदृशं ३ उक्तवांस्त्वांतदैवाहंभीष्म
द्रोणौचभारत विदुरःसंजयश्चैवंत्वंराजन्नतत्कृथाः ४ सवार्यमाणोनास्माकमकार्षीर्वचनं
तदा पांडवानधिकाञ्ज्ञात्वाबलेशौर्येचकौरव ५ राजाहियःस्थिरप्रज्ञःस्वयंदोषानवेक्षते देश
कालविभागंचपरंश्रेयःसविंदति ६ उच्यमानस्तुयःश्रेयोगृह्णीतेनोहिताहिते आपदःसमनु
प्राप्यसशोचत्यनयेस्थितः ७ ततोन्यवृत्तमात्मानंसमवेक्षस्वभारत राजंस्त्वंह्यविधेयात्मादुर्यो
धनवशेस्थितः ८ आत्मापराधादापन्नस्तत्किंभीमंजिघांससि तस्मात्संयच्छकोपंत्वंस्वमनुस्मृत्य
दुष्कृतं ९ यस्तुतांस्पर्द्धयाक्षुद्रःपांचालीमानयत्सभां सहतोभीमसेनेनवैरंप्रतिजिहीर्षता १०
आत्मनोतिक्रमंपश्यपुत्रस्यचदुरात्मनः यदनागसिपांडूनांपरित्यागःपरंतप ११ वैशं० एवमुक्त
स्तुकृष्णेनसर्वंसत्यंजनाधिप उवाचदेवकीपुत्रंधृतराष्ट्रोमहीपतिः १२ एवमेतन्महाबाहोय
थावदसिमाधव पुत्रस्नेहस्तुधर्मात्मन्धैर्यान्मांसमचालयत् १३ दिष्ट्यातुपुरुषव्याघ्रोबलवा
न्सत्यविक्रमः त्वद्गुप्तोनागमत्कृष्णभीमोबाह्वंतरंमम १४ ॥ अनागसिअपराधाभावेपिपरित्यागोराज्याप्रदानेन तिरस्कारः ११ १२ अध्यायः ५८१५ ॥

९ एतत्तवचः पांडवान्प्रशान्तमयतंवाक्यं १९ नचास्मृतां तामितिपाठेस्मर्यतेनेंद्रयोधनेनतोषमाणायाः अ
श्चदानींत्वहमेकाग्रागतमन्युर्गतज्वरः मध्यमंपांडवंवीरंस्प्रष्टुमिच्छामिकेशव १५ हतेषुपार्थिवें
द्रेषुपुत्रेषुनिहतेषुवै पांडुपुत्रेषुवेशर्मप्रीतिश्चाप्यवतिष्ठति १६ ततः सभीमंचधनंजयंचमा
द्रीसुपुत्रौपुरुषप्रवीरौ पस्पर्शगात्रैःप्ररुदन्सुगात्रानाश्वास्यकल्याणमुवाचचैतान् १७ इतिम
हाभारतेस्त्रीपर्वणि १४ वैशं० धृतराष्ट्राभ्यनुज्ञातास्ततस्तेकुरुपुंगवाः अभ्ययुर्भ्रातरः सर्वेगां
धारींसहकेशवाः १ ततोज्ञात्वाहतामित्रंधर्मराजंयुधिष्ठिरं गांधारीपुत्रशोकार्ताशप्तुमैच्छदनिंदिता २
तस्याःपापमभिप्रायंविदित्वापांडवान्प्रति ऋषिः सत्यवतीपुत्रःप्रागेवसमबुध्यत ३ सगंगायामुपस्पृ
श्यपुण्यगंधिपयःशुचिः तंदेशमुपसंपेदेपरमर्षिर्मनोजवः ४ दिव्येनचक्षुषापश्यन्मनसानुगतेन
नच सर्वप्राणभृतांभावंसतत्रसमबुध्यत ५ सस्नुषामब्रवीत्कालेकल्यवादीमहातपाः शापका
लमवाक्षिप्यशमकालमुदीरयन् ६ नकोपःपांडवेकार्योगांधारिशममाप्नुहि वचोनिगृह्यता
मेतत्शृणुचेदंवचोमम ७ उक्तास्यष्टादशाहानिपुत्रेणजयमिच्छता शिवमाशास्वमेमातर्युध्य
मानस्यशत्रुभिः सात्वयायाच्यमानात्वंकालेकालेजयैषिणा उक्तवत्यसिगांधारियतोधर्मस्ततोज
यः ९ नचाप्यतीतांगांधारिवाचंतेवितथामहं स्मरामिभाषमाणायास्तथाप्रणिहिताह्यसि १० ॥

श्रीर्वचनेनतोषयंत्यास्तेनवतांतांवाचं वितथांनस्मरामीत्यन्वयः १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰ री
५

२ कृतमानाः कृताहंकाराः ४ २१ अध्यायः तच्छ्रुत्वा १ २ ३ ४ ५ ॥

विग्रहे तुमुले राजंस्तां गत्वा पारमसंशयं निर्जितं पांडुपुत्रैर्युद्धे नूनं धर्मस्ततोधिकः क्षमाशीला पुराभूत्वा
सांप्रतं न क्षमसे कथं अधर्मं जहि धर्मज्ञे यतो धर्मस्ततो जयः १२ स्वं च धर्मं परिस्मृत्य वाचं चोक्तां मन
स्विनि कोपं संयच्छ गांधारि मैवं भूः सत्यवादिनि १३ गांधार्युवाच भगवन्नाभ्यसूयामि नैतानिच्छा
मि नश्यतः पुत्रशोकेन तु बलान्मनो विह्वलतीव मे १४ यथैव कुंत्या कौंतेया रक्षितव्यास्तथा म
या तथैव धृतराष्ट्रेण रक्षितव्या मया यथा १५ दुर्योधनापराधेन शकुनेः सौबलस्य च कर्णदुः
शासनाभ्यां च कृतोयं कुरुसंक्षयः १६ नापराध्यति बीभत्सुर्न च पार्थो वृकोदरः नकुलः सहदे
वो वा नैव जातु युधिष्ठिरः १७ युध्यमाना हि कौरव्याः कृन्तमानाः परस्परं निहताः सहितास्त्वन्ये
स्तत्र नास्त्यप्रियं मम १८ किं तु कर्माकरोद्भीमो वासुदेवस्य पश्यतः दुर्योधनं समाहूय गदायुद्धे म
हामनाः १९ शिक्षयाभ्यधिकं ज्ञात्वा चरंतं बहुधा रणे अधो नाभ्याः प्रहृतवान्तन्मे कोपमवर्धय
त् २० कथं नु धर्मं धर्मज्ञैः समुद्दिष्टं महात्मभिः त्यजेयुराहवे शूराः प्राणहेतोः कथंचन २१ इति
स्त्रीपर्वणि १४ वैशं॰ तच्छ्रुत्वा वचनं तस्या भीमसेनोथ भीतवत् गांधारीं प्रत्युवाचेदं वचः सानु
नयं तदा १ अधर्मो यदि वा धर्मस्त्रासात्तत्र मया कृतः आत्मानं त्रातुकामेन तन्मे त्वं क्षंतुमर्हसि २
न हि धर्मेण पुत्रस्ते पातितो मौ महाबलः शक्यः केनचिदुद्यंतुमतो विषममाचरं ३ ॥ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५ उक्तवान्नहितेपतयःसंतीत्यादि ६ असंगृह्यग्रनुपसंहृत्य ० १९ वृषसेनेनकर्णपुत्रेण १० अन्यो
मेन्यस्यकोवशिष्टोयंगदायुद्धेनवीर्यवान् मांहत्वानहरेद्राज्यमितिचैतत्कृतंमया ४ अधर्मेणजितःपू
र्वंतेनचापियुधिष्ठिरः निकृताश्चसदैवास्मततोविषममाचरं ५ राजपुत्रींचपांचालीमेकवस्त्रांरज
स्वलां भवत्याविदितंसर्वमुक्तवान्यत्सुतस्तव ६ दुर्योधनमसंगृह्यनशक्याभूःससागरा केवला
भोक्तुमस्माभिरतश्चैतत्कृतंमया तच्चाप्यप्रियमस्माकंपुत्रस्तेसमुदाचरत् द्रौपद्यायत्सभामध्येस
व्यमूरुमदर्शयत् ८ तत्रैववध्यःसोस्माकंदुराचारश्चतेसुतः धर्मराजाज्ञयाचैवस्थिताःस्मसमये
तदा ९ वैरमुद्दीपितंराज्ञिपुत्रेणतवतन्महत् क्लेशिताश्चवनेनित्यंततएतत्कृतंमया १० वैरस्या
स्यगतःपारंहत्वादुर्योधनंरणे राज्यंयुधिष्ठिरःप्राप्तोवयंचगतमन्यवः ११ गांधार्युवाच नैतस्यैषवध।
स्तातयत्प्रशंससिमेसुतं कृतवांश्चापितत्सर्वंयदिदंभाषसेमयि १२ हताश्वेनकुलेयत्तुवृषसेने
नभारत अपिबःशोणितंसंख्येदुःशासनशरीरजं १३ सद्भिर्विगर्हितंघोरमनार्यजनसेवितं क्रू
रंकर्माकरोस्तस्मात्तदयुक्तंवृकोदर १४ भीमसेनउवाच अन्यस्यापिनपातव्यंरुधिरंकिंपुनःस्वकं
यथैवात्मातथाभ्राताविशेषोनास्तिकश्चन १५ रुधिरंनव्यतिक्रामद्दंतोष्ठादंबमाशुचः वैवस्वतस्तु
तद्वेदहस्तौमेरुधिरोक्षितौ १६ हताश्वंनकुलंदृष्ट्वावृषसेनेनसंयुगे भ्रातॄणांसंप्रहृष्टानांत्रासःसंजनि
तोमया १७ केशपक्षपरामर्शेद्रौपद्याद्यूतकारिते क्रोधाद्यदब्रुवंचाहंतच्चमेहृदिवर्तते १८ ॥ ३३ ॥

ष्ठात्अधरोष्ठादुपरिनगतमित्यर्थः दंतोष्ठादितिपाठः १८ ॥

स्त्री.ते.
६

१६ कंचितकमपिनशेषयेः शेषमेकमपिनरक्षितवानसि १७ नवर्जितावपकालेनत्यक्ता १८ १९ कृत
त्वद्धर्मच्युतोराज्ञि भवेयं शाश्वतीः समाः प्रतिज्ञां तामनिस्तीर्य ततस्तत्कृतवानहं १९ नमामर्हसिगां
धारिदोषेणपरिशंकितुं अनिगृह्यपुरापुत्रानस्मास्वनपराधिषु अधुनाकिंनुदोषेणपरिशंकितु
मर्हसि २० गांधार्युवाच वृद्धस्यास्यशतंपुत्रान्घ्नंस्त्वमपराजितः कस्मान्नशेषयेः कंचिद्येनाल्पमप
राधितं २१ संतानमावयोस्तातवृद्धयोर्हृतराज्ययोः कथमंधद्वयस्यास्ययष्टिरेकानवर्जिता २२ शेषे
ह्यवस्थितेतातपुत्राणामंतकेत्वयि नमेदुःखंभवेदेतद्यदित्वंधर्ममाचरेः २३ वैशंपायनउ० एवमु
क्त्वातुगांधारीयुधिष्ठिरमपृच्छत क्वसराजेतिसक्रोधापुत्रपौत्रवधार्दिता २४ तामभ्यगच्छद्राजेंद्रो
वेपमानःकृतांजलिः युधिष्ठिरस्त्विदंचैनांमधुरंवाक्यमब्रवीत् २५ पुत्रहंतानृशंसोहंतवदेवियु
धिष्ठिरः शापार्हःपृथिवीनाशेहेतुभूतःशपस्वमां २६ नहिमेजीवितेनार्थोनराज्येनधनेनवा
तादृशान्सुहृदोहत्वामूढस्यास्यसुहृद्द्रुहः २७ तमेवंवादिनंभीतंसंनिकर्षगतंतदा नोवाचकिं
चिद्गांधारीनिश्वासपरमाभृशं २८ तस्यावनतदेहस्यपादयोर्निपतिष्यतः युधिष्ठिरस्यनृपतेर्ध
र्मज्ञादीर्घदर्शिनी २९ अंगुल्यग्राणिददृशेदेवीपट्टांतरेणसा ततःसकुनखीभूतोदर्शनीयन
खोनृपः ३० तंदृष्ट्वाचार्जुनोगच्छद्वासुदेवस्यपृष्ठतः एवंसंचेष्टमानांस्तानितश्चेतश्चभारत ३१ गां
धारीविगतक्रोधासांत्वयामासमातृवत् तयातेसमनुज्ञातामातरंवीरमातरम् ३२ ॥

९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अभ्यगच्छंतसहिताः पृथां पृथुलवक्षसः चिरस्य दृष्ट्वा पुत्रान्सा पुत्राधिभिरभिप्लुता १३ वाष्पमाहारय
द्देवी वस्त्रेणावृत्य वै मुखं ततो वाष्पं समुत्सृज्य सह पुत्रेण वै यथा १४ अपश्यदेतान्शस्त्रौघैर्बहुधा
परिविक्षतान् सा तानेकैकशः पुत्रान् संस्पृशंती पुनः पुनः १५ अन्वशोचत दुःखार्त्ता द्रौपदीं च हता
त्मजां रुदंतीमथ पांचालीं ददर्श पतितां भुवि १६ द्रौपद्युवाच आर्ये पुत्राः क्व ते सर्वे सौभद्रसहिताग
ताः न त्वां तेद्याभिगच्छंति चिरं दृष्ट्वा तपस्विनीं १७ किं नु राज्येन वै कार्यं विहीनायाः सुतैर्मम तां समा
श्वासयामास पृथा पृथुललोचना १८ उत्थाप्य याज्ञसेनीं तु रुदंतीं शोककर्षितां तयैव सहिता चा
पि पुत्रैरनुगता पृथा १९ अभ्यगच्छत गांधारीमार्त्तामार्त्ततरा स्वयं तामुवाचाथ गांधारी सह वध्वा यश
स्विनीं २० मैवं पुत्रीति दुःखार्त्ता पश्य मामपि दुःखितां मन्ये लोकविनाशोयं कालपर्यायचोदितः
२१ अवश्यभावी संप्राप्तः स्वभावाल्लोमहर्षणः इदं तत्समनुप्राप्तं विदुरस्य वचो महत् असिद्धानुन
ये कृष्णे यदुवाच महामतिः तस्मिन्नपरिहार्येर्थे व्यतीते च विशेषतः २२ मा शुचो न हि शोच्यास्ते सं
ग्रामे निधनं गताः यथैव त्वं तथैवाहं को वा मां साश्वासयिष्यति २३ ममैव ह्यपराधेन कुलमग्र्यं वि
नाशितं २४ इति स्त्रीपर्वणि १५ वैशं० एवमुक्त्वा तु गांधारी कुरूणामवकर्त्तनं अपश्यत्तत्र तिष्ठंती
दृष्टा दिव्येन चक्षुषा १ पतिव्रता महाभागा समानव्रतचारिणी उग्रेण तपसा युक्ता सततं ब्रह्मचारिणी

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वरदानेनकृष्णस्यमहर्षेःपुण्यकर्मणः दिव्यज्ञानबलोपेताविविधंपर्यदेवयत् ३ ददर्शसाबुद्धिमती
दूरादेवयथांतिके रणाजिरंनृवीराणामद्भुतंलोमहर्षणं अस्थिकेशपरिस्तीर्णंशोणितौघपरि॰
प्लुतं शरीरैर्बहुसाहस्रैर्विनिकीर्णंसमंततः ५ गजाश्वरथयोधानामावृतंरुधिराविलैः शरीरैरशि
रस्कैश्चविदेहैश्चशिरोगणैः ६ गजाश्वनरवीराणांनिःसत्वैरभिसंवृतं सृगालबककाकोलकं
ककाकनिषेवितं ७ रक्षसांपुरुषादानांमोदनंकुररांकुलं अशिवाभिःशिवाभिश्चनादितंगृध्र
सेवितं ८ ततोव्यासाभ्यनुज्ञातोधृतराष्ट्रोमहीपतिः पांडुपुत्राश्चतेसर्वेयुधिष्ठिरपुरोगमाः ९
वासुदेवंपुरस्कृत्यहतबंधुंचपार्थिवं कुरुस्त्रियःसमासाद्यजग्मुरायोधनंप्रति १० समासाद्यकु
रुक्षेत्रंताःस्त्रियोनिहतेश्वराः अपश्यंतहतांस्तत्रभ्रातॄन्पुत्रान्पितॄन्पतीन् ११ क्रव्याद्भिर्भक्ष
माणान्वैगोमायुबलवायसैः भूतैःपिशाचैरक्षोभिर्विविधैश्चनिशाचरैः १२ रुद्राक्रीडनिभंदृ
ष्ट्वातदाविशसनंस्त्रियः महार्हेभ्योथयानेभ्योविक्रोशंत्योनिपेतिरे १३ अदृष्टपूर्वंपश्यंत्योदुःखार्ता
भरतस्त्रियः शरीरेष्वस्खलन्नन्यान्यपतंश्चापराभुवि १४ श्रांतानांचाप्यनाथानांनासीत्काचनचे
तना पांचालकुरुयोषाणांकृपणंतदभून्महत् १५ दुःखोपहतचित्ताभिःसमंतादनुनादितं दृष्ट्वायो
धनमत्युग्रंधर्मज्ञासुबलात्मजा १६ ततःसापुंडरीकाक्षमामंत्र्यपुरुषोत्तमं कुरूणांवैशसंदृष्ट्वादुःखाद्व
चनमब्रवीत् १७ पश्यैताःपुंडरीकाक्षस्नुषामेनिहतेश्वराः प्रकीर्णकेशाःक्रोशंतीःकुररीरिवमाधव १८ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पंचालानां भक्तानां पृथिव्यादीनां कुरुपंचालवधात् कृत्स्नं पंचभौतिकं जगन्नष्टमिति भावः १८ ॥
अमृष्यत्वभिसमागम्य समंततो भरतर्षभान् पृथग्गेवाभ्यधावंत्यः पुत्रान्भ्रातॄन्पितॄन्पतीन् १९ वीरा
सूभिर्महाबाहो हतपुत्राभिरावृतं क्वचिच्च वीरपत्नीभिर्हतवीराभिरावृतं २० शोभितं पुरुषव्याघ्रैर्भी
ष्मकर्णाभिमन्युभिः द्रोणद्रुपदशल्यैश्च ज्वलद्भिरिव पावकैः २१ कांचनैः कवचैर्दिव्यैर्मणिभिश्च
महात्मनां अंगदैर्हस्तकेयूरैः स्रग्भिश्च समलंकृतं २२ वीरबाहुनिसृष्टाभिः शक्तिभिः परिघैरपि
खड्गैश्च विविधैस्तीक्ष्णैः सशरैश्च शरासनैः २३ क्रव्यादसंघैः सहितैस्तिष्ठद्भिर्विविधैः क्वचित् क्व
चिदाक्रीडमानैश्च शयानैरपरैः क्वचित् २४ एतदेवंविधं वीर संपश्यणायोधनं विभो पश्यमाना
दह्यामि शोकेनाहं जनार्दन २५ पंचालानां कुरूणां च विनाशं मधुसूदन पंचानामपि भूतानाम
हं वधमचिंतयं २६ तान्सुपर्णाश्च गृध्राश्च विकर्षंत्यसृगुक्षिताः निगृह्य चरणैर्गृध्रा भक्षयंति सह
स्रशः २७ जयद्रथस्य कर्णस्य तथैव द्रोणभीष्मयोः अभिमन्योर्विनाशं च कश्चिंतयितुमर्हति २८
अवध्यकल्पान्निहतान् दृष्ट्वाहं मधुसूदन गृध्रकंकवटश्येनश्वसृगालादनीकृतान् २९ अमर्षव
शमापन्नान् दुर्योधनवशे स्थितान् पश्येमान् पुरुषव्याघ्रान् संशांतान् पावकानिव ३० शयनान्युचिताः
सर्वे मृदूनि विमलानि च विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ३१ बंदिभिः सततं कालेस्तुवद्भि
रभिनंदिताः शिवानामशिवा घोराः शृण्वंति विविधा गिरः ३२ ये पुरा शेरते वीराः शयनेषु यशस्विनः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰टी॰ ४९ एताः शोचतीः प्रमिलसेति शेषः ५० ५३ विजग्धान् भक्षितान् ५४ ॥

८ चंदनागुरुदिग्धांगास्तेयपांसुषुशेरते तेषामाभरणान्येते गृध्रगोमायुवायसाः आक्षिपंत्यशिवाघो
राविनदंतः पुनःपुनः बाणान्विनिशितान्पीतान्निस्त्रिंशान्विमलागदाः युद्धाभिमानिनःप्री
ताजीवंतइवबिभ्रति ३५ स्वरूपवर्णाबहवःक्रव्यादैरवघट्टिताः ऋषभप्रतिरूपाश्चशेरतेहरित
स्रजः ३६ अपरेपुनरालिंग्यगदाःपरिघबाहवः शेरतेभिमुखाःशूराःदयिताइवयोषितः ३७ बिभ्र
तःकवचान्यन्येनिर्मलान्यायुधानिच नधर्षयंतिक्रव्यादाजीवंतीतिजनार्दन ३८ क्रव्यादैःकृष्य
माणानामपरेषांमहात्मनां शातकौंभ्यःस्रजश्चित्राविनिकीर्णाःसमंततः ३९ एतेगोमायवो
भीतानिहतानांमहात्मनां कंठांतरगतान्हारानाक्षिपंतिसहस्रशः ४० सर्वेष्वपररात्रेषुयानन
दंतवंदिनः स्तुतिभिश्चपरार्ध्याभिरुपचारैश्चशिक्षिताः ४१ तानिमाःपरिदेवंतिदुःखार्त्ताःपरमांग
नाः कृपणंवृष्णिशार्दूलदुःखशोकार्दिताभृशं ४२ रक्तोत्पलवनानीवविभांतिरुचिराणिच मु
खानिपरमस्त्रीणांपरिशुष्काणिकेशव ४३ रुदितोपरताह्येताध्यायंत्यःसंपरिप्लुताः कुरुस्त्रि
योभिगच्छंतितेनतेनैवदुःखिताः ४४ एतान्यादित्यवर्णानितपनीयनिभानिच रोषरोदनताम्रा
णिवक्त्राणिकुरुयोषितां ४५ आसामपरिपूर्णार्थंनिशम्यपरिदेवितं इतरेतरसंक्रंदान्नविजानंति
योषितः ४६ एतादीर्घंविनिःश्वस्यविलप्यचपुनःपुनः विस्पंदमानादुःखेनवीराजहतिजीवितं ४७ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वह्वो दृष्ट्वा शरीराणि क्रोशंति विलपंति च पाणिभिश्चापरा घ्नंति शिरांसि मृदुपाणयः ४८ शिरोभिः पा
तितैर्हस्तैः सर्वांगैर्यूथशः कृतैः इतरेतरसंसृष्टैराकीर्णा भाति मेदिनी ४९ विशिरस्कानथो कायान् दृ
ष्ट्वा घोराभिनंदिनः मुह्यंत्यनुचिता नार्यो विदेहानि शिरांसि च ५० शिरः कायेन संधाय प्रेक्षमाणा विचे
तसः अपश्यंत्यो परं तत्र नेदमस्येति दुःखिताः बाहूरुचरणानन्यान् विशिखोन्मथितान् पृथक् संदधत्यो
सुखाविष्टा मूर्छंत्येताः पुनः पुनः ५२ उत्कृत्तशिरसश्चान्यान् विजग्धान् मृगपक्षिभिः दृष्ट्वा काश्चिन्न
जानंति भर्तॄन् भरतयोषितः ५३ पाणिभिश्चापरा घ्नंति शिरांसि मधुसूदन प्रेक्ष्य भ्रातॄन् पितॄन् पुत्रान्
पतींश्च निहतान् परैः ५४ बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुंडलैः अगम्यकल्पा पृथिवी मांसशो
णितकर्दमा ५५ नदुःखेषूचिताः पूर्वं दुःखं गाहंत्यनिंदिताः भ्रातृभिः पितृभिः पुत्रैरुपकीर्णां वसुं
धरां ५६ यूथानीव किशोरीणां सुकेशीनां जनार्दन स्नुषाणां धृतराष्ट्रस्य पश्य वृंदान्यनेकशः ५७
इति दुःखतरं किं नु केशव प्रतिभाति मे यदिमाः कुर्वते सर्वा रूपमुच्चावचं स्त्रियः ५८ नूनमाचरितं
पापं मया पूर्वेषु जन्मसु या पश्यामि हतान् पुत्रान् पौत्रान् भ्रातॄंश्च केशव एवमार्ता विलपती ददर्श नि
हतं सुतं ५९ इति महाभारते स्त्रीपर्वणि ४९ वैशं० ततो दुर्योधनं दृष्ट्वा गांधारी शोककर्शिता सहसा न्य
पतद्भूमौ छिन्नेव कदलीवने १ सा तु लब्ध्वा पुनः संज्ञां विक्रुश्य च पुनः पुनः दुर्योधनमभिप्रेक्ष्य शयानं
रुधिरोक्षितं २ परिष्वज्य च गांधारी कृपणं पर्यदेवयत् हा हा पुत्रेति शोकार्ता विललापाकुलेंद्रिया ३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री·री·
९

मुगरुजंतुंविपुलेहारनिष्कनिषेविते वारिणानेत्रजेनोरःसिंचंतीशोकतापिता ४ समीपस्थंहृषीकेश
मिदंवचनमब्रवीत् उपस्थितेस्मिन्संग्रामेज्ञातीनांसंक्षयेविभो ५ मामयंप्राहवार्ष्णेयप्रांजलिर्नृप
सत्तमः अस्मिन्ज्ञातिसमुद्धर्षेजयमंबाब्रवीतुमे ६ इत्युक्तेजानतीसर्वमहंस्वव्यसनागमं अब्रुवं
पुरुषव्याघ्रयतोधर्मस्ततोजयः ७ यथाचयुध्यमानस्त्वंनवैमुह्यसिपुत्रक ध्रुवंशस्त्रजितान्लो
कान्प्राप्स्यस्यमरवत्प्रभो ८ इत्येवमब्रुवंपूर्वंनैनंशोचामिहेप्रभो धृतराष्ट्रंतुशोचामिकृपणंहत
बांधवं ९ अमर्षणंयुधांश्रेष्ठंकृतास्त्रंयुद्धदुर्मदं शयानंवीरशयनेपश्यमाधवमेसुतं १० योयंमूर्धा
भिषिक्तानामग्रेयातिपरंतप सोयंपांसुषुशेतेद्यपश्यकालस्यपर्ययं ११ ध्रुवंदुर्योधनोवीरोगतिं
नसुलभांगतः तथाह्यभिमुखःशेतेशयनेवीरसेविते १२ यंपुरापर्युपासीनारमयंतिमहीक्षितः
महीतलस्थंनिहतंगृध्रास्तंपर्युपासते १४ यंपुराव्यजनैरग्र्यैरुपवीजंतियोषितः तमद्यपक्षव्यजने
रुपवीजंतिपक्षिणः १५ एषशेतेमहाबाहुर्बलवान्सत्यविक्रमः सिंहेनेवद्विपःसंख्येभीमसेनेन
पातितः १६ पश्यदुर्योधनंकृष्णशयानंरुधिरोक्षितं निहतंभीमसेनेनगदामुद्यम्यभारत १७ अक्षौ
हिणीर्महाबाहुर्दशचैकांचकेशव आनयद्यःपुरासंख्येसोनयान्निधनंगतः १८ एषदुर्योधनःशे
तेमहेष्वासोमहारथः शार्दूलइवसिंहेनभीमसेनेनपातितः १९ विदुरंह्यवमन्यैषपितरंचैवमंद
भाक् बालोवृद्धावमानेनमंदोमृत्युवशंगतः २० निःसपत्नामहीयस्यत्रयोदशसमाःस्थिता ॥

१९ पंचशाखाभ्यांपंचांगुलिभ्यांपाणिभ्यां १९ २२ अध्यायः पश्यपश्य १४ करसंमितमध्यामाम्नुष्टिसमितमध्या ५
मशेतेनिहतोभूमौसन्नतोमेपृथिवीपतिः २१ अपश्यंकृष्णपृथिवींधार्तराष्ट्रानुशासितां शुश्रीहस्तिना
वाशैस्तवार्लेयनतुनचिरं २२ तामेवाद्यमहाबाहोपश्यशाम्यन्यानुशासनां हीनांहस्तिनावाश्चैनकिं
नुजीवामिमाधव २३ इदंकृष्टुतरंपश्यपुत्रस्यापिवधान्मम यदिमाःपर्युपासंतेहतानस्वूरान्रणे
स्त्रियः २४ प्रकीर्णकेशांसुश्रोणींदुर्योधनशुभांकगां रुक्मवेदीनिभांपश्यकृष्णलक्ष्मणमातरं २५
नूनमेषापुराबालाजीवमानेमहाभुजे भुजावाश्रित्यरमतेसुभुजस्यमनस्विनी २६ कथंतुशततधाने
देहृदयंमेविदीर्यते पश्यंत्यानिहतंपुत्रंपुत्रेणसहितंरणे २७ पुत्रंरुधिरसंसिक्तमुपजिघ्रत्यनिंदि
ता दुर्योधनंतुवामोरूःपाणिनापरिमार्जति २८ किंनुशोचतिभर्तारंपुत्रंचैषामनस्विनी तथाह्य
वस्थिताभातिपुत्रंचाप्यभिवीक्ष्यसा २९ स्वशिरःपंचशाखाभ्यामभिहत्यायतेक्षणा पतत्युरसि
वीरस्यकुरुराजस्यमाधव ३० पुंडरीकमिवाभातिपुंडरीकांतरप्रभा मुखंविमृज्यपुत्रस्यभर्तुश्चैव
तपस्विनी ३१ यदिचाप्यागमाःसंतियदिवाश्रुतयस्तथा ध्रुवंलोकानवाप्तोयंनृपोबाहुबलार्जि
तान् ३२ इतिस्त्रीपर्वणि २२ गांधार्युवाच पश्यमाधवपुत्रान्मेशतसंख्यान्जितक्लमान् गदयाभीम
सेनेनभूयिष्टंनिहतान्रणे १ इदंदुःखतरंमेद्ययदिमामुक्तमूर्धजाः हतपुत्रारणेबालाःपरिधावंतिमे
स्नुषाः २ प्रासादतलचारिण्यश्चरणैर्भूषणान्वितैः आपन्नायत्स्पृशंतीमारुधिरार्द्रांवसुंधरां ३ गृध्रा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰ टी॰
१०

नृत्तारं यं तस्य तथा गोमायुवायसान्‌ शोकेनार्त्ता विनर्दंत्यो मत्ता इव चरंत्युत ४ एषा वैयनवद्यांगीकर
संमितमध्यमा द्रौणें तद्देशसं दृष्ट्वा निपतत्यति दुःखिता ५ दृष्ट्वा मे पार्थिवसुता मेतां लक्ष्मणमातरं
राजपुत्रीं महाबाहो मनो न प्रपशाम्यति ६ भ्रातृंश्चान्याः पतींश्चान्याः पुत्रांश्च निहतान्‌ रणे दृष्ट्वा
परिपतंत्येताः प्रगृह्य सुभुजा भुजान्‌ ७ मध्यमानां तु नारीणां वृद्धानां चापराजित आक्रंदं हतबंधू
नां दारुणं वैशसे शृणु ८ रथनीडानि देहांश्च हतानां गजवाजिनां आश्रिताः श्रममोहार्त्ताः स्थिताः
पश्य महाबल ९ अन्या चापहृतं कायात्‌ चारुकुंडलमुन्नसं स्वस्य बंधोः शिरः कृष्ण गृहीत्वा पश्य
तिष्ठती १० पूर्वजातिकृतं पापं मन्ये नाल्पमिवानघ एताभिरनवद्याभिर्मया चैवाल्पमेधया ११ य
दिदं धर्मराजेन पातितं नो जनार्दन न हि नाशोस्ति वार्ष्णेय कर्मणोः शुभपापयोः १२ प्रत्यग्रवयस
श्चैव दर्शनीयकुचोदराः कुलेषु जाता ह्रीमत्यः कृष्णपक्षाक्षिमूर्धजाः १३ हंसगद्गदभाषिण्यो दुः
खशोकप्रमोहिताः सारस्य इव वाशंत्यः पतिताः पश्य माधव १४ फुल्लपद्मप्रकाशानि पुंडरीका
त्तयोषितां अनवद्यानि वक्त्राणि तापयत्येव रश्मिवान्‌ १५ ईर्षूणां मम पुत्राणां वासुदेवावरोध
नं मत्तमातंगदर्पाणां पश्यंत्यद्य पृथग्जनाः १६ शतचंद्राणि चर्माणि ध्वजांश्चादित्यसंनिभान्‌
रौक्माणि चैव वर्माणि निष्कानपि च कांचनान्‌ १७ शीर्षत्राणानि चैतानि पुत्राणां मे महीतले पश्य
दीप्तानि गोविंद पावकान्‌ सुहुतानिव १८ एष दुःशासनः शेते शूरेणामित्रघातिना पीतशोणित

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सर्वैर्योधैर्युधि भीमेन पातितः १९ गदया भीमसेनेन पश्य माधव मे सुतं यत्तत्केशाननुस्मृत्य द्रौपद्याश्चो
दितेन च २० दुःशासनेन पांचाली सभायां द्यूतनिर्जिता प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन २१ स
हैव सहदेवेन नकुलेनार्जुनेन च दासभार्यासि पांचालि क्षिप्रं प्रविश नो गृहं २२ ततोहमब्रुवं कृष्ण त
दा दुर्योधनं नृपं मृत्युपाशपरिक्षिप्तं शकुनिं पुत्र वर्जय २३ निबोधैनं सुदुर्बुद्धिं मातुलं कलहप्रियं क्षि
प्रमेनं परित्यज्य पुत्र शाम्यस्व पांडवैः २४ न बुध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणं वाङ्नाराचैस्तुदंस्ती
तोत्रैरुल्काभिरिव कुंजरं २५ तामेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् उत्ससर्ज विषं तेषु सर्पो गोवृ
षभेष्विव २६ एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ निहतो भीमसेनेन सिंहेनेव महागजः २
अत्यर्थमकरोद्रौद्रं भीमसेनोत्यमर्षणः दुःशासनस्य यत्क्रुद्धोपिबच्छोणितमाहवे २८ इति स्त्रीपर्व
णि १०० गांधार्युवाच एष माधव पुत्रो मे विकर्णः प्राज्ञसंमतः भूमौ विनिहतः शेते भीमसेन शतधा
कृतः १ गजमध्ये हतः शेते विकर्णो मधुसूदन नीलमेघपरिक्षिप्तः शरदीव निशाकरः २ अस्य चा
पग्रहेणैव पाणिः कृतकिणो महान् कथं विच्छिद्यते गृध्रैरत्तुकामैस्तलत्रवान् ३ अस्य भार्यामिष
प्रेप्सून्गृध्रानेतांस्तपस्विनी वारयत्यनिशं बाला न च शक्नोति माधव ४ युवा वृंदारकः शूरो विकर्णः
पुरुषर्षभ सुखोचितः सुखार्हश्च शेते पांसुषु माधव ५ कर्णिनालीकनाराचैर्भिन्नमर्माणमाहवे अ
द्यापि न जहात्येनं लक्ष्मीर्भरतसत्तमं ६ एष संग्रामशूरेण प्रतिज्ञां पालयिष्यता दुर्मुखोभिमुखः शेते

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री·टी·
११

हतोभिगताहावणे ७ अस्यैत हृदनं क्रूमस्यापदैर्धर्मभत्तिनं विभात्यभ्यधिकं तातसन्नम्पामिव वेश्मः
८ शूरस्य हि रणे क्रूरस्य पद्मानननमथोदृशं सकथंनिहतोमित्रैः पांसुनग्रमतिमेसुतः यस्मादृवमुखे
सौम्यस्यानानैवोपपद्यते सकथंडमुखोमित्रैर्हतो विबुधलोकजित् १० चित्रसेनेहतंभूमौशयाना
नं मधुसूदन धार्त्तराष्ट्रमिमंपश्यप्रतिमानंधनुष्मतां ११ तंचित्रमाल्याभरणां युवत्यः शोककर्षिताः
क्रव्यादसंघैः सहिता रुदंत्यः पर्युपासते स्त्रीणांरुदितनिर्घोषः श्वापदानांचगर्जितं चित्ररूपमि
दंकृष्ण विचित्रंप्रतिभातिमे १२ युवावृंदारकोनित्यंप्रवरस्त्रीनिषेवितः विविंशतिरसौशेतेध्वस्तः
पांसुषुमाधव १४ शरसंकृत्तवर्माणंवीरंविशसनेहतं परिवार्यासतेगृध्राः परिविंशांहिविंश
तिं १५ प्रविश्यसमरेवीरः पांडवानामनीकिनीं सवीरशयनेशेतेपुनः सत्पुरुषोचिते १६ स्मितोपप
न्नंसुनसंसुभ्रुताराधिपोपमं अतीवशुभ्रंवदनंपश्यपकृष्णविविंशतेः १७ यंस्मतंपर्युपासंतेबहुधाम
वयोषितः क्रीडंतमिवगंधर्वदेवकन्याः सहस्रशः १८ हंतारंवीरसेनानांशूरंसमितिशोभनं निव
र्हणममित्राणांदुःसहविसहेतकः १९ दुःसहस्यैतदाभातिशरीरंसंवृतंशरैः गिरिरात्मरुहैः
फुल्लैः कर्णिकारैरिवावृतः २० शातकौंभ्यास्रजाभातिकवचेनचभास्वता अग्निनेवगिरिः श्वेतो
गतासुरपिदुःसहः २१ इतिस्त्रीपर्वणि गांधार्युवाच अध्यर्धगुणमाहुर्यंबलेशौर्येचकेशव।
पित्रात्वयाचदाशार्हदृप्तंसिंहमिवोत्कटं १ योबिभेदचमूमेकोममपुत्रस्यदुर्भिदां सभूत्वामृत्यु

रन्येषामयंमृत्युवशंगतः २ तस्योपलक्षयेकृष्णकार्ष्णेरमिततेजसः अभिमन्योर्हतस्यापिप्रभानैवो
पशाम्यति ३ एषाविराटदुहितास्नुषागांडीवधन्वनः आर्त्ताबालापतिंवीरंदृष्ट्वाशोचत्यनिंदिता ४ तमे
षाहिसमासाद्यभार्याभर्त्तारमंतिके विराटदुहिताकृष्णपाणिनापरिमार्जति ५ तस्यवक्त्रमुपाघ्रायसौ
भद्रस्यमनस्विनी विबुद्धकमलाकारंकंबुवृत्तशिरोधरं ६ काम्यरूपवतीचैषापरिष्वजतिभा।
मिनी लज्जमानापुराचैनंमाध्वीकमदमूर्छिता ७ तस्यक्षतजसंदिग्धंजातरूपपरिष्कृतं विमुच्य
कवचंवीरशरीरमभिवीक्षते ८ अवीक्षमाणासाबालाकृष्णत्वामभिभाषते अयंतेपुंडरीकाक्षस
दृशाक्षोनिपातितः ९ बलेवीर्येचसदृशस्तेजसाचैवतेनघ रूपेणचतथात्यर्थंशेतेभुविनिपातितः १०
अत्यंतसुकुमारस्यरांकवाजिनशायिनः कच्चिदद्यशरीरंतेभूमौनपरितप्यते ११ मातंगभुजवर्ष्माणौ
ज्याक्षेपकठिनत्वचौ कांचनांगदिनौशेतेनिक्षिप्यविपुलौभुजौ १२ व्यायम्यबहुधानूनंसुखसुप्तः।
श्रमादिव एवंविलपतीमार्त्तांनहिमामभिभाषसे १३ नस्मराम्यपराधंतेकिंमांनप्रतिभाषसे ननु
मांत्वंपुरादूरादभिवीक्ष्याभिभाषसे १४ नस्मराम्यपराधंमेकिंमांनप्रतिभाषसे आर्यामार्यसुभद्रां
त्वमिमांश्चत्रिदशोपमान् १५ पितॄन्मांचैवदुःखार्त्तांविहायक्वगमिष्यसि तस्यशोणितदिग्धान्वैके
शानुद्यम्यपाणिना १६ उत्संगेवक्त्रमाधायजीवंतमभिपृच्छति स्वस्रीयंवासुदेवस्यसुतंगांडीवध।
न्वनः १७ कथंत्वांरणमध्यस्थंजघ्नुरेतेमहारथाः धिगस्तुक्रूरकर्तॄंस्तान्कृपकर्णजयद्रथान् १८ द्रो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री·प. णाद्रोणायनीचोभोयैरसिव्यसनीकृतः नर्षभाणांसर्वेषांकथमासीन्नदामनः १९ बालंत्वांपरिवार्यैकं
१२ ममदुःखायजघ्नुषां कथंनुपांडवेयानांपांचालानांचपश्यतां २० त्वंवीरनिधनंप्राप्तोनाथवान्सन्न
नाथवत् दृष्ट्वात्वांबहुभिःसंख्येहतंवीरपितातव २१ वीरःपुरुषशार्दूलःकथंजीवतिपांडवः न
राज्यलाभोविपुलःशत्रूणांवापराभवः २२ प्रीतिंधास्यतिपार्थानांत्वामृतेपुष्करेक्षण नवशास्त्रजि
तान्लोकान्धर्मेणचदमेनच २३ क्षिप्रमन्वागमिष्यामितत्रमांपरिपालय दुर्मरंपुनरप्राप्तका
लेभवतिकेनचित् २४ यदहंत्वांरणेदृष्ट्वाहतंजीवामिदुर्भगा कामिदानींनरव्याघ्रश्लक्ष्णयास्मि
तयागिरा २५ पितृलोकेसमेत्यान्यांमामिवामंत्रयिष्यसि नूनमप्सरसांस्वर्गेमनांसिप्रमथि
ष्यसि २६ परमेणचरूपेणगिराचस्मितपूर्वया प्राप्यपुण्यकृतांलोकानप्सरोभिःसमेयिवान् २७
सौभद्रविहरन्कालेस्मरेथाःसुकृतानिमे एतावानिहसंवासोविहितस्तेमयासह २८ षण्मासा
न्सप्तमेमासित्वंवीरनिधनंगतः इत्युक्तवचनामेतामपकर्षंतिदुःखितां २९ उत्तरांमोघसंकल्पा
मत्स्यराजकुलस्त्रियः उत्तरामपकृष्यैनामार्तामार्ततराःस्वयं ३० विराटंनिहतंदृष्ट्वाक्रोशंतिवि
लपंतिच द्रोणास्त्रशरसंकृत्तंशयानंरुधिरोक्षितं ३१ विराटंवितुदंत्येतेगृध्रगोमायुवायसाः वि
तुद्यमानंविहगैर्विराटमसितेक्षणाः ३२ नशक्नुवंतिविवशाविवर्तयितुमातुराः आसामातप
तप्तानामायासेनचयोषितां ३३ श्रमेणचविवर्णानांवक्त्राणांविप्लुतेवपुः उत्तरंचाभिमन्युंच।

कांबोजंचमहदक्षिणं २४ धिग्भूतेनतान्हतान्यपुष्पलक्ष्मणंचमहदर्शनं आयोधनशिरोमध्येशयानं।
पश्यमाधव २५ इतिमहाभारतेस्त्रीपर्वणि २०९ गांधार्युवाच एषवैकर्तनःशेतेमहेष्वासोमहाब
लः ज्वलितानलवत्संख्येसंशांतःपार्थतेजसा १ पश्यवैकर्तनंकर्णंनिहत्यातिरथान्बहून् शोणि
तौघपरीतांगंशयानंपतितंभुवि २ अमर्षीदीर्घरोषश्चमहेष्वासोमहारथः रणेविनिहतःशेतेशू
रोगांडीवधन्वना ३ यस्मात्पांडवसंत्रासान्ममपुत्रामहारथाः प्रायुध्यंतपुरस्कृत्यमातंगाइवयूथपं
४ शार्दूलमिवसिंहेनसमरेसव्यसाचिना मातंगमिवमत्तेनमातंगेननिपातितं ५ समेताःपुरुषव्
याघ्रनिहतंशूरमाहवे प्रकीर्णमूर्धजाःपत्न्योरुदत्यःपर्युपासते ६ उद्विग्नःसततंयस्माद्धर्मरा
जोयुधिष्ठिरः त्रयोदशसमानिद्रांचिंतयन्नाध्यगच्छत ७ अनाधृष्यःपरैर्युद्धेशत्रुभिर्मघवानिव
युगांताग्निरिवार्चिष्मान्हिमवानिवचस्थिरः ८ सभूत्वाशरणंवीरोधार्त्तराष्ट्रस्यमाधव भूमौवि
निहतःशेतेवातरुग्णइवद्रुमः ९ पश्यकर्णस्यपत्नींत्वंवृषसेनस्यमातरं लालप्यमानांकरुणं
रुदंतींपतितांभुवि १० आचार्यशापोनुगतोध्रुवंत्वांयदग्रसच्चक्रमियंधराते ततःशरेणापहृतं
शिरस्तेधनंजयेनाहवशत्रुमध्ये ११ हाहाधिगेषापतितांविसंज्ञासमीक्ष्यजांबूनदबद्धकक्षं कर्णं
महाबाहुमदीनसत्त्वंसुषेणमातारुदतीभृशार्त्ता १२ अल्पावशेषोपिकृतोमहात्माशरीरभक्षैःप
रिदष्टदेहः द्रष्टुंननःप्रीतिकरःशशीवकृष्णस्यपक्षस्यचतुर्दशाहे १३ सावर्त्तमानापतितापृथिव्या

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰टी॰ २४ अध्यायः इति आवंत्यंभीमसेनेनेतिचसप्तदशार्थौ १

२२

मुख्यायदीनापुनरेवचैषा कर्णस्यवक्त्रंपरिजिघ्रमाणारोरूयतेपुत्रवधाभितप्ता २४ इतिमहाभा
रतेस्त्रीपर्वणि २०॰ गांधार्युवाच आवंत्यंभीमसेनेनभक्षयन्तिनिपातितं गृध्रगोमायवःशूरंबहु
बंधुमबंधुवत् १ तंपश्यकदनंकृत्वाशत्रूणांमधुसूदन शयानंवीरशयनेरुधिरेणसमुक्षितं
२ तंसृगालाश्चकंकाश्चक्रव्यादाश्चपृथग्विधाः तेनतेनविकर्षंतिपश्यकालस्यपर्ययं ३ शया
नंवीरशयनेवीरमाक्रंदकारिणं आवंत्यंसहितानार्योरुदंत्यःपर्युपासते ४ प्रातिपेयंमहेष्वासंह
तंभल्लेनवाह्लिकं प्रसुप्तमिवशार्दूलंपश्यकृष्णमनस्विनं ५ अतीवमुखवर्णोस्यनिहतस्यापि
शोभते सोमस्येवाभिपूर्णस्यपौर्णमास्यांसमुद्यतः ६ पुत्रशोकाभितप्तेनप्रतिज्ञांपरिरक्षता पा
कशासनिनासंख्येवार्द्धक्षत्रिर्निपातितः ७ एकादशचमूर्भित्वारक्ष्यमाणंमहात्मना सत्यंचि
कीर्षतापश्यहतमेनंजयद्रथं ८ सिंधुसौवीरभर्त्तारंदर्पपूर्णंमनस्विनं भक्षयंतिशिवागृध्राज
नार्दनजयद्रथं ९ संरक्ष्यमाणंभार्याभिरनुरक्ताभिरच्युत रसंत्योव्यपकर्षंतिगहनेनिम्नमंतिका
त् १० तमेताःपर्युपासंतेरक्ष्यमाणंमहाभुजं सिंधुसौवीरभर्त्तारंकांबोजयवनस्त्रियः ११ यदाकृ
ष्णामुपादायप्राद्रवत्केकयैःसह तदैववध्यःपांडूनांजनार्दनजयद्रथः १२ कथमद्यनतांकृष्णमा
नयंतिस्मतेपुनः ३ दुःशलांमानयद्भिस्तुयदामुक्तोजयद्रथः १३ सैषाममसुताबालाविलपंती २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ अध्यायः एषशल्यः १७ वासिताः करिण्वः गृष्टयः सक्तनुस्तताः ८ ॥

सुदुःखिता प्रमापयतिचात्मानमाक्रोशतीचपाण्डवान् १४ किंनुदुःखतरंकृष्णपरंममभविष्यति म
स्नुताविधवाबालास्नुषाश्चनिहतेश्वराः १५ हाहाधिकदुःशलांपश्यवीतशोकभयामिव शिरोभ
र्तुरनासाद्यधावमानामितस्ततः १६ वारयामासयः सर्वान्पाण्डवान्पुत्रगृद्धिनः हत्वासविपुलांसेनां
स्वयंमृत्युवशंगतः १७ तंमत्तमिवमातंगंवीरंपरमदुर्जयं परिवार्यरुदंत्येताः स्त्रियश्चित्रोपमाननाः
१८ इतिमहाभारतेस्त्रीपर्वणि गांधार्युवाच एषशल्योहतः शेतेसाक्षान्नकुलमातुलः धर्मज्ञेन
हतस्तातधर्मराजेनसंयुगे १ यस्त्वयास्पर्धतेनित्यंसर्वत्रपुरुषर्षभः सएषनिहतः शेतेमद्रराजो
महारथः २ येनसंगृह्णतातातरथमाधिरथेर्भुवि जयार्थंपांडुपुत्राणांतदातेजोवधः कृतः ३ हाहा
धिकपश्यशल्यस्यपूर्णचंद्रसुदर्शनं मुखंपद्मपलाशाक्षंकाकैरादष्टमव्रणं ४ अस्यचामीकरा
भस्यतप्तकांचनसप्रभा आस्याद्विनिःसृताजिह्वाभक्ष्यतेकृष्णपक्षिभिः ५ युधिष्ठिरेणनिहतंशल्यं
समितिशोभनं रुदंत्यः पर्युपासंतेमद्रराजकुलस्त्रियः ६ एताः सुसूक्ष्मवसनामद्रराजंनरर्षभं
क्रोशंत्योथसमासाद्यक्षत्रियाः क्षत्रियर्षभं ७ शल्यंनिपतितंनार्यः परिवार्याभितः स्थिताः वासिता
गृष्टयः पंकेपरिमग्नमिवद्विपं ८ शल्यंशरणदंशूरंपश्यैनंरथसत्तमं शयानंवीरशयनेशरै
र्विशकलीकृतं ९ एषशैलालयोराजाभगदत्तः प्रतापवान् गजांकुशधरः श्रेष्ठः शेतेभुविति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भी॰टी॰ ११ अहिनाहवासरेण १२ १३ भीष्मकृतभयंकरकर्मकृत् १४ १५ निर्णयेपारावर्येणपरावरौपरलो

१४ पातितः १० यस्यरुक्ममयीमालाशिरस्येषाविराजते स्वापदैर्भ्रस्यमाणस्यशोभयंतीवसर्वजान्
११ एतेनकिलपार्थस्ययुद्धमासीत्सुदारुणं लोमहर्षणमत्यर्थंशक्रस्येवाहिनायथा १२ योध
यित्वामहाबाहुंरेवपार्थंधनंजयं संग्रामेरामयित्वाचकुंतीपुत्रेणपातितः १३ यस्यनास्तिसमो
लोकेशौर्येवीर्येचकश्चन सएवनिहतःशेतेभीष्मोभीष्मकृदाहवे पश्यशांतनवंकृष्णशयाने
सूर्यवर्चसं युगांतइवकालेनपतितंसूर्यमंबरात् १४ एवंतस्यारणेशत्रून्शस्त्रतापेनवीर्यवान्
नरसूर्योस्तमभ्येतिसूर्योस्तमिवकेशव १६ शरतल्पगतेवीरंधर्मेदेवापिनासमं शयाने
वीरशयनेपश्यसूरनिषेविते १७ कर्णिनालीकनाराचैरास्तीर्यशयनोत्तमे आविश्यशेतेभग
वानस्कंदःशरवणंयथा १८ अतलशर्णिगांगेयस्त्रिभिर्वाणैःसमन्वितं उपधायोपधानाग्र्यं
दत्तंगांडीवधन्वना १९ पालयानःपितुःशास्त्रमूर्ध्वरेतामहायशाः एषशांतनवःशेतेमाधवा
प्रतिमोयुधि धर्मात्मावनधर्मज्ञःपारावर्येणनिर्णये अमर्त्यइवमर्त्यःसन्नेषप्राणानधारयत् २१
नास्तियुद्धेकृतेकश्चिन्नविद्वान्नपराक्रमी यत्रशांतनवोभीष्मःशेतेद्यनिहतःपरैः २२ ॥

केइहलोकेतहिद्विषेयेणपारावर्येणज्ञानेनतत्त्वज्ञानबलेनप्राणानधारयदित्यर्थः २१ २२ १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वयमेतेन शूरेण रक्ष्यमाणेन पांडवैः धर्मज्ञेनाहवे मत्स्यराजा व्यापातः सत्यवादिना २४ प्रनष्टः कुरुवंशाः
सत्वनर्येन समुद्भूतः स गतः कुरुभिः सार्धं महाबुद्धिः पराभवं २५ धर्मपुत्र कुरवः कन्नु परिशंसति मा
धव गते देवव्रते स्वर्गं देवकल्पे नरर्षभे अर्जुनस्य विनेतारमाचार्यं सात्यकेस्तथा तं पश्य पतितं
द्रोणं कुरूणां द्विजसत्तमं २६ अस्त्रं चतुर्विधं वेद यथैव त्रिदशेश्वरः भार्गवो वा महावीर्यस्तथा द्रो
णोपि माधव २७ यस्य प्रसादाद्वीभत्सुः पांडवः कर्म दुष्करं चकार स हतः शेते नैनमस्त्राण्यपाल
यन् २८ यं पुरोधाय कुरव आह्वयंते स्म पांडवान् सोयं शस्त्रभृतां श्रेष्ठो द्रोणः शस्त्रैः परिप्लुतः २९
यस्य निर्दहतः सेनां गतिरग्नेरिवाभवत् स भूमौ निहतः शेते शांतार्चिरिव पावकः ३० धनुर्मुष्टि
रशीर्णश्च हस्तावापश्च माधव द्रोणस्य निहतस्यापि दृश्यते जीवतो यथा ३१ वेदा यस्माच्च चत्वा
रः सर्वास्त्राणि च केशव अनपेतानि वै शूराद्यथैवादौ प्रजापतेः ३२ बंदनार्हाविमौ तस्य बंदि
भिर्वंदितौ शुभौ गोमायवो विकर्षंति पादौ शिष्यशतार्चितौ द्रोणं द्रुपदपुत्रेण निहतं मधुसू
दन कृपी कृपणमन्वास्ते दुःखोपहतचेतना ३३ तां पश्य पतितामार्तां मुक्तकेशीमधोमुखीं
हतं पतिमुपासंतीं द्रोणं शस्त्रभृतां वरं ३४ बाणैर्भिन्नतनुत्राणं धृष्टद्युम्नेन केशव उपास्ते वै मृधे
द्रोणं जटिला ब्रह्मचारिणी ३५ प्रेतकृत्ये च यतते कृपी कृपणमातुरा हतस्य समरे भर्तुः सुकुमारी
यशस्विनी ३६ अग्नीनाहृत्य विधिवच्चितां प्रज्वाल्य सर्वशः द्रोणमाधाय गायंति त्रीणि सामानि ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰ टी॰ ३९ यस्तद्गया ४० ४१ अथायं सोमदत्तस्तमितिस्पष्टार्थः २ ॥
१५ सामगाः ३८ कुर्वंतिचचितामेतेजटिलाब्रह्मचारिणः धनुर्भिः शक्तिभिश्चैववरूथनीडैश्चमाध
व ३९ शस्त्रैश्चविविधैरन्यैर्दहंत्येतेभूरितेजसं इतिद्रोणंसमाधायशंसंतिचरुदंतिच ४० सामभि
स्त्रिभिरंतस्थैरनुशंसंतिचापरे अग्नावग्निंसमाधायद्रोणंहुत्वाहुताशने ४१ गच्छंत्यभिमुखागां
गांद्रोणशिष्याद्विजातयः अपसव्यांचितिंकृत्वापुरस्कृत्यकृपींतदा ४२ इतिभारतेस्त्रीपर्वणि
४३ गांधार्युवाच सोमदत्तसुतंपश्ययुयुधानेनपातितं वितुद्यमानंविहगैर्बहुभिर्माधवांति
के १ पुत्रशोकाभिसंतप्तःसोमदत्तोजनार्दन युयुधानंमहेष्वासंगर्हयन्निवदृश्यते २ असौहि
भूरिश्रवसोमातापरमदुःखिता आश्वासयतिभर्तारंसोमदत्तमनिंदिता ३ दिष्ट्यानेनमहाराज
दारुणंभरतक्षयं कुरुसंक्रंदनंघोरंयुगांतमनुपश्यसि ४ दिष्ट्यायूपध्वजंवीरंपुत्रंभूरिसह।
स्रदं अनेकक्रतुयज्वानंनिहतंनाद्यपश्यसि ५ दिष्ट्यास्नुषाणामाक्रंदेघोरंविलपितंबहु न
शृणोषिमहाराजसारसानामिवार्णवे ६ एकवस्त्रानुसंवीताःप्रकीर्णासितमूर्धजाः स्नुषास्ते
परिधावंतिहतापत्याहतेश्वराः ७ श्वापदैर्भक्ष्यमाणंत्वमहोदिष्ट्यानपश्यसि छिन्नबाहुंनरव्या
घ्रमर्जुनेननिपातितं ८ शलंविनिहतंसंख्येभूरिश्रवसमेवच स्नुषाश्चविविधाःसर्वादिष्ट्याना। १५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शेहपश्यपसि ९ दिष्टातत्कांचनछत्रंयूपकेतोर्महात्मनः विनिकीर्णंरथोपस्थेसौमदत्तेर्नपश्यसि
१० अमत्समभूरिश्रवसोभार्याःसात्यकिनाहतं परिवार्यानुशोचंतिभर्तारमसितेक्षणाः ११ एतावि
लप्यबहुलंभर्तुःशोकेनकर्षिताः पतंत्यभिमुखंभूमौकृपणंवतकेशव १२ वीभत्सुरतिवीभत्सं
कर्मेदमकरोत्कथं प्रमत्तस्ययदछैत्सीद्बाहुंशूरस्ययज्वनः १३ ततःपापतरंकर्मकृतवानपिसा
त्यकिः यस्मात्प्रायोपविष्टस्यप्राहार्षीत्संशितात्मनः १४ एकोद्वाभ्यांहतःशेषेत्वमधर्मेणधार्मिक
इतियूपध्वजस्यैताःस्त्रियःक्रोशंतिमाधव भार्यायूपध्वजस्यैषाकरसंमितमध्यमा कृत्वोत्संगे
भुजंभर्तुःकृपणंपर्यदेवयत् १६ अयंसरशनोत्कर्षीपीनस्तनविमर्दनः नाभ्यूरुजघनस्पर्शीनी
वीविस्रंसनःकरः १७ अयंसहंताशत्रूणांमित्राणामभयप्रदः प्रदातागोसहस्राणांक्षत्रियांतक
रःकरः १८ वासुदेवस्यसान्निध्येपार्थेनाक्लिष्टकर्मणा युध्यतःसमरेन्येनप्रमत्तस्यनिपातितः १९
किंनुवक्ष्यसिसंसत्सुकथासुचजनार्दन अर्जुनस्यमहत्कर्मस्वयंवासकिरीटवान् २० इत्येवग
र्हयित्वैषातत्स्त्रीमास्तेवरांगना तामेतामनुशोचंतिसपत्न्यःस्वामिवस्नुषां २१ गांधारराजःशकु
निर्वलवान्सत्यविक्रमः निहतःसहदेवेनभागिनेयेनमातुलः २२ यःपुराहेमदंडाभ्यांव्यजनाभ्यां
स्मवीज्यते सएषपतिभिःपक्षैःशयानउपवीज्यते २३ यःस्मरूपाणिकुरुतेशतशोथसहस्रशः
तस्यमायाविनोमायादग्धाःपांडवतेजसा २४ माययानिकृतिप्रज्ञोजितवान्योयुधिष्ठिरं सभायां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्त्री॰ टी॰ २५ अध्यायः कांबोजास्तरणं केवलविशेषं १ २ ३ ४ ५ ६ ७ ८ ९ १० १५

१९

विपुलं राज्यं सपुनर्जीवितं जितः २५ शकुंतः शकुनिं कृष्ण समंतात्पर्युपासते कैतवं मम पुत्राणां
विनाशायोपशिक्षितं २६ एतेनैतन्महद्वैरं प्रसृष्टं पांडवैः सह वधाय मम पुत्राणामात्मनः सगण
स च २७ यथैव मम पुत्राणां लोकाः शस्त्रजिता विभो एवमस्यापि दुर्बुद्धेर्लोकाः शस्त्रेणैव निर्जिताः
२८ कथं च नायं तत्रापि पुत्रान्मे भ्रातृभिः सह विरोधयेदृजुप्रज्ञानन्नजुर्मधुसूदन २९ इति महा
भारते स्त्रीपर्वणि ४७४ गांधार्युवाच कांबोजं पश्य दुर्धर्षं कांबोजास्तरणोचितं शयानमृषभस्कं
धं हतं पांसुषु माधव १ यस्य क्षतजसंदिग्धौ बाहू चंदनभूषितौ अवेक्ष्य कृपणं भार्या विलपत्य
तिदुःखिता २ इमौ तौ परिघप्रख्यौ बाहू शुभतलांगुली ययोर्विवरमापन्नां न रतिर्मां पुरा जहात् ३
कां गतिं नु गमिष्यामि त्वया हीना जनेश्वर हतबंधुरनाथेव वेपती मधुरस्वना ४ आतपे क्लाम्यमाना
नां विविधानामिव स्रजं क्लांतानामपि नारीणां न श्रीर्जहाति वै तनुं शयानमभितः शूरं कालिंग
मधुसूदन पश्य दीप्तांगदयुगप्रतिबद्धमहाभुजं मागधानामधिपतिं जयत्सेनं जनार्दन मनः
स्फुतिहृतो नाशे मनो मोहयतीव मे ७ परिवार्य प्ररुदिता मागध्यः पश्य योषितः आसामायतने
त्राणां स्वराणां जनार्दन ८ प्रकीर्णसर्वाभरणा रुदंत्यः शोककर्षिताः आस्तीर्णशयनोपेता मा १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गाधः शेरते भुवि ९ कोशलानामधिपतिं राजपुत्रं बृहद्बलं भर्तारं परिवार्यैताः पृथक्प्ररुदिताः स्त्रियः
१० अस्य गात्रगतान्बाणान् कार्ष्णिबाहुबलार्पितान् उद्धरंत्यसुखाविष्टा मूर्छमानाः पुनः पुनः आसां
सर्वानवद्यानामातपेन परिश्रमात् प्रम्लाननलिनाभानि भांति वक्त्राणि माधव ११ द्रोणेन निहताः
शूराः शेरते रुचिरांगदाः धृष्टद्युम्नसुताः सर्वे शिशवो हेममालिनः १२ रथाग्न्यगारं चापार्चिः शर
निचरत्नानिग्रामान्क्षेत्राननजाविकं सालंकारान्गजानश्वान्कन्याश्चैववरस्त्रियः ४ आदिश्यादिश्यसर्वेभ्यो
ददौसनृपसत्तमः द्रोणंसंकीर्त्यभीष्मंचसोमदत्तंचवाल्हिकं ५ दुर्योधनंचराजानंपुत्रांश्चैवपृथक्पृथक्
जयद्रथपुरोगांश्चसुहृदश्चापिसर्वशः ६ सश्राद्धयज्ञोववृतेबहुगोधनदक्षिणः अनेकधनरत्नौघोयु
धिष्ठिरमतेतदा ७ अनिशंयत्रपुरुषागणकालेखकास्तथा युधिष्ठिरस्यवचनादपृच्छंतस्मतंनृप ८ आ
ज्ञापयकिमेतेभ्यःप्रदेयंदीयतामिति तदुपस्थितमेवात्रवचनान्तेददुस्तदा ९ शतदेयेदश शतंस
हस्रेचायुतंतथा दीयतेवचनाद्राज्ञःकुंतीपुत्रस्यधीमतः १० एवंसवसुधाराभिर्वर्षमाणोनृपांबु
दः तर्पयामासविप्रांस्तान्वर्षन्सस्यमिवांबुदः ११ ततोनंतरमेवात्रसर्ववर्णान्महामते अन्नपानर
सौघेनप्लावयामासपार्थिवः १२ सवस्त्रधनरत्नौघोमृदंगनिनदोमहान् गवाश्वमकरावर्तोनाना
धा रत्नमहाकरः १३ ग्रामाग्रहारद्वीपाढ्योमणिहेमजलार्णवः जगत्संप्लावयामासधृतराष्ट्रघनो
द्धतः १४ एवंसपुत्रपौत्राणांपितृणामात्मनस्तथा गांधार्याश्चमहाराजप्रददावौर्ध्वदेहिकं १५
परिश्रांतोयदासीत्सददद्दानान्यनेकशः निवर्तयामासतदादानयज्ञंनराधिपः १६ एवंसराजाकौ
रव्यश्चक्रेदानमहाक्रतुं नटनर्त्तकलास्याढ्यंबह्वन्नरसदक्षिणं १७ दशाहमेवंदानानिदत्वाराजां १२
बिकासुतः बभूवपुत्रपौत्राणामनृणोभरतर्षभ १८ इतिआश्रमवासिकेपर्वणि वैशं० ततः
१४

ॐ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्वदनेन पूर्वं येन प्रव्रजिष्यतां कुटुंबानुमतिः पित्रनर्पणं चावश्यकं तदन्यथाकरणे प्रव्रज्याफलानि ष्यन्तीति प्रदर्शयन् नरपतिप्रव्रज्यां वर्णयति

प्रभाते राजा मथ धृतराष्ट्रोंबिकासुतः आहूय पांडवान्वीरान्वनवासे कृतक्षणः १ गांधारीसहितो धीमानभ्यनंदद्यथाविधि कार्तिक्यां कारयित्वेष्टिं ब्राह्मणैर्वेदपारगैः २ अग्निहोत्रं पुरस्कृत्य वल्कलाजिनसंवृते
वधूजनवृतो राजा निर्ययौ भवनात्ततः ३ ततः स्त्रियः कौरवपांडवानां याश्चापराः कौरवराजवंश्याः तासां नादः प्रादुरासीत्तदानीं वैचित्रवीर्ये नृपतौ प्रयाते ४ ततो राजा प्रांजलिर्वेपमानो युधिष्ठिरः सस्वरं बाष्पकंठः विमुच्योच्चैर्महानादं हि साधो क्व यास्यसीत्यपतत्तात भूमौ ६ तथार्जुनस्तीव्रदुःखाभित
प्तो मुहुर्मुहुर्निःश्वसन्भारताग्र्यः युधिष्ठिरं मेवमित्येवमुक्त्वा निगृह्याथो दीनवत्सीदमानः ७ वृकोदरः फाल्गुनश्चैव वीरो माद्रीपुत्रौ विदुरः संजयश्च वैश्यापुत्रः सहितो गौतमेन धौम्यो विप्राश्चान्वयुर्बाष्पकंठाः ८ कुंती गांधारीं बद्धनेत्रां व्रजंतीं स्कंधासक्तं हस्तमथोद्वहंती राजा गांधार्याः स्कंधदेशेवसज्य पाणिं ययौ धृतराष्ट्रः प्रतीतः ९ तथा कृष्णा द्रौपदी सात्वती च बाला पत्या चोत्तरा कौरवी च चित्रांगदा याश्च काश्चित्स्त्रियोन्याः सार्धं राज्ञा प्रस्थितास्ता वधूभिः १० तासां नादो रुदतीनां तदासीद्राजन्दुःखात्कुररीणामिवोच्चैः ततो निष्पेतुर्ब्राह्मणक्षत्रियाणां विशां शूद्राणां चैव भार्याः समंतात् ११ तन्निर्याणे दुःखितः पौरवर्गो गजाह्वये चैव बभूव राजन् यथापूर्वं गच्छतां पांडवानां द्यूते राजन्कौरवाणां सभायाम् १२ इत्याश्रमवासिके पर्वणि १५ ततः प्रासादहर्म्येषु वसुधायां च पार्थिव नारीणां च नराणां च अतिस्वनः सुमहानभूत् १ स राजा राजमार्गेण नृनारीसंकुलेन च कथंचिन्निर्ययौ धीमान्वेपमानः कृतांज

ततो लाजैः सुमनोभिश्च राजा विचित्राभिस्तद्गृहं पूजयित्वा संयूज्यार्थैर्भृत्यवर्गं सर्वं ततः समुत्सृज्य ययौ नरेंद्रः ५

ततः प्रभाते इत्यादिना १ इष्टिं पुदवसनीयाख्यां २ कुंती गांधारीमपतदिति शेषः किंभूता पुरा थीकृतां धार्यारहस्तं स्कंधासक्तमुद्वहंती हस्तमुपायेः तत

याना यथा पूर्वं द्यूतसमये ततस्तु यथा सभायाः कदाचिदपि तस्मिन्नुद्वेदे महावनं गच्छति कौरवेंद्रे पुरा वेनातीत राजमार्गं प्रपेदुः १२ ५ वृत्तिः पं २

आ० २४

लिः ३ स वर्धमानद्वारेण निर्ययौ गजसाह्वयात् विसर्जयामास च तं जनौघं समुहुर्मुहुः ३ वनं गंतं च विदुरो
ज्ञा सह कृतक्षणः संजयश्च महामात्रः सूतो गावल्गणिस्तथा ४ कृपं निवर्तयामास युयुत्सुं च महारथं
धृतराष्ट्रो महीपालः परिदाय युधिष्ठिरे ५ निवृत्ते पौरवर्गे च राजा सांतःपुरस्तदा धृतराष्ट्राभ्यनुज्ञातो नि
वर्तितुमियेष ह ६ सोऽब्रवीन्मातरं कुंतीं वनं तमनुजग्मुषीं अहं राजानमन्विष्ये भवती विनिवर्ततां ७ व
धूपरिवृता राज्ञि नगरं गंतुमर्हसि राजा यात्वेष धर्मात्मा तापस्ये कृतनिश्चयः ८ इत्युक्ता धर्मराजेन वा
ष्पव्याकुललोचना जगामैव तदा कुंती गांधारीं परिगृह्य ह ९ कुंत्युवाच सहदेवे महाराज मा प्रमादं
कृथाः क्वचित् एष मामनुरक्तो हि राजंस्त्वां चैव सर्वदा १० कर्णं स्मरेथाः सततं संग्रामेष्वपलायिनं अ
वकीर्णो हि समरे वीरो दुःप्रज्ञया तदा ११ आयसं हृदयं नूनं मंदाया मम पुत्रक यत्सूर्यजमपश्यंत्याः
शतधा यन्न दीर्यते १२ एवं गते तु किं शक्यं मया कर्तुमरिंदम मम दोषोऽयमत्यर्थं ख्यापितो यन्न सूर्यजः
तन्निमित्तं महाबाहो दानं दद्यास्त्वमुत्तमं सहैव भ्रातृभिः सार्द्धं सूर्यजस्यारिमर्दन १४ द्रौपद्याश्च प्रि
ये नित्यं स्थातव्यमरिकर्शन भीमसेनोऽर्जुनश्चैव नकुलश्च कुरूद्वह १५ समाधेयास्त्वया राजंस्त्वय्यद्य
कुलधूर्गता श्वश्रूश्वशुरयोः पादान् शुश्रूषंती वने त्वहं गांधारीसहिता वत्स्ये तापसी मलपंकिनी १६
वैशं० एवमुक्तः स धर्मात्मा भ्रातृभिः सहितो वशी विषादमगमद्धीमान्न च किंचिदुवाच ह १७ स मु
हूर्तमिव ध्यात्वा धर्मराजो युधिष्ठिरः उवाच मातरं दीनश्चिंताशोकपरायणः १८ किमिदं ते व्यवसि

२४

नो २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुरोधसानवृद्धद्विजानमुपवान् विदुलायाववोभिः उत्साह्य उत्साहपुत्रान् रहता २ अध्यायः १२

तनैवंत्वंवक्रमर्हसि नत्वामभ्यनुजानामि प्रसादंकर्त्तुमर्हसि १९ प्रोद्यतास्मयायस्मात्तस्माद्युधिष्ठिर
र्शने विदुलायाववोभिस्तेनास्मात्तेत्वक्रमर्हसि २० निहत्यपृथिवीपालान्राज्यंप्राप्तमिदंत्वया तव
प्रज्ञामुपश्रुत्यवासुदेवान्नरर्षभात् २१ कुसावुद्धिर्यच्चायभवत्यश्रुतंमया तच्चधर्मेस्थितिंचोक्ता
तस्मत्वंवितमिच्छसि २२ अस्मानुत्सृज्यराज्यंचस्नुषांचेमांयशस्विनीं कुत्रवत्स्यसिदुर्गेषुवनेषुपप्र
सीदमे २३ इतिवाष्पकलांवाचंकुंतीपुत्रस्यशृण्वती साजगामाश्रुणीभीमस्तामिदमब्रवीत् स्त्रु
२४ यदाराज्यमिदंकुंतिभोक्तव्यंपुत्रनिर्जितं प्राप्तव्याराजधर्माश्चतदेयंतेकुतोमतिः २५ किंवयंकारि
ताः पूर्वंभवत्यापृथिवीक्षयं कस्यहेतोःपरित्यज्यवनंगंतुमभीप्ससि २६ वनाच्चापिकिमानीताभव
त्यावालकावयं दुःखशोकभयाविष्टौमाद्रीपुत्राविमौतथा २७ प्रसीदमातर्मागास्त्वंवनमद्य
यशस्विनी श्रियंयौधिष्ठिरींमातर्भुंक्ष्वतावद्वलार्जितां २८ इतिसानिश्चितैवाथवनवासायभावि
नी लालप्यतांवहुविधंपुत्राणांनाकरोद्वचः २९ द्रौपदीचान्वयाच्छ्वश्रूंविषण्णवदनातदा वनवा
सायगच्छंतीरुदतीभद्रयासह ३० सापुत्रान्रुदतःसर्वान्मुहुर्मुहुरवेक्षती जगामैवमहाप्राज्ञावा
नायकृतनिश्चया ३१ अन्वयुःपांडवास्तांतुसभृत्यांतःपुरास्तथा ततःप्रगृह्यसाश्रूणिपुत्रानवचन स्तु
मब्रवीत् ३२ आश्रमवासिकेपर्वणि कुंत्युवाच एवमेतन्महावाहोयथावदसिपांडव कृतमुद्
र्षणंपूर्वंमयावःसीदतांनृपाः १ द्यूतापहृतराज्यानांपतितानांसुखादपि ज्ञातिभिःपरिभूतानां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री० १५ कृतमुद्धर्षणं मया २ कथं पांडोर्नरेन्द्रस्य संततिः पुरुषर्षभाः यशस्विनो न नश्येत इतिचोद्धर्षणं कृतं ३ यूय
मिंद्रसमाः सर्वे देवतुल्यपराक्रमाः पापेभ्यो नु व्यपेताः स्थ त्वेवं तत्कृतं मया ४ कथं धर्मभृतां श्रेष्ठो राजा लोकवा
सवोपमः पुनर्वनेन दुःखी स्यादितिचोद्धर्षणं कृतं ५ नागायुतसमप्राणः ख्यातविक्रमपौरुषः नायं भीमो
त्ययं गच्छेदितिचोद्धर्षणं कृतं ६ भीमसेनादवरजस्तथायं वासवोपमः विजयो नावसीदेत इतिचोद्धर्षणं
कृतं ७ नकुलः सहदेवश्च तथेमौ गुरुवर्तिनौ तथा कथं न सीदेतामितिचोद्धर्षणं कृतं ८ इयं च बृहती
श्यामा तथायतलोचना वृथा सभातले क्लिश्येन्मा भूदिति च तत्कृतं ९ प्रेक्षतामेव वो भीम सीदंतीं कद
लीमिव स्त्रीं धर्मिणीं मविशिष्टांगीं तथा द्यूतपराजितां १० दुःशासनो यदा मौर्ख्याद्दासीवत्पर्यकर्षत तदेव
विदितं मह्यं पराभूतमिदं कुलं ११ निषण्णाः कुरवश्चैव तदा मे श्वशुरादयः सा देवं नाथमिच्छंती व्यलप
त्कुररी यथा १२ केशपक्षे परामृष्टा पापेन हतबुद्धिना यदा दुःशासनेनैषा तदा मुह्याम्यहं नृप १३ युष्म
त्तेजोविवृद्ध्यर्थं मया ह्युद्धर्षणं कृतं तदानीं विदुलावाक्यैरिति तद्वित्त पुत्रकाः १४ कथं न राजवंशोयं न
श्येत्प्राप्य सुतान्मम पांडोरिति मया पुत्रास्तस्मादुद्धर्षणं कृतं १५ न तस्य पुत्राः पौत्रा वा कुरवस्ते च पार्थि
वाः लभंते सुकृताल्लोकान्यस्माद्वंशः प्रणश्यति १६ भुक्तं राज्यफलं पुत्रा भर्तुर्मे विपुलं पुरा महादाना
नि दत्तानि पीतः सोमो यथाविधि १७ नाहमात्मफलार्थं वै वासुदेवमचूचुदं विदुलायाः प्रलापैस्तैः पा
लनार्थं च तत्कृतं १८ नाहं राज्यफलं पुत्राः कामये पुत्रनिर्जितं पतिलोकानहं पुण्यान्कामये तपसा १५

विभो १९ श्वश्रूश्वशुरयोः कृत्वा शुश्रूषां वनवासिनोः तपसा शोषयिष्यामि युधिष्ठिर कलेवरं २० निव-
र्तस्व कुरुश्रेष्ठ भीमसेनादिभिः सह धर्मे ते धीयतां बुद्धिर्मनस्ते महदस्तु च २१ इति महाभारते आश्र-
मवासिके पर्वणि ॥ वैशंपा० कुंत्यास्तु वचनं श्रुत्वा पांडवा राजसत्तम व्रीडिताः संन्यवर्त्तंत पांचाल्या
सहितानघाः १ ततः शब्दो महानेव सर्वेषामभवत्तदा अंतःपुराणां रुदतां दृष्ट्वा कुंतीं तथागतां २
प्रदक्षिणमथावृत्य राजानं पांडवास्तदा अभिवाद्य न्यवर्त्तंत पृथां तामनिवर्त्य वै ३ ततोब्रवीन्मह-
तेजा धृतराष्ट्रोंबिकासुतः गांधारीं विदुरं चैव समाभाष्य च गृह्य च ४ युधिष्ठिरस्य जननी देवी सा-
धु निवर्त्यतां यथा युधिष्ठिरः प्राह तत्सर्वं सत्यमेव हि ५ पुत्रैश्वर्यं महदिदमपास्य च महाफलं का-
नु गच्छेद्दुर्गं पुत्रानुत्सृज्य मूढवत् ६ राज्यस्थया तपस्तप्तुं दानव्रतकृतं महत् अनया शक्यमेवा-
द्य श्रूयतां च वचो मम ७ गांधारि परितुष्टोस्मि वध्वाः शुश्रूषणेन वै तस्मात्त्वमेनां धर्मज्ञे समनुज्ञातुमर्ह-
सि ८ इत्युक्ता सौबलेयी तु राज्ञा कुंतीमुवाच ह तत्सर्वं राजवचनं स्वं च वाक्यं विशेषवत् ९ न च सा व-
नवासाय देवी कृतमतिं तदा शक्नोत्युपावर्त्तयितुं कुंतीं धर्मपरां सतीं १० तस्यास्तां तु स्थितिं ज्ञात्वा व्यव-
सायं कुरुस्त्रियः निवृत्तांश्च कुरुश्रेष्ठान् दृष्ट्वा प्ररुरुदुस्तदा ११ उपावृत्तेषु पार्थेषु सर्वास्वेव वधूषु च ययौ
राजा महाप्राज्ञो धृतराष्ट्रो वनं तदा १२ पांडवाश्चाति दीनास्ते दुःखशोकपरायणाः यानैः स्त्रीसहिताः स-
र्वे पुरं प्रविविशुस्तदा १३ तदहृष्टमनानंदं गतोत्सवमिवाभवत् नगरं हास्तिनपुरं सस्त्रीवृद्धकुमारकं १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रा॰ सर्वैषामभिरुत्साहाः पौरजानपदा नव । कुंत्या हीनाः सुदुःखार्ता वत्सा इव विनाकृताः १५ ऽथ ततस्तु स
१९ तेनाह्ना गत्वा सुमहद्दूरं ततो भागीरथीतीरे निवासमकरोत्प्रभुः १६ प्रादुःकृता यथान्यायमग्नयो वेदपा
रगैः व्यराजंत द्विजश्रेष्ठैस्तत्र तत्र तपोवने १७ प्रादुःकृताग्निरभवत्स च वृद्धो नराधिपः स राजाग्नीन्पर्युपास्य
हुत्वा च विधिवत्तदा १८ संध्यागतं सहस्रांशुमुपातिष्ठत भारत । विदुरः संजयश्चैव राज्ञः शय्यां कुशैस्ततः
१९ चक्रतुः कुरुवीरस्य गांधार्याश्चाविदूरतः गांधार्याः संनिकर्षे तु निषसाद कुशेष्वथ २० युधिष्ठिर
स्य जननी कुंती साधुव्रते स्थिता तेषां संश्रवणे चाप्यनिषेदुर्विदुरादयः २१ याजकाश्च यथोद्देशं द्विजा ये
चानुयायिनः प्राधीतद्विजमुख्या सा संप्रज्वलितपावका २२ बभूव तेषां रजनी ब्राह्मीव प्रीतिवर्द्धिनी त वि॰
तो रात्र्यां व्यतीतायां कृतपूर्वाह्णिकक्रियाः २३ हुत्वाग्निं विधिवत्सर्वे प्रययुस्ते यथाक्रमं उदङ्मुखा निरी
क्षंत उपवासपरायणाः २४ स तेषामतिदुःखोभून्निवासः प्रथमेहनि शोचतां शोच्यमानानां पौरजा
नपदैर्जनैः २५ आश्रमवासिके पर्वणि १८ वैशं॰ ततो भागीरथीतीरे मेध्ये पुण्यजनोचिते निवासमक
रोद्राजा विदुरस्य मते स्थितः १ तत्रैनं पर्युपातिष्ठन्ब्राह्मणा वनवासिनः क्षत्रविट्शूद्रसंघाश्च बहु
वो भरतर्षभ २ स तैः परिवृतो राजा कथाभिः परिनंद्य तान् अनुजज्ञे सशिष्यान्वै विधिवत्प्रतिपूज्य च
३ सायाह्ने स महीपालस्ततो गंगामुपेत्य च चकार विधिवच्छौचं गांधारी च यशस्विनी ४ तथैवान्ये पृथक्स
र्वे तीर्थेष्वाप्लुत्य भारत चक्रुः सर्वाः क्रियास्तत्र पुरुषा विदुरादयः ५ कृतशौचं ततो वृद्धं श्वशुरं कुंतिभोज १९

ना गांधारी च यशस्विनी राजन् गंगातीरमुपायनयत् ६ राज्ञस्त्वायतने तत्र कृत्वा वेदीं परिस्तरः जुहाव त
त्र वह्निं स नृपतिः सत्यसंगरः ७ ततो भागीरथीतीरात्कुरुक्षेत्रं जगाम सः सानुगो नृपतिर्वृद्धो निय
तः संयतेंद्रियः ८ तत्राश्रमपदं धीमानभिगम्य स पार्थिवः आससादाथ राजर्षिः शतयूपं मनीषिणं
९ स हि राजा महानासीत्केकयेषु परंतप स पुत्रं मनुजैश्वर्ये निवेश्य वनमाविशत् १० तेनासौ स
हितो राजा ययौ व्यासाश्रमं प्रति तत्रैनं विधिवद्राजा प्रत्यगृह्णात्कुरूद्वह ११ स दीक्षां तत्र संप्राप्य
राजा कौरवनंदनः शतयूपाश्रमे तस्मिन्निवासमकरोत्तदा १२ तस्मै सर्वं विधिं राजन्राजा चाख्यौ म
हामतिः आरण्यकं महाराज व्यासस्यानुमते तदा १३ एवं स तपसा राजा धृतराष्ट्रो महामनाः १
योजयामास चात्मानं तांश्चाप्यनुचरांस्तदा १४ तथैव देवी गांधारी वल्कलाजिनधारिणी कुंत्या
सह महाराज समानव्रतचारिणी १५ कर्मणा मनसा वाचा चक्षुषा चैव ते नृप सन्नियम्येंद्रियग्रा
ममास्थिते परमं तपः १६ त्वगस्थिभूतः परिशुष्कमांसो जटाजिनी वल्कलसंवृतांगः स पार्थिव
ना॰ स्तत्र तपश्चचार महर्षिवत्तीव्रमपेतमोहः १७ क्षत्ता च धर्मार्थविदग्र्यबुद्धिः ससंजयस्तं नृपतिं सदा
रे उपाचरद्घोरतपो जितात्मा तदा कृशो वल्कलचीरवासाः १८ आश्रमवासिके पर्वणि १५ वैशं॰ ततः
स्तत्र मुनिश्रेष्ठा राजानं द्रष्टुमभ्ययुः नारदः पर्वतश्चैव देवलश्च महातपाः १ द्वैपायनः सशिष्यश्च
सिद्धाश्चान्ये मनीषिणः शतयूपश्च राजर्षिर्वृद्धः परमधार्मिकः २ तेषां कुंती महाराज पूजां चक्रे य

श्री·
१

शाविधि तेचापितनुधुस्तस्मास्तापसाःपरिचर्यया ३ तत्रधर्मीः कथास्तानचक्रुस्तेपरमर्षयः रमा
यंतोमहात्मानेध्वतराष्ट्रंजनाधिपं ४ कथांतरेतुकस्मिंश्चिद्देवर्षिर्नारदस्ततः कथामिमाम
कथयत्सर्वप्रत्यक्षदर्शिवान् ५ नारद· केकयाधिपतिःश्रीमान्राजासीदकुतोभयः सहस्रचि
त्यइत्युक्तःशतयूपपितामहः ६ सपुत्रेराज्यमासज्यज्येष्ठेपरमधार्मिके सहस्रचित्योधर्मात्मा
विवेशाथवनंनृपः ७ सगत्वातपसःपारंदीप्तस्यसनराधिपः पुरंदरस्यसंस्थानंप्रतिपेदेमहा[illegible] युधि: ८
ततोबलेनैवनृपोमहेंद्रसदनंगतः १० तथाशतयूपोराजासीद्राजन्वज्रधरोपमः सचापितपसा
यातोनाकपृष्ठमितोनृपः ११ अस्मिन्नरण्येनृपतिस्तपस्तप्त्वादिवंगतः १३ शतश्लोमाचराजा
सीद्राजन्परमधार्मिकः सम्यगस्मिन्वनेतप्त्वाततोदिवमवाप्तवान् १४ द्वैपायनप्रसादाच्चत्वमपी
दंतपोवनं राजन्नवाप्यदुष्प्रापांगतिमग्र्यांगमिष्यसि १५ त्वंचापिराजशार्दूलतपसोंतेश्रिया
वृतः गांधारीसहितोगंतागतिंतेषांमहात्मनां १६ पांडुःस्मरतितेनित्यंबलहंतुःसमीपगः त्वां
सदैवमहाराजश्रेयसास्मचयोक्ष्यति १७ तवशुश्रूषयाचैवगांधार्याश्चयशस्विनी भर्तुःसलोक
तामेषागमिष्यतिवधूस्तव १८ युधिष्ठिरस्यजननीसहिधर्मःसनातनः वयमेतत्प्रपश्यामोनृ
पतेदिव्यचक्षुषा १९ प्रवेक्ष्यतिमहात्मानंविदुरश्चयुधिष्ठिरं संजयस्तदनुध्यानादितःस्वर्गम
वाप्स्यति २० वैशं· एतच्छ्रुत्वाकौरवेंद्रोमहात्मासार्धंपत्न्याप्रीतिमान्संबभूव विद्वान्वाक्यंनारदस्य ८

इष्टपूर्त्तैःसबहुधाराः
जन्सं पततामयाम्भृहे
इसदनेनजानवसाद्स्प
तिन्विवः ९ तथाशैल
लयाराजामगदत्तेपिता
महः ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रशास्य चैवेश्वरं चानुलोमं नारदाय २१ ततः सर्वे नारदं विप्रसंघाः संपूजयामासुरतीव राजन् राज्ञः प्रीत्या
धृतराष्ट्रस्य ते वै पुनः पुनः संप्रहृष्टास्तदानीं २२ वैशं० नारदस्तु तदा वाक्यं श्रुत्वा सुहृज्जनसत्तमाः धृत
राष्ट्रस्तु राजर्षिर्नारदं वाक्यमब्रवीत् २३ अहो भगवता ह्याकुरुराजस्य वर्धिता सर्वस्य च जनस्या
म° स्य मम [illegible] चैवं महाद्युते २४ अस्ति का विहिवत्तान्ततो मे निगदतः श्रुणु धृतराष्ट्रं प्रति नृपं देवर्षे
लोकपूजित २५ सर्वं दृष्टं तत त्वत्तो भवान् दिव्येन चक्षुषा पृष्ठः पृच्छसि विप्रर्षे गतीर्या विवि-
धा नृणां २६ उक्तवान्नृपतीनां त्वं महेंद्रस्य सलोकतां न त्वस्य नृपते लोकाः कथितास्ते महामुने
२७ स्थानमप्यस्य नृपतेः श्रोतुमिच्छाम्यहं विभो तत्रैः कीदृक्कृता चेति तन्ममाख्याहि तत्वतः २८ एव-
मुक्तो नारदस्तेन वाक्यं सर्वमनोनुगं आजहार सभामध्ये दिव्यदर्शी महातपाः २९ नारद उवा·
यदृच्छया प्राक्रमस्ते गतवाशक्रं शचीपतिं दृष्टवानस्मि राजर्षे तत्र पांडुं नराधिपं ३० तत्रेयं धृत
राष्ट्रस्य कथा समभवन्नृप तपसो दुष्करस्यास्य यदयं तप्यते तपः ३१ तत्राहमिदमश्रौषं शक्रस्य
वदतः स्वयं वर्षाणि त्रीणि शिष्टानि राज्ञोस्य परमायुषः ३२ ततः कुबेरभवने गांधारीसहितो
नृपः प्रयाता धृतराष्ट्रोयं राजराजाभिसत्कृतः ३३ कामगेन विमानेन दिव्याभरणभूषितः ऋषिपु
त्रो महाभागास्तपसा दग्धकिल्बिषः ३४ संचरिष्यति लोकांश्च देवगंधर्वसत्कृतः स्वच्छंदेनेति धर्मा
त्मा यन्मां त्वमनुपृच्छसि ३५ देवगुह्यमिदं प्रीत्या मम यावः कथितं महत् भवतो हि श्रुतधनास्तपसा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
१८
हतकिल्बिषाः ३९ वैशंपायन उ॰ इति तस्य वचः श्रुत्वा देवर्षेर्मधुरं वचः सर्वे सुमनसः प्रीता बभूवुः
स च पार्थिवः ३७ एवं कथाभिरन्वास्य धृतराष्ट्रं मनीषिणः विप्रजग्मुर्यथाकामं ते सिद्धगतिमा
स्थिताः ३८ आश्रमवासिके पर्वणि ९ वैशंपा॰ वनं गते कौरवेंद्रे दुःखशोकसमन्विताः बभूवुः
पांडवा राजन्मातृशोकेन चान्विताः १ तथा पौरजनः सर्वः शोचन्नास्ते जनाधिपं कुर्वाणाश्च क
थास्तत्र ब्राह्मणा नृपतिं प्रति २ कथं नु राजा वृद्धः स वने वसति निर्जने गांधारी च महाभागा
सा च कुंती पृथा कथं ३ सुखार्हः स हि राजर्षिः सुखार्हं तन्महत् किमवस्थः समासाद्य
प्रज्ञाचक्षुर्हतात्मजः ४ सुदुष्करं कृतवती कुंती पुत्रानपश्यती राजश्रियं परित्यज्य वने
वासमरोचयत् ५ विदुरः किमवस्थश्च भ्रातुः शुश्रूषुरात्मवान् स च गावल्गणिर्धीमान्भ
र्तृपिंडानुपालकः ६ आकुमारं च पौरास्ते चिंताशोकसमाहताः तत्र तत्र कथाश्चक्रुः समासा
द्य परस्परं ७ पांडवाश्चैव ते सर्वे भृशं शोकपरायणाः शोचंतो मातरं वृद्धामूषुर्नातिचिरं पु
रे ८ तथैव वृद्धं पितरं हतपुत्रं जनेश्वरं गांधारीं च महाभागां विदुरं च महामतिं ९ तेषां बभूव
संप्रीतिस्तान्विचिंतयतां तदा न राज्येन च नारीषु न वेदाध्ययनेषु च १० परं निर्वेदमगमंश्चिंतयं
तो नराधिपं तं च ज्ञातिवधं घोरं संस्मरंतः पुनः पुनः ११ अभिमन्योश्च बालस्य विनाशं रणमूर्ध
नि कर्णस्य च महाबाहोः संग्रामेष्वपलायिनः १२ तथैव द्रौपदेयानामन्येषां सुहृदामपि वधं १८

संस्मृत्यतेवीरानातिप्रमनसोभवन् १२ हतप्रवीरांपृथिवींहतरत्नांचभारत सदैवचिंतयन्तस्तेन
शमंचोपलेभिरे १४ द्रौपदीहतपुत्राचसुभद्राचैवभामिनी नातिप्रीतिमुतेदेव्यौतदास्तामप्रहृष्टव।
द्या त् १५ वैराटास्तनयंदृष्ट्वापितरंतेपरीक्षितं धारयंतिस्मतेप्राणांस्तवपूर्वपितामहाः १६ आश्र
मवासिकेपर्वणि ३ वैशं० एवंतेपुरुषव्याघ्राःपांडवामातृनंदनाः स्मरंतोमातरंवीरावभूवुर्भृ
शदुःखिताः १ येराजकार्येषुपुराव्यासक्तानित्यशोभवन् तेराजकार्याणितदानाकार्षुःसर्वतः
पुरे २ प्रविष्टाइवशोकेननाभ्यनंदंतकिंचन संभाष्यमाणाअपितेनकिंचित्प्रत्यपूजयन् ३ ते
स्मवीरादुराधर्षागांभीर्येसागरोपमाः शोकोपहतविज्ञानानष्टसंज्ञाइवाभवन् ४ अचिंतयंश्च
जननींततस्तेपांडुनंदनाः कथंनुवृद्धमिथुनंवहत्यतिकृशापृथा ५ कथंचसमहीपालोहतपुत्रो
निराश्रयः पत्न्यासहवसत्येकोवनेश्वापदसेविते ६ साचदेवीमहाभागागांधारीहतबांधवापतिमं
धंकथंवृद्धमन्वेतिविजनेवने ७ एवंतेषांकथयतामौत्सुक्यमभवत्तदा गमनेचाभवद्बुद्धिर्धृतरा
ष्ट्रदिदृक्षया ८ सहदेवस्तुराजानंप्रणिपत्येदमब्रवीत् अहोमेभवतोदृष्टंहृदयंगमनंप्रति ९ न
हित्वांगौरवेणाहमशकंवक्तुमंजसा गमनंप्रतिराजेंद्रतदिदंसमुपस्थितं १० दिष्ट्याद्रक्ष्यामितांकुंतीं
वर्तयंतींतपस्विनीं जटिलांतापसींवृद्धांकुशकाशपरिक्षतां ११ प्रासादहर्म्यसंवृद्धामत्यंतसुखभा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰
५

गिनीकदातुजननींश्रांतांद्रक्ष्यामिभृशदुःखितां १२ अनित्याखलुमर्त्यानांगतयोभरतर्षभ कुंतीराजस
ताप्युत्रवसत्यसुखितावने १३ सहदेववचःश्रुत्वाद्रौपदीयोषितांवरा उवाचदेवीराजानमभिपूज्या
भिनंद्यच १४ कदाद्रक्ष्यामितांदेवींयदिजीवतिसापृथा जीवंत्याह्यद्यमेप्रीतिर्भविष्यतिजनाधिप १५
एषातेस्तुमतिर्नित्यंधर्मेतेरमतांमनः योद्यत्वमस्मान्राजेंद्रश्रेयसायोजयिष्यसि १६ अग्रपादस्थि
तंचेमंविद्धिराजन्वधूजनम् कांक्षंतंदर्शनंकुंत्यागांधार्याःश्वशुरस्यच १७ इत्युक्तःसनृपोदेव्या
द्रौपद्याभरतर्षभ सेनाध्यक्षान्समानाय्यसर्वानिदमुवाचह १८ निर्याजयतमेसेनांप्रभूतरथकुं
जरां द्रक्ष्यामिवनसंस्थंचधृतराष्ट्रंमहीपतिं १९ स्त्र्यध्यक्षांश्चाब्रवीद्राजायानानिविविधानिमे स
ज्जीक्रियंतांसर्वाणिशिबिकाश्चसहस्रशः २० शकटापणवेशाश्चकोषःशिल्पिनएवच निर्यांतु
कोषपालाश्चकुरुक्षेत्राश्रमंप्रति २१ यश्चपौरजनःकश्चिद्द्रष्टुमिच्छतिपार्थिवं अनावृतःसुवि
हितःसचयातुसुरक्षितः २२ सूदाःपौरोगवाश्चैवसर्वंचैवमहानसं विविधंभक्ष्यभोज्यंचशकटै
रुह्यतांमम २३ प्रयाणंघुष्यतांचैवश्वोभूतइतिमाचिरं क्रियंतांपथिचाप्यद्यवेश्मानिविविधा
निच २४ एवमाज्ञाप्यराजासभ्रातृभिःसहपांडवः श्वोभूतेनिर्ययौराजन्सस्त्रीवृद्धपुरःसरः २५
सबहिर्दिवसानेवजनौघंपरिपालयन् न्यवसन्नृपतिःपंचततोगच्छद्वनंप्रति २६ आश्रम॰ ५

वासिकेपर्वणि २३ वैशं॰ अज्ञापयामासततः सेनांभरतसत्तमः अर्जुनप्रमुखैर्गुप्तांलोकपालोपमै
र्नरैः १ योगोयोगइतिप्रीत्याततः शब्दोमहानभूत् क्रोशतांसादिनांतत्रयुज्यतामितिभारत २ के
चिद्यानैर्नराजग्मुः केचिदश्वैर्महाजवैः कांचनैश्चरथैः केचिज्ज्वलितज्वलनोपमैः ३ गजें
द्रैश्चतथैवान्येकेचिदुष्ट्रैर्नराधिप पदातिनस्तथैवान्येनखरप्रासयोधिनः ४ पौरजानपदाश्चै
वयानैर्बहुविधैस्तथा अन्वयुः कुरुराजानंधृतराष्ट्रदिदृक्षवः ५ संस्तूयमानोबहुभिः सूत
मागधवंदिभिः पांडुरेणातपत्रेणध्रियमाणेनमूर्धनि रथानीकेनमहतानिर्जगामकुरूद्वहः
८ गजेन्द्राचलसंकाशोभीमकर्मावृकोदरः सज्जयंत्रायुधोपेतैः प्रययौपवनात्मजः ९ माद्रीसु
तावपितथाहयारोहौसुसंवृतौजग्मतुः शीघ्रगमनौसन्नद्धकवचध्वजौ १० अर्जुनश्चमहातेजा
रथेनादित्यवर्चसा वशीश्वेतैर्हयैर्युक्तैर्दिव्यैरन्वगमन्नृपं ११ द्रौपदीप्रमुखाश्चापिस्त्रीसंघाः
शिबिकायुताः स्त्र्यध्यक्षयुक्ताः प्रययुः सृजंतोमितंवसु १२ समनुष्यरथहस्त्यश्वंवेणुवीणानुना
दितं शुशुभेपांडवंसैन्यंतत्तदाभरतर्षभ १३ नदीतीरेषुरम्येषुसरःसुचविशांपते वासंकृत्वा। सा॰
क्रमेणाथजग्मुस्तेकुरुपुंगवाः १४ युयुत्सुश्चमहातेजाधौम्यश्चैवपुरोहितः युधिष्ठिरस्यवचना
त्पुरगुप्तिंप्रचक्रतुः १५ ततोयुधिष्ठिरोराजाकुरुक्षेत्रमवातरत् क्रमेणोत्तीर्ययमुनांनदींपरमपा

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰ वनीं १६ स ददर्शाश्रमं दूराद्राजर्षेस्तस्य धीमतः शातयूपस्य कौरव्य धृतराष्ट्रस्य चैव ह १७ ततः प्रमुदि
२॰ तः सर्वो जनस्तद्वनमंजसा विवेश सुमहानादैरापूर्य भरतर्षभ १८ आश्रमवासिके पर्वणि २३ वैशं॰
ततस्ते पांडवा दूरादवतीर्य पदातयः अभिजग्मुर्नरपतेराश्रमं विनयानताः १ स च योधजनः सर्वो
ये च राष्ट्रनिवासिनः स्त्रियश्च कुरुमुख्यानां पद्भिरेवान्वयुस्तदा २ आश्रमं ते ततो जग्मुर्धृतराष्ट्र
स्य पांडवाः शून्यं मृगगणाकीर्णं कदलीवनशोभितं ३ ततस्तत्र समाजग्मुस्तापसा नियतव्र
ताः पांडवानागतान्द्रष्टुं कौतूहलसमन्विताः ४ तानपृच्छत्ततो राजा क्वासौ कौरववंशभृत् पिता
ज्येष्ठो गतोस्माकमिति बाष्पपरिप्लुतः ५ ते तमूचुस्ततो वाक्यं यमुनामवगाहितुं पुष्पाणामु
दकुंभस्य चार्थे गत इति प्रभो ६ तैराख्यातेन मार्गेण ततस्ते जग्मुरंजसा ददृशुश्चाविदूरे तान्स
र्वानथ पदातयः ७ ततस्ते सत्वरा जग्मुः पितुर्दर्शनकांक्षिणः सहदेवस्तु वेगेन प्राधावद्यत्र सा
पृथा ८ सस्वरं रुरुदे धीमान्मातुः पादावुपस्पृशन् सा च बाष्पाकुलमुखी ददर्श दयितं सुतं
९ बाहुभ्यां संपरिष्वज्य समुन्नाम्य च पुत्रकं गांधार्याः कथयामास सहदेवमुपस्थितं १० अनं
तरं च राजानं भीमसेनमथार्जुनं नकुलं च पृथा दृष्ट्वा त्वरमाणोपचक्रमे ११ सा ह्यग्रे गच्छति त
योर्दंपत्योर्हतपुत्रयोः कर्षंती तौ ततस्ते तां दृष्ट्वा संन्यपतन्भुवि १२ राजा तान्स्वरयोगेन स्पर्श २॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

देवमहामना प्रत्यभिज्ञाय मेधावी समाश्वसयत प्रभुः १३ ततस्ते वाष्पमुत्सृज्य गांधारीसहितं नृपं
उपतस्थुर्महात्मानो मातरं च यथाविधि १४ सर्वेषां तोयकलशान् जगृहुस्ते स्वयं तदा पांडवा लब्ध
संज्ञास्ते मात्रा [illegible] श्वासिताः पुनः १५ तथा नार्यो नरसिंहानां सोवरोधजनस्तदा पौरजानपदाश्चैव दद
दृशुस्तं जनाधिपं १६ निवेदयामास तदा जनं तं नामगोत्रतः युधिष्ठिरो नरपतिः स चैनं प्रत्यपूजयत्
१७ स तैः परिवृतो मेने हर्षवाष्पाविलेक्षणः राजात्मानं गृहगतं पुरेव गजसाह्वये १८ अभिवादितो
वध्वभिश्च कुरुश्लाघ्याभिः स पार्थिवः गांधार्या सहितो धीमान् कुंत्या च प्रत्यनंदत १९ ततश्चाश्रममुग्गा
गकुत्सिद्धचारणसेवितं दिदृक्षुभिः समाकीर्णं नभस्तारागणैरिव २० आश्रमवासिके पर्वणि वै
शं० स तैः सह नरव्याघ्रैर्भ्रातृभिर्भरतर्षभ राजा रुचिरपद्माक्षैरासां चक्रे तदाश्रमे १ तापसैश्च महाभा
गैर्नानादेशसमागतैः द्रष्टुं नृपतेः पुत्रान् पांडवान् पृथुवक्षसः २ तेब्रुवन् ज्ञातुमिच्छामः कतमोत्र युधि
ष्ठिरः भीमार्जुनौ यमौ चैव द्रौपदी च यशस्विनी ३ तानाचख्यौ तदा सूतः सर्वांस्तानभिनामतः संजयो
द्रौपदीं चैव सर्वाश्चान्याः कुरुस्त्रियः ४ संजय उवाच य एष जांबूनदशुद्धगौरतनुर्महासिंह इव
प्रवृद्धः प्रचंडघोणः पृथुदीर्घनेत्रस्ताम्रायताक्षः कुरुराज एषः ५ अयं रणयूथपाभः सिंहोन्नतां
सो गजराजखेलगामी पद्मायताक्षोर्जुन एष वीरः ७ कुंतीसमीपे पुरुषोत्तमौ तु यमाविमौ विष्णुमहेंद्र

पुनर्मत्तगजेंद्रगामी
प्रतप्तचामीकरशुद्ध
गौरः पृथ्वायतांसः
पृथुदीर्घबाहुर्वृकोद
रः पश्यत पश्यतेमम् ६
य स्त्वेष पार्श्वेस्य महाध
पं २ नुष्मान् श्यामो युवा वा पं०

श्रा॰ कल्पे मनुष्यलोके सकले समोस्ति तयोर्न रूपेन बलेन शीले ८ इयं पुनः पद्मदलायताक्षी मध्ये वपुः
५ किंचिदिव स्पृशंती नीलोत्पलाभा सुरदेवते वक्षःस्थास्थिता मूर्तिमतीव लक्ष्मीः ९ अस्यास्तु पार्श्वे
कनकोत्तमाभा यैषा प्रभा मूर्तिमतीव सौमी मध्ये स्थिता सा भगिनी हि जाया चक्रायुधस्याप्रति
मस्य तस्य १० इयं च जांबूनदशुद्धगौरी पार्श्वस्य भार्या भुजगेंद्रकन्या विज्ञांगदा चैव नरेंद्रकन्या येषा
सवर्णा प्रमथ्य कृष्णे ११ इयं स्वराजवसुपतेश्च प्रवृद्धनीलोत्पलदामवर्णा प्रस्पर्धकृत्स्नेन स
दानरूपेयो वृकोदरस्यैष परिग्रहाग्र्यः १२ इयं च राज्ञो मगधाधिपस्य सुनीजरासंधइति श्रुतस्य य
वीयसो माद्रवती सुतस्य भार्या मता चंपकदाम गौरी १३ [illegible] ये षा परा सत्र इंदीवरश्यामतनु स्थिताः
महीतले च भार्या मता माद्रवती सुतस्य ज्येष्ठस्य सेयं कमलायताक्षी १४ इयं तु निष्टप्त सुवर्ण
गौरी राज्ञो विराटस्य सुता सपुत्रा भार्याभिमन्योर्निहतो रणे यो द्रोणादिभिस्तैर्विरथो रथस्थः १५
एतास्तु सीमंत शिरोरुहा याः शुक्लोत्तरीया नरराजपत्न्यः राज्ञोस्य वृद्धस्य परश्शताख्याः स्नुषा र
वीरा हतपुत्रनाथाः १६ एता यथामुख्यमुदाहृता वो ब्राह्मण्यभावाद्द जबुद्धिसत्वाः सर्वा भवद्भिः प
रिष्टवृत्ता यानरेंद्र पत्न्यः सुविशुद्धसत्वाः १७ वैशं॰ एवं स राजा कुरुवृद्धवर्यः समागतस्तैर्नरदेवपुत्रैः
पप्रच्छ सर्वं कुशलं तदानीं गतेषु सर्वेष्वथ तापसेषु १८ योधेषु चाप्याश्रममंडलं तं मुक्त्वा निविष्टे २१

पुविमुच्यपत्रे स्त्रीवृद्धबालेचसुसंनिविष्टः यथार्हतस्तानकुशलान्यपृच्छत् १९ आश्रमवासिकेप
र्वणि २५ धृतरा॰ युधिष्ठिरमहाबाहोकच्चित्वंकुशलीह्यसि सहितोभ्रातृभिः सर्वैः पौरजानपदैस्त
था १ येचत्वामनुजीवंतिकच्चित्तेपिनिरामयाः सचिवाभृत्यवर्गाश्चगुरवश्चैवतेनृप २ कच्चित्तेपि व॰
निरातंकावसंतिविषयेतव कच्चिद्वर्त्तसिपौराणींवृत्तिंराजर्षिसेवितां ३ कच्चित्न्यायाननुच्छिद्यको
शस्तेभिप्रपूर्यते अरिमध्यस्थमित्रेषुवर्तसेचानुरूपतः ४ ब्राह्मणानग्रहारैर्वायथावदनुपश्य
सि कच्चित्तेपरितुष्यंतिशीलेनभरतर्षभ ५ शत्रवोपिकुतःपौराभृत्यावास्वजनोपिवा कच्चि
द्यजसिराजेंद्रश्रद्धावान्पितृदेवताः ६ अतिथीनन्नपानेनकच्चिदर्चसिभारत कच्चिन्नयप
थे विप्राःस्वकर्मनिरतास्तव ७ क्षत्रियावैश्यवर्गावाशूद्रावापिकुटुंबिनः कच्चिन्नस्त्रीबा
लवृद्धंनशोचतिनयाचते ८ जामयःपूजिताःकच्चित्तवगेहेनरर्षभ कच्चिद्राजर्षिवंशोयंत्वा
मासाद्यमहीपतिं ९ यथोचितंमहाराजयशसानावसीदति वैशं॰ इत्येवंवादिनंतंसन्यायवि
त्प्रत्यभाषत कुशलप्रश्नसंयुक्तंकुशलोवाक्यकर्मणि १० युधिष्ठिर॰ कच्चित्तेवर्धतेराजंस्तपोद
मशमश्रुते अपिमेजननीचेयंशुश्रूषुर्विगतक्लमा ११ अथास्याःसफलोराजन्वनवासोभवि
ष्यति इयंचमाताज्येष्ठामेशीतवातातपकर्शिता १२ घोरेणतपसायुक्तादेवीकच्चिन्नशोचति ह

श्रा॰ तान्सुतान्महावीर्यानुतत्रधर्मपरायणान् १३ नापध्यायतिवाकश्चिदस्मात्पापकृतःसदा क्वासौ
२२ विदुरोराजन्नैमंपश्यामहे वयं १४ संजयःकुशलीचाय्यंकच्चिन्नुनपस्विस्थितः वैशं॰ इत्युक्तःप्रत्यु
वाचेदंधृतराष्ट्रोजनाधिपं कुशलीविदुरःपुत्रतपोघोरंसमाश्रितः १५ वायुभक्षोनिराहारःकृशो टा॰
धमनिसंततः कदाचिद्दृश्यतेविप्रैःशून्येस्मिन्काननेक्वचित् इत्येवंब्रुवतस्तस्यजटीवीँमुखः
कृशः दिग्वासामलदिग्धांगोवनरेणुसमुक्षितः १७ दूरादालक्षितःक्षत्तातत्राख्यातोमहीपतेः
निवर्तमानःसहसाराजन्दृष्ट्वाश्रमंप्रति १८ तमन्वधावन्नृपतिरेकएवयुधिष्ठिरः प्रविशन्तं
वनेघोरेलक्ष्यालक्ष्यःक्वचित्क्वचित् १९ भोभोविदुरराजाहंदयितस्तेयुधिष्ठिरः इतिब्रुवन्नरप
तिस्तंयत्नादभ्यधावत २० ततोविविक्तएकान्तेतस्थौबुद्धिमतांवरः विदुरोवृक्षमाश्रित्यकंचि
त्तत्रवनान्तरे २१ तंराजाक्षीणभूयिष्ठमाकृतीमात्रसूचितं अभिजज्ञेमहाबुद्धिंमहाबुद्धिर्युधि
ष्ठिरः २२ युधिष्ठिरोहमस्मीतिवाक्यमुक्त्वाग्रतस्थितः विदुरस्याश्रवेराजातंचप्रत्यभिपूजयत् २३
ततःसोनिमिषोभूत्वाराजानंतमुदैक्षत संयोज्यविदुरस्तस्मिन्दृष्टिंदृष्ट्यासमाहितः २४ विवेश
विदुरोधीमान्गात्रैर्गात्राणिचैवह प्राणान्प्राणेषुचदधदिंद्रियेषुतथेंद्रियं २५ संयोगबलमा
स्थायविवेशनृपतेस्तनं विदुरोधर्मराजस्यतेजसाप्रज्वलन्निव २६ विदुरस्यशरीरंतत्तथैवस्तब्ध २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लोचनं कृत्वाश्रितं तदा राजा ददर्श गतचेतनं २६ बलवंतं तथात्मानं मेने बहुगुणं तदा धर्मराजो
महातेजास्तच्च सस्मार पांडवः २७ पौराणमात्मनः सर्वं विद्यावान्स विशांपते योगधर्मं महातेजा व्या
सेन कथितं यथा २८ धर्मराजस्य तत्रैनं संचस्कारयिषुस्तदा दग्धुकामो भवद्विद्वानथ वागभ्यभा
षत २९ भो भो राजन्न दग्धव्यमेतद्विदुरसंज्ञकं कलेवरमिहैवं ते स धर्मः एष सनातनः ३० लोकाः
सनातना नाम भविष्यंत्यस्य भारत यतिधर्ममवाप्तो सौ नैष शोच्यः परंतप ३१ इत्युक्तो धर्मराजः
स विनिवृत्य ततः पुनः राज्ञो वैचित्रवीर्यस्य तत्सर्वं प्रत्यवेदयत् ३२ ततः स राजा द्युतिमान्स च स
र्वजनस्तदा भीमसेनादयश्चैव परं विस्मयमागताः ३३ तच्छ्रुत्वा प्रीतिमान्राजा भूत्वा धर्मजम
ब्रवीत् आपो मूलं फलं चैव ममेदं प्रतिगृह्यतां ३४ यदन्नो हि नरो राजंस्तदन्नोस्यातिथिः स्मृतः इत्युक्तः
स तथेत्येवं प्राह धर्मात्मजो नृप ३५ फलं मूलं च बुभुजे राज्ञा दत्तं सहानुजः ततस्ते वृक्षमूलेषु
कृतवासपरिग्रहाः ३६ तां रात्रिमवसन्सर्वे फलमूलजलाशनाः आश्रमवासिके पर्वणि वैशं०
ततस्तु राजंस्ते तेषामाश्रमे पुण्यकर्मणां शिवा नक्षत्रसंपन्ना सा व्यतीयाय शर्वरी १ ततस्तत्र
कथाश्चासंस्तेषां धर्मार्थलक्षणाः विचित्रपदसंचारा नानाश्रुतिभिरन्विताः २ पांडवास्त्वभि
तो मातुर्धरण्यां सुषुपुस्तदा उत्सृज्य तु महार्हाणि शयनानि नराधिप ३ यदाहारोभवद्राजा धृत
राष्ट्रो महामनाः तदाहारा नृवीरास्ते न्यवसंस्तां निशां तदा ४ व्यतीतायां तु शर्वर्यां कृतपौर्वाह्णिक

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रा॰ क्रियः भ्रातृभिः सहितोराजाददर्शाश्रममंडलं ५ शांतःप्रवरीवारैःसमंततःसपुरोहितः यथास्त्वेव भि॰
२२ शोहंशो५ततराष्ट्राश्रमनुज्ञया ६ ददर्शतत्रवेदीश्चसंप्रज्वलितपावकाः कृता[illegible]षेकैर्मुनिभिर्हुताग्नि
भिरुपस्थिताः ७ वानेयपुष्पनिकरैराज्यधूमोद्गमैरपि ब्राह्मेणवपुषायुक्तायुक्तामुनिगणस्य
ताः ८ मृगयूथैरनुद्विग्नैस्तत्रतत्रसमाश्रितैः अशंकितैःपक्षिगणैःप्रगीतैरिवचप्रभो ९ केका
भिर्नीलकंठानांदात्यूहानांचकूजितैः कोकिलानां[illegible]कुहूरावैःश्रुतिमनोहरैः १० प्राधीतद्वि
जघोषैश्चक्वचित्क्वचिदलंकृतं फलमूलसमाहारैर्महद्भिश्चोपशोभितं ११ ततःसराजाप्रददौ
तापसार्थमुपाहृतान् कलशान्कांचनान्राजंस्तथैवोडुंबरानपि १२ अजिनानिप्रवेणीश्चस्रुकस्रु
वंचमहीपतिः कमंडलूंश्चस्थालीश्चपिठराणिचभारत १३ भाजनानिचलौहानिपात्रीश्चविवि
धानृप यद्यदिच्छतियावच्चयच्चान्यदपिभाजनं १४ एवंसराजाधर्मात्मापरीत्याश्रममंडलंवसु
विसृज्यतत्सर्वंपुनरायान्महीपतिः १५ कृताह्निकंचराजानंधृतराष्ट्रंमहीपतिं ददर्शासीनम
व्यग्रंगांधारीसहितंतदा १६ मातरंचाविदूरस्थांशिष्यवत्प्रणतांस्थितां कुंतींददर्शधर्मात्माशि
ष्टाचारसमन्वितां १७ सतमभ्यर्च्यराजानंनामसंश्राव्यचात्मनः निषीदेत्यभ्यनुज्ञातोबृस्यामुप
विवेशह १८ भीमसेनादयश्चैवपांडवाभरतर्षभ अभिवाद्योपसंगृह्यनिषेदुःपार्थिवाज्ञया १९
सतैःपरिवृतोराजाशुशुभेतीवकौरवः बिभ्रद्ब्राह्मींश्रियंदीप्तांदेवैरिवबृहस्पतिः २० तथातेषू २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

विष्टेषुसमाजग्मुर्महर्षयः शतयूपप्रभृतयःकुरुक्षेत्रनिवासिनः २१ व्यासश्चभगवान्विप्रोदेवर्षि
गणसेवितःवृतःशिष्यैर्महात्मातेजादर्शयामासपांडवं २२ ततःसराजाकौरव्यःकुंतीपुत्रश्चवीर्यवान्
भीमसेनादयश्चैवप्रत्युत्थायाभ्यवादयन् २३ समागतस्ततोव्यासःशतयूपादिभिर्वृतः धृतरा
ष्ट्रंमहीपालमास्यतामित्यभाषत २४ वरंतुविष्टरंकौश्यंकृष्णाजिनकुशोत्तरं प्रतिपेदेतदाव्यास
स्तदर्थमुपकल्पितं २५ तेचसर्वेद्विजश्रेष्ठाविष्टरेषुसमंततः द्वैपायनाभ्यनुज्ञातानिषेदुर्विपुलौ
जसः २६ आश्रमवासिकेपर्वणि वैशं० ततःसमुपविष्टेषुपांडवेषुमहात्मसु व्यासःसत्य
वतीपुत्रइदंवचनमब्रवीत् १ धृतराष्ट्रमहाबाहोकच्चित्तेवर्द्धतेतपः कच्चिन्मनस्तेप्रीणातिव
नवासेननराधिप २ कच्चिद्धृदिनतेशोकोराजन्पुत्रविनाशजः कच्चिज्ज्ञानानिसर्वाणिसुप्रसन्ना
नितेनघ ३ कच्चिद्बुद्धिंदृढांकृत्वाचरस्यारण्यकंविधिं कच्चिद्वधूश्चगांधारीनशोकेनाभिभूयते
४ महाप्राज्ञाबुद्धिमतीदेवीधर्मार्थदर्शिनी आगमापायतत्त्वज्ञाकच्चिदेवानशोचति ५ कच्चित्कुं
तीचराजंस्त्वांशुश्रूषत्यनहंकृता यापरित्यज्यस्वंपुत्रंगुरुशुश्रूषणेरता ६ कच्चिद्धर्मसुतोराजा
महात्मासुमहामनाः भीमार्जुनयमाश्चैवकच्चिदेतेपिसांत्विताः ७ कच्चिन्नंदसिदृष्ट्वैतान्कच्चि
त्तेनिर्मलंमनः कच्चिच्छुद्धभावोसिजातज्ञानोनराधिप ८ एतद्धित्रितयंश्रेष्ठंसर्वभूतेषुभारत

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दि २

श्रा॰ निवेशितामहाराजसत्यमक्रोधएवच ९ कच्चिन्नेनचमोहोस्तिवनवासेनभारत स्ववशेवन्यमन्नंवाउपवा
२४ सोवाभवेत् १० विदितंचापिराजेंद्रविदुरस्यमहात्मनः गमनेविधिनानेनधर्मस्यसुमहात्मनः ११ मां
डव्यशापाद्धिसवैधर्मोविदुरतांगतः महाबुद्धिर्महायोगीमहात्मासुमहामनाः १२ बृहस्पतिर्वादेवे वे॰
षुशुक्रोवाप्यसुरेषुच नतथाबुद्धिसंपन्नोयथासपुरुषर्षभः १३ तपोबलव्ययंकृत्वासुचिरात्संभृतं
तदा मांडव्येनर्षिणाधर्मोह्यभिभूतःसनातनः १४ नियोगाद्ब्रह्मणःपूर्वंमयास्वेनबलेनच वैचित्र
वीर्यकेक्षेत्रेजातःससुमहामतिः १५ भ्रातातवमहाराजदेवदेवःसनातनः धारणान्मनसाध्यानाद्यं
धर्मंकवयोविदुः १६ सत्येनसंवर्धयतियोदमेनशमेनच अहिंसयाचदानेनतप्यमानःसना
तनः १७ येनयोगबलाज्जातःकुरुराजोयुधिष्ठिरः धर्मइत्येषनृपतेप्राज्ञेनामितबुद्धिना १८ य
थावह्निर्यथावायुर्यथापःपृथिवीयथा यथाकाशंतथाधर्मइहचामुत्रचस्थितः १९ सर्वग
श्चैवराजेंद्रसर्वंव्याप्यचराचरं दृश्यतेदेवदेवैःससिद्धैर्निर्मुक्तकल्मषैः २० योहिधर्मःसविदुरो
यःसपांडवएषसः सएषराजन्दृश्यस्तेपांडवःप्रेष्यवत्स्थितः २१ प्रविष्टःसमहात्मानंभ्रातातेबु
द्धिसत्तमः दृष्ट्वामहात्माकौंतेयंमहायोगबलान्वितः २२ त्वांचापिश्रेयसायोक्ष्यतेनचिराद्भरतर्षभ
संशयच्छेदनार्थायप्राप्तंमांविद्धिपुत्रक २३ नकृतंयैःपुराकैश्चित्कर्मलोकेमहर्षिभिः आश्चर्य २४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भूतंतपसःफलंतत्तृष्णीयामिवः २४ किमिच्छसिमहीपालमत्तःप्राप्तुमभीप्सितं द्रष्टुंस्प्रष्टुमथश्रोतुंतत्
कर्तास्मितवानघ २५ आश्रमवासिकेपर्वणि जनमेजयउ॰ वानवासंगतेविप्रधृतराष्ट्रेमहीपतौ
सभार्येनृपशार्दूलेवध्वाकुंत्यासमन्विते १ विदुरेचापिसंसिद्धेधर्मराजंव्यपाश्रिते वसत्सुपांडुपुत्रे
षुसर्वेष्वाश्रममंडले २ यत्तदाश्चर्यमितिवैकरिष्यामीत्युवाचह व्यासःपरमतेजस्वीमहर्षिस्तद्वद
मे ३ वनवासेचकौरव्यःकियंतंकालमच्युतः युधिष्ठिरोनरपतिर्न्यवसत्सजनस्तदा ४ किमाहा
राश्चतेतत्रससैन्यान्यवसन्प्रभोः सांतःपुरामहात्मानइतितद्ब्रूहिमेनघ ५ वैशंपा॰ तेनुज्ञातास्तदा
राजन्कुरुराजेनपांडवाः विविधान्यन्नपानानिविश्राम्यानुभवंतिते ६ मासमेकंविजह्रुस्तेस
सैन्यांतःपुरावने अथतत्रागमद्व्यासोयथोक्तंतेमयानघ ७ तथाचतेषांसर्वेषांकथाभिर्नृपसंनि
धौ व्यासमन्वासतांराजन्नाजग्मुर्मुनयोपरे ८ नारदःपर्वतश्चैवदेवलश्चमहातपाः विश्वावसु
स्तुंबुरुश्चचित्रसेनश्चभारत ९ तेषामपियथान्यायंपूजांचक्रेमहातपाः धृतराष्ट्राभ्यनुज्ञातःकुरुरा
जोयुधिष्ठिरः १० निषेदुस्तेततःसर्वेपूजांप्राप्ययुधिष्ठिरात् आसनेष्वथपुण्येषुबर्हिणेषुवरेषुच ११
तेषुतत्रोपविष्टेषुसतुराजामहामतिः पांडुपुत्रैःपरिवृतोनिषसादकुरूद्वहः १२ गांधारीचैवकुं
तीचद्रौपदीसात्वतीतथा स्त्रियश्चान्यास्तथान्याभिःसहोपविविशुस्ततः १३ तेषांतत्रकथादिव्याधर्मि
ष्ठाश्चाभवन्नृप ऋषीणांचपुराणानांदेवासुरविमिश्रिताः १४ ततःकथांतेव्यासस्तंप्रज्ञाचक्षुषमीश्व

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रा॰
२५

रं शेवाचवदतांश्रेष्ठः पुनरेवसतद्वचः १५ श्रीयमाणोमहातेजाः सर्ववेदविदांवरः विदितंममराजेंद्रय
द्दीहदिविवर्त्तिते १६ दह्यमानस्यशोकेनतवपुत्रकृतेनवै गांधार्याश्चैवपद्मःखेहदितिष्ठतिनित्यदा
१७ कुंत्याश्चयन्महाराजद्रौपद्याश्चहृदिस्थितम् यच्चधारयतेतीव्रंदुःखंपुत्रविनाशजं १८ सुभद्राकृष्ण
भगिनीतच्चापिविदितंमम श्रुत्वासमागममिदंसर्वेषांवस्ततोनृप १९ संशयछेदनाथायप्राप्तःकौ
रवनंदन इमेचदेवगंधर्वाः सर्वेचैवमहर्षयः २० पश्यंतुतपसोवीर्यमद्यमेचिरसंभृतं तद्ब्रू
तांमहाराजकंकामंप्रददामिते २१ प्रवणोस्मिवरंदातुंपश्यमेतपसःफलं एवमुक्तः सराजेंद्रोव्या
सेनामितबुद्धिना २२ मुहूर्त्तमिवसंचिंत्यवचनायोपचक्रमे धन्योस्म्यनुगृहीतश्चसफलंजीवितं
ममे २३ यन्मेसमागमोद्येहभवद्भिःसहसाधुभिः अद्यचाप्यवगछामिगतिमिष्टामिहात्मनः २४ श्रामि॰
ब्रह्मकल्पैर्भवद्भिर्यत्समेतोहंतपोधनाः दर्शनादेवभवतांपूतोहंनात्रसंशयः २५ विद्यतेनभयं
चापिपरलोकान्ममानघाः किंतुतस्यसुदुर्बुद्धेर्मंदस्यापनयैर्भृशं २६ दूयतेमेमनोनित्यंस्मरतःपु
त्रगृद्धिनः अपापाः पांडवायेननिकृताः पापबुद्धिना २७ घातितापृथिवीयेनसहयासनरद्विपा
राजानश्चमहात्मानोनानाजनपदेश्वराः २८ आगम्यममपुत्रार्थेसर्वेमृत्युवशंगताः येतेपितृंश्चदा
रांश्चप्राणांश्चमनसःप्रियान् २९ परित्यज्यगताःशूराःप्रेतराजनिवेशनं कथितासंगतिर्ब्रह्मन्मित्रार्थे
येहतामृधे ३० तथैवपुत्रपौत्राणांममयेनिहतायुधि दूयतेमेमनोभीक्ष्णंघातयित्वामहाबलं ३१ भी २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

घ्मं शांतनवं वृद्धं द्रोणं च द्विजसत्तमं ममपुत्रेण मन्देन पापेन सुहृद्द्विषा ३२ क्षयं नीतं कुलं दीप्तं पृ
थिवीराज्यमिछता एतत्सर्वमनुस्मृत्य दह्यमानो दिवानिशं ३३ न शांतिमधिगच्छामि दुःखशोकस
माहतः इति मे चिंतयानस्य पितः शांतिर्नविद्यते ३४ वैशंपायनः तच्छ्रुत्वा विविधं तस्य राजर्षेः परि
देवितं पुनर्नवीकृतः शोको गांधार्या जनमेजय ३५ कुंत्या द्रुपदपुत्र्याश्च सुभद्रायास्तथैव च तासां
च वरनारीणां वधूनां कौरवस्य ह ३६ पुत्रशोकसमाविष्टा गांधारी त्विदमब्रवीत् श्वशुरं बद्धनयना
देवी प्रांजलिरुत्थिता ३७ षोडशेमानि वर्षाणि गतानि मुनिपुंगव अस्य राज्ञो हतान्पुत्रान्शोच
तो न शमो विभो ३८ पुत्रशोकसमाविष्टो निःश्वसन्ह्येष भूमिपः न शेते वसतीः सर्वा धृतराष्ट्रो म
हामुने ३९ लोकानन्यान्समर्थोसि स्रष्टुं सर्वान्तपोबलात् किमु लोकांतरगतान्राज्ञो दर्शयितुं
सुतान् ४० इयं च द्रौपदी कृष्णा हतज्ञातिसुता भृशं शोचत्यतीव सर्वासां स्नुषाणां दयिता स्नुषा
४१ तथा कृष्णस्य भगिनी सुभद्रा भद्रभाषिणी सौभद्रवधसंतप्ता भृशं शोचति भाविनी ४२ इयं च
भूरिश्रवसो भार्या परमसंमता भर्तृव्यसनशोकार्ता भृशं शोचति भाविनी ४३ यस्यास्तु श्वशुरो
धीमान्बाल्हिकः स कुरूद्वहः निहतः सोमदत्तश्च पित्रा सह महारणे ४४ श्रीमतोस्य महाबुद्धेः
संग्रामेष्वपलायिनः पुत्रस्य ते पुत्रशतं निहतं यद्रणाजिरे ४५ तस्य भार्याशतमिदं दुःखशोकस

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰ माहते पुनः पुनः वर्धयानं शोकेराज्ञेममैवच ४६ तेनारंभेणमहतामामुपास्तेमहात्मने येचभूता
महात्मनःश्वशुरामेमहारथाः ४७ सोमदत्तप्रभृतयोकान्नुतेषांगतिःप्रभो तवप्रसादाद्भगव[illegible] न्वि॰
शोकोयंमहीपतिः ४८ यथास्यान्नविताचाहंकुंतीचेयंवधूस्तव इत्युक्तवत्यांगांधार्यांकुंतीव्रतकृशा
नना ४९ प्रच्छन्नजातंपुत्रंतंस्मारादित्यसंनिभं तमृषिर्वरदोव्यासोदूरश्रवण[illegible]नः ५० अपश्यद्दुः २पू॰
खितांदेवीमातरंसव्यसाचिनः तामुवाचततोव्यासोयत्तेकार्यंविवक्षितं ५१ तद्ब्रूहित्वंमहाभागेय
त्तेमनसिवर्तते श्वशुरायततःकुंतीप्रणम्यशिरसा[illegible]रा ५२ उवाचवाक्यसव्रीडाविवृण्वानापुरातनं
५३ आश्रमवासिकेपर्वणि कुंत्युवाच भगवन्श्वशुरोमेसिदैवतस्यापिदैवतं सममेदेवातिदेवस्त्वंशृ
णुसत्यांगिरंमम १ तपस्वीकोपनोविप्रोदुर्वासानाममेपितुः भिक्षामुपागतोभोक्तुंतमहंपर्यतोष
यं २ शौचेनत्वागमस्त्यागैःशुद्धेनमनसातथा कोपस्थानेष्वपिमह[illegible]कुप्यंनकदाचन ३ सप्रीतो न्व॰
वरदोमेऽभूत्कृतकृत्योमहामुनिः अवश्यंतेगृहीतव्यमितिमांसोब्रवीद्वचः ४ ततःशापभयाद्वि
प्रम[illegible]वोचंपुनरेवतं एवमस्त्वितिचप्राहपुनरेवसमेद्विजः ५ धर्मस्यजननीभद्रेभवित्रीत्वंशुभानने व
शेस्थास्यंतितेदेवायांस्त्वमावाहयिष्यसि ६ इत्युक्त्वांतर्हितोविप्रस्ततोहंविस्मिताभवं नचसर्वास्वव
स्थासुस्मृतिर्मेविप्रणश्यति ७ अथहर्म्यतलस्थानेरविमुद्यंतमीक्षती संस्मृत्यतदृषेर्वाक्यंस्पृहये २६

तीरिवाकरं ८ स्थिताहं बालभावेन तत्र दोषमबुध्यती अथ देवः सहस्रांशुर्मत्समीपगतोभवत् ९
द्विधा कृत्वात्मनो देहं भूमौ च गगनेपि च ततापलोकानेकेन द्वितीयेनागमत्स मां १० स मामुवाच वे
पंतीं वरं मत्तो वृणीष्व ह गम्यतामिति तं चाहं प्रणम्य शिरसावदं ११ स मामुवाच तिग्मांशुर्वृथाह्वा
नेन मे त्वं म प्रयास्यामि त्वां च विप्रं च येन दत्तो वरस्तव १२ तमहं रक्षती विप्रं शापादनयकारिणं
पुत्रो मे त्वत्समो देव भवेदिति ततो ब्रुवं १३ ततो मां तेजसाविश्य मोहयित्वा च भानुमान् उवाच भ
विता पुत्रस्तवेत्यभ्यगमद्दिवं १४ ततोहमंतर्भवने पितुर्वृत्तांतरक्षिणी गूढोत्पन्नं सुतं बाले जले
कर्णमवासृजं १५ नूनं तस्यैव देवस्य प्रसादात्पुनरेव तु कन्याहमभवं विप्र यथाप्राह स मामृ
षिः १६ स मया मूढया पुत्रो ज्ञायमानोप्युपेक्षितः तन्मां दहति विप्रर्षे यथा सुविदितं तव १७
यदि पापमपापं वा तदेतद्विवृतं मया तं दग्धुमिच्छाम्यहं भगवन्व्यपनेतुमर्हसि १८ यच्चास्य राज्ञो
विदितं हृदि स्थं भवतोनघ तं चायं लभतां काममद्यैव मुनिसत्तम १९ इत्युक्तः प्रत्युवाचेदं व्या
सो वेदविदां वरः साधु सर्वमिदं भाव्यमेवमेतद्यथात्थ मां २० अपराधश्च ते नास्ति कन्याभावं ग
तासि हि देवाश्चैश्वर्यवंतो वै शरीराण्याविशंति वै २१ संति देवनिकायाश्च संकल्पाज्जनयंति वै वा
चा दृष्ट्या तथा स्पर्शात्संहर्षेणेति पंचधा २२ मनुष्यधर्मैर्देवत्वात्तव मोहो न विद्यते इति कुंति

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰ विज्ञानीहिश्चेतनेमानसोज्वरः २३ सर्वबलवतांपथ्यंसर्वबलवतांशुचिः सर्वबलवतांधर्मः सर्वब
२ लवतांस्वकं २४ इतिश्रीआश्रमवासिकेपर्वणि ३ आसः भद्रेद्रक्ष्यसिगांधारि पुत्रान्भ्रातॄन्सखींस्त
था वधूश्चपतिभिःसार्धंनिशिसुप्तोत्थितानिव कर्णंद्रक्ष्यतिकुंतीच सौभद्रंचापियादवी द्रौप
दीपंचपुत्रांश्चपितॄन्भ्रातॄंस्तथैवच २ एवमेवहृदयेव्यवसायोभवन्मम यदास्मिचोदितो
राज्ञाभवतापृथयैवच ३ नतेशोच्यामहात्मानःसर्वएवनरर्षभाः क्षत्रधर्मपराःसंतस्तथाहि
निधनंगताः ४ भवितव्यमवश्यंतत्सुरकार्यमनिंदिते अवतेरुस्ततःसर्वेदेवभागामहीतलं न॰
५ गंधर्वाप्सरसश्चैवपिशाचागुह्यराक्षसाः तथापुण्यजनाश्चैवसिद्धादेवर्षयोपिच ६ देवा
श्चदानवाश्चैवतथादेवर्षयोमलाः तएतेनिधनंप्राप्ताःकुरुक्षेत्रेरणाजिरे ७ गंधर्वराजोयो
धीमान्धृतराष्ट्रइतिश्रुतः सएवमानुषेलोकेधृतराष्ट्रःपतिस्तव ८ पांडुंमरुद्गणाद्विद्धि वि नि॰
शिष्टतममच्युतं धर्मस्यांशोभवत्क्षत्ता राजाचैवयुधिष्ठिरः ९ कलिंदुर्योधनंविद्धि शकुनिंद्वा
परंतथा दुःशासनादीन्विद्धित्वं राक्षसान्शुभदर्शने १० मरुद्गणाद्भीमसेनंबलवंतमरिं
दमं विद्धित्वंतुनरमृषिमिमंपार्थंधनंजयं ११ नारायणंहृषीकेशमश्विनौयमजौतथा द्वि
धाकृत्वात्मनोदेहमादित्यंतपतांवरं १२ लोकांश्चतापयानंवैविद्धिकर्णंचशोभने यःसवै २॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सार्थं द्रूतं संहर्षजननं तथा १२ यश्च पांडवदायादो हतः षड्भिर्महारथैः स सोमस्य वसौभद्रो योगादेवाभव
त्पुरा १४ द्रौपद्या सह संभूतं धृष्टद्युम्नं च पावकात् अग्नेर्भागं शुभं विद्धि राक्षसं तु शिखंडिनं १५ द्रोणं बृह
स्पतेर्भागं विद्धि द्रौणिं च रुद्रजं भीष्मं च विद्धि गांगेयं वसुं मानवतां गतं १६ एवमेते महाप्राज्ञ देवा मानु
स ष्यमेत्य हि ततः पुनर्गताः स्वर्गं कृते कर्मणि शोभने १७ यच्च वै हृदि सर्वेषां दुःखमेतच्चिरं स्थितं तद
द्य व्यपनेष्यामि परलोककृताद्भयात् १८ सर्वे भवंतो गच्छंतु नदीं भागीरथीं प्रति तत्र द्रक्ष्यथ तान्सर्वान्ये
हतास्मिन्रणाजिरे १९ वैशंपायनः इति व्यासस्य वचनं श्रुत्वा सर्वो जनस्तदा महता सिंहनादेन गंगा
मभिमुखो ययौ २० धृतराष्ट्रश्च सामात्यः प्रययौ सह पांडवैः सहितो मुनिमुख्यैश्च गंधर्वैश्च सम
गतैः २१ ततो गंगां समासाद्य क्रमेण स जनार्णवः निवासमकरोत्सर्वो यथाप्रीति यथासुखं २२
राजा च पांडवैः सार्धमिष्टे देशे सहानुगः निवासमकरोद्धीमान्सस्त्रीवृद्धपुरःसरः २३ जगाम तदह
श्चापि तेषां वर्षशतं यथा निशां प्रतीक्षमाणानां दिदृक्षूणां च तान्नृपान् २४ अथ पुण्यं गिरिवर
स मस्तमभ्यगमद्रविः ततः कृताभिषेकास्ते नैशं कर्म समाचरन् २५ आश्रमवासिके पर्वणि ३१ वैशंपाः
ततो निशायां प्राप्तायां कृतसायाह्निकक्रियाः व्यासमभ्यगमन्सर्वे ये च तत्र समागताः १ धृतराष्ट्र
स्तु धर्मात्मा पांडवैः सहितस्तदा शुचिरेकमनाः सार्धमृषिभिस्तैरुपाविशत् २ गांधार्या सह नार्य
स्तु सहिताः समुपाविशन् पौरजानपदश्चापि जनः सर्वो यथावयः ३ ततो व्यासो महातेजाः पुण्य

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री॰ २९

भागीरथीजले अवगाह्यजुहावाथसर्वांल्लोकान्महामुनिः ४ पांडवानांचयेयोधाःकौरवाणांचस
र्वशः राजानश्चमहाभागानानादेशनिवासिनः ५ ततःसतुमुलःशब्दोजलांते जनमेजयप्रादुरासी
द्यथापूर्वंकुरुपांडवसेनयोः ६ ततस्तेपार्थिवाःसर्वेभीष्मद्रोणपुरोगमाः ससैन्याःसलिलात्तस्मात्सम
त्तस्थुःसहस्रशः ७ विराटद्रुपदौचैवसहपुत्रौससैनिकौ द्रौपदेयाश्चसौभद्रोराक्षसश्चघटोत्कचः
कर्णदुर्योधनौचैवशकुनिश्चमहारथः दुःशासनादयश्चैववधार्तराष्ट्रामहाबलाः ९ जरासंधिर्भ
गदत्तोजलसंधश्चवीर्यवान् भूरिश्रवाःशलःशल्योवृषसेनश्चसानुजः १० लक्ष्मणोराजपुत्रश्च
धृष्टद्युम्नस्यचात्मजः शिखंडिपुत्राःसर्वेचधृष्टकेतुश्चसानुजः ११ अचलोवृषकश्चैवराक्षसश्चा
प्यलायुधः वाल्हिकःसोमदत्तश्चचेकितानश्चपार्थिवः १२ एतेचान्येचबहवोबहुत्वाद्येनकी
र्तिताः सर्वेभास्वरदेहास्तेसमुत्तस्थुर्जलात्ततः १३ यस्यवीरस्ययोवेषोयोध्वजोयच्चवाहनं ते
नतेनव्यदृश्यंतसमुपेतानराधिपाः १४ दिव्यांबरधराःसर्वेसर्वेभ्राजिष्णुकुंडलाः निर्वैरानिरहंका
राविगतक्रोधमन्यवः १५ गंधर्वैरुपगीयंतस्तूयमानाश्चवंदिभिः दिव्यमाल्यांबरधरावृताश्चा रि॰
प्सरसांगणैः १६ धृतराष्ट्रस्यचतदादिव्यंचक्षुर्नराधिप मुनिःसत्यवतीपुत्रःप्रीतःप्रादात्तपोब
लात् १७ दिव्यज्ञानबलोपेतागांधारीचयशस्विनी ददर्शपुत्रांस्तान्सर्वानन्येचान्येपिमृधेहताः १८
तदद्भुतमचिंत्यंचसुमहल्लोमहर्षणं विस्मितःसजनःसर्वोददर्शानिमिषेक्षणः १९ तदुत्सव २९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

महोदधेर्हृष्टनारीनराकुलं आश्चर्यभूतं ददृशे चित्रं पटगतं यथा २१ धृतराष्ट्रस्तु तान्सर्वान्पश्यन्दिव्ये
न चक्षुषा मुमुदे भरतश्रेष्ठ प्रसादात्तस्य वै मुनेः २२ आश्रमवासिके पर्वणि वैशंपाय॰ ततस्ते पुरुषश्रे
ष्ठाः समाजग्मुः परस्परं विगतक्रोधमात्सर्याः सर्वे विगतकल्मषाः १ विधिं परममास्थाय ब्रह्मर्षिवि
हितं शुभं संहृष्टमनसः सर्वे देवलोक इवामराः २ पुत्रः पित्रा च मात्रा च भार्या च पतिभिः सह भ्रा
भ्राता सख्या चैव सख्या राजन्समागताः ३ पांडवास्तु महेष्वासं कर्णं सौभद्रमेव च संप्रहर्षात्समाजग्मुर्द्रौ
पदेयाश्च सर्वशः ४ ततस्ते प्रीयमाणा वै कर्णेन सह पांडवाः समेत्य पृथिवीपाल सौहृदे च स्थिता अभ
वन् ५ परस्परं समागम्य योधास्ते भरतर्षभ मुनेः प्रसादात्ते ह्येवं क्षत्रिया नष्टमन्यवः ६ असौहृदं
परित्यज्य सौहृदे पर्यवस्थिताः एवं समागताः सर्वे कुरुभिर्बांधवैः सह ७ पुत्रैश्च पुरुषव्याघ्राः कु
रवोऽन्ये च पार्थिव तां रात्रिमखिलामेव विहृत्य प्रीतमानसाः ८ मेनिरे परितोषेण नृपाः स्वर्गसदो
यथा नात्र शोको भयं त्रासो नारतिर्नायशोऽभवत् ९ परस्परं समागम्य योधानां भरतर्षभ समाग
तास्ताः पितृभिर्भ्रातृभिः पतिभिः सुतैः १० मुदं परमिकां प्राप्य नार्यो दुःखमथात्यजन् एकां रात्रिं वि
हृत्यैवं ते वीरास्ताश्च योषितः ११ आमंत्र्यान्योन्यमाश्लिष्य ततो जग्मुर्यथागतं ततो विसर्जयामास
लोकांस्तान्मुनिपुंगवः १२ क्षणेनांतर्हिताश्चैव प्रेक्षतामेव तेऽभवन् अवगाह्य महात्मानः पुण्यां

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्री
२५

भागीरथी नंदी १३ तस्याः मध्यजास्त्वेवमानि वेश्मानि भेजिरे देवलोकं प्ययुः केचित्केचिद्ब्रह्मसदस्त
था १४ केचिच्च वारुणं लोकं केचित्कौवेरमाप्नुवन् ततो वैवस्वतं लोकं केचिच्चैवाप्नुवन्नृपाः १५
गान्तमानं पिशाचानां केचिच्चाप्युत्तरान्कुरून् विचित्रगतयश्चान्ये यानवाप्यानवै[illegible]ह १६ आजग्मु
स्ते महात्मानः सवाहाः सपदानुगाः गतेषु तेषु सर्वेषु सलिलस्यो महामुनिः १७ धर्मशीलो महा
तेजाः कुरूणां हितकृत्तथा ततः प्रोवाच ताः सर्वाः क्षत्रिया निहतेश्वराः १८ याया पतिकृतांल्लो
कानिच्छति परमस्त्रियः ता जाह्नवीजले क्षिप्रमवगाहन्त्वतंद्रिताः १९ ततस्तस्य वचः श्रुत्वा श्रद्द
धाना वरांगनाः श्वशुरं समनुज्ञाप्य विविशुर्जाह्नवीजले २० विमुक्ता मानुषैर्देहैस्ततस्ता भर्तृभिः
सह समाजग्मुस्तदा साध्व्यः सर्वा एव विशांपते २१ एवं क्रमेण सर्वास्ताः शीलवत्यः पतिव्रताः प्रवि
श्य क्षत्रिया मुक्ता जग्मुर्भर्तृसलोकताः २२ दिव्यरूपसमायुक्ता दिव्याभरणभूषिताः दिव्यमाल्याम्ब
रधरा यथा सां पतयस्तथा २३ ताः शीलगुणसंपन्ना विमानस्था गतक्लमाः सर्वाः सर्वगुणोपेताः
स्वस्थानं प्रतिपेदिरे २४ यस्य यस्य तु यः कामस्तस्मिन्काले ऽभवद्ध तं तं विसृष्टवान्व्यासो वरा
दो धर्मवत्सलः २५ तच्छ्रुत्वा नरदेवानां पुनरागमनं नराः जहृषुर्मुदिताश्चासन्नानादेशगता अपि
२६ प्रियैः समागमं तेषां यः सम्यक्छृणुयान्नरः प्रियाणि लभते नित्यमिह च प्रेत्य चैव ह २७ ३२ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

बांधवसंयोगमनायाससमन्वितं यश्चैतच्छ्रावयेद्विद्वान्विष्णोर्धर्मविन्नमः १८ सयशःप्राप्नुयाल्लोकेप
रत्रचशुभांगतिं स्वाध्याययुक्तामनुजास्तपोयुक्ताश्चभारत १९ साध्वाचारादमोपेतादाननिर्धूतक
ल्मषाः ऋजवःशुचयःशांताहिंसानृतविवर्जिताः २० आस्तिकाश्रद्दधानाश्चधृतिमंतश्चमानवाः श्रु
त्वाश्चर्यमिदंपर्वह्यवाप्स्यंतिपरांगतिं २१ इतिआश्रमवासिकेपर्वणि ३३ सौतिरुवाच एतच्छ्रुत्वानृपो
विद्वान्हृष्टोभूज्जनमेजयः पितामहानांसर्वेषांगमनागमनंतदा १ अब्रवीन्मुदितोयुक्तःपुनरागा
मनंप्रति कथंनुत्यक्तदेहानांपुनस्तद्रूपदर्शनं २ इत्युक्तःसद्विजश्रेष्ठोव्यासशिष्यःप्रतापवान् प्रो
वाचवदतांश्रेष्ठस्तंनृपंजनमेजयं ३ वैशंपायनउ० अविप्रणाशःसर्वेषांकर्मणामितिनिश्चयः क
र्मजानिशरीराणितथैवाकृतयोनृप ४ महाभूतानिनित्यानिभूताधिपतिसंश्रयात् तेषांचानित्य
संवासोनविनाशोवियुज्यतां ५ अनायासकृतंकर्मसत्यश्रेष्ठःफलागमः आत्माचैभिःसमायुक्तः
सुखदुःखमुपाश्नुते ६ अविनाशीतथायुक्तःक्षेत्रज्ञइतिनिश्चयः भूतानामात्मकोभावोयथा
सौनवियुज्यते ७ यावन्नक्षीयतेकर्मतावत्तस्यस्वरूपता संक्षीणकर्मानरोलोकेरूपान्यत्वंनिय
च्छति ८ नानाभावास्तथैकत्वंशरीरंप्राप्यसंहताः भवंतितेतथानित्याःपृथग्भावंविजानतां ९ अ
श्वमेधेश्रुतिश्चेयमश्वसंज्ञपनंप्रति लोकांतरगतानित्यंप्राणानित्यशरीरिणां १० अहंहितंवदाम्ये
तत्प्रियंचेत्तवपार्थिव देवयानाहिपंथानःश्रुतास्तेयज्ञसंस्तरे ११ सुकृतोयत्रयज्ञस्तेतत्रदेवाहि
३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ॰ तत्रैव यदा सममतिर्ना देवाः पश्यंतो गमनेश्वराः १२ गतिमंतश्च तेनेच्छानाम्येनित्याभवेस्तत नित्येस्मि
१ न्संचकेवर्गे नित्येचात्मनिष्ठरूपः १३ अस्मानानासमायोगंयः पश्यतिवृथामतिः वियोगे शोचते तस्यार्थस
बालइतिमेमतिः १४ वियोगेदोषदर्शी यः संयोगं स विसर्जयेत् असंगेसंगमोनास्तिदुःखंभुविवियोग
जं १५ पराध्यंतस्त्वपरोनाभिमानाद्धरीरतः अपरज्ञः परांबुद्धिंज्ञात्वा मोहाद्विमुच्यते १६ अदर्शनादापति
तः पुनश्चादर्शनंगतः नाहं तं वेद्मि नासौ मां न च मेस्ति विरागता १७ येनयेनशरीरेणाकरोत्ययमनीश्वरः
तेनतेनशरीरेणातद्वश्यमुपाश्नुते १८ मानसं मनसाप्नोति शारीरं च शरीरवान् १९ आश्रमवासिके
पर्वणि वैशंपायन उ॰ अहृष्ट्यात न्नृप पुत्राणां दर्शनं प्रतिलब्धवान् ऋषेः प्रसादात्पुत्राणां स्वरूपाणां
कुरूद्वह १ स राजा राजधर्मांश्च ब्रह्मोपनिषदं तथा अवाप्तवान्नरश्रेष्ठो बुद्धिनिश्चयमेव च २ विदुरश्च
महाप्राज्ञो ययौ सिद्धिं तपोबलात् धृतराष्ट्रः समासाद्य व्यासं चैव तपस्विनं ३ जनमेजय उ॰ ममापि वर
दो व्यासो दर्शयेत्पितरं यदि तद्रूपवेशवयसं श्रद्दध्यां सर्वमेव ते ४ प्रियं मे स्यात्कृतार्थश्च स्यामहं कृत
निश्चयः प्रसादादृषिमुख्यस्य मम कामः समृध्यतां ५ सौतिरुवाच इत्युक्तवचने तस्मिन्नृपे व्यासः प्र
तापवान् प्रसादमकरोद्धीमानानयच्च परीक्षितं ६ ततस्तद्रूपवयसमागतं नृपतिं दिवः श्रीमंतं पितरं
राजाददर्श जनमेजयः ७ पितरं स्नापयामास स्वयं सस्नौ च पार्थिवः स्नात्वा स नृपतिर्विप्रमास्तीकमि
दमब्रवीत् ८ यायावरकुलोत्पन्नं जरत्कारुसुतं तदा आस्तीक विविधाश्चर्यो यज्ञोयमिति मे मतिः ९ १
शमीकं च महात्मानं पुत्रं तं चास्य शृंगिणम् अमात्यायेव भृत्यश्च राजन्स्तांश्च ददर्श ह ८ ततः सोवभृथे राजा मुदितो जनमेजयः ९ त्रुटिः पं २

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

परयार्थंपिताशसोममशोकपरायणः आस्तीकउवाच अथर्हैपायनोयत्रपुराणस्तपसोनिधिः यत्रे
कुरुकुलश्रेष्ठस्तस्यलोकावुभौजितौ १० श्रुतंविचित्रमाख्यानंत्वयापांडवनंदन सर्पाश्चभस्मसान्नी
तागताश्चपदवींपितुः ११ कथंचित्तक्षकोमुक्तः सत्यत्वात्तवपार्थिव ऋषयःपूजिताःसर्वेगतिर्दृ
ष्टामहात्मनः १२ प्राप्तःसुविपुलोधर्मःश्रुत्वापापविनाशनं विमुक्तोहृदयग्रंथिरुदारजनदर्श
नात् १३ येचपक्षधराधर्मेसद्वृत्तरुचयश्चये यान्दृष्ट्वाहीयतेपापंतेभ्यःकार्यानमस्क्रिया १४
सौतिरुवाच एतच्छ्रुत्वाद्विजश्रेष्ठात्सराजाजनमेजयः पूजयामाससतमृषिमनुमान्यपुनःपुनः
१५ पप्रच्छतमृषिंचापिवैशंपायनमच्युतं कथावशेषंधर्मज्ञोवनवासस्यसत्तम आश्रमवा
सिकेपर्वणि ३५ जनमे० दृष्ट्वापुत्रांस्तथापौत्रान्सानुयात्रान्जनाधिप धृतराष्ट्रःकिमकरोद्राजाचै
वयुधिष्ठिरः १ वैशंपा० तद्दृष्ट्वामहदाश्चर्यंपुत्राणांदर्शनंनृप वीतशोकःसराजर्षिःपुनराश्र
ममागमत् २ इतरस्तुजनःसर्वस्तेचैवपरमर्षयः प्रतिजग्मुर्यथाकामंधृतराष्ट्राभ्यनुज्ञया
३ पांडवास्तुमहात्मानोलघुभूयिष्ठसैनिकाः पुनर्जग्मुर्महात्मानंसदारास्तंमहीपतिं ४ तमा
श्रमपदंधीमान्ब्रह्मर्षिर्लोकपूजितः मुनिःसत्यवतीपुत्रोधृतराष्ट्रमभाषत ५ धृतराष्ट्रमहा
बाहोशृणुकौरवनंदन श्रुतंतेज्ञानवृद्धानामृषीणांपुण्यकर्मणां ६ ऋद्धाभिजनवृद्धानांवेदवे

आ॰
२१

दांगवेदिनां धर्मज्ञानां पुराणानां वदतां विविधाः कथाः ७ मास्म शोके मनः कार्षीर्दिष्टे न व्यथते बुधः श्रुतं दे
वरहस्यं ते नारदाद्देवदर्शनात् ८ गतास्ते क्षत्रधर्मेण शस्त्रपूतां गतिं शुभां यथा दृष्टास्त्वया पुत्रास्तथा काम
विहारिणः ९ युधिष्ठिरस्त्वयं धीमान्भवंतमनुरुध्यते सहितो भ्रातृभिः सर्वैः सदारः ससुहृज्जनः १० वि
सर्जयैनं यात्वेष स्वराज्यमनुशासतां मासः समधिकस्त्वेषामतीतो वसतां मुने ११ एतद्धि नित्यं यत्नेन
पदं रक्ष्यं नराधिप बहुप्रत्यर्थिकं ह्येतद्राज्यं नाम कुरूद्वह १२ इत्युक्तः कौरवो राजा व्यासेनातुलतेजसा
युधिष्ठिरमथाहूय वाग्मी वचनमब्रवीत् १३ अजातशत्रो भद्रं ते शृणु मे भ्रातृभिः सह त्वत्प्रसादा
न्महीपाल शोको नास्मान्प्रबाधते १४ रमे चाहं त्वया पुत्र पुरेव गजसाह्वये नाथेनानुगतो विद्वन्प्रि
येषु परिवर्तिना १५ प्राप्तं पुत्रफलं त्वत्तः प्रीतिर्मे परमा त्वयि न मे मन्युर्महाबाहो गम्यतां पुत्र माचिरं १६
भवंतं चेह संप्रेक्ष्य तपो मे परिहीयते तपोयुक्तं शरीरं च त्वां दृष्ट्वा धारितं पुनः १७ मातरौ ते तथैवेमे शीर्ण
पर्णकृताशने मम तुल्यव्रते पुत्र न चिरं वर्तयिष्यतः १८ दुर्योधनप्रभृतयो दृष्टा लोकांतरं गताः
व्यासस्य तपसो वीर्याद्भवतश्च समागमात् १९ प्रयोजनं च निर्वृत्तं जीवितस्य ममानघ उग्रं तपः समा
स्थास्ये त्वमनुज्ञातुमर्हसि २० त्वय्यद्य पिंडः कीर्तिश्च कुलं चेदं प्रतिष्ठितं श्वो वाद्य वा महाबाहो गम्यतां
पुत्र माचिरं २१ राजनीतिः सुबहुधा श्रुता ते भरतर्षभ संदेष्टव्यं न पश्यामि कृतमेमे भवता प्रभो २२ वैशं॰ २१

इत्युक्तवचनं तं तु नृपो राजानमब्रवीत् न मामर्हसि धर्मज्ञ परित्यक्तुमनागसं २३ कामं गच्छंतु मे सर्वे
भ्रातरोनुचरास्तथा भवंतमहमन्विछे मातरौ च यतव्रतः २४ तमुवाचाथ गांधारी मैवं पुत्र शृणुष्व वै व
थाधीने कुरुकुले पिंडश्च श्वशुरस्य मे २५ गम्यतां पुत्र पर्याप्तमेतावत्पूजितावयं राजा यदाह तत्कार्यं
त्वया पुत्र पितुर्वचः २६ वैशंपा॰ इत्युक्तः स तु गांधार्या कुंतीमिदमभाषत स्नेहबाष्पाकुलेनेत्रे प्रम
न्मरुदती वचः २७ विसर्जयति मां राजा गांधारी च यशस्विनी भवत्यां बद्धचित्तस्तु कथं यास्यामि दु
खितः २८ न चोत्सहे तपोविघ्नं कर्तुं ते धर्मचारिणि न त्वत्तो हि परं नास्ति तपसा विदितं मम हत्त २९
मयापि न तथा राज्ञि राज्ये बुद्धिर्यथा पुरा [illegible] ...ति पुत्र यथा मे ... गांनीय ... वि... [illegible]
राज्ये [illegible] स्थितं तपसि मे मनः ९ [illegible] ... यानव ... गं धर्मी वरुणा वे
दत [illegible] ... गंगंबवहते वा वित [illegible] ... मिभगवंपदिदृष्ट [illegible]
२१ ८ नारदस्या व स्थितो ... [illegible] ... ते व ... [illegible]
[illegible] ... नित्ये पुत्र ... [illegible] ... भगं ... [illegible] ... २० गांधार्याः [illegible]
[illegible] ... तेन ... मया ... २१ [illegible] ...
व ... वीरसं ... [illegible] ... भवने ... [illegible] ... २२ [illegible] ... महा ... नप व
[illegible] ... भवंनप: २३ गांधारी ... कुंती ... वासिनी ... [illegible]

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

श्रा॰ तपसेवानुरक्तं मे मनः सर्वात्मना तथा ३० सुश्रेयं च महीकृत्स्ना न मे प्रीतिकरी शुभे बांधवानः पी
४४ डीएणं बलेनानयथा पुरा ३१ पांचालाः सुमहत्प्राज्ञीणाः कथामात्रावशेषिताः न तेषां कुलकर्तारं कं
चित्पश्याम्यहं शुभे ३२ सर्वे हि भस्मसान्नीतास्ते द्रोणेन रणाजिरे अवशिष्टाश्च निहता द्रोणपुत्रेण वै शि॰
निशि ३३ चेदयश्चैव मत्स्याश्च दृष्टपूर्वास्तथैव ते केवलं वृष्णिचक्रं च वासुदेवपरिग्रहात् ३४ यद् दृष्ट्वा
स्थातुमिच्छामि धर्मार्थं नार्थहेतोस्ततः शिवेन पश्य नः सर्वान् दुर्लभं तव दर्शनं ३५ अविषह्यं च राजा
हिनी ब्रुवा रस्ते ततः एतच्छ्रुत्वा महाबाहुः सहदेवो युधांपतिः ३६ युधिष्ठिरमुवाच देवाश्रुव्या
कुललोचनः नोत्सहेहं परित्यक्तुं मातरं भरतर्षभ ३७ प्रतियातु भवान् क्षिप्रं तपस्तप्स्याम्यहं वि
भो इहैव शोषयिष्यामि तपसेदं कलेवरं ३८ पादशुश्रूषणे रक्तो राज्ञो मात्रोस्तथानयोः तमुवाच
ततः कुंती परिष्वज्य महाभुजे ३९ गम्यतां पुत्र मैवं त्वं वोचः कुरु वचो मम आगमा वः शिवाः सं
तु स्वस्था भवत पुत्रकाः ४० उपरोधो भवेदेवम स्माकं तपसः कृते त्वत्स्नेहपाशबद्धा च ही
येयं तपसः परात् ४१ तस्मात्पुत्रक गच्छ त्वं शिष्टमल्पं च नः प्रभो एवं संस्तंभितेवाक्यैः कुंत्या व
ध्रु विधैर्मनः ४२ सहदेवस्य राजेंद्र राजा च व विशेषतः ते मात्रा समनुज्ञाता राज्ञा च कुरुपुंगवाः
४३ अभिवाद्य कुरुश्रेष्ठमामंत्रयितुमारभन् युधिष्ठिर उवाच राज्यं प्रतिगमिष्यामः शिवेन प्रतिनं
दिताः अनुज्ञातास्त्वया राजन् गमिष्यामो विकल्मषाः ४४ एवमुक्तः स राजर्षिर्धर्मराज्ञा महात्मना अ ३२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

वृजन्तेसकौरव्यमभिनंद्ययुधिष्ठिरं ४५ भीमंचबलिनांश्रेष्ठंसांत्वयामाससपार्थिवः सबाष्पसमभ्यष्टौ
धावीप्रसन्नोयतवीर्यवान् ४६ अर्जुनंचसमाश्लिष्ययमौचपुरुषर्षभौ अनुजज्ञेसकौरव्यःपरि
ष्वज्याभिनंद्यच ४७ गांधार्याचाभ्यनुज्ञाताःकृतपादाभिवादनाः जनन्यासमुपाघ्राताःपरिष्वक्ता
सुतेनृपं ४८ चक्रुःप्रदक्षिणंसर्वेवत्साइवनिवारणे पुनःपुनर्निरीक्षंतःप्रचक्रुस्तेप्रदक्षिणं
४९ द्रौपदीप्रमुखाश्चैवसर्वाःकौरवयोषितः न्यायतःश्वशुरेवृत्तिंप्रयुज्यप्रययुस्ततः ५० श्वश्रू
भ्यांसमनुज्ञाताःपरिष्वज्याभिनंदिताः संदिष्टाश्चेतिकर्तव्यंप्रययुर्भर्तृभिःसह ५१ ततःप्रजज्ञे
निनदःसूतानांयुज्यतामिति उष्ट्राणांक्रोशतांचापिहयानांहेषतामपि ५२ ततोयुधिष्ठिरोरा
जासदारःसहसैनिकः नगरंहास्तिनपुरंपुनरायात्सबांधवः ५३ आश्रमवासिकेपर्वणि ३६ वैशं
हिवर्षौव्यतिक्रांतेपांडवेषुयदृच्छया देवर्षिर्नारदोराजन्नाजगामयुधिष्ठिरं १ तमभ्यर्च्यमहा
बाहुःकुरुराजोयुधिष्ठिरः आसीनंपरिविश्वस्तंप्रोवाचवदतांवरः २ चिरान्नुनानुपश्यामिभग
वंतमुपस्थितं कच्चित्तेकुशलंविप्रशुभंवाप्रत्युपस्थितं ३ केदेशाःपरिदृष्टास्तेकिंचकार्यंकरो
मिते तद्ब्रूहिद्विजमुख्यत्वंत्वंह्यस्माकंपरागतिः ४ नारदउवाच चिरदृष्टोसिमेत्येवमागतोहंत
पोवनात् परिदृष्टानितीर्थानिगंगाचैवमयानृप ५ युधिष्ठिरः वदंतिपुरुषामेयगंगातीरनिवा
सिनः धृतराष्ट्रंमहात्मानमास्थितंपरमंतपः ६ परिदृष्टस्त्वयातत्रकुशलीसकुरूद्वहः गांधारीचपृ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ. याश्चैव सूतपुत्रश्च संजयः ७ कथं स वर्त्तते चापि पिता मम स पार्थिवः श्रोतुमिच्छामि भगवन्यदि दृष्टस्त्व
११ यानघ ८ नारद उवाच स्थिरीभूय महाराज शृणु वृत्तं यथातथं यथाश्रुतं च दृष्टं च मया तस्मिंस्तपोवने
९ वनवासनिवृत्तेषु भवत्सु कुरुनंदन कुरुक्षेत्रात्पिता तुभ्यं गंगाद्वारं ययौ नृप १० गांधार्या सहितो धी
मान्वध्वा कुंत्या समन्वितः संजयेन च सूतेन साग्निहोत्रः सयाजकः ११ आतस्थे स तपस्तीव्रं पिता ते
तवतपोधनः वीटांमुखे समादाय वायुभक्षोऽभवन्मुनिः १२ वने स मुनिभिः सर्वैः पूज्यमानो महा
तपाः त्वगस्थिमात्रशेषः षण्मासानभवन्नृपः १३ गांधारी तु जलाहारा कुंती मासोपवासिनी सं
जयः षष्ठभक्तेन वर्तयामास भारत १४ अग्नींस्तु याजकास्तत्र जुहुवुर्विधिवत्प्रभो दृश्यतेऽदृश्यत च
श्चैव वने तस्मिन्नृपः स वै १५ अनिकेतोऽथ राजा स बभूव वनगोचरः ते चापि सहिते देव्यौ संज
यश्च तमन्वयुः १६ संजयो नृपतेर्नेता समेषु विषमेषु च गांधार्यास्तु पृथा राजन्चक्षुरासीद
निंदिता १७ ततः कदाचिद्गंगायाः कच्छे स नृपसत्तमः गंगायामाप्लुतो धीमानाश्रमाभिमुखो
ऽभवत् अथ वायुः समुद्भूतो दावाग्निरभवन्महान् ददाह तद्वनं सर्वं परिगृह्य समंततः १९ दह्य
मानेषु मृगयूथेषु द्विजिह्वेषु समंततः वाराहाणां च यूथेषु संश्रयत्सु जलाशयान् २० समाविद्धे
वने तस्मिन्प्राप्ते व्यसन उत्तमे निराहारतया राजा मंदप्राणविचेष्टितः २१ असमर्थोऽपसरणे सु
कृशो मातरौ च ते ततः स नृपतिर्दृष्ट्वा वह्निमायांतमंतिकात् २२ इदमाह ततः सूतं संजयं जय ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

तोवरः गच्छसंजययत्रदावाग्निर्नत्वांदहतिकर्हिचित् २३ वयमत्राग्निनायुक्तागमिष्यामःपरांगतिं
तमुवाचकिलोद्विग्नः संजयोवदतांवरः २४ राजन्मृत्युरनिष्टोयंभविताते वृथाग्निना नचोपायंप्र
पश्यामिमोक्षणेजातवेदसः २५ यदत्रानंतरंकार्यंतद्भवान्वक्तुमर्हति इत्युक्तःसंजयेनेदंपुन
राहसपार्थिवः २६ नैषमृत्युरनिष्टोनोनिःसृतानांगृहात्स्वयं जलमग्निस्तथावायुरथवापि
विकर्षणं २७ तापसानांप्रशस्तानिगच्छसंजयमाचिरं इत्युक्त्वासंजयंराजासमाधायमनस्तया
२८ प्राङ्मुखःसहगांधार्याकुंत्याचोपाविशत्तदा संजयस्तंतथादृष्ट्वाप्रदक्षिणमथाकरोत् २९
उवाचचैनंमेधावीयुंक्ष्वात्मानमितिप्रभो ऋषिपुत्रोमनीषीसराजाचक्रेस्यतद्वचः ३० संनिरुध्येंद्रि
यग्राममासीत्काष्ठोपमस्तदा गांधारीसमहाभागाजननीचपृथातव ३१ दावाग्निनासमायुक्तोस
चराजापितातव संजयस्तुमहामात्रस्तस्माद्दावादमुच्यत ३२ गंगाकूलेमयादृष्टस्तापसैःपरिवा
रितः सतानामंत्र्यतेजस्वीनिवेद्यैतच्चसर्वशः ३३ प्रययौसंजयोधीमान्हिमवंतंमहीधरं एवंस
निधनंप्राप्तःकुरुराजोमहामनाः ३४ गांधारीचपृथाचैवजनन्यौतेविशांपते यदृच्छयानुव्रज
तामयाराज्ञःकलेवरं ३५ तयोश्चदेव्योरुभयोर्मयादृष्टानिभारत ततस्तपोवनेतस्मिन्समाजग्मु
स्तपोधनाः ३६ श्रुत्वाराज्ञस्तदानिष्ठांनत्वशोचनगतीश्चते तत्राश्रौषमहंसर्वमेतत्पुरुषसत्तम ३७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आ·
१६

यथाचनृपतिर्दग्धोदेवीतेचेतिपांडव नश्रोचितत्ततोराजेंद्रसर्वतःसपृथिवीपतिः ४० आश्रमवानग्निसंयोगं
गांधारीजननीचते वैशं· एतच्छ्रुत्वाचसर्वेषांपांडवानांमहात्मनां निर्याणंधृतराष्ट्रस्यशोकःसम
भवन्महान् अंतःपुराणांचतदामहानार्तस्वरोभवत् ४१ पौराणांचमहाराज श्रुत्वाराज्ञस्तदागं
तिं अहोधिगितिराजानविक्रुश्यभृशदुःखिताः ४२ ऊर्ध्वबाहुस्वरन्मातःप्ररुरोदयुधिष्ठिरः भीम
सेनपुरोगाश्चभ्रातरःसर्वएवते अंतःपुरेषुचतदासुमहान्रुदितस्वनः प्रादुरासीन्महाराजपृथां
श्रुत्वातथागतां ४३ तंचवृद्धंतथादग्धंहतपुत्रंनराधिपं अन्वशोचंततेसर्वेगांधारीचतपस्विनी
४४ तस्मिन्नुपरतेशब्देमुहूर्तादिवभारत निगृह्यबाष्पंधैर्येणधर्मराजोब्रवीदिदं ४५ आश्रमवा
सिके युधिष्ठिरः तथामहात्मनस्तस्यतपस्युग्रेचवर्तिनः अनाथस्येवचवनेतिष्ठत्स्वस्मासुबंधुषु
१ दुर्विज्ञेयागतिर्ब्रह्मन्पुरुषाणांमतिर्मम यत्रवैचित्रवीर्योसौदग्धएवंवनाग्निना २ यस्यपुत्रशता
तंश्रीमदभवद्बाहुशालिनः नागायुतबलोराजासदग्धोहिदवाग्निना ३ यंपुरापर्यवीजंततालं
वृंतैर्वरस्त्रियः तंगृध्राःपर्यवीजंतदावाग्निपरिकालितं ४ सूतमागधसंघैश्चशयानोयःप्र
बोध्यते धरण्यांसनृपःसुप्तोपापस्यममकर्मभिः ५ नचशोचामिगांधारींहतपुत्रांयशस्विनीं
पतिलोकमनुप्राप्तांतथाभर्तृव्रतेस्थितां ६ पृथामेवचशोचामियापुत्रैश्वर्यमृद्धिमत् उत्सृ १६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

त्समहद्दीक्षंवनवासमरोचयत् ७ धिगहोस्त्विदमस्माकंधिग्बलंधिक्पराक्रमं क्षत्रधर्मंचधिग्यस्मा
न्मृताजीवामहेवयं ८ सूक्ष्मासाकिलकालस्यगतिर्द्विजवरोत्तम यत्समुत्सृज्यराज्यंसवनवासमरो
चयत् ९ युधिष्ठिरस्यजननीभीमस्यविजयस्यच अनाथवत्कथंदग्धा इतिमुह्यामिचिंतयन् १०
वृथासंतर्पितोवह्निःखांडवेसव्यसाचिना उपकारमजानन्सकृतघ्न इतिमेमतिः ११ यत्रादहत्सभ
गवान्मातरंसव्यसाचिनः कृत्वायोब्राह्मणच्छद्मभिक्षार्थीसमुपागतः १२ धिगग्निंधिक्चपार्थस्यविश्रु
तांसत्यसंधतां इदंकष्टतरंचान्यद्भगवन्प्रतिभातिमे १३ वृथाग्निनासमायोगोयदभूत्पृथिवीपतेः त
थातपस्विनस्तस्यराजर्षेःकौरवस्यह १४ कथमेवंविधोमृत्युःप्रशास्यपृथिवीमिमां तिष्ठत्सुमंत्र
पूतेषुतस्याग्निषुमहावने १५ वृथाग्निनासमायुक्तोनिष्ठांप्राप्तःपितामम मन्येपृथावेपमानाकृ
शाधमनिसंतता १६ हातातधर्मराजेतिसमाक्रंदन्महाभये भीमपर्याप्नुहिभयादितिचैवाभिभा
षती १७ समंततःपरिक्षिप्तामाताभून्मेदवाग्निना सहदेवःप्रियस्तस्याःपुत्रेभ्योधिकएवतु १८
नचैनांमोक्षयामासवीरोमाद्रवतीसुतः तच्छ्रुत्वारुरुदुःसर्वेसमालिंग्यपरस्परं १९ पांडवाःपंच
दुःखार्ताभूतानीवयुगक्षये तेषांतुपुरुषेंद्राणांरुदतांरुदितस्वनः २० प्रासादाभोगसंरुद्धोन्व
रौत्सीत्सरोदसी २१ आश्रमवासिकेपर्वणि नारदः नासौवृथाग्निनादग्धोयथातत्रश्रुतंम
या वैचित्रवीर्योनृपतिस्तन्मेवदतोभारत १ वनंप्रविशतातेनवायुभक्षेणधीमता अग्नयःका

आ॰ पृथिवेष्टिमत्सृष्टाइतिनःश्रुतं २ यागकालस्ततस्तस्यतातगंगीर्निर्जनेवने समुत्सृज्ययथाकामंजगमु
२५ र्भरतसत्तम ३ सविह्वहलदावह्निर्वनेतस्मिन्नभूत्किल तेनतद्दनमादीप्तमितितेतापसाब्रुवन् ४ स
राजाजाह्नवीं त्वं त्वयायात्वेकथितंमया तेनाग्निनासमायुक्तःस्वेनैवभरतर्षभ ५ एवमावेदयामासुर्मु
नयस्तेसमागत्य येतेभागीरथीतीरेमयादृष्टायुधिष्ठिर ६ एवंस्वेनाग्निनाराजासमायुक्तोमहीप
ते मासोचिरयास्त्वंनृपतिंगतःसपरमांगतिम् ७ गुरुशुश्रूषयाचैवजननीतेजनाधिप प्राप्तासुम
हतींसिद्धिमितिमेनात्रसंशयः ८ कर्तुमर्हसिराजेंद्रतेषांत्वमुदकक्रियां भ्रातृभिःसहितःसर्वैरत्र २
दत्तविधीयतां ९ वैशं॰ ततःसपृथिवीपालःपांडवानांधुरंधरः निर्ययौसहसोदर्यैःसदारश्चनरर्षभः
१० पौरजानपदाश्चैवराजभक्तिपुरस्कृताः गंगांप्रजग्मुरभितोवाससैकेनसंवृताः ११ ततोवगा
ह्यसलिलंसर्वेतेनरपुंगवाः युयुत्सुमग्रतःकृत्वाददुस्तोयंमहात्मने १२ गांधार्याश्चपृथायाश्च
विधिवन्नामगोत्रतः शौचंनिवर्तयंतस्तेतत्रोषुर्नगराद्बहिः प्रेषयामाससनरान्विधिज्ञानाप्तका
रिणः गंगाद्वारंनरश्रेष्ठोयत्रदग्धोभवन्नृपः १४ तत्रैवतेषांकृत्वातिगंगाद्वारेन्वशात्तदाकर्त
व्यानीतिपुरुषान्दत्तदेयान्महीपतिः १५ द्वादशेहनितेभ्यःसत्कृतःशौचोनराधिपः ददौश्रा
वि॰ द्धानिविधिवद्दक्षिणावंतिपांडवः १६ धृतराष्ट्रंसमुद्दिश्यददौसपृथिवीपतिः सुवर्णंरजतंगाश्च
प्रायश्चि स्वमहाधनाः १७ गांधार्याश्चैवतेजस्वीपृथायाश्चपृथकपृथक् संकीर्त्यनामनीराजाददौ २५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

संकल्पपत्नीरात्मकुल्यान्यसीनिवेशकसंवाल्पमस्मिवेत्यमरः २२ संयोज्यगंगयेतिशेषः २३ ३१ इतिश्रीनैलकंठीये भारतभावदीपे आश्रम

आ॰
२६

दानमथान्नम १८ योयदिच्छतियावच्चतावत्सलभतेनरः शयनंभोजनंयानंमणिरत्नमथोधनं १९
यानमाच्छादनंभोगान्दासीश्चसमलंकृताः ददौराजासमुद्दिश्यपतेयोर्मात्रोर्महीपतिः २० ततस्स
पृथिवीपालोदत्वाश्राद्धान्यनेकशः प्रविवेशपुनंराजानगरंवारणाह्वयं २१ तेचापिराजवचना
त्पुरुषायेगतास्तभवन् संकल्पतेषांकुल्यानिपुनः प्रत्यागमंस्ततः २२ माल्यैर्गंधैश्चविविधैर्र्च
यित्वायथाविधि कुल्यानितेषांसंयोज्यतदाचख्युर्महीपतेः २३ समाश्वास्यतुराजानंधर्मा
त्मानंयुधिष्ठिरं नारदोप्यगमत्राजन्यथर्षिर्यथेप्सितं २४ एवंवर्षाण्यतीतानिधृतराष्ट्रस्य
धीमतः वनवासेतथात्रीणिनगरेदशपंचच २५ हतपुत्रस्यसंग्रामेदानानिददतः सदा ज्ञाति
संबंधिमित्राणांभ्रातॄणांस्वजनस्यच २६ युधिष्ठिरस्तुनृपतिर्नातिप्रीतमनास्तदा धारयामास
तद्राज्यंनिहतज्ञातिबांधवः २७ तथाश्रमवासिकेपर्वण्यपिसमाहितः गंधमाल्यादियुक्तं
बहुविधंभोजयेद्विजान् २८ इतिश्रीमहाभारतेआश्रमवासिकंपर्वसमाप्तमिति ॥ ३३ ॥
शुभमस्तु भूयात् लेखकपाठकयोः ॥ अतःपरंमौसलंपर्वयस्यायमा
दिमःश्लोकः षट्त्रिंशेत्वथसंप्राप्तेवर्षेकौरवनंदनः ददर्शविपरीतानिनि
मित्तानियुधिष्ठिरः ॥१॥

पर्वार्थप्रकाशःसमाप्तः

२६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

आश्रमवास पर्व ३६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौसलपर्वपत्रे १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौ. १

ॐश्रीगणेशायनमः एवंआदिपर्वणिसमुचितानांधर्मार्थकाममोक्षाणांमध्येसभावनपर्वणोःसमस्तःतिगुरुसन्नीर्थ
सेवनादिनाधर्मः प्रतिपादितः विराटाद्यष्टकेसेनानीतिहिंसानृतकलत्रयादिनार्थः शोकप्रदोनिरूपितः हृद
रूपः कार्यफलभूतः कामः सोपसर्गोनि त्वं चमोक्षपदं निरूपितं त्रयोदशादित्रयेमोक्षहेतुर्दानविधावनवास

ॐनारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ वैशंपायनउवाच
षट्त्रिंशेत्वथसंप्राप्तेवर्षेकौरवनंदनः ददर्शविपरीतानिनिमित्तानियुधिष्ठिरः १ ववुर्वाताश्च
निर्घातारूक्षाःशर्करवर्षिणः अपसव्यानिशकुनामंडलानिप्रचक्रिरे २ प्रत्यगूहुर्महानद्यो
दिशोनीहारसंवृताः उल्काश्चांगारवर्षिण्यःप्रपेतुर्गगनाद्भुवि ३ आदित्योरजसाराज
न्समवच्छन्नमंडलः विरश्मिरुदयेनित्यंकबंधैःसमदृश्यत ४ परिवेषाश्चदृश्यंतेदारुणाश्चं
द्रसूर्ययोः त्रिवर्णाश्श्यामरूक्षांतास्तथाभस्मारुणप्रभाः ५ एतेचान्येचबहवउत्पाताभ
यशंसिनः दृश्यंतेबहवोराजन्हृदयोद्वेगकारकाः ६ ॥ छ

अनिरूप्यघोरस्पोत्पन्नरागत्ववत्त्ववनमनाश्रित्ययेकेवलंअर्थकामसक्ताःस्तेमयादिकालजेनव्यसनेनवि
नश्यंतीतिप्रतिपाद्यतेसप्तदशेनिष्कामधर्मस्यफलंगरुडादेःत्यागोष्टादशेनतत्सर्वंकामस्वर्गप्राप्तिरुक्तानिरू
पयिष्यते तत्रराज्यप्रा नेतंरषट्त्रिंशत्तमेवर्षेनाशसूचकानुत्पातानाहवैशंपायनःषट्त्रिंशइति १२६
प्र

८ भवन्नभवन् १० मौसलेमुसलकृतंकदनंसमाप्तिंस्मनसिध्वत्वा १२ मुसलैःपरकालगैर्मुसलकर्णाः ११ १४ १२

कस्यचित्त्वथकालस्यकुरुराजोयुधिष्ठिरः शुश्राववृष्णिचक्रस्यमौसलेकदनंकृतं ७ विमुक्तंवासु
देवंचश्रुत्वारामंचपांडवः समानीयाब्रवीद्भ्रातॄन्किंकरिष्यामइत्युत ८ परस्परंसमासाद्यब्रह्मदं
डबलात्कृतान् वृष्णीन्विनष्टांस्तेश्रुत्वाव्यथिताःपांडवाभवन् ९ निधनंवासुदेवस्यसमुद्रस्येवशो
षणं वीरानश्रद्दधुस्तस्यविनाशंशार्ङ्गधन्वनः १० मौशलंतेसमुत्पत्तिंदुःखशोकसमन्विताः विष
ण्णाहतसंकल्पाःपांडवाःसमुपाविशन् ११ जनमेजयउवाच कथंविनष्टाभगवन्नंधकावृष्णिभिः
सह पश्यतोवासुदेवस्यभोजाश्चैवमहारथाः १२ वैशंपायनउवाच षट्त्रिंशेथततोवर्षेवृष्णीना
मनयोमहान् अन्योन्यंमुशलैस्तेतुनिजघ्नुःकालचोदिताः १३ जनमेजयउ॰ केनानुशप्तास्तेवी
राःक्षयंवृष्ण्यंधकागताः भोजाश्चद्विजवर्यत्वंविस्तरेणावदस्वमे १४ वैशंपायनउ॰ विश्वामित्रंच
कण्वंचनारदंचतपोधनं सारणप्रमुखावीराददृशुर्द्वारकांगतान् १५ तेतान्सांबंपुरस्कृत्यभूष
यित्वास्त्रियंयथा अब्रुवन्नुपसंगम्यदैवदंडनिपीडिताः १६ इयंस्त्रीपुत्रकामस्यबभ्रोरमिततेज
सः ऋषयःसाधुजानीतकिमियंजनयिष्यति १७ इत्युक्तास्तेतदाराजन्विप्रलंभप्रधर्षिताः प्रत्य
ब्रुवंस्तान्मुनयोयत्तच्छृणुनराधिप १८ ॥अवघ्नतु॥

न॰

१८ रामायनमः ॥

श्री
२

१९ २० जगानामाकश्चित्कैवर्त्तः २१ अभ्यपुर्मेनमाशस्माभिर्दत्तः शापस्त्वयादत्तेनध्यइति २२ किंकरोयमहन्तस्तत्कं

रूपं

वृ थकविनाशायमुशलंचोरमायसं वासुदेवसदायादः सांबोयंजनयिष्यति २३ येनरूपंयम्दुर्ह्नना
न्तशोसाजातमुन्यवः उक्तेन्नाः कुलंकृत्स्नमतेरामजनार्दनौ २४ समुद्रयास्यतिश्रीमांस्त्यक्त्वादेहंहला
युधः जराकृत्स्नमहात्मानंशयानंभुविभेत्स्यति २५ इत्यब्रुवंस्ततोराजन्प्रलब्धास्तैर्दुरात्मभिः मुनयः
क्रोधरक्तान्ताः समीक्ष्याथपरस्परं २२ तथोक्त्वामुनयस्तेततः केशवमभ्ययुः अथाब्रवीत्तदावृ
ष्णीन्श्रुत्वैवंमधुसूदनः अन्तज्ञोमतिमांस्तस्यभवितव्यंतथेतितान् २३ एवमुक्त्वाहृषीकेशः
प्रविवेशपुरंतदा कृतान्तमन्यथानैच्छत्कर्तुंसजगतः प्रभुः २४ श्वोभतेथततः सांबोमुशलंतद
सूतवै येनवृष्ण्यन्धककुलेपुरुषाभस्मसात्कृताः २५ वृष्ण्यन्धकविनाशायकिंकरप्रतिमंमहत्
असूतशापजंघोरंतच्चराज्ञेन्यवेदयत् २६ विषण्णरूपस्तद्राजासूक्ष्मंचूर्णमकारयत् तच्चूर्णं
सागरेचापिप्राक्षिपत्पुरुषान्नृप २७ अघोषयंश्चनगरेवचनादाहुकस्यते जनार्दनस्यरामस्य
बभ्रोश्चैवमहात्मनः २८ अद्यप्रभृतिसर्वेषुवृष्ण्यन्धककुलेष्विह सुरासवोनकर्तव्यः सर्वैर्नगर
वासिभिः २९ यश्चनोविदितंकुर्यात्पेयंकश्चिन्नरःक्वचित् जीवन्सशूलमारोहेत्स्वयंकृत्वास
बान्धवः ३० ॥

३१ स्वयंकृत्वास्वयेकर्त्ता ३० ॥ ३० ॥ ७

११ मौशलेप्रथमः एवंकालःकपोतोलूकादिरूपेण १ यद्वंक्वचित्करालादिरूपोऽदृश्यतक्वचिन्नग्रावेक्ष्यपरि

ततोराजभयात्सर्वेनियमंचक्रिरेतदा नराःशासनमाज्ञायरामस्याक्लिष्टकर्मणः ११ इतिमौस
लपर्वणि १ वैशंपायनउवाच एवंप्रयतमानानांवृष्णीनामंधकैःसह कालोगृहाणिसर्वेषांपरिच
क्रामनित्यशः १ करालोविकटोमुंडःपुरुषःकृष्णपिंगलः गृहाण्यवेक्ष्यवृष्णीनांनादृश्यतक्वचि
त्क्वचित् २ तमघ्नंतमहेष्वासाःशरैःशतसहस्रशः नचाशक्यतवेद्धुंससर्वभूतात्ययस्तदा मौं २
३ उत्पेदिरेमहावातादारुणाश्चदिनेदिने वृष्ण्यंधकविनाशायबहवोलोमहर्षणाः ४ विवृ
द्धमूषिकारथ्याविभिन्नमणिकास्तथा केशानखाश्चसुप्तानामद्यंतेमूषिकैर्निशि ५ चीचीकू
चीतिवाशंतिसारिकावृष्णिवेश्मसु नोपशाम्यतिशब्दःसदिवारात्रिश्चैवहि ६ अनुकुर्वन्नुलू
कानांसारसाविरुतंतथा अजाःशिवानांविरुतमन्वकुर्वतभारत ७ पांडुरारक्तपादाश्चविहंगाः
कालचोदिताः वृष्ण्यंधकानांगेहेषुकपोताव्यचरंस्तदा ८ व्यजायंतखरागोषुकरभाश्वतरीषु
च शुनीष्वपिविडालाश्चमूषिकानकुलीषुच ९ नापत्रपंतपापानिकुर्वंतोवृष्णयस्तदा प्रा
द्विषन्ब्राह्मणांश्चापिपितॄन्देवांस्तथैवच १० ॥

क्रामन्नितिशेषः २ सर्वभूतानामत्ययोनाशोयस्मात् ३ ४ मणिकामृत्पात्राणि ५ ९ १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मो॰ स्वांतवेचितवत्यः ६ श्राहार्यमाणोग्रे ५ परेतिस्वनत्तत्रादर्शनमपिस्वम्सम्सर्वकंइत्यर्थः ७ एवमि
३ तित्रयोदशादिवसः क्रमपदोभदित्यर्थः ८ एवंसत्यग्निमपदेरुथ्याभाव्येतन्नजातेश्रन्तुतएकातिथिः

गृहंस्थाप्यवमन्येततत्रामजनार्दनो पत्न्यःपतीन्नत्त्वंत पत्नीस्वपतयस्तथा ११ विभावसुःप्रज्वलि
तोवामेविपरिवर्त्तते नीललोहितमंजिष्टाविसृजन्नर्चिषःपृथक् १२ उदयास्तमनेनित्यंपुर्यां
तस्यांदिवाकरः व्याहृष्यतासकृत्तेभिःकवंधैःपरिवारितः १३ महानसेषुसिद्धेष्वंसंस्कृतेतीव
भारत आहार्यमाणो क्रमयोव्यदृश्यंतसद्रस्रशः १४ पुण्याहेवाच्यमानेतुजपत्सुचमहात्मसु श्र
नि॰ मियाणा श्रूयंतेनचाहृष्यतकश्चन १५ परस्परंचनत्तत्रेहन्यमानेपुनःपुनः शृहैरपश्यन्सर्वे
तेनात्मनस्तुकथंचन १६ नदेतपांचजन्यंचहृष्वंथकनिवेशने समंतात्पर्यवार्यंतरासभाश
रुणास्वनाः १७ एवंपश्यन्हृषीकेशःसंप्राप्तंकालपर्ययं त्रयोदश्यामसावास्यांतान्दृष्ट्वाप्राव्रवीदि
दं १८ चतुर्दशीपंचदशीकृतेयंराहुणापुनः प्राप्तेवैभारतेयुद्धेप्राप्ताचापितयाघतः १९ विमृशन्नेवे
वकालंतंपरिचिंत्यजनार्दनः मेनेप्राप्तंसषट्त्रिंशंवर्षवैकेशिसूदनः २० पुत्रशोकाभिसंतप्ताग्रां
धारीहतबांधवा यदनुव्याजहारार्त्तातदिदंसमुपागमत् २१ इदंचतदनुप्राप्तमब्रवीद्यद्युधिष्ठि
रः पुराव्यूहेष्वनीकेषुदृष्ट्वोत्पातान्सुदारुणान् २२ ॥

तीणात्त्रयग्रहणंचजातमित्याहचतुर्दशीति १९ २० २१ २२ ॥ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ द्वितीयः कालीमसंतीसीराणांमंगलसत्रादिकं चोरयंती १ २ ३ ४ ५ ६ ७ ८ ९ ॥ छ

इत्युक्त्वा वासुदेवस्तु चिकीर्षुः सत्यमेव तत् आज्ञापयामास तदा तीर्थयात्रामरिंदमः २३ आ
घोषयंतपुरुषास्तत्र केशवशासनात् तीर्थयात्रामसुदेवः कार्येति पुरुषर्षभाः २४ इति मौश
लपर्वणि २ वैशंपायन उ० कालीस्त्रीपांडुरैर्दंतैः प्रविश्यहसती निशि स्त्रियः स्वप्नेषु मुष्णंती
द्वारकांपरिधावति १ अग्निहोत्रनिकेतेषु वास्तुमध्येषु वेश्मसु वृष्ण्यंधकानखादंत स्वप्ने गृ
ध्राभयानकाः २ अलंकाराश्च छत्रं च ध्वजाश्च कवचानि च ह्रियमाणान्यदृश्यंत रक्षोभिः
सुभयानकैः ३ तच्चाग्निदत्तं कृष्णस्य वज्रनाभमयोमयं दिवमाचक्रमे चक्रं वृष्णीनां पश्यतां
तदा ४ युक्तं रथं दिव्यमादित्यवर्णं हयाहरन् पश्यतो दारुकस्य ते सागरस्योपरिष्टादवर्त्तन्म
नोजवाश्चतुरो वाजिमुख्याः ५ तालः सुपर्णश्च महाध्वजौ तौ सुपूजितौ रामजनार्दनाभ्यां उ
ज्जह्रुरप्सरसो दिवानिशं वाचश्चोचुर्गम्यतां तीर्थयात्रा ६ ततो जिगमिषंतस्ते वृष्ण्यंधकमहारथाः
सांतःपुरास्तदा तीर्थयात्रामैच्छन्नरर्षभाः ७ ततो भोज्यं च भक्ष्यं च पेयं चांधकवृष्णयः बहुना
नाविधं चक्रुर्मद्यं मांसमनेकशः ८ ततः सैनिकवर्गाश्च निर्ययुर्नगराद्बहिः यानैरश्वैर्गजै
श्च श्रीमंतस्तिग्मतेजसः ९ ॥ छ

मौ·
४

निशम्यहृष्टा अर्थविशारदःमोक्षपंडितः ९ ब्राह्मणोर्थेस्थितिब्राह्मणार्थेद्व्यमामन्त्रविनियोजनंश्रुत

ततःप्रभासेन्यवसन्यथोद्दिष्टंयथागृहं प्रभूतभक्ष्यपेयास्तेसदारायादवास्तदा १० निविष्टांस्तान्नि
शम्याथसमुद्रांतेसयोगवित् जगामामंत्र्यतान्वीरानुद्धवोर्थविशारदः ११ तंप्रस्थितंमहात्मानमभिवा
द्यकृतांजलिं जानन्विनाशंवृष्णीनांनैछद्वारयितुंहरिः १२ ततःकालपरीतास्तेवृष्ण्यंधकमहार
थाः अपश्यन्नुद्धवंयांतंतेजसावृत्यरोदसी १३ ब्राह्मणार्थेषुयत्सिद्धमन्नंतेषांमहात्मनां तद्वानरे
भ्यःप्रददुःसुरागंधसमन्वितं १४ ततस्तूर्यशताकीर्णंनटनर्तकसंकुले प्रवर्त्ततमहापानंप्रभा
सेतिग्मतेजसां १५ कृष्णस्यसंनिधौरामःसहितःकृतवर्मणा अपिबद्युयुधानश्चगदोबभ्रुस्त
थैवच १६ ततःपरिषदोमध्येयुयुधानोमदोत्कटः अब्रवीत्कृतवर्माणमवहस्यावमन्यच १७
कःक्षत्रियोहन्यमानःसुप्तान्हन्यान्मृतानिव नतन्मृष्यंतिहार्दिक्ययादवायत्त्वयाकृतं १८ इ
त्युक्तेयुयुधानेनपूजयामासतद्वचः प्रद्युम्नोरथिनांश्रेष्ठोहार्दिक्यमवमन्यच १९ ततःपरम।
संक्रुद्धःकृतवर्मातदब्रवीत् निर्दिशन्निवसावज्ञंतदासव्येनपाणिना २० भूरिश्रवा[illegible]न्न। छि
बाहुर्युद्धेप्रायगतस्त्वया वधेनसुनृशंसेनकथंवीरेणपातितः २१ इतितस्यवचःश्रुत्वाकेश
वःपरवीरहा तिर्यक्सरोषयादृष्ट्यावीक्षांचक्रेसमन्युमान् २२॥ छ
क्षां

यकरमित्यर्थः १४ १५ १६ १७ २२

४

२३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ॥ ७

मणिः स्यमंतकश्चैव यः स सत्राजितोभवत् तां कथां स्मारयामास सात्यकिर्मधुसूदनं २३ तच्छ्रुत्वा
केशवस्यांकमगमद्रुदती तदा सत्यभामा प्रकुपिता कोपयंती जनार्दनं २४ तत उत्थाय सक्रोधः सा
त्यकिर्वाक्यमब्रवीत् पंचानां द्रौपदेयानां धृष्टद्युम्नशिखंडिनोः २५ एष गच्छामि पदवीं सत्येन
च तथा शपे सौप्तिके ये च निहताः सुप्तानेन दुरात्मना २६ द्रोणपुत्रसहायेन पापेन कृतवर्म-
णा समाप्तमायुरस्याद्य यशश्चैव सुमध्यमे २७ इत्येवमुक्त्वा खड्गेन केशवस्य समीपतः अभि
द्रुत्य शिरः क्रुद्धश्चिच्छेद कृतवर्मणः २८ तथान्यानपि निघ्नंतं युयुधानं समंततः अभ्यधाव
द्धृषीकेशो विनिवारयितुं तदा २९ एकीभूतास्ततः सर्वे कालपर्यायचोदिताः भोजांधका
महाराज शैनेयं पर्यवारयन् ३० तान्दृष्ट्वा पततस्तूर्णमभिक्रुद्धान् जनार्दनः न चुक्रोध मह-
तेजा जानन्कालस्य पर्ययं ३१ ते तु पानमदाविष्टाश्चोदिताः कालधर्मणा युयुधानमथा-
भ्यघ्नन्नुच्छिष्टैर्भाजनैस्तदा ३२ हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनंदनः तदनंतरमाग-
च्छन्मोक्षयिष्यन् शिनेः सुतं ३३ स भोजैः सह संयुक्तः सात्यकिश्चांधकैः सह व्यायच्छमानौ-
तौ वीरौ बाहुद्रविणशालिनौ ३४ बहुत्वान्निहतौ तत्र उभौ कृष्णस्य पश्यतः हतं दृष्ट्वा तु शैनेयं
पुत्रं च यदुनंदनः ३५ ॥ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौ॰ ५

३४ विधस्ताडनं तदनर्हान्त्रविध्यान्तो दादिकाहिद्येविगुपपलवनाग्रंकः ततोर्हार्थ्येयः विध्याविध्या ३५ त
एरकाणां तदा मुष्टिं कोपात्जग्राह केशवः तदभून्मुशलं घोरं वज्रकल्पमयोमयं ३६ जघा
न कृष्णस्तांस्तेन ये ये प्रमुखतो भवन् ततोंधकाश्च शैनेया भोजाश्च वृष्णयस्तथा जघ्नुरन्योन्यमा
क्रंदे मुशलैः कालचोदिताः यस्तेषामेरकां कश्चिज्जग्राह रुपितो नृपः ३८ वज्रभूतेव सा राजन्न
दृश्यत तदा विभो तृणं च मुशलीभूतमपि तत्र व्यदृश्यत ३९ ब्रह्मदंडकृतं सर्वमिति तद्विद्धि
पार्थिव आविध्याविध्य ते राजन्प्रक्षिपंति स्म यत्तृणं ४० तद्वज्रभूतं मुशलं व्यदृश्यत तदा दृढं
अवधीत्पितरं पुत्रः पिता पुत्रं च भारत ४१ मत्ताः परिपतंति स्म योधयंतः परस्परं पतंगा इव चाग्नौ ते नि
पेतुः कुकुरांधकाः ४२ नासीत्पलायने बुद्धिर्वध्यमानस्य कस्यचित् तत्रापश्यन्महाबाहुर्जानन्का
लस्य पर्ययं मुशलं समवष्टभ्य तस्थौ स मधुसूदनः ४३ सांबं च निहतं दृष्ट्वा चारुदेष्णं च माधवः
प्रद्युम्नं चानिरुद्धं च ततश्चुक्रोध माधवः ४४ गदं वीक्ष्य शयानं च भृशं कोपसमन्वितः स निःशेषं
तदा चक्रे शार्ङ्गचक्रगदाधरः ४५ तं निघ्नंतं महातेजा बभ्रुः परपुरंजयः दारुकश्चैव दाशार्हमूचतु
र्यन्निबोध तत् ४६ भगवन्निहताः सर्वे त्वया भूयिष्ठशो नराः रामस्य पदमन्विच्छ तत्र गच्छाम
यत्र सः ४७ इति मौशलपर्वणि ३ ॥ ॥

त्रेति यन्मुसलमपश्यत्तद्देवावष्टभ्य तस्थौ ४७ तृतीयोध्यायः ३ ॥ ७ ॥ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततोपतेंतः शीघ्रंगच्छंतः।४ कूरेलोहमुद्गरेपुक्तंवहंमसलंब्राह्मणाणामेवमुशालेस्तयमेवनियत्मावधीत्सार्थे

वैशंपायनउ॰ ततोयपुदारुकःकेशवश्चबभ्रुश्चरामस्यपदंपतंतः अथापश्यन्राममनंतवीर्यं
वृक्षेश्रितंचिंतयानंविविक्ते १ ततःसमासाद्यमहानुभावःकृष्णस्तदादारुकमन्वशासत् गत्वा
कुरून्सर्वमिदंमहांतंपार्थायशंसस्ववधंयदूनां २ ततोर्जुनःक्षिप्रमिहोपयातुश्रुत्वामृतान्यादवान्ब्र
ह्मशापात् इत्येवमुक्तःसययौरथेनकुरूंस्तदादारुकोनष्टचेताः ३ ततोगतेदारुकेकेशवोथदृ।
ष्ट्वांतिकेबभ्रुमुवाचवाक्यं स्त्रियोभवान्रक्षितुंयातुशीघ्रंनैताहिंस्युर्दस्यवोवित्तलोभात् ४ सप्रस्थि
तःकेशवेनानुशिष्टोमदातुरोज्ञातिवधार्दितश्च तंविश्रांतंसंनिधौकेशवस्यदुवंतमेकंसहसै।
वबभ्रुं ब्रह्मानुशप्तमवधीन्महद्वैकूटेयुक्तंमुसलंलुब्धकस्य ५ ततोदृष्ट्वानिहतंबभ्रुमाहकृ
ष्णोग्रजंभ्रातरमग्रतेजाः इहैवत्वंमांप्रतीक्षस्वरामयावत्स्त्रियोज्ञातिवशाःकरोमि ६ ततः
पुरींद्वारवतींप्रविश्यजनार्दनःपितरंप्राहवाक्यं स्त्रियोभवान्रक्षतुनःसमग्राधनंजयस्याग।
मनंप्रतीक्षन् ७ रामोवनांतेप्रतिपालयन्मामास्तेद्याहंतेनसमागमिष्ये दृष्टंमयेदंनिधनंय
दूनांराज्ञांचपूर्वंकुरुपुंगवानां ८ नाहंविनायदुभिर्यादवानांपुरीमिमामशक्तेद्रष्टुमद्य तपश्च
रिष्यामिनिबोधतन्मेरामेणसार्धंवनमभ्युपेत्य ९ ॥ छ ॥

श्लोकः ॥ ५ ॥ छ

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौ० इतीदमुक्त्वा शिरसा च पादौ संस्पृश्य कृष्णस्य स त्वरितो जगाम ततो महान्निनदः प्रादुरासीत्सस्त्रीकुमारस्य पुर
६ स्य तस्य १० अथाब्रवीत्केशवः संनिवर्त्य शब्दं श्रुत्वा योषितां क्रोशतीनां पुरीमिमामेष्यति सव्यसाची स
वो दुःखान्मोक्षयिता नराग्र्यः ११ ततो गत्वा केशवस्तं ददर्श रामं वने स्थितमेकं विविक्ते अथापश्यद्यो
नस्य गयुक्तस्य नागं मुखान्निःसरंतं महांतं १२ श्वेतं ययौ स ततः प्रेक्ष्यमाणो महार्णवो येन महानुभावः सहस्र
शीर्षः पर्वताभोगवर्ष्मा रक्ताननः स्वां तनुं तां विमुच्य १३ सम्यक्च तं सागरः प्रत्यगृह्णान्नागा दिव्याः
सरितश्च पुण्याः कर्कोटको वासुकिस्तक्षकश्च पृथुश्रवा वरुणः कुंजरश्च १४ मिश्री शंखः कु
मुदः पुंडरीकस्तथा नागो धृतराष्ट्रो महात्मा ह्रादः क्राथः शितिकंठोग्रतेजास्तथा नागौ चक्रमंदा
तिषंडौ १५ नागश्रेष्ठो दुर्मुखश्चांबरीषः स्वयं राजा वरुणश्चापि राजन् प्रत्युद्गम्य स्वागतेनाभ्यनं
दंस्ते पूजयंत्यर्घ्यपाद्यक्रियाभिः १६ ततो गते भ्रातरि वासुदेवो जानन्सर्वा गतयो दिव्यदृष्टिः वने शू
न्ये विचरंश्चिंतयानो भूमौ चाथ संविवेशाग्र्यतेजाः १७ सर्वं तेन प्राक्तदा वित्तमासीद्गांधार्या यद्वाक्य
म मुक्तः स पूर्वं दुर्वाससा पायसोच्छिष्टलिप्ते यच्चाप्युक्तं तच्च सस्मार वाक्यं १८ स चिंतयन्नंधकवृष्णिना
शं कुरुक्षयं चैव महानुभावः मेने ततः संक्रमणस्य कालं ततश्चकारेंद्रियसन्निरोधं १९ तथा च लोक
त्रयपालनार्थमात्रेयवाक्यप्रतिपालनाय देवोपि संदेहविमोक्षहेतोर्निमित्तमैच्छत्सकलार्थतत्ववित् २०
स संनिरुद्धेंद्रियवाङ्मनास्तु शिश्ये महायोगमुपेत्य कृष्णः जराथ तं देशमुपाजगाम लुब्धस्तदानीं मृगलिप्सुरुग्रः ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२२२३ २४ २५ २६ २७ २८ इतिमौशलपर्वणि १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ छ

सकेशवंयोगयुक्तंशयानंमृगशंकीलुब्धकःसायकेन जराविध्यत्पादतलेत्वरावांस्तंचाभि
तस्तज्जिघृक्षुर्जगाम २२ अथापश्यत्पुरुषंयोगयुक्तंपीतांबरंलुब्धकोनेकबाहुं मत्वात्मानंत्वपरा
द्धंसतस्यपादौजराजग्राहशंकितात्मा २३ आश्वासयंस्तंमहात्मातदानींगच्छन्नूर्ध्वंरोदसीव्याप्य
लक्ष्म्या दिवंप्राप्तंवासवोथाश्विनौचरुद्रादित्यावसवश्चाथविश्वे २४ प्रत्युद्ययुर्मुनयश्चापिसि॰ ग॰
द्धागंधर्वमुख्याश्चसहाप्सरोभिः ततोराजन्भगवानुग्रतेजानारायणःप्रभवश्चाव्ययश्च २५
त्स्यां योगाचार्योरोदसीव्याप्यल[illegible]स्थानंप्रापस्वंमहात्माप्रमेयं ततोदेवैर्ऋषिभिश्चापिकृष्णःस
मागतश्चारणैश्चैवराजन् २६ गंधर्वाग्र्यैरप्सरोभिर्वराभिः सिद्धैःसाध्यैश्चानतैःपूज्यमानः तेवै
देवाःप्रत्यनंदंतराजन्मुनिः श्रेष्ठावाग्भिरानर्चुरीशं २७ तंगंधर्वाश्चापितस्थुस्तुवंतःप्रीत्या
चैनंपुरुहूतोभ्यनंदत् २८ इतिमौशलपर्वणि ४ वैशं॰ दारुकोपिकुरून्[illegible] दृष्ट्वापार्थान्महा गत्वा॰
रथान् आचष्टमौशलेवृष्णीनन्योन्येनोपसंहृतान् १ श्रुत्वाविनष्टान्वार्ष्णेयान्सभोजांध
ककौकुरान् पांडवाःशोकसंतप्ताविवित्रस्तमनसोभवन् २ ततोर्जुनस्तानामंत्र्यकेशवस्यप्रियः
सखा प्रययौमातुलंद्रष्टुंनेदमस्तीतिचाब्रवीत् ३ सवृ[illegible]निलयंगत्वादारुकेणसहप्रभो ददर्श ष्णि॰
द्वारकांवीरोमृ[illegible]नाथामिवस्त्रियं ४ याःस्मतालोकनाथेननाथवत्यःपुराभवन् तास्त्वनाथास्त
त

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मो·
८

दानार्थे पार्थं दृष्ट्वा विचक्रमुः ५ षोडशस्त्रीसहस्राणि वासुदेवपरिग्रहः तासामासीन्महा
नादो दृष्ट्वैवार्जुनमागतं ६ तास्तु दृष्ट्वैव कौरव्यो बाष्पेणापिहितेक्षणः हीनाः कृष्णेन पु
त्रैश्च नाथाः कृत्स्नोभिवीक्षितं ७ स तां वृष्ण्यंधकजलां हयमीनां रथोडुपां वादित्ररथघो
षौघां वेश्मतीर्थमहाह्रदां ८ रत्नशैवलसंघातां वज्रप्राकारमालिनीं रथ्यास्रोतोजलाव दं
र्तांचत्वरस्तिमितह्रदां ९ रामकृष्णमहाग्राहां द्वारकां सरितं तदा कालपाशग्रहां भीमां न
दीं वैतरणीमिव १० ददर्श वासविर्धीमान्विहीनां वृष्णिपुंगवैः गतश्रियं निरानंदां पद्मिनीं
शिशिरे यथा ११ तां दृष्ट्वा द्वारकां पार्थस्ताश्च कृष्णस्य योषितः सस्वनं बाष्पमुत्सृज्य निपपात
महीतले १२ ॥ ७

८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१५ पंचमोध्यायः वैशंपायनं ५ शिष्यौ प्रद्युम्नसात्यकी १ १०८९ ॥ छ ॥

मौ स्त्रां जित्वा ततः सत्या रुक्मिणी च विशांपते अभिपत्य प्ररुरुदुः परिवार्य धनंजयं १३ ततस्ते कां
चने पीठे समुत्थायोपवेश्य च अब्रुवंस्तां महात्मानं परिवार्योपतस्थिरे १४ ततः संस्तूय गोविंदं
कथयित्वा च पांडवः आश्वास्य ताः स्त्रियश्चापि मातुलं द्रष्टुमभ्यगात् १५ इति मौशलपर्वणि वैशंपा.
वैशंपायनं महात्मानं वीरमानकदुंदुभिं पुत्रशोकेन संतप्तं ददर्श कुरुपुंगवः १ तस्या[illegible]परिपूर्णाक्षो
व्यूढोरस्को महाभुजः आर्त्तस्यार्त्ततरः पार्थः पादौ जग्राह भारत २ तस्य मूर्धानमाघ्रातुमियेषान
कदुंदुभिः स्वस्रीयस्य महाबाहुर्न शशाक च शत्रुहन् ३ समालिंग्यार्जुनं वृद्धः स भुजाभ्यां म
हाभुजः रुदन्पुत्रान्स्मर[illegible]न्सर्वान्विललाप सुविह्वलः भ्रातॄन्पुत्रांश्च पौत्रांश्च दौहित्रांश्च सखीन
पि ४ वसुदेवः यैर्जिता भूमिपालाश्च दैत्याश्च शतशोर्जुन तान्दृष्ट्वा नेह पश्यामि जीवाम्यर्जुन
दुर्मरः ५ यौ तावर्जुन शिष्यौ ते प्रियौ बहुमतौ तदा तयोरपनया[illegible]त्पार्थ वृष्णयो निधनं गताः ६
यौ तौ वृष्णिप्रवीराणां द्वावेवातिरथौ मतौ प्रद्युम्नो युयुधानश्च कथयन्कत्थसे च यौ ७ नौ
सदा कुरुश्रेष्ठ त्वं कृष्णस्य प्रियभाजनौ तावुभौ वृष्णिनाशस्य मुखमास्तां धनंजय ८ न त
गर्हामि शैनेयं हार्दिक्यं चाहमर्जुन अक्रूरं रौक्मिणेयं वै शापो ह्येवात्र कारणं ९ ॥ ११

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

गो· ८ १० काशिराजं पौंड्रकं ११ एतं वंशातयं यत्नयाद्वालानामपरायानस्त्वपिसामर्थ्येनपेलाकरेणमनयस्त

केशिनं यस्त्वकंसं च विक्रम्य जगतः प्रभुः विदेहावकरोत्पार्थ वैयं च बलगर्वितं १४ नैषादिमे
कलव्यं च चक्रे कालिंगमागधान् गांधारान्काशिराजं च मरुभूमौ च पार्थिवान् ११ प्राच्यांश्च दा
क्षिणात्यांश्च पार्वतीयांस्तथान्नृपान् सोभ्युपेत्य तवानेन मनयान्मधुसूदनः १२ त्वं हितेनारदा
श्चेवमनयश्च सनातनं गोविंदमनघं देवमभिजानीध्वमच्युतं १३ अन्यपपूर्ण्यच्च सविभर्त्तीति
त्वयमधोतज्ञः समुपेतितवान्लिंतं सर्वयेममम पुत्रकः १४ गांधार्यो वचनं यत्न दृषीणां च
परंतप तन्न्लमन्यथाकर्तुं नेच्छत्स [illegible] जगतः
प्रभुः १५ अत्यंतं भवतश्चापितवपौत्रः पुरंतप ऋस्यत्यान्नाहतश्चापि जीवितस्त्वस्यतेजसा
१६ इमोस्त्वनैकृत्वान्ज्ञातीन् रक्षितुं समवोनव ततः पुत्रांश्च पौत्रांश्च भ्रातॄन्नथ सखीनथ
१७ पायानाम्निहतान्दृष्ट्वा ततो मामब्रवीदिदं संग्रामोर्ज्यमस्मातः कुलस्य भरतर्षभ १८
श्वातमित्थिपतिवीभत्सुरिमां द्वारवतीपुरीं आख्येयंतस्यपद्मं संहलीनां वैश्यास्मं महत् १९ स
तुश्रुत्वा महातेजा यदूनां निधनं प्रभो आगंता क्षिप्रमेवेह नमेनास्ति विचारणा २० ॥

स्माह्वा १२ सामर्थ्यमेवाहत्वमिति १४ १५ १६ १७ १८ १९ २० ॥७॥ ८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

योहमितितैनाराधणोतिजीवपरमात्मनोर्ध्यतिहाशेणभगवतोग्र भिदउक्तस्तेज्ञातावानेवदन्तपिवस्तदेवो
नयोकेसंचतीत्याश्चर्यंभगवन्मायाबलमितिभावः २१ अहमिति कालेमस्तेग्रात्मानःकर्त्तोकरि
योहंतमर्जुनेमेविद्धियोत्तेनःसोहमेवत यदृच्छात्तथाकार्यमितिबुध्यस्वभारत २२ सत्ती
भुशाशकालात्तपांडवोबालकेष्वच प्रतिपुत्स्यतिवीभत्सभवतश्चोर्ध्वदेहिकं २३ इमांच
नगरींसद्यःप्रतियातेयनेजरो शाकाराहालकोपेतांसमुद्रःप्लावयिष्यति २४ अहंदेशेच
कस्मिंश्चित्तुण्ये नियममास्थितः कालंकर्त्तासत्यएवरामेणसहधीमता २५ एवमुक्त्वा
हृषीकेशोमामचिंत्यपराक्रमः हित्वामांबालकैःसार्धंदिशंकामप्यगात्प्रभुः २६ सोहं
तौचमहात्मानौचिंतयन्भ्रातरौतव घोरंज्ञातिवधंचैवनभुंजेशोककर्शितः २७ नभो
क्ष्येनचजीविष्ये दिष्ट्यापश्यामिपांडव यदुक्तंपार्थकृष्णेनतत्सर्वमविलंकुरु २८ एत
त्तेपार्थराज्यंचस्त्रियोरत्नानिचैवहि इष्टान्प्राणानहंहीमांस्त्यक्ष्यामि [illegible] २९ इति भरतर्षभ
मौषलपर्वणि वैशंपायन एवमुक्तःसवीभत्समातुलेनपरंतपः दुर्मनादीनमनसंवसुदेवमथाब्र
वीत् १ नाहंवृष्णिप्रवीरेणमयाभृभिश्चैवमातुल विहीनांपृथिवींद्रष्टुंशक्तश्चेहकथंचन २ राजाच
भीमसेनश्चसहदेवश्चपांडवः नकुलोयाज्ञसेनीचषडेकमनसोवयं ३ राज्ञःसंक्रमणेचापिका
लोयं सन्यःस्यनेनमहाकोसंशयोनकर्त्तव्यमनुत्तमं ४ षष्ठोध्यायः एवमुक्तःसवीभत्सुरितिस्पष्टोर्थः १७

मौ० २

सर्वथा वृष्णिदारांस्तु बालवृद्धं तथैव च नयिष्ये परिगृह्याहमिंद्रप्रस्थमरिंदम ५ इत्युक्त्वा दारुकमिमं वाक्य
माह धनंजयः अमात्यान्वृष्णिवीराणां द्रष्टुमिच्छामि माचिरं ६ इत्येवमुक्त्वा वचनं सुधर्मां यादवीं सभां प्रविवे
शार्जुनः शूरः शोचमानो महारथान् ७ तमासनगतं तत्र सर्वाः प्रकृतयस्तथा ब्राह्मणा नैगमास्तत्र परि
वार्योपतस्थिरे ८ तान्दीनमनसः सर्वान् निभृतान्गतचेतसः उवाचेदं वचः काले पार्थो दीनतरस्त
था ९ शक्रप्रस्थमहं नेष्ये वृष्ण्यंधकजनं स्वयं इदं तु नगरं सर्वं समुद्रः प्लावयिष्यति १० सज्जीकुरुत या
नानि रत्नानि विविधानि च वज्रोयं भवतां राजा शक्रप्रस्थे भविष्यति ११ सप्तमे दिवसे चैव रवौ विमल उ
द्गते बहिर्वत्स्यामहे सर्वे सज्जीभवत माचिरं १२ इत्युक्तास्तेन ते सर्वे पार्थेनाक्लिष्टकर्मणा सज्जमाशु त
तश्चक्रुः स्वसिध्यर्थं समुत्सुकाः १३ तां रात्रिमवसत्पार्थः केशवस्य निवेशने महता शोकमोहेन स
हसाभिपरिप्लुतः १४ श्वोभूतेथ ततः शौरिर्वसुदेवः प्रतापवान् युक्त्वात्मानं महातेजा जगाम ग
तिमुत्तमां १५ ततः शब्दो महानासीद्वसुदेवनिवेशने दारुणः क्रोशतीनां च रुदतीनां च योषितां १६
प्रकीर्णमूर्धजाः सर्वा विमुक्ताभरणस्रजः उरांसि पाणिभिर्घ्नंत्यो व्यलपन्करुणं स्त्रियः १७ तं देव
की च भद्रा च रोहिणी मदिरा तथा अन्वारोहंत च तदा भर्तारं योषितां वराः १८ ततः शौरिं नृयुक्तेन
बहुमूल्येन भास्वता यानेन महता पार्थो बहिर्निष्कासयत्तदा १९ तमन्वयुस्तत्र तत्र दुःखशोकसमा
हताः द्वारकावासिनः सर्वे पौरजानपदा हिताः २० तस्याश्वमेधिकं छत्रं दीप्यमानाश्च पावकाः पुरस्ता
त्तस्य यानस्य याजकाश्चत ययुः २१ अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलंकृताः स्त्रीसहस्रैः परिवृता वधूभिश्च स

तो

॥ ५ ॥ मौसल

यस्त्वेषः विपुलस्तस्य जीवतोभून्महात्मनः तत्रैनमुपसंकल्प्य पितृमेधं प्रचक्रिरे २३ तं चिताग्निगतं वीरं शूरपुत्रं
वरांगनाः ततोन्वारुरुहुः पत्न्यश्चतस्रः पतिलोकगाः २४ तं वै चतसृभिः स्त्रीभिरन्वितं पांडुनंदनः अदाहयच्चं
दनैश्च गंधैरुच्चावचैरपि २५ ततः प्रादुरभूच्छब्दः समिद्धस्य विभावसोः सामगानां च निर्घोषो नराणां रुद
तामपि २६ ततो वज्रप्रधानास्ते वृष्ण्यंधककुमारकाः सर्वे चैवोदकं चक्रुः स्त्रियश्चैव महात्मनः २७ अलु
प्तधर्म स्तं धर्मं कारयित्वा स फाल्गुनः जगाम वृष्णयो यत्र विनष्टा भरतर्षभ २८ स तान् दृष्ट्वा निपतिता
न् कदने भृशदुःखितः बभूवातीव कौरव्यः प्राप्तकालं चकार ह २९ यथाप्रधानतश्चैव चक्रे सर्वास्तथा
क्रियाः ये हता ब्रह्मशापेन मुशलैरेरकोद्भवैः ३० ततः शरीरे रामस्य वासुदेवस्य चोभयोः अन्विष्य दाहया
मास पुरुषैराप्तकारिभिः ३१ स तेषां विधिवत्कृत्वा प्रेतकार्याणि पांडवः सप्तमे दिवसे प्रायाद्रथमारुह्य
सत्वरः ३२ अश्वयुक्तै रथैश्चापि गोखरोष्ट्रयुतैरपि स्त्रियस्ता वृष्णिवीराणां रुदंत्यः शोककर्शिताः ३३
अन्वजग्मुर्महात्मानं पांडुपुत्रं धनंजयं भृत्यास्त्वंधकवृष्णीनां सादिनो रथिनश्च ये ३४ वीरहीनं वृद्धबा
लं पौरजानपदास्तथा ययुस्ते परिवार्याथ कलत्रं पार्थशासनात् ३५ कुंजरैश्च गजारोहा ययुः शैल
निभैस्तथा सपादरक्षैः संयुक्ताः सांतरायुधिका ययुः ३६ पुत्राश्चांधकवृष्णीनां सर्वे पार्थम
नुव्रताः ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महाधनाः ३७ दश षट् च सहस्राणि वासुदेवावरोधनं पु
रस्कृत्य ययुर्व पौत्रं कृष्णस्य धीमतः ३८ बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च भोजवृष्ण्यंधक
जं

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौ.
१

स्त्रीगणं हतनाथानि निर्ययुः ३९ तत्सागरसमं प्रेक्ष्य वृष्णिचक्रं महर्द्धिमत् उवाह रथिनां श्रेष्ठः
पार्थः परपुरंजयः ४० निर्याते तु जने तस्मिन्सागरो मकरालयः द्वारकां रत्नसंपूर्णां जलेनाप्ला
वयत्तदा ४१ यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्याभ्यमुंचत तत्तत्संप्लावयामास सलिलेन स साग
रः ४२ तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः तूर्णात्तूर्णतरं जग्मुरहो दैवमिति ब्रुवन् ४३ का
ननेषु च रम्येषु पर्वतेषु नदीषु च निवसन्नानयामास वृष्णिदारान्धनंजयः ४४ स पंचनदमा
साद्य धीमानतिसमृद्धिमत् देशे गोपशुधान्याढ्ये निवासमकरोत्प्रभुः ४५ ततो लोभः समभवद्दस् व्यो
तो निहतेश्वराः दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन भारत ४६ ततस्ते पापकर्माणो लोभोपहत
चेतसः आभीरा मंत्रयामासुः समेत्याशुभदर्शनाः ४७ अयमेकोर्जुनो धन्वी वृद्धबालं हते
श्वरं नयत्यस्मानतिक्रम्य योधाश्चेमे हतौजसः ४८ ततो यष्टिप्रहरणा दस्यवस्ते सहस्रशः अ
भ्यधावंत वृष्णीनां तं जनं लोप्त्रहारिणः ४९ महता सिंहनादेन द्रावयंतः पृथग्जनं अभिपेतु
र्धनार्थं ते कालपर्यायचोदिताः ५० ततो निवृत्तः कौंतेयः सहसा सपदानुगः उवाच तान्म
हाबाहुरर्जुनः प्रहसन्निव ५१ निवर्तध्वमधर्मज्ञा यदि जीवितुमिच्छथ इदानीं शरैर्निर्भिन्नाः
शोचध्वं निहता मया ५२ तथोक्तास्तेन वीरेण कदर्थीकृत्य तद्वचः अभिपेतुर्जनं मूढा वार्यमाणाः
पुनः पुनः ५३ ॥ ॥ १

अब्रवीच्च तदा सर्वान्प्राणिनस्त्वरसागरः त्यक्त्वात्र वर्णानि च यान्नानि विविधानि च ४२ भाजनानि च हैमानि रौप्याणि च महत्तराः परित्यज्य हृ सं
जातं ममेदं द्रव्यमुत्तमं ४४ सवेश्मिका पुरी चेयं हरेः पात्या मया ध्रुवा पुनर्यावावतारस्तु भविष्यति हरेर्युगे ४५ कौशाप्यन्तो ... सुबलाख्य
तोयनम + इति ः १०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततोर्ज्जुनोधनुर्द्दिव्यंगांडीवमजरंमहत् आरोपयितुमारेभेयत्नादिवकथंचन ५४ च
कारसज्जंकृच्छ्रेणसंभ्रमेतुमुलेसति चिंतयामासशास्त्राणिनचसस्मारतान्यपि ५५
वैकृत्यंतंमहद्दृष्ट्वाभुजवीर्यंतथायुधि दिव्यानांमहदस्त्राणांविनाशाद्व्रीडितोभवत् ५६
वृष्णियोधाश्चतेसर्वेगजाश्वरथयोधिनः नशेकुरावर्त्तयितुंह्रियमाणंचतंजनं ५७ क
लत्रस्यबहुत्वात्तुसंपतत्सुततस्ततः प्रयत्नमकरोत्पार्थोजनस्यपरिरक्षणे ५८ मिषतांस
र्वयोधानांततस्ताःप्रमदोत्तमाः समंततोवकृष्यंतकामाच्चान्याःप्रवव्रजुः ५९ ततोगांडीव
निर्मुक्तैःशरैःपार्थोधनंजयः जघानदस्यून्सोद्वेगःवृष्णिभृत्यैःसहप्रभुः ६० क्षणेनतस्यते
प्र राजन्क्षयंजग्मुरजि[illegible]गाः अक्षयाहिपुराभूत्वाक्षीणाःक्षतजभोजनाः ६१ सशरक्षयमा
त्या साद्यदुःखशोकसमाहतः धनुःको[illegible]तदादस्यूनवधीत्पाकशासनिः ६२ प्रेक्षतस्त्वे
वपार्थस्यवृष्ण्यंधकवरस्त्रियः जग्मुरादायतेम्लेच्छाःसमंताज्जनमेजय ६३ धनंजयः
स्तुदैवंतन्मनसाचिंतयत्प्रभुः दुःखशोकसमाविष्टोनिश्वासपरमोभवत् ६४ ॥ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौ.
११

श्रस्त्राणांचग्रणाशेनबाहुवीर्यस्यसंक्षयात् धनुषश्चाविधेयत्वाछराणांसंक्षयेनच
९५ बभूवविमनाःपार्थोदैवमित्यनचिंतयत् न्यवर्त्ततततोराजन्नेदमस्तीतिचा
ब्रवीत् ९६ ततःसशेषमादायकलत्रस्यमहामतिः हृतभूयिष्ठरत्नस्यकुरुक्षेत्र
मवातरत् ९७ एवंकलत्रमानीयवृष्णीनांहृतशेषितं न्यवेशयतकौरव्यस्तत्रं
तत्रधनंजयः ९८ हार्दिक्यतनयंपार्थोनगरेमार्त्तिकावते भोजराजकलत्रेचहृत
शेषंनरोत्तमः ९९ ॥ ऽऽ ७

११

ततोबालांश्चवृद्धांश्चस्त्रियश्चादायपांडवः वीरैर्विहीनान्सर्वांस्तान्शक्रप्रस्थेन्यवेशयत् ७० यौयुधा
नेसरस्वत्यांपुत्रंसात्यकिनःप्रियं न्यवेशयतधर्मात्मावृद्धबालपुरस्कृतं ७१ इंद्रप्रस्थेददौराज्यंवज्रायप
रवीरहा वज्रेणाक्रूरदारास्तुवार्यमाणाःप्रवव्रजुः ७२ रुक्मिणीत्वथगांधारीशैब्याहैमवतीत्वपि
देवीजांबवतीचैवविविशुर्जातवेदसं ७३ सत्यभामातथैवान्यादेव्यःकृष्णस्यसंमताः वनंप्रविवि
शूराजंस्तापस्येकृतनिश्चयाः ७४ फलमूलादिभोजिन्योहरिध्यानैकतत्पराः हिमवंतमभिक्रम्य
कलापग्राममाविशन् ७५ द्वारकावासिनोयेतुपुरुषाःपार्थमभ्ययुः यथार्थंसंविभज्यैतावज्रेपर्य न्व
ददज्जयः ७६ सतत्कृत्वाप्राप्तकालंबाष्पेणापिहितोर्जुनः कृष्णद्वैपायनंव्यासंददर्शासीनमाश्र
मे ७७ मौशलपर्वणि वैशंपायनउवाच प्रविशन्नर्जुनोराजन्नाश्रमेसत्यवादिनः ददर्शासीन
मेकांतेमुनिंसत्यवतीसुतं १ सतमासाद्यधर्मज्ञमुपतस्थेमहाव्रतं अर्जुनोस्मीतिनामास्मै
निवेद्याभ्यवदत्ततः २ स्वागतंतेस्त्वितिप्राहमुनिःसत्यवतीसुतः आस्यतामितिचोवाचप्रसन्नात्मा
महामुनिः ३ तमप्रतीतमनसंनिश्वसंतंपुनःपुनः निर्विण्णमनसंदृष्ट्वापार्थंव्यासो
ब्रवीदिदं ४ ॥ ॥ ७
प्र॰

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौ॰

१२

नखोदकं केशोदकं वस्त्रप्रांतोदशानतां स्रोत उदकं कुंभमुखोदकं च अवीरज्ञानारीरजस्वलातस्यारजं प्रस
वकाले दिनत्रयादर्वाक् अन्नगमनं तस्यां मैथुनं ब्राह्मणस्य वधः युद्धे पराजयश्चेति सप्तभिर्निमित्तैः पु
रुषः भ्रष्टश्रीर्भवति ५ अभिन्नं पराजितं त्वां कदाचिदपि न जानामि ८ हतं स्तंतेमाविततनः स्पर्धः ९

नखकेशदशाकुंभवारिणा किं समुक्षितः अवीरज्ञानगमनं ब्राह्मणो वा हतस्त्वया ५
युद्धे पराजितो वासि गतश्रीरिव लक्ष्यसे न त्वां प्रभिन्नं जानामि किमिदं भरतर्षभ ६ श्रोत
व्यं चेन्मया पार्थ इति प्रमाख्यातुमर्हसि अर्जुन उवाच यः स मेघवपुः श्रीमान् बृहत्पंकज
लोचनः सकृष्णः सह रामेण त्यक्त्वा देहं दिवं गतः ७ मौशले वृष्णिवीराणां विनाशो ब्रह्म
शापजः बभूव वीरांतकरः प्रभासे लोमहर्षणः ८ येते शूरा महात्मानः सिंहदर्पा महा
बलाः भोजवृष्ण्यंधका ब्रह्मन्नन्योन्यं तैर्हतं युधि ९ गदापरिघशक्तीनां सहाः परिघबाहवः [illegible]
त एरकाभिर्निहताः पश्य कालस्य पर्ययं १० हतं पंचशतं तेषां सहस्रं बाहुशालिनां नि
धनं समनुप्राप्तं समासाद्येतरेतरं ११ पुनः पुनर्न मृष्यामि विनाशममितौजसां चिंतया
नो यदूनां च कृष्णस्य च यशस्विनः १२ शोषणं सागरस्येव पर्वतस्येव चालनं नभसः पतनं
चैव शैत्यमग्नेस्तथैव च १३ अश्रद्धेयमहं मन्ये विनाशं शार्ङ्गधन्वनः नचेह स्थातुमिच्छामि लोके

पंचशतं सहस्रं शतानि सहस्रगुणितं सहस्रं पंचलक्षाणीत्यर्थः न केवलं हतं ताडितं गुपितं निधनं प्राप्ताः १२

१५ पश्यतःश्रुनादृरेषष्टीमांपश्यंतमनाहृत्येत्यर्थः १८ पुरुषश्रेति इदमेवरूपंचतुर्भुजंनित्यमर्जुनहृगो
चरोस्ति श्रुतएवविश्वरूपदर्शनानंतरमक्रेतेनैवरूपेणचतुर्भुजेनसहस्रबाहोभवविश्वमूर्तेइति श्र
ह्रतःकष्टतरंचान्यकुरुगतहेतपोधन मनोमेदीर्यतेयेनचिंतयानस्यवेमुहुः १५ पश्यतोरु
स्मिदात्तंस्वममब्रह्मन्महस्वशः आभीरैरनुसृत्याजोहृताःपंचजनालयैः १६ धनुराहायत
स्याहंनाशाकंतस्यप्रशलो यथापुराचमेवीर्यंभुजयोर्नतथाभवत् १७ अस्त्राणिमेप्रनष्टानि १०
विविधानिमहामुने शराश्चक्षयमापन्नाःसर्वेणैवसमंततः १८ पुरुषश्चाप्रमेयात्माशंखचक्रगदा
धरः चतुर्भुजःपीतवासाःश्यामःपद्मदलेक्षणः १९ यश्चयातिपुरस्तान्मेरथस्यसुमहाद्युतिः प्रद
वि हन्रिपुसैन्यानिनपश्यामहमच्युतं २० येनशर्वप्रदग्धानिपाक्चुसैन्यानितेजसा शरैर्गांडीवनिर्मु
क्तैरहंपश्चाद्धनाशयं २१ तमपश्यन्विषीदामिघूर्णामीवचसत्तम परिनिर्विण्णचेताश्चशांतिंनो
पलभेपिच २२ विनाजनार्दनेवीरेनाहंजीवितुमुत्सहे श्रुत्वैवहिगतंविष्णुंममापिमुमुहुर्दिशः
२३ प्रनष्टज्ञातिवीर्यस्यशून्यस्यपरिधावतः उपदेष्टुममश्रेयोभवानर्हतिसत्तम २४ व्यासउवाच
ब्रह्मशापविनिर्दग्धावृष्ण्यंधकमहारथाः विनष्टाःकुरुशार्दूलनतांछ्रोचितुमर्हसि २५ भवि
तव्यंतथातच्चदिष्टमेतन्महात्मनां उपेक्षितंचकृष्णेनशक्तेनापिव्यपोहितुं २६ ॥ छ

यथाहिभुजेनेत्यवसरं चतुर्भुजेतिनावस्त्र ४ ॥ छ ॥
बे

मौ०
१३
३१ बुद्धिः उपस्थितकार्यावधारणं तेजः प्रागल्भ्यं प्रतिपत्तिः अनागतावेक्षणं भवंति उत्पद्यंते भवकालेषु ऐश्वर्यवत्सु
समयेषु विपर्यये विनाशकाले विपद्यंते विनश्यंति ३२ कालईश्वरः जगद्बीजं क्षितिपद्रादि पंचकं समादत्ते संहरति य जं०
दाभक्तानामपि संहारो भवति किं यान्न तत्र भौतिकानां नाशः इति तदर्थं शोको न चिंत्यः इति भावः ३३ यएवबल
त्रैलोक्यमपि गोविंदः कृत्स्नं स्थावरजंगमं प्रसहेदन्यथाकर्तुं कृतः शापं महात्मना २७ रथस्य
पुरतो याति यः सचक्रगदाधरः तव स्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः २८ कृत्वा भारावतरणं
पृथिव्याः पृथुलोचनः मोक्षयित्वा तनुं प्राप्तः कृष्णः स्वस्थानमुत्तमं २९ त्वयापीह महत्कर्म देवा
नां पुरुषर्षभ कृतं भीमसहायेन यमाभ्यां च महाभुज ३० कृतकृत्यांश्च वो मन्ये संसिद्धान्कुरुपुं
गव गमनं प्राप्तकालं च इदं श्रेयस्करं विभो ३१ एवं बुद्धिश्च तेजश्च प्रतिपत्तिश्च भारत भवंति भवका
लेषु विपद्यंते विपर्यये ३२ कालमूलमिदं सर्वं जगद्बीजं धनंजय काल एव समादत्ते पुनरेव यदृ
च्छया ३३ स एव बलवान्भूत्वा पुनर्भवति दुर्बलः स एवेशश्च भूत्वेह परैराज्ञाप्यते पुनः ३४ कृ
तकृत्यानि चास्त्राणि गतान्यद्य यथागतं पुनरेष्यंति ते हस्तं यदा कालो भविष्यति ३५ ॥

वान् स एव दुर्बलो भवत्येवं विजयोऽपि कालमूलो ज्ञेयः ३४ कृतेति भवंतोऽपि अस्त्रवत्कृतकृत्या इ
तिभावः पुनर्युगांतरे ३५ ॥ छ ॥ १३

मौ॰ मुक्त्योगतिंस्वर्गंतंएतत्प्रस्थाने ३८ इतिनैलकंठीयेभारतभावदीपेमौसलार्थप्रकाशःअष्टमोध्यायः ८

१४

कालोगंतंगतिंमुक्त्योंभवतामपिभारत एतच्छ्रेयोहिवोमन्येपरमंभरतर्षभ ३९ वै॰

शंपायनउवाच एतद्वचनमाज्ञायव्यासस्यामिततेजसः अनुज्ञातोययौपार्थोनगरं

नागसाह्वयं ४० प्रविश्यचपुरींवीरःसमासाद्ययुधिष्ठिरं आचष्टतयथावृत्तंवृष्णं

धककुलक्षति ४८ इतिश्रीमहाभारतेमौशलपर्वणिअष्टमोध्यायः ८८ ॥ ७

समाप्तंचेदंमौसलपर्व ॥

रामायनमः ॥ वासुदेवायनमः ॥ ७ ॥ ८ १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

मौसलपर्व पत्रे १४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

\उद्योगपर्व पत्रे ३४२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ उ॰ शाकटानि भांडवंति अनांसि आपणो वणिक्पथः दायः वेश्याः वेश्याजनः पानं युग्ययोग्यं वाहनं युग्यं केवलं वाहनं फ
टी॰ ल्गु बालादिकं कलत्रं स्त्र्यादिकम् २६ कोशो धनं कोष्ठो धान्यादिसामग्री संगृह्य एकीकृत्य २७ गजाः इति इतिश्रीम
१५२ तत्र देवव्रतस्य देवौ रथस्थौ पुरुषर्षभौ जघनं पालयंतौ च पृष्ठतोनुप्रजग्मतुः २४ भक्ष्यं भोज्यं च
यत्किंचिद्यानं युग्यं च सर्वशः तत्र नागसहस्राणि हयानामयुतानि च फल्गु सर्वं कलत्रं च यत्
किंचित्कृशदुर्बलं २५ कोशसंचयवाहांश्च कोष्ठागारं तथैव च गजानीकेन संगृह्य शनैः प्रायाद्यु
धिष्ठिरः २६ तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य वा वि
भुः २७ रथा विंशतिसाहस्रा ये तेषामनुयायिनः हयानां दशकोट्यश्च महतां किंकिणीकिनां
२८ गजा विंशतिसाहस्रा ईषादंताः प्रहारिणः कुलीना भिन्नकरटा मेघा इव विसर्पिणः २९
षष्टिर्नागसहस्राणि दश चान्यानि भारत युधिष्ठिरस्य यान्यासन्युधि सेना महात्मनः ३० क्षरं
त इव जीमूताः प्रभिन्नकरटामुखाः राजानमन्वयुः पश्चाच्चलंत इव पर्वताः ३१ एवं तस्य बलं
भीमं कुंतीपुत्रस्य धीमतः यदाश्रित्याथ युयुधे धार्तराष्ट्रं सुयोधनं ३२ ततोन्ये शतशः पश्चात्स
हस्रायुतशो नराः नदंतः प्रययुस्तेषामनीकानि सहस्रशः तत्र भेरीसहस्राणि शंखानाम
युतानि च अभ्यवादयंत संहृष्टाः सहस्रायुतशो नराः ३४ इति श्रीमहाभारते उद्योगपर्वणि अ
ध्यायः १५५ अस्मानंतरं भीष्मपर्व भविष्यति तस्यायं प्रतिसंधिः जनमेजय उ॰ कथं युयुधिरे
वीराः कुरुपांडवसोमकाः पार्थिवाः सुमहात्मानो नानादेशसमागताः १ ॥ ॥

एतद्वाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठस्य कृतौ श्रीमहाभारते १५२
उद्योगपर्वार्थप्रकाशः समाप्तिमगमत् १५५ ॥ ॥ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

शाल्व इति १० १४ उत्सेध उत्कर्षेणाष्टौ पंचयोजनं वर्त्तकं परिधिं कृत्वेत्यर्थः सेनानिवेशाः सैनिकाः वणिक्शूद्रादयः ५।

शल्यो भूरिश्रवाः शल्यः कौशल्योथ बृहद्बलः एते पश्चादनुगता धार्त्तराष्ट्रपुरोगमाः १० तेसमेम
ययान्यायं धार्त्तराष्ट्रा महाबलाः कुरुक्षेत्रस्य पश्चार्द्धे व्यवतिष्ठन्त दंशिताः ११ दुर्योधनस्तु शिबिरं
कारयामास भारत यथैव हास्तिनपुरं द्वितीयं समलंकृतं १२ न विशेषं विजानन्ति पुरस्य शिबिरस्य
वा कुशला अपि राजेन्द्र नरा नगरवासिनः १३ तादृशान्येव दुर्गाणि राज्ञामपि महीपतिः कारयामा
स कौरव्यः शतशोथ सहस्रशः १४ पंचयोजनमुत्सृज्य मंडलं तद्रणाजिरे सेनानिवेशास्ते राजन्ना
विशञ्छतसंघशः १५ ततस्ते पृथिवीपाला यथोत्साहं यथाबलं विविशुः शिबिराण्यत्र द्रव्यव
न्ति सहस्रशः १६ तेषां दुर्योधनो राजा ससैन्यानां महात्मनां व्यादिदेश सवाह्यानां भक्ष्यभोज्यमनु
त्तमं १७ सनागाश्वमनुष्याणां ये च शिल्पोप- जीविनः ये चान्येनुगतास्तत्र सूतमागधबंदिनः
१८ वणिजो गणिकाश्चारा ये चैव प्रेक्षका जनाः सर्वांस्तान्कौरवो राजा विधिवत्प्रत्यवेक्षत १९
इत्युद्योगपर्वणि ९४ वैशं० तथैव राजा कौंतेयो धर्मपुत्रो युधिष्ठिरः धृष्टद्युम्नमुखान्वीरांश्चो।
दयामास भारत १ चेदिकाशिककरूषाणां नेतारं दृढविक्रमं सेनापतिममित्रघ्नं धृष्टकेतुम
भ्यादिदेशत २ विराटं द्रुपदं चैव युयुधानं शिखंडिनं पांचाल्यौ च महेष्वासौ युधामन्यूत्तमौ।
जसौ ३ ते शूराश्चित्रवर्माणस्तप्तकुंडलधारिणः आज्यावसिक्ता ज्वलिता धिष्ण्येष्विव हुता
नाः ४ अशोभंत महेष्वासा ग्रहाः प्रज्वलिता इव अथ सैन्यं यथायोगं पूजयित्वा नरर्षभः दिदेश ता
न्यनीकानि प्रयाणाय महीपतिः तेषां युधिष्ठिरो राजा ससैन्यानां महात्मनां ६ ॥

अध्यायः १९५ तथैव १

७ बलं कृत्स्नं सैन्यसमुदायं ८ ॥ भांडं युद्धोपकरणं ९ भीमधन्वानः अयं ते प्रवरं त्वस्मामितिभीमधन्वायनी १२ कृतप्रहर
णादिदेशस्तवायानां भक्ष्यभोज्यमनुत्तमं सगजाश्च मनुष्याणां ये च शिल्पोपजीविनः ९ अभि
मन्युं बृहंतं च द्रौपदेयांश्च सर्वशः धृष्टद्युम्नमुखानेतान्प्राहिणोत्पांडुनंदनः ७ भीमं च
युयुधानं च पांडवं च धनंजयं द्वितीयं प्रेषयामास स्कंधावारं युधिष्ठिरः ८ भांडं समारोप
यंतो च रथानां प्रधावतां हृष्टानां तत्र योधानां शब्दो दिवमिवास्पृशत् ९ स्वयमेव ततः पश्चा
द्विराटद्रुपदान्वितः तथान्यैर्महीपालैः सह प्रायान्महीपतिः १० भीमधन्वायनी सेना
धृष्टद्युम्नेन पालिता गांगेव पूर्णा स्तिमिता स्यंदमाना व्यदृश्यत ततः पुनरनीकानि
योजयत बुद्धिमान् मोहयन्धृतराष्ट्रस्य पुत्राणां बुद्धिनिश्चयं १२ द्रौपदेयान्महेष्वासान्
अभिमन्युं च पांडवः नकुलं सहदेवं च सर्वांश्चैव प्रभद्रकान् १३ दश चाश्वसहस्राणि द्विस
हस्राणि दंतिनां अयुतं च पदातीनां रथाः पंचशतं तथा १४ भीमसेनं च दुर्धर्षं प्रथमे
प्रादिशद्बले मध्यमे च विराटं च जयत्सेनं च पांडवः १५ महारथौ च पांचाल्यौ युधाम
न्यूत्तमौजसौ वीर्यवंतौ महात्मानौ गदाकार्मुकधारिणौ १६ अन्वयातां ततो मध्ये वा
सुदेवधनंजयौ बभूवुरतिसंरब्धाः कृतप्रहरणा नराः १७ तेषां विंशतिसाहस्रा ध्वजाः
शूरैरधिष्ठिताः पंच नागसहस्राणि रथवंशाश्च सर्वशः १८ पदातयश्च ये शूराः कार्मुका
सिगदाधराः सहस्रशोन्वयुः पश्चादग्रतश्च सहस्रशः १९ युधिष्ठिरो यत्र सैन्ये स्वयमेव बला
र्णवे तत्र ते पृथिवीपाला भूयिष्ठं पर्यवस्थिताः २० तत्र नागसहस्राणि हयानामयुतानि च त
थारथसहस्राणि पदातीनां च भारत २१ चेकितानः स्वसैन्येन महता पार्थिवर्षभ धृष्टकेतुश्च

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४ ...भवन्तमस्य भव मन्त्यमानं अनयोर्वीजभूतयोर्नाशो वीजाभावाद्ध विद्यस्यापि नाशो मम्ये १२ १९ वेदांतावभृथस्ना
मा...मेति कौंतेयो धार्तराष्ट्रः स्वदुर्मतिः तावता चापि कालेन द्रोणोपि प्रतिजज्ञिवान् ४ गौत
मो द्विगुणं कालमुक्तवानिति नः श्रुतं द्रौणिस्तु दशरात्रेण प्रतिजज्ञे महास्त्रवित् ५ तथा दि
व्यास्त्रवित्कर्णः संप्रष्टः कुरुसंसदि पंचभिर्दिवसैर्हंतुं स सैन्यं प्रतिजज्ञिवान् ६ तस्मादहमपी
च्छेदं वचनं प्रत्यभाषत सर्व एते महात्मानः कृतास्त्राश्चित्रयोधिनः असंशयं महाराज ह
न्युरेव न संशयः वासुदेवसमीपे त्विदं वचनं प्रत्यभाषत ८ सर्व एते महात्मानः कृतास्त्राश्चित्र
योधिनः असंशयं महाराज हन्युरेव न संशयः ९ अपैतु ते मनस्तापो यथा सत्यं ब्रवीम्यहं हन्या
मेकरथेनैव वासुदेवसहायवान् १० सामरानपि लोकांस्त्रीन्सर्वान्स्थावरजंगमान् भूतं भव्यं
भविष्यच्च निमेषादिति मे मतिः ११ यत्तद्घोरं पशुपतिः प्रादादस्त्रं महन्मम कैराते द्वंद्वयुद्धे
वै तदिदं मयि वर्तते १२ यद्युगांते पशुपतिः सर्वभूतानि संहरन् प्रयुंक्ते पुरुषव्याघ्र तदिदं म
यि वर्तते १३ न तज्जानाति गांगेयो न द्रोणो न च गौतमः न च द्रोणसुतो राजन् कुत एव तु सूतजः
१४ न तु युक्तं रणे हंतुं दिव्यैरस्त्रैः पृथग्जनं आर्जवेनैव युद्धेन विजेष्यामो वयं परान् १५ तथेमे पु
रुषव्याघ्राः सहायास्तव पार्थिव सर्वे दिव्यास्त्रविद्वांसः सर्वे युद्धाभिकांक्षिणः १६ वेदांतावभृ
थस्नाताः सर्व एते पराजिताः निहन्युः समरे सेनां देवानामपि पांडव १७ शिखंडी युयुधानश्च
धृष्टद्युम्नश्च पार्षतः भीमसेनो यमौ चोभौ युधामन्यूत्तमौजसौ १८ ॥

ताः वेदाहं रणे त एव दारक्रियया सहे वयांगकृतं वततस्पर्धी: १७ १९ ॥ १९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प॰उ॰
टी॰
१५०

१९ २० २१ २२ इतिउद्योगेऽध्यायः १९२ ततःप्रभाते १ आप्लावयन्ता २ ३ ४ ५ ६ ७ ८ ९

विराटद्रुपदौचोभौभीष्मद्रोणसमौयुधि धृष्टद्युम्नश्चमहाबाहुर्हैडंबश्चमहाबलः १९ पुत्रो
ऽंजनपर्वातिमहाबलपराक्रमः शैनेयश्चमहाबाहुःसहायोरणकोविदः २० अभिम
न्युश्चबलवान्द्रौपद्याःपंचचात्मजाः स्वयंचापिसमर्थोस्मित्रैलोक्योत्सादनेपिच २१
क्रोधाद्यंपुरुषंपश्येत्त्वथाशक्रसमद्युते सतिष्ठेन्नभवेत्क्षमितितत्वावेद्मिकौरव २२ इत्यु
द्योगे १९२ वैशंपायनउ॰ ततःप्रभातेविमलेधार्तराष्ट्रेणचोदिताः दुर्योधनेनराजा
नःप्रययुःपांडवान्प्रति १ आप्लाव्यशुचयःसर्वेस्रग्विणःशुक्लवाससः गृहीतशा
स्त्राध्वजिनःस्वस्तिवाच्यहुताग्नयः २ सर्वेब्रह्मविदःशूराःसर्वेसुचरितव्रताः स
र्वेकामकृतश्चैवसर्वेचाहवलक्षणाः ३ आहवेषुपरांल्लोकान्जिगीषंतोमहाब
लाःएकाग्रमनसःसर्वेश्रद्दधानाःपरस्परं ४ विंदानुविंदावावंत्यौकेकयावाह्लिकैः
सह प्रययुःसर्वएवैतेभारद्वाजपुरोगमाः ५ अश्वत्थामाशांतनवःसैंधवोथजयद्र
थः दाक्षिणात्याःप्रतीच्याश्चपार्वतीयाश्चयेनृपाः ६ गांधारराजःशकुनिःप्राच्यो
दीच्याश्चसर्वशः शकाःकिराताःयवनाःशिवयोथवसातयः ७ स्वैःस्वैरनीकैःसहिताः
परिवार्यमहारथं एतेमहारथाःसर्वेद्वितीयेनिर्ययुर्बले ८ कृतवर्मासहानीकस्त्रि १५०
गर्तश्चमहारथः दुर्योधनश्चनृपतिर्भ्रातृभिःपरिवारितः ९ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰उ॰ वत्सर्षभादं ग्रहणधारणप्रयोगप्रतिकारैश्चतुर्भिः पादैर्युक्तं ८८ युक्तं स्त्रीपुरुषप्रमिति शेषः ८९ अध्यायः अंबोपा
टी॰
३३९
१

शिखण्डिप्रददौ चाथ द्रोणाय कुरुपुंगव शिखंडिनं महाराज पुत्रं स्त्रीपूर्विणं तथा ८७
प्रतिपेदे चतुष्पादं धनुर्वेदं नृपात्मजः शिखंडी सह पुष्पाभिः धृष्टद्युम्नश्च पार्षतः ८८
मम त्वेतच्चरास्तात यथावत्समवेदयन् जडांधवधिराकारा ये मुक्ता द्रुपदे मया ८९ ए
वमेष महाराज स्त्रीपुमान् द्रुपदात्मजः संभूतः कुरुश्रेष्ठ शिखंडी रथसत्तमः ९० ज्ये
ष्ठा काशिपतेः कन्या अंबानामेति विश्रुता द्रुपदस्य कुले जाता शिखंडी भरतर्षभ ९१
नाहमेनं धनुष्पाणिं युयुत्सुं समुपस्थितं मुहूर्तमपि पश्येयं प्रहरेयं न चाच्युत ९२ व्र
तमेतन्मम सदा पृथिव्यामपि विश्रुतं स्त्रियां स्त्रीपूर्वके चैव स्त्रीनाम्नि स्त्रीस्वरूपिणि ९३
न मुंचेयमहं बाणानिति कौरवनंदन न हन्यामहमेतेन कारणेन शिखंडिनं ९४ एत
त्तत्त्वमहं वेद जन्म तात शिखंडिनः ९५ ततो नैनं हनिष्यामि समरेष्वाततायिनं यदि भी
ष्मः स्त्रियं हन्यात्संतः कुर्युर्विगर्हणं नैनं तस्माद्धनिष्यामि दृष्ट्वापि समरे स्थितं ९७
वैशंपायन उ॰ एतच्छ्रुत्वा तु कौरव्यो राजा दुर्योधनस्तदा मुहूर्तमिव स ध्यात्वा भीष्मे युक्त
ममन्यत ९८ अध्यायः इत्युद्योगे अंबोपाख्याने समाप्तम् ॥ १९१ ॥

ख्यानं समाप्तं १९१ ॥ ७ ३३९ १

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

ततोब्रवीद्यक्षपतिर्महात्मायस्माददास्त्वमवमन्येहयक्षान् शिखंडिनेलक्षणंपापबुद्धेस्त्रील
क्षणंचाग्रहीःपापकर्मन् अप्रवृत्तंसुदुर्बुद्धेयस्मादेतत्त्वयाकृतं तस्मादद्यप्रभृत्येवस्त्री।
त्वंसापुरुषस्तथा ७४ ततःप्रसादयामासुर्यक्षावैश्रवणंकिल स्थूणस्यार्थेकुरुष्वांतंशा
पस्येतिपुनःपुनः ७५ ततोमहात्मायक्षेंद्रःप्रत्युवाचानुगामिनः सर्वान्यक्षगणांस्तातशा
पस्यांतचिकीर्षया ७६ शिखंडिनिहतेयक्षाःस्वंरूपंप्रतिपत्स्यते स्थूणोयक्षोनिरुद्वेगोभ
वत्वितिमहामनाः ७७ इत्युक्त्वाभगवान्देवोयक्षराजःसुपूजितः प्रययौसहितःसर्वैर्निमेषांतर
चारिभिः ७८ स्थूणस्तुशापंसंप्राप्यतत्रैवन्यवसत्तदा समयेचागमत्तूर्णंशिखंडीतंक्षपाचरं
७९ सोभिगम्याब्रवीद्वाक्यंप्राप्तोस्मिभगवन्निति तमब्रवीत्ततःस्थूणःप्रीतोस्मीतिपुनःपुनः ८०
आर्जवेनागतंदृष्ट्वाराजपुत्रंशिखंडिनं सर्वमेवयथावृत्तमाचचक्षेशिखंडिने ८१ यक्षउवाच
शप्तोवैश्रवणेनाहंत्वत्कृतेपार्थिवात्मज गच्छेदानींयथाकामंचरलोकान्यथासुखं ८२
दिष्टमेतत्पुरामन्येनशक्यमतिवर्तितुं गमनंतवचेतोहिपौलस्त्यस्यचदर्शनं ८३ भीष्मउ
एवमुक्तःशिखंडीतुस्थूणयक्षेणभारत प्रत्याजगामनगरंहर्षेणमहतान्वितः ८४
पूजयामासविविधैर्गंधमाल्यैर्महाधनैः द्विजातीन्देवताश्चैवचैत्यानथचतुष्पथान्
द्रुपदःसहपुत्रेणसिद्धार्थेनशिखंडिना मुदंचपरमांलेभेपांचाल्यःसहबांधवैः ८५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ प्रागाह्निकं ग्रह्नः पूर्वभागकार्यं १२ १३ १४ १५ ॥

संजय उवाच प्रभातायां तु शर्वर्यां पुनरेव सुतस्तव मध्ये सर्वस्य सैन्यस्य पितामहमपृछत
१ पांडवेयस्य गांगेय यदेतत्सैन्यमुद्यतं प्रभूतनरनागाश्वं महारथसमाकुलं २ भीमार्जुनप्र
भृतिभिर्महेष्वासैर्महाबलैः लोकपालसमैर्गुप्तं धृष्टद्युम्नपुरोगमैः ३ अप्रधृष्यमनावार्य
मुद्धूतमिव सागरं सेनासागरमक्षोभ्यमपि देवैर्महाहवे ४ केन कालेन गांगेय क्षपयेथा म
हाद्युते आचार्यो वा महेष्वासः कृपो वा सुमहाबलः ५ कर्णो वा समरश्लाघी द्रौणिर्वा द्विजसत्त
मः दिव्यास्त्रविदुषः सर्वे भवंतो हि बले मम ६ एतदिच्छाम्यहं ज्ञातुं परं कौतूहलं हि मे हृदि
नित्यं महाबाहो वक्तुमर्हसि तन्मम ७ भीष्म उ० अनुरूपं कुरुश्रेष्ठ त्वय्येतत्पृथिवीपते बला
बलममित्राणां तेषां यदिह पृछसि ८ शृणु राजन्मम रणे या शक्तिः परमा भवेत् अस्त्रवीर्यं र
णे यच्च भुजयोश्च महाभुज ९ आर्जवेनैव युद्धेन योद्धव्य इतरो जनः मायायुद्धेन मायावी इ
त्येतद्धर्मनिश्चयः १० हन्यामहं महाभाग पांडवानामनीकिनीं दिवसे दिवसे कृत्वा भागं प्रागा
ह्निकं मम ११ योधानां दशसाहस्रं कृत्वा भागं महाद्युते सहस्रं रथिनामेकमेष भागो मतो मम
१२ अनेनाहं विधानेन सन्नद्धः सततोत्थितः क्षपयेयं महत्सैन्यं कालेनानेन भारत १३ मुंचे
यं यदि वास्त्राणि महांति समरे स्थितः शतसाहस्रघातीनि हन्यां मासेन भारत १४ संजय उ०
श्रुत्वा भीष्मस्य तद्वाक्यं राजा दुर्योधनस्ततः पर्यपृछत राजेंद्र द्रोणमंगिरसां वरं १५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

टी· ३३९ २

आ[illegible]कालेनपांडुपुत्रस्यसैनिकान् निहन्याइतितंद्रोणःप्रहसन्निदम्
स्थ[illegible]रोस्मिमहाबाहोमंदप्राणविचेष्टितः शस्त्राग्निनानिर्दहेयंपांडवानामनीकि
नीम् १७ यथाभीष्मःशांतनवोमासेनेतिमतिर्मम एषामेपरमाशक्तिरेतन्मेपरमं
बलं १८ द्वाभ्यामेवतुमासाभ्यांकृपःशारद्वतोब्रवीत् द्रौणिस्तुदशरात्रेणप्रतिज्ञ
ज्ञेबलक्षयं १९ कर्णस्तुपंचरात्रेणप्रतिजज्ञेमहास्त्रवित् तच्छ्रुत्वासूतपुत्रस्यवा
क्यंसागरगासुतः २० जहाससस्वनंहासंवाक्यंचेदमुवाचह नहियावद्रणेपार्थंबा
णखड्गधनुर्धरं २१ वासुदेवसमायुक्तंरथेनायांतमाहवे समागच्छसिराधेयतेनेव
मभिमन्यसे शक्यमेवंचभूयश्चत्वयावक्तुंयथेष्टतः २२ इत्युद्योगेभारतयुद्धप्र
मार्णे १९२ वैशंपायनउ· एतच्छ्रुत्वातुकौंतेयःसर्वान्भ्रातॄनुपह्वरे आहूयभर
तश्रेष्ठइदंवचनमब्रवीत् १ युधिष्ठिरउ· धार्तराष्ट्रस्यसैन्येषुयेचारपुरुषाामम
तेप्रवृत्तिंप्रयच्छंतिममेमांव्युषितांनिशां २ दुर्योधनःकिलापृच्छदापगेयंमहाव्र
तं केनकालेनपांडूनांहन्याःसैन्यमितिप्रभो ३ ॥

३३९
२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

५१ उत्तरं श्लक्ष्णतरं ५२ आगमः परीक्षा ५५ ५६ ५७ ५८. ५९ ६०. ६१ ॥

उत्तरिष्यामि ते स यः सामात्यस्तत्र बांधवं तदुपालंभसंयुक्तं श्रावितः किल पार्थिवः दशा
र्णपतिना चोक्तो मंत्रिमध्ये पुरोधसा अभवन्नृपतिश्रेष्ठ द्रुपदः प्रणयानतः ५१ यदाह मां भ
वान्वक्ष्यन्नस्मि संबंधिवचनाद्वचः अस्योत्तरं प्रतिवचो दूतो राज्ञे वदिष्यति ५२ ततः संप्रेषया
मास द्रुपदोपि महात्मने हिरण्यवर्मणे दूतं ब्राह्मणं वेदपारगं ५३ तमागम्य तु राजानं दशा
र्णाधिपतिं तदा तद्वाक्यमाददे राजन्यदुक्तं द्रुपदेन ह ५४ आगमः क्रियतां व्यक्तः कुमारोयं
सुतो मम मिथ्यैतदुक्तं केनापि तन्न श्रद्धेयमित्युत ततः स राजा द्रुपदस्य श्रुत्वा विमर्षयु
क्तो युवतीर्वरिष्ठाः संप्रेषयामास सुचारुरूपाः शिखंडिनं स्त्री पुमान्वेति वेत्तुं ५६ ताः प्रे
षितास्तत्स्वभावं विदित्वा प्रीत्या राज्ञे तच्च प्रोचुर्हि सर्वं शिखंडिनं पुरुषं कौरवेंद्र दशार्णरा
जाय महानुभावं ५७ ततः कृत्वा तु राजा स आगमं प्रीतिमानथ संबंधिना समागम्य हृष्टो
वासमवास ह ५८ शिखंडिने च मुदितः प्रादाद्वित्तं जनेश्वरः हस्तिनोश्वांश्च गाश्चैव वस्त्र
... बहुलानि तथा ५९ पूजितश्च प्रतिययौ निर्भर्त्स्य तनयां किल विनीतकिल्बिषे प्रीते
हे... पार्थिव प्रतियाते दशार्णे तु हृष्टरूपा शिखंडिनी ६० कस्यचित्त्वथ कालस्य
...वेणो नरवाहनः लोकयात्रां प्रकुर्वाणः स्थूणस्यागान्निवेशनं ६१ स तद्गृहस्योपरि
वर्तमानमालोकयामास धनाधिगोप्ता स्थूणस्य यत्तस्य विवेश वेश्म स्वलंकृतं माल्यगुणैर्विचि

म॰ ३॰ लाजैः उष्णीरजैः पाठांतरे वा रुजैः शीरैः भृसं लड्डुके त्वदं उदिदं तव्यापारग्राह्यं अन्नं अदनीयं ओदनपायसखंड
टी॰ शार्करादिभोज्यलेह्यचूष्यपेयं सुरासवादि आमिषं मांसं अभ्यर्हितत्वाद्दसभसात्स्वयं क्ररणीएतान्येव दत्तसम

३३८ ...नाजैस्त्र्यगंधैस्तथा वितानैरभ्यर्चितं धूपनधूपितं च ध्वजैः पताकाभिरलंकृतं च भूसा
...पयामि षदं तद्दोमं ९३ तत्स्थानं तस्य दृष्ट्वा तु सर्वतः समलंकृतं। मणिरत्नसुवर्णानां
मा...भिः परिपूरितं ९४ नानाकुसुमगंधाढ्यं सिक्तसंमृष्टशोभितं अथाब्रवीद्यतपति।
...मेतान् अनुगोप्तदा ९५ स्वलंकृतमिदं वेश्म स्थूणस्यामितविक्रमाः नोपसर्पति मां चै।
व कस्मादद्य समंदधी ९६ यस्मात् ज्ञानं समेदात्मामामसौ नोपसर्पति तस्मात् सौम महादंडे
पार्यः स्यादिति मे मतिः ९७ यत्ताकृचुः द्रुपदस्य सुता राजन् जाता जाता शिखंडिनी तस्याति
मित्रे कस्मिंश्चित् स्यादात्म्यपुरुषलक्षणं ९८ अग्रहीत्स्त्रस्ताणां स्त्रीणां स्त्रीभूता तिष्ठते गृहे नोप
सर्पति तेनासौ सव्रीडः स्त्री सनूपवान् ९९ एतस्मात्कारणाद्राजन् स्थूणो न त्वाद्य सर्पति
श्रुत्वा कुरु यथान्यायं विमानमिह तिष्ठतां १०० आनीयतां स्थूण इति ततो यक्षाधिपोऽब्र
वीत् कर्तास्मि निग्रहं तस्येत्यब्रवीच्च पुनः पुनः १०१ सोऽभ्यगच्छत यक्षेंद्रमाहूतः पृथिवीप
ते ह्रीमन् रूपा महाराज तस्थौ व्रीडसमन्वितः १०२ तं शशापाथ संक्रुद्धो धनदः कुरुनंद
न एवमेव भवत्वस्य स्त्रीत्वं पापस्य गुह्यकाः १०३ ॥

दत्तैर्हूयंत इति व्युत्पत्त्याभ्यवहार्याणि यस्मिं
स्तत् भस्मान्नयेयामि षदं तद्दोमं आमिषमप्रमेयमिति पाठस्तत्र सर्वं कल्पितः ९३ तिष्ठते गृहे एव स्थिरोऽस्ति ३३९

२५ २६ ३० अध्यायः ४० चिंत्य चिंतयित्वा १३ विहंगमः आकाशगामी ४ ५ ६ ७ ॥

धनेश्वरस्यानुचरो वरदोस्मि नृपात्मजे अदेयमपि दास्यामि ब्रूहि यत्ते विवक्षितं २५ ततः
शिखंडिनी तत्सर्वमखिलेन न्यवेदयत् तस्मै यक्षप्रधानाय स्थूणाकर्णाय भारत २६ शिखं
ड्युवाच अपुत्रो मे पिता यक्ष नचिरान्नाशमेष्यति अभियास्यति सक्रोधो दशार्णाधिपतिर्हि
२७ महाबलो महोत्साहः स हेमकवचो नृपः तस्माद्रक्ष महायक्ष मातरं पितरं च मे २८
प्रतिज्ञातो हि भवता दुःखप्रतिशमो मम भवेयं पुरुषो यक्ष त्वत्प्रसादादनिंदितः २९ यावदे
व स राजा वै नोपयाति पुरं मम तावदेव महायक्ष प्रसादं कुरु गुह्यक ३० इतिशोकेश्वरोपा
ख्याने ३१ भीष्म उवाच शिखंडिवाक्यं श्रुत्वाथ स यक्षो भरतर्षभ प्रोवाच मनसा चिंत्य दै
वेनोपनिपीडितः १ भवितव्यं तथा तद्धि मम दुःखाय कौरव भद्रे कामं करिष्यामि समयं तु
[illegible]ने २ किंचित्कालांतरं दास्ये पुंलिंगं स्वमिदं तव आगंतव्यं त्वया काले सत्यं चैव व
[illegible] ३ प्रभुः संकल्पसिद्धोस्मि कामचारी विहंगमः मत्प्रसादात्पुरं चैव त्राहि बंधूंश्च के
[illegible] ४ स्त्रीलिंगं धारयिष्यामि तदेव पार्थिवात्मजे सत्यं मे प्रतिजानीहि करिष्यामि प्रि
यं तव ५ शिखंड्युवाच प्रतिदास्यामि भगवन् पुंलिंगं तव सुव्रत किंचित्कालांतरं स्त्रीत्वं धा
रयस्व निशाचर ६ प्रतियाते दशार्णे तु पार्थिवे हेमवर्मणि कन्यैव हि भविष्यामि पुरुषस्
त्वं भविष्यसि ७ ॥

म॰उ॰ टी॰ ३३७

समयंशापथंसंदेहेलिंगेमय्यागदिश्यतेउपचार्यतेइतिव्युत्पत्तेः अभिसंदोहेइतिपाठेविमर्दउच्यतेप्रत्ताग्राभ्यामि

भीष्म उ॰ इत्युक्त्वासमयंतत्रचक्रातेतावुभौनृप अथान्योन्यस्याभिद्रोहेतेतौसंक्रामय
तांततः ८ स्त्रीलिंगंधारयामासस्थूणाकर्णोथभारत यक्षरूपंचतद्दीप्तंशिखंडीप्रत्य
पद्यत ९ ततःशिखंडीपांचाल्यःपुंस्त्वमासाद्यपार्थिव विवेशनगरंहृष्टःपितरंचस
मासदत् १० यथावृत्तंतुतत्सर्वमाचख्यौद्रुपदस्यतत् द्रुपदस्तस्यतच्छ्रुत्वाहर्षमा
हारयत्परं ११ सभार्यस्तच्चसस्मारमहेश्वरवचस्तदा ततःसंप्रेषयामासदशार्णाधि
पतयेनृप १२ पुरुषोयंममसुतःश्रद्धत्तांमेभवानिति अथदाशार्णकोराजासहसाभ्या
गमत्तदा १३ पांचालराजंद्रुपदंदुःखशोकसमन्वितः ततःकांपिल्यमासाद्यदशा
र्णाधिपतिस्ततः १४ प्रेषयामाससत्कृत्यदूतंब्रह्मविदांवरं ब्रूहिमद्वचनाद्दूतपांचा
ल्यंतंनृपाधमं १५ यन्मेकन्यांस्वकन्यार्थेवृतवानसिदुर्मते फलंतस्यावलेपस्यद्रक्ष्य
स्यनसंशयः १६ एवमुक्तश्चतेनासौब्राह्मणोराजसत्तम दूतःप्रयातोनगरंदाशार्णनृ
पचोदितः १७ ततआसादयामासपुरोधाद्रुपदंपुरे तस्मैपांचालकोराजागामर्घ्यंच
सुसत्कृतं १८ प्रापयामासराजेंद्रसहतेनशिखंडिना तांपूजांनाभ्यनंदत्सवाक्यंचेद
मुवाचह १९ यदुक्तंतेनवीरेणराज्ञाकांचनवर्मणा यत्तेहमधमाचारदुहित्रास्म्यभि
वंचितः २० तस्यपापस्यकरणात्फलंप्राप्नुहिदुर्मते देहियुद्धंनरपतेममत्वंरणमूर्ध ३३७
नि २१ ॥ तिव्युत्पत्तेः ८ ९ १० ११ १२ १३ १४ १५ १६ २१ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ संबंधकं समर्थ्य युक्तमेव सांबंधिकं मयाकृतं तं न प्रतारणा कृतेति उपपाद्य ६ । १ देवी राज्ञी १० साधु मता कल्याणावता पिदे
वानां प्रतिपत्तिः पूजा नित्यं कर्तव्येति शेषः किमु दुःखार्णवं प्राप्य कर्तव्येति शेषः तस्मात् भवान् गुरून् देवाराधना

भीष्मः ततः शिखंडिनी माता यथातत्त्वं नराधिप आचचक्षे महाबाहो भर्त्रे कन्यां शिखंडिनीं १
अपुत्रया महाराज सपत्नीनां भयादिदं कन्या शिखंडिनी जाता पुरुषो वै निवेदितः २ त्वया
व चैव नरश्रेष्ठ तन्मे प्रीत्यानुमोदितं पुत्रकर्म कृतं चैव कन्यायाः पार्थिवर्षभ ३ भार्या चोढा त्वया
राजन् दशार्णाधिपतेः सुता मया च प्रत्यभिहितं देववाक्यार्थदर्शनात् ४ कन्या भूत्वा पुमान्भा
वीत्येवं चैतदुपेक्षितं द्रुपदो यज्ञसेनश्च मंत्रविज्ञो निवेदयत् ५ मंत्रे राजा मंत्रयामास राजन्या
था युक्तं रक्षणे वै प्रजानां संबंधकं चैव समर्थ्य तस्मिन् दाशार्हके वै नृपतौ नरेंद्र स्वयं कृत्वा
विप्रलंभं यथावन्मंत्रैकाग्रो निश्चयं वै जगाम ६ स्वभावगुप्तं नगरमापत्काले तु भारत गोप
यामास राजेंद्र सर्वतः समलंकृतं ७ आर्तिं च परमां राजा जगाम सह भार्यया दशार्णपतिना
सार्धं विरोधे भरतर्षभ ८ कथं संबंधिना सार्धं न मे स्याद्विग्रहो महान् इति संचिंत्य मनसा दैव
तमर्चयत्तदा ९ तं तु दृष्ट्वा तदा राजन् देवी देवपरं तदा अर्चां प्रयुंजानमथो भार्या वचन
मब्रवीत् १० देवानां प्रतिपत्तिश्च नित्यं साधु मता सतां किमु दुःखार्णवं प्राप्य तस्मादर्चयतां
गुरून् ११ दैवतानि च सर्वाणि पूज्यंतां भूरिदक्षिणं अग्नयश्चापि हूयंतां दाशार्णप्रतिषेधने
१२ अयुद्धेन निवृत्तिं च मनसा चिंतय प्रभो देवतानां प्रसादेन सर्वमेतद्भविष्यति १३ ॥

र्थे ब्राह्मणान् अर्चयतां प्रजयत ११ भूरिदक्षिणं यथा स्यात्तथा प्रतिषेधने परावर्तनार्थं १२ ॥ १३

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰३॰ १८ २० स्तथामृतिकलेपनंस्तथाचूर्णांसिवमृतिकातयालेपनंयस्य लाजोल्लापिकः लाजानिउशीराणिउल्लापयतिस
टी॰
११६

मंत्रिभिर्मंत्रितंसार्धंत्वयापृथुललोचन पुत्रस्यास्यविनाशायतच्चराजंस्तथाकुरु १४ दे
वंहिमानुषोपेतंभ्रंशंसंसिध्यतिपार्थिव परस्परविरोधाद्धिसिद्धिशक्तिनचैतयोः १५ तस्मा
द्धियत्नाद्देविधानंसचिवैःसह अर्च्चयस्वयथाकामंदैवतानिविशांपते १६ एवंसंभा
षमाणौतदृष्ट्वाशोकपरायणौ शिवेड़िनीतदाकन्याक्रीडितेवतपस्विनी १७ ततःसावि
तयामासमत्कृतेदुःखितावुभौ इमौविचिन्त्यतच्चक्रेमतिंप्राणविनाशने १८ एवंसानिश्च
यंकृत्वाभृशंशोकपरायणा निर्जगामगृहंत्यक्त्वागहनंनिर्जनंवनं १९ यदेतद्धिम
ताराजन्नष्टगुणाकर्णेनपालितं तद्भयादेवजनोविसर्जयतितद्धनम् २० तत्रचस्य
णभुवनेस्थामृतिकलेपनं लाजोल्लापकधमाहस्तुच्चशाकाम्रतोरणा २१ तस्यविष्णा
शिवदीसाहुपदस्मात्मनात्य अनन्यानाबहुतिथंशरीरमुदशोषयत् २२ दर्शयामा
सतांपतःस्वयमोमार्दवसंयुतः किमर्थंयतवारंभःकरिष्येब्रूहिमाचिरं २३ अशकामि
तिमायतेपुनःपुनरुवाचह करिष्यामीतिवैदितिप्रशस्तवाचाथगुह्यकः २४ ॥

चयतीतिलाजोल्लापकः उशीरपरिमलयुक्तधमाध्मामित्यर्थः उशीरेजालमनुदिष्टमिति विग्रहः २१ २४ ॥ ११६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म० उ० १८ भार्यायाया अहह त्वं जानन्नपि स्वस्य तिरोधितां ख्यापयितुं भयकृतमप्यपराधं लोकमध्ये भार्यायामेवासंज्ञ
टी० यितुं तामाह शिखण्डिनीति यद्यप्यहं शिखण्ड्यर्थं त्वया शिखण्डिन्या च वंचितस्तथापि त्वं माभैः शिखण्डिनि विषयुक्त
३३५ या स्नेयुक्तयोर्धारणापोषणाच करिष्यन्नवहि सिध्येदर्थः यद्वा हे शिखण्डिनि त्वं माभैः हे वरारोहे भार्ये त्वं

विस्रब्धहृतान्दाशार्णो द्रुपदः शोकमूर्छितः समेत्य भार्यां रहिते वाक्यमाह नराधिपः ५४ भये
न महता विष्टो हृदि शोकेन चाहतः पांचालराजो दयितां मातरं च शिखण्डिनः ५५ अभियास्य
ति मां कोपात्संबंधी सुमहाबलः हिरण्यवर्मा नृपतिः कर्षमाणो वरूथिनीं ५६ किमिदा
नीं करिष्यावो मूढौ कन्यामिमां प्रति शिखण्डी किल पुत्रस्ते कन्येति परिशंकितः ५७ इति संचि
न्त्य तेन समित्रः सबलानुगः वंचितोस्मीति मन्वानो मां किलोद्धर्तुमिच्छति ५८ किमत्र तथ्यं
सुश्रोणि मिथ्या किं ब्रूहि शोभने श्रुत्वा त्वत्तः शुभे वाक्यं संविधास्याम्यहं तथा ५९ अहं हि संश
यं प्राप्तो बाला चेयं शिखण्डिनी त्वं च राज्ञि महत्कृच्छ्रं संप्राप्ता वरवर्णिनी ६० सा त्वं सर्वविमो
क्षाय तत्त्वमाख्याहि पृच्छतः तथा विदध्यां सुश्रोणि कृत्यमाशु शुचिस्मिते ६१ शिखण्डिनि च
माभैस्त्वं विधास्ये तत्र तत्त्वतः कृपयाहं वरारोहे वंचितः पुत्रधर्मतः ६२ मया दाशार्णको रा
जा वंचितः स महीपतिः तदाचक्ष्व महाभागे विधास्ये तत्र यद्धितं ६३ जानतापि नरेन्द्रेण ख्या
पनार्थं परस्य वै प्रकाशं चोदिता देवी प्रत्युवाच महीपतिं ६४ इत्युद्योगे अंबोपाख्याने ६५ ॥

त्वं माभैरिति द्वयोरप्यभयं दत्वा जनमध्ये पृच्छति १९ मयेति विधास्ये करिष्ये २० परस्य शत्रोर्लोकस्य च २१ ३३५

५१ उद्धरामि उच्छेत्स्यामि ५२ अध्यायः १९८ आगमत् ज्ञातवान् १३ धात्रीणां पितृगृहादागतानां सखीनां च ४ समुदयं

अवमस्यसे मां नृपते नूनं दुर्मेधितं तव यन्मे कन्यां स्वकन्यार्थे मोहाद्याचितवानसि ५१ तस्या
द्य विप्रलंभस्य फलं प्राप्नुहि दुर्मते एष त्वां सजनामात्यमुद्धरामि स्थिरो भव ५२ इत्युद्योगे अं
बोपाख्याने १९८ भीष्म उ॰ एवमुक्तस्य दूतेन द्रुपदस्य तदा नृप चोरस्येव गृहीतस्य न प्राव
र्तत भारती ५३ स यत्नमकरोत्तीव्रं संबंधिष्वनुमानने दूतैर्मधुरसंभाषैर्नैतदस्तीति संदि
शन् ५४ स राजा भूय एवाथ ज्ञात्वा तत्त्वमथागमत् कन्येति पांचालसुतां त्वरमाणो विनि
र्ययौ ततः संप्रेषयामास मित्राणाममितौजसां दुहितुर्विप्रलंभं तं धात्रीणां वचनात्तदा
५५ ततः समुदयं कृत्वा बलानां राजसत्तमः अभियाने मतिं चक्रे द्रुपदं प्रति भारत ५६
ततः संमंत्रयामास मंत्रिभिः स महीपतिः हिरण्यवर्मा राजेंद्र पांचाल्यं पार्थिवं प्रति ५७ त
त्रवै निश्चितं तेषामभूद्राज्ञां महात्मनां तथ्यं भवति चेदेतत्कन्या राजन् शिखंडिनी ५८
बध्वा पांचालराजानमानयिष्यामहे गृहं अन्यं राजानमाधाय पांचालेषु नरेश्वरं घाति
यिष्यामि नृपतिं पांचालं सशिखंडिनं ५९ तत्तदा तत्त्वमाज्ञाय पुनर्दूतान्नराधिपः प्रा
स्थापयत्पार्षताय निहन्मीति स्थिरो भव ६० भीष्म उ॰ स हि प्रकृत्या वै भीतः किल्बिषाच्च न
राधिपः भयं तीव्रमवाप्तो द्रुपदः पृथिवीपतिः ६१ ॥

समुदायम् ५ ६ ० ८९ १० ११

म॰ उ॰
टी॰
३३७
२

२३ ता धात्र्यः सख्यः प्रेष्याः दास्याः प्रेषयामासुः दशार्णपतिमिति शेषः २४ विप्रलंभं वंचना २५ २८ उत्सार्य नीत्वा २९ अभिषं

[?]तो निश्चयं कृत्वा तस्मिन्कार्येथ दंपती वरयांचक्रतुः कन्यां दाशार्णाधिपतेः सुतां १७ ततो
राजा द्रुपदो राजसिंहः सर्वात्राजकुलतः संनिशम्य दशार्णकस्य नृपतेस्तनूजां शिखंडिने
वरयामास दारान् १८ हिरण्यवर्मेति नृपो योसौ दाशार्णकः स्मृतः स च प्रादान्महीपालः क
न्यां तस्मै शिखंडिने १९ स च राजा दशार्णेषु महानासीत्सुदुर्जयः हिरण्यवर्मा दुर्धर्षो महा
सेनो महामनाः २० कृते विवाहे तु तदा सा कन्या राजसत्तम यौवनं समनुप्राप्ता सा च क
न्या शिखंडिनी २१ कृतदारः शिखंडी च कांपिल्यं पुनरागमत् ततः सा वेद तां कन्यां कं
चित्कालं स्त्रियं किल हिरण्यवर्मणः कन्या ज्ञात्वा तां तु शिखंडिनीं २२ ततस्ता राजशा
र्दूल धात्र्यो दाशार्णिकास्तदा जग्मुरार्तिं परां प्रेष्याः प्रेषयामासुरेव च २४ ततो दशा
र्णाधिपतेः प्रेष्याः सर्वा न्यवेदयन् विप्रलंभं यथावृत्तं स चुक्रोध पार्थिवः २५ शिखं
ड्यपि महाराज पुंवद्राजकुले तदा विजहार मुदा युक्तः स्त्रीत्वमेव तिरोहयन् २६ ततः
कतिपयाहस्य तच्छ्रुत्वा भरतर्षभ हिरण्यवर्मा राजेंद्र रोषादार्तिं जगाम ह २७ ततो दा
शार्णको राजा तीव्रकोपसमन्वितः दूतं प्रस्थापयामास द्रुपदस्य निवेशनं २८ ततो
द्रुपदमासाद्य दूतः कांचनवर्मणः एकमेकांतमुत्सार्य रहो वचनमब्रवीत् २९ दाशार्णराजो रा
जंस्त्वामिदं वचनमब्रवीत् अभिषंगात्प्रकुपितो विप्रलब्धस्त्वयानघ ३० ॥ गात् पराभवात् ३० ॥ ३३७
२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

पुत्रवत्पुत्रकार्याणिसर्वाणिसमकारयत् रक्षणंचैवमंत्रस्यमहिषीद्रुपदस्यसा १५ चकार
सर्वयत्नेनब्रुवाणापुत्रइत्युत नचतांवेदनगरेकश्चिदन्यत्रपार्षतात् १६ श्रद्दधानोहितद्वाक्यं
देवस्याच्युततेजसः छादयामासतांकन्यांपुमानितिचसोब्रवीत् १७ जातकर्माणिसर्वाणि
कारयामासपार्थिवः पुंवद्विधानयुक्तानिशिखंडीतिचतांविदुः १८ अहमेकस्तुचारेणवच
नान्नारदस्यच ज्ञातवान्देववाक्येनअंबायास्तपसातथा १९ इत्युद्योगेअंबोपाख्याने १८७
भीष्मउ· चकारयत्नंद्रुपदःसुतायाःसर्वकर्मसु ततोलेख्यादिषुतथाशिल्पेषुचपरंतप १
इष्वस्त्रेचैवराजेंद्रद्रोणशिष्योबभूवह तस्यमातामहाराजराजानंवरवर्णिनी २ चोदया
मासभार्यार्थंकन्यायाःपुत्रवत्तदा ततस्तांपार्षतोदृष्ट्वाकन्यांसंप्राप्तयौवनां स्त्रियंमत्वातत
श्चिंतांप्रपेदेसहभार्यया ३ द्रुपदउ· कन्याममेयंसंप्राप्तायौवनंशोकवर्धिनी मयाप्रच्छा
दिताचेयंवचनाच्छूलपाणिनः ४ भार्योवाच नतन्मिथ्यामहाराजभविष्यतिकथंचन
त्रैलोक्यकर्तुःकस्मादिहवृथावक्तुमिहार्हति यदितेरोचतेराजन्वक्ष्यामिशृणुमेवचः श्रु
त्वेदानींप्रपद्येथाःस्वांमतिंपृषतात्मज ५ क्रियतामस्ययत्नेनविधिवद्दारसंग्रहः भवितात
त्तद्वचःसत्यमितिमेनिश्चिताःमतिः ६ ॥

४ ५ ६ ७ ८ २५ २६ ॥

म॰ उ॰
टी॰
३३४

स्त्रीपुमान्पूर्वंस्त्रीसैवपश्चात्पुमान्पूर्वकालैकसर्वेतिसमासः ५ ६ ७ ८ द्रुपदंप्रविवेशाहतेनसह
मिथुनीभावंजगाम ९ विधिदृष्टेनपुत्रार्थदृष्टेनकर्मणागर्भाधानाख्येनपार्षतस्यगर्भंदधारेतिस

भगवन्पुत्रमिच्छामिभीष्मंप्रतिचिकीर्षया इत्युक्तोदेवदेवेनस्त्रीपुमांस्तेभविष्यति ५
निवर्तस्वमहीपालनैतज्जात्वन्यथाभवेत् सतुगत्वाचनगरंभार्यामिदमुवाचह ६
कृतोयत्नोमहादेवस्तपसाराधितोमया कन्याभूत्वापुमान्भावीइतिचोक्तोस्मि
शंभुना ७ पुनःपुनर्याच्यमानोदिष्टमित्यब्रवीच्छिवः नतदन्यद्धिभविताभवि
तव्यंहितत्तथा ८ ततःसानियताभूत्वाऋतुकालेमनस्विनी पत्नीद्रुपदराज
स्यद्रुपदंप्रविवेशह ९ लेभेगर्भंयथाकालंविधिदृष्टेनकर्मणा पार्षतस्यमहीपा
लयथामांनारदोऽब्रवीत् १० ततोदधारसादेवीगर्भंराजीवलोचना तांसराजाप्रि
यांभार्यांद्रुपदःकुरुनन्दन ११ पुत्रस्नेहान्महाबाहुःसुखंपर्यचरत्तदा सर्वानभि
प्रायकृतान्भार्यालभतकौरव १२ अपुत्रस्यसतोराज्ञोद्रुपदस्यमहीपतेः तथा
कालेनसादेवीमहिषीद्रुपदस्यच १३ कन्यांप्रवररूपांतुप्राजायतनराधिप अ
पुत्रस्यतुराज्ञःसाद्रुपदस्यमनस्विनी १४ ख्यापयामासराजेन्द्रपुत्रोह्येषममेतिवै ततः
सराजाद्रुपदःप्रच्छन्नायानराधिप १५ ॥

वंयः १० ॥ अभिप्रायकृतान्दोहदानित्यर्थः १२ १३ प्राजायतप्रसूतवती १४ १५ ॥

३३४

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९ १० ११ १२ १३ १६ यमुनामभितःयमुनाद्वीपेइत्यर्थः १७ अध्यायः १८६ कथंशिखंडी १ २ ३ ४ ॥

यथासत्योभवतितथाकुरुवृषध्वज यथाहत्वांसमागम्यभीष्मंशांतनवंयुधि ९ तामेवा
चमहादेवःकन्यांकिलवृषध्वजः नमेवागनृतंप्राहसत्यंभद्रेभविष्यति १० हनिष्यसित्वंगांभी
यं पुरुषत्वंचलप्स्यसे स्मरिष्यसिचतत्सर्वंदेहमन्यंगतासती ११ द्रुपदस्यकुलेजाताभविष्य
सिमहारथः शीघ्रास्त्रश्चित्रयोधीचभविष्यसिसुसंमतः १२ यथोक्तमेवकल्याणिसर्वमे
तद्भविष्यति भविष्यसिपुमान्पश्चात्कस्माच्चित्कालपर्ययात् १३ एवमुक्त्वामहादेवःकपर्दीवृ
षभध्वजः पश्यतामेवविप्राणांतत्रैवांतरधीयत १४ ततःसापश्यतांतेषांमहर्षीणामनिं
दिता समाहृत्यवनात्तस्मात्काष्ठानिवरवर्णिनी १५ चितांकृत्वासुमहतींप्रदायचहुताशनं
प्रदीप्तेऽग्नौमहाराजरोषदीप्तेनचेतसा १६ उक्त्वाभीष्मवधायेतिप्रविवेशहुताशनं ज्येष्ठाकाशि
सुताराजन्यमुनामभितोनदीं १७ इत्युद्योगपर्वणिउपाख्याने १८६ दुर्योधनउ० कथंशिखंडीगां
गेयकन्याभूत्वापुरातदा पुरुषोभवद्युधिश्रेष्ठतन्मेब्रूहिपितामह १ भीष्मउ० भार्यातुतस्य
राजेंद्रद्रुपदस्यमहीपतेः महिषीदयिताह्यासीदपुत्राचविशांपते २ एतस्मिन्नेवकाले
तुद्रुपदोवैमहीपतिः अपत्यार्थंमहाराजतोषयामासशंकरं ३ अस्मद्वधार्थंनिश्चित्य
तपोघोरंसमास्थितः लभेतकन्यांमहादेवपुत्रोमेस्यादितिब्रुवन्

॥ ४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

साकन्यातपसानेनदेहार्धेनव्यजायत नदीचराजन्वत्सेषुकन्याचैवाभवत्तदा १९
इतिश्रीमहाभारतेउद्योगपर्वणिअंबोपाख्याने १८८ भीष्मउ० ततस्तेतापसाःसर्वे
तपसेधृतनिश्चयां दृष्ट्वान्यवर्तयंस्तातकिंकार्यमितिचाब्रुवन् १ तानुवाचततः
कन्यातपोवृद्धानृषींस्तदा निराकृतास्मिभीष्मेणभ्रंशितापतिधर्मतः २ वधार्थं
तस्यदीक्षामेनलोकार्थंतपोधनाः निहत्यभीष्मंगच्छेयंशांतिमित्येवनिश्चयः ३
यत्कृतेदुःखवसतिमिमांप्राप्तास्मिशाश्वतीं पतिलोकाद्विहीनाचनैवस्त्रीनपुमा
निह ४ नाहत्वायुधिगांगेयंनिवर्तिष्येतपोधनाः एषमेहृदिसंकल्पोयदिदंक
थितंमया ५ स्त्रीभावेपरिनिर्विण्णापुंस्त्वार्थेकृतनिश्चया भीष्मेप्रतिचिकीर्षामिना
स्मिवार्येतिवैपुनः ६ तांदेवोदर्शयामासशूलपाणिरुमापतिः मध्येतेषांमहर्षी
णांस्वेनरूपेणतापसीं ७ छंद्यमानावरेणाथसावव्रेमत्पराजयं हनिष्यसीतितां
देवःप्रत्युवाचमनस्विनीं ८ ततःसापुनरेवाथकन्यारुद्रमुवाचह उपपद्येत्कथंदेव
स्त्रियायुधिजयोमम ९ स्त्रीभावेनचमेगाढंमनःशांतमुमापते प्रतिश्रुतस्त्वभूते
शात्वयाभीष्मपराजयः १० ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२९ ३२ वार्षिकीवर्षास्वेववहतीवार्षिकी ३४ ३६ पतितागतापरिधावंतीपर्यटंती ३७ ३८ ३९ अध्यायः १८७ ॥

तत्रपुण्येषुतीर्थेषुसाप्लुतांगीदिवानिशं अचरत्काशिकन्यासायथाकामविचारिणी २५ नंदाश्र
मेमहाराजतथोलूकाश्रमेशुभे च्यवनस्याश्रमेचैवब्रह्मणःस्थानएवच २६ प्रयागेदेवयजनेदे
वारण्येषुचैवह भोगवत्यांमहाराजकौशिकस्याश्रमेतथा २७ मांडव्यस्याश्रमेराजन्दिलीपस्या
श्रमेतथा रामह्रदेचकौरव्यपैलगार्ग्यस्यचाश्रमे २८ एतेषुतीर्थेषुतदाकाशिकन्याविशांपते आ
प्लावयतगात्राणिव्रतमास्थायदुष्करं २९ तामब्रवीच्चकौरव्यममम्माताजलेस्थिता किमर्थंक्लिश्य
सेभद्रेतथ्यमेववदस्वमे ३० सैनामथाब्रवीद्राजन्कृतांजलिरनिंदिता भीष्मेणसमरेरामोनि
र्जितश्चारुलोचने ३१ कोन्यस्तमुत्सहेज्जेतुमुद्यतेषुंमहीपतिः साहंभीष्मविनाशायतपस्त
प्स्येसुदारुणं ३२ विचरामिमहींदेवियथाहन्यामहंनृपं एतद्व्रतफलंदेविपरस्मिन्स्याद्यथाहि
मे ३३ ततोब्रवीत्सागरगाजिह्मंचरसिभाविनि नैषकामोनवद्यांगिशक्यःप्राप्तुंत्वयाबले ३४
यदिभीष्मविनाशायकाश्येचरसिवैव्रतं व्रतस्थाचशरीरंत्वंयदिनामविमोक्ष्यसि ३५ नदीभ
विष्यसिशुभेकुटिलावार्षिकोदका दुस्तीर्थानतुविज्ञेयावार्षिकीनाष्टमासिकी ३६ भीमग्राह
वतीघोरासर्वभूतभयंकरी एवमुक्त्वाततोराजन्काशिकन्यांन्यवर्तत ३७ मातामममहाभागा
स्मयमानेवभाविनी कदाचिदष्टमेमासिकदाचिद्दशमेतदा नप्राश्नीतोदकमपिपुनःसावरा
रोहिणी ३८ सावत्सभूमिंकौरव्यतीर्थलोभाततस्ततः पतितापरिधावंतीपुनःकाशिपतेःसु
ता ३९ सानदीवत्सभूमौतुप्रथिताचेतिभारत वार्षिकीग्राहबहुलादुस्तीर्थाकुटिलातथा ४०

तेऽत्रः काशिराजकन्यायाः १४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४

यथावृत्तं महाराज सा च मां प्रत्यनंदत पुहृष्टांश्चादिष्टप्राप्तान्कन्यावृत्तांतकर्मणि
१३ दिवसे दिवसे ह्यस्या गतिजल्पितचेष्टितं प्रत्याहरंश्च ते युक्ताः स्थिताः प्रियहिते मम
१४ यदैव हि वनं प्रायात्सा कन्या तपसे धृता तदैव व्यथितो दीनो गतचेता इवाभवं १५
न हि मां क्षत्रियः कश्चिद्वीर्येण व्यजयद्युधि ऋते ब्रह्मविदस्तात तपसा संशितव्रता
त् १६ अपि चैतन्मया राजन्नारदे विनिवेदितं व्यासे चैव तथा कार्यं तौ चोभौ माम
वोचतां १७ न विषादस्त्वया कार्यो भीष्म काशिसुतां प्रति दैवं पुरुषकारेण को निवर्ति
तुमुत्सहेत् १८ सा कन्या तु महाराज प्रविश्याश्रममंडलं यमुनातीरमाश्रित्य तपस्त
पेतिमानुषं १९ निराहारा कृशा रूक्षा जटिला मलपंकिनी षण्मासान्वायुभक्षा च
स्थाणुभूता तपोधना २० यमुनाजलमाश्रित्य संवत्सरमथापरं उदवासं निराहारा
पारयामास भाविनी २१ शीर्णपत्रेण चैकेन पारयामास सापरं संवत्सरं तीव्रकोपा
पादांगुष्ठाग्रधिष्ठिता २२ एवं द्वादश वर्षाणि तापयामास रोदसी निवर्त्यमानापि च
सा ज्ञातिभिर्नैव शक्यते २३ ततो गमद्वत्सभूमिं सिद्धचारणसेवितां आश्रमं पुण्यशी
लानां तापसानां महात्मनां २४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

रामउवाच सत्यमेतल्लोकानांसर्वेषामेवभाविनि यथाशक्त्यामयायुद्धंकृतंवैपौरुषं
परं १ नचैवमपिशक्नोमिभीष्मंशस्त्रभृतांवरं विशेषयितुमत्यर्थमुत्तमास्त्राणिदर्शय
न् २ एषामेपरमाशक्तिरेतन्मेपरमंबलं यथेष्टंगम्यतांभद्रेकिमन्यद्वाकरोमिते ३ भीष्म
मेवप्रपद्यस्वननेन्याविद्यतेगतिः निर्जितोह्यस्मिभीष्मेणमहास्त्राणिप्रमुंचता ४ एवमु
क्त्वाततोरामोविनिःश्वस्यमहात्मना॰ तूष्णीमासीत्ततःकन्याप्रोवाचभृगुनंदनं ५ भगवन्नेव
मेवैतद्यथाहभगवांस्तथा अजेयोयुधिभीष्मोयमपिदेवैरुदारधीः ६ यथाशक्तियथो
त्साहंममकार्यंकृतंत्वया अनिवार्यंरणेवीर्यमस्त्राणिविविधानिच ७ नचैवशक्यतेयुद्धे
विशेषयितुमंततः नचाहमेनंयास्यामिपुनर्भीष्मंकथंचन ८ गमिष्यामितुतत्राहंयत्र
भीष्मंतपोधनं समरेपातयिष्यामिस्वयमेवभृगूद्वह ९ एवमुक्त्वाययौकन्यारोषव्याकु
ललोचना तापस्येधृतसंकल्पामामेचिंतयतीवधं १० ततोमहेंद्रंसहतैर्मुनिभिर्भृगुस
त्तमः यथागतंतथासोगान्मामुपामंत्र्यभारत ११ ततोरथंसमारुह्यस्तूयमानोद्विजा
तिभिः प्रविश्यनगरंमात्रेसत्यवत्यैन्यवेदयं

१२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२८ प्रणम्य[illegible]ततःभव २९ ३० न्यासयांचक्रिरेत्याजितवंतः ३१ ३२ ३० अध्यायः १८४ ॥

भार्गी[illegible]यीचैमेमातारणमध्येप्रपेदिरे तथैवाततशरोधन्वी तथैव दृढनिश्चयः स्थितोह
माहवे योद्धुं ततस्तेराममब्रुवन् २८ समेत्यसहितासूयः समरेभृगुनंदनं नावनीतं
हि हृदयं विप्राणांशाम्यभार्गव २९ रामरामनिवर्तस्वयुद्धादस्माद्द्विजोत्तम अवध्यो
वैत्वयाभीष्मस्त्वंचभीष्मस्यभार्गव ३० एवंब्रुवंतस्तेसर्वेप्रतिरुध्यरणाजिरं न्यास
यांचक्रिरेशस्त्रंपितरोभृगुनंदन ३१ ततोहंपुनरेवाथतानष्टौब्रह्मवादिनः अद्रा
क्षंदीप्यमानान्वैग्रहानष्टाविवोदितान् ३२ तेमांसप्रणयंवाक्यमब्रुवन्समरेस्थि
तं प्रैहिरामंमहाबाहोगुरुंलोकहितंकुरु ३३ दृष्ट्वानिवर्तितंरामंसुहृद्वाक्येनतेनवै
लोकानांचहितंकुर्वन्नहमप्याददेवचः ३४ ततोहंराममासाद्यववंदेभृशविक्षतः
रामश्चाभ्युत्स्मयन्प्रेम्णामामुवाचमहातपाः ३५ त्वत्समोनास्तिलोकेस्मिन्क्षत्रि
यःपृथिवीचरः गम्यतांभीष्मयुद्धेस्मिंस्तोषितोहंभृशंत्वया ३६ ममचैवसमक्षंतां
कन्यामाहूयभार्गवः उक्तवान्दीनयावाचामध्येतेषांमहात्मनां ३७ इतियोगेअं
बोपाख्याने १८४ ॥

१४ देवैर्निवारितश्चैतद्देवाङ्गःनिवर्तस्वेति १५ १६ १७ १८ १९ २० २१ २२ २३ २४

पर्याप्तमेतद्भद्रंतेतवकार्मुकधारणं विसर्जयैतद्दुर्धर्षतपस्तप्यस्वभार्गव १४ एषभीष्मः
शांतनवोदेवैःसर्वैर्निवारितः निवर्तस्वरणादस्मादितिचैवप्रसादितः १५ रामेणसहमायो
त्सीर्गुरुणेतिपुनःपुनः नहिरामोरणेजेतुंत्वयान्याय्यःकुरूद्वह १६ मानंकुरुष्वगांगेयब्राह्म
णस्यरणाजिरे वयंतुगुरवस्तुभ्यंतस्मात्त्वांवारयामहे १७ भीष्मोवसूनामन्यतमोदिष्ट्याजीव
सिपुत्रक गांगेयःशांतनोःपुत्रोवसुरेषमहायशाः १८ कथंशक्यस्त्वयाजेतुंनिवर्तस्वेहभा
र्गव अर्जुनःपांडवश्रेष्ठःपुरंदरसुतोवली १९ नरःप्रजापतिर्वीरःपूर्वदेवःसनातनः सव्यसा
चीतिविख्यातस्त्रिषुलोकेषुवीर्यवान् भीष्ममृत्युर्यथाकालंविहितोवैस्वयंभुवा २० भीष्मः
एवमुक्तःसपितृभिःपितृन्रामोऽब्रवीदिदं नाहंयुधिनिवर्तेयमितिमेव्रतमाहितं २१ ननिवा
र्त्यतामापगेयःकामंयुद्धात्पितामहाः २२ नत्वहंविनिवर्तिष्येयुद्धादस्मात्कथंचन ततस्तेमुन
योराजन्नृचीकप्रमुखास्तदा २३ नारदेनैवसहिताःसमागम्येदमब्रुवन् निवर्तस्वरणात्ता
तमानयस्वद्विजोत्तमं २४ इत्यवोचमहंतांश्चक्षत्रधर्मव्यपेक्षया ममव्रतमिदंलोकेनाहं
युद्धात्कथंचन २५ विमुखोविनिवर्तेयंपृष्ठतोभ्याहतःशरैः नाहंलोभान्नकार्पण्यान्नभ
यान्नार्थकारणात् २६ त्यजेयंशाश्वतंधर्ममितिमेनिश्चितामतिः ततस्तेमुनयःसर्वेनार
दप्रमुखान्नृप २७ ॥ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

४ ६ चक्रेकृतवानहं ७ हेभीष्मसत्वमंदबुद्धिरहंजितोस्मीतिसंबंधः ८ ९ १० ११ १२ १३ ॥

रामस्तपस्वीब्रह्मण्योब्राह्मणश्चगुरुश्चते तस्यावमानंकौरव्यमास्मकार्षीः कथंचन ४
ततोपश्यंदिविविष्टांस्तानष्टौब्रह्मवादिनः तेमांस्मयंतोराजेंद्रशनकैरिदमब्रुवन् ५
यथाह भरतश्रेष्ठनारदस्तत्तथाकुरु एतद्धिपरमंश्रेयोलोकानांभरतर्षभ ६ ततश्च
प्रतिसंहृत्यतदस्त्रंस्वापनंमहत् ब्रह्मास्त्रंदीपयांचक्रेतस्मिन्युधियथाविधिः ७
ततोरामोहृषितोराजसिंहदृष्ट्वातदस्त्रंविनिवर्तितंवै जितोस्मिभीष्मेणहमंदबुद्धि
रित्येववाक्यंसहसाव्यमुंचत् ८ ततोपश्यत्पितरंजामदग्न्यः पितुस्तथापितरंचास्य।
मान्यं तेतत्रचैनंपरिवार्यतस्थुरूचुश्चैनंसांत्वपूर्वंतदानीं ९ पितरऊः मास्मैवंसाहसं
तातपुनःकार्षीःकथंचन भीष्मेणसंयुगंगंतुंक्षत्रियेणविशेषतः १० क्षत्रियस्यतुध
र्मोयंयद्युद्धंभृगुनंदन स्वाध्यायोव्रतचर्याचब्राह्मणानांपरंधनं ११ इदंनिमित्तेकस्मिं।
श्चिदस्माभिःप्रागुदाहृतं शस्त्रधारणमत्युग्रंतच्चाकार्यंकृतंत्वया १२ वत्सपर्याप्तमेता।
वद्भीष्मेणसहसंयुगे विमर्दस्तेमहाबाहोव्यपयाहिरणादितः १३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१४ १५ १६ १७ १८ १९ २० अध्यायः १८२ दिविदेवानामितिशेषः १ २ ३ ॥

सातस्यद्विजमुख्यस्यनिपपातभुजांतरे विह्वलश्चाभवद्राजन्वेपथुश्चैनमाविशत् १४ तत
एनंपरिष्वज्यसखाविप्रोमहातपाः अकृतव्रणःशुभैर्वाक्यैराश्वासयदनेकधा १५ समाश्वस्त
स्ततोरामःक्रोधामर्षसमन्वितः प्रादुश्चक्रेतदाब्राह्मंपरमास्त्रंमहाव्रतः १६ ततस्तत्प्रतिघा
तार्थंब्राह्ममेवास्त्रमुत्तमं मयाप्रयुक्तंजज्वालयुगांतमिवदर्शयन् १७ तयोर्ब्रह्मास्त्रयोरासी
दंतरावैसमागमः असंप्राप्यैवरामंचमांचभारतसत्तम १८ ततोव्योम्निप्रादुरभूत्तेजएव
हिकेवलं भूतानिचैवसर्वाणिजग्मुरार्तिंविशांपते १९ ऋषयश्चसगंधर्वादेवताश्चैव
भारत संतापंपरमंजग्मुरस्त्रतेजोभिपीडिताः २० ततश्चचालपृथिवीसपर्वतवनद्रुमा
संतप्तानिचभूतानिविषादंजग्मुरुत्तमं २१ प्रजज्वालनभोराजन्धूमायंतेदिशोदश
नस्थातुमंतरिक्षेचशेकुराकाशगास्तदा २२ ततोहाहाकृतेलोकेसदेवासुरराक्षसे इ
दमंतरमित्येवंमोक्तुकामोस्मिभारत २३ प्रस्वापमस्त्रंत्वरितोवचनाद्ब्रह्मवादिनां
विचित्रंचतदस्त्रंमेमनसिप्रत्यभात्तदा २४ इत्युद्योगेअंबोपाख्याने १८३ भीष्मउ॰ ततो
हलहलाशब्दोदिविराजन्महानभूत् प्रस्वापंभीष्ममास्राक्षीरितिकौरवनंदन १ अयुं
जमेवचैवाहंतदस्त्रंभृगुनंदने प्रस्वापंमांप्रयुंजानंनारदोवाक्यमब्रवीत् २ एतेविय
तिकौरव्यदिविदेवगणाःस्थिताः तेत्वांनिवारयंत्यद्यप्रस्वापंमाप्रयोजय ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰३॰ टी॰ ३२९

४ थिल्संनरात्तंवेथिल्संस्थानाग्निसमप्रभुशक्त्यान्वितेचेतिमेदिनीजत्रुदेशेकंठकतयोरंतराले ६ अस्त्रंश्रोणितंपाठां

ततःपरमसंक्रुद्धःपुनरेवमहातपाः रामस्तेनेनचकोपेनशक्तिंवैप्राहिणोन्मयि ४
इंद्राशनिसमस्पर्शांयमदंडसमप्रभां ज्वलंतीमग्निवत्संख्येलेलिहानांसमंततः ५
ततोभरतशार्दूलधिल्स्यमाकाशगांयथा सामामभ्यवधीत्तूर्णंजत्रुदेशेकुरूद्वह ६
अथास्त्रंमेस्रवद्घोरंगिरिर्गैरिकधातुवत् रामेणसुमहाबाहोहतस्यततजंरणे ७
ततोहंजामदग्न्यायभृशंक्रोधसमन्वितः चिक्षेपमृत्युसंकाशंबाणंसर्पविषोपमं
८ सतेनाभिहतोवीरोललाटेद्विजसत्तमः अशोभतमहाराजसशृंगइवपर्वतः ९
ससंरब्धःसमावृत्यशरंकालांतकोपमं संदधेबलवत्कृष्यघोरंशत्रुनिवर्हणं ११
सवक्षसिपपातोग्रःशरोव्यालइवश्वसन् महींराजंस्ततश्चाहमगमंरुधिराविलः
१२ संप्राप्यतुपुनःसंज्ञांजामदग्न्यायधीमते प्राहिण्वंविमलां
शक्तिंज्वलंतीमशनीमिव १३ ॥

३२९

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२० प्रत्यभिज्ञापरिचयः तंज्ञास्यतेपूर्वस्मिन्नस्वभावे ११ १२ १३ १४ १५ १६ १७ १८ अध्यायः १८२ १

उत्तिष्ठमाभैर्गांगेयनभयंतेस्तिकिंचन रक्षामहेत्वांकौरव्यस्वशरीरंहिनोभवान् ९ नत्वांरामो
रणेजेताजामदग्न्यःकथंचन त्वमेवसमरेरामंविजेताभरतर्षभ १० इदमस्त्रंसुदयितंप्रत्यभि
ज्ञास्यतेभवान् विदितंहितवाप्येतत्पूर्वस्मिन्देहधारणे ११ प्राजापत्यंविश्वकृतंप्रस्वापंना
मभारत नहीदंवेदरामोपिपृथिव्यांवापुमान्क्वचित् १२ तत्स्मरस्वमहाबाहोभृशंसंयोजय
स्वच नचरामःक्षयंगंतातेनास्त्रेणनराधिप १३ एनसानचसंयोगंप्राप्स्यसेजातुमानद
स्वप्स्यतेजामदग्न्योसौत्वद्बाणबलपीडितः १४ ततोजित्वात्वमेवैनंपुनरुत्थापयिष्यसि
अस्त्रेणानेनदयितेनाजौभीष्मसंबोधनेनवै १५ एवंकुरुष्वकौरव्यप्रभातेरथमास्थितः प्रसु
प्तंवामृतंवेतितुल्यंमन्यामहेवयं १६ नचरामेणमर्तव्यंकदाचिदपिपार्थिव ततःसमुत्प
न्नमिदंप्रस्वापंयुज्यतामिति १७ इत्युक्त्वांतर्हिताराजन्सर्वएवद्विजोत्तमाः अष्टौसदृशरू
पास्तेसर्वेभास्वरमूर्तयः १८ इत्युद्योगेअंबोपाख्याने १८२ भीष्मउ० ततोरात्र्यांव्यतीता
यांप्रतिबुद्धोस्मिभारत ततःसंचिंत्यवैस्वप्नमवापंहर्षमुत्तमं १ ततःसमभवद्युद्धंम
मतस्यचभारत तुमुलंसर्वभूतानांलोमहर्षणमद्भुतं २ ततोबाणमयंवर्षंववर्ष
मयिभार्गवः न्यवारयमहंतच्चशरजालेनभारत ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰ मंतदमयाः मरीचेयामंडलंचयस्यसतथा तथाच श्रुतिः पूषान्नमेवविघातपतीति अत्यावहारयाव‍ःसमातंकृत

३२८

नोरविर्मंदमरीचिमंडलोजगामास्तंपोमपुंजावगूढः निशास्यगाहत्स्वविपरीतमाहता
नतोपुहं पत्यवहारयावः २७ एवंराजन्नवहारोवभूवततःपुनर्विमलेभूत्सवयोरं कलं
कालं पविंशतिवैदिनानितथैवचान्यानिदिनानित्रीणि २८ इतिश्रीउषोपोमस्रवोपाख्याने
८१ श्रीकृ॰उ॰ ततोहंनिशिराजेंद्रशयानमध्विरसातदा ब्राह्मणानांपितृणांचदेवतानांच
सर्वशः १ नक्तंचराणांभूतानांराजन्यानांविशांपते शयनेशाप्यरहितेमनसासम
चिंतये २ जामदग्न्येनमेयुद्धमिदंपरमदारुणं अहानिचवहून्यत्रवर्ततेसुमहाभये
३ नवरामेमहावीर्येशक्तोपिरणमूर्द्धैति विजेतुंसमरेविप्रंजामदग्न्यंमहाबले ४ यदि
शक्योमयाजेतुंजामदग्न्यःप्रतापवान् दैवतानिप्रसन्नानिदर्शयंतुनिशांमम ५ त
तोनिशिचराजेंद्रप्रसुप्तःशरविक्षतः दक्षिणेनैवपार्श्वेनप्रभातसमयेतदा ६ ततो
हंविप्रमुख्यैस्तैर्येरस्मिपतितोरथात् उत्थापितोधृतश्चैवमाभैरितिचसांत्वितः ७
तएवमांमहाराजस्वप्नेदर्शनमेत्यवै परिवार्याब्रुवन्वाक्यंतन्निवोधकुरूद्वह ८ ॥

वंतोस्रावामितिपूषवः २७ विमलेदिवसेवितमसीत्यर्थःकल्पंकल्पंप्रातःप्रातः २८ अध्यायः १८१ रहितएका

१३ १९ भूविसहस्रदेस्वर्णसहस्राणांदातविभूरिनीवाहृदेवेचहरेचपरमेष्ठिनि नपुंसकंसुवर्णेचश्राज्येसाह्वाच्यलिंग

स्वमन्त्रिवांतरितेचजलविंदुभिरुक्षितः ततस्तेब्राह्मणाराजन्नभ्युवन्परिगृह्य मां १३ माभै
रितिसमंसर्वेस्वस्तितेस्त्वितिवासकृत ततस्तेषामहंवाग्भिस्तर्पितःसहसोत्थितः मातरं
समितांश्रेष्ठामपश्यंपरमास्थितां १४ हयाश्चमेसंगृहीतास्तथासन्महानघासंयतिकौर
वेंद्र याहौजनन्याःप्रतिगृह्यचाहंतथापितॄणांरुधमभ्यपोहं १५ स्वतसामांसरथंहयांश्चो
पस्कराणिच तामहंप्रांजलिर्भूत्वापुनरेवव्यसर्जयं १६ ततोहंस्वयमुद्यम्यहयांस्तान्वातरं
हः अयुध्यंजामदग्न्येननिहंतेहनिभारत १७ ततोहंभरतश्रेष्ठवेगावंतंमहाबलं अमुंचंस
मरेवाणांवामायहृदयछिदं १८ ततोजगामवसुधांममवाणप्रपीडितः जानुभ्यांध
नुरुत्सृज्यरामोमोहवशंगतः १९ ततस्तस्मिन्निपतितेरामेभूरिसहस्रदे आवव्रुर्जलदा
व्योमक्षरंतोरुधिरंबहु २० उल्काश्चप्रातपशःपेतुःसनिर्घाताःसकंपनाः अर्कंचसहसादी
प्तंस्वर्भानुरभिसंवृणोत् २१ ववुश्चावाताःपरुषाश्चलिताचवसुंधरा गृध्रावलाश्चकंका
श्चपरिपेतुर्मुदायुताः २२ दीप्तायांदिशिगोमायुर्दारुणंमुहुरुन्नदत् अनाहतादुंदुभयो
विनेदुःपरुषस्वनाः २३ एतदौत्पातिकंसर्वंघोरमासीद्भयंकरं विसंज्ञकल्पेधरणीगते
रामेमहात्मनि २४ ॥

[illegible] २० सकंपनाः सविद्युतः २१ बलाःकाकाः २२ २३ २४ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३॰ १ मुम १३ …लसमीपे २ ३ ४ ५ द्विजान्ब्राह्मणान्पथगान्वमन् ११ १२ १३ ॥

१३२

॥ अ३॰ ततःप्रभातेराजेंद्रसूर्येविमलतांगते भार्गवस्यमयाऽद्धंपुनर्युद्धमवर्तत १ ततोऽश्रौ
नेवर्षतिपुत्रन्रामःशरवृतांवरः ववर्षपूरजालानिमयिमेघइवाचले २ ततःसुतोममसु
ह्छोरवर्षेणताडितः अपयातोरथोपस्थान्मनोममविषादयन् ३ ततःसुतोममास्यर्थं
कश्मलंप्राविशन्महत् शंपिप्रोचशरावातान्विपपातमुमोहच ४ ततःसुतोजहाप्राणा
न्रामबाणप्रपीडितः मुहूर्तोदिवराजेंद्रमोचभीराविशन्नदा ५ ततःसुतेहतेतस्मिन्
त्रिपतत्सस्यमेप्राणान् प्रमत्तमनसोरामःप्राहिणोन्मस्तुसंमितं ६ ततःसुतस्यसन्निवे
विलतंमोसभार्गवः पुरेणाप्यहनह्गाढंविक्रम्यबलवद्दनुः ७ समेभुजांतरेराजन्विप
न्नरुधिराशनः मयैवसहराजेंद्रजगामवसुधातले ८ मत्वातुनिहतंरामस्ततोमांभर
तर्षभ मेघवद्विननादोच्चैर्जहर्षेचपुनःपुनः ९ तथातुपतितेराजन्मयिरामोमुदायुतः
उदक्रोशन्महानादंसहतैरनुयायिभिः १० ततोपश्यंपतितोराजसिंहद्विजानष्टौसूर्य
हुताशनाभान् तेमांसमंतात्परिवार्यतस्थुःस्वबाहुभिःपरिवार्याजिमध्ये ११ रक्षमाण
श्चतेरविप्रैर्नाहंभूमिमुपस्पृशं अंतरिक्षेथितोह्यस्मितैर्विप्रैर्बांधवैरिव १२ ॥

१३०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

९ १२ निकृत्ताःछिन्नाः हैहयेशप्रमाथी कार्तवीर्यस्यहंता १३ शरवृक्तः वाणैः छिन्नः १४ १५ अलंमहीध्रम् अचलाचलम् १६

ततोहं तामिषुभिर्दीप्यमानां समायांतीमंतकालार्कदीप्तां छित्वा त्रिधा पातयामास भूमौ ततो व
वौ पवनः पुण्यगंधिः ९ तस्यां छिन्नायां क्रोधदीप्तोथ रामः शक्तीर्घोराः प्राहिणोद्द्वादशान्याः तासां
रूपं भारत नो न शक्यं तेजस्वित्वाल्लाघवाच्चैव वक्तुं ७ किं त्वेवाहं विह्वलः संप्रदृश्य प्रदिग्भ्यः सर्वा
महोल्का इवाग्रेः नानारूपास्तेजसोग्रेण दीप्ता यथादित्या द्वादश लोकसंक्षये ८ ततो जालं बाणा
मयं विवृत्तं संदृश्य भित्वा शरजालेन राजन् द्वादशेषून् प्राहिणवं रणेहं ततः शक्तीरप्यधमं घो
ररूपाः ९ ततो राजन् जामदग्न्यो महात्मा शक्तीर्घोरा व्यास्यत् हेमदंडाः विचित्रिताः कांचनप
ट्टनद्धा यथा महोल्का ज्वलितास्तथा ताः १० ताश्चाप्युग्राश्चर्मणा वारयित्वा खड्गेनाजौ पात
यित्वा नरेंद्र बाणैर्दिव्यैर्जामदग्न्यस्य संख्ये दिव्यानश्वानभ्यवर्षं समंतात् ११ निर्मुक्तानां पन्नगा
नां सरूपा हृष्ट्वा शक्तीर्हेमचित्रा निकृत्ताः प्रादुश्चक्रे दिव्यमस्त्रं महात्मा क्रोधाविष्टो हैहयेशप्रमा
थी १२ ततः श्रेण्यः शलभानामिवोग्राः समापेतुर्विशिखानां प्रदीप्ताः समाचिनोच्चापि भृशं शरी
रं हयान् सूतं सरथं चैव मह्यं १३ रथः शरैर्मे निचितः सर्वतो भूत्तथा हयाः सारथिश्चैव राजन् यु
गं रथेषां च तथैव चक्रे तथैवाक्षः शरकृत्तोपभग्नः १४ ततस्तस्मिन् बाणवर्षे व्यतीते शरौघेणा प्रत्यव
र्षं गुरुं तं स विक्षतो मार्गणौघैर्ब्रह्मराशिर्देहादजस्रं सुस्राव भूरि रक्तं १५ यथा रामो बाणजालाभि
तप्तस्तथैवाहं सुदृढं गाढविद्धः ततो युद्धं व्यरमच्चापराह्णे भानावस्तं प्रतियाने महीध्रे १६ इति
यो... पाख्याने १८० ॥ ॥ अध्यायः १८० ॥ १८० ॥ १८०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

अभिध्यानप्रभावाच्च पावकः समजायत तेशराः स्वसमुत्थेन प्रदीप्ताश्चित्रभानुना २४ भ
मीभूतास्तदाराजन्भस्मभूताः प्रपेदिरे तदाशतसहस्राणि प्रयुतान्यर्बुदानि च २५ अयुता
न्यथखर्वाणि निखर्वाणि च कौरव रामः शराणां संक्रुद्धो मयि तूर्णमपातयत् २६ ततोहं
तानपि शरैराशीविषोपमैः संछिद्य भूमौ न्यपतयं पन्नगानिव २७ एवं तदभव
द्युद्धं तदा भरतसत्तम संध्याकाले व्यतीते तु व्यपायात्स च मे गुरुः २८ इत्युद्योगे अंबोपा
ख्याने १७९ भीष्मउ० समागतस्य रामेण पुनरेवातिदारुणं अन्येद्युस्तुमुलं युद्धं तदा भर
तसत्तम १ ततो दिव्यास्त्रविच्छूरो दिव्यान्यस्त्राण्यनेकशः अयोजयत्स धर्मात्मा दिव
से दिवसे विभुः २ तान्यहं तत्प्रतीघातैरस्त्रैरस्त्राणि भारत व्यधमं तुमुले युद्धे प्राणां
स्त्यक्त्वा सुदुस्त्यजान् ३ अस्त्रैरस्त्रेषु बहुधा हतेष्वेव च भारत अक्रुध्यत महातेजास्त्य
क्तप्राणः स संयुगे ४ ततः शक्तिं प्राहिणोद्घोररूपामस्त्रैरुद्धो जामदग्न्यो महात्मा का
लोत्सृष्टां प्रज्वलितामिवोल्कां संदीप्ताग्रां तेजसाव्याप्य लोकं ५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

२१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ॥

ततापततएवासौरामोवाणानजिह्मगान् वाणैरेवाच्छिनत्तूर्णमेकैकं त्रिभिराहवे ततस्तेस
हिताः सर्वे ममवाणाः सुदंशिताः रामवाणैर्द्विधाच्छिन्नाः शतशोथसहस्रशः २२ ततः पुनः
प्रदीप्तं सुप्रभं कालसंमितं असृजं जामदग्न्याय रामायाहं जिघांसया २३ तेनत्वभिहतोगाढं
वाणवेगवशंगतः मुमोह सहसैरामो भूमौ च निपपात ह २४ ततो हाहाकृतं सर्वं रामे भूतल
माश्रिते जगद्भारत संविग्नं यथार्कपतनेभवेत् २५ तत एनं समुद्विग्नाः सर्व एवाभिदुद्रुवुः
तपोधनास्ते सहसा काश्यपाद्यकुरुनंदन २६ तत एनं परिष्वज्य शनैराश्वासयंस्तदा पाणि
भिर्जलशीतैश्च जयाशीर्भिश्च कौरव २७ ततः सविह्वलं वाक्यं राम उत्थाय चाब्रवीत् तिष्ठ
भीष्म हतोसीति वाणं संधाय कार्मुके २८ समुक्तो न्यपतत्तूर्णं सव्ये पार्श्वे महाहवे येनाहं
भृशमुद्विग्नो व्याघूर्णित इव द्रुमः २९ हत्वा हयांस्ततो रामः शीघ्रास्त्रेण महाहवे अवाकिर
न्मां विश्रब्धो वाणैस्तैर्लोमवाहिभिः ३० ततोहमपि शीघ्रास्त्रं समरप्रतिवारणं अवासृजं
महावाहो तेंतराधिष्ठिताः शराः ३१ रामस्य मम चैवाशु व्योमावृत्य समंततः न स्म सूर्यः प्र
तपति शरजालसमावृतः ३२ मातरिश्वा ततस्तस्मिन्मेघरुद्ध इवाभवत् ततो वायोः प्रकं
पाच्च सूर्यस्य च रश्मिभिः ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म.उ. ... १२ १३ १४ १५ १६ १७ १८ १९ २० ॥

टी.

३२५

ततोहमस्त्रं वायव्यं जामदग्न्ये प्रयुक्तवान् प्रत्याजघ्ने च तद्रामो गुह्यकास्त्रेण भारत ११
ततोहमस्त्रमाग्नेयमनुमंत्र्य प्रयुक्तवान् वारुणेनैव तद्रामो वारयामास मे विभुः १२
एवमस्त्राणि दिव्यानि रामस्याहमवारयं रामश्च मम तेजस्वी दिव्यास्त्रविदरिंदमः १३
ततो मां सव्यतो राजन् रामः कुर्वन् द्विजोत्तमः उरस्यविध्यत्संक्रुद्धो जामदग्न्यः प्रतापवान्
१४ ततोहं भरतश्रेष्ठ संन्यषीदं रथोत्तमे ततो मां कश्मलाविष्टं सूतस्तूर्णमपावहत् १५
ग्लायंतं भरतश्रेष्ठ रामबाणप्रपीडितं ततो मामपयातं वै भृशं विद्धमचेतसं १६ रामस्या
नुचरा हृष्टाः सर्वे दृष्ट्वा विचुक्रुशुः अकृतव्रणप्रभृतयः काशिकन्या च भारत १७ तत
स्तु लब्धसंज्ञोहं ज्ञात्वा सूतमथाब्रुवं याहि सूत यतो रामः सज्जोहं गतवेदनः १८ त
तो मामवहत्सूतो हयैः परमशोभितैः नृत्यद्भिरिव कौरव्य मारुतप्रतिमैर्गतौ १९ त
तोहं राममासाद्य बाणवर्षैश्च कौरव अवाकिरं सुसंरब्धः संरब्धं च जिगीषया २०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१८ १९ अध्यायः १७९ स्नानोपहृतैः स्नातैः पराहृतैश्च १ २ ६ स्वतेजितान् सस्तुतीन्दीक्षितान् ७ ८ ९ १०

गुरुर्द्विजातिर्धर्मात्मा यदयं पीडितः शरैः ततो न प्राहरं भूयो जामदग्न्याय भारत १८ अथा
वतत्य पृथिवीं पूषा दिवसे तत्र ये जगाम अस्तं सहस्रांशुस्ततो युद्धमुपारमत् १९ इत्युद्यो
गेऽम्बोपाख्याने १७८ भीष्म उ॰ आत्मनस्तु ततः सूतो हयानां च विशांपते मम चापनयामा
स शल्यान्कुशलसंमतः १ स्नातोपवृत्तैस्तुरगैर्लब्धतोयैरविह्वलैः प्रभाते चोदिते सूर्ये
ततो युद्धमवर्तत २ दृष्ट्वा मां तूर्णमायान्तं दंशितं स्यन्दने स्थितं अकरोद्रथमत्यर्थं रामः स
ज्जं प्रतापवान् ३ ततोऽहं राममायान्तं दृष्ट्वा समरकाङ्क्षिणं धनुःश्रेष्ठं समुत्सृज्य सहसाव
तरं रथात् ४ अभिवाद्य तथैवाहं रथमारुह्य भारत युयुत्सुर्जामदग्न्यस्य प्रमुखे वीतभी
भीः स्थितः ५ ततो मां शरवर्षेण महता समवाकिरं स च मां शरवर्षेण वर्षन्तं समवा
किरत् ६ संक्रुद्धो जामदग्न्यस्तु पुनरेव सुतेजितान् संप्रैषीन्मे शरान्घोरान्दीप्तास्यान्
इवाग्नीव ७ ततोऽहं निशितैर्भल्लैः शतशोऽथ सहस्रशः अच्छिनं सहसा राजन्नन्तरिक्षे पु
नः पुनः ८ ततस्त्वस्त्राणि दिव्यानि जामदग्न्यः प्रतापवान् मयि प्रयोजयामास तान्यहं प्रत
षेधयं ९ अस्त्रैरेव महाबाहो चिकीर्षन्नधिकां क्रियां ततो दिवि महान्नादः प्रादुरासीत्समन्ततः १०
कान्ति

म॰ ३॰ १२९ २८ वी २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ॥

दी॰

३२८

र्पैव वच्छषट्कानां प्राप्ता नि नतपर्वणां विवेपर्क्ककपत्राणां जामदग्न्यरथ्यं प्रति २८ काये
विषक्तास्तु तदा वायुना समुदीरिताः चेलुः ततो रुधिरं नागा इव चते प्रसाराः २९ ततजो
सितसर्वांगः तत्र स रुधिरं रणे बभौ रामस्तदा राजन्मेरुर्धातुमिवोत्सृजन् ३० हेमंता
न्ते शोकसंवरक्तं वकमंडितः बभौ रामस्तथा राजन्प्रफुल्ल इव किंशुकः ३१ ततोन्यद्ध
नुरादाय रामः क्रोधसमन्वितः हेमपुंखान्सुनिशितान्शरांस्तान्हि ववर्ष सः ३२
नैसमास्थाय घोरान्बहुरूपान्मर्मभेदिनः अकंपयन्महावेगाः सर्वानलशिखोपमाः
३३ तमहंस्तमवष्टभ्य पुनरात्मानमाहवे शतसंख्यैः शरैः क्रुद्धस्तदा राममवाकिरं ३४
ततैरग्न्यर्कसंकाशैः शरैराशीविषोपमैः श्रितैरभ्यर्द्दितो रामो मंदचेता इवाभवत् ३५
ततो हं कृपया विष्टो विष्टभ्यात्मानमात्मना धिग्धिगित्यब्रुवं युद्धं क्षत्रधर्मं च भारत
३६ असकृच्चाब्रुवं राजन्शोकवेगपरिप्लुतः अहो बत कृतं पापं मयेदं क्षत्रधर्मणा ३७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नतेतेजयमाशास्मीत्युक्तिःभूतिमिच्छतात्वयाप्रभोवमदभिवंदनस्यजयहेतोःकृतत्वादितिभावःतत्त्वेवमेतत्कृरुष्वे

नतुतेजयमाशासेत्वांविजेतुमहंस्थितः गच्छयुध्यस्वधर्मेणप्रीतोस्मिचरितेनते १७ ततो
हंतेनमस्कृत्यरथमारुह्यसत्वरः शंखमापूर्यरणेशंखंपुनर्हेमपरिष्कृतं १८ ततोयुद्धमभू
त्सुमहत्तस्यचभारत दिवसान्सुबहूनाजन्परस्परजिगीषया १९ समेतस्मिन्रणेशूर्वे
ब्रह्मत्वेकपत्रिभिः षष्ठ्याशतैश्चनवभिःशराणांनतपर्वणां २० चत्वारस्तेनमेवाहाःसू
तश्चैवविशांपते प्रतिरुद्धास्तथैवाहंसमरेदृप्तितःस्थितः २१ नमस्कृत्यचदेवेभ्योब्राह्मणे
भ्योविशेषतः नमहंस्मयन्निवरणेप्रत्यभाषव्यवस्थितं २२ आचार्यतामानितामेनिर्मर्या
देह्यपित्वयि भूयश्चशृणुमेवत्समंसंपदंधर्मसंग्रहे २३ येतेवेदाःशरीरस्थाब्राह्मणंयच
तेमहत् नयष्यतेमहत्तस्मंनतेभ्यःप्रहरामहे २४ प्रहरेत्तत्रधर्मस्ययंतेरामसमाश्रितः
ब्राह्मणःतत्प्रियत्वंहियातिशस्त्रसमुद्यमात् २५ पश्यमेधनुषोवीर्यंपश्यबाह्वोर्बलंमम
पश्यतेकार्मुकंवीरछिनद्मिनिशितेषुणा २६ तस्याहंनिशितंभल्लंविदेपभरतर्षभ
तेनास्यधनुषःकोटिंछित्वाभूमाव
पातय २७ ॥

तेवांभूतिमिच्छतेत्यनेनसूचितं १७ १८ २२ मेमयामानिता २३ २६ विदेपेतिपारोक्ष्यार्थेलिट्प्रयोगःहेल
याकृतत्वसूचनार्थः २७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८८ क्षत्रियहणः क्षत्रियहंता ९० ९१ ९२ ९३ अध्यायः १७७ स्मयन्निव वदयन्निव १ ३ वेदमातरो गायत्री सावित्री स

गत्वाहं जामदग्न्यं तत्र याचिष्ये कुरूद्वह भीष्मेण सह मा योत्सीः शिष्येणेति पुनः पुनः ८८ मा
मेवं पुत्र निर्बंधं कुरु विप्रेण पार्थिव जामदग्न्येन समरे योद्धुमित्येव भर्त्सयन् ८९ किन्त्वेवं त
क्षत्रियहणो हरतुल्यपराक्रमः विदितः पुत्र रामस्ते यतस्तं योद्धुमिच्छसि ९० ततोऽहमब्रुवं देवी
मभिवाद्य कृतांजलिः सर्वं तद्भरतश्रेष्ठ यथावृत्तं स्वयंवरे ९१ यथा च रामो राजेंद्र मया पूर्वं
प्रचोदितः काशिराजसुतायाश्च यथा कर्म पुरातनं ९२ ततः सा राममभ्येत्य जननी मे महा
नदी मदर्थं तमृषिं देवी क्षमयामास भार्गवं भीष्मेण सह मा योत्सीः शिष्येणेति वचोऽब्रवीत्
स च तामाह याचंतीं भीष्ममेव निवर्तय न च मे कुरुते काममित्यहं तमुपागमं ९४ वैशंपाय॰
ततो गंगा सुतस्नेहात् भीष्मं पुनरुपागमत् न चास्याश्चाकरोद्वाक्यं क्रोधपर्याकुलेक्षणः ९५
अथादृश्यत धर्मात्मा भृगुश्रेष्ठो महातपाः आह्वयामास च पुनर्युद्धाय द्विजसत्तमः ९६ अयो॰
ग्रंथो- १७७ भीष्म उ॰ तमहं स्मयन्निव वाणी प्रत्यभाषं व्यवस्थितं भूमिष्ठं नोत्सहे योद्धुं भवंतं रथ
मास्थितः १ आरोह स्यंदनं वीर कवचं च महाभुज बधान समरे राम यदि योद्धुं मयेच्छसि २
ततो मामब्रवीद्रामः स्मयमानो रणाजिरे रथो मे मेदिनी भीष्म वाहा वेदाः सदश्ववत् ३ सूत
श्च मातरिश्वा वै कवचं वेदमातरः सुसंवीतो रणे ताभिर्योत्स्येऽहं कुरुनंदन ४ एवं ब्रुवाणो
गांधारे रामो मां सत्यविक्रमः शरव्रातेन महता सर्वतः प्रत्यवारयत् ५

लत्यः ४ सव्यतिक्रमपाठे लंघितक्रमः ५ [illegible] ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

दद्भुतोपमं स्वभूतोपमं दर्शनं यस्य तस्मिन् ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ ॥

ततोपश्यं जामदग्न्यं रथमध्ये व्यवस्थितं सर्वायुधधरे श्रीमत्यद्भुतोपमदर्शने ६ मनसा
विहिते पुण्ये विस्तीर्णे नगरोपमे दिव्याश्वयुजि संनद्धे कांचनेन विभूषिते ७ कवचेन महा
बाहो सोमार्ककृतलक्ष्मणा धनुर्धरो बद्धतूणो बद्धगोधांगुलित्रवान् ८ सारथ्यं कृतवांस्त
स्य युयुत्सोरकृतव्रणः सखा वेदविदत्यंतं दयितो भार्गवस्य ह ९ आह्वयानः स मां यु
द्धे मनो हर्षयतीव मे पुनः पुनरभिक्रोशन्नभियाहीति भार्गवः १० तमादित्यमिवोद्यंत
मनाधृष्यं महाबलं क्षत्रियांतकरं राममेकमेकः समासदम् ११ ततोहं बाणपातेषु त्रि
षु वाहान्निगृह्य वै अवतीर्य धनुर्न्यस्य पदातिरृषिसत्तमम् १२ अभ्यगच्छं तदा राममर
चिष्यन्द्विजसत्तमं अभिवाद्य चैनं विधिवदब्रुवं वाक्यमुत्तमं १३ योत्स्ये त्वया रणे रा
म सदृशेनाधिकेन वा गुरुणा धर्मशीलेन जयमाशास्स्व मे विभो १४ रामउ॰ एवमेत
त्कुरुश्रेष्ठ कर्तव्यं भूतिमिच्छता धर्मो ह्येष महाबाहो विशिष्टैः सह युध्यतां १५ शपेयं त्वां
न चेदेवमागच्छेथा विशांपते युध्यस्व त्वं रणे यत्तो धैर्यमालंब्य कौरव १६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ ३॰
टी॰
१२२

सूपस्करं स्यंदं सधिष्ठानं सचक्रं वैयाघ्रं व्याघ्रचर्मतदेव परिवारणं आच्छादनं यस्य तं ७५ ८१ भार्गवस्य रामस्य ८६

मिततेजसः मुहूर्तमनुध्याय धृतराष्ट्रोऽभ्यभाषत ४९ महता शोकजालेन प्रणुन्नो
स्मि द्विजोत्तम नात्मानमवबुध्यामि मुह्यमानो मुहुर्मुहुः ५० इदं तु वचनं श्रुत्वा तव दैव
नियोगजं धारयिष्याम्यहं प्राणान्द्रक्ष्ये न तु शोचितुं ५१ एतच्छ्रुत्वा तु वचनं व्यासः सत्य
वतीसुतः धृतराष्ट्रस्य राजेंद्र तत्रैवांतरधीयत ५२ इति श्रीमहाभारते शतसहस्र्यां सं
हितायां वैयासिक्यां विशोकपर्व समाप्तमष्टमोऽध्यायः ८ अस्यानंतरं स्त्रीपर्व भ
विष्यति तस्यायमाद्यः श्लोकः जनमेजय उवाच गते भगवति व्यासे धृतराष्ट्रो महीप
तिः किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि १ ॥

वप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीनीलकंठस्य कृतौ भारतभावदीपे विशोकपर्वप्रकाशा
र्थः समाप्तोऽष्टमोऽध्यायः ८ ॥

१०

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ॥ ०

दृष्ट्वैवतोनानुगतः कर्णपरबलादिदं नह्यस्मान्कर्णसहितान्जयेद्वज्रोपिसंयुगे ८ तमहं
यत्रतत्रस्थंद्रष्टुमिच्छामिसूर्यजं अविज्ञातोमयायोसौघातितःसव्यसाचिना ९ भीमंचभी
मविक्रांतंप्राणेभ्योपिप्रियंमम अर्जुनंचेंद्रसंकाशंयमौचैवयमोपमौ १० द्रष्टुमिच्छामितांचाहं
पांचालींधर्मचारिणीं नचेहस्थातुमिच्छामिसत्यमेतद्ब्रवीमिवः ११ किंमेभ्रातृविहीनस्यस्व
र्गेणसुरसत्तमाः यत्रतेममसस्वर्गोभ्रातरोवैमतोमम १२ देवाऊचुः यदिवैतत्रतेश्रद्धागम्य
तांपुत्रमाचिरं प्रियेहितववर्त्तामोदेवराजस्यशासनात् १३ वैशं० इत्युक्त्वाततोदेवदेवदूतमु
पादिशन् युधिष्ठिरस्यसुहृदोदर्शयेतिपरंतप १४ ततःकुंतीसुतोराजादेवदूतश्चजग्मतुः
सहितौराजशार्दूलयत्रतेपुरुषर्षभाः १५ अग्रतोदेवदूतस्तुययौराजाचपृष्ठतः पंथान
मशुभंदुर्गंसेवितंपापकर्मभिः १६ तमसासंवृतंघोरंकेशशैवलशाद्वलं युक्तंपापकृतां ५
गंधैर्मांसशोणितकर्दमं १७ दंशोत्पातंभल्लूकमक्षिकामशकावृतं इतश्चेतश्चकुणपैः
समंतात्परिवारितं १८ अस्थिकेशसमाकीर्णंकृमिकीटसमाकुलं ज्वलनेनप्रदीप्तेनसमं
तात्परिवेष्टितं १९ अयोमुखैश्चकाकाद्यैर्गृध्रैश्चसमभिद्रुतं सूचीमुखैस्तथाप्रेतैर्विंध्यशैलो

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्व॰ रो॰ प्रवेरितैः ३ तस्ततः पातितैः २१ २२ करंभवालुकास्वेतस्तस्वालुकाभ्रष्टवालुकेत्यर्थः २४ २५ २६ २७ २८ २९ ३० ३१ ३२ ३३

२

मेदोरुधिरयुक्तैश्च छिन्नबाहूरुपाणिभिः निकृत्तोदरपादैश्च तत्र तत्र प्रवेरितैः २१ स तत्कुणप
दुर्गंधमशिवं लोमहर्षणं जगाम राजा धर्मात्मा मध्ये बहु विचिंतयन् २२ ददर्शोष्णोदकैः की श्लो॰
र्णां नदीं चापि सुदुर्गमां असिपत्रवनं चैव निशितं क्षुरसंवृतं २३ करंभवालुकास्तप्ता आय
साश्च शिलाः पृथक् लोहकुंभीश्च तैलस्य क्वाथ्यमानाः समंततः २४ कूटशाल्मलिकं
चापि दुःस्पर्शं तीक्ष्णकंटकं ददर्श चापि कौंतेयो यातनाः पापकर्मिणां २५ स दुर्गंधमालक्ष्य यो॰
देवदूतमुवाच ह कियदध्वानमस्माभिर्गंतव्यमिममीदृशं २६ क्व च ते भ्रातरो मह्यं तन्ममा
ख्यातुमर्हसि देशोयं कश्च देवानामेतदिच्छामि वेदितुं २७ स संनिववृते श्रुत्वा धर्मराजस्य
भाषितं देवदूतोब्रवीच्चैनमेतावद्गमनं तव २८ निवर्तितव्यो हि मया तथास्म्युक्तो दिवौक
सैः यदि श्रांतोसि राजेंद्र त्वमथागंतुमर्हसि २९ युधिष्ठिरस्तु निर्विण्णस्तेन गंधेन मूर्छितः
निवर्तने धृतमनाः पर्यावर्तत भारत ३० स संनिवृत्तो धर्मात्मा दुःखशोकसमाहतः शु
श्राव तत्र वदतो दीना वाचः समंततः ३१ भो भो धर्मज राजर्षे पुण्याभिजन पांडव अनुग्रहा
र्थमस्माकं तिष्ठ तावन्मुहूर्तकं ३२ आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः तव गंधानुगः
तात येनास्मान्सुखमागमत् ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ॥ ७

तेवयंपार्थदीर्घस्यकालस्यपुरुषर्षभ सुखमासादयिष्यामस्त्वांदृष्ट्वाराजसत्तम ३४
संतिष्ठस्वमहाबाहोमुहूर्तमपिभारत त्वयितिष्ठतिकौंतेययातनास्मान्नबाधते ३५ एवं
बहुविधावाचःकृपणावेदनावतां तस्मिन्देशेसशुश्रावसमंताद्वदतांनृप ३६ तेषांतुव
चनंश्रुत्वादयावान्दीनभाषिणां अहोकृच्छ्रमितिप्राहतस्थौसचयुधिष्ठिरः ३७ सतागिरः
पुरस्ताद्वैश्रुतपूर्वाःपुनःपुनः ग्लानानांदुःखितानांचनाभ्यजानतपांडवः ३८ अबुध्यमा
नस्तावाचोधर्मपुत्रोयुधिष्ठिरः उवाचकेभवंतोवैकिमर्थंचेहतिष्ठथ ३९ इत्युक्तास्तेततःस
र्वेसमंतादवभाषिरे कर्णोहंभीमसेनोहमर्जुनोहमितिप्रभो ४० नकुलःसहदेवोहंधृ
ष्टद्युम्नोहमित्युत द्रौपदीद्रौपदेयाश्चइत्येवंतेविचुक्रुशुः ४१ तावाचःसतदाश्रुत्वातद्देश
सदृशीर्नृप ततोविममृशेराजाकिंत्विदंदैवकारितं ४२ किंतुतत्कलुषंकर्मकृतमेभिर्महा
त्मभिः कर्णेनद्रौपदेयैर्वापांचाल्यावासुमध्यया ४३ यइमेपापगंधेस्मिन्देशेसंतिसुदारुणे
नाहंजानामिसर्वेषांदुष्कृतंपुण्यकर्मणां ४४ किंकृत्वाधृतराष्ट्रस्यपुत्रोराजासुयोधनः तथा
श्रियायुतःपापैःसहसर्वैःपदानुगैः ४५ महेंद्रइवलक्ष्मीवानास्तेपरमपूजितः कस्येदानींवि

प:

स्व०री० ४७ ४८ विमर्षविचारंकृतवान् ४९ ५० दूताः खिन्नाः ५२ ५४ द्वितीयोध्यायः स्थिते १ २ ३ ४ ७

४

सर्वधर्मविदः शूराः सत्यागमपरायणाः क्षत्रधर्मपराः संतो यज्वानो भूरिदक्षिणाः ४७ किंनु
सुप्तोस्मि जागर्मि चेतयामि न चेतये अहो चित्तविकारोयं स्याद्वा मे चित्तविभ्रमः ४८ एवं ब
हुविधं राजा विममर्ष युधिष्ठिरः दुःखशोकसमाविष्टश्चिंताव्याकुलितेंद्रियः ४९ क्रोधमा
हारयच्चैव तीव्रं धर्मसुतो नृपः देवांश्च गर्हयामास धर्मं चैव युधिष्ठिरः ५० सतीव्रगंधसंत
प्तो देवदूतमुवाच ह गम्यतां तत्र येषां त्वं दूतस्तेषामुपांतिकं ५१ नह्यहं तत्र यास्यामि स्थि
तोस्मीति निवेद्यतां मत्संश्रयादिमे दूत सुखिनो भ्रातरो हि मे ५२ इत्युक्तः स तदा दूतः पांडु
पुत्रेण धीमता जगाम तत्र यत्रास्ते देवराजः शतक्रतुः ५३ निवेदयामास च तद्धर्मराजचि
कीर्षितं यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ५४ इति स्वर्गारोहणपर्वणि वैशंपायन०
स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे आजग्मुस्तत्र कौरव्य देवाः शक्रपुरोगमाः १ सच
विग्रहवान्धर्मो राजानं प्रसमीक्षितुं तत्राजगाम यत्रासौ कुरुराजो युधिष्ठिरः २ तेषु भा ३
स्वरदेहेषु पुण्याभिजनकर्मसु समागतेषु देवेषु व्यगमत्तत्तमो नृप ३ नादृश्यंत च ता
स्तत्र यातनाः पापकर्मिणां नदी वैतरणी चैव कूटशाल्मलिना सह ४ ॥ ५ ४

२

५ ॥ भ्रातृणां स्वर्गो भ्रातृणां नरकः इति युधिष्ठिरस्य ईर्ष्याविषादावपनयतीयं इति १२ १४ हतः कुंजर इति यत्र

लोहकुंभ्यः शिलाश्चैव नादृश्यंत भयानकाः विकृतानि शरीराणि यानि तत्र समंततः ५ ददृ

शे राजा कौरव्यस्तान्यदृश्याणि चाभवन् ततो वायुः सुखस्पर्शः पुण्यगंधवहः शुचिः ६ ववौ दे

वसमीपस्थः शीतलोतीव भारत मरुतः सह शक्रेण वसवश्चाश्विनौ सह ७ साध्या रुद्रास्त

थादित्या ये चान्येपि दिवौकसः सर्वे तत्र समाजग्मुः सिद्धाश्च परमर्षयः ८ यत्र राजा महातेजा

धर्मपुत्रः स्थितोभवत् ततः शक्रः सुरपतिः श्रिया परमया युतः ९ युधिष्ठिरमुवाचेदं सांत्व श्री

पूर्वमिदं वचः युधिष्ठिर महाबाहो प्रीता देवगणास्तव १० एह्येहि पुरुषव्याघ्र कृतमेताव

ता विभो सिद्धिः प्राप्ता महाबाहो लोकाश्चाप्यक्षयास्तव ११ नच मन्युस्त्वया कार्यः शृणु चेदं

वचो मम अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः १२ शुभानामशुभानां च द्वौ राशी पुरुष

र्षभ यः पूर्वं सुकृतं भुंक्ते पश्चान्निरयमेव सः १३ पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः

भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते १४ तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप व्याजेन हि

त्वया द्रोण उपाचीर्णः सुतं प्रति १५ व्याजेनैव ततो राजन् दर्शितो नरकस्तव यथैव त्वं तथा भीमस्त

त्थामवधे द्रोण उपाचीर्णः वंचितः गजवाचीशब्दो मनुष्यपरत्वेन ज्ञापितः इत्युपचारच्छलेनार्थः १५ श्री

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सं.टी.
५
तमेवंतव १८ २४ यमिज्जहितान् त्वकृबलेनवहिंसापितान् २५ २६ २७ २८ २९ ॥ ७

द्रौपदीचतथाकृत्वाव्याजेननरकंगता आगच्छनरशार्दूलमुक्तास्तेचैवकल्मषात् २७
स्वपक्षाश्चैवयेतभ्यंपार्थिवानिहतारणे सर्वेस्वर्गमनुप्राप्तास्तान्पश्यभरतर्षभ २८ कर्णश्चै
वमहेष्वासः सर्वशस्त्रभृतांवरः सगतःपरमांसिद्धिंयदर्थंपरितप्यसे २९ तंपश्यपुरुषव्या
घ्रमादित्यतनयंविभो स्वस्थानस्थंमहाबाहोजहिशोकंनरर्षभ ३० भ्रातॄंश्चान्यांस्तथाप जं.
श्यस्वपक्षांश्चैवपार्थिवान् स्वंस्वंस्थानमनुप्राप्तान्व्येतुतेमानसोज्वरः ३१ कृच्छ्रंपूर्वंचानु
भूयेतःप्रभृतिकौरव विहरस्वमयासार्द्धंगतशोकोनिरामयः ३२ कर्मणांतातपुण्या
नांजितानांतपसास्वयं दानानांचमहाबाहोफलंप्राप्नुहिपार्थिव ३३ अद्यत्वांदेवगंधर्वा
दिव्याश्चाप्सरसोदिवि उपसेवंतकल्याणंविरजोंबरभूषणाः ३४ राजसूयजितांल्लो
कांस्त्वयमेवाभिवर्हितान् प्राप्नुहित्वंमहाबाहोतपसश्चमहाफलं ३५ उपर्युपरिरा
ज्ञांहितवलोकायुधिष्ठिर हरिश्चंद्रसमाःपार्थयेषुत्वंविहरिष्यसि ३६ मांधातायत्र
राजर्षिर्यत्रराजाभगीरथः दौष्यंतिर्यत्रभरतस्तत्रत्वंविहरिष्यसि ३७ एषादेवनदीपु
ण्यापार्थत्रैलोक्यपावनी आकाशगंगाराजेंद्रतत्राप्लुत्यगमिष्यसि ३८ अत्रस्नातस्यभा
वस्तेमानुषोविगमिष्यति गतशोकोनिरायासोमुक्तवैरोभविष्यसि ३९ ५

१० ११ जिज्ञासमापरीता १२ ११ स्वर्गाधिरोहणोद्वैपयात्मोदर्येषु विनष्टेषु भ्रातृष्वथा पथा विणात्मुनकू पिणाद्वैप

एवंब्रुवति देवेंद्रे कौरवेंद्रं युधिष्ठिरं धर्मविग्रहवान्साक्षाद्वुवाच सुतमात्मनः १० भोभोराजन्महाप्रा

ज्ञप्रीतोस्मितवपुत्रक मद्भक्त्यासत्यवाक्येन दमयाचदमेनच ११ एषात्तृतीयाजिज्ञासातवराज

न्कृतामया नशक्यसेचालयितुंस्वभावात्पार्थहेतुतः १२ पूर्वंपरीक्षितोहित्वंप्रश्नाद्वैतवनेमया

अरणीसहितस्यार्थेतच्चनिस्तीर्णवानसि १३ सोदर्येषुविनष्टेषुद्वैपयात्तत्रभारतश्वरूपधारि

णापुत्रपुनस्त्वमेपरीक्षितः १४ इमंत्तृतीयंभ्रातृणामर्थेयत्स्थातुमिच्छसि विशुद्धोसिमहाभाग

सुखीविगतकल्मषः १५ नचतेभ्रातरःपार्थनरकार्हाविशांपते मायैषादेवराजेनमहेंद्रेणप्रय

योजिता १६ अवश्यंनरकास्तातद्रष्टव्याःसर्वराजभिः ततस्त्वयाप्राप्तमिदंमुहूर्तंदुःखमुत्तमं

१७ नसव्यसाचीभीमोवायमौवापुरुषर्षभौ कर्णोवासत्यवाक्शूरोनरकार्हाश्चिरंनृप १८ न

कृष्णाराजपुत्रीचनरकार्हायुधिष्ठिर एह्येहिभरतश्रेष्ठपश्यगंगांत्रिलोकगां १९ एवमुक्तःसरा

जर्षिस्तवपूर्वपितामहः जगामसहधर्मेणसर्वैश्चत्रिदिवालयैः ४० गंगांदेवनदींपुण्यांपाव

नीमृषिसंस्तुतां अवगाह्यततोराजातनुंतत्याजमानुषीं ४१ ततोदिव्यवपुर्भूत्वाधर्मराजोयु

धिष्ठिरः निर्वैरोगतसंतापोजलेतस्मिन्समाप्लुतः ४२ ॥

घाः इतिपंचमीपाठेतामारभ्येतदर्थः ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्व॰री॰ ४२ यत्र ते कुरवस्तत्र देवैः सहृदया वितिहृदयोः संवधः ४४ तृतीयोध्यायः ततो १ ब्राह्मेणाब्रह्मणाग्रास

६ ततोभ्ययाद्वृतो देवैः कुरुराजो युधिष्ठिरः धर्मेण सहितो धीमान्स्तूयमानो महर्षिभिः ४२ यत्र ते
पुरुषव्याघ्राः शूरा विगतमन्यवः पांडवा धार्त्तराष्ट्राश्च स्वानि स्थानानि भेजिरे ४ इति स्वर्गा
रोहणपर्वणि ३ वैशंपायन उवाच ततो युधिष्ठिरो राजा देवैः सर्षिमरुद्गणैः स्तूयमानो ययौ
तत्र यत्र ते कुरुपुंगवाः १ ददर्श तत्र गोविंदं ब्राह्मेण वपुषान्वितं तेनैव दृष्टपूर्वेण सादृश्ये
नैव सूचितं २ दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्थितं चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्र
हैः ३ उपास्यमानं वीरेण फाल्गुनेन सुवर्चसा तथा स्वरूपं कौंतेयो ददर्श मधुसूदनं ४
तावुभौ पुरुषव्याघ्रौ समुदीक्ष्य युधिष्ठिरं यथावत्प्रतिपेदाते पूजया देवपूजितौ ५ अपरस्मि
न्नथोद्देशे कर्णं शस्त्रभृतां वरं द्वादशादित्यसहितं ददर्श कुरुनंदनः ६ अथापरस्मिन्नुद्दे
न॰ शे मरुद्गणवृतं विभुं भीमसेनमथापश्यत्तेनैव वपुषान्वितं ७ वायोर्मूर्तिमतः पार्श्वे दिव्य
मूर्तिसमन्वितं श्रिया परमया युक्तं सिद्धिं परमिकां गतं ८ अश्विनोस्तु तथा स्थाने दीप्यमा
नौ स्वतेजसा नकुलं सहदेवं च ददर्श कुरुनंदनः ९ तथा ददर्श पांचालीं कमलोत्पल
मालिनीं वपुषा स्वर्गमाक्रम्य तिष्ठंतीमर्कवर्चसं १० ॥ ४

धेन २ उपस्थितं सेवितं सम्रग्रे: ३ ४ ५ ६ ७ ८ ९ १० ॥ ४ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

११ मानुषंमानुषभावं १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२ २३ चतुर्थोऽध्यायः ४ ॥ छ

अखिलेसहमाराजाप्रभुमेऽयुधिष्ठिरः ततोस्मभगवानिंद्रः कथयामासदेवराट् ११ श्रीरेषा
द्रौपदीरूपात्वदर्थेमानुषंगता अयोनिजालोककांतापुण्यगंधायुधिष्ठिर १२ रत्यर्थंभवतां
ह्येषानिर्मिताशूलपाणिना द्रुपदस्यकुलेजाताभवद्भिश्चोपजीविता १३ एतेपंचमहाभागा
गंधर्वाःपावकप्रभाः द्रौपद्यास्तनयाराजन्युष्माकममितौजसः १४ पश्यगंधर्वराजानंधृतरा
ष्ट्रंमनीषिणं एनंचत्वंविजानीहिभ्रातरंपूर्वजंपितुः १५ अयंतेपूर्वजोभ्राताकौंतेयःपावकद्यु
तिः सूर्यपुत्रोग्रजःश्रेष्ठोराधेयइतिविश्रुतः १६ आदित्यसहितोयातिपश्यैनंपुरुषर्षभं सा॰
ध्यानामथदेवानांविश्वेषांमरुतामपि १७ गणेषुपश्यराजेंद्रवृष्ण्यंधकमहारथान् सात्यकिप्र
मुखान्वीरान्भोजांश्चैवमहाबलान् १८ सोमेनसहितंपश्यसौभद्रमपराजितं अभिमन्युंमहेष्वा
संनिशाकरसमद्युतिं १९ एषपांडुर्महेष्वासःकुंत्यामाद्र्याचसंगतः विमानेनसदाभ्येतिपिता॰
तवममांतिकं २० वसुभिःसहितंपश्यभीष्मंशांतनवंनृप द्रोणंबृहस्पतेःपार्श्वेगुरुमेनं॰
निशामय २१ एतेचान्येमहीपालायोधास्तवचपांडव गंधर्वसहितायांतियक्षपुण्यजनैस्तथा
२२ गुह्यकानांगतिंचापिकेचित्प्राप्तानराधिपाः त्यक्त्वादेहंजितस्वर्गाःपुण्यवाग्बुद्धिकर्मभिः
२३ इतिस्वर्गारोहणपर्वणि ४॥ छ ॥

स्व॰टी॰ ८

भीष्म १ ३ पूर्वस्मिन्नध्याये ये पुण्यमयास्ते देवसंशाः ससर्गं गत्वा स्वस्वस्य अंशिनः सांनिध्यं प्राप्ता इत्युक्तं तत्र संशयः किमेते अं
शाः कालेऽन्ये राणां कृत्वा गणमेषु गाः इव इत्थं कसंसारित्वप्राप्ताः उत तेषु वांशिषु लीयंते आद्ये कर्मतदेहपरंपर्यात्सत्व
ज्ञानमेत तेषां णेच्छेदयोगात् तेषां नित्यसंसारित्वमस्मदादिवत्स्मात् द्वितीये मानच्छभावे तैः कृतानां कर्मणां ना

जनमेजय उवाच भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः विराटद्रुपदौ चोभौ शंखश्चैवो
त्तरस्तथा १ धृष्टकेतुर्जयत्सेनो राजा चैव सत्यजित् दुर्योधनसुताश्चैव शकुनिश्चैव सौ
बलः २ कर्णपुत्राश्च विक्रांता राजा चैव जयद्रथः घटोत्कचादयश्चैव ये चान्ये नानुकीर्तिताः
३ ये चान्ये कीर्तिता वीरा राजानो दीप्तमूर्तयः स्वर्गे कालं कियंतं ते तस्थुस्तदपि शंस मे ४ आहो
स्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम अंते वा कर्मणः कां ते गतिं प्राप्ता नरर्षभाः ५ एतदिच्छाम्य
हं श्रोतुं प्रोच्यमानं द्विजोत्तम तपसा हि प्रदीप्तेन सर्वं त्वमनुपश्यसि ६ सौतिरुवाच इत्युक्तः स
तु विप्रर्षिरनुज्ञातो महात्मना व्यासेन तस्य नृपतेराख्यातुमुपचक्रमे ७ ॥

प्राप्ता नरर्षभा इति संदिहानो जनमेजयः पृच्छति भीष्मद्रोणाविति तेषां अंते कां गतिं पुण्यभोगांते अंशिना सह एकं वासा
लोकं प्राप्ता उत स्वं प्राप्नुवंति आभूतसंप्लवं वा वरं जीति प्रश्नः ५ ६ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रश्नोत्तरमाह नशक्यमितिकर्मणामंतेसर्वेणप्रकृतिंगंतुंनशक्यमित्यध्याहृत्ययोज्यंप्रदिसर्वेपिजंतवःप्रारब्ध
कर्मांतेस्वांप्रकृतिंगच्छेयुर्नहिसर्वेपिमुक्ताःस्युःसंसारस्यादिमान्भवेत्ततश्चकृतहानाकृताभ्यागमप्रसंगोपि
नस्मा॰ पिप्रतिबंधप्रशस्तानर्थकंचस्यात्केचिदेवकर्मणामंतेस्वांप्रकृतिंभजंतेनसर्वेइतिकिंतर्हियेप्रकृतिंन
प्राप्तास्तान्हिपृष्टवतेत्वयैषापृच्छासम्यक्प्रयोजिता ८ तत्रकांश्चित्स्वर्गप्रापकर्मणामंतेस्वेस्वेरश्मिभिस्तद्दा का

वैशंपा॰ नशक्यंकर्मणामंतेसर्वेणमनुजाधिप प्रकृतिंकिंतुसम्यक्तेपृष्टैषासंप्रयोजिता ८
शृणुगुह्यमिदंराजन्देवानांभरतर्षभ यदुवाचमहातेजादिव्यचक्षुःप्रतापवान् ९ मुनिः
पुराणःकौरव्यपाराशर्योमहाव्रतः अगाधबुद्धिःसर्वज्ञोगतिज्ञःसर्वकर्मणां १० वसूने
वमहातेजाभीष्मःप्रापमहाद्युतिः अष्टावेवहिदृश्यंतेवसवोभरतर्षभ ११ बृहस्पतिंविवे
शाथद्रोणोह्यंगिरसांवरं कृतवर्मातुहार्दिक्यःप्रविवेशमरुद्गणान् १२ सनत्कुमारंप्रद्यु
म्नःप्रविवेशयथागतं धृतराष्ट्रोधनेशस्यलोकानापदुरासदान् १३ धृतराष्ट्रेणसहितागां
धारीचयशस्विनी पत्नीभ्यांसहितःपांडुर्महेंद्रसदनंययौ १४ विराटद्रुपदौचोभौधृष्टकेतु
श्चपार्थिवः निशठाक्रूरसांबाश्चभानुःकंपोविदूरथः १५ ॥

स्वंप्राप्तुंयोग्यान्योगजदृष्ट्यापश्यन्परिगणयतिवसूनेवेत्यादिनाइतरेस्वर्गंगताअपिपुनरावर्तंतएते
तुउत्तरमुत्तरमूर्ध्वोर्ध्वक्रमेणगतिंप्राप्यअंतेब्रह्मणासहमुच्यंते तेनदेवत्वप्राप्तयेकर्माणियज्ञदानत
पआदीनिकर्तव्यान्येवनत्वोर्ध्वरेताइतिसर्वमनवद्यं ९ १० ११ १२ १३ १४ १५ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

सं.टी. १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ ॥
८

भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः कंसश्चैवोग्रसेनश्च वसुदेवस्तथैव च १६ उत्तरश्च
सह भ्राता शंखेन नरपुंगव विश्वेषां देवतानां ते विविशुर्नरपुंगवाः १७ वर्चा नाम महातेजाः
सोमपुत्रः प्रतापवान् सोभिमन्युर्नृसिंहस्य फाल्गुनस्य सुतोभवत् १८ स युद्ध्वा क्षत्रधर्मे द्वी
ण यथा नान्यः पुमान्क्वचित् विवेश सोमं धर्मात्मा कर्मणोन्ते महारथः १९ आविवेश रविं
कर्णो निहतः पुरुषर्षभ द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकं २० धृतराष्ट्रात्मजाः सर्वे
यातुधाना बलोत्कटाः ऋद्धिमन्तो महात्मानः शस्त्रपूता दिवं गताः २१ धर्ममेवाविशत्क्ष
त्ता राजा चैव युधिष्ठिरः अनन्तो भगवान्देवः प्रविवेश रसातलं २२ पितामहनियोगाद्धि यो
योगाद्गामधारयत् यः स नारायणो नाम देवदेवः सनातनः २३ तस्यांशो वासुदेवस्तु कर्मणो
न्ते विवेश ह षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहः २४ अमज्जंस्ताः सरस्वत्यां कालेन जन
मेजय तत्र त्यक्त्वा शरीराणि दिवमारुरुहुः पुनः २५ ताश्चैवाप्सरसो भूत्वा वासुदेवमुपागम
न् हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः २६ घटोत्कचादयश्चैव देवान्यक्षांश्च भेजिरे दु
र्योधनसहायाश्च राक्षसाः परिकीर्तिताः २७ प्राप्तास्ते क्रमशो राजन्सर्वलोकाननुत्तमान्
भवनं च महेंद्रस्य कुबेरस्य च धीमतः २८ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

एवंपांडवानांकथांसमाप्यजनमेजयस्ययज्ञेवैशंपायनएनांकथामुक्त्वानितिश्चक्रतमयुसंदधानः सौति
रुवाच एतच्छ्रुत्वेत्यादि १ १४ समाज्ञातंमयास्तेन व्यासाज्ञयावैशंपायनेनकीर्तितंच १५ १६ विधिज्ञेन
ना
ब्राह्मणास्तथालोकान्विविशुःपुरुषर्षभाः एतत्तेसर्वमाख्यातंविस्तरेणमहाद्युते कुरूणांचरि
तंकृत्स्नंपांडवानांचभारत ९ सौतिरुवाच एतच्छ्रुत्वाद्विजश्रेष्ठाःसराजाजनमेजयः विस्मितो
भवदत्यर्थंयज्ञकर्मान्तरेष्वथ १० ततःसमापयामासुःकर्मतत्तस्ययाजकाः आस्तीकश्चाभवत्प्री
तःपरिमोक्ष्यभुजंगमान् ततोद्विजातीन्सर्वांस्तान्दक्षिणाभिरतोषयत् पूजिताश्चापितेराज्ञात
तोजग्मुर्यथागतं १२ विसर्जयित्वाविप्रांस्तान्राजापिजनमेजयः ततस्तक्षशिलायाःसपुन
रायाद्गजाह्वयं १३ एतत्तेसर्वमाख्यातंवैशंपायनकीर्तितं व्यासाज्ञयासमाख्यातंसर्पसत्रेन
पस्यहि १४ पुण्योयमितिहासाख्यःपवित्रंचेदमुत्तमं कृष्णेनमुनिनाविप्रनिर्मितंसत्यवादि
ना १५ सर्वज्ञेनविधिज्ञेनधर्मज्ञानवतासता अतींद्रियेणशुचिनातपसाभावितात्मना १६ ऐ
श्वर्येवर्तताचैवसांख्ययोगवतातथा नैकतंत्रविबुद्धेनदृष्ट्वादिव्येनचक्षुषा १७ कीर्तिंप्रथ
यतालोकेपांडवानांमहात्मनां अन्येषांक्षत्रियाणांचभूरिद्रविणतेजसां १८॥
देवज्ञेनअतींद्रियेणइंद्रियाण्यतिक्रांतेनयोगबलादेवसर्वदर्शनसिद्धेरित्याह [illegible]तपसेतिभावितात्मना ।
ध्यापितचित्तेन १७ १८ ॥ छ

ब.ते. सर्वेषां तृतीयांतानांनिमित्तमित्यनेनान्वयः अन्येषामपि कीर्तिं प्रथयतेति संबंधः ३९ ब्रह्मभ्रूपापकल्पतेत्रोक्तमा
१ धुनानुष्ठानक्रमेण ४० अतनतः निकटे ४१ ४२ अन्यदिति महाभारतस्य अल्पमपि पाक्षिमायां संध्यायां पठ्यते चेदिनक्र
तं पापं न स्पृशति एवं प्रातः संध्यायां रात्रिकृतमित्यर्थः ४४ निरुक्तं नाम निर्वचनं धर्मं चेतिचकारस्त्वनुष्ठ्याद्य

यश्चेदं श्रावयेद्विद्वान्सदापर्वणिपर्वणि धूतपाप्माजितस्वर्गो ब्रह्मभूयायगच्छति ३९ कार्ष्णं वेदं
मिमंसर्वं शृणुयाद्यः समाहितः ब्रह्महत्यादिपापानां कोटिस्तस्य विनश्यति ४० यश्चेदं श्रावये
च्छ्राद्धे ब्राह्मणान्पादमंततः अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ४१ अह्ना यदेनः कुरुते इंद्रि
यैर्मनसापि वा महाभारतमाख्याय पश्चात्संध्यां प्रमुच्यते ४२ यद्रात्रौ कुरुते पापं ब्राह्मणस्त्री
गणैर्वृतः महाभारतमाख्याय पूर्वां संध्यां प्रमुच्यते ४३ महत्वाद्भारवत्वाच्च महाभारतमुच्य
ते निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ४४ धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ यदिहा
स्ति तदन्यत्र यन्नेहास्ति न कुत्रचित् ४५ जयो नामेतिहासोयं श्रोतव्यो मोक्षमिच्छता ब्राह्मणे
न च राज्ञा च गर्भिण्या चैव योषिता ४६ स्वर्गकामो लभेत्स्वर्गं जयकामो लभेज्जयं गर्भिणी
लभते पुत्रं कन्यां वा बहुभागिनीं ४७ अनागतश्च मोक्षश्च कृष्णद्वैपायनः प्रभुः संदर्भं भारतस्या

र्थादि चच्छुष्यमप्यत्रोक्तं हानार्थमिति बोध्यं ४५ ४६ अनागतो नागांतकेनित्यसिद्ध इति यावत् एवं विधो यो मोक्षः
कैवल्यं तदेव स्वरूपं यस्य स मोक्षः यद्वा मोक्षमिच्छन्मुचो कर्मक स्यगुणो वेनिम्न निगुणो अभ्यासलोपश्च मुच्यते इति १

स्त्रंवांवेदचतुष्टयेनसंहिताभ्यःश्रेष्ठभूतांतदर्थवती ४९ ५० श्रूयतेयेनयःशृणोतीत्यर्थः ३ अथयत्रविभक्तिव्यत्यय
स्त्वार्षः ५२ ५३ भारताध्ययनादितिसार्द्धश्लोकःयःव्यासःइमांसंहितांशुकंपुत्रंअध्यापयत्तस्यग्रंथीयतोभार
ताख्यमितिहासंस्मरतःस्मरत्वाचग्रंथस्वरूपेणप्रणयतःभक्त्यापरयाश्रद्धयाव्यासएवपूज्यस्तस्यवाक्यप्रमाण

षष्टिंशतसहस्राणिचकारान्यांससंहितां त्रिंशच्छतसहस्राणिदेवलोकेप्रतिष्ठितं ४९ पि
त्र्येपंचदशज्ञेयंयक्षलोकेचतुर्दशएकंशतसहस्रंतुमानुषेषुप्रभाषितं ५० नारदोश्रावयद्देवा
नसितोदेवलःपितॄन् रक्षोयक्षाञ्छुकोमर्त्यान्वैशंपायनएवतु ५१ इतिहासमिमंपुण्यंमहार्थं
वेदसंमितं व्यासोक्तंश्रूयतेयेनकृत्वाब्राह्मणमग्रतः ५२ सनरःसर्वकामांश्चकीर्तिंप्राप्येहशौ
नकगच्छेत्परमिकांसिद्धिमत्रमेनास्तिसंशयः ५३ भारताध्ययनात्पुण्यादपिपादमधीयतः
व्या° श्रद्धयापरयाभक्त्याश्राव्यतेचापियेनतु ५४ यइमांसंहितांपुण्यांपुत्रमध्यापयच्छुकं मातापितृ
सहस्राणिपुत्रदारशतानिच संसारेष्वनुभूतानियांतियास्यंतिचापरे ५५ हर्षस्थानसहस्रा
णिभयस्थानशतानिच दिवसेदिवसेमूढमाविशंतिनपंडितं ५६ ऊर्ध्वबाहुर्विरौम्येषन
चकश्चिच्छृणोतिमे धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते ५७

मेवेत्यास्तिक्यबुध्यायेनपुंसाश्राव्यतेसपुण्यात्पुण्यकरात् अपिपादंश्लोक[illegible]पादंग्रंथपादंवाभारत
स्याध्ययनात् परमिकांसिद्धिंगच्छेदितिपूर्वेणान्वयः व्यासेनोक्तंवक्तृभारतमध्येतव्यमित्यर्थः ५४ संध्या
यांभारतंपठनीयमित्युक्तं तत्रपठनयोग्यंभारतसारसंग्रहंचतुःश्लोकीरूपमाह मामेति ५५ ५६ ५७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

नजातुकामान्नभयान्नलोभाद्धर्मंत्यजेज्जीवितस्यापिहेतोः नित्योधर्मःसुखदुःखेत्वनित्ये
जीवोनित्योहेतुरस्यत्वनित्यः ५८ इमांभारतसावित्रींप्रातरुत्थाययःपठेत् सभारतफलं
प्राप्यपरंब्रह्माधिगच्छति ५९ यथासमुद्रोभगवान्यथाचहिमवान्गिरिः ख्यातावुभौरत्न
निधीतथाभारतमुच्यते ६० इमंभारतमाख्यानंयःपठेत्सुसमाहितः सगच्छेत्परमांसिद्धि
मितिमेनास्तिसंशयः ६१ द्वैपायनोष्ठपुटनिःसृतमप्रमेयंपुण्यंपवित्रमथपापहरंशिवं
च योभारतंसमधिगच्छतिवाच्यमानंकिंतस्यपुष्करजलैरभिषेचनेन ६२ इतिश्रीमहा
भारतेशतसाहस्र्यांसंहितायांवैयासिक्यांस्वर्गारोहणिकनामपर्वसमाप्तमगमत् ज
नमेजयउवाच भगवन्केनविधिनाश्रोतव्यंभारतंबुधैः फलंकिंकेचदेवाश्चपूज्यावै
पारणेष्विह १ देयंसमाप्तेभगवन्किंचपर्वणिपर्वणि वाचकःकीदृशश्चात्रप्रष्टव्यस्त
द्ब्रवीहिमे २ वैशंपायनउ० शृणुराजन्विधिमिमंफलंयच्चापिभारतात् श्रुताद्भवतिराजेंद्र
यत्त्वंमामनुपृच्छसि ३ दिविदेवामहीपालक्रीडार्थमवनिंगताः ४ आदित्यावश्विनौदेवौ
लोकपालामहर्षयः गुह्यकाश्चसगंधर्वानागाविद्याधरास्तथा ५ ॥ ७॥

६ ७ ८ ९ ॥ ॥ १२ १३ १४ १५ १६ १७ १८ ॥ ७ ॥

सिद्धाय मोस्त्वयं भूः स्वस्तुतिभिः कायगोचरः गिरयः सागरा नद्यस्तथैवाप्सरसां गणाः ६ ग्र
हाः संवत्सराश्चैव अयना ऋतवस्तथा स्थावरं जंगमं चैव जगत्सर्वं सुरासुरं ७ भारतेभा
रतश्रेष्ठ एकस्थमिह दृश्यते तेषां श्रुत्वा प्रतिष्ठानं नामकर्मानुकीर्तनात् ८ कृत्वापि पात
केभ्योरं सद्यो मुच्येत मानवः इतिहासमिमं श्रुत्वा यथावदनुपूर्वशः ९ संयतात्मा शुचिर्भू
त्वा पारं गत्वा च भारते तेषां श्राद्धानि देयानि श्रुत्वा भारत भारतं १० ब्राह्मणेभ्यो यथा शक्त्या भ
क्त्या च भरतर्षभ महादानानि देयानि रत्नानि विविधानि च ११ गावः कांस्योपदोहाश्च कन्याश्चै
व स्वलंकृताः सर्वकामगुणोपेतापेयानि विविधानि च १२ भवनानि विचित्राणि भूमि
र्वासांसि कांचनं वाहनानि च देयानि हया मत्ताश्च वारणाः १३ शयनं शिबिकाश्चैव स्यंदना
श्च स्वलंकृताः यद्यद्गृहे वरं किंचिद्यदस्ति सुमहद्धनं १४ तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च
सूनवः श्रद्धया पश्यादत्तं क्रमशस्त्वस्य पारगः १५ शक्तितः सुमना हृष्टः शुश्रूषुरविकल्प
कः सत्यार्जवरतो दांतः शुचिः शौचसमन्वितः १६ श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृ
णु शुचिः शीलान्विताचारः शुक्लवासा जितेंद्रियः १७ संस्कृतः सर्वशास्त्रज्ञः श्रद्दधानोन
सूयकः रूपवान्सुभगो दांतः सत्यवादी जितेंद्रियः १८ ॥ ३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भ.टी. १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ॥

॥

रानमानगृहीतस्य कार्यो भवति वाचकः अविलंबमनायस्तमद्रुतं धीरमूर्जितं १९ असंसक्ताक्ष
रपदं स्वरभावसमन्वितं त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमीरितं २० वाचयेद्वाचकः स्वस्थः स्वा
सीनः सुसमाहितः नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमुदीर
येत् २१ ईदृशाद्वाचकाद्राजन् श्रुत्वा भारत भारतं नियमस्थः शुचिः श्रोता स एवं स फलमश्नु
ते २२ पारणं प्रथमं प्राप्य द्विजान्कामैस्तु तर्पयेत् अग्निष्टोमस्य यज्ञस्य फलं वै लभते नरः २३
अप्सरोगणसंकीर्णं विमानं लभते महत् प्रहृष्टः स तु देवैश्च दिवं याति समाहितः २४ द्विती
यं पारणं प्राप्य सोऽतिरात्रफलं लभेत् सर्वरत्नमयं दिव्यं विमानमधिरोहति २५ दिव्यमाल्यां
बरधरो दिव्यगंधविभूषितः दिव्यांगदधरो नित्यं देवलोके महीयते २६ तृतीयं पारणं प्रा
प्य द्वादशाहफलं लभेत् वसत्यमरसंकाशो वर्षाण्ययुतशो दिवि २७ चतुर्थे वाजपेयस्य
पंचमे द्विगुणं फलं उदितादित्यसंकाशं ज्वलंतमनलोपमं २८ विमानं विबुधैः सार्धमारु
ह्य दिवि गच्छति वर्षायुतानि भवने शक्रस्य दिवि मोदते २९ षष्ठे द्विगुणमस्तीति सप्तमे त्रिगुणं फ
लं कैलासशिखराकारं वैडूर्यमणिवेदिकं ३० परिक्षिप्तं च बहुधा मणिविद्रुमभूषितं विमानंस

[illegible]

॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

३१ ३३ ३४ ३५ ३६ ३७ ३८ ३९ ४० ४१ ४२ ४३ ४४ ४५ ॥ ७

सर्वान्लोकान्विचरते द्वितीय इव भास्करः अष्टमे राजसूयस्य पारणे लभते फलं ३१ चंद्रोदय
तिभं रम्यं विमानमधिरोहति चंद्ररश्मिप्रतीकाशैर्हंसैर्युक्तं मनोजवैः ३३ सेव्यमानो वरस्त्रीणां
चंद्रकांततरैर्मुखैः मेखलानां निनादेन नूपुराणां च निःस्वनैः ३४ अंके परमनारीणां सुखसु
प्तो विबुध्यते नवमे क्रतुराजस्य वाजिमेधस्य भारत ३५ कांचनस्तंभनिर्व्यूहं वैडूर्यकृतवेदिकं
जांबूनदमयैर्दिव्यैर्गवाक्षैः सर्वतो वृतं ३६ सेवितं चाप्सरःसंघैर्गंधर्वैर्दिविचारिभिः विमाने सम
धिष्ठाय श्रिया परमया ज्वलन् ३७ दिव्यमाल्यांबरधरो दिव्यचंदनभूषितः मोदते दैवतैः सार्धं
दिवि देव इवापरः ३८ दशमे पारणं प्राप्य द्विजातीनभिवंद्य च किंकिणीजालनिर्घोषपताका
ध्वजशोभितं ३९ रत्नवेदिकसंबाधं वैडूर्यमणितोरणं हेमजालपरिक्षिप्तं प्रवालवलभीमु
खं ४० गंधर्वैर्गीतकुशलैरप्सरोभिश्च शोभितं विमानं सुकृतां वासं सुखेनैवोपपद्यते ४१
मुकुटेनाग्निवर्णेन जांबूनदविभूषिणा दिव्यचंदनदिग्धांगो दिव्यमाल्यविभूषितः ४२ दि
व्यांल्लोकान्विचरति दिव्यैर्भोगैः समन्वितः विबुधानां प्रसादेन श्रिया परमया युतः ४३ अथ वर्ष
गणानेवं स्वर्गलोके महीयते अथ गंधर्वसहितः सहस्राण्येकविंशतिः ४४ पुरंदरपुरे रम्ये
शक्रेण सह मोदते दिव्ययानविमानेषु लोकेषु विविधेषु च ४५ ॥ ७ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

१२ दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ततः सूर्यस्य भवने चेंद्रस्य भवने तथा ४६ शिवस्य भव
ने राजन्विष्णोर्याति सलोकतां एवमेतन्महाराज नात्र कार्या विचारणा ४७ श्रद्दधानेन वै भाव्यमे
वमाह गुरुर्मम वाचकस्य तु दातव्यं मनसा यद्यदिच्छति ४८ हस्त्यश्वरथयानानि वाहनानि विशे
षतः कटके कुंडले चैव ब्रह्मसूत्रं तथापरं ४९ वस्त्रं चैव विचित्रं च गंधं चैव विशेषतः देववत्पू
जयेत्तं तु विष्णुलोकमवाप्नुयात् ५० अतः परं प्रवक्ष्यामि यानि देयानि भारते वाच्यमाने तु विप्रे
भ्यो राजन्पर्वणि पर्वणि ५१ जातिं देशं च सत्यं च माहात्म्यं भरतर्षभ धर्मवृत्तिं च विज्ञाय क्षत्रि
याणां नराधिप ५२ स्वस्ति वाच्य द्विजानादौ ततः कार्यं प्रवर्तते समाप्ते पर्वणि ततः स्वशक्त्या पू
जयेद्द्विजान् ५३ आदौ तु वाचकं चैव वस्त्रगंधसमन्वितं विधिवद्भोजयेद्राजन्मधुपायसमुत्त
मं ५४ ततो मूलफलप्रायं पायसं मधुसर्पिषा आस्तीके भोजयेद्राजन्दद्याच्चैव गुडौदनं ५५ अ
पूपैश्चैव सपूपैश्च मोदकैश्च समन्वितं सभापर्वणि राजेंद्र हविष्यं भोजयेद्द्विजान् ५६ आरण्यके
मूलफलैस्तर्पयेत्तु द्विजोत्तमान् अरणीपर्व आसाद्य जलकुंभं प्रदापयेत् ५७ तर्पणानि च मु
ख्यानि वन्यमूलफलानि च सर्वकामगुणोपेतं विप्रेभ्योन्नं प्रदापयेत् ५८ विराटपर्वणि तु
वासांसि विविधानि च उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितं ५९ ॥ १२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

भोजनं भोजयेद्विप्रान् गंधमाल्यैरलंकृतान् भीष्मपर्वणि राजेंद्र दत्वा यानमनुत्तमं ९० ततः सर्वगुणोपेत
मन्नं दद्यात्सुसंस्कृतं द्रोणपर्वणि विप्रेभ्यो भोजनं परिमार्चितं ९१ शय्याश्चदेया राजेंद्र चापान्यसिवरास्त
था कर्णपर्वण्यपि तथा भोजनं सार्वकामिकं ९२ विप्रेभ्यः संस्कृतं सम्यक् दद्यात्संपतमा[illegible]न शा स॰
ल्यपर्वणि राजेंद्र मोदकैः सगुडौदनैः ९३ अपूपैस्तर्पणैश्चैव सर्वमंत्रं प्रदापयेत् गदापर्वण्यपि त
था मुद्गमिश्रं प्रदापयेत् ९४ स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् घृतौदनं पुरस्ताच्च ऐषि
के दापयेत्पुनः ९५ ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतं शांतिपर्वण्य[illegible] तथा हविष्यं भोजये पि॰
द्विजान् ९६ आश्वमेधिक[illegible]मासाद्य भोजनं सार्वकामिकं तथाश्रमनिवासे तु हविष्यं भोजयेद्वि न॰
जान् ९७ मौसले सार्वगुणिकं गंधमाल्यानुलेपनं महाप्रास्थानिके तद्वत्सर्वकामगुणान्वितं ९८ स्व
र्गपर्वण्यपि तथा हविष्यं भोजयेद्विजान् हरिवंश[illegible] समाप्तौ तु सहस्रं भोजयेद्विजान् ९९ गामेकां नि
ष्कसंयुक्तां ब्राह्मणाय निवेदयेत् तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव १० सर्वपर्वसमाप्तौ तु पुस्त
कं वै विचक्षणः सुवर्णेन च संयुक्तं वाचकाय निवेदयेत् ११ हरिवंशे पर्वणि च पायसं तत्र भोजयेत्
पारणे पारणे राजन्यथावद्भरतर्षभ १२ समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः शुभे देशे निवेश्या
थ क्षौमवस्त्राभिसंवृतः शुक्लांबरधरः स्रग्वी शुचिर्भूत्वा स्वलंकृतः १३ अर्चयेत यथान्यायं गंधमाल्यैः
पृथक्पृथक् संहितापुस्तकान् राजन्प्रयतः सुसमाहितः १४ भक्ष्यैर्मांसैश्च पेयैश्च कामैश्च विविधैः शुभैः

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्व॰ ऐ॰
६

हिरण्यं च सुवर्णं च दक्षिणामथ दापयेत् १५ देवताः कीर्तयेत्सर्वा नरनारायणौ तथा ततो गंधैश्च माल्यैश्च
स्वलंकृत्य द्विजोत्तमान् १६ तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा अतिरात्रस्य यज्ञस्य फलं प्राप्नोति
मानवः १७ प्राप्नुयाच्च क्रतुफलं तथा पर्वणि पर्वणि वाचको भरतश्रेष्ठ व्यक्ताक्षरपदस्वरः १८ भवि
ष्यश्रावयेद्विद्वान्भारतं भरतर्षभ भुक्तवत्सु द्विजेंद्रेषु यथावत्संप्रदापयेत् १९ वाचकं भरतश्रेष्ठ भो
जयित्वा स्वलंकृतं वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा २० ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः
ततो हि भरणं कार्यं द्विजानां भरतर्षभ २१ सर्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः इत्येष विधि
रुद्दिष्टो मया ते द्विपदां वर श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि २२ भारतश्रवणे राजन्पारणे च
नृपोत्तम सदा यत्नवता भाव्यं श्रेयस्तु परमिच्छता २३ भारतं श्रवणं यान्नित्यं भारतं परिकीर्तयेत्
भारतं भवने यस्य तस्य हस्तगतो जयः २४ भारतं पावनं पुण्यं भारते विविधाः कथाः भारतं सेव्य
ते देवैर्भारतं परमं पदं २५ भारतं सर्वशास्त्राणामुत्तमं भरतर्षभ भारतात्प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवी
मि ते २६ महाभारतमाख्यानं क्षितिं गां च सरस्वतीं ब्राह्मणान्केशवं चैव कीर्तयन्नावसीदति २७
वेदे रामायणे पुण्ये भारते भरतर्षभ आदौ चांते च मध्ये च हरिः सर्वत्र गीयते २८ यत्र विष्णुकथा दि
व्याः श्रुतयश्च सनातनाः तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता २९ एतत्पवित्रं परममेतद्धर्मनि
दर्शनं एतत्सर्वगुणोपेतं श्रोतव्यं भूतिमिच्छता ३० कायिकं वाचिकं चैव मनसा समुपार्जितं तत्सर्वं
नाशमायाति तमः सूर्योदये यथा ३१ अष्टादशपुराणानां श्रवणाद्यत्फलं भवेत् तत्फलं समवाप्नोति वै

१२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभा

स्त्रियश्चपुरुषश्रेष्ठवैष्णवंपदमाप्नुयुःस्त्रीभिश्चपुत्रकामाभिःश्रोतव्यंवैष्णवंयशः २३ दक्षिणा
चात्रदेयावैनिष्कमेकंचस्वर्णकंवाचकाययथाशक्त्यायथोक्तंफलमिच्छता २४ स्वर्णशृंगींच
कपिलांसवत्सांवस्त्रसंवृतां वाचकायचदद्यद्धिआत्मनःश्रेयमिच्छता २५ अलंकारंप्रदद्या
त्पाण्योर्वैभरतर्षभ कर्णस्याभरणंदद्याद्धनंचैवविशेषतः २६ भूमिदानंसमादद्याद्वाचका
यनराधिप भूमिदानसमंदानंनभूतंनभविष्यति २७ शृणोतिश्रावयेद्वापिसततंचैवयोनरः
सर्वपापविनिर्मुक्तोवैष्णवंपदमाप्नुयात् २८ पितॄनुद्धरतेसर्वानेकादशसमुद्भवान् आत्मानं
ससुतंचैवस्त्रियंचभरतर्षभ २९ दशांशश्चैवहोमोपिकर्तव्योत्रनराधिप इदंमयातवाग्रेच
प्रोक्तंसर्वंनरर्षभ ३० इतिश्रीमहाभारतेशतसाहस्र्यांसंहितायांवैयासिक्यांसर्वपर्वानु
कीर्तनंसमाप्तमगमत् ॥ ७ ॥

रतभावदीपेस्वर्गारोहणग्रंथार्थप्रकाशःसमाप्तिमगमत् ॥ १ ॥ ५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

स्वर्गारोहणपर्वपत्रे १८

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रस्थानपर्वं पत्रे ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰प्र॰
टी॰
१

ॐ श्रीगणेशायनमः॥ कृतकृत्यानांदुःसहदुःखग्रस्तानांमहाप्रस्थानादिनाअपायेनदेहत्यागोयुक्तइतिपांडवाचरणेनदर्शि
यन्महाप्रस्थानिकंपर्वारभतेअसंगस्यैवस्वर्गगतिप्रतिबंधकाभावोदर्शयति संक्षेपेण एवंवृष्ण्यंधककुलेइत्यादि
ना १ प्रस्थानेस्वर्गंप्रतिगमनेहानिःमरणे २ पाशंतत्कृतमाकर्षंमरणमितियावत्तदहंमन्येअंगीकरोमित्वमप्येतत्द्र

नारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ जनमेजयउवाच ए
वंवृष्ण्यंधककुलेश्रुत्वामौशलमाहवं पांडवाःकिमकुर्वंततथाकृष्णेदिवंगते १ वैशंपायनउवाच श्रु
त्वैवकौरवोराजावृष्णीनांकदनंमहत् प्रस्थानेमतिमाधायवाक्यमर्जुनमब्रवीत् २ कालःपच
तिभूतानिसर्वाण्येवमहामते कालपाशमहंमन्येत्वमपिद्रष्टुमर्हसि ३ इत्युक्तःसतुकौंतेयःका
लःकालइतिब्रुवन् अन्वपद्यततद्वाक्यंभ्रातुर्ज्येष्ठस्यधीमतः ४ अर्जुनस्यमतंज्ञात्वाभीमसेनोय
मौतथा अन्वपद्यंततद्वाक्यंयदुक्तंसव्यसाचिना ५ ततोयुयुत्सुमानाय्यप्रव्रजन्धर्मकाम्यया राज्यं
परिददौसर्वंवैश्यापुत्रेयुधिष्ठिरः ६ ॥

चि
ष्टुमालोवितुं ३ कालःकालइतिनित्यार्थेद्वित्वं अपरिहार्यःकालोमृत्युःसोऽधुनैवास्तुकिंचिरेणेत्याशयः ४ ५
धर्मकाम्ययाप्रव्रजन्तद्योगेनपरिददौतदधीनंकृतवान्तस्याभिषेकेनधिकारात् ६ ॥

स्नात्वेहास्तिनपुरे ११८ अथ धर्मेण परिविद्दज्ञयोर्बालयोः स्वतराजे महाप्रस्थानमिमं माकुर्यादिति भावः ४ ॥ ॥ हि

अभिषिच्य स्वराज्ये च राजानं च परिक्षितं दुःखार्त्तश्चाब्रवीद्राजा सुभद्रां पाण्डवाग्रजः ७ एष पुत्रस्य ते पु
त्रः कुरुराजो भविष्यति यदूनां परिशेषश्च वज्रो राजा कृतस्त्विह ८ परिक्षिद्धास्तिनपुरे शक्रप्रस्थे च याद
वः वज्रो राजा त्वया रक्ष्यो मा चाधर्मे मनः कृथाः ९ इत्युक्त्वा धर्मराजः स वासुदेवस्य धीमतः मातुलस्य
च वृद्धस्य रामादीनां तथैव च १० भ्रातृभिः सहितो धर्मात्मा कृत्वोदकमतन्द्रितः श्राद्धान्युद्दिश्य सर्वेषां
चकार विधिवत्तदा ११ द्वैपायनं नारदं च मार्कंडेयं तपोधनं भारद्वाजं याज्ञवल्क्यं हरिमुद्दिश्य ध
त्तवान् १२ अभोजयत्स्वादु भोज्यं कीर्त्तयित्वा च शार्ङ्गिणं ददौ रत्नानि वासांसि ग्रामानश्वान्रथांस्त त्र^
दा १३ स्त्रियश्च द्विजमुख्येभ्यस्तदा शतसहस्रशः कृपमभ्यर्च्य च गुरुं सपौरपुरःसरं १४ शिष्यं
परिक्षितं तस्मै ददौ भरतसत्तम ततस्तु प्रकृतीः सर्वाः समानाय्य युधिष्ठिरः १५ सर्वमाचष्ट रा
जर्षिश्चिकीर्षितमथात्मनः ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः १६ भृशमुद्विग्नमनसो नाभ्य
नंदंत तद्वचः नैवं कर्त्तव्यमिति ते तदोचुस्ते नराधिपं १७ न च राजा तथाकार्षीत्कालपर्यायधर्मवि
त् ततोऽनुमान्य धर्मात्मा पौरजानपदं जनं १८ गमनाय मतिं चक्रे भ्रातरश्चास्य ते तदा ततः स राजा कौ
रव्यो धर्मपुत्रो युधिष्ठिरः १९ ॥

यः राज्ञीः ७ अनुमान्य अनुमतिपदं कृत्वा १९ ॥ २२

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म०टी० २१ नैष्टिकींपर्यंतिकींउत्सर्गेष्टिमित्यर्थः आत्मनिअग्नीन्समारोप्याप्स्वग्नीनुत्सृज्येतिज्ञेयं २२ २७ अन्वाः युधिष्ठि

२ उत्सृज्याभरणान्यंगाज्जगृहेवल्कलान्युत भीमार्जुनयमाश्चैवद्रौपदीचयशस्विनी २० तथैवसर्वाः

सर्वेवल्कलानिनराधिप विधिवत्कारयित्वेष्टिंनैष्टिकींभरतर्षभ २१ समुत्सृज्याप्सुसर्वेग्नींस्तत

स्थुर्नरपुंगवाः ततःप्रुरुरुदुःसर्वाःस्त्रियोदृष्ट्वानरोत्तमान् २२ प्रस्थितान्द्रौपदीषष्ठान्पुराद्यूत

जितान्यथा हर्षोभवच्चसर्वेषांभ्रातॄणांगमनंप्रति २३ युधिष्ठिरमतंज्ञात्वावृष्णिक्षयमवेक्ष्यच

भ्रातरःपंचकृष्णाचषष्ठीश्वाचैवसप्तमः २४ आत्मनासप्तमोराजानिर्ययौगजसाह्वयात्

पौरैरनुगतोदूरंसर्वैरंतःपुरैस्तथा २५ नचैनमशकत्कश्चिन्निवर्तस्वेतिभाषितुं न्यवर्तंततः

सर्वेनरानगरवासिनः २६ कृपप्रभृतयश्चैवयुयुत्सुंपर्यवारयन् विवेशगंगांकौरव्यउलू ३०

पीभुजगात्मजा २७ चित्रांगदाययौचापिमणिपूरपुरंप्रति शिष्टाःपरिक्षितंत्वन्यामातरः

पर्यवारयन् २८ पांडवाश्चमहात्मानोद्रौपदीचयशस्विनी कृतोपवासाःकौरव्यप्रययुःप्राङ्मु

खास्ततः २९ योगयुक्तामहात्मानस्त्यागधर्ममुपेयुषः अभिजग्मुर्बहून्देशान्सरितःसागरां

स्तथा ३० युधिष्ठिरोययावग्रेभीमस्तुतदनंतरं अर्जुनस्तस्यचान्वेवयमौचापियथाक्रमं ३१ पृष्ठ

तस्तुवरारोहाश्यामापद्मदलेक्षणा द्रौपदीयोषितांश्रेष्ठाययौभरतसत्तम ३२

रादीनांभार्याःश्रुतसोमादीनांभार्याःश्रुतसोमादीनांमातरः २८ २९ ३० ३१ ३२ ॥ ७

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

लौहित्यंउदयाचलप्रांतसंस्थसमुद्रं ११ १८ अनेनगांडीवेनअर्थःप्रयोजनं ३९ कालेनअवतारांतरे ४१ ४२ ४३

साचैवानयथावेकःप्रस्थितास्तेपांडवास्तुतं क्रमेणतेययुर्वीरालौहित्यंसलिलार्णवं ११ गां
डीवंतुधनुर्दिव्यंनममोचधनंजयः रत्नलोभान्महाराजतेचाक्षय्येमहेषुधी १४ अग्निंतेद
दृशुस्तत्रस्थितंशैलमिवाग्रतः मार्गमावृत्यतिष्ठंतंसाक्षात्पुरुषविग्रहं १५ ततोदेवःसस
प्तार्चिःपांडवानिदमब्रवीत् भोभोःपांडुसुतावीराःपावकंमांनिबोधत १६ युधिष्ठिरमहाबाहो
भीमसेनपरंतप अर्जुनाश्विसुतौवीरौनिबोधतवचोमम १७ अहमग्निःकुरुश्रेष्ठामयादग्धं
चखांडवं अर्जुनस्यप्रभावेनतथानारायणस्यच १८ अयंवःफाल्गुनोभ्रातागांडीवंपरमा
युधं परित्यज्यवनेयातुनानेनार्थोस्तिकश्चन १९ चक्ररत्नंतुयत्कृष्णेस्थितमासीन्महात्म
नि गतंतच्चपुनर्हस्तेकालेनैष्यतितस्यतु ४० वरुणादाहृतंपूर्वंमयैतत्पार्थकारणात्
गांडीवंधनुषांश्रेष्ठंवरुणायैवदीयतां ४१ ततस्तेभ्रातरःसर्वेधनंजयमचोदयन् सजलेप्रा
क्षिपत्तत्तुतथाक्षय्येमहेषुधी ४२ ततोग्निर्भरतश्रेष्ठतत्रैवांतरधीयत ययुश्चपांडवावीराः
ततस्तेदक्षिणामुखाः ४३ ततस्तेतूत्तरेणैवतीरेणलवणांभसः जग्मुर्भरतशार्दूलदिशंद
क्षिणपश्चिमां ४४ ततःपुनःसमावृत्ताःपश्चिमांदिशमेवते ददृशुर्द्वारकांचापिसागरेण
परिप्लुतां ४५ ॥ ४४ ४५

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ प्र॰
टी॰
२

४९ प्रस्थानिके प्रथमः ततः दिक्प्रदक्षिणानंतरं योगयुक्ताः समाहितमनसः १ भ्रष्टयोगा ध्यानाद्‌स्खलि-
तमानसा ३ ५ पक्षेति तत्प्रेषु वैषम्येण ज्ञानकार्येति भावः ६ अनवेक्ष्य स्वर्गं तत्राग्रहरूपः स्नेहो माभूदिति

उदीचीं पुनराहुस्मृप्य पुर्भरतसत्तमाः प्रादक्षिण्यं चिकीर्षंतः पृथिव्या योगधर्मिणः ४९ इति महा
प्रस्थानिके १ वैशंपायन उवाच ततस्ते नियतात्मान उदीचीं दिशमास्थिताः ददृशुर्योगयुक्ता
श्च हिमवंतं महागिरिं १ तं चाप्यतिक्रमंतस्ते ददृशुर्वालुकार्णवं अवैक्षंत महाशैलं मेरुं शिख-
रिणां वरं २ तेषां तु गच्छतां शीघ्रं सर्वेषां योगधर्मिणां याज्ञसेनी भ्रष्टयोगा निपपात मही
तले ३ तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः उवाच धर्मराजानं याज्ञसेनीमवेक्ष्य ह ४
नाधर्मश्चरितः कश्चिद्राजपुत्र्या परंतप कारणं किं नु तद्ब्रूहि यत्कृष्णा पतिता भुवि ५ युधिष्ठि
र उवाच पक्षपातो महानस्या विशेषेण धनंजये तस्यैतत्फलमद्यैषा भुंक्ते पुरुषसत्तम ६
वैशं॰ एवमुक्त्वानवेक्ष्यैनां ययौ भरतसत्तमः समाधाय मनो धीमान्धर्मात्मा पुरुषर्षभः
७ सहदेवस्ततो विद्वान्निपपात महीतले तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ८
म योयमस्मासु सर्वेषु शुश्रूषुरनहंकृतः सोयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ९ युधिष्ठि-
र आत्मनः सदृशं प्राज्ञं नैषोमन्यत कंचन तेन दोषेण पतितस्तस्मादेष नृपात्मजः १० ॥

भावः ७ ८ ९ आत्मनइति प्राज्ञाभिमानोपि पतननहेतुरिति भावः १० ॥ ७

रूपेणेतिहरूपगर्वान्नकुलः पपातेत्यर्थः १९ २० एकाह्नेतिशौर्यगर्वादर्जुनोपि मिथ्याप्रतिज्ञत्वाद्भ्रष्ट

वैशंपायन उवाच इत्युक्त्वा तं समुत्सृज्य सहदेवं ययौ तदा भ्रातृभिः सह कौंतेयः शुना चैव यु
धिष्ठिरः ११ कृष्णां निपतितां दृष्ट्वा सहदेवं च पांडवं आर्तो बंधुप्रियः शूरो नकुलो निपपात ह
१२ तस्मिन्निपतिते वीरे नकुले चारुदर्शने पुनरेव तदा भीमो राजानमिदमब्रवीत् १३ योय
मत्यंतधर्मात्मा भ्राता वचनकारकः रूपेणाप्रतिमो लोके नकुलः पतितो भुवि १४ इत्युक्तो
भीमसेनेन प्रत्युवाच युधिष्ठिरः नकुलं प्रति धर्मात्मा सर्वबुद्धिमतां वरः १५ रूपेण मत्समो ना
स्ति कश्चिदिति तस्य दर्शनं अधिकश्चाहमेवैक इत्यस्य मनसि स्थितं १६ नकुलः पतितस्तस्मा
दागच्छ त्वं वृकोदर यस्य यद्विहितं वीर सोवश्यं तदुपाश्नुते १७ तांस्तु प्रपतितां दृष्ट्वा पांडवः
श्वेतवाहनः पपात शोकसंतप्तस्ततोनु परवीरहा १८ तस्मिंस्तु पुरुषव्याघ्रे पतिते शक्रते
जसि म्रियमाणे दुराधर्षे भीमो राजानमब्रवीत् १९ अनृतं न स्मराम्यस्य स्वैरेष्वपि महात्म
नः अथ कस्य विकारोयं येनायं पतितो भुवि २० युधिष्ठिर उवाच एकाह्ना निर्दहेयं वै शत्रूनि
त्यर्जुनोब्रवीत् न च तत्कृतवानेष शूरमानी ततोपतत् २१ अवमेने धनुर्ग्राहानेष सर्वांश्च
फाल्गुनः तथा चैतन्न तत्तथा कर्तव्यं भूतिमिच्छता २२ वैशं० इत्युक्त्वा प्रस्थितो राजा भीमो
थ निपपात ह पतितश्चाब्रवीद्भीमो धर्मराजं युधिष्ठिरं २३ ॥ पपातनर२१ २२ २३ ॥ ३३ ॥

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

म॰ प्र॰
टी॰
४

२४ अत्यशनात्कुलगर्वाच्च भीमसेनः पपातेत्याह अतिभुक्तमिति २५ २६ द्वितीयः ततः संनादयन्नित्यस्य सर्वां यवभोज्यैवकल
लौकिक्यसीनस्वमात्रभोज्येतितात्पर्यं १ ६ अयं श्वेत्यादौ नाचतुरमपि सन्निर्तं प्रथमं सख्य विभागेन संभावयेत्

भो भो राजन्नवेक्षस्व पतितोहं प्रियस्तव किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थ ह २४ युधिष्ठिर उ॰
अतिभुक्तं च भवता प्राणेन च विकत्थसे अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ २५ इत्युक्त्वा तं म
हाबाहुर्जगामानवलोकयन् श्वा त्वेकोनुययौ यस्ते बहुशः कीर्तितो मया २६ इति महाप्रस्था
निके पर्वणि २ वैशंपा॰ ततः संनादयन् शक्रो दिवं भूमिं च सर्वशः रथेनोपाययौ पार्थमारो
हेत्यब्रवीच्च तं १ स भ्रातॄन्पतितान्दृष्ट्वा धर्मराजो युधिष्ठिरः अब्रवीच्छोकसंतप्तः सहस्राक्ष
मिदं वचः २ भ्रातरः पतिता मेत्र गच्छेयुस्ते मया सह न विना भ्रातृभिः स्वर्गमिच्छे गंतुं सुरेश्वर ३
सुकुमारी सुखार्हा च राजपुत्री पुरंदर सास्माभिः सह गच्छेत तद्भवाननुमन्यतां ४ शक्र उवाच
भ्रातॄन्द्रक्ष्यसि स्वर्गे त्वमग्रतस्त्रिदिवं गतान् कृष्णया सहितान्सर्वान्मा शुचो भरतर्षभ ५
निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ अनेन त्वं शरीरेण स्वर्गं गंता न संशयः ६ युधिष्ठिर उ॰
अयं श्वा भूतभव्येश भक्तो मां नित्यमेव ह स गच्छेत मया सार्धमानृशंस्या हि मे मतिः ७ शक्र उ॰
अमर्त्यत्वं मत्समत्वं च राजन् श्रियं च कृत्स्नां महतीं चैव सिद्धिं संप्राप्तोसि स्वर्गसुखानि च त्वं त्यज
श्वानं नात्र नृशंसमस्ति ८॥

आत्मत्वं तद्योक्तव्यमिति तात्पर्यं ७ नात्रेति श्वसत्यपरित्यागे नृशंसत्वं ...

९ श्ववतामस्तु वित्ताद्धिष्णस्थानं स्वर्गे नास्ति क्रोधवशा नाम देवगणाः अस्य चेविष्टा श्वर्न्नफलं ब्रूतेति १०२ अभिजातोसि

युधिष्ठिरउवाच अनार्यमार्येण सहस्रनेत्र शक्यं कर्तुं दुष्करमेतदार्य मास्मे श्रिया संगमनं तथास्तु यस्याः
कृते भक्तजनं त्यजेयं ९ इंद्रउवाच स्वर्गे लोके श्ववतां नास्ति धिष्ण्यमिष्टं श्वर्न्नक्रोधवशा हरंति ततो
विचार्य क्रियतां धर्मराज त्यज श्वानं नात्र नृशंसमस्ति १० युधिष्ठिरउवाच भक्तत्यागं प्राहुरत्यंतपापं त
ल्यं लोके ब्रह्मवध्याकृतेन तस्मान्नाहं जातु कथंचनाद्य त्यक्ष्याम्येनं स्वसुखार्थी महेंद्र ११ भीतं भ
क्तं नान्यदस्तीति चार्त्तं प्राप्तं क्षीणं रक्षणे प्राणलिप्सुं प्राणत्यागादप्यहं नैव मोक्तुं यतेयं वै नित्यमेतद्व्र त्व
तं मे १२ इंद्र० शुना दृष्टं क्रोधवशा हरंति यद्दत्तमिष्टं विवृतमथो हुतं च तस्माच्छुनस्त्यागमिमं कुरुष्व
शुनस्त्यागात्प्राप्स्यसे देवलोकं १३ त्यक्त्वा भ्रातॄन्दयितां चापि कृष्णां प्राप्तो लोकः कर्मणा स्वेन वीर श्वा
नं चैनं न त्यजसे कथं नु त्यागं कृत्स्नं चास्थितो मुह्यसेद्य १४ युधिष्ठि० न विद्यते संधिरथापि विग्रहो मृ
तैर्मर्त्यैरिति लोकेषु निष्ठा न ते मया जीवयितुं हि शक्यास्तस्मात्त्यागस्तेषु कृतो न जीवतां १५ भीतिप्र
दानं शरणागतस्य स्त्रिया वधो ब्राह्मणस्वापहारः मित्रद्रोहस्तानि चत्वारि शक्र भक्तत्यागश्चैव समो
मतो मे १६ वैशं० तद्धर्मराजस्य वचो निशम्य धर्मस्वरूपी भगवानु[illegible] युधिष्ठिरं प्रीतियुक्तो न वाच
रेंद्र श्लक्ष्णैर्वाक्यैः संस्तवसंप्रयुक्तैः १७ धर्मराज० अभिजातोसि राजेंद्र पितृवृत्तेन मेधया अनुक्रोशे
न चानेन सर्वभूतेषु भारत १८ पुरा द्वैतवने चासि मया पुत्र परीक्षितः पानीयार्थे पराक्रांता यत्र ते
भ्रातरो हताः १९ ॥ कुलीनोसि पितुः पांडोः १८ १९ ॥ ॥

म॰ प्र॰
पे॰
१

२४ निकायस्थो निवासस्थः २५ वाक्यमेवाह्वयेपीति समुपस्थिताः स्मृति विषयाः सेति २६ यदेव भ्रातृणां
भीमार्जुनोपवित्यज्यपत्रत्वं भ्रातरावुभौ माद्रीः साम्यमभीपस्त्वेन कुलेजीवमिच्छसि २० ग्रंथंसा
भक्तास्त्वेवत्यक्तोदेवरथस्त्वयात स्मात्स्वर्गे न ते न्यः कश्चिदस्ति नराधिप २१ अतस्त्वात्वया॰
लोकःस्वशरीरेण भारत प्राप्तोसि भरतश्रेष्ठ दिव्यांगतिमनुत्तमां २२ वैशं॰ ततोधर्मश्च शक्र
श्च मरुतश्चाश्विनावपि देवादेवर्षयश्चैव रथमारोप्य पांडवं २३ प्रययुःस्वैर्विमानैस्ते सिद्धाःका
मविहारिणः सर्वे विरजसः पुण्याः पुण्यवाग्बुद्धिकर्मिणः २४ सतंरथं समास्थाय राजाकुरुकु॰
लोद्वहः ऊर्ध्वमाचक्रमे शीघ्रं तेजसावृत्य रोदसी २५ ततो देवनिकायस्थो नारदः सर्वलोकवि
त् उवाचोच्चैस्तदा वाक्यं बृहद्वादी बृहत्तपाः २६ येपिराजर्षयः सर्वे ते चापि समुपस्थिताः कीर्तिं प्र
च्छादयतेषां वै कुरुराजो युधिष्ठिरः २७ लोकानावृत्य यशसा तेजसावृत्य संपदः स्वशरीरेण संप्रा
प्तं नान्यं शुश्रुम पांडवात् २८ नारदस्य वचः श्रुत्वा राजा वचनमब्रवीत् देवानामंत्र्य धर्मात्मा स्व
पक्षांश्चैव पार्थिवान् २९ शुभं वा यदि वा पापं भ्रातृणां स्थानमद्य मे तदेव प्राप्तुमिच्छामि लो॰
कानन्यान्न कामये ३० राज्ञस्तु वचनं श्रुत्वा देवराजः पुरंदरः आनृशंस्यसमायुक्तं प्रत्युवाच युधि
ष्ठिरं ३१ स्थानेस्मिन्वस राजेंद्र कर्मभिर्निर्जितैः शुभैः किं त्वं मानुष्यकं स्नेहमद्यापि परिकर्षसि ३२
सिद्धिं प्राप्तोसि परमां यथा नान्यः पुमान्क्वचित् नैव ते भ्रातरः स्थानं संप्राप्ताः कुरुनंदन ३३ ॥ ५
स्थानं तदेव प्राप्तुमिच्छामि २८ २९ ३० ३१ ३२ ३३ ॥ ७ ॥ ७

२९ बृहती प्रणमा बृहती पुण्यवत् प्रणामा प्रणामा [illegible] रूणावर्णेत्यर्थः सा यत्र गता तत्रियत्र वा गमिष्यति तत्रैवाहं

अथापि मानुषो भावः स्थपितेस्मिन्नराधिप स्वर्गोयंपयपदेवर्षीन्सिद्धां
श्चत्रिदिवालयान् २४ युधिष्ठिरस्तुदेवेंद्रमेवंवादिनमीश्वरं पुनरेवा
ब्रवीद्धीमानिदंवचनमर्थवत् २५ तैर्विनानोत्सहेवस्तुमिह दैत्यनि
वर्हण गंतुमिछामितत्राहंयत्रमे भ्रातरो गताः २६ यत्रसा बृहती
प्रणामा बुद्धिसत्वगुणान्विता द्रौपदी योषितां श्रेष्ठा यत्र चैव गता मम
२७ इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिकं महाप्र
स्थानिकंपर्वसमाप्तमिति शुभम् ॥ ७

गमिष्यामीत्यर्थः २७ इति नैलकंठीये भारतभावदीपे महाप्रस्थानिकार्थप्रकाशः तृतीयोध्यायः ३ शुभम् ॥ ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative

प्रस्थानबर्वपत्रे ६

CC-0 Panjab University Chandigarh. An eGangotri-Vaidika Bharata Initiative